काशीविद्यासुधानिधिः ।

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

VOL. XIX.

PRINTED AND PUBLISHED BY THE PROPRIETORS,

E. J. LAZARUS AND CO.,

BENARES.

1897.

INDEX TO VOLUME XIX. NEW SERIES.

Extra Pages.

Supplement.

ानुभवात् स्वविषयमबाधितं व्यवस्थापयेत् अस्वातन्त्र्यादिविचार-
स्त्वत्र प्रकृतानुपयुक्तः । न तृतीयः यथार्थस्मृतौ विरोधाभावात्
सर्वाऽपि स्मृतिरयथार्था अतीतस्य वर्तमानतयाऽवभासादिति चेन्न ।
अतीततयाऽपि प्रायशः स्मृतिभिरर्थोल्लेखात् प्रच्युततदाकारस्य तद्व-
त्तया भासनादयाथार्थ्यमिति चेन्न । स्मृतिप्रमोषे तदभावात् अती-
तादिविषयानुमानानामपि तत्प्रसङ्गाच्च । तर्हि पाकरक्तेऽपि श्याम-
त्वधीरयथार्था स्यादिति च मन्दम् । प्राचीनश्यामताबुद्धौ विरोधा-
भावात् । एतेन स्मृतिर्न बाह्यविषया नष्टेऽप्यर्थे स्मृतिदर्शनादिति
वदन्तोऽपि निरस्ताः । एवम्प्रत्यभिज्ञा स्थिरविषयेति सिद्धे सोऽह-
मिति धीश्चात्मनः स्थिरत्वमुल्लेढि तदहं स्मरामीति स्मृतिमात्रेण
चेतत्सिद्धम् । ननु विरुद्धानुपहितविषयेत्यसिद्धं कुर्वदकुर्वत्क्षणयोः
शक्त्यशक्तिभ्यां वैजात्यादित्यत्राह । नैकस्मिन्निति । कुर्वतोऽकुर्वत-
श्चैकत्वेऽङ्गीक्रियमाणेऽपि शक्त्यशक्तिरूपविरुद्धधर्माध्यासो न स्यादि-
त्यर्थः शक्तश्चेत्कुर्यादेव न करोति चेदं कुसूलनिहितं बीजमिति
प्रसङ्गतद्विपर्ययाभ्यां शक्त्यशक्तिसिद्धिरिति चेन्न । शक्तस्यापि करणा-
करणयोः सहकारिसन्निध्यसन्निधिप्रयुक्तत्वात् तदाह कृतितदित-
रयोरिति । साह्यं सहभावः कदाचित्पुष्कलैः सहकारिभिः साह्यं
कदाचिद्विकलैरिति प्रयोजकभेदेनेत्यर्थः । अकुर्वत्स्वभावस्य कथं सह-
कारिभिरपि कुर्वत्ता कुर्वत्स्वभावस्य वा कथं तद्विरहात् तदभाव
इति चेन्न । सहकारिसन्निधौ कुर्वत्तया तदभावे चाकुर्वत्तया स्वभा-
वव्यवस्थासिद्धेः । परसापेक्षः कथं स्वभाव इति चेन्न । स्वहेतुसापेक्ष-
त्ववदुपपत्तेः । अधिपतिसहकार्यालम्बनसमनन्तरप्रत्ययाश्चत्वारो वि-
ज्ञानोत्पत्तौ कारणमिति युष्मदुक्तिविरोधात् अर्थजत्वं च प्रामाण्यं
ब्रूषे उपच्छन्दनार्थमुत्तानवाक्यमिति चेन्न । अतिप्रसक्त्या सिद्धान्त-

मानस्य वा ऽतीतत्वमिह न प्रवर्तनीयं। ननु तत्त्वेदन्त्वे तावत् विरुद्धे अन्यथा यौगपद्ये विरोधाभावप्रसङ्गात् तत एव कालद्वयमप्येकस्य विरुद्धमिति तत्राह। स्वेनेति। पूर्वापरकालयोगोहि विरुद्धः स्वेनोपाधिना ऽवच्छिन्नस्यैकस्य कालस्यावान्तरोपाधिभिर्नानात्वेऽपि तत्तदुपाधीनामेव तत्तदवान्तरकालद्वयान्वयविरोधः अन्यापेक्षया पूर्वापरकालयोरन्यस्य विरुद्धत्वे क्षणकालस्याप्यन्यापेक्षया पौर्वापर्यात्तत्कालवर्तित्वमपि वस्तुनो विरुद्ध्येत क्षणकालसम्बन्धो वस्तुनः काल्पनिक इति चेत् ततोऽपि माध्यमिकोत्थानम्। ननु स्वरूपसत्यता क्षणसम्बन्धित्वं च साध्यते न केवलं क्षणकालमात्रसम्बन्धित्वम्। अतस्तुर्यबौद्धात् त्रयाणां विशेष इति तर्हि सिद्धसाधनम् अतः क्षणिकपक्षे स्थिरपक्षे वा स्वाभावकाले वृत्तिर्विरोधाद्वारणीया न तु स्वकालवृत्तिरिति भावः। अत्र च विरोधानवस्थयोः शङ्कापि नास्तीत्याह। काल इति। न ह्ययमपि काल एतस्मिन्काले किमुत कालान्तरं तत्कालोऽपि न तस्मिन्काले किमुतायम् अत एव तत्कालतत्कालो वा कालान्तरं वाऽनपेक्ष्य एकस्मिन्वस्तुनि कालद्वयं सम्बध्यत इति स्थिते कथंचिदप्यनवस्थाविरोधयोर्नावकाशः तथाऽपि कालद्वयंपरस्पराभावनान्तरीयकं तदात्मकं वा कथमेकत्र स्यादिति चेन्न। कालद्वयस्यान्योन्यस्मिन्नभावेऽपि तदुभयसम्बन्धिनि वस्तुन्यभावाभावात् यस्तु तस्मिन्वस्तुन्यसम्बद्धः कालः तस्य तत्र सद्भावं न ब्रूमः न हि वयं नित्यानित्यविभागं निराकुर्मः॥ २६॥ अथ प्रत्यक्षेणैव प्रत्यभिज्ञाप्रत्यक्षस्य विरोधं भावानां क्षणिकत्वसि[द्धिं] च शङ्कते। प्रत्यक्षमिति।

मू० प्रत्यक्षं वर्तमानं प्रथयति यदिहावर्तमाना-
द्विभक्तं तस्मात्तेनैव सिद्धं क्षणिकमिति न

सत्तावदित्यप्रतीतेः । तत्कालासत्त्वमेव ह्यपनयति सतो वर्तमानत्वबोधः कालेऽन्यत्रापि सत्त्वं प्रमितमिति कथं तद्विरोधप्रसङ्गः॥ २७ ॥

अस्मदादिप्रत्यक्षं तावद्वर्तमानमात्रविषयमिति सर्वसंमतम् । अन्यथा दृश्यमानानां पदार्थानां तत्क्षणापेक्षया पूर्वापरविशेषाणामपि प्रत्यक्षत्वप्रसङ्गात् तस्मादगृहीतपूर्वापरविशेषं वर्तमानग्राहि प्रत्यक्षमवर्तमानाद्व्यावृत्तमेव स्वविषयं गृह्णाति एतदेव च क्षणिकत्वं वस्तूनां यदपूर्वोत्तरत्वम् । अतस्संस्कारनिरपेक्षप्रत्यक्षबाधिता प्रत्यभिज्ञा देशान्तरस्थग्राहिशुक्तिरूप्यधीवत् संस्कारोपनीतकालान्तरस्थभेदसंवृत्त्या तस्मिन्निदन्त्वमस्मिन्वा तत्त्वमारोप्य कल्पितैक्यविषयेति अत्र प्रत्यक्षवृत्तान्तानभिज्ञोक्तिरियमित्यभिप्रायेण प्रतिवक्ति न सदिति । प्रत्यक्षस्य कालान्तरसम्बन्धप्रतिक्षेपकत्वाभावमाह । तावदिति । वर्तमानत्वविधिरेवावर्तमानत्वनिषेधात्मा तावन्मात्रकालवर्तित्वं नियच्छेदित्यत्राह । तत्कालेति । तत्कालसत्त्वविधिर्हि तदानीमसत्तां निरुन्ध्यात् न तु कालान्तरसत्तामित्यर्थः तथाऽपि इदङ्कारवता प्रत्यक्षेण कालान्तरसत्त्वस्यानालम्बनात् तत्प्रतिक्षेप इति चेत्तत्राह । कालेऽन्यत्रापीति । अयम्भावः यथेदमिति तत्कालसत्ता गृह्यते तथा तदिदमिति कालद्वयसत्त्वमपि प्रत्यक्षेणैव गृहीतम् । एवं सति न्यूनाधिकविषयतामात्रमिह प्रत्यक्षयोर्न विरुद्धविषयत्वम् । अन्यथातिप्रसङ्गादिति. अल्पविषयस्य प्राबल्यमालम्भविधौ दृष्टमिति चेन्न विरोधे सत्येव बलाबलविमर्शात् इह तु विरोध एव न सम्प्रस्ति अपि च प्रत्यक्षं किं वर्तमानत्वेन स्वविषयं गृह्णाति उत वस्तुवृत्त्या वर्तमानं नाद्यः त्वन्मते प्रत्यक्षतयाऽभिमतस्य निर्विकल्पकस्य

वि*शिष्टबोध नाशक्तेः सविकल्पकस्य तु प्रत्यक्षत्वानभ्युपगमात् । न द्वितीयः इन्द्रियसंयुक्तक्षणस्य तज्जन्यज्ञानकालेऽतीतत्वात् तदुत्तरक्षणस्य स्वपूर्वक्षणेन्द्रियसम्प्रयोगायोगेन तज्जन्यधीविषयत्वासंभवात् तदातनाक्षिसम्प्रयोगस्य तु तात्कालिकबुद्धिहेतुत्वासिद्धेः अतस्ते कथं प्रत्यक्षं वर्तमानग्राहि अस्मन्मते त्विन्द्रियसम्प्रयोगस्य तद्विशिष्टवस्तुनस्तदुपहितकालांशस्य च स्थायित्वेन धीक्षणानुवृत्तौ तद्विषयतया प्रत्यक्षोदयात् सम्प्रयोगानन्तरक्षणे धीरपि निर्वर्त्यते अतो नासम्प्रयुक्तं नास्थिरं नावर्तमानं वा प्रत्यक्षमिति ।

पूर्वापरबहुव्यक्तिव्याप्तिग्रहणसम्भवा ।
न काचिदपि युक्तिः स्यात् सर्वक्षणिकवादिनः ॥ २७ ॥

ननु जातस्य हि ध्रुवोमृत्युरिति प्रसिद्धम् अतस्सतां सत्तानुबन्धी विनाशः स्वरूपवन्न हेतुसापेक्षः झटित्येवापतेत् तस्मात् सर्वं क्षणिकमित्यनूद्य परिहरति । उत्पन्नानामिति ।

मू० उत्पन्नानां विनाशे ध्रुवभवितृतया हेत्वपेक्षाविहीने जन्मन्येवोपरोधात्क्षणिकमिह जगत्सर्वमित्यप्यसारम् । लिङ्गं ह्यैष्यत्त्वमात्रं जननविधुरता तत्क्षणानुक्षणत्वे तत्त्वं तज्जन्यता वा तदिदमनियमासिद्धिबाधादिदूष्यम् ॥ २८ ॥

असारं न्याय्यादन्यदित्यर्थः । तत्र हेतुं विकल्पयति । लिङ्गमिति । एवं विकल्पिते यथासम्भवं दोषानाह । तदिदमिति । तथा हि तत्राद्ये तावद्यत् यस्य ध्रुवं भविष्यति न तत्तस्य हेतुसापेक्षं नाशश्च

*विकल्पेति पु॰ पा॰ ।

जातानां ध्रुवभावीत्युक्तं स्यात् तदा कस्यचिदङ्कुरस्य सामग्रीप्रवाहवशात् ध्रुवं भविष्यद्भिः पत्रपुष्पादिभिर्घटादीनां कपालादिभिरप्यनैकान्त्यं सर्वत्र चैकसन्तानोत्तरक्षणैः । न हि ते तन्निरपेक्षाः तथा-सति प्रागेवोपनिपाते कथं तत्र सन्तानत्वमपि पूर्वक्षणानामर्थक्रियाविरहात् असत्त्वं च स्यात् चार्वाकवादः । द्वितीये तु यद्यस्यानुत्पन्नमनुबन्धि न तद्धेत्वपेक्षं यथा गोरश्वापोह इति स्यात् तथाच हेत्वसिद्धिः प्रतियोगिवत्स्वोचितहेतुजन्यत्वात् मुद्गरादयोऽपि सभागसन्तानमात्रारम्भकाः न तु नाशजनका इति चेन्न दीपादिसन्तानान्ति*मध्वंसकेषु तदसिद्धेः । न हि तत्र विभक्तसूक्ष्मावस्थान्तरापत्तिमिच्छसि अन्वयव्यतिरेकाविशेषे व्यवस्थापकाभावात् निस्स्वभावतया तुच्छस्य हेत्वपेक्षाविरहो व्यवस्थापक इति चेन्न । प्रतियोगिवदेव नियतकालतया प्रमितस्यात्यन्ततुच्छत्वायोगात् खपुष्पवच्चानादित्वप्रसङ्गेन सर्वभावासिद्धिप्रसङ्गात् । ध्वंसस्य च तुच्छत्वे तत्कालेऽपि स्वकाल इव भावानां सत्त्वप्रसङ्गाच्च । तथा च क्षणभङ्गं प्रतिज्ञाय स्थिरवादं साधयसि कीदृशं च ध्वंसस्य निस्स्वभावत्वं यदि यत्किंचित्स्वभावविरहः तत्स्वलक्षणेऽपि समानं सर्वस्वभावविरहस्तु ध्वंसेप्यऽसिद्धः अन्यथा कथमस्य पक्षीकारः ध्वंसरूपतया सिद्धस्येति चेत् । तर्हि तत्स्वभावस्य कथं सर्वस्वभावविरहः अपि चास्य प्रागसत्त्वे हेत्वपेक्षा दुर्वारा प्राक्सत्त्वे तु भावापह्नवः तत एवाभावस्याप्यभाव इति सर्वाभावः स्यात् तृतीये च स एव क्षणो यस्य स तत्क्षणः तस्य भावस्तत्क्षणत्वं तदा ध्रुवभावि सहभावीत्यर्थः । अयमपि हेतुरसिद्ध एव न च प्रध्वंसप्रतियोगिनोर्यौगपद्यसम्भवः सम्भवे वा भावः पश्चादपि किं न स्यात् । अनुक्षण-

* संतानानामन्तिमध्वंसकेष्विति पा० ।

शब्दोपचरितस्तु हेतुरनन्तरक्षणवर्तित्वं तत्रापि भावोत्पत्त्यपेक्षया-नन्तर्यविवक्षायामसिद्धिः भावस्वरूपापेक्षया त्वानन्तर्यनियमे भाव एव हेतुः स्यादिति कथं हेतुनैरपेक्ष्यं तदतिरिक्तनैरपेक्ष्यं विवक्षितमिति चेन्न । तद्वदेव सहकारिणामप्यवर्जनीयत्वादिति पञ्चमे त्वसिद्धिर्व्याघातश्च । ननु कथं ध्रुवभाविशब्देन तत्त्वविवक्षा शङ्क्यते इत्थं यद्यतो भिद्यते न तत्तस्य ध्वंसः यथा रूपस्य रसः ध्वंसस्तु कस्यचिदेव भवतीति तदात्मकः । अतः स्वोत्पत्तावेव स्वात्मनि ध्वंसे सन्निहिते कथं क्षणान्तरं प्राप्नुयादिति तत्रेदं ब्रूमः ततो भिन्नस्यापि तत्प्रध्वंसत्वं यथादर्शनं स्यात् अन्यथा भिन्नस्य भिन्नकालस्य च कारणत्वादिकमपि हीयेत । अविशेषात् । स्वात्मन एव स्वनाशात्मकत्वे पश्चादिवस्वकालेऽपि स्वाभावसिद्धेः स एव सर्वापह्नवस्स्यादिति तज्जन्यत्व हेतौ प्रतिज्ञाविरोधः तज्जन्यत्वं हि तद्धेतुकत्वं तेन कथं हेतुनैरपेक्ष्यसाधनं हेत्वन्तरनैरपेक्ष्यमपि च दुर्वचमित्युक्तम् । अतः क्रमभाविसहकारिविशेषात् कार्यान्तरमिव स्वनाशमपि स्वयमुत्पादयतु नाम न ततः क्षणिकत्वं सिद्ध्येदिति बाधश्चामीषां प्रागुक्तप्रत्यभिज्ञया स्पष्टः । आदिशब्दः प्रदर्शितयोरपसिद्धान्तप्रतिज्ञाविरोधयोः संग्रहार्थः ॥ २८ ॥ प्रतिकूलतर्कप्रतिहतिमप्याह । कालानन्तर्येति ॥

सू० कालानन्तर्यसाम्ये क्षणिकवपुषि ते देशकालाद्युपाधौ सर्वे पूर्वे भवेयुस्तदुपरि भवतां कारणानि क्षणानाम् । सन्तानैक्यव्यवस्था निजफलनियतिर्वासनानां च न स्यात् कार्पासैरक्तताक्रमविपरिणमत्संस्कृतद्रव्यतस्स्यात् ॥ २९ ॥

आदिशब्देन दिक्संग्रहः । अयमर्थः सर्वं क्षणिकमिति वदतस्ते कस्यचित्किञ्चित्प्रति कार्यत्वं किमनन्तरकालभावित्वमात्रात् उत तद्विशेषात् । आद्ये त्रैलोक्योदरवर्तिनः पूर्वक्षणास्सर्वे तदनन्तरभाविनां सर्वेषां क्षणानां कारणानि स्युः । द्वितीयेऽप्यसौ विशेषः किं देशाद्युपाधिनिरपेक्षः तत्सापेक्षो वा नाद्यः अतीन्द्रियस्य तु तस्यादर्शनात् दृश्यस्य तु वह्निधूमत्वादेरतिप्रसङ्गित्वात् । न द्वितीयः यस्मिन्देशादौ यद्वर्तते तस्मिन्जायमानस्य तत्कारणमिति नियमो न सम्भवति कार्यक्षणस्य कारणदेशादिवर्तित्वे कारणदेशादेः क्षणद्वयापत्तेः तथा चानन्तरक्षणयोगेऽपि को बाधः । अतः स्थिरदेशादिकमनभ्युपगच्छतस्तत्प्रयुक्तनियमायोगात् अतिप्रसङ्गस्तदवस्थ एव । ननु यद्देशादिक्षणवर्ती कारणक्षणः तत्कार्यदेशादिक्षणे स्वकार्यमारभत इति नियम इति चेन्न । देशादिक्षणद्वयेऽपि कार्यकारणव्यवस्थाया दुःसा*धत्वात् तदेतदभिप्रेत्याह । सन्तानैक्यव्यवस्था न स्यादिति । यदप्याहुः ।

यस्मिन्नेव हि सन्तान आहिता कर्मवासना ।
फलं तत्रैव बध्नाति कार्पासेरक्तता यथा ॥ इति ।

कर्मवासनेत्यनुभववासनाया उपलक्षणं तदपि दूषयति निजफलनियतिर्वासनानां च न स्यादिति । सन्तानैक्ये सिद्धे हि यस्मिन् तस्मिन्निति निर्देशः स्यादिति भावः । दृष्टान्तस्तर्हि कथमित्यत्राह । कार्पास इति । रञ्जकद्रव्यविशेषसंस्कृतबीजावयवानुवृत्त्या कार्यस्रोतोविशेषनियमे यथादर्शनं तत्र तादृशफलसिद्धिर्युक्ता त्वन्मते तु तदेतत् संततिव्यवस्थापकाभावात् तत्रैव फलं बध्ना-

* दुःस्थत्वात् ।

तीति दुश्शको नियम इति भावः ॥ २६ ॥ क्षणभङ्गसाधनान्तरं दूषयितुमनुवक्ति । मेयत्वाद्यैरिति ॥

मू० मेयत्वाद्यैर्विगीतं क्षणिकमिह जगत्स्यात्क्षणोपाधिवच्चेद् बाधो दृष्टान्तहानिः स्थिर इति विदितो यत्क्षणस्याप्युपाधिः ॥ सामग्रीकार्यशून्या क्षण इयमपि तद्धेतुसंघो न चासौ हेतुर्नान्यः स्थिरास्ते क्रमवदुपधिवत्स्यात्क्षणत्वं स्थिरेऽपि ॥ ३० ॥

इह पक्षदृष्टान्तविकल्पार्हे वस्तुजाते विगीतं क्षणिकं मेयत्वात् सत्त्वात् भासमानत्वाद्वा । अत्र स्यादित्यनेनाक्षणिकतायामसत्त्वप्रसङ्गः सूच्यते । अर्थक्रियाकारित्वं हि सत्त्वं तच्च कुर्वत्क्षणस्यैवास्ति अकुर्वत्क्षणस्य तु तदभावादसत्त्वं प्राप्तमिति घटजलधरादौ दृष्टान्तिते साध्यवैकल्यं क्रमेण कथंचित्परिहर्तव्यम् इह तु न तथेत्यभिप्रायेण क्षणोपाधिवचनम् इतिरौचित्यादाकृष्टव्यः । अत्र बाधोक्तिस्साध्यविकल्पेन बहुधा भाव्या तथा हि क्षणिकत्वं नाम क्षणसम्ब*न्धवत्त्वं वा क्षणकालसम्बन्धित्वं वा क्षणमात्रवर्तित्वं वा क्षणद्वयसम्बन्धशून्यत्वं वा क्षणकालत्वं वा तदुपाधित्वं वा नाद्यः सिद्धसाधनात् स्थिरमपि न स्सामग्र्या क्षणे सम्भवतीति । न द्वितीयः तत एव कालमेवानिच्छतस्ते कोऽसौ क्षणकालः कश्च तत्सम्बन्धः तदभ्युपगमे सिद्धान्तबाधः । अत एव न तृतीयोऽपि प्रत्यभिज्ञया च बाधः प्रागुक्तः । न चतुर्थः उक्तबाधादेव क्षणेतरस्य तथात्वे खपुष्पवदसत्त्वप्रसङ्गस्य दुर्वारत्वात् त्वन्मते च खपुष्पनिदर्शनेन प्रसञ्जनं युक्तम् एवमपि हि ब्रूथ ॥

* क्षणसंभवत्त्वमिति पाठान्तरं युज्यते ।

तस्माद्वैधर्म्यदृष्टान्ते नेष्टोऽवश्यमिहाश्रयः ।
तदभावे च तन्नेति वचनादेव तद्गतेरिति । अन्येऽपि केचिदाहुः ॥
यस्मिन्ननित्यता नास्ति कार्यताऽपि न विद्यते ।
तस्मिन्यथा खपुष्पादाविति शक्यं हि भाषितुम् ॥ इति ॥

न पञ्चमः तद्देशतद्वर्तिनोरिव कालतद्वर्तिनोरैक्यस्य प्रत्यक्षेण बाधात् । तत एव न षष्ठः यदा हि घटादयः स्वरूपेण क्षणोपाधयः स्युः कालतारतम्यधीः कुत्रापि न भवेत् तथा च स्थिरशङ्काया एवानुदयात् निर्विषयमनुमानं स्यात् सर्वस्य च त्रिलोकस्य स्वप्रयोजनेच्छया*ऽपि प्रवृत्तिः सा फलार्थिनः फलिनश्च भेदे बाध्यते ॥

न च त्वमपि कृत्येषु निरन्वयविनाशवत् ।
मत्सन्तानसमृद्ध्यर्थमिति मत्वा प्रवर्तसे ॥

तदिह स्वाभिप्रायादिबाधश्च आत्मदृष्टान्तेन च प्रत्यनुमानबाधः । तच्च साध्यवैकल्यं च घटादीन्निदर्शयद्भिः युष्माभिरिव क्रमात्प्रशमनीयम् ॥ अस्ति च सोऽहमिति प्रत्यभिज्ञयाऽस्माकं तत्सिद्धिः आलयविज्ञानसन्ततिविषयेयमिति चेत् इदमपि परिभाषामात्रं प्रमाणाभावात् । नान्यदृष्टं स्मरत्यन्य इति परिभाषाया निर्बाधत्वाच्च निरर्थकं चेदमालयविज्ञानसन्ततिकल्पनं तस्य प्रवृत्तिविज्ञानेन सह सर्वप्रकारसम्बन्धायोगादिति । अथ क्षणोपाधिवदित्युक्तं प्रतिवक्ति । दृष्टान्तहानिरिति । अक्षणिकत्वे कथं क्षणोपाधिरित्यत्र गूढाभिप्राय आह । सामग्रीति । कार्यशून्या कार्यप्रागभावसमन्वितेत्यर्थः । क्षणः क्षणोपाधिरिति यावत् तथाऽपि तस्य क्षणिकत्वं न प्रतिक्षिप्तमित्यत्राह । इयमपीति । ननु हेतूनां संघोऽपि हेत्वनति-

* प्रयोजनेच्छया हि पा· ।

रिक्तश्चेत् तेषां भवत्पक्षे स्थिरत्वात् न क्षणोपाधित्वम् । अतिरिक्तोऽप्यक्षणिकः क्षणोपाधिर्न स्यादित्यत्राह । न चेति । अयम्भावः संघशब्दो न सम्बन्धमात्रवाचकः संबन्धशब्दपर्यायत्वाप्रसिद्धेः न च तत्तत्सम्बन्धिस्वरूपवाचकः प्रत्येकमप्रयोगात् अतः केन चिदुपाधिना संगृहीतास्त एव संघशब्दार्थः । तत्र यदि त एव क्षणोपाधितया दृष्टान्तीक्रियन्ते तथा सति स्थिरास्त इति । ननु तत्संहतिहेतुरुपाधिदृष्टान्तः स्यात् मैवम् । न हि नः केवलनित्यात् केवलानित्याद्वा कस्यचिदपि कार्यस्योत्पत्तिः किन्तु तत्समुदायात् तत्र नित्यांशे तावत्क्षणिकशङ्काऽपि नास्ति अनित्येऽपि यतश्चिरोत्पन्नाद्धेतोस्संघभावः सोऽपि स्थिरतरः । यस्तु चरमस्सहकारी स च स्थिर एव सन् स्वकार्यप्रागभावोपहितरूपः कालमवच्छिन्दन् क्षणोपाधिरित्युच्यते तदुपधानं च तस्य प्रत्यक्षादिसिद्धम् । न चात्र क्षणिकं किंचित्सिध्यति अनवच्छिन्नस्य कालतत्त्वस्य कालपरिच्छेदलक्षणानित्यताभावात् ॥

क्रियादिश्च स्थिरोऽप्येवं क्षणोपाधिर्विशेषकैः ।
तत्प्रकर्षनिकर्षैस्तु तत्तत्कालप्रकल्पना ॥

इयं तावत्सर्वलोकसाक्षिकी क्षणकालावच्छेदकयोः प्रागूर्ध्वव्यापिनोरक्षणिकत्वात् तदवच्छिन्नस्य कालस्य तु क्षणत्वादेव न क्षणिकत्वमिति वस्तुस्थितिः । त्वत्पक्षे तु क्षणकालावच्छेदः क्षणोपाधिरसिद्धः कालस्यैवाभावात् न चासिद्धोऽपि साध्यः स्वमतविरोधात् । यथाहुः ।

योऽपि तावत्पराऽसिद्धः स्वयं सिद्धोऽभिधीयते ।
भवेत्तत्र प्रतीकारः स्वतोऽसिद्धे तु का क्रियेति ॥

अनन्यावच्छेदार्थेन स्वरूपेणैव कश्चित् क्षणशब्दवाच्य इति चेत् तर्हि क्षणभङ्गसाधनात्पूर्वमसिद्धः कथं दृष्टान्तः स्यात् ।

उत्तरप्रागभावाप्रपूर्वध्वंसैककालतः ।
मध्यमक्षणतादृक्त्वं व्यवस्थाप्यं त्वयाऽप्यतः ॥

ननु क्षणक्षरणस्वभावा प्रकृतिरिति हि भवत्सिद्धान्तः अत्र प्रतिक्षणमुदयविलयिनो विकाराः क्षणिका एवेति तद्दृष्टान्तेनान्येषां युष्माभिः किं नानुमीयत इति चेत् अशक्यत्वादयं सुहृदुपदेशस्त्यज्यते सर्वक्षणिकत्वं साधयितुमुपक्रम्य स्थिरद्रव्यवृत्तिक्षणिकविकारवदिति कथं दृष्टान्तयेम तेषु च न त्वदभिमतं क्षणिकत्वं प्रदीपादिवदाशुतरवह्निनाशित्वमात्रेण क्षणिकतोक्तेः तदेतदभिप्रेत्याह । क्रमवदिति । क्षणत्वं क्षणोपाधित्वमित्यर्थः ।

द्वयोरयुगपद्दृष्टिर्युगपच्च यथायथम् ।
अशक्यापन्हवा तस्मादस्मदुक्तैव पद्धतिः ॥

इह च प्रतिसंख्याप्रतिसंख्यानिरोधयोः निरन्वयविनाशत्वे परोक्तं निदर्शनं दूषयति । दीपादीनामिति ॥

सू० दीपादीनां कदाचित्सदृशविसदृशाशेषसन्तत्यपेते ध्वंसे दृष्टेऽप्यशक्या तदितरविषयेऽन्वयध्वंसक्लृप्तिः । बाधादेर्दर्शितत्वादपि च दृढमिते सान्वयेऽस्मिन्घटादौ दुर्दर्शावस्थया स्युः पयसि लवणवल्लीनदीपादिभागाः ॥ ३१ ॥

आदिशब्देन क्षणरुचिबुद्बुदादिसंग्रहः ।

स निरन्वयनाशस्स्याद्धर्मो धर्म्यपि वा पुनः ।
पूर्वसंघातभागो वा यद्भावेनानुवर्तते ॥

उत्पत्तिश्च तथाभूता निरन्वयसमुद्भवा ।
तावुभौ सर्वभावानां नियताविति सौगताः ॥

यो विनाशस्स निरन्वयः यथाऽन्त्यदीपस्य, अस्ति च विनाशो जातानाम् अतस्सोऽपि निरन्वय इति निरन्वयध्वंसक्लृप्तिर्नै शक्या तदुपपादयति बाधादेरिति । प्रत्यभिज्ञाबाधस्य प्रवृत्त्याद्यनुपपत्तीनां च दर्शितत्वात् विपरिवर्तश्च युक्त इत्याह । अपि चेति ॥ अन्त्यदीपविनाशस्सान्वयः विनाशत्वात् पटादिविनाशवत् । साध्यविकलोदृष्टान्त इति चेन्न । संघातांशानां वा गन्धादिधर्माणां वा श्यामरक्तादिधर्मिणां वा यथासंभवमनुवृत्तेर्दृढोपलब्धत्वात् प्रत्यक्षबाधपरिहाराय दुर्दर्शावस्थत्वोक्तिः । स्युरित्यनेन दृश्यावस्थनिवृत्तावपि स्वरूपसत्त्वं सूच्यते । ननु पयसि लवणवदित्ययुक्तं तत्रापि निरन्वयविनाशात् तन्न रसेन सूक्ष्मावयवानुमानात् । दीपावयवेषु लिङ्गमपि नास्तीति चेन्न । दीपोर्ध्वदेशिनां किञ्चिदौष्ण्योपलब्ध्या दीपावयवसंक्रान्तेस्सुगमत्वात् प्रभूतदीपपार्श्ववर्तिनां च तापस्वेदादिस्तत एव एवमन्त्यदीपनाशेऽप्यदृश्यावयवविसर्पस्सिद्धः । अतो विनष्टदीपभागानुपलब्धेरदृश्यावस्थानिबन्धनत्वादनन्यथासिद्धप्रत्यक्षसिद्धः सान्वयविनाशदृष्टान्त एव साधीयान् । अन्त्यदीपादेश्च यदि न किञ्चिदुपादेयं ततोऽर्थक्रियाविरहादसत्त्वं स्यात् । बुद्ध्यादिरर्थक्रियाऽस्त्विति चेन्न । तस्यानियतत्वात् विनाशस्तर्ह्यर्थक्रियास्त्विति चेन्न । तस्य ते तुच्छत्वात् ध्रुवभावित्वेन वा अहेतुकत्वाभ्युपगमाच्च एवमन्त्यदीपासत्त्वे च तत्कारणपरम्पराया अपि तथात्वं स्यादिति ॥ ३१ ॥ इति क्षणभङ्गनिरासः ॥

ननु साध्यसाधनभावे सिद्धे हि प्रस्तुतं पक्षचतुष्टयं सिद्ध्येत् स एव नास्तीति चार्वाक उत्तिष्ठते । सत्वे सत्व इति ।

मू० सत्त्वे सत्त्वेऽपि पूर्वं किमपि गगनतत्पुष्पवन्नैव साध्यं हेतुप्राप्तिर्न पश्चाद्भवितुरघटितोत्पादनेऽतिप्रसङ्गः । जन्यं जन्मान्यथा वा द्वयमसदनवस्थानकार्यत्वतिभ्यामित्याद्यैर्हेतुसाध्यं न किमपि यदि न स्वक्रियादेर्विरोधात् ॥ ३२ ॥

यदि कार्यं कारकव्यापारात्पूर्वमस्ति तदा पूर्वसिद्धगगनादिवत्किमपि न कार्यं स्यात् अथ तथा नास्ति तदाऽपि खपुष्पवन्न कार्यं न चासत: सत्त्वापादानसम्भव: । न हि नीलं शिल्पिसहस्रेणापि सितीकर्तुं शक्यम् इति कार्यं च कारणेन सह पूर्वं पश्चाद्वा जायते । आद्ये किं कस्य कारणं कार्यं वा स्यात् द्वितीयेऽपि तत: पूर्वस्य कथं तज्जन्यत्वं वैपरीत्यापातश्च लोकव्यवहारानुरोधात् । तृतीये हेतु: स्वेन प्राप्तं साधयेत् अप्राप्तं वा आद्ये प्राप्तत्वादेव पूर्वसिद्धेर्न साध्यत्वं, न चोत्तरकालीनस्य पूर्वकालीनेन प्राप्ति: उभयस्वरूपसिद्धापेक्षत्वात्तस्या: । तदिदमाह । हेतुप्राप्तिरिति । द्वितीयमपि दूषयति । अघटितेति । अप्राप्तोत्पादने सर्वस्मात् सर्वमुत्पद्येत प्रकाश्यमप्राप्य वा दीप: प्रकाशयेत् दाह्यमप्राप्य वा दहनो दहेत् पुनर्विकल्पान्तरेण विहतिमाह । जन्यमिति । घटो जायत इत्येतौ तावन्न पर्यायौ सह प्रयोगात् यावद्विनाशं जायत इति प्रयोगप्रसङ्गाच्च पटो जायत इति प्रयोगश्च न स्यात् घटपटशब्दयोरपर्यायत्वात् अत: कार्यस्वरूपातिरिक्तं जन्म तच्च जन्यमजन्यं वेति विकल्प्य द्वयमप्ययुक्तमित्याह । द्वयमसदिति । क्रमात् बाधकमाह । अनवस्थानकार्यत्वतिभ्यामिति । जन्मनो जन्यत्वं हि जननकर्मतया अतस्तस्यापि जन्म स्वीकर्तव्यम् एवं तस्यापीत्यनवस्था । अजन्यत्वे तज्जन्मनोऽनादित्वात् तद्वतो

घटादेरपि तथात्वं स्यात् तथा च कार्यत्वहतिः स्यादिति। आदिशब्देन भिन्नाभिन्नत्वादिविकल्पक्षोभसंग्रहः। हेतुश्च साध्यं च हेतुसाध्यं हेतुना साध्यं वा ईदृशानां तर्काणां युक्ताङ्गहान्यादिकमभिप्रेत्याह। नेति। साधारणदुष्टत्वमाह। स्वक्रियादेरिति। इह तावदनिष्टकोटिभङ्गेन प्रत्याख्येयः अन्यथैवमुत्तरगतिः। यदत्र पूर्वमसत्त्वे कार्यत्वं न स्यादिति तद्विरुद्धभाषितं प्रागसत्त्वविशेषितं सत्त्वमेव हि कार्यत्वं तत्र च प्रागसत्त्वे प्रागसत्त्वमेव न स्यादिति वा तद्विशिष्टं न स्यादिति वा सत्त्वमात्रं न स्यादिति वा प्रसङ्गार्थस्स्यात् तत्र न प्रथमः कस्यापि स्वाभावेन व्याप्त्यभावात् अन्यथा शून्यवाद एव स्यात्। अनेकान्तवादो वा। न द्वितीयः तदसत्त्व एव तद्विशिष्टसिद्धेः न हि विशेषणसत्त्वं विशिष्टविरोधि। न तृतीयः असत्त्वस्य स्वकालसत्त्वेन विरोधग्रहणात् अन्यथा देशान्तरसत्त्वेऽपि विरोधप्रसङ्गेन स एवान्त्यबौद्धपक्षस्स्यात्। यत्तु पश्चाद्भाविनः कारणप्राप्तिर्नास्तीति तन्न पौर्वापर्यनियमलक्षणा प्राप्तिर्दृष्टत्वादनिवार्या। संयोगादिलक्षणा तु माभूदसङ्गत्वात्। ततश्च नातिप्रसङ्गः नियामकस्य सिद्धत्वात् प्रकाश्यदाह्यादिषु च यथादर्शनं कारणानां* मिथः-प्राप्तिरेवाङ्गं न तु कार्येण ज्ञानेन सह भस्मादिना वा। यस्तु जन्मनो जन्यत्वाजन्यत्वविकल्पेनातिप्रसङ्ग उक्तः नासावस्मत्पक्षे युक्तदोषः न हि वयमभिव्यक्तिं वा कारणसमवायादिकं वा जन्मेति ब्रूमः किन्तूपादानावस्थाविशेषं तस्य कार्यावस्थासामानाधिकरण्यव्यपदेशः तादात्म्येन तदाश्रयवृत्तेः, एवं ध्वंसादिसामानाधिकरण्यमपि यथायथमूह्यम्। ईदृशस्य जन्मन उपादानावस्थान्तरसाध्यत्वे कारणानवस्थामात्रमापतति सा च न दोष इति सर्वाविगीतं, यच्च भिन्नत्वे

* कारकाणामिति पु॰ पा॰।

नासमवायात्प्रयोजनेन ॥ २९ ॥

न, कालविधिर्न । प्रयोजनेन फलेन असमवायादसंबन्धादश्रवणादिति यावत् । फलवतो हि प्रधानत्वम् । इहाफलो बृहस्पतिसवो ऽङ्गमिति भावः ॥ २९ ॥

वैमृधादेः पौर्णमास्यङ्गत्वम् । अधि० १३ ।

उभयार्थमिति चेत् ॥ ३० ॥

संस्थाप्य पौर्णमासीमिन्द्राय वैमृधाय निर्वपेदिति । वैमृधयागः प्रकरणाद्दर्शपूर्णमासोभयार्थः श्रुतवाक्येन कालविधिरुत वाक्येन केवलपौर्णमास्यङ्गमेवेति संशये पूर्वपक्षमाह । उभयेति । स्पष्टो ऽर्थः ॥ ३० ॥

न शब्दैकत्वात् ॥ ३१ ॥

सिद्धान्तमाह । नेति । शब्दैकत्वाद् विधिप्रत्ययस्यैकत्वात् । एको विधिः उभयं संबन्धं कालं च विधातुमक्षम इति भावः ॥ ३१ ॥

प्रकरणादिति चेत् ॥ ३२ ॥

प्रकरणादुभयसंबन्धो ऽस्त्वित्याशङ्कते । प्रकरणेति ॥ ३२ ॥

नोत्पत्तिसंयोगात् ॥ ३३ ॥

दूषयति । नेति । उभयार्थो न । उत्पत्तिवाक्ये वैमृधोत्पत्तिवाक्ये पौर्णमासीशब्दसंबन्धात् । अस्य उभयार्थत्वं प्रकरणेनानुमितवाक्येन ततः प्रत्यक्षवाक्येन प्रकरणबाध इति ॥ ३३ ॥

अनुयाजादीनामाग्निमारुतोर्ध्वकालत्वम् । अधि० १४ ।

अनुत्पत्तौ तु कालः स्यात्प्रयोजनेन संबन्धात् ॥ ३४ ॥

प्रहृत्य परिधीन् हारियोजनं जुहोतीति किमङ्गविधिरुत कालविधिरिति संशये अङ्गविधिरिति पूर्वपक्षे सिद्धान्तमाह । अनुत्पत्ताविति । हारियोजनहोमोत्पत्तिवाक्यस्यान्यस्य सत्त्वेन अनुत्पत्तौ अस्योत्पत्तिवाक्यान्यत्वे सति प्रकरणेन ज्योतिष्टोमरूपप्रयोजनेन संबद्धत्वेन फलाकाङ्क्षाऽभावेन कालः कालमात्रविधिः स्यात् ॥ ३४ ॥

सोमादीनां दर्शपूर्णमासोत्तरकालत्वम् । अधि० १५ ।

उत्पत्तिकालविशये कालः स्याद्वाक्यस्य तत्प्रधानत्वात् ॥ ३५ ॥

दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेत्यत्र पूर्ववत्संशये सिद्धान्तमाह । उत्पत्तीति । उत्पत्तिकालयोरङ्गत्वकालविध्योः विशये संशये कालः कालविधिः स्यात् । कुतः, वाक्यस्योदाहृतस्य कालप्राधान्यात् । काल एव प्राधान्यात् । कालविधौ मुख्यतात्पर्यात् । अयं भावः । सोमस्य वाक्यान्तरेण फलसंबन्धादन्यप्रकरणाभावेन न तद्विधिः । नापि दर्शपूर्णमासविधिः । तत्समीपे विधिप्रत्ययाभावादगत्या कालविधिः । तत्रैव मुख्यं विधितात्पर्यमिति ॥ ३५ ॥

वैश्वानरेष्टेः पुत्रगतफलकत्वम् । अधि० १६ ।

फलसंयोगस्त्वचोदिते न स्यादशेषभूतत्वात् ॥ ३६ ॥

वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते इत्युक्त्वा यस्मिञ्जात एतामिष्टिं निर्वपति पूत एव तेजस्व्यन्नाद इन्द्रियावी पशुमान्भवतीति । इदं फलं पितुः पुत्रस्य वेति संशये अग्नीनादधीतेत्यात्मनेपदविरोधात्पितुरेवेति पूर्वपक्षे सिद्धान्तमाह । फलेति । फलसंयोगः अचोदिते शास्त्रतात्पर्याविषये पितरि न स्यात् । पितुः अनङ्गत्वात् फलस्य । यस्मिञ्जाते निर्वपति स फलभाग्भवतीति यत्तदोर्नित्यसंबन्धेन पुत्रमुद्दिश्यैव फलश्रवणाद् इति भावः ॥ ३६ ॥

वैश्वानरेष्टेः जातकर्मोत्तरकालत्वम् । अधि० १७ ।

अङ्गानां तूपघातसंयोगो निमित्तार्थः ॥ ३७ ॥

तत्रैव पुत्रे जात इति । पुत्रजननकाले इष्टिरिति यद्वा निमित्तार्थे सप्तमीति संशये पूर्वपक्षस्यादृढत्वात्सिद्धान्तमाह । अङ्गानामिति । अङ्गानां फलं प्रति अङ्गभूतानामुक्तेष्टीनामुपघातः पुत्रजन्मनि इत्यर्थो भाष्ये । संयोगः संबन्धः निमित्तत्वद्योतकः । लक्षणापत्तेरिति हेतुः पूरणीयः ॥ ३७ ॥

सौत्रामण्याद्यङ्गानां स्वकालकर्तव्यत्वम् । अधि० १८ ।

प्रधानेनाभिसंयोगादङ्गानां मुख्यकालत्वम् ॥ ३८ ॥

वाजपेयाङ्गत्वेन व्यवस्थितो बृहस्पतिसवः । स वाजपेयकाले ऽनुष्ठेय उत स्वकालइति संशये पूर्वपक्षमाह । प्रधानेनेति । अङ्गानां प्रधानेन प्रधानकालेन अभिसंबन्धात् । यः प्रधानकालः सो ऽङ्गानामिति वक्ष्यमाणत्वान्मुख्यस्य वाजपेयस्य कालत्वम् ॥ ३८ ॥

अपवृत्ते तु चोदनात्तत्सामान्यात्स्वकाले स्यात् ॥ ३९ ॥

सिद्धान्तमाह । अपेति । अपवृत्ते प्रयोगसमाप्त्यनन्तरं चोदनाद्विधानाद् वाजपेयेनेष्ट्वेति स्वभिन्नाङ्गकलापसहितप्रधानानन्तरं विधानादस्य वाजपेयप्रयोगबहिर्भूतत्वादिति भावः । तस्य बृहस्पतिसवस्य सामान्यात् प्रकृतिभूतज्योतिष्टोमकालत्वात् स्वकाले अनुष्ठानम् ॥ ३९ ॥

इति श्रीमज्जैमिनिसूत्रवृत्त्यां चतुर्थस्याध्यायस्य तृतीयः पादः ॥ ३ ॥

राजसूयेज्यानां विदेवनाद्यङ्गकत्वम् । अधि० १ ।

प्रकरणशब्दसामान्याच्चोदनानामनङ्गत्वम् ॥ १ ॥

अक्षैर्दीव्यति, राजन्यं जिनाति इत्यादयः अयागरूपाः अनुमत्यै पुरोडाशमष्टाकपालं निर्वपतीत्यादयो यागरूपाश्च क्रियाः पठित्वा तत्सन्निधौ, राजा राजसूयेन स्वाराज्यकामो यजेतेति श्रुतम् । तत्र राजसूयशब्द उभयसाधारण उत यागमात्रपर इति संशये पूर्वपक्षमाह । प्रकरणेति । प्रकरणे स्वाराज्यकाम इतिवाक्यसन्निधौ शब्दानां यागतद्भिन्नप्रतिपादकानां सामान्यात् तुल्यत्वाच् चोदनागम्यार्थानां सर्वेषामनङ्गत्वं प्रधानत्वम् ॥ १ ॥

अपि वा ऽङ्गमनिज्याः स्युस्ततो विशिष्टत्वात् ॥ २ ॥

सिद्धान्तमाह । अपि वेति । अनिज्याः यागभिन्नाः क्रिया अङ्गम् । ततः यागक्रियातः विशिष्टत्वाद्विशेषवत्त्वात् । अयं भावः । राजसूयशब्दस्य यद्यपि राज्ञा सूयते उत्पाद्यतइति व्युत्पत्त्या सर्वसाधारण्यं तथा ऽपि तस्य धात्वर्थे ऽभेदेन अन्वयाद्राजसूयनामकयागस्यैव फलेन संबन्धाद्यागमात्रं प्रधानमिति ॥ २ ॥

विदेवनस्य कृत्स्नराजसूयाङ्गत्वम् । अधि० २ ।

मध्यस्थं यस्य तन्मध्ये ॥ ३ ॥

राजसूये अभिषेचनीयाख्यः सोमयागो ऽस्ति । तत्संनिधौ अक्षैर्दीव्यतीति श्रुतम् । इदमभिषेचनीयाङ्गमुत यावद्यागाङ्गमिति संशये पूर्वपक्षमाह । मध्यस्थमिति । यस्य मध्यस्थं सन्निधिपठितं तत्तदङ्गं मध्ये, पाठादिति पूरणीयम् ॥ ३ ॥

सर्वासां वा समत्वाच्चोदनातः स्यान्न हि तस्य प्रकरणं देशार्थमुच्यते मध्ये ॥ ४ ॥

सिद्धान्तमाह । सर्वेति । सर्वासामङ्गं विदेवनं सर्वयागानां चोदनातः फलसंबन्धबोधकविधितस्तुल्यत्वात् । प्रधानत्वाविशेषादिति भावः । न हि तस्य सोमयागस्य प्रकरणमवान्तरप्रकरणमस्ति । उभयतः संदंशाभावादिति भावः । मध्ये पाठः देशार्थम् । वस्तुमात्रस्य देशं विना स्थित्यसंभवाद्यत्र क्व चित्पठितव्यं तत्रैव पठितमिति भावः ॥ ४ ॥

सौम्यादीनामुपसत्कालत्वम् । अधि० ३ ।

प्रकरणाविभागे च विप्रतिषिद्धं ह्युभयम् ॥ ५ ॥

राजसूयएव सौम्यं चरुं बभ्रुर्दक्षिणेति पठित्वा पुरस्तादुपसदां सौम्येन प्रचरन्तीति श्रुतम् । अयमुपसदङ्गं कालविधिर्वेति संशये पूर्वपक्षमाह । प्रकरणेति । प्रकरणस्य कथंभावाकाङ्क्षाया अविभागे ऽपि अविलक्षणत्वे ऽपि उभयं प्राप्तं सौम्यचरुमुद्दिश्योपसदङ्गत्वं तत्पूर्वकालविधिश्च विप्रतिषिद्धमपि वाक्यभेदग्रस्तमपि, उपसदङ्गं श्रुत्येति शेषः । षष्ठीश्रुत्या प्राधान्यमुपसदां, तृतीयाश्रुत्या चरोरङ्गत्वमिति भावः ॥ ५ ॥

अपि वा कालमात्रं स्याददर्शनाद्विशेषस्य ॥ ६ ॥

सिद्धान्तमाह । कालमात्रमिति । कालमात्रं विधीयते । विशेषस्य आग्निमारुतादूर्ध्वमनूयाजैश्चरन्तीत्युभयवादिसिद्धकालमात्रविधायकवचनाद्विशेषस्यादर्शनात् । यत्सौम्येन प्रचरन्ति तत्पूर्वमिति । उपसदामिति षष्ठ्याः पञ्चम्यर्थतया पुरस्तादित्यनेनान्वय इति भावः ॥ ६ ॥

आमनहोमानां सांग्रहण्यङ्गत्वम् । अधि० ४ ।

फलवद्वोक्तहेतुत्वादितरस्य प्रधानं स्यात् ॥ ७ ॥

वैश्वदेवीं सांग्रहणीं निर्वपेद्ग्रामकामइत्युक्त्वा ऽऽमनमस्यामनस्य देवा इति तिस्र आहुतीर्जुहोतीति । इदमुभयं प्रधानमुत एकमङ्गमिति संशये तुल्यत्वात्प्रधानमिति पूर्वपक्षे सिद्धान्तमाह । फलेति । फलवत्फलसंबद्धं सांग्रहणी इतरस्य आमनहोमस्य प्रधानम् । उक्तहेतुत्वाद् राजसूयविदेवनयोरुक्तहेतुत्वात् ॥ ७ ॥

दधिग्रहस्य नित्यत्वम् । अधि० ५ ।

दधिग्रहो नैमित्तिकः श्रुतिसंयोगात् ॥ ८ ॥

प्राजापत्यं दधिग्रहं गृह्णीयादिति श्रुतो दधिग्रहो नैमित्तिक उत नित्यनैमित्तिकोभयरूपः उत नित्य एवेति संशये प्रथमपक्षमाह । दधीति । श्रुतिसंयोगात् । यां वा अध्वर्युश्च यजमानश्च देवतामन्तरितस्तस्या आवृश्चेते प्राजापत्यं दधिग्रहं गृह्णीयादिति देवतान्तराये निमित्ते विहितत्वात् । शेषं स्पष्टम् ॥ ८ ॥

नित्यश्च ज्येष्ठशब्दत्वात् ॥ ९ ॥

द्वितीयपक्षमाह । नित्य इति । चकारान्नैमित्तिको ऽपि । ज्येष्ठो वा एष ग्रहाणामिति श्रवणाज् ज्यैष्ठ्यं नित्यत्वं विना ऽनुपपन्नमिति भावः ॥ ९ ॥

सार्वरूप्याच्च ॥ १० ॥

सार्वेति । सर्वासां वा एतद्देवतानां रूपं यदेष ग्रह इति सार्वरूप्यश्रुतेश्च ॥ १० ॥

नित्यो वा स्यादर्थवादः तयोः कर्मसंबन्धाद्भङ्गित्वा-चान्तरायस्य ॥ ११ ॥

सिद्धान्तमाह । नित्य इति । दधिग्रहो नित्यः तयोरध्वर्युयजमानयोः कर्मणि संबन्धाभावात् । देवतान्तरायश्रवणस्य भङ्गित्वाद्दधिग्रहस्तावकत्वादर्थवादः ॥ ११ ॥

वैश्वानरस्य नैमित्तिकत्वम् । अधि० ६ ।

वैश्वानरश्च नित्यः स्यान्नित्यैः समानसंख्यत्वात् ॥ १२ ॥

यो वै संवत्सरमुख्यमभृत्वा ऽग्निं चिनुते यथा सामिगर्भो विपद्यते तादृगेव तदार्त्तिमार्च्छेद्वैश्वानरं द्वादशकपालं निर्वपेदिति । अयं यागः नित्यो नैमित्तिको वेति संदेहे पूर्वपक्षमाह । वैश्वानर इति । नित्यो ऽयं यागः । नित्यैः लोकैः समाना संख्या यस्य तत्त्वात् । त्रीण्येतानि हवींषि भवन्ति त्रय इमे लोका एषां लोकानां रोहायेत्यत्र लोकानां नित्यानां साम्येन स्तुतेरिति वैश्वानरं द्वादशकपालं निर्वपेदित्यत्रैव एतन्निमित्तसंयोगरहितम् आदित्यो भवति आग्नावैष्णवमेकादशकपालं निर्वपेदिति द्वयं पश्चाद्यो वै इति त्रीण्येतानीति मेलनं नित्यनैमित्तिकयोर्मेलनासंभवादिति भावः ॥ १२ ॥

पक्षे वोत्पन्नसंयोगात् ॥ १३ ॥

सिद्धान्तमाह । पक्षइति । पक्षे इदं कर्म नैमित्तिकमित्यर्थः । उत्पन्ने निमित्ते यो वै संवत्सरमभृत्वेति अभरणे निमित्त कर्मणः संबन्धात् । दधिग्रहे अध्वर्युयजमानयोः ज्योतिष्टोमेन न संबन्धः । किं त्वन्तरायेण । अत्र यः अभृत्वा अग्निं चिनुतइति कर्मणः कर्तुः संबन्धान्नैमित्तिकत्वमिति भावः ॥ १३ ॥

षष्ठ्याश्चितेर्नैमित्तिकत्वम् । अधि॰ ७ ।

षट्चितिः पूर्ववत्स्यात् ॥ १४ ॥

अग्निचयनएव श्रूयते, यो ऽग्निं चित्वा न प्रतितिष्ठति पञ्च पूर्वाश्चितयो भवन्त्यथ षष्ठीं चिनुतइति । अथ षष्ठी चितिर्नैमित्तिकी नित्यैव वेति संशये पूर्वपक्षमाह । षडिति । षट्चितिः षष्ठी नित्या पूर्ववत् पञ्चचितिवत् ॥ १४ ॥

ताभिश्च तुल्यसंख्यानात् ॥ १५ ॥

साधकान्तरमाह । ताभिरिति । ताभिः पञ्चचितिभिः तुल्यत्वेन परिगणनात् । तदित्यम् । इयं वाव प्रथमा चितिरोषधयः पुरीषमन्तरिक्षं द्वितीया वयांसि पुरीषमसौ तृतीया नक्षत्राणि पुरीषं यज्ञश्चतुर्थी दक्षिणा पुरीषं यजमानः पञ्चमी प्रजा पुरीषं संवत्सरो वाव षष्ठी ऋतवः पुरीषमिति ॥ १५ ॥

अर्थवादोपपत्तेश्च ॥ १६ ॥

अर्थवादेति । षट् चितयो भवन्ति षट् पुरीषाणि द्वादश संपद्यन्त इत्यर्थवादोपपत्तेः नित्यत्वम् ॥ १६ ॥

एकचितिर्वा स्यादपवृक्ते हि चोद्यते निमित्तेन ॥ १७ ॥

सिद्धान्तमाह । एकेति । पूर्वं पञ्चचित्यनुष्ठानं ततः अप्रतिष्ठा तस्यां निमित्तभूतायां तत्परिहारायैकचितिकः अयं प्रयोगः । कुतः, अपवृक्ते चित्वेति पूर्वतनपञ्चचितिकप्रयोगसमाप्तौ निमित्तेन अप्रतिष्ठारूपेण संबन्धः चोद्यते गम्यते अतः ॥ १७ ॥

विप्रतिषेधात्ताभिः समानसंख्यत्वम् ॥ १८ ॥

पूर्वपक्षसाधकार्थवादद्वयोपपत्तिमाह । विप्रतिषेधादिति । या षष्ठी चितिः सैका तस्यां षट्त्वं द्वादशत्वं च विरुद्धम् । तस्माद्विरोधपरिहाराय ताभिः पूर्वानुष्ठितपञ्चचितीः पूर्वतनानि पञ्च पुरीषाणि च गृहीत्वा तुल्यसंख्यत्वम् । इत्थं चैतत्कर्तृकाः निमित्ते सति षट् चितयः षट् पुरीषाणि च संपद्यन्त्येवेति भावः ॥ १८ ॥

पिण्डपितृयज्ञस्य दर्शयागानङ्गत्वम् । अधि० ८ ।

पितृयज्ञः स्वकालत्वादनङ्गं स्यात् ॥ १९ ॥

अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्तीति । इदं च दर्शयागाङ्गं न वेति संशये अमावास्याशब्दस्य कर्मपरत्वेन तदङ्गमिति पूर्वपक्षे सिद्धान्तमाह । पितृयज्ञ इति । पितृयज्ञः अनङ्गं स्वस्य पितृयज्ञस्य कालत्वादमावास्यायाः । अयं भावः । अमावास्याशब्दो न कर्मपरः लक्षणापत्तेः । किं तु पिण्डपितृयज्ञकालपरः । तथा च स्वतन्त्रकालत्वाच्चाङ्गमिति ॥ १९ ॥

तुल्यवच्च प्रसंख्यानात् ॥ २० ॥

तुल्यवद् महायज्ञतुल्यतया प्रसंख्यानात् परिगणनात् । चत्वारो वै महायज्ञा अग्निहोत्रं दर्शपूर्णमासावग्निष्टोमः पिण्डपितृयज्ञश्चेति परिगणनात् ॥ २० ॥

विप्रतिषिद्धे च दर्शनात् ॥ २१ ॥

विप्रतिषेधे दर्शयागप्रतिषेधे निषेधे ऽपि पितृयज्ञस्य दर्शनाद् विधानात्। पौर्णमासीमेव यजेत भ्रातृव्यवान्नामावास्यां पितृयज्ञेनैव ता देवताः प्रीणाति ॥ २१ ॥

रशनाया यूपाङ्गत्वम्। अधि० ९।

पश्वङ्गं रशना स्यात् तदागमे विधानात् ॥ २२ ॥

ज्योतिष्टोमे श्रूयते, आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं पशुमुपाकरोतीति। अत्र त्रिवृता त्रिगुणया रशनयेत्यनेन श्रूयमाणा रशना पश्वङ्गं यूपाङ्गं वेति संशये पूर्वपक्षमाह। पश्विति। पश्वङ्गं रशना त्रिवृता परिवीय पशुमुपाकरोतीति वाक्येन पशुसंबन्धमागमय्य आपयित्वा विधानात् ॥ २२ ॥

यूपाङ्गं वा तत्संस्कारात् ॥ २३ ॥

सिद्धान्तमाह। यूपेति। यूपाङ्गं रशना तस्य यूपस्य दृढिमरूपदृष्टसंस्कारात्। यूपमिति द्वितीया त्रिवृतेति तृतीया ऽप्यनुगृहीतेति भावः ॥ २३ ॥

अर्थवादश्च तदर्थवत् ॥ २४ ॥

अर्थवादः युवा सुवासाः परिवीत आगादिति मन्त्रः तदर्थवत्। परिवीत इति यूपविशेषणम्। यूपे ऽन्वितं सद् यूपः संस्कारफलवान् इति ज्ञापयति ॥ २४ ॥

स्वरोः पश्वङ्गत्वम्। अधि० १०।

स्वरुश्चाप्येकदेशत्वात् ॥ २५ ॥

स्वरुणा पशुमनक्तीति श्रुतम्। तत्र स्वरुर्यूपाङ्गं पश्वङ्गं वेति संशये पूर्वपक्षमाह। स्वरुरिति। स्वरुर्यूपाङ्गं तदेकदेशत्वाद् यूपस्य स्वरुं करोतीत्यत्र स्वरुमन्तं यूपं करोतीत्यर्थेन यूपावयवत्वप्रतीत्या षष्ठीश्रुत्या यूपस्य प्राधान्यात् ॥ २५ ॥

निष्क्रयश्च तदङ्गवत् ॥ २६ ॥

निष्क्रयश्च यूपाङ्गमिव दर्शयति । ते प्रस्तरं स्रुचां निष्क्रयमपश्यन् स्वरुं यूपस्येति वाक्ये यूपस्य निष्क्रयं स्वरुमपश्यन्नित्यर्थवादो यूपाङ्गत्वं प्रद्रढयति ॥ २६ ॥

पश्वङ्गं वा ऽर्थकर्मत्वात् ॥ २७ ॥

सिद्धान्तमाह । पश्विति । पश्वङ्गं स्वरुः । अर्थकर्मत्वात् । दृष्टफलत्वात् । पश्वञ्जनं दृष्टं फलम् । यूपार्थत्वे अदृष्टकल्पनापत्तेः ॥ २७ ॥

भक्त्या निष्क्रयवादः स्यात् ॥ २८ ॥

भक्त्येति । भक्त्या लक्षणया स्तावकत्वेन निष्क्रयवादः स्यात् । यूपो ऽग्नौ प्रक्षेप्तव्यः । स्वरोर्यूपावयवत्वेन स्वरुप्रक्षेपे यूप एव प्रक्षिप्तो भवतीति श्रुतिः ॥ २८ ॥

आघारादीनामाग्नेयाद्यङ्गत्वम् । अधि॰ ११ ।

दर्शपूर्णमासयोरिज्याः प्रधानान्यविशेषात् ॥ २९ ॥

दर्शपूर्णमासयोर्यावन्तो यागा विहिताः ते सर्वे प्रधानभूता उत के चन प्रधानरूपाः के चनाङ्गरूपाः इति संशये पूर्वपक्षमाह । दर्शेति । दर्शपूर्णमाससंबन्धिन इज्याः यागाः सर्वे ऽपि प्रधानरूपाः । अविशेषाद् इदमङ्गमिदं प्रधानमितिनियामकाभावात् ॥ २९ ॥

अपि वा ऽङ्गानि कानि चिद्येष्वङ्गत्वेन संस्तुतिः सामान्यादभिसंस्तवः ॥ ३० ॥

सिद्धान्तमाह । अपि वेति । येष्वङ्गत्वेन संस्तुतिः, यथा चक्षुषी वा एते यज्ञस्य यदाज्यभागौ, यत्प्रयाजानूयाजा इज्यन्ते वर्मैव तद्यज्ञाय क्रियतइति, तानि कानि चिदङ्गानि सामान्यात् । चक्षुरादीनामिवाज्यभागादीनामप्यङ्गत्वसाजात्यात् स्तव उपपन्नः । अन्यथा कर्मण्यङ्गत्वाभावेन स्तवो नोपपन्न इति भावः ॥ ३० ॥

तथा चान्यार्थदर्शनम् ॥ ३१ ॥

तथा चेति । अङ्गत्वे प्रयाजेषु सिद्धे अन्यस्यार्थस्य नव प्रयाजा इज्यन्तइत्यत्र प्राकृतप्रयाजानुवादेन नवत्वगुणविधानमुपपन्नम् । अन्यथा प्रधानस्यातिदेशाभावेन असंगतं स्यादिति भावः ॥ ३१ ॥

अविशिष्टं तु कारणं प्रधानेषु गुणस्य विद्यमानत्वात् ॥ ३२ ॥

अङ्गत्वेन संस्तुतिः सामान्यादिति पूर्वसूत्रस्थहेतोः प्रधाने व्यभिचारमाशङ्कते । अविशिष्टमिति । कारणमङ्गत्वेन संस्तवः । अविशिष्टं प्रधाने आग्नेयादौ प्रयाजादौ च अङ्गत्वेन संस्तवः तुल्यः । शिरो वा एतद्यज्ञस्य यदाग्नेयः हृदयमुपांशुयाजः पादावग्नीषोमीय इति गुणस्य अङ्गत्वेन संस्तुतिरूपगुणस्य उभयत्र विद्यमानत्वात् ॥ ३२ ॥

नानुक्ते ऽन्यार्थदर्शनं परार्थत्वात् ॥ ३३ ॥

परार्थदर्शनं दूषयति । नानुक्तइति । अन्यार्थदर्शनं पूर्वोक्तम् अनुक्ते प्रयाजप्रापणरूपफलरहिते न अङ्गत्वसाधकं प्रयाजवाक्यस्य परार्थत्वात् । नवत्वगुणप्राप्त्यर्थत्वात् ॥ ३३ ॥

पृथक्त्वे त्वभिधानयोर्निवेशः श्रुतितो व्यपदेशाच्च तत्पुनर्मुख्यलक्षणं यत्फलवत्त्वं तत्सन्निधावसंयुक्तं तदङ्गं स्याद्भागित्वात्कारणस्याश्रुतेश्चान्यसंबन्धः ॥ ३४ ॥

सिद्धान्तरहस्यमाह । पृथक्त्वेति । दर्शसंज्ञकमेकं त्रिकं पूर्णमाससंज्ञकं त्रिकं तयोः श्रुतितः दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति श्रवणाद् द्विवचनेन व्यपदेशाद् निर्देशाच्च अभिधानयोर्नाम्नोः पृथक्त्वे सिद्धे, तयोरिति शेषः । निवेशः फलेन साकं संबन्धः । इत्थं च यत्फलवत्त्वं फलसंबन्धित्वेन श्रूयमाणत्वं तद् मुख्यस्य लक्षणम् । तल्लक्षणं द्वयोः त्रिकयोः अस्तीति त्रिकद्वयमेव प्रधानमिति भावः । तत्सन्निधौ उक्तलक्षणविशिष्टकर्मसन्निधौ असंयुक्तं फलेनासंबद्धं समिधो यजतीत्यादि तदङ्गं प्रधानाङ्गं कारणस्य प्रयाजादिरूपस्य कारणत्वेन श्रुतस्य भागित्वात्फलार्थत्वाद् अश्रुतेः भाव्याकाङ्क्षापूरकशब्दाश्रुतेः अन्येन प्रधानेन संबन्धः । किं भावयेदित्याकाङ्क्षायां प्रधानं भावयेदित्येव कल्प्यमिति भावः ॥ ३४ ॥

गुणाश्च नामसंयुक्ता विधीयन्ते नाङ्गेषूपपद्यन्ते ॥ ३५ ॥

त्रिकद्वयपृथक्त्वे द्विवचनेन निर्देशमुक्त्वा अन्यदपि साधकं दर्शयति । गुणा इति । अङ्गेषु अभिमर्शनादिषु गुणाः चतुर्होत्रादिमन्त्राः

नामसंयुक्ताः चतुर्होत्रा पौर्णमासीमभिमृशेत्पञ्चहोत्रा ऽमावास्यामिति पौर्णमास्यादिनामसंयुक्ता विधीयन्ते । इदं विभागाभावे नाम्ना निर्देशो नोपपद्यते ॥ ३५ ॥

तुल्या च कारणश्रुतिरन्यैरङ्गाभिसंबन्धैः ॥ ३६ ॥

आग्नेयादीनामङ्गत्वेन संस्तुतिस्तुल्येति अङ्गत्वं तेषामिति यदुक्तं तत्राह । तुल्येति । अन्यैः पुरुषसंबन्धिभिः अङ्गादिसंबन्धैः अवयवसंबन्धैः कारणे प्रधाने श्रुतिः अङ्गत्वश्रवणं तुल्या । अयं भावः । पुरुषवृत्त्यवयवेषु यः अग्रिमसूत्रे वक्ष्यमाणः क्रमस्तस्य पौर्णमासीयागत्रये सत्त्वाद्यागस्य पुरुषवाक्यैः स्तुतिरिति ॥ ३६ ॥

उत्पत्तावभिसंबन्धस्तस्मादङ्गोपदेशः स्यात् ॥ ३७ ॥

ननु पुरुषावयवेषु कः क्रमः इत्यपेक्षायामाह । उत्पत्ताविति । मातुः उत्पत्तौ मातुरुदरे प्राणिन उत्पत्तौ प्रथमं शिरः ततो मध्यं ततः पादाविति तेनैव क्रमेणाग्नेयोपांशुयागाग्नीषोमीयानामनुष्ठानादङ्गैः शिरःप्रभृतिशब्दैः उपदेशः शिर आग्नेय इति निर्देशः सिंहो माणवक इतिवत् ॥ ३७ ॥

तथा चान्यार्थदर्शनम् ॥ ३८ ॥

तथा च उक्तयुक्तिभिर्द्वयोः क्रिययोः पृथक् सिद्धौ अन्यार्थस्य चतुर्दश पौर्णमास्यामाहुतयः त्रयोदशामावास्यायामिति दर्शनमुपपन्नम् ॥३८॥

ज्योतिष्टोमे दीक्षणीयादीनामङ्गत्वम् । अधि॰ १२ ।

ज्योतिष्टोमे तुल्यान्यविशिष्टं हि कारणम् ॥ ३९ ॥

ज्योतिष्टोमे यागमात्रमविशेषेण प्रधानमुत सोमयाग एव तथेति संशये पूर्वपक्षमाह । ज्योतिरिति । ज्योतिष्टोमे यागरूपकर्माणि अविशिष्टानि तुल्यतया प्रधानानि । यतः फलसंबन्धरूपं प्राधान्यकारणमविशिष्टम् अविलक्षणम् ॥ ३९ ॥

गुणानां तूत्पत्तिवाक्येन संबन्धात्कारणश्रुतिस्तस्मात्सोमः प्रधानं स्यात् ॥ ४० ॥

सिद्धान्तमाह । गुणानामिति । उत्पत्तिवाक्येन स्वर्गरूपफलसंबन्धोत्पत्तिवाक्येन ज्योतिष्टोमेन स्वर्गकामो यजेतेति वाक्येन गुणानां ज्योतिषां त्रिवृत्पञ्चदशः सप्तदशः एकविंश इत्यादिरूपाणां स्तोमानां संबन्धात्कारणश्रुतिः विशेषकारणश्रुतिरस्त्यतः सोमयाग एव प्रधानं नान्ये यागाः ज्योतिषां स्तोमा यत्रेति व्युत्पत्त्या धात्वर्थं अस्य विशेषणत्वादितरयागव्यावृत्तिरिति भावः ॥ ४० ॥

तथा चान्यार्थदर्शनम् ॥ ४१ ॥

तथा चेति । तथा च उक्तयुक्त्या सोमयागस्य प्राधान्यसिद्धौ च अन्यस्य दीक्षणीयादिषु शिरो वा एतद्यज्ञस्य यद्दीक्षणीयेति अङ्गशब्देन स्तुतेर्दर्शनमुपोद्बलयति, उक्तमर्थमिति पूरणीयम् ॥ ४१ ॥

इति श्रीमज्जैमिनिसूत्रवृत्त्यां चतुर्थस्य चतुर्थः पादः ॥ ४ ॥

समाप्तश्च चतुर्थोऽध्यायः ॥ ४ ॥

क्रमनियमाधिकरणम् ॥ १ ॥

श्रुतिलक्षणमानुपूर्व्यं तत्प्रमाणत्वात् ॥ १ ॥

चतुर्थे प्रयोज्यप्रयोजकभावे निर्णीते तेन प्रयोगविधिपरिगृहीता इयन्तः पदार्था इति ज्ञाते तेषां क्रमज्ञानार्थं पञ्चमाध्यायारम्भः । तत्र नियतक्रमस्य प्रयोगाङ्गत्वे प्रमाणाभावेन इच्छयैवानुष्ठानमिति पूर्वपक्षे सिद्धान्तमाह । श्रुतीति । श्रुतिर्लक्षणं गमकं यस्य तद् आनुपूर्व्यं क्रमः । तस्य क्रमस्य, सः अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयतीतिवाक्य-घटकत्वाप्रत्ययादिः प्रमाणं ज्ञापकं यस्य, तत्त्वात् ॥ १ ॥

क्रमस्य क्व चिदार्थिकत्वम् । अधि० २ ।

अर्थाच्च ॥ २ ॥

अग्निहोत्रं जुहोति यवागूं पचतीत्यत्र त्वाप्रत्ययादीनामभावा-दनियमेनानुष्ठानमिति पूर्वपक्षे क्रमप्रापकं प्रमाणान्तरमाह । अर्थाच्चेति । अर्थाद् यवागूपाकस्य अग्निहोत्रहोमफलकत्वात्पूर्वं साधनं संपाद्य पश्चा-द्धोमनिर्वृत्तिरिति भावः ॥ २ ॥

प्रयाजानुमन्त्रणे क्रमानियमः । अधि० ३ ।

अनियमोऽन्यत्र ॥ ३ ॥

अनियम इति । अन्यत्र क्रमनियामकतया प्रतिपादितप्रतिपाद्य-मानषट्प्रमाणाभाववति अनियमः इच्छयैवानुष्ठानं यथा प्रयाजानुम-न्त्रणे । वसन्तमृतूनां प्रीणामीत्येको मन्त्रः एकशाखापठितः । एको ममैका तस्येत्यन्यशाखापठितः । तयोः समुच्चयेन पाठे अनियमः ॥ ३ ॥

क्रमस्य क्व चित् पाठानुसारित्वम् । अधि० ४ ।

क्रमेण वा नियम्येत क्रत्वेकत्वे तद्गुणत्वात् ॥ ४ ॥

पञ्चप्रयाजानामनुष्ठाने क्रमनियामकाभावेनेच्छैव नियामिकेति पूर्वपक्षे सिद्धान्तमाह । क्रमेणेति । क्रत्वेकत्वे एकक्रतुगतत्वे क्रमेण पाठ-क्रमेण अनुष्ठानक्रमो नियम्येत तद्गुणत्वाद् अनुष्ठानाङ्गत्वात् क्रमस्य ॥ ४ ॥

अशाब्दमिति चेत्स्याद्वाक्यशब्दत्वात् ॥ ५ ॥

शब्दगम्यस्यैव धर्मत्वमिति सिद्धान्तात् क्रमस्य तथात्वाभाव इत्या-शङ्कते । अशाब्दमिति । अशाब्दः क्रमः शब्दगम्यो न स्यात् । वाक्यं

पदसमूहो यस्य तत्त्वं शाब्दस्य इति चेत्तदेव न । अयं भावः । वाक्यस्य शाब्दजनकत्वं यदि स्यात्क्रमविशिष्टे शक्तिं वाक्यस्याङ्गीकृत्य तद्विषयको ऽपि शाब्दबोध इति शक्यते वक्तुम् । तन्निरस्तं तद्भूतानां क्रियार्थेन समाम्नाय इत्यधिकरणे । प्रत्येकपदानां स्वस्वार्थे शक्तिर्न क्रमे । तदुपस्थापकशब्दाभावादशाब्दः क्रम इति ॥ ५ ॥

अर्थकृते चानुमानं स्यात्क्रत्वेकत्वे परार्थत्वात्स्वेन त्वर्थेन संबन्धस्तस्मात्स्वशब्दमुच्यते ॥ ६ ॥

समाधानमाह । अर्थेति । क्रत्वेकत्वे बहूनां कर्मणामेकफलकत्वे एककर्तृकत्वे च यः कश्चन क्रमः युगपदनुष्ठानासंभवादर्थसिद्धः, तथा ऽपि अर्थकृते चानुमानम् । स्वाध्यायो ऽध्येतव्य इतिविधिभाव्यफलानुसार्यनुमानं कर्तव्यम् । स्वाध्यायो ऽध्येतव्य इत्यस्य न केवलं वेदार्थज्ञानमेव संपादयेदिति तात्पर्यम् । किं तु यद्यद्दृष्टं संभवति तावद्भावयेदिति । इत्थं च यथा ऽर्थज्ञानं तथा तद्द्वारा प्रयोगकाले ऽनुष्ठेयार्थस्मरणमपि भावयितुं शक्यते । सा च स्मृतिः यथापाठमेव भविष्यतीति स्वाध्यायविधितात्पर्यविषयत्वान्नाशब्दमिति भावः । नन्वेतावद्दूरं तात्पर्यकल्पने मानाभाव इत्यत आह । वेदस्येति शेषः । परार्थत्वात् । यद्यदनेन शक्यते कर्तुं तावदर्थत्वात् । स्वेन स्वसंबन्ध्यर्थेन अनुष्ठानकालीनस्मरणेनापि संबन्धः । तस्मात्स्वशब्दस्य स्वस्य पाठक्रमस्य प्रापकः शब्द इति । स्वप्रापकः शब्दः स्वशब्दः मध्यमपदलोपसमासः । नपुंसकत्वमार्षम् ॥ ६ ॥

तथा चान्यार्थदर्शनम् ॥ ७ ॥

तथा चेति । तथा च उक्तरीत्या पाठक्रमस्य शाब्दत्वसिद्धौ च अन्यस्यार्थस्य व्यत्यस्तमृतव्या उपदधाति । राष्ट्रभृद्धोमे च अभिचरता प्रतिलोमं होतव्या इत्यादेर्दर्शनं सङ्गच्छते । अन्यथा पाठक्रमस्याश्रौतत्वे तस्य प्राप्त्यभावेन व्यत्यस्तं प्रतिलोममित्यादीनां पाठक्रमबाधकत्वं न स्यादिति भावः ॥ ७ ॥

क्रमस्य क्वचित्प्रथमप्रवृत्त्यनुसारित्वम् । अधि० ५ ।

प्रवृत्त्या तुल्यकालानां गुणानां तदुपक्रमात् ॥ ८ ॥

सप्तदश प्राजापत्यान्पशूनालभतइति वाजपेये श्रुतम् । तेषां पशूनां संस्कारवेलायां पदार्थानुसमयेनानुष्ठानं वक्ष्यते । प्रथमं यं पशुमारभ्य येन क्रमेणोपाकरणं कृतं तेनैव क्रमेण नियोजनादिकं कार्यमुतेच्छयेति संशये सिद्धान्तेनोपक्रमते । प्रवृत्त्येति । तुल्यकालानामेककालप्राप्तानामुपाकरणादिपशुसंस्काररूपाणां गुणानां प्रवृत्त्या प्रथमप्रवृत्तिक्रमेण द्वितीयादिसंस्कारक्रमो नियम्यते । तदुपक्रमात् तस्मादेव प्रथमं प्रारम्भात् । अयं भावः सर्वेषामङ्गानामव्यवधानेन अनुष्ठानमावश्यकं तत्र विधिप्राप्तं व्यवधानमङ्गान्तरं सहते इति प्रथमपशूपाकरणं स्वीयनियोजनमध्ये षोडशान्यपशूपाकरणैर्व्यवधानं वैधं सहते नाधिकम् । प्रथमोपाकृतपशौ चरमं नियोजने क्रियमाणे चरममुपाकृतपशौ नियोजनमव्यवहितं प्रथमोपाकरणं षोडशभिरुपाकरणैः षोडशभिर्नियोजनैश्च द्वात्रिंशद्भिरविहितैर्व्यवहितमिति वैरूप्यम् । प्रथमप्रवृत्तिक्रमेणानुष्ठाने सर्वेषां षोडशभिरेव व्यवधानं तुल्यमङ्गानां सान्निध्यमिति प्रथमप्रवृत्तिक्रम उत्तरानुष्ठाने नियामक एवं प्रधानसन्निकर्षो ऽपि तुल्य इति ॥ ८ ॥

सर्वमिति चेत् ॥ ९ ॥

पूर्वपक्षयाशङ्कते । सर्वमिति । यथा सौर्ययागाङ्गजालं स्वीयातिरिक्ताङ्गजालेनाव्यवहितं तथा संपत्तये सर्वं स्वकीयमङ्गजालं काण्डानुसमयेन स्यादिति चेत् ॥ ९ ॥

नाकृतत्वात् ॥ १० ॥

दूषयति काण्डानुसमयं, नेति । अकृतत्वाद् अविहितत्वात् ॥ १० ॥

क्रत्वन्तरवदिति चेत् ॥ ११ ॥

सौर्ययागादौ काण्डानुसमयवदत्राप्यस्त्वति शङ्कते । क्रत्विति । क्रत्वन्तरवत् सौर्ययागवत् ॥ ११ ॥

नासमवायात् ॥ १२ ॥

वैषम्यमाह । नेति । असमवायाद् यागान्तरेण साहित्याभावात् । इह तु सप्तदश प्राजापत्यान्पशूनालभतइति सप्तदशानां साहित्यस्य विवक्षितत्वात्काण्डानुसमयो न सम्भवतीति भावः ॥ १२ ॥

क्रमस्य क्व चित्स्थानानुसारित्वम् । अधि॰ ६ ।

स्थानाच्चोत्पत्तिसंयोगात् ॥ १३ ॥

साद्यस्कनामके क्रतौ अग्नीषोमीयानूबन्ध्ययोः सवनीयपशुना सहानुष्ठानं विहितम् । तत्र प्रथमं कस्योपाकरणमिति संशये प्रकृताविवात्रापि अग्नीषोमीयस्य प्राथम्यमिति पूर्वपक्षे सिद्धान्तमाह । स्थानादिति । आश्विनं ग्रहं गृहीत्वा ऽऽग्नेयं पशुमुपाकरोतीति आश्विनग्रहग्रहणोत्तरस्थानमुत्पत्तौ स्वोत्पत्तिवाक्ये संबन्धो यस्येति व्युत्पत्त्या तादृशं, तादृशस्थानप्रमाणात्सवनीयपशुसंस्कारः प्रथम इति । अयं भावः आश्विने गृहीते तदुत्तरस्य सवनीयस्योपस्थितिर्भवति प्रयोगविधिपरिगृहीतत्वात्तस्य । उपस्थितपरित्यागे मानाभावेन तस्य प्राथम्यमिति ॥ १३ ॥

अङ्गक्रमस्य मुख्यक्रमानुसारित्वम् । अधि॰ ७ ।

मुख्यक्रमेण चाङ्गानां तदर्थत्वात् ॥ १४ ॥

चित्रायागे श्रुतं, सारस्वतौ भवत इति । सरस्वती च सरस्वांश्च सरस्वन्तौ तत्सम्बन्धियागौ सारस्वतौ इति समस्तपदप्रयोगेण तयोरनुष्ठानं तन्त्रेणेति सिद्धम् । अत्राङ्गानामनुष्ठानक्रमे पूर्वोक्तप्रमाणाभावादिच्छयेति पूर्वपक्षे सिद्धान्तमाह । मुख्येति । मुख्यस्य यागोत्पत्तिवाक्ये क्रमो नास्ति तथाऽपि मन्त्रपाठक्रमे स्त्रीदेवताया मन्त्रः प्रणो देवीति प्रथमं पठितः । पश्चात्पपिवांसमिति त्वन्यस्य । तत्पाठक्रमेण प्रधानक्रमक्लृप्तौ मुख्यक्रमेणाङ्गानामनुष्ठानमङ्गानां तदर्थत्वात्प्रधानार्थत्वात् । मुख्यक्रमेणाङ्गानामनुष्ठाने सर्वेषां स्वस्वप्रधानसंनिधानसंनिकर्षः समानो भवतीत्यभिप्रायः ॥ १४ ॥

अङ्गेषु मुख्यक्रमापेक्षया पाठस्य बलीयस्त्वम् । अधि॰ ८ ।

प्रकृतौ तु स्वशब्दत्वाद्यथाक्रमं प्रतीयेत ॥ १५ ॥

"अङ्गस्य" ॥ 'अधिकारोयमिति'। स्वरितत्वात्। इह केचिन्मन्यन्ते प्रागभ्यासविकारेभ्योयमङ्गाधिकारः, एवं हि 'गुणो यङ्लुको'रित्यत्र लुग्ग्रहणं न कर्त्तव्यं भवति, कथं, प्रत्ययलक्षणेनैव सिद्धं,[1] यदि त्वभ्यासविकारेप्ययमधिकारः स्यात्ततोऽङ्गाधिकारविहितमि[2]ति नलुमताङ्गस्येति प्रतिषेधः स्यादिति। वृत्तिकारस्तु मन्यते यदि प्रागभ्यासविकारेभ्योङ्गाधिकारः, वव्रश्चेति वृश्चतेर्लिटि लिट्यभ्यासस्योभयेषामिति रेफस्य सम्प्रसारणे उरदत्वे हलादि[3]शेषे च कृते वकारस्यापि सम्प्रसारणं प्राप्नोति, तस्य न सम्प्रसारणे सम्प्रसारणमिति प्रतिषेध इष्यते, स न प्राप्नोति, उरदत्वस्यासम्प्रसारणत्वात्, न च तस्य स्थानिवत्त्वम्, अपरनिमित्तत्वात्। आ सप्तमाध्यायपरिसमाप्तेः पुनरङ्गाधिकारे सत्युरदत्वं परनिमित्तकं भवति, अङ्गेन स्वनिमित्तस्य प्रत्ययस्याक्षेपात्। यदप्युक्तं लुग्ग्रहणं न कर्त्तव्यं भवतीति, तदपि न, नहि तत्राङ्गाधिकारविहितस्यैव प्रतिषेधः, कस्य तर्हि, लुमता लुप्ते प्रत्यये वस्तुतो यदङ्गं तस्य प्राप्तं यत्कार्यमाङ्गमनाङ्गं वा तस्य सर्वस्य प्रतिषेधः। तस्मादासप्तमाध्यायपरिसमाप्तेरयमङ्गाधिकारो युक्त इति, हूत इत्यादौ यजादित्वात्सम्प्रसारणम्। 'जीनइति'। ग्रहिज्येतिसूत्रेण सम्प्रसारणं, ल्वादिभ्य इति निष्ठानत्वम्। 'निरुतं दुरुतमिति'। वेञ् तन्तुसन्ताने, यजादिः, अत्राङ्गेनान्तर्भूतयोर्निर्दुरोरवयवौ यौ हलौ तदाश्रयं दीर्घत्वं न भवति। 'क्रिमिणामिति'। क्रिमिपामन्शब्दाभ्यां मत्वर्थे पामादिभ्यो नः, पामनो नलोपः, स्त्रियां टाप्, द्वितीयैकवचनम्, अत्र नामिति समुदायस्याप्रत्ययत्वान्न तदपेक्षं पूर्वस्याङ्गत्वमिति नप्रत्ययापेक्षयाङ्गत्वेपि दीर्घत्वं न भवति, पामनामित्यत्र नलोपे कृते ऽजन्तत्वाद् दीर्घप्रसङ्गः। न च नलोपस्यासिद्धत्वम्, असुब्विधित्वात्, नह्यस्यां दशायां दीर्घत्वं सुब्विधिर्भवति। अस्तु वाऽसिद्धत्वं, नोपधाया इति दीर्घत्वप्रसङ्गः, भिस्सा ओदनः, भिस्सदा

१ सिद्धत्वादिति पा॰ इं॰ पु॰।
२ इतीति नास्ति॰ इं॰ पु॰।
३ हलादिशेषे इति नास्ति॰ इं॰ पु॰

दधि । ननु क्रिमिणामित्यत्र प्रत्ययस्यार्थवत्त्वेऽपि समुदायोऽनर्थकः, परस्परासम्बन्धात्, एवं भिस्साभिस्सद्वयोर्भिन्नशब्दः, ततश्चार्थवद्ग्रहणे नानर्थकस्येत्येव न भविष्यति तत्राह । 'अङ्गाधिकार इत्यादि' । सन्सम्प्रसारणदीर्घत्वैत्वतातङियङुवङ्नुट्ह्रस्वत्वनत्वे चाङ्गस्येत्यधिकारे प्रयोजनं, सनि दीर्घः प्रयोजनं, दधि सनोतीति दधिसेत्यत्र माभूत्, सम्प्रसारणदीर्घत्वं निरुत्तं दुरुत्तमित्यत्र माभूत्, एत्वमेर्लिङि वान्यस्य संयोगादेः, निर्यायात् निर्वायादित्यत्र माभूत्, तातङ् निपातस्य तोर्माभूत् जीव तु त्वम्, इयङुवङ्, श्ययँ वर्यम् इत्यत्र माभूत्, नुट्, ह्रस्वनद्यापो नुट्, कुमारी आमित्याहेत्यत्र माभूत्, ह्रस्वत्वं केणः, कुमारी कस्मै स्पृहयति, कुमार्याः कं सुखं कुमारीकमित्यत्र मा भूत्, नत्वम्, अपो भि अब्भार इत्यत्र माभूदित्येवमर्थं कर्तव्योऽङ्गाधिकारस्सोऽन्यार्थः कृतो नामीत्यत्रापि दीर्घत्वं व्यवस्थापयति अभिमते विषये नियमयति। 'अर्थवद्ग्रहणपरिभाषयेति' । उपलक्षणमेतत् । आनेमुक्, प्राण इत्यत्र माभूत् । अकृत्सार्वधातुकयोर्दीर्घो दधि यातमित्यत्र माभूत्। इत्येवमर्थं लक्षणप्रतिपदोक्तपरिभाषा नञिवयुक्तन्यायश्च नाश्रयितव्यो भवति। षष्ठी स्थानेयोगेति वचनादङ्गस्येति स्थानषष्ठीयं, ततश्चातो भिस ऐसित्यत्रात इति पञ्चम्यन्तमङ्गस्येत्यस्य षष्ठ्यन्तस्य सामानाधिकरण्येन विशेषणं नोपपद्यत इत्यकारमात्रस्य ग्रहणात् ब्राह्मणभिस्से[1]त्यादावपि प्रसङ्गः । अवयवषष्ठ्यादीनां चाप्रसिद्धिः, ततश्च ऊदुपधाया गोहो ऽङ्गस्येति स्थानषष्ठ्या अन्त्येल्युपसंहाराद्गोहश्चान्त्यस्य स्यादुपधायाश्चेति वचनादुपधामात्रस्य च, एवं शास इदङ् हलोरित्यादावपीत्याशङ्कायामाह । 'अङ्गस्येति' । 'सम्बन्धसामान्ये षष्ठीति' । अयमभिप्रायः । अधिकारोयं स च परार्थः, षष्ठीस्थाने योगेत्यपि परिभाषा परार्था, न च परार्थयोः परस्परं सम्बन्धोस्ति, यथोक्तं गुणानां च परार्थत्वादसम्बन्धः समत्वात्स्यादिति, ततश्चाङ्गस्येति षष्ठी स्वभावप्रयुक्तं सम्बन्धसामान्यमेवार्थमभिधत्तइति । 'यथायोगमिति' । यस्मिन्योगे यस्य सम्बन्धविशेषस्याभिव्यञ्जकमस्ति तस्मिन्योगे तत्रैव विशेषे पर्यवस्यतीत्यर्थः ।

१ अङ्गस्येत नास्ति· इं· पु· ।

तद्यथा । 'हन्तेर्जः' इत्यादौ स्थानषष्ठी, 'ऊदुपधाया गोहः' इत्यवयवषष्ठी, 'युवोरनाकौ' वित्यादौ निमित्तनिमित्तिसम्बन्धे षष्ठी, लोकवत्तद्यथा लोके देवदत्तस्येत्यभेदेन प्रवृत्ता षष्ठी पुत्रः पाणिः कम्बल इति प्रतिसम्बन्धवशात्तत्रतत्र विशेषे पर्यवस्यति । 'अथ वेत्यादि' । पूर्वं विवक्षितोपि षष्ठ्यर्थः सामान्यरूप इत्युक्तमिदानीं तु प्रयोगसाधुत्वायैव षष्ठ्युच्चार्यते न त्वर्थविवक्षयेत्युच्यते, अवश्यं च यया कया चन विभक्त्या निर्द्देष्टव्यं; षष्ठ्यनुरोधस्तु बाहुल्येन तदर्थस्योपयोक्ष्यमाणत्वात् । 'यथायोगं विभक्तिषु विपरिणाम्यतइति' । लोकवदेव । तद्यथा उच्चानि देवदत्तस्य गृहाणि, आढ्यो वैधवेयो देवदत्तः, आमन्त्रयस्वैनं देवदत्तं, किमनेन कृत्यं देवदत्तेनेति, तेना'तो भिस ऐसि'त्यत्र पञ्चम्या विपरिणामे सति अकारान्तादङ्गादित्ययमर्थो भवति, आदिशब्देन 'युष्मदस्मद्भ्यां ङसोशि'त्येवमादिर्गृह्यते । अपिशब्देनैतद्दर्शयति न केवलं षष्ठ्यर्थएव सप्त विशेषः सिध्यति, अपि तु पञ्चम्यर्थेपीति, पूर्वत्र तु पक्षे 'अतो भिस ऐसि'-त्यत्र निमित्तनिमित्तिसम्बन्धे षष्ठी, अङ्गस्य निमित्तं यो भिस्, कस्याङ्गस्य निमित्तं यस्मिन्नङ्गमित्येतद्भवति, कस्मिँश्चैतद्भवति, प्रत्यये ॥

"हलः" ॥ 'हल इति किमिति' । केनेदानीमुदाहरणेषु दीर्घसिद्धिः, एवं मन्यते, यथा शेषइति लक्षणं चाधिकारश्च, तथाङ्गस्येत्येतदपि, ततश्चाभिमते विषये दीर्घो भविष्यतीति, अतिप्रसङ्ग इति तूत्तरम् । 'विद्धो विचित इति' । व्यध ताडने, व्यच व्याजीकरणे, ग्रहिज्यादिना संप्रसारणम् । 'अण इत्येवेति' । 'ढ्रलोपे पूर्वस्य दीर्घोण इत्यतः । न च तस्येकः काशेइतीग्रहणेन विच्छेदः । तत्र हि विरोधाभावादिग्ग्रहणेनाणेव विशेष्यते इकोण इति, अथेदानीं चावित्यारभ्याण इत्येवानुवर्तिष्यते नेक इति । 'तृतीयेति वा निपातनादिति' । मा नामाण इत्येतदनुवृतत्, द्वितीयतृतीयचतुर्थेति योयं निर्द्देशस्तस्मादेव निपातनादवर्णो दीर्घत्वं न भविष्यतीत्यर्थः ।

नन्वेकमङ्गग्रहणं प्रकृतं तद्धलो यदि ।
विशेषणं स्यात्कार्यित्वमङ्गस्येह न लभ्यते ॥

ततश्च सिद्धमित्यादावपि दीर्घः प्रसज्यते ।
अथ निर्दिश्यते कार्यी नाहलः स्याद्विशेषणम् ॥
ततो निहतमित्यादावपि दीर्घत्वमापतेत् ।
सकृच्छ्रुतस्य चैकस्य युज्यते नोभयार्थता ॥

अत आह । 'अङ्गग्रहणमित्यादि' ।

आवर्तमानं वस्त्वेकमप्यनेकस्य शेषताम् ।
भजते भाजनं यद्वन्नृणामसहभोजने ॥

"नामि" ॥ नामित्येतस्य शास्त्रे क्वचिदप्यविहितत्वात्तत्परिज्ञानार्थमाह । 'नामिति षष्ठीबहुवचनमित्यादि' । नामीति दीर्घपाठस्तु न समीचीनः, । 'आगतनुट्कमिति' । गत्यर्थत्वाद्गमेः कर्मणि कर्तरि वा क्तः । आगतो नुडनेन आगतो वा नुडं तदागतनुट्कम् । 'अग्नीनामित्यादि' । अकारान्तस्य तु 'सुपि चे'ति दीर्घः सिद्धः । 'कर्तॄणामिति' । नन्वण इति वर्त्तते, तत्राह । 'अण इत्येतदिति' । 'न तिसृचतसृ'तिप्रतिषेधादिति भावः । 'उत्तरार्थमिति' । 'नोपधाया' इति दीर्घत्वं सनुट्के आमि यथा स्यात् पञ्चानां सप्तानां, 'षट्चतुर्भ्यश्चे'ति नुट्, चर्मणामित्यादावनुट्के मा भूत् । 'कृते च नुटि दीर्घत्वप्रतिपत्त्यर्थमिति' । आगतनुट्कस्य ग्रहणमित्यनुषङ्गः । 'अन्यथा हीत्यादि' । यद्यागतनुट्कस्य ग्रहणं न क्रियेत ततोऽग्निआम्इति स्थिते दीर्घत्वं च प्राप्नोति नुट् च, परो नुट्, नित्यं दीर्घत्वं, कृतेपि नुटि प्राप्नोत्यकृतेपि, ततो दीर्घे कृते ऽह्रस्वत्वान्नुडेव न स्यात्, योयं सिद्धान्ते निमित्तत्वेनोपादानादयत्नेन सिद्धो नुट् स एव न स्यादित्येवशब्दस्यार्थः । ननु चाह चायं ह्रस्वान्तान्नुडिति, न च नित्यत्वाद्दीर्घे कृते क्वचिदपि ह्रस्वान्तमस्ति, तत एवं विज्ञास्यामः भूतपूर्वं यद् ह्रस्वान्तमिति, ननु चेदं संप्रति ह्रस्वान्तमस्ति, 'न तिसृचतसृ' तिसृणां, चतसृणां, नैतदस्ति, इह तावच्चतसृणामिति षट्चतुर्भ्यश्चेति नुट् सिद्धः, तिसृणामित्यत्रापि 'ह्रस्वनद्यापो नुडि'त्यत्र त्रेस्त्रय इत्यतस्त्रेरित्यनुवृत्तेरेव नुट् सिद्धः, यदा तर्हि 'नृ चे'ति दीर्घत्वप्रतिषेधस्तदास्त्यवकाशः, न चैकमुदाहरणं योगारम्भं प्रयोज-

र्यात, यद्येतावत्प्रयोजनं स्यान्नृनद्यापो नुडित्येव ब्रूयात्, ह्रस्वग्रहणात्तु भूतपूर्वगतिर्विज्ञायते, यद्येवमस्त्र्यां दध्याम्, 'अस्थिदधिसक्थ्यक्ष्णा' मित्यनङि कृतेपि भूतपूर्वमेतद्ध्रस्वान्तमिति नुट् प्राप्नोति, ततश्च नोपधाया इति दीर्घत्वे नलोपे च अस्थानामिति प्राप्नोति, यद्वा यदा नुड्विधौ भूतपूर्वगतिस्तदा नुण्नित्यो भवति, अनङ् त्वनित्य इति पूर्वं नुटि कृते ऽस्थीनामिति प्राप्नोति, द्विपदामित्यादौ पादस्य लोपे कृते नुट् प्रसंगः, एवं पद्न्नोमासित्यत्र ये ह्रस्वान्तस्यादेशास्तेष्वपि प्रसङ्गो योज्यः, तस्माच्च शक्यं भूतपूर्वगतिविज्ञानं, यच्चोक्तं त्रेरित्यनुवृत्तेरेव तिसृणामित्यत्र नुट् सिद्ध इति, तदप्यप्रमाणं, नहि द्वयोरन्यतरस्य वा ऽपेक्षायामसत्यां चकारे चासत्यनुवृत्तिः स्वध्यवसाना, तस्मादन्यथा हि नुडेव न स्यादिति स्थितमेतत् । उक्तएवार्थे संग्रहश्लोकं पठति । 'नामिदीर्घ इति' । यदि नुटमकृत्वा आमीत्येव सूत्रं क्रियेतेत्यर्थः । 'वचनादिति' । वचनसामर्थ्याद्भूतपूर्वगतिर्विज्ञायतइति भावः । 'यत्र तन्नास्तीति' । तिसृणामित्यत्र यत्र दीर्घत्वं नास्ति स वचनस्यावकाश इत्यर्थः । 'नोपधायाश्चेति' । चशब्दः समुच्चये ॥

"न तिसृचतसृ" ॥ सूत्रे षष्ठीद्विवचनस्य लुका निर्द्देशः । 'तिसृणां चतसृणामिति' । कथंपुनरत्र दीर्घप्रसङ्गः, यावताजन्तस्य दीर्घो नामीति, न चात्राजन्तता सम्भवति, कथं, तिसृआम् इति स्थिते नुट् प्राप्नोति 'अचि र ऋत' इति रादेशश्च, परत्वाद्रादेशस्तत्राह । 'इदमेवेति' ॥

"छन्दस्युभयथा" ॥ 'तिसृ चतसृ इत्येतयोरिति' । अविशेषेण तु विकल्पो दृश्यते, अयं पितॄणामग्निः, धाता धातृणामिति तैत्तिरीयके ह्रस्वः, बह्वृचे दीर्घः ॥

"नृ च" ॥ 'केचिदत्रेति' । छन्दस्युभयथेत्यतः । ये त्वनुवर्त्तयन्ति ते पूर्वसूत्रे तिसृचतसृग्रहणमनुवर्त्तयन्ति ॥

"नोपधायाः" ॥ अनजन्तार्थ आरम्भः, न इति षष्ठ्येकवचनान्तं, सौत्रत्वान्निर्द्देशस्य यकारलोपस्यासिद्धत्वमनाश्रित्याद्गुणः । अपर आह,

नेत्यविभक्तिको निर्देशः, अकारश्चोच्चारणार्थ इति, पञ्चानामित्यादौ सुब्विधौ नलोपस्यासिद्धत्वान्नान्तत्वम्, उपधाग्रहणमाद्यचो माभूत् । नैतदस्ति प्रयोजनं, दीर्घश्रुत्योपस्थापितमचं नाम्परतया विशेषयिष्यामः, उत्तरत्र च सर्वनामस्थानपरतया, तत्र येन नाव्यवधानमित्येकेन वर्णेन व्यवधाने भविष्यति; उत्तरार्थन्तु, इन्हन्पूषार्यम्णां शावित्यत्र दीर्घविधेरुपधानियमादिति वक्ष्यति तदर्थमुपधाग्रहणम् ॥

"सर्वनामस्थाने चासंबुद्धौ" ॥ 'राजनीति'। विभाषा ङिश्योरित्यल्लोपाभावपक्षे दीर्घत्वप्रसङ्गः, एवं चर्मणामित्यादावपि प्रसङ्गः ॥

"वा षपूर्वस्य निगमे" ॥ अत्र दीर्घश्रुत्योपस्थापितस्याचो विशेषणमुपधाग्रहणं, षपूर्वस्येत्येतदपि तस्यैव विशेषणं, तेन पुल्लिङ्गस्याविरोध इति मन्यमान आह । 'षपूर्वस्याच इति'। 'ऋभुक्षणमिति' । ऋभुक्षशब्द उणादिषु निपातितः, 'इतोत्सर्वनामस्थान'इत्यकारः ॥

"सान्तमहतस्संयोगस्य" ॥ सकारे ऽकार उच्चारणार्थः, सोन्तो यस्य स सान्तः, सान्तेति पृथक्पदं लुप्तषष्ठीकं संयोगस्य विशेषणं, सान्तविशिष्टसंयोगो नकारस्य विशेषणं, महच्छब्दोपि तस्यैव विशेषणं, सर्वनामस्थानइत्यनेनानुवृत्तेन सान्तः संयोगो महच्छब्दश्च विशेष्यते, तेन हंसः हंसावित्यत्र दीर्घाभावः । 'महतश्चेति' । यो नकार इत्यपेक्ष्यते । 'तस्येति' । नकारस्य, कः पुनर्नकारस्योपधायाश्च संबन्धः, यावता यस्मिन्समुदाये योन्त्यादलः पूर्वः स तं प्रत्युपधा, सत्यम्, इह तु गत्यभावात्सामीप्यलक्षणः संबन्धः, नकारसमीपवर्त्तिन्यास्तमेव नकारान्तं समुदायं प्रत्युपधाया इत्यर्थः । कल्पसूत्रेषु च प्रौढोयं व्यवहारः । तद्यथा विसर्जनीयोऽनत्यक्षरोपधो रिषितइति । 'श्रेयानिति'। 'प्रशस्यस्य श्रः'। उगिदचामिति नुम् । 'श्रेयांसीति'। 'जश्शसोः शिः, 'नपुंसकस्य झलच'इति नुम् । 'महानिति' । बृहन्महच्छतृवच्चेति वचनादुगिदचामिति नुम् ॥

"अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम्" ॥ 'आप इति' । अप्शब्दस्य नित्यं बहुवचनान्तत्वाद् द्विवचनैकवचनयोरसंभवः ।

'बह्वाम्यीति' । बहुव्रीहिः । अङ्गाधिकारे तस्य च तदुत्तरपदस्य चेति तदन्तविधिरभ्युपगतः, किं पुनरत्रेष्टव्यं, न तावदृक्पूरब्धूरिति प्राप्तस्य समासान्तस्याभाव इत्याह । 'तत्रेति' । यत्पुनरेष्टव्यं तद्दर्शयति । 'नित्यमपीति' । कृताकृतप्रसङ्गित्वान्नित्यो नुम् । 'जनापवादानिति'। न लोकाव्ययेत्यादिना तृन्योगे षष्ठीप्रतिषेधात् कर्मणि द्वितीयैव भवति, एतच्च तृचन्तत्वाभिव्यक्तये प्रयुक्तम्, एतेन कटस्येति व्याख्यातं, 'तुरिष्ठेमेयस्सु' 'तुश्छन्दसीतिवत् सामान्यनिर्द्देशे कर्त्तव्ये तृन्तृचोर्भेदेनोपादाने प्रयोजनं चिन्त्यम् । 'अव्युत्पत्तिपक्षइति' । नावश्यं व्युत्पत्तिकार्यं भवत्येतदतः कृकमिकंसेत्यत्र कंसग्रहणाल्लभ्यते, ज्ञापकादिति भावः । 'व्युत्पत्तिपक्षइति' । नमेस्तृचि मकारस्य पकारः, नप्ता, नयतेस्तृनि षुक् गुणश्च नेष्टा, त्विषेरच्चोपधायाः, त्वष्टा,क्षदेस्तृन्यनिट्त्वं, क्षत्ता, होता पोता, तृनेव, प्रपूर्वाच्छासेस्तृच्, अनिट्त्वं च, प्रशास्ता । 'एवं भूतानामिति' । अस्यैव विवरणं संज्ञाशब्दानामिति ॥

"इन्हन्पूषार्यम्णां शौ" ॥ 'अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्तीति' इन्ग्रहणेन तदन्तं गृह्यते, इतरेभ्योपि केवलेभ्यः शिर्न संभवति, कथं, हचिति हन्तेः क्विबन्तस्य ग्रहणं, ब्रह्माद्युपपदाच्च हन्तेःक्विब्विहितः, इतरौ च पुल्लिङ्गौ, तस्मात्सर्वैरेव तदन्तविधिर्विज्ञायतइत्याह । 'इन्हन्पूषचर्यमन्नित्येवमन्तानामिति' । 'बहुदण्डीनीति' ।

वैषम्यपरिहारार्थमाद्ययोर्बहुपूर्वयोः ।
उपन्यासो बहुत्वं च पूषादौ कालभेदतः ॥

इति, इह दण्डीनि ब्राह्मणकुलानि ब्रह्महाणि ब्राह्मणकुलानि, इत्यन्तरेणापि बहुशब्दमाद्ययोरिन्हन्नित्येतयोरुदाहरणत्वेनोपन्यासः संभवतीति चोद्यं, वैषम्यपरिहारार्थं तु बहुपूर्वयोरुपन्यास इत्युत्तरं, वृत्रहा इन्द्रः, स एकः, एवं पूषार्यमणौ, तेषां कथं बहुत्वं विशेषणमिति चोद्यं, मन्वन्तरादिकालभेदेनेन्द्रादयोभिद्यन्तइत्युत्तरम् । यद्वा बहुषु यज्ञेष्वाहूता इन्द्रादयो यैर्ब्राह्मणकुलैस्तानि तथोच्यन्ते ।

ननु च 'सर्वनामस्थाने चासंबुद्धा' विति दीर्घत्वं सिद्धं तत्किमर्थो ऽयमारम्भ इत्याह। 'सिद्धे सत्यारम्भइति'। 'इन्नादीनामुपधायाः शाविवेति'। विपरीतस्तु नियमो न भवति इन्नादीनामेव शाविति, सर्वनामानि, तान्येकवचनद्विवचनबहुवचनान्येकश इति निर्द्देशात्। 'इन्ग्रहणाविति'। नन्वत्रास्तु 'सर्वनामस्थाने चासंबुद्धा' विति प्राप्तस्य दीर्घस्य नियमेन व्यावृत्तिः, 'अनुनासिकस्य क्विझलोःक्ङिती' ति प्राप्तो दीर्घः कस्मान्न भवति, नह्यसौ तस्य नियमः, अप्रकृतत्वादसंशब्दितत्वाच्च, सत्यं, नियमविधानसामर्थ्यात्तु तस्याप्यनेन निवृत्तिः, अस्त्वेवं सर्वनामस्थाने, विभक्त्यन्तरे तु सर्वत्रानुनासिकलक्षणो दीर्घः प्राप्नोत्यत आह। 'दीर्घविधिरिति'। य इह शास्त्रे इन्नादीनां दीर्घविधिस्तं विनियम्य तस्य नियमं कृत्वा, क्व, सुठि सर्वनामस्थाने, उपलक्षणमेतत्, तेन शसादेशोपि शिर्गृह्यते, इतिशब्दो हेतौ, स च भिन्नक्रमः श्लोकान्ते द्रष्टव्यः, ततः किं कुर्यात्, शौ नियमं पुनर्विदध्यात्। एवकारो भिन्नक्रमो नेत्यस्यानन्तरं द्रष्टव्यः, एकस्मिन्योगे नियमद्वयस्य कर्तुमशक्यत्वाद्योगविभागः कर्त्तव्य इत्यर्थोदुक्तं भवति, इन्हन्पूषार्यम्णामित्येको योगः, सर्वनामस्थानइति च वर्त्तते, इन्नादीनां च सर्वनामस्थानएव दीर्घो भवतीत्यर्थः, अत्र हन्व्यतिरिक्तानां ग्रहणमुत्तरार्थं, ततः शाविति द्वितीयो योगः, सर्वनामस्थानेपि शावेव न सर्वत्र, ततः सौ चेति सूत्रं विधयेम्, । एवं च योगद्वये क्रियमाणे च सति यदिष्टं संपद्यते तद्दर्शयति। 'भ्रूणहनीति तथास्य न दुष्येदिति'। तथेति योगद्वये सतीत्यर्थः। अस्येति, आचार्यस्य। भ्रूणहनीति सप्तम्येकवचने 'विभाषा ङिश्यो' रित्यल्लोपाभावपक्षे ऽनुनासिकलक्षणो दीर्घो न भवतीत्यर्थः। सप्तम्येकवचनमुपलक्षणं सर्वत्र दीर्घप्रसंगस्योक्तत्वात्, एवं योगविभागेन चोद्यं परिहृत्यैकस्मिन्योगे परिहर्त्तुमाह। 'शास्मीति'। शास्मि उपदिशामि तं प्रकारं येनैकयोगेपि दोषाभावः। अत्रापि सुडिति सर्वनामस्थानं लक्ष्यते सर्वनामस्थानग्रहणं निवर्त्यं अनाश्रितसर्वनामस्थानत्वविशेषे प्रत्ययत्वमात्राश्रयेण, शौ नियमं कुरु वा, एवं वा कुरु पूर्वोक्तं वा प्रकारमित्यर्थः, असत्यपि शास्त्रीयेधिकारे लौकिकापेक्षालक्षणः

स्यात् संबन्ध इति तन्निवृत्त्यर्थमाह । 'अप्यसमीत्येति' । अपेक्षालक्षणमपि संबन्धमनाश्रित्येत्यर्थः । एवं च विशेषमनपेक्ष्य शौ नियमः क्रियमाणः प्रत्ययत्वेन तुल्यजातीये सर्वत्र प्रत्ययान्तरे निवृत्तिं करोति, यद्येवं वृत्रहेवाचरति वृत्रहायतइति क्यङि 'अकृत्सार्वधातुकयो'रित्यपि दीर्घो न स्यादत आह । 'दीर्घविधे रिति' । निर्द्धारणएषा षष्ठी, जातावेकवचनम्, उपधाशब्देन उपधालक्षणं दीर्घत्वमुच्यते, दीर्घविधानमध्ये उपधालक्षणस्य दीर्घस्य नियमादित्यर्थः । एतच्चोपधाग्रहणानुवृत्तेर्लक्ष्यते । हन्तेर्यो हन्तियः, तस्मिन्यो दीर्घविधिस्तत्र न दोष इत्यर्थः । क्वचित्तु हन्तेति निपातोभिमुखीकरणार्थः पठ्यते, अत्रा[1]पि यिग्रहणमुपलक्षणं, दण्डीभूतइत्यत्र 'च्वौ चे'त्यपि दीर्घो भवत्येव । इदानीमसत्यपि योगविभागे सर्वनामस्थानापेक्षायां सत्यामपि न दोष इत्याह । 'सुट्यपीति' । अपिशब्दो प्रकृतप्रतिषेध इत्यनेन संबन्धनीयः । वाशब्दः पक्षान्तरं द्योतयति । अत्रापि सुडिति सर्वनामस्थानोपलक्षणं, तदयमर्थः । अथ वा सुटि सर्वनामस्थाने प्रकृते प्रकरणादपेक्ष्यमाणे, एतेन लौकिकमधिकारमभ्युपगच्छति, शास्त्रीयस्तु नैवाभ्युपगम्यते । 'अनवकाशइति' । हेतुगर्भमिदं विशेषणं, यतो ऽनवकाशः शौ नियमोऽतो ऽप्रकृतस्याप्यनुनासिकदीर्घस्य प्रतिषेधे व्यावृत्तौ कर्त्तव्यायामपि प्रवर्त्तते । कथमनवकाशत्वमत आह । 'यस्य हीति' । द्विविधं सर्वनामस्थानं शिः सुट् च, तत्र शिर्नपुंसकस्य संबन्धी, तत एतस्य विधानात्, सट् तु स्त्रीपुंसयोः, 'सुडनपुंसकस्ये'ति वचनात्, ततश्च यस्य नपुंसकस्य संबन्धिनि शौ नियमः क्रियते सुटि सर्वनामस्थानसंज्ञके नैतन्नपुंसके[2]संभवति, अनपुंसकस्येति वचनात्, हिशब्दो हेतौ, यस्मादेवं तेन कारणेन तत्र सर्वनामस्थाने सुटि नियन्तव्यं व्यावर्त्त्यं दीर्घत्वं न संभतीति सामर्थ्यादविशेषण नियम आश्रीयते, एतदुक्तं भवति, यदि प्रकरणप्राप्तं सर्वनामस्थानत्वं शेराश्रीयते तदा नपुंसकसंबन्धित्वमप्याश्रयणीयमुभयाश्रयणे वायमर्थो भवति, इत्रादीनां नपुंसकानां शावेव

१ अत्रापीति नास्ति इं॰ पु॰ ।
२ नपुंसकक्षर्मिति पाठः इं॰ पु॰ ।

सर्वनामस्थाने दीर्घत्वमिति, एवंविधस्य नियमस्य किं तुल्यजातीयं व्यावर्त्तनीयं नपुंसकानामेवैषां सर्वनामस्थानान्तरं, न च तदस्तीति नियमविधानसामर्थ्यात्प्रकरणप्राप्तं सर्वनामस्थानत्वं सामर्थ्यप्राप्तं च नपुंसकत्वमुभयमप्यविशेषात्परित्यज्य प्रत्ययमात्रे स्त्रीपुंससंबन्धिनि दीर्घत्वं व्यावर्त्यतइति । विनियम्य,साधु नियम्य, । हन्तेरनुनासिकस्येत्यादिना प्रथमश्लोकं व्याचष्टे,सर्वनामस्थानइत्यादिना द्वितीयस्य पूर्वार्द्धं, यस्त्वित्यादिना पश्चार्द्धं, अथ वेत्यादिना तृतीयश्लोकम् । 'अनुवर्त्तमानेपीति'। लौकिक्यत्रानुवृत्तिर्विवक्षिता न शास्त्रीया स्वरितत्वनिबन्धना, तथा हि सति सामर्थ्यप्राप्तस्य नपुंकत्वस्यैव परित्यागः स्यात्, न वचनप्राप्तस्य सर्वनामस्थानत्वस्य, सामर्थ्यादित्युक्तं तदेव दर्शयति । 'शिशब्दो हीति'।'अविशेषेणेति'। नपुंसकत्वं सर्वनामस्थानत्वं च विशेषमनाश्रित्येत्यर्थः । पूर्वं नपुंसकत्वाप्रसञ्जनेन केवलसर्वनामस्थानत्वाश्रयेण नियमो दोषप्रसङ्गात्तथा नाश्रीयतइत्याद्ययोः श्लोकयोरुक्तं, वृत्तिकारस्तु सर्वनामस्थानत्वपरित्यागेन केवलनपुंसकत्वाश्रयणमपि दोषप्रसङ्गादेव सर्वथा न कार्यमित्याह ।'तत्र त्विति'। तुशब्दोपिशब्दस्यार्थे भिन्नक्रमश्चैतदित्यस्यानन्तरं द्रष्टव्यः, तत्रैतस्मिन्नियमे क्रियमाणे नपुंसकस्येत्येतदपि ,विशेषणं नाश्रीयतइत्यर्थः । किमेवं सति सिद्धं भवति तद्दर्शयति । 'तेनेति'। तदाश्रयणे ह्ययमर्थः स्यात्, इनादीनां नपुंसकानां शावेव दीर्घत्वमिति, ततश्च भ्रूणहनि ब्राह्मणकुले इत्यादावेव दीर्घत्वं न स्यात् न लिङ्गान्तरे, तस्मान्नपुंसकत्वमपि विशेषणं नाश्रयणीयमिति भावः । कथं पुनरप्रकृतस्यासंशब्दितस्य नपुंसकत्वस्याश्रयणप्रसङ्ग इत्याह । 'सर्वनामस्थानविधाने त्विति'। सर्वनामस्थानमिति तटस्थमुपलक्षणं, यदिदं सर्वनामस्थानं शिशब्दस्तस्य यद्विधानं जशशसोरित्येतत् तत्रेत्यर्थः । सर्वनामस्थानसंज्ञाविधाने त्विति पाठे यो ऽयं सर्वनामस्थानसंज्ञः शिशब्दस्तद्विधानइत्यर्थः । सर्वनामस्थान[1]संज्ञाविधाने त्विति प्रसिद्धः पाठः, न तत्र समीचीनमर्थं पश्यामः, तथाहि । शि सर्व-

१ सर्वनामस्थानेति नास्ति ङ· पु· ।

नामस्थानमित्येतत्संज्ञाविधानं तत्र नपुंसकग्रहणमस्ति । अथ शिशब्दस्य नपुंकत्वाव्यभिचारादार्थान्नपुंसकस्याश्रयणं, तदत्रैव सूत्रे शक्यते वक्तुं, किमुच्यते संज्ञाविधाने त्विति, अथावश्यमयमेव पाठो योज्यस्तदाङः प्रश्लेषः, स च धात्वर्थानुवादी,सर्वनामस्थानसंज्ञस्याविधानं सर्वनामस्था[1]नसंज्ञाविधानं तत्रेति, स एवार्थो यं पूर्वमवोचाम, तुशब्दो हेतौ, अपि स्यादिति संभावनायां, यस्मान्नपुंसकादेव शेर्विधानं तस्मात्तत्र शिशब्दे क्रियमाणस्य नियमस्य नपुंसकविषयता संभाव्यतइत्यर्थः ॥

"अत्वसन्तस्य चाधातोः" ॥ 'अत्रेत्यादि' । ननु च परत्वान्नित्यत्वाच्च नुमेव पूर्वं प्राप्नोति तत्राह । 'यदि हीति' । इह दीर्घश्रुत्याचः स्थानित्वं, तच्च न स्वरूपेण किं तर्हि उपधाया इत्यनुवृत्तेरुपधात्वनिबन्धनम्, अत एवाजन्तस्य दीर्घाभावः, तस्मात्स्थानित्वेवात्र निमित्तशब्दः प्रयुक्तः । 'पिण्डग्रश्च[2]र्मवइति' । ग्रसु ग्लसु अदने, वस आच्छादने, क्विप्,ननु चानर्थकत्वादेवात्र न भविष्यति, मूलोदाहरणेषु त्वसुन्प्रत्ययस्यार्थवत्त्वात्सिद्धमत आह । 'अनर्थकोपीति' । अत्रैव हेतुमाह । 'अनिनस्मिन्ग्रहणानीति' । अयमेव धातुप्रतिषेधो ज्ञापयति अस्तीयं परिभाषेति । नैतदस्ति ज्ञापकम्, अस्त्यर्थमेतत्स्यात् शत्रूनस्यात् शत्रूनस्यतीति शत्रूव इति, तस्माद्वचनमेवेदम्, अतुग्रहणे त्वर्थवतोतुशब्दस्याभावादेवानर्थकस्य ग्रहणम्, अन्तग्रहणमनर्थकं केवलयोरत्वसोरभावादेव सिद्धमत आह । 'अन्तग्रहणमित्यादि' । उपदेशो लक्षणवाक्यानि गणपाठश्च, प्रयुज्यतइति प्रयोगः, उपदेशे प्रयोग उपदेशप्रयोगः उपदेशे यत्प्रयुज्यते शब्दरूपं तदेकदेशस्याप्यत्वसन्तस्य परिग्रहार्थमित्यर्थः । असति पुनरन्तग्रहणे कस्य ग्रहणं न स्यादित्यत आह । 'इतरथा हीति' । मतुब्ग्रहणमुपलक्षणं, 'कुमुदनडवेतसेभ्यो ड्मतुप्' इत्यस्यापि ग्रहणं न स्यात् । किं कारणमित्यत आह । 'उपदेशइति' । रूपनिर्ग्रहो, रूपनिश्चयः, स यद्यपि लौकिके प्रयोगे भवति, अनुबन्धयुक्तं तु

१ सर्वनामस्थानसंज्ञाविधानमिति नास्ति इं पु० ।
२ चर्म वास्ते इति अधिकं मुद्रितमूलपुस्तके ।

रूपमुपदेशएव निश्चीयतइत्युपदेशइत्युक्तम् । 'नायमत्वन्त इति' । यद्यपि तावता ऽवधेरतुरन्तस्तथापि न तत्पर उपदेशः, यत्परश्चोपदेशो न सोत्वन्तः, पकारान्तत्वात्, ततश्च तस्य ग्रहणं न स्यात्, अन्तग्रहणसामर्थ्यात्तु तावताप्यवधेरत्वन्तस्य ग्रहणम् ॥

"अनुनासिकस्य क्विझलोः क्ङिति" ॥ अङ्गाक्षिप्तस्य झला विशेषणात्तदादिविधिः, क्तितीत्येतत्संभवव्यभिचाराभ्यां झलादेरेव विशेषणम् । 'प्रतानित्यादि' । 'तमु काङ्क्षायां, शमु उपशमे, दमु ग्लानौ, एतेभ्यः क्विप्, मो नोधातोरिति नत्वम्, । 'यङ्लुगन्तात्तासिति' । तस्य सार्वधातुकमपिदिति ङित्त्वं, वस्तुकथनं चैतत्, न त्वनेन निष्ठाशङ्का वार्यते, ङिति खल्वपीत्युपक्रमात्, किं च निष्ठायामिटा भवितव्यं, न चोदित्त्वाद्यस्य विभाषेति प्रतिषेधः, एकाच इति तत्रानुवृत्तेः ॥

"अज्झनगमां सनि" ॥ अत्र यद्युपधाया इत्यनुवर्त्तेत अजन्तेषु व्यञ्जनस्य दीर्घप्रसङ्गः, तस्मान्निवृत्तं, यद्येवं हनिगम्योरलोन्त्यस्य दीर्घप्रसङ्गः, तन्न । अचश्चेत्युपस्थानात् । न चैवमभ्यासस्य प्रसङ्गः, हन् स इति स्थिते परत्वाद्दीर्घत्वे कृते पुनः प्रसङ्गविज्ञानाद् द्विर्वचनम्, अस्तु वा ऽभ्यासस्यापि दीर्घः, ह्रस्व इति ह्रस्वो भविष्यति । 'जिघांसतीति' । अभ्यासाच्चेति कुत्वम् । 'अधिजिगांसतइति' । इङश्चेति गमिरादेशः । इह बहवो गमयः, गम्लृ सृप्लृ गताविति धातुः, णौ गमिरबोधने, सनि चेतीणादेशः, इणवदिक इति वक्तव्यमितीक आदेशः, इङश्चेतीङादेशश्चेति, तत्राविशेषात्सर्वत्र प्रसङ्गे सत्याह । 'गमेरिङादेशस्येति वक्तव्यमिति' । इण इक इङश्चैक एवादेशः स इङोपलक्ष्यते, अतो धातुमेकं वर्जयित्वा त्रयाणामादेशस्य ग्रहणं, तथा च वक्ष्यति अजादेशस्य गमेरिति, एवं चेणिकोरादेशस्यापि गमेर्भावकर्मणोरात्मनेपदइडभावे झलादौ सनि 'अज्झे'ति दीर्घो भवत्येव, सञ्जिगांस्यतइति । 'सञ्जिगंसतइति' । गमेः 'समो गमृच्छी'त्यात्मनेपदं विहितं, तत्र चाकर्मकादिति वर्त्तते तेन सनन्तादपि पूर्ववत्सन इत्यात्मनेपदमकर्मकादेव भवति, ततश्च मातरमित्यपपाठः, मात्रेति तृतीयान्तं पठितव्यम् । 'सञ्जिगांसदिति' । सम्पूर्वाद्गमेः सन्, सकर्मक-

त्वात्परस्मैपदं छान्दसत्वादिडभावः, 'बहुलं छन्दस्यमाङ्योगेपी' त्यडभावः, प्रायेण तु वृत्तौ साट्कं पठ्यते। इहेत्यादिना गमेरिङादेशस्येति वक्तव्यमित्येतत्प्रत्याचष्टे, कथं पुनः सनि दीर्घइत्येतावति सूत्रे क्रियमाणेऽजन्तस्यैव दीर्घत्वं लभ्यते ऽत आह। 'तच्चाचेत्यादि'। सनि दीर्घ इति सूत्रे क्रियमाणे ऽङ्गस्येति वर्त्तते, दीर्घश्रुत्या वा ऽचश्चेत्युपतिष्ठते, तत्र विशेषणविशेष्यभावं प्रति कामचारादुत्तरत्र हनिगम्योर्दीर्घविधानाद्गृह्यमाणमङ्गमचा विशेष्यते, तेन त्वचाङ्गं, विशेषणेन तदन्तविधिर्भवतीति सिद्धमजन्तस्य दीर्घत्वं, यथा ऽकृत्सार्वधातुकयोरित्यत्र तस्मादिहाज्ग्रहणं न कर्त्तव्यं, किमर्थं तर्हि क्रियतइत्याह। 'तत्क्रियतइति'। प्रवृत्तिभेदेन, व्यापारभेदेन, तमेव दर्शयति। 'अजन्तस्येति'। एवं चाज्ग्रहणं सामर्थ्यादावर्त्ततइत्युक्तं भवति॥

"तनोतेर्विभाषा"॥ 'उपसंख्यानेनेति'। तनिपतिदरिद्राणामुपसंख्यानमित्यनेन।

"क्रमश्च क्त्वि"॥ अनुनासिकस्य क्विझलोः क्ङितीति नित्यस्य दीर्घस्यापवादोयं विकल्पः। 'उपधाया इति'। यद्यप्युपधाग्रहणं पूर्वमेव निवृत्तं तथाप्यचश्चेत्युपस्थानादन्यस्य चाचोसम्भवादेवमुक्तम्। 'क्रमित्वेति'। 'उदितो' वेति पक्षे इट्। 'बहि रङ्गोपि ल्यबादेश इति'। एतच्चादो जग्धिर्ल्यप्ति कितीत्यत्र ल्यब्ग्रहणेन ज्ञापितम्॥

"च्छ्वोः शूडनुनासिके च"॥ यद्यत्र केवलस्य छस्य ग्रहणं स्यात्तदा पृच्छेरुपदेशानन्तरं तुकि कृते क्तप्रत्यये परतश्छकारमात्रस्य शादेशे षत्वे तुकः ष्टुत्वे पृट्ष्टइत्यनिष्टं रूपं स्यात्। न च निमित्ताभावे नैमित्तिकस्याप्यभाव इति तुको निवृत्तिः, नहीदं वचनं नापि न्यायः, नहि कृतस्य निवृत्तौ कश्चिन्न्यायः, कथं तर्हि स्यातेऽत्र सत्वे कृते ष्टुत्वस्य निवृत्तिः, नात्र कृतमेव ष्टुत्वं निवर्त्तते किं तर्हि तस्यासिद्धत्वात्पूर्वमेव सत्वं, तत्र ष्टुत्वस्य प्राप्त्यभावः, तदेवं वितुक्कस्य ग्रहणे दोषं दृष्ट्वाह। 'च्छ इत्येतस्य सतुक्कस्येति'। कथं पुनर्ज्ञायते च्छेत्यस्य सतुक्कस्य ग्रहणमिति, यजयाच्चेति नङो ङित्करणात्, तद्धि विश्न इत्यत्र गुणो माभूदिति, सतु-

क्नुस्यैव शादेशे लघूपधत्वाद्गुणप्रसङ्गः, वितुक्कस्य तु शादेशे तकार उपधा नेकारः, संयोगे गुर्विति गुरुसञ्ज्ञश्च, पृच्छेस्तु कृङितिति सम्प्रसारणार्थे नङो ङित्त्वं न भवति, 'प्रश्ने चासन्नकाल' इति निपातनात्, तस्मात्सतुक्कस्य ग्रहणम्, एवं च कृत्वा पृष्टप्रतिवचनइति निर्द्देशोपपत्तिः। ननु सतुक्कस्य ग्रहणेप्यलोन्त्यस्येति छमात्रस्य प्रसङ्गः, नह्यनर्थके ऽलोन्त्यविधिरस्ति, अथ सतुक्केन च्छेनाङ्गस्य विशेषणात्तदन्तस्याङ्गस्यालोन्त्यस्य प्रसङ्गः, तदापि निर्द्दिश्यमानस्यादेशा भवन्तीति सह तुका भविष्यति । 'अन्तरङ्गत्वादिति' । उपदेशानन्तरं प्रसङ्गादन्तरङ्गत्वं, शस्तु बहिरङ्ग, कथम्, उत्पन्ने प्रत्यये ऽङ्गसञ्ज्ञा, अङ्गस्य च शादेशः, न च वार्णादाङ्गं बलीयः, भिन्नकालत्वात् । 'औणादिके नप्रत्ययइति'। साक्षात्सिवेरविहितोपि बाहुलकान्नप्रत्ययः । 'पुगन्तलघूपधगुणात्पूर्वमूट् क्रियते इति'। अन्तरङ्गत्वादिति वक्ष्यमाणो हेतुरिहाप्यपकृष्टव्यः, गुणो हि बह्वपेक्षो बहिर्भूतप्रत्ययापेक्षश्च, ऊट् तु विपर्ययादन्तरङ्गः, तेन स एव पूर्वं क्रियते, तत्र कृतेन्तरङ्गत्वाद्यणादेश इति, अन्तर्भूताजपेक्षत्वाद्यणोऽन्तरङ्गत्वं, गुणस्तु पूर्ववदेव बहिरङ्गः । 'नानाश्रयत्वाच्चेति' । यत्रैकमेव निमित्तीकृत्याङ्गवर्णयोर्युगपत्प्राप्तिस्तत्र वार्णादाङ्गं बलीयः, तथा ऽचो ञ्णितिवृद्धेरवकाशो गौरिति, यणोवकाशो दध्यत्रेति, चकारेत्यत्र कृञ इति स्थिते उभयप्रसङ्गे परामपि वृद्धिं बाधित्वान्तरङ्गत्वाद्यणि प्राप्ते वार्णादाङ्गं बलीय इति वृद्धिर्भवति । 'शब्दप्राडिति' । व्रश्चादिषत्वं, जश्त्वचर्त्वे । 'गोविडिति' । विच्छ गतौ, गां विच्छायतीति विग्रहः 'आयादय आर्द्धधातुके वे' त्यायप्रत्ययाभावपक्षे क्विप् । 'अक्षधूर्हिरण्यष्ठ्यूरिति' । दिविष्ठिविभ्यां क्विप्, सुब्धातुष्ठिवुष्वष्कतीनां प्रतिषेधइति सत्वाभावः। ननु चान्तरङ्गे यणि बहिरङ्गस्योठो ऽसिद्धत्वाद्यणादेशेन नात्र भवितव्यमत आह । 'असिद्धं बहिरङ्गमन्तरङ्गइति' । नाजानन्तर्यइत्यस्यायमर्थः, यत्रान्तरङ्गे बहिरङ्गे वा ऽचोरानन्तर्यमाश्रीयते तत्र बहिरङ्गपरिभाषा न प्रवर्त्ततइति, एतच्च षत्वतुकोरसिद्ध इत्यत्र ज्ञापितम् । 'द्युभ्यामिति' । ऊठोवकाशो द्यूतः द्यूतवान्, उत्वस्यावकाशोऽ-

र्हाबेमलस्तु, द्युभ्यामित्यादावुभयप्रसङ्गे परत्वादूट् प्रसङ्गः, तस्मात्क्ङि-तीत्यत्रानुवर्त्तयितव्यमिति भावः । 'केचिदित्यादि' । तेषां मते हि दिविप्रभृतीनां यङ्लुगन्तानां तिप्सिपोरीडभावपक्षे ऊठि सति देदिवीति देद्योति, देदिवीषि, देद्योषीति, पूर्वत्र तु पक्षे वलिलोपे देदेति देदे-वीति । 'कथं द्युभ्यां द्युभिरिति ऊठि कृतइति' । क्ङितीत्यस्याननुवृत्त-त्वात् अत्रापि परत्वादूठा भाव्यम्, । ऊठि च कृते द्यूभ्यां द्यूभिरिति भवितव्यमिति प्रश्नः । 'दिव उदि' ति तपरकरणादित्यादि' । अत्र हि तपरकरणं न कर्त्तव्यं यतोऽर्द्धमात्राकालस्य व्यञ्जनस्य मात्राकालो ह्रस्व एव सिद्धस्तत्क्रियते लक्षणान्तरेणापि दीर्घो माभूदिति, तेन परमप्यूठं बाधित्वा दिव उदित्यनेन मात्राकालो भविष्यतीत्यर्थः । अथ वा ऊठि कृतइत्यस्य परेण परिहारग्रन्थेन संबन्धः, तत्रायमर्थः । क्रियतां सामान्येन क्ङिति चान्यत्र च ऊट्, कृते तु तस्मिन्नेकदेशविकृतस्यानन्यत्वात्तस्ये-वोठः स्थाने तपरत्वान्मात्राकालो भविष्यति । 'तेषामित्यादि' । क्ङि-द्ग्रहणे हि निवृत्ते सति तृजादावपि शस्यानेन विधानाद्व्रश्चादिसूत्रे छग्र-हणं न कर्त्तव्यं, शकारस्य षत्वविधानेनैव सर्वस्य सिद्धत्वात्, ये तु क्ङिद्-ग्रहणमनुवर्तयन्ति तेषां तृजादौ शत्वस्याभावाच्छस्यैव षत्वं विधातव्यं, तत्रापि सतुक्कस्य ग्रहणम्, ऊडयं यदि टित्स्यादाद्यन्तौ टकितावित्यादिः प्रसज्येत, अस्तु वकारस्य, वलि लोपे सति अक्षद्यूरित्यादि सिद्धं, न च ना-प्राप्ते वलिलोपआरभ्यमाण ऊड्लोपस्य बाधकः स्यादिति शङ्कनीयं, भिन्नजानीयत्वात्, ऊडागमः, लोप आदेशः, न च भिन्नजातीयं बाधकं भवति[1], नहि दधि ब्राह्मणेभ्यो दीयतां कम्बलः कौण्डिन्यायेति दध्नः कम्बलो बाधको भवति । सत्यम् । उत्तरसूत्रे त्वागमिभेदाद् द्वावूठौ स्याताम्, एको वकारात्पूर्वो ऽपर उपधायाः, तस्मादूठष्टित्वमवश्याङ्गी-कर्त्तव्यमितिमन्यमानस्तदङ्गीकरणे प्रयोजनमाह । 'ऊठष्टित्करणमिति' । एवं ब्रुवता एत्येधत्यूठ्स्विति ठकारस्य चर्त्त्वेन निर्द्देश इत्युक्तं भवति, यत्र ठकारो न क्रियते ततो वृद्धिविधावपि नोपादीयेत, ततश्च प्रऊहते प्रोह-

१ अक्षद्यूरित्यादि सिद्धमिति इं॰ पु॰ अधिकम् ।

तदन्यत्रापि स्यात् । 'वाह ऊडित्ययमपि ठिद्वेति' । अन्यथा तस्य वृद्धिविधौ ग्रहणं न स्यात्, अत्रापि ठकारस्याश्रवणं जश्त्वचर्त्वाभ्याम् ॥

"ज्वरत्वरस्रिव्यविमवामुपधायाश्च" ॥ ज्वर रोगे, ञित्वरा संभ्रमे, स्रिवु गतिशोषणयोः, अव रक्षणे, मव बन्धने । 'ज्वरत्वरेत्यादि' । वस्तुकथनम् ॥

"राल्लोपः" ॥ 'मूर्छेति' । मूर्छा मोहसमुच्छ्राययोः । 'हुर्छेति' । हुर्छा कौटिल्ये । ननु च पूर्वत्र सतुक्कस्य छकारस्य ग्रहणं वितुक्कश्चायं तत्कथमत्र लोप इत्याह । 'राल्लोपइत्यादि' । ननु यदि नाम रेफात्परः सतुक्कश्छकारो न संभवति किमेतावता ऽप्रकृतस्यासंस्थितस्य केवलस्य छस्य ग्रहणं भवति, तस्मादेवं व्याख्येयं, पूर्वत्र द्विच्छकारो निर्द्देशः, तत्रैकः सतुक्को ऽपरस्तु केवलो गृहीतस्तत्र च राल्लोपे सतुक्कस्य छस्यासंभवात्केवलो गृह्यतइति, यदि द्विच्छकारकः पूर्वत्र निर्द्देशः, च्छ्वोरिति निर्द्देशो नोपपद्यते, कथं, समाहाद्वन्द्वे एकवचनप्रसङ्गः, नैष दोषः । पूर्वं द्वयोश्छकारयोः समाहारद्वन्द्वं कृत्वा पश्चाद्वकारेणेतरेतरयोगे द्वन्द्वः करिष्यते, एवमपि द्वन्द्वाच्चुदषहान्तात्समाहारइति समासान्तः प्राप्नोति, तर्हि छकारवकारयोः समाहारद्वन्द्वं कृत्वा तेन सह सतुक्कस्य छस्येतरेतरयोगे द्वन्द्वो भविष्यति, यदि पूर्वत्र वितुक्को गृह्यते वाञ्छतेः क्विपि शत्वं प्राप्नोति, इष्टमेवैतत्संगृहीतं वांशौ वांश इत्येव भवितव्यम् ॥

"असिद्धवदत्रा भात्" ॥ आ भादितिनिर्द्देश आ कडारादित्यनेन व्याख्यातः, सिद्धशब्दो निष्पन्नवचनः, न सिद्धो ऽसिद्धो यः पुनः सिद्धोऽपि सिद्धकार्यं न करोति । 'स तेन तुल्यं वर्त्ततइति' । असिद्धवत्, किं पुनस्तत्, प्राधान्यात्कार्यमिति प्राप्तं, शास्त्रं हि कार्यार्थत्वादप्रधानं, कार्यस्य चासिद्धत्वे आदेशलक्षणप्रतिषेध एव सिद्ध्येत्, आगहि जहीति, न तूत्सर्गलक्षणस्य भावः, एधि शाधीति, कार्यस्यासिद्धत्वे ह्ययमर्थः, आ भाच्छास्त्रीयं कार्यं प्रवृत्तमपि प्रवृत्तकार्यं न करोतीति, अतः प्रवृत्तकार्यनिबन्धनस्यैव कार्यस्य प्रतिषेधः स्यात्, च न एधि शाधीत्यत्र एत्व-

viency of the assertion 'poison yourself' is to be assumed on the ground of the assertion coming from a well-wishing friend. And as such the (*a*) import must lie in the meaning of the pronounced word,—the meaning being "since eating in his house is worse than poisoning yourself, therefore never eat in his house" (the whole of this becoming the direct meaning; it being impossible to maintain the subserviency of the former assertion, when interpreted directly). If every meaning apprehended after the uttering of a word be said to form the Denotation, then why should not the expression of joy and dejection—in the face of a Brahmana on being informed of his son's birth and simultaneously of the pregnancy of his unmarried daughter—be said to be a part of denotation (for this is also apprehended on the utterance of the words)? And then again why have Indication either? Indication also may be attributed, as you do with regard to Suggestion, to the gradual operations of the denotation itself. Why (*b*) also have the greater strength of the preceding than of the following—among Direct Revelation, Power, Sentence, Context, Place and Name (mentioned by Jaimini in order of precedence, making the following one a weaker proof than the preceding). Thus even on the doctrine of Anvitābhidhāna, the necessity of Suggestion is proved with regard to the affirmative meaning of "the sandal paintings," &c.

(*a*) The *Kāvyapradīpa* and *Udyota* thus explain—The assertion comes from a friend: as such there must be a connection between the two assertions: this cannot be the ordinary relation of nominative and objective (subject and object), this being barred: nor can the relation be that of mutual fulfilment, based on the primary meaning of each, since the primary meaning of the first assertion is barred with reference to a friend's advice: consequently the subserviency of the former assertion is assumed on the ground of Indication. Hence the indicated meaning of the assertion 'poison yourself' would be the 'predication of greater evils in connection with eating in the man's house than in poisoning one's self;' and this has a relation—that of being the reason—based upon meaning, with the following assertion. Hence it is proved that the import must lie in the meaning of the words of the sentence itself.

(*b*) The *Vivarana* thus explains—If all that is apprehended after the utterance of a word, be called denotation, then as of *Sruti* so of all others, all the meanings apprehended would be denotation only. Hence everyone of them would be capable of expressing all the meanings and as such to speak of greater remoteness of the following from the meaning, than of preceding would be improper.

[*Page* 261.] Further in कुरुरुचिम् there would be no poetical fault (*a*) by inverting the order of the words; since no improper meaning is connected with the other word-meanings and as such is undenoted; and consequently such phrases (known to be indecent) would not be inadmissible in poetry.

If again we do not accept the relation of suggestion and the suggested, apart from that of the denotation and the denoted, how can we explain the classification of the faults Asādhutva (*b*) and Kashtatva into *permanent* and *transitory* respectively? Nor can it be said that the division is inexplicable; for we actually feel them as different.

By assuming Suggestion apart from Denotation, the division becomes quite explicable; since Suggestion being manifold can be said to be proper in one place and improper in another.

In such instances as—

"द्वयङ्गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः ।
कला च सा चान्द्रमसी कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी ॥

["Both (Pārvati and Moon) have become pitiable by associating themselves with the Beggar (Çiva),"]—what special excellence would attach to Poetry by using the term '*kapāli*' (a name of Çiva, and literally meaning, a "beggar") instead of "Pinaki" or any other name of Çiva, denoting exactly the individual Çiva?

[*Page* 263]. Further, the denotation of a word is comprehended uniformly by all listeners, and as such is restricted to that particular (expressed) meaning; *e. g.* in the sentence "The Sun is set," the denoted meaning cannot be said to be manifold; the suggested or implied meaning of this very sentence, on the other hand, becomes innumerable in accordance with the diversity of oc-

(*a*) Indecency.

(*b*) Asādhu is a grammatical anomaly—this is called *permanent* as being a fault in every kind of poetry. The harshness of sound is called transient since it is a fault in Erotic and Pathetic, but proper in the Heroic, &c.

casion, speaker, &c. (vide *supra*). As for example: by saying 'The Sun is set' the following meanings are implied:—(1) It is no time to attack the enemy (to a fighting general); (2) Now you may repair to your lover (to a woman ready for her march); (3) Your lover is almost arrived (when spoken to a woman whose lover had promised to be with her in the evening) (to a disconcerted woman); (4) Let us now rest from business (when spoken by a business man); (5) Let us perform evening ablutions (when spoken by religious persons); (6) Go not very far (when addressed to a traveller); (7) Bring in the cows (when addressed to a cowherd); (8) Now it shall not be very hot (spoken among friends); (9) Remove the things kept for sale (spoken by street-vendors); and (10) The lover has not yet come (spoken by a woman impatient for her lover's embrace.)

Points of difference between the direct (expressed) and indirect (suggested) signification.

[*Page* 265]. Further the denoted and the suggested meanings differ in the following points:—(1) In point of their form—*e. g.* in the instance 'The sandal paintings,' &c., the implied meaning is quite the contrary of the negative denoted meaning; and in

"You, noble men, having given up all partiality and having considered the point, definitely say whether the bodies of the mountain or that of lovely women smiling with love, are to be waited upon (enjoyed)." In this the denoted meaning is mere *doubt*, whereas the implied meaning to the Erotic man is definitely expressed in favor of the latter alternative, as the former is to the Quietistic; and again in the *verse*.—

"Why should you be proud of your having appropriated to yourself the wealth and prosperity of your enemies whose heads were chopped off by your sharp sword? Do you not see that these your enemies, bodyless and armless, have taken away your fame of victory—you who have all your enemies killed—to heaven?,"—in this the expressed meaning is *reproach* whereas the implied meaning is *praise*.

(2) In point of time: The implied meaning being comprehended after the denoted meaning.

(3) In point of substratum: the denoted meaning being located in words alone, and the implied, (located) in words, in its affixes and suffixes, in the denoted meaning of the word, in letters, and in the position of words.

(4) In point of their motive (instrumental cause): the denoted being comprehended through philological knowledge and the implied by means of clear intellect helped by occasion (speaker, &c. vide *supra*).

(5) In point of their effects: the ordinary listener merely comprehending the denoted meaning, whereas the implied meaning being comprehended by clever people and producing a peculiar emotion in their hearts.

(6) In point of number (of application): in the example 'The sun is set' the meaning denoted cannot be more than one, whereas the implied meanings have already been enumerated to be nine and more; and lastly

(7) In point of the person addressed: in the example—

"Who will not be displeased to see the lips of his wife cut? I told thee not to smell that lotus with the bee inside; but having not listened to my warning, thou must now bear the consequences of thy indiscretion,"—the denoted meaning is addressed to the woman, but the implied (that her lips have been cut by a bee, not by the kiss of another man) is addressed to her husband.

And if even in the face of so many points of dissimilarity the denoted and the implied meanings be said to be identical, then there would be no difference between blue and yellow, &c.;—in fact there would be no difference between any two things (however dissimilar). It has been said—"The existence of contradictory properties and the difference of causes, constitute the difference between objects."

[*Page* 270]. Denotative words are dependent on the meaning, not so the Suggestive. Hence the Expressive or Denotative cannot be said to be identical with the Suggestive.

Further, in the instance 'Hearing the clatter of parrots, &c.' where the denoted meaning rests in itself, after having signified the implied meaning; even in this instance of Poetry of Subordinate Suggestion, to which process shall we attribute the non-expressed meaning comprehended—which can be neither the intended nor the directly expressed meaning?

[*Page* 271]. *Objection* :—The indicated meaning also becomes manifold and variously nameable (as *suggestion*), in the following instances. "I am Rāma, I shall bear all" (here 'Rāma' indicates 'ability to suffer all kinds of privations'), '*By Rāma, overfond of his life, nothing was done that was proper for affection,* (here 'Rāma' indicates 'cruelty') and in '*This Rāma has become famous through his prowess*' (where 'Rāma' indicates pride and bravery). In all these, Indication also depends both on Word (since through Word alone is Indication possible) and its Meaning (since the barring of the primary meaning, &c. are causes necessary for Indication); and further, Indication also stands in need of occasion, &c. Then what is this,—a new name 'suggestion?'

To this we *reply:* The range of Indication, though manifold, is yet limited, like a word of diverse meanings. For the primary meaning cannot indicate an indefinite relation (other than the known ones). The implied meaning, on the other hand, has its relative range limited as well as unlimited and mediate.

Nor is the primary meaning barred in Suggestion (where the denoted meaning implies another) *e. g.* in 'my mother-in-law lies here' &c. Then how can this process be called Indication (in face of so many points of dissimilarity)? Moreover it has already been shown that the process of suggestion is necessary for the fulfilment of Indication itself (with regard to the implication of its motive).

[*Page* 274]. As Denotation is dependent on convention, so is Indication, upon special convention based on the three causes, the barring of the primary meaning, &c.; and hence is this latter called the 'tail' as it were, of Denotation.

[*Page* 275]. Nor can Suggestion be said to be identical with Indication; since the former is seen (in Suggestion *per* Indication) to follow the latter. Nor can Suggestion be said always to follow and (hence indispensably dependent upon) Indication, since sometimes it is founded on simple Denotation. (Vide *supra*).

Nor, lastly, can Suggestion be said to be based on Indication and Denotation combined; because it is seen to be brought about even by mere letters without any specific denotation, (Vide Chap. VIII.): nor can it be said to be due to Word alone, since it is known to be signified even without words, such as by the different movements of the eyes. Consequently it is decided that there is a certain process (of implication), exceeding the bounds of Denotation, Import and Indication, and known by such names as 'Suggestion,' &c.—whose existence cannot be gainsaid.

In—'*my mother-in-law lies here, &c.*' the suggested meaning has a fixed relation (the only suggestion being that 'you are welcome to my bed'); in '*who shall not be displeased &c.*' the suggestion has an unrestricted relation (there being no relation known to subsist between the Denoted and the Suggested meanings); and in,—

"Lakshmī, on the occasion of inverted intercourse, seeing Brahmā on the navel-lotus of Nārāyaṇa, closed his right eye, being herself steeped in emotion"—the suggestion is based on mediate relation; since by 'Hari' the fact of the right eye being the Sun, is suggested, by the close of which is implied sunset, whence the shutting up of the blown lotus, and the consequent concealment of Brahmā; and suggested by this is the fact that her secret parts not being seen (by Brahmā) the dalliance was free and uninterrupted.

[*Page* 278]. (*a*) Some assert that 'the meaning of a sentence, comprehended by an indivisible consciousness, is the denoted meaning; and the sentence alone is the denoter.' Even these, the Vedāntins, when in contact with Nescience or Illussion, will have to assume Words and their meanings; and as such according to these also, Suggestion will have to be accepted in the above examples.

[*Page* 279]. *Objection:* No meaning, altogether unconnected with the denoted meaning, can be said to be suggested; since in that case any and every meaning might be said to be implied by any and every word. And hence the relation of the suggester and the suggested is not possible without some restriction of the relation. And being invariably accompanied (by the said relation) (this relation would supply the instance required in the Inference) and being restricted to (not existing in anything opposed to the major term), and located in a particular object (which would be the minor, the subject of the syllogism),—the suggestion would only be a knowledge of a subject (the minor term of a syllogism) founded on the *threefold (b) hetu* (the middle term), and would thus only be an instance of Inference, pure and simple. Further in such instances as,—

"O virtuous one! roam about as you choose, the dog has been killed by the lion living in the cave on the banks of the Godāvarī,"—from the propriety of roaming in the house by the removal of the dog is inferred the impropriety of roaming about on the banks of the Godāvarī on account of the lion living there.

(*a*) "The relation of subject and copula is not possible without the relation of the subject and attribute; and this latter too is not possible, owing to the falsity of the Universe, to apply to it; nor can it apply to Brahman, since It is devoid of attribute; consequently even without the knowledge of words and meanings, the indivisible sentences—such as 'Brahman is truth, knowledge, endless'—denote the indivisible Brahman." To this view the author replies that the above might be true for one who has gone beyond the world, but as long as he has to do with the world and its doings, the Vedāntin cannot lose sight of Words and Meanings; and hence, as a necessary consequence, of Suggestion.

(*b*) (1) Existence in something having the major term (in this case, the restrictive relation).
(2) Non-existence in anything contradictory to the minor term.
(3) Existence in the minor term.

The roaming about of a terrified person is always preceded by an absence of all cause of fear; on the banks of the Godāvarī, however there is the lion, the cause of fear; and hence here we have (*a*) the negative invariable concomitant (*i. e.* the absence of the cause of fear, which is the invariable concomitant of the listless roaming of a man full of fear).

[*Page* 282]. To this we *reply*:—The cause (forming the middle term of your syllogism that you bring forward) is not universal, since there are circumstances—in the shape of a superior's commands, affection for the beloved and others like this—under which, in face of all cause of fear, the timid person does go about; and further the man may be heroic, and though fearing the dog, he may not fear the lion; and thus your cause is (*b*) *inconsistent* (to fact) also. Further, the existence of the lion on the banks of the Godāvarī is not ascertained either by Perception or Inference; but it is from mere assertion which cannot be accepted as a conclusive proof; and there being no definite relation between the word and the meaning (this of course in the assertion of wicked people), there would be no ascertainment of the meaning (that is to say there can be no Inference founded upon a doubtful middle term.)

And from such a reason (the middle term) (non-universal, contradictory or inconsistent and doubtful) (*c*) how can there be any definite inference with regard to the Sādhya, the major term

(*a*) यत्र भयकारणाभावाभावः, तत्र भीरुभ्रमणाभावः—इति व्यतिरेकव्याप्तिः ॥

Hence concomitance per negation is shown which would give rise to a negative syllogism:—*Celarent* in Fig. I.

No case of presence of cause of fear is *a case where a timid man can roam.* (E.)

This is *a case of presence of cause of fear (the lion).* (A)

∴ *This* is not *a case where a timid man should roam.* (E)

(*b*) Since the cause, the presence of the object of fear, is also found together with the negation of the major term (the negation of non-roaming, *i. e.* roaming) and thus the साध्य (Major term) not being the अप्रतियोगी of the negation of the *hetu* (the middle term) there is no Vyāpti—the Major Premise.

(*c*) "What is here the Sādhya, *i. e.* the predicate of the syllogism or the major term—is it (1) the coward fearing the dog, or (2) the heroic man or lastly (3) any common individual? In the first, as in the last, the *hetu*, the middle term, becomes fallacious, *i. e.* non-concomitant with the Sādhya, the major term; since any individual can go abroad, owing to a superior's commands and diverse other causes. In the second case the Vyāpti, the Major Premise becomes contradictory; since the heroic man might be afraid of being defiled by the touch of the dog and yet might be hunting abroad in search of such ferocious beasts as lions, &c."—*Kāvyapradīpa.*

शृणोतीति, न चात्र विवदितव्यं स्पष्टो ह्येकेषां माध्यन्दिनानामाम्नाये शारीराज्जीव एवापादानमिति, योऽकामो निष्काम आप्तकाम आत्मकामो न तस्मात्प्राणा उत्क्रामन्तीति शरीरात्प्राणानामुत्क्रान्तिप्रसङ्गाभावात्तत्प्रतिषेधो नोपपद्यते इति चेन्न तस्य तावदेव चिरमिति विदुषः शरीरवियोगकाले ब्रह्मसम्पत्तिवचनेन प्राणानामपि तस्मिन् काले शरीराद् विदुषो वियोगः प्रसज्यते, ततश्च देवयानेन पथा ब्रह्मसंपत्तिर्नोपपद्यत इति न तस्य प्राणा उत्क्रामन्ति देवयानेन पथा ब्रह्मप्राप्तेः प्राग् जीवाद्विदुषोऽपि प्राणा न विश्लिष्यन्तीत्युच्यते ।

टी० "तस्ये"ति, षष्ठ्यन्ततच्छब्दनिर्दिष्टः शरीरोऽस्तु तत्सम्बन्धिनां प्राणानामुत्क्रान्त्यपादानं शरीरमेवेत्यर्थः षष्ठ्या उपकरणोपकरणित्वलक्षणसम्बन्धपरत्वमभ्युपगम्य परिहरति "ने"ति, अश्रुतस्य धर्मिणस्तस्यापादानत्वस्य चोभयोः कल्प्यत्वादपि सिद्धरूपस्यैव धर्मिण अपादानत्वमात्रकल्पनं युक्तमित्यर्थः । षष्ठ्या एवापादानत्वपरतामाह "किञ्चे"ति, प्राणानां जीवसम्बन्धकथननैरर्थक्यात् षष्ठ्या अपादानवाचकत्वाच्च शारीर एवापादानमित्यर्थः नायमर्थः कथंचिदर्थानुगुण्यावगम्यः अपि तु कण्ठोक्तश्चेत्याह "न चात्रे"ति, स्पष्टो ह्येकेषामिति व्याख्येयं पदद्वयं व्याचष्टे "माध्यन्दिनाना"मिति, यथा योविज्ञाने तिष्ठन्नित्यत्र विज्ञान–शब्दः समानप्रकरणस्थेन य आत्मनि तिष्ठन्नित्यात्म–शब्देनात्मपरो निश्चीयते तथा तस्येति षष्ठ्यन्तपदं तस्मादिति पञ्चम्यन्तपदेन पञ्चम्यर्थे निश्चीयते इत्यर्थः । चोदयति "शारीरादि"ति, प्रसक्तस्य हि प्रतिषेधः अत्र तदभावान्न निषेधोपपत्तिरित्यर्थः । परिहरति "ने"ति, शरीरवियोगकाले–प्रारब्धकर्महेतुकचरमशरीरवियोगकाल इत्यर्थः । तदानीं शारीरात् प्राणानां

वियोगस्यानिष्टत्वे सति हि तन्निषेधः कार्य्य इत्यत्राह "ततश्च देवयानेने"ति न तस्य प्राणा इत्यस्यार्थमाह "न तस्ये"ति, ।

सू० आर्त्तभागप्रश्नोऽपि यदा विद्वद्विषयः तदाऽयमेव परिहारः, स त्वविद्वद्विषयस्तत्र प्रश्नप्रतिवचनयोर्ब्रह्मविद्याप्रसङ्गादर्शनात्, तत्र हि ग्रहातिग्रहरूपेणेन्द्रियेन्द्रियार्थस्वभावोऽपामगन्यन्नत्वं म्रियमाणस्य जीवस्य प्राणपरित्यागो मृतस्य नामवाच्यकीर्त्यनुवृत्तिस्तस्य च पुण्यपापानुगुणगतिप्राप्तिरित्येतेऽर्थाः प्रश्नपूर्वकं प्रत्युक्ताः, तत्र चापपुनर्मृत्युं जयतीत्यपामगन्यन्नत्वज्ञानादग्निजय एव मृत्युजय उच्यते अतो नात्र विदुषः प्रसङ्गः, अविदुषस्तु प्राणाऽनुत्क्रान्तिवचनं स्थूलदेहवत्प्राणा न मुञ्चन्ति, अपि तु भूतसूक्ष्मवज्जीवं परिष्वज्य गच्छन्तीति प्रतिपादयतीति निरवद्यम् ॥

सू० स्मर्यते च ॥ १३ ॥

स्मर्य्यते च विदुषोऽपि मूर्द्धन्यनाड्योत्क्रान्तिः ।

टी० आर्त्तभागेत्यादि, ग्रहातिग्रहरूपेण—ग्रहः पात्रविशेषः, तत्स्थद्रव्यमतिग्रहः, तद्रूपेण आकर्षकरज्जुतत्समाकृष्यरूपेण वा अपामगन्यन्नत्वम् अग्नेरपां भक्षकत्वानुसन्धानं विहितं फलविशेषाय उदस्मात्प्राणाः क्रामन्तीत्यादिना जीवस्य प्राणपरित्यागकथनमपपुनर्मृत्युं जयति मृत्यु—शब्दवाच्यमग्निमपजयति, उदस्मादित्यादि अविद्वद्विषयं चेत्कथं प्राणानुत्क्रान्तिवचनमित्यत्राह "अविदुषस्त्वि"ति, । सू० स्मर्य्यते च ॥ १३ ॥ ऊर्ध्वमेकमित्यादिवचनं याज्ञवल्क्यस्मृतौ, तेषां नाडीविशेषाणाम् । परे तु समाना चेत्यादिसूत्रमेकं पृथगधिकरणं वर्णयन्ति निर्गुणब्रह्मविद इव सगुणोपासकस्याप्यमृतत्वप्राप्तिश्रवणेन पुनर्भवाभावात् पुनर्भवहेतुभूतभू-

ताश्रयविशिष्टोत्क्रान्तिः सगुणनिष्ठस्यापि न सम्भवति, विद्याप्रकरणेपूत्क्रान्तिकथनं स्वापादिवत्सर्वप्राणिसाधारणोत्क्रान्त्यनुवादस्तेजस्सम्पत्तिस्थानभूतपरदेवतातादात्म्यप्रतिपादनार्थमिति पूर्वपक्षं कृत्वा अविदुषः सगुणविदुषश्च समानोत्क्रातिर्नाडीप्रवेशात् पूर्वमिति सिद्धान्तयन्ति, निर्गुणविद्याया अप्रामाणिकत्वादेव तदयुक्तं तदापीतेरित्यादिकमधिकरणान्तरमाहुः तेजः परस्यां देवतायामिति साध्यक्षस्य सप्राणस्य सकरणग्रामस्य तेजस आत्यन्तिकप्रलय उच्यते ब्रह्मणः सर्वप्रकृतित्वात् तत्र लयोपपत्तेरिति पूर्वपक्षं कृत्वा ज्योतिष्टोमादिविधानविद्याशास्त्रवैयर्थ्यादिभिः सुषुप्तिप्रलयवन्नात्यन्तिक इति सिद्धान्तयन्ति, तदप्ययुक्तं कृतकरत्वात्, स एव तु कर्मानुस्मृतिशब्दविधिभ्य इत्यत्र सुषुप्तौ सुनिरूपितो ह्ययमर्थः । न च शङ्कान्तरमस्ति अत एकाधिकरणमेव युक्तम् ॥

सू० "ऊर्द्ध्वमेकः स्थितस्तेषां योभित्त्वा सूर्य्यमण्डलं ब्रह्मलोकमतिक्रम्य तेन यान्ति परां गति"मिति ॥ आसृत्युपक्रमाधिकरणं समाप्तम् ॥

टी० इयञ्च तेषां सूत्रयोजना. तच्च तेजोभूतान्तरसंसृष्टं सूक्ष्मं नाडीनिष्क्रमणश्रुतिरूपप्रमाणात्सौक्ष्म्यमुपलभ्यते, अत एव पार्श्वस्थैरनुपलम्भोमूर्त्तान्तराप्रतिघातश्चेति, अत एव सूक्ष्मत्वात् स्थूलदेहोपमर्देन नोपमृद्यत इतीदमधिकरणमविदुष आत्यन्तिकलयाभावसमर्थनार्थं चेत् सूक्ष्ममित्यादि सूत्रयमनपेक्षितं सूक्ष्मदेहसमर्थनस्यानुपयोगात्, भूतसूक्ष्मसंसर्गस्य पञ्चाग्निविद्यायां निरूपितत्वाच्च । नन्वविदुष आत्यन्तिकलयाभावे तस्य सूक्ष्मदेहवतो निःसरत उपलम्भादिप्रसङ्गः परिहर्त्तव्य इति चेत् न वेतालादिस्थूलशरीरस्याप्यदृश्यत्वे स्थिते कथं दृश्यत्वशङ्का भवेत् । यद्यपि कस्यचित्सा स्यात् अतिमन्दतया न परिहर्त्तव्या । यद्यपि परिहर्त्तव्या तदन्तरप्रतिपत्तावित्यत्रैव परिहर्त्तव्या कृतकरत्वस्योक्तत्वादेव सर्वमिदमसङ्गतं प्रतिषेधादिति चेन्न शरीरादिति पूर्वपक्षसूत्रं कृत्वा स्पष्टो ह्येकेषामिति सिद्धान्तसूत्रं योजयन्ति तत्तावदक्षरानुगुणं, हि—शब्देन पूर्वो-

क्तोपपादकत्वप्रतीतेः, स्पृष्टो ह्येकेषामिति आर्त्तभागप्रश्नप्रतिवचनवाक्यमुदाहरन्ति अत्र प्राणानुक्रान्तेरमृतत्वाभावशङ्कां शमयितुमत्रैव समलीयन्त इति प्राणविलय उक्तः । अस्मादिति न शारीरो ऽविधिरुच्यते स उच्छ्वयतीत्युच्छ्वयनादिधर्मोक्तिस्तदैकार्थ्याच्च तस्मात्प्राणा उत्क्रामन्तीत्यत्रापि शरीरादुत्क्रान्तिर्निषिध्यते तस्मादित्यस्य प्रकृतपरामर्शित्वेऽप्यभेदोपचारादुच्छ्वयनादिमतो देहस्यैव निर्देशः आर्त्तभागप्रश्नैकार्थ्यात्, अप्राप्तस्य निषेधायोगाच्च । न च शारीरादुत्क्रान्तेः प्राप्तिरस्ति, अतः सा न निषेध्या वाक्यसामञ्जस्यं च न स्यात्कामायमानस्योत्क्रान्तिमुक्त्वाथाकामयमानं पृथक्निर्दिश्य तस्याप्युत्क्रमणोपदेशे हि पृथग्व्यपदेशोपक्रमो भ्रान्तजल्पवत्स्यात्, न तस्य प्राणा इति षष्ठ्यवगतसंबन्धमात्रस्य करणत्वकरणित्वादिलक्षणविशेषपर्यवसानसिद्धेर्न तस्मात्प्राणा इति वाक्यान्तरावगतविशेषपर्यवसानाकाङ्क्षा च नास्ति तत्र च तच्छब्दः शारीरपर इत्युक्त. स्मर्य्यते चेति सूत्रेण सर्वभूतात्मभूतस्य सम्यग् भूतानि पश्यतः । देवापि मार्गे मुह्यन्ति ह्यपदस्य पदैषिण इति निषेधस्मृतिरभिप्रेतेत्याहुः स्यादित्यमण्डलप्राप्तिविशिष्टदेशे देहत्यागाय न तु मुक्तिमार्गगमनापेक्षयेति शुकचाहुः अत्र ब्रूमः निर्गुणविद्याया अभावात् निर्गुणप्राप्त्यभावाच्च सगुणनिष्ठ एव परविद्यानिष्ठः सद्विद्यादिष्वप्यानन्दाद्यनुगमात् । अथ परा यया तदक्षरमधिगम्यत इत्युपक्रम्य यः सर्वज्ञः सर्वविदित्याम्ननात् परं ज्योतिरूपसंपन्नस्य जक्षणाद्याम्ननात्, सत्यं ज्ञानमित्यत्र सर्वकामविशिष्टब्रह्मानुभवदर्शनाच्च परविद्यानिष्ठस्यैव सर्वे वेदान्ता गतिमामनन्ति, अस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य तयोर्ध्वमायन्नमृतत्वमेति तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुषो वा मूर्द्ध्नो वा यत्रासौ केशान्तो विवर्त्तते व्यपोह्य शीर्षकपाले" इति, स एतमेव सीमानं विदार्य्यैतया द्वारा प्रापद्यत सैषा विदृतिर्नामेत्युपक्रम्य स य एवं विद्वानस्माच्छरीरभेदादूर्ध्वमुत्क्रम्यामुष्मिन् स्वर्गे लोके सर्वान्कामानाप्त्वाऽमृतः समभवत् अपुनर्भवाय कोशं भिनत्ति कोशं भित्त्वा शीर्षकपालं भिनत्ति शीर्षकपालं भित्त्वा पृथिवीं भिनत्तीत्यारभ्याकाशं भित्त्वाऽव्यक्तं भिनत्ति अक्षरं भिनत्ति

मृत्युं भिनत्ति मृत्युर्वै परे देव एकीभवती''ति, तदुक्तमार्त्तभागप्रश्नैकार्थ्याच्छ्रु-यनाम्नानवाक्यासामञ्जस्याप्राप्तनिषेधायोगविशेषपर्य्यवसाननैराकाङ्क्ष्यै-र्नोत्क्रान्तिर्विदुष इति तदयुक्तं तथा हि आर्त्तभागप्रश्नस्य विद्वद्विषयत्वा-भावात् तदैकार्थ्यमनपेक्षितं, तत्र स सर्वप्राणिसाधारणः तत्र चास्मात्प्राणाः क्रामन्त्युत नेति प्रश्नो न शरीराद्दुत्क्रान्तिविषयः किं तु शारीरात्, शरीरे प्राणस्थित्यभावेन तत उत्क्रान्तेरसंदिग्धत्वात् । अतः प्रतिवचनमपि शारीरादनुत्क्रान्तिविषयम् । अत्रैव जीवे समवलीयन्ते संसृज्यन्ते स उच्छ्वय-तीत्यभेदोपचारादहमभिमानविषयदेहनिर्देशः । यथा परपक्षे योऽकामो निष्काम आप्तकाम आत्मकामः न तस्मात् प्राणा उत्क्रामन्तीति तच्छब्द-निर्देशः, अतो विद्वत्प्रकरणस्य न तदैकार्थ्यापेक्षा आर्तभागप्रश्नस्य विद्वद्वि-षयत्वेऽपि शारीरविषयत्वं दर्शितं, वाक्यासामञ्जस्यं तु नास्ति कामयमा-नाकामयमानयोः समानायामप्युत्क्रान्तौ ब्रह्मप्राप्त्यभावतत्सद्भावरूपवैष-म्यक्षतत्वाद्वाक्यभेदस्य, सकामनिष्कामविषयतया प्रकरणभेदः नोत्क्रान्त्य-नुत्क्रान्तिविषयतया काममय एवं पुरुष इत्युपक्रम्य इति तु कामयमान इत्युपसंहृत्याथाकामयमान इति प्रस्तावात्तयोश्च वैषम्यं ब्रह्मप्राप्तित-दभावाभ्यां वोत्क्रान्तितदभावाभ्यामिति वाक्यसामञ्जस्यसिद्धिः, अप्राप्त-निषेधोऽपि नास्ति आर्थप्राप्तविषयत्वान्निषेधस्य, सर्वशाखाप्रत्ययन्यायेन सर्वासु विद्यासु देहपातसमये सुकृतदुष्कृतप्रहाणमुक्तं भवति, अतो भोक्त-व्याभावेन लोकान्तरगमनाभावाद्विदुषो लोकान्तरगत्यौपयिकप्राणादिवि-श्लेषः शारीरस्यार्थवशात् प्राप्तः, अतः शारीराद्दुत्क्रान्तिरर्थप्राप्ता प्रतिषेध्या स्यादर्चिरादिगत्युपपत्त्यर्थं षष्ठ्याऽवगतस्य संबन्धस्योपकरणोपरणित्वादिल-क्षणसंबन्धविशेषपर्यवसाने सम्भवत्यपि उत्क्रमणस्यापादानापेक्षायां सन्नि-हितस्यैवापादानत्वकल्पनोपपत्तेर्विशेषसाकाङ्क्षस्य संबन्धमात्रस्याकाङ्क्षिता-पादानत्वविशेषपर्यवसानं न्याय्यं, न त्वनाकाङ्क्षिते करणत्वकरणित्वादि-रूपे अपादानस्याकाङ्क्षितत्वादेव छागपशुन्यायाद्वाक्यान्तरावगतापादा-नविशेषपर्यवसायित्वं च न्याय्यं यत उत्क्रान्तिनिषेधः श्रुतौ नास्ति अत एव स्मर्य्यते चेत्यत्राप्युत्क्रान्तिविषयस्मृतिवचनमेवोदाहर्त्तव्यं "देवापि मार्गे

मुह्यन्ती"ति वचनं त्वतद्विषयत्वादनुदाहार्य्यन्तच्च न गतिनिषेधपरं किन्तु गतेर्दुरवगमत्वपरं तथा च परपक्षानैापयिकत्वाच्च नोदाहार्य्यं तस्य च गतिनिषेधपरत्वाभावो मोक्षधर्मे एव गतिविधानादवगम्यते ते "तीर्त्वा दुस्तरं जन्म विशन्ति विमलं नभः। ततस्तान् सुकृतीन्सर्वान्सूर्यो वहति रश्मिभिः॥ पद्ममतन्तुवदाविश्य प्रवहन् विषयान् नृप तत्र तान् प्रवहन् वायुः प्रतिगृह्णाति भारत। वीतरागान् यतीन् सिद्धान् धिया युक्तांस्तपोधनान्। सूक्ष्मः शीतः सुगन्धिश्च सुखस्पर्शश्च भारत। सप्तानां मरुतां श्रेष्ठोलोकान् गच्छति यः शुभान्। स तान् वहति कौन्तेय? तमसः परमां गतिम्। तमोवहति लोकेश रजसः परमाङ्गतिं रजोवहति राजेन्द्र? सत्त्वस्य परमाङ्गतिम्। सत्त्वं वहति शुद्धात्मा परं नारायणं प्रभुं प्रभुर्वहति शुद्धात्मा परमात्मानमात्मना। परमात्मानमासाद्य तद्भूतायतमानसाः। अमृतत्वाय कल्पन्ते न निवर्त्तन्ति चाविभो। परमा सा गतिः पार्थ निर्द्वन्द्वानां महात्मनाम्। आत्मा केवलतां प्राप्तो यत्र गत्वा न शोचति। ईदृशं परमं स्थानं निरयास्ते च तादृशा" इति, यत्तु शुकोत्पतनं विशिष्टदेशे देहत्यागाय न तु मुक्तौ मार्गापेक्षयेति तदप्ययुक्तं "दृष्टो मार्गः प्रवृत्तोऽस्मी"ति गतिचिन्तायां मार्गस्य दृष्टत्वाभिधानात् भूतैः समतिवाह्यत इत्यातिवाहिकैरतिवाहनस्योक्तत्वाच्च स्थूलदेहेन आसूर्य्यमण्डलात् गमनं योगप्रभावज्ञापनार्थमित्युक्तं दर्शयित्वा प्रभावं स्वमिति सर्वभूतगतोऽभवदिति च ज्ञानेन सर्वभूतव्याप्तिरुक्ता "सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वश" इति श्रुतेः, अन्ये तु अप्राप्तायाः शारीरादुत्क्रान्तेः कथं प्रतिषेध इत्येतदेवं परिहरन्ति नात्र शारीरादुत्क्रान्तिः प्रतिषिध्यते किं त्वत्र ब्रह्म समश्नुत इति वक्तुमनुवादः सञ्जातविद्यः पुरुषः प्रारब्धवशादनुत्क्रान्तप्राणो जीवदशायामेव ब्रह्मानुभवतीत्यर्थ इति तदविरुद्धन्तथाऽपि तदनादरे कारणमस्ति शारीरादनुत्क्रान्त्यनुवादेनात्र ब्रह्मापरोक्ष्याभिधानेऽपि गतिप्रतिषेधशङ्कापरिहारः सिद्ध्येत् तथाऽपि नाशारीरात्स्पष्टोह्येकेषामिति वदतः सूत्रकारस्य शारीरादुत्क्रान्तिर्भीक्तव्या-

भावप्राप्ता प्रतिषिध्यते इत्येवाभिप्राय इति ॥ आसृत्युपक्रमाधिकरणं समाप्तम् ॥

परसंपत्त्यधिकरणम् । सू० तानि परे तथा ह्याह ॥ १४ ॥

वृ० सकरणग्रामः सप्राणः करणाध्यक्षः प्रत्यगात्मोत्क्रान्तिवेलायां तेजःप्रभृतिभूतसूक्ष्मेषु सम्पद्यत इत्युक्तं, सैषा सम्पत्तिर्विदुषो न विद्यत इत्याशङ्क्य परिहृतं, तानि पुनर्जीवपरिष्वक्तानि भूतसूक्ष्माणि किं यथाकर्म यथाविद्यं च स्वकार्य्याय गच्छन्ति? उत परमात्मनि सम्पद्यन्ते इति विशये मध्ये परमात्मसम्पत्तौ सुखदुःखोपभोगरूपकार्यादर्शनात्तदुपभोगानुगुण्येन यथाकर्म यथाविद्यं च गच्छन्तीति प्राप्ते उच्यते तानि परे इति, तानि परस्मिन्नात्मनि सम्पद्यन्ते, कुतः तथा ह्याह श्रुतिः "तेजःपरस्यां देवतायामि"ति, यथाह श्रुतिस्तदनुगुणं कार्यं कल्प्यमित्यर्थः सुषुप्तिप्रलययोर्यथा परमात्मसंपत्त्या सुखदुःखोपभोगाभावाद्विश्रामस्तद्वदिहापि । परसंपत्त्यधिकरणं समाप्तम् ॥

टी० सू० तानि परे तथा ह्याह ॥ १४ ॥ अवान्तरसङ्गतिमाह "सकरणे"ति, सैषेति पूर्वं समाना चासृत्युपक्रमादिति नाडीप्रवेशात् पूर्वं मुमुक्षुसंसारिणोर्गतेः समानत्वमुक्तं, तत्र वक्ष्यमाणाधिकरणद्वयप्रतिपाद्यायां परमात्मसम्पत्तौ मुक्तस्यास्तित्वनास्तित्वविगानं नास्ति, यतः पूर्वाधिकरणप्रतिपादितार्थ एव विप्रतिपत्तिः, अतस्तदोक्तोज्ज्वलनमित्येतस्मात्पूर्वाधिकरणप्रतिपाद्ये ऽर्थे विद्वदविदुषोः समानेऽपि तानि पर इत्यधिकरणात् पूर्वत्रैव विद्वदविदुषोः समानत्वविप्रतिपत्तिरिति हृदि कृत्वा सूत्रकारैः समानत्वमुक्तमित्यभिप्रायेणात्र सैषा संपत्तिर्विदुषो न

विद्यत इत्याशङ्क्य परिहृतमित्युक्तं भाष्ये, किं तेजःशब्दःनिर्दिष्टानि भूतानि जीवपरिष्वक्तानि यथा कर्म यथाविद्यं गच्छन्ति? उत परमात्मनि सम्पद्यन्ते? किमत्र परदेवताशब्दो गन्तव्यस्थानावस्थपरमात्मपरः? उतातदवस्थपरमात्मपर? इति, किमत्र सम्पत्तौ प्रयोजनं सम्भवति? नेति, असम्भवे परमात्म–शब्दस्य गन्तव्यप्रदेशविशेषावस्थापरमात्मपरत्वेन यथाकर्मविद्यं गच्छेयुः, सम्भवेऽतदवस्थपरमात्मपरत्वेन तस्मिन्सम्पद्येरन् । पूर्वपक्षमाह "मध्य"इति, तेजः परस्यामिति श्रुतिः परस्यात्मनः सर्वदा सर्वाधारत्वमात्रपरेति पूर्वपक्षिणोऽभिप्रायः । राद्धान्ते तथा ह्याह श्रुतिरिति वाङ् मनसि सम्पद्यत इत्यादिनिर्देशो न सर्ववस्तुसाधारणधारकत्वाभिप्रायः, अतः सम्पत्तिरेवार्थ इति भावः ॥ परसंपत्त्यधिकरणं समाप्तम् ॥

अविभागाधिकरणम् । **सू० अविभागोवचनात् ॥ १५ ॥**

भा० सेयं परमात्मनि सम्पत्तिः किं प्राकृतलयवत् कारणापत्तिरूपा? उत वाङ् मनसीत्यादिवदविभागरूपेति? चिन्तायां परमात्मनः सर्वेषां योनिभूतत्वात्कारणापत्तिरूपेति प्राप्ते उच्यते "अविभाग"इति, अपृथग्भावः पृथग्व्यवहारानर्हसंसर्ग इत्यर्थः, कुतः वचनात्तेजः परस्यां देवतायामित्यत्रापि वाङ् मनसि सम्पद्यत इति वचनस्यानुषङ्गात्, तस्य च संसर्गविशेषवाचित्वात्तदनुषक्तस्याभिधानवैरूप्ये प्रमाणाभावादुत्क्रान्तिवेलायां कारणापत्तिप्रयोजनाभावात् ।

टी० सू० अविभागो वचनात् ॥ १५ ॥ सङ्गतिर्वपक्षावुच्येते सेयमित्यादिना किमियं सम्पत्तिर्लयरूपा? उताविभागरूपा? किं तेजःपरस्यामिति वचनस्य कारणापत्तिपरत्वं न्याय्यम्? उताविभागमात्रपरत्वमिति, प्रथमे लयरूपत्वं, द्वितीये त्वविभागरूपत्वम्, अविभाग इतीति, अनुषक्तमपि

गवाश्वयोरिव कार्यकारणता न स्यात् अभिन्नत्वे च कथं सिद्धस्य साध्यत्वमिति, तन्न । कारणात्कार्यस्य भिन्नस्यैवोत्पत्तिदर्शनात् ॥

अन्यथा बुद्धिबोध्यादौ भिन्नत्वादिविकल्पतः ।
बोध्यत्वाद्विहतेर्न स्यात् स्वमतस्थापना ऽपि वः ॥

अथ किञ्चित्कारेणाकिञ्चित्कारेण वा कारणत्वं, पूर्वत्र हेतूनां किञ्चित्कारजनने ऽपि किंचित्कारान्तरापेक्षयाऽनवस्था, किञ्चित्कारस्यापि किञ्चित्कारजननापेक्षया उत्तरत्रातिप्रसङ्ग इति, अत्रापि ब्रूमः, यत्र किञ्चित्कारेण हेतुत्वं दृष्टम्, यथा काष्ठादेर्ज्वालादिना, तत्र तथा, न चानवस्था । हेतुसम्पत्तिपरम्पराया दोषत्वाभावात् अतिरिक्तस्याचानिरूपणात्, यत्र तु द्वारनिरपेक्षं हेतुत्वं तत्रापि दर्शनबलात् किञ्चित्कारान्तरं न जनयितव्यं यतोऽनवस्था स्यात्, न चातिप्रसङ्गः, नियतपूर्वत्वग्राहिणा प्रत्यक्षेणैव तन्निवारणात् अन्यथा तदपि ते प्रमाणं न स्यादिति विश्वापह्नवः । यच्च कार्यं कुर्वतोऽकुर्वतो वा कारणत्वम्, आद्ये कार्यस्यापि पूर्वसिद्धिप्रसक्त्या कार्यत्वाभावः द्वितीये विरोधातिप्रसङ्गाविति, तदप्यपष्ठु, भाविकार्यानुगुणव्यापारवत्त्वमेव कारणस्य कुर्वत्त्वम् तत्र कथं कार्यस्य स्वस्मात् पूर्वसिद्धिः कुर्वत्त्वनिरूपणन्तु भाविनाऽपि कार्येण बुद्ध्यारोहिणा सिद्ध्येत् । एतेन निर्व्यापारस्सव्यापारो वा हेतुरित्याद्यपि दत्तोत्तरम्, कार्यकारणत्वयोः स्वभावत्वे पटत्वनीलत्वादिवत् सर्वं प्रत्यपि स्याताम्, अस्वभावत्वे कस्यचिदपि न स्यातामित्यपि नियतप्रतिसम्बन्धिकस्वभावत एव तदुभयसिद्धेर्निरस्तम्, दण्डादिकार्यत्वं घटादिकारणत्वं वा नीलादिवदेव पुरुषभेदेऽप्यविपर्यस्तमेव । अथ स्यात्कार्यकारणभावस्य द्विष्ठत्वे द्वयोरपि द्वैरूप्यादविशेषविरोधभेदापत्तयस्स्युः, एकस्थत्वेऽपि यत्रैकस्मिंस्तत्रैवमिति, तत्र ब्रूमः, कार्ये कार्यत्वं कारणे कारणत्वं च

वतते तथाप्यन्योन्यनिरूप्यतया सम्बन्धव्यवहारादिसिद्धिरिति । स्यादेतत्, न तावट्टखण्डादयो मृदाद्यवयवाश्च प्रत्येकं घटाद्युत्पादनशक्ताः अदर्शनात् । अत एव न समुदिता अपि, न हि नद्यस्समेत्यापि दहेयुः न च सिकतास्सम्भूय तैलं जनयेयुः शक्तानामेव सम्भूय करणे सर्वे कृतकरास्स्युः शक्तस्य कुर्वतोऽप्यन्याकाङ्क्षायां सर्वैरपि स्यात् तथा च देशादिव्यवहितानामसन्निधेः कथं कार्यारम्भः न हि कार्ये कारणानां साध्यांशभेदः विभक्तदशायां समुदाये वा तस्यादृष्टेः निरंशे गुणादौ च दुर्वचमेतदिति । अत्रोच्यते, समुदितानां कार्यकरत्वमेव हि प्रत्येकमपि हि शक्तिः कथमच वियुक्तैः कार्यकारणं कथं च समेतेषु कृतकरता । अतश्शक्तस्यापि सहकार्याकाङ्क्षायामतिप्रसङ्गश्च निरस्तः । यावत्कार्यसिद्धिनियतविषयत्वात्तस्या इति । ननु पूर्वं कारणमित्युक्ते नष्टं कारणमित्युक्तं स्याद् दृष्टा च मृदिते मृत्पिण्डे घटोत्पत्तिः तथा च स्वात्मानमलभमानस्य कथं परसाधकत्वम् अन्यथा चिरातिक्रान्तस्य च स्यादेव कारणत्वं तुच्छस्य च कारणत्वे कार्यमपि तुच्छं स्यात् नित्यं वेति । तदपि, न पूर्वक्षणसत्त्वमेव हि कारणस्य कार्योपयोगि । न च तत्तदा नास्ति कार्यक्षणे तु कस्यचित् असत्त्वं न कारणत्वविरोधि । पूर्वं नष्टमित्यप्यसाधु, स्थिरवादे तदयोगात्, पिण्डस्य तु न साक्षात्कारणत्वम् । न च पिण्डस्तत्प्रध्वंसो वाऽत्यन्ततुच्छः स्वकाले सद्भावात्, कालान्तरासत्त्वेन तुच्छत्वे प्रत्यक्षविषयोऽपि तथा स्यात् तथा चेयं माध्यमिकगतिः । अथ ब्रूषे पूर्वत्वमेव कारणस्य दुर्निरूपं पूर्वकालवृत्तित्वं हि तत्, काले च पूर्वत्वमुपाधिकृतं, स चोपाधिर्यद्ययमेव तदा तदधीनं कालस्य पूर्वत्वं कालाधीनं चोपाधेरित्यन्योन्याश्रयः अन्यापेक्षायां चक्रकम् अनवस्थाऽपि । कालस्य

क्रमवदुपाधिसम्बन्धभेदाद्भेदश्च कृत्स्नैकदेशविकल्पदुःस्थ इति । एवं ब्रुवता किं पौर्वापर्यमेव न दृष्टं दृष्टमपि वा बाधितं नाद्यः स्वाभ्युपेतलोकव्यवहारविरोधात् । न द्वितीयः सर्वेषां नित्यत्वतुच्छत्वयोरन्यतरप्रसङ्गात् अतः काले सत्यसति वा क्रमस्तावद् दुरपह्नवः ॥

क्रमेणोपाधिभिर्योगस्साकल्येनांशतोऽपि वा ।
कालस्य न घटेतेति स्थिरवादी कथं वदेत् ॥
प्रत्यक्षप्रतिरुद्धश्च क्षणभङ्गपरिग्रहः ।
अपसिद्धान्तमादध्यान्मानमन्यदनिच्छतः ॥
अथ लोकायतान्तस्थमनुमानं च मन्यसे ।
आगमोऽप्यविसंवादी तदन्तस्स्थातुमर्हति ॥
यच्च प्रवृत्तिसामर्थ्यं न लोकादुपलभ्यते ।
अनुमीयेत तत्रापि प्रामाण्यमविशेषतः ॥

अस्त्वेवम्, तस्य नियमो न शक्यः अस्मादेवेदमनन्तरमिति, तदेतन्नियतपूर्वत्वं हि न जातेर्जातिमपेक्ष्य, द्वयोरपि त्रैकालिकत्वान्न च जातेर्व्यक्तिमपेक्ष्य सर्वासां जातीनां पूर्वत्वेन कारणनियमासिद्धेः जात्यन्तरापेक्षया कार्यत्वं न दृष्टमिति चेत् किमतः पूर्वमेतज्जातिकार्यत्वमपि दृष्टम् । एकव्यक्तेश्च नियमो दुर्ग्रहः अननुवृत्तेः, कृत्तिकारोहिण्योरपि ह्युदयभेदेष्वेव व्याप्तिर्गृह्यते एतेन व्यक्तेर्जात्यपेक्षया वा व्यक्त्यपेक्षया वा पूर्वत्वनियमोऽपि प्रत्युक्त इति अयमप्यनुक्तोपालम्भः । एतद्धर्मकादेतद्धर्मकमुपजातमिति जात्युपाधिक्रोडीकृतरूपेण व्यक्तिषु नियमसिद्धेः यथादर्शनं चेयत्तानियमरहितनिरुपाधिनिर्व्यभिचारभूयोदर्शनबलेन व्याप्तिसिद्धिश्चानुमाने वक्ष्यते । न च सर्वस्मात्तादृशात्तादृशं सर्वमनियतं वा स्यादिति शङ्कनीयम् तथा व्याप्त्यग्रहणात्, तद्वि-

रुद्धा च* ते प्रार्थना मोघैव, तृणारणिमण्याादिषु च वह्न्याद्युत्पत्तौ सामान्यतोविशेषतश्च हेतुकार्यभावो मन्तव्यः तत्र कार्यवैजात्यं न दृश्यत इति चेन्न अनुपलब्धवैषम्याणामप्यायुर्वेदादिषु शक्तिभेदसिद्धेरवान्तरवैजात्यस्य स्वीकार्यत्वादिति ।

सांख्यसौगतचार्वाकैरन्येऽप्येवमुपप्लवाः ।
प्रयुक्ताः प्रतिवक्तव्याः प्रतिष्ठितनयस्थितैः ॥
यदत्र माध्यमिकम†तस्थैरुच्यते ।
पूर्वसम्बन्धनियमे हेतुत्वे तुल्य एवं नौ ॥
हेतुतत्त्वबहिर्भूतसत्त्वासत्त्वकथा वृथा ।

इति तत्रोच्यते ।

प्राक्कालनियतत्वेन कारणं प्रमितं न वा ।
आद्ये तदेव तत्सत्त्वमन्यथा नियमोऽपि न ॥

अन्यदपि यदुक्तम् ।

अन्तर्भावितसत्त्वं चेत्कारणं तदसत्ततः ।
नान्तर्भावितसत्त्वञ्चेत्कारणं तदसत्तत इति ॥

अत्र तदसत्तत इति स्थाने सदिदं तत इति पाठ्यम् विशेषणतयोपलक्षणतया वा सत्तासम्बन्धिनि नासत्त्वारोपः शक्यत इति ।

सत्त्वञ्च सदसद्वेति विकल्प्यानिष्टकल्पने ।
असत्त्वं सदसद्वेति विकल्प्योत्तरमूह्यताम् ॥

* अत्रत्यचकारस्य भिन्नक्रमेणान्वयितया न च वा हा हैव योगे इति पाणिनीयेन सूत्रेण ते आदेशो न स्यादिति न शङ्कनीयम् ।

† माध्यमिकमतमास्थाय पूर्वकालवृत्तित्वज्ञानमात्रस्य कारणत्वे तन्त्रतां निरूपयद्भिः खण्डनकारैः श्रीहर्षमिश्रैः पूर्ववृत्तित्वस्य कारणत्वेऽतन्त्रताऽभिधानात् ।

स्वक्रियादिविरोधश्च सूत्रप्रभृतिदुस्तरः।
गुरुशिष्यादिवाक्यानाम्परबोधार्थता यतः॥
तेभ्यश्चैतन्यमित्यादि वदता गुरुणा स्वयम्।
क्षित्यादिभ्यः प्रसिद्धान्ती मदशक्तिर्निदर्शिता॥
प्रत्यक्षाल्लोकशब्दोक्तादधिकञ्च तदायतम्।
अभाष्यत भवत्पूर्वैः प्रत्यक्षञ्चार्थसाधकम्॥
अर्थकामौ पुमर्थौ च दृष्टोपायैरुदीरितौ।
प्रीयसे दूयसे च त्वं बिभेषि च ततस्ततः॥
इष्टं प्राप्तुमनिष्टञ्च निवर्तयितुमुद्यतः।
तत्सिद्धौ चरितार्थस्त्वं लोकवत्किं न मन्यसे॥
बुभुक्षुरन्नमादत्से श्वभक्ष्यादि जहासि च।
परोक्त्या प्रतिपद्यार्थम्प्रतिब्रूषे जिगीषया॥
तत्त्वावधारणार्थं वा वादे किं न प्रवर्तसे।
स्वयं वा मानतर्काभ्यां किं न किञ्चित्परीक्षसे॥ ३२॥

ननु परिवेषादिषु नियतपूर्वसत्किञ्चिन्न दृश्यते न च घटादिदृष्टान्तेन तदनुमेयम् विपरिवर्तस्य दुर्वारत्वात् अतो दृश्यमाना अप्यवधयः केषुचिद्रसोत्पत्तौ रूपादिवद्यदृच्छासिद्धा इत्यत्राह। कादाचित्कस्येति।

मू० कादाचित्कस्य कालावधिनियतिकरं पूर्वसत्कारणं स्यात् भावोपष्टम्भशून्यो न खलु तदवधिं प्रागभावोऽपि कुर्यात्। कार्यं निर्हेतुकं चेत्कथमिव न भवेन्नित्यता तुच्छता वा कादाचित्कस्वभावाद्यदि न नियमनादन्यथातिप्रसङ्गात्॥ ३३॥

अयम्भावः यदि परिवेषादीनामपि कादाचित्कत्वं दृष्टं तत्र निपुणं निरूपयतां देशकालादृष्टविशेषादातपादिकारणविशेषस्सिद्धः तदनुपलम्भेऽपि सन्दिग्धपरिवेषादिदृष्टान्तेन नान्यत्र हेत्वभावश्शक्योऽनुमातुम् । अनिश्चितसाध्यस्य दृष्टान्तत्वायोगात्, निश्चितसाध्यविपर्ययस्य पक्षत्वाद्यतिपातात्, निश्चितनिदर्शनादनिश्चितानुमानं युक्तमेव न च त्वद्विवादमात्रेण घटादिषु सर्वलोकसम्मतः कारणसद्भावस्सन्दिह्यते । एतेनाहेतुतो भावोत्पत्तिः कण्टकतैक्ष्ण्यादिदर्शनात् इत्यादि च प्रत्युक्तम्, अस्तु हेतुनिरपेक्षो नियतकालः प्रागभाव एव कार्यस्य पूर्वावधिः न हि स्वभावविरुद्धत कार्यकालमनश्नुवानस्तत्पूर्वया एवेति सिद्धम् । अतः किमन्यैरित्यत्राह । "भावोपष्टम्भेति" । भावान्तरमभाव इति स्थापयिष्यते, इह त्वपिना पक्षान्तरान्वारोहस्सूच्यते । अयम्भावः यदि कार्येण प्रागभाव एव केवलोऽपेक्षणीयस्तद्वदेतेनाप्यनादिना भाव्यम् । अतः प्रागवधिः सन्नप्यभावस्तत्तद्भावशेखरित एव स्वात्मानमवधित्वेन नियच्छेदिति । नित्यस्वभाववत् कादाचित्कस्वभावस्यापि हेतुनैरपेक्ष्यं स्यादित्यत्राह "कार्यं निर्हेतुकं चेति" । विषयं निदर्शनमित्याकूतम् । तदेवानिष्टप्रसङ्गेन व्यनक्ति "कथमिति"। निरवधित्वे गत्यन्तरं न सम्भवतीति भावः । कार्यस्य निर्हेतुकत्वं सतोऽसतो वेति विकल्पे पूर्वत्र नित्यता अन्यत्र तुच्छता स्यादिति* विभाव्यम् पूर्वावधिवदुत्तरावधेरप्यसत्कल्पत्वान्नित्यत्वं न हीतः परं न भवितव्यमनेनेत्यपि नियमोऽस्ति । ननु कादाचित्कत्वं स्वभावो न वा आद्ये नित्यस्वभाववन्निरपेक्ष एव स्यात् द्वितीये कथमतत्स्वभावः कारणसहस्रेणापि तत्स्वभावतां नेतुं शक्यः स्वभावस्य च हेतु-

* विभाज्यमिति पुस्तकान्तरस्थः पाठः ।

मत्त्वे निर्हेतुकमिति किंचिन्न स्यात् अतो नित्यस्वभाववन्नियतकालस्वभावता स्यादिति शङ्कते "कादाचित्केति"। कादाचित्कस्वभावत्वेऽपि हेत्वधीनतां तत एव नित्यस्वभाववैषम्यं चाभिप्रेत्याह । "न नियमनादिति"। न हि यतः कुतश्चिदनन्तरमनेन भवितव्यमिति कादाचित्कत्वम् अनियमादृष्टेः अस्मादनन्तरमेवेदमिति कालविशेषव्यवस्थादृष्टेरित्यर्थः। उक्तनियमानभ्युपगमे सर्वत्र सर्वदा सर्वतः कार्यं स्यादिति तर्कबाधं व्यनक्ति "अन्यथेति" न हि धूमादिना यदा कदाचिद्भवितव्यमित्यस्य कादाचित्कत्वं नियम्यते तथा सति गर्दभादेरनन्तरं तदुपलब्धिर्वा सामग्र्यनन्तरमनुपलब्धिर्वा स्यादिति ॥ ३३ ॥

कार्यकारणभावादिसमर्थनम् । प्रकृतस्य प्रकृत्यादिकारणवादस्य प्रतिपत्त्या निरस्ताः तत्र देहादिवदिन्द्रियाणामपि भौतिकत्वं वदतः प्रतिवक्ति । "नेत्रादेरिति" ॥

सू० नेत्रादेर्दीपिकादेरिव नियमयुतं तैजसत्वादिसाध्ये रूपादिग्राहकत्वं यदि करणतया स्यादसाधारणत्वम् । तत्साहाय्यन्त्वसिद्धं भवति गमकतामात्रमप्यञ्जनादावत्त्वाहङ्कारिकत्वं श्रुतिपथनिपुणैर्घोषितं नैव बाध्यम् ॥ ३४ ॥

नियमयुतं सावधारणं, रूपादिषु मध्ये रसाद्यग्राहकत्वेन विशेषितमित्यर्थः । चक्षुस्तैजसं रसाद्यग्राहकत्वे सति रूपग्राहकद्रव्यत्वात् दीपवदिति, एवं त्वगिन्द्रियं वायवीयं स्पर्शादिषु मध्ये स्पर्शस्यैव ग्राहकद्रव्यत्वात् अङ्गसङ्गिसलिलशैत्याभिव्यञ्जकवायुवत् रसनस्याप्यत्वे रसस्यैवेति दन्तान्तस्तोयदृष्टान्तः घ्राणस्य पार्थिवत्वे

गन्धस्यैवेति चन्दनकुङ्कुमादिगन्धाभिव्यञ्जकनिम्बत्वगादिनिदर्शनम् श्रोतस्य तु नभस्त्वे श्रोत्रं गुणावान्तरजात्या स्वगुणसजातीयगुणग्राहकं बाह्येन्द्रियत्वात् चक्षुरादिवदिति शब्दो गुणावान्तरजात्या सजातीयगुणवतेन्द्रियेण गृह्यते बहिरिन्द्रियव्यवस्थापकगुणत्वाद्रूपादिवत् शब्दो भूतेन्द्रियग्राह्य इति वा बहिरिन्द्रियव्यवस्थापकत्वादित्येव हेतुः तथा श्रोत्रं भौतिकं बाह्येन्द्रियत्वात् चक्षुरादिवत् आकाश इन्द्रियारम्भकः भूतत्वात् भूतान्तरवदिति । शब्दोपलब्धिर्वा भूतेन्द्रियकरणिका बाह्येन्द्रियव्यवस्थापकोपलब्धित्वात् रूपोपलब्धिवत् । तत्राद्येषु चतुर्ष्वनुमानेषु हेतुविकल्पमनूद्य दूषयति यदि करणतयेत्यादिभिः" । यस्मिन्सति कार्यं भवत्येव तत्करणम् तच्च सन्निकर्षविशेषविशिष्टतयेन्द्रियाणाम् ।

ननु

उद्विग्नोह्यन्धकारेण कश्चिदेवं ब्रवीत्यपि ।
किं चक्षुषा ममैतेन दृष्टं दीपेन यन्मया ॥

इति दीपादिषु साधकतमत्वं कश्चिद् ब्रूयात् अतस्सपक्षवृत्तेर्हेतोः कथमसाधारणत्वम्, इत्थम् आलोकेन विनापि जन्तुभेदेषु चक्षुषो रूपादिग्राहकत्वं सिद्धम् अन्धकारे च मनुष्यादीनां तत्त्वतोऽन्यथा वा अत ईदृशं प्राधान्यमपेक्ष्य इन्द्रियेषु करणत्वं दीपादिषु सहकारित्वं च प्रख्यातमनुरुध्य विकल्पप्रवृत्तेरविरोधः कोट्यन्तरन्दषयति । "तत्साहाय्यं त्वसिद्धमिति" । करणभूतेन्द्रियापेक्षया तेषामेव दीपादिवत्सहकारित्वमनुपपन्नमित्यर्थः दीपादीन्प्रति सहकारित्वान्नासिद्धिरिति चेत्तर्हि प्रमातृप्रमेययोरपि तथात्वात्तत्सिद्धिः स्यात् तयोः सतोरपि कदाचित्कार्यं नास्तीति चेत्तावता करणत्वं माभूत् तत्सहकारित्वन्तु सिद्धमेव दीपे च सति भावएवेति नियमो

नास्ति सम्प्रयोगविशेषसाहित्यात्स्यादिति चेत्तर्हि तयोरपि ततस्स्या-
देवेत्यनैकान्त्यम् एतेन करणत्वादिविकल्पानादेरण रूपादिबोधक-
द्रव्यत्वमात्रं हेतुरित्यपि निरस्तम् । तद्भनक्ति "भवतीत्यादिना" ।
आदिशब्देन प्रमात्रादिसङ्ग्रहः अञ्जनस्य शक्ये प्रतिबन्धकनिवर्तक-
त्वमात्रमिति चेन्न । अशक्ये गूढनिदर्शनादौ शक्त्याधानेन सहकारि-
त्वदृष्टेः, शक्त्याधानं हि सहकारीति चेन्न । दीपादावपि तथा क्लृप्तिप्रस-
ङ्गात् सत्तयैव हेतुत्वं तत्र दृष्टमिति चेदत्रापि तथाऽस्तु अविशेषात् । ये च
तत्तदिन्द्रियदोषैरपि रूपादिधीरस्तीति मत्वा शरीरयोगे सत्येव सा-
क्षात्प्रमितिसाधनमिति लक्षयन्ति तन्मते तत्तद्दोषैरप्यनैकान्त्यम्
तेषां तैजसत्वानभ्युपगमात् दन्तान्तस्तोयदृष्टान्तश्चायुक्तः विषयसं-
स्कारस्य व्यञ्जकत्वायोगात् । न हि ग्रस्यमानं किंचिदसंस्कृत्य दन्ता-
न्तस्तोयस्योपकारकत्वं तावता च रसव्यञ्जकत्वे रसगन्धाद्युद्भव-
हेतोरग्न्यादेरपि किन्तन्न स्यात् वायुश्च वेगेनाभिघ्नन् सूक्ष्मान्स-
लिलकणानन्तश्शरीरं प्रवेशयति शैत्यन्तु तेषां त्वगिन्द्रियप्रवेशवैषम्या-
द्विशदमनुभूयते तावता स्पर्शव्यञ्जकत्वे गन्धोपहारकस्य तस्य तद्व्य-
ञ्जकत्वमपि किं नेष्यते तथा च घ्राणपार्थिवत्वानुमानं दुःस्थ-
मिति । एवं चतुर्णां भौतिकत्वासिद्धौ तद्दृष्टान्तेन श्रोत्रभौतिकत्वा-
नुमानान्यपि च्छिन्नमूलानि, आकाश इन्द्रियारम्भक इति चायुक्तम्
श्रोत्रस्य त्वन्मते तदारब्धत्वाभावात् भूतत्वादिति च घटादिभि-
रनैकान्तिकम् । किञ्चात्र लोकसिद्धनयनबुद्बुदादिपक्षीकारे रूपादिवि-
शेषैस्तेषां पार्थिवत्वसिद्धेः कालात्ययापदेशः, अनुमानतस्त्विन्द्रिय-
सिद्धिरशक्येति वक्ष्यते सामान्यतो दृष्टादधिष्ठानादतिरिक्तेन्द्रिय-
सिद्धावपि तदाहङ्कारिकत्वं श्रौतमबाध्यम् इन्द्रियाण्यहङ्कारविशेषा
इति हैरण्यगर्भोक्तिरपि तदाहङ्कारिकत्वानुगुणा, अतः श्रुतिसिद्ध-

पञ्चीकारेऽपि बाध एव प्रतिप्रयोगाश्च, बाह्येन्द्रियाण्यभौतिकानि इन्द्रियत्वात् मनोवत् प्रत्येकपञ्चीकारेण वा चक्षुरतैजसमित्यादिनावेव हेतुदृष्टान्तौ परस्परं वा घ्राणादयो दृष्टान्ताः विपक्षे बाधकसदसद्भावश्च समः । यत्किंचिद्दृष्टान्तमात्रानुसारेण प्रसङ्गस्य सुलभत्वादिति । परोक्तानुमानानामागमबाधमभिप्रेत्याह । "अक्षाऽहङ्कारिकत्वमिति" श्रुतिपथनिपुणैः—मनुपराशरपाराशर्य्यादिभिः घोषितं बहुषु प्रदेशेषु स्पष्टोक्तं नैव बाध्यमशक्तैरनुमानैरन्यपरैश्च वाक्यैरिति शेषः ॥ ३४ ॥ नन्विन्द्रियाणि तन्मात्रेष्विति श्रुत्या भौतिकत्वममीषां भातीत्यत्राह । तन्मात्रेष्विति ।

मू० तन्मात्रेष्विन्द्रियाणि श्रुतिरिह न लयं वक्ति
किन्तु प्रवेशं नो चेत्पृथ्व्यादिवाक्येष्वि-
व हि लयपदं व्योम्नि चाक्षेषु च स्यात् ॥
भूतैराप्यायितत्वात्क्वचिदुपचरिता भौतिक-
त्वोक्तिरेषामन्नाप्तेजोमयत्वं श्रुतिरपि हि
मनःप्राणवाचामुवाच ॥ ३५ ॥

पूर्वापरपर्यायेष्विव आकाशेन्द्रियादिपर्याययोर्लयो न पठ्यते न चात्रानुषङ्गः कार्यः सति गत्यन्तरेऽध्याहारवत्तस्याप्ययोगात् अन्यथा द्वितीयादिषु सर्वेषु पर्यायेष्वप्यनुषङ्गेण भाव्यम् वैरूप्यायोगात् । इन्द्रियाणामाकाशप्रकृतित्वञ्च सर्वोपबृंहणविरुद्धम् अस्याञ्चोपनिषदि भूतादेराकाश आकाशाद्वायुरित्यादिः सृष्टिक्रम उक्तः षोडश विकारा इति श्रुतेश्चासामञ्जस्यं स्यात् अतोऽवरमधिकरणत्वोक्तिमात्रानुसारादाकाशस्येन्द्रियेषु तेषाञ्चाकाशारम्भकतन्मात्रेषु प्रवेशविशेषाभिधानमित्यभिप्रायेणाह । "किन्तु प्रवेशमिति" । अयम्भावः

यद्यप्याकाशस्येन्द्रियैः प्रागपि सम्बन्धः तथापि तत्तदिन्द्रियाप्यायकभूतांशानां स्वकारणलयक्रमात् आकाशदशापन्नत्वात्तदानीमिन्द्रियेष्वाकाशस्यैव संसर्गः अनन्तरमाकाशे च शब्दतन्मात्रावस्थे तानीन्द्रियाणि शब्दतन्मात्रसंसर्गीणि भवन्ति अतस्तन्मात्रान्तराणामपि तदवस्थापत्त्या तत्तदंशभेदविवक्षया बहुवचनोपपत्तिः अतस्तन्मात्राणि भूतादौ लीयन्त इत्यपि बहुवचनकृतार्थम् अत्रैवं व्याख्यातम् इन्द्रियाप्यायकभूतांशानां सर्वेषामाकाशतापन्नत्वादाकाशस्यैव इन्द्रियसंसर्ग आसीत् पञ्चानामपि भूतानां शब्दतन्मात्रापन्नत्वादिन्द्रियाणि शब्दतन्मात्रांशभेदेषु संसृष्टान्यासन्निति एवमनभ्युपगमे वाक्यवैरूप्यदोषं व्यनक्ति "नो चेदिति"। ननु श्रोत्रं न भो घ्राणयुक्तं पृथिव्या इत्यारभ्य वाय्वात्मकं स्पर्शनमामनन्ति इत्युच्यते नभः श्रोत्रं च तन्मयम् इत्यादि च अत आहङ्कारिकत्ववाक्यं परम्परया नेयमित्यत्राह । भूतेरिति । तदिदं व्यवस्थापितम् वेदार्थसंग्रहे, भूतिस्त्वाप्यायनं महाभारत उच्यते इति । इममेव न्यायम् अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वाक् इत्यादिष्वपि योजयितुमाह । "अन्नाप्तेजोमयत्वमिति"। न खलु हेतुकैरपि मनसः पार्थिवत्वं कल्प्यते वायुरूपस्य प्राणस्याप्यत्वं तस्मादाप्यायनपरत्वमेव तत्र वाच्यमेवमन्यत्रापि, अग्निर्वाग्भूत्वा मुखं प्राविशत् आदित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशदित्यादिषु तत्तद्देवताधिष्ठाने तात्पर्यम्, अग्निं वागप्येति इत्यप्ययश्रुतिश्चाधिष्ठातृदेवतानापक्रमणपरेत्यभाष्यत ओषधीर्लोमानीत्यादिना अनपियद्भिर्लोमादिभिस्सह पाठात् ॥ ३५ ॥ इतीन्द्रियाणामभौतिकत्वाहङ्कारित्वे ॥

अथ मनष्षष्ठान्येवेन्द्रियाणि वागादिष्विन्द्रियशब्दो भाक्त इति वदतः प्रतिबन्दिपूर्वकेण प्रमाणेन प्रतिक्षिपति । "रूपादीति"॥

मू० रूपादिज्ञानसिद्धौ यदि करणतया कल्पनं
धीन्द्रियाणां तद्वद्गत्यादिकर्मस्वपि करणत-
या सन्तु कर्मेन्द्रियाणि ॥ कर्मज्ञानाद्वहेत्वो-
स्समपरिहरणा ह्यन्यथासिद्धिशङ्का तस्मादे-
कादशाक्षाण्यपि निगमविदो मन्वते न्याय-
पूर्वम् ॥ ३६ ॥

अयम्भावः यद्यागमः प्रधानीक्रियेत तदा इन्द्रियाणि दशैकं चेति व्यवतिष्ठेत यदा तु क्रिया करणपूर्विकेति व्याप्त्या रूपादेः सुखादेश्चोपलब्धिः स्मृतिश्च क्रियात्वात्करणपूर्विकेति कल्प्येत तदा वचनादानक्रियाऽपि तत्पूर्विका कल्प्या स्यात् । अथ तावताऽधिष्ठानातिरिक्तं न सिद्ध्यतीति मन्यसे ज्ञानेन्द्रियेष्वपि तथैवालोकादिभिरधिष्ठानैश्च सिद्धसाध्यता । गोलकादिसद्भावेऽपि कदाचित् कार्यं न जायते इत्यतिरिक्तसिद्धिरिति चेत् समं वागादावपि । सामग्रीवैकल्यात् प्रतिबन्धकाच्च तत्र तथेति चेत् चक्षुरादावपि तथैव । सत्यप्यालोकादौ दोषादर्शनेऽपि गोलकादितः कदाचित्कार्यं न जायत इति चेत्तदपि समम् । दोषसूक्ष्मस्तत्रेति चेत् अन्यत्राप्येवमस्तु ज्वालाघ्रातबीजन्यायेन विशेषादर्शनेऽपि दोषस्य कल्प्यत्वात्, कल्पिते ऽपि ह्यतीन्द्रिये तदानीं तद्भ्रंशहेतुस्सूक्ष्मो दोषस्त्वयाऽप्यङ्गीकार्यः अन्यथा कथं कर्मेन्द्रियक्लृप्तेरन्यथासिद्धिः । ननु च यदि चक्षुर्गोलक एवेन्द्रियं कथं तर्हि दूरस्थं व्यवहितं वा न प्रकाशयति इत्थम् यथाऽयस्कान्तादेरव्यवहितानतिविप्रकृष्टाकर्षकत्वं तथेह प्रकाशकत्वम् आभिमुख्यविशेष एव च बाह्यैरक्षैस्सम्बन्धोऽस्तु । नन्वयस्कान्तादिवदाभिमुख्याभावेऽपि दर्पणादिभिः

स्वमुखादेः पश्चाद्भागवर्तिनां च दर्शनं कथं स्यात् भवतो वा कथम्, चाक्षुषस्य तेजसः प्रतिलोमवृत्त्येति चेत् सा कुड्यपाषाणादौ कथं न जायते मणिसलिलदर्पणादिषु च कथं भवति अपर्यनुयोज्यतद्वस्तुस्वभावविशेषादिति चेत् अस्तु तर्हि स एव सन्निधिविशेषसामर्थ्यादनभिमुखवस्तुनिदर्शनस्य हेतुः द्रव्यान्तरकल्पनाद्वरं सिद्धद्रव्यसामर्थ्यविशेषस्य प्रतिफलनादौ सम्मन्तव्यस्य कार्यान्तरयोजनामात्रम् अतो धीन्द्रियाणां कल्प्यत्वे कर्मेन्द्रियाणामपि क्लृप्तिरनिवार्या अन्यथासिद्धिशङ्कापरिहारौ च समाविति तदेतत्सर्वमभिप्रेत्याह । "कर्मेति" । त्यज्यतां तर्हि वर्गद्वयमिति चार्वाकोत्थानं प्रतिरुणद्धि । "तस्मादिति" । अतीन्द्रियेन्द्रियकल्प्यत्वासंभवादप्राप्ते च शास्त्रस्यार्थवत्त्वादिति भावः । निगमविद इत्यनेन श्रुतिस्मृत्यनुविधानसूचनम्, एका कन्या दशेन्द्रियाणि इत्यादेर्न हि कश्चिद्बाधो दृश्यते न च कणभक्षाक्षपादाद्यनुसारेण षट्कावच्छिन्नेन्द्रियलक्षणक्लृप्तिर्युक्ता यथाहुः ।

> सिद्धानुगममात्रं हि कर्तुं युक्तं परीक्षकैः ।
> न सर्वलोकसिद्धस्य लक्षणेन निवर्तनमिति ॥

वक्ष्यते चानुवृत्तं तल्लक्षणं सात्त्विकाहङ्कारोपात्तत्वं न च कर्मेन्द्रियाणां तत्त्वान्तरसिद्धं राजसत्वमनुमन्तव्यम् शब्दप्रमाणके यथाशब्दं व्यवस्थापनात् सांख्यैरप्यत्र शास्त्रमेवानुसृतम् "सात्त्विक एकादशकः प्रवर्तते वैकृतादहङ्कारादिति" साधितञ्च सप्रगत्यधिकरणसिद्धान्ते हस्तादीनामपि तादृशमिन्द्रियत्वं न्यायपूर्वं क्रियाकरणपूर्विकेति व्याप्त्यनुसारेण तत्तत्करणमात्रानुमानेऽपि अलौकिकविशेषप्रतिपत्तिश्शास्त्रत एवेति भावः । एवं च शास्त्रयोन्यधिकरणे

भाष्यम् अतीन्द्रियेऽर्थे शास्त्रमेव प्रमाणमिति चन्द्रबिम्बपरभागादिषु

व्यवधानविप्रकर्षादिभिरस्मदादीन्द्रियग्रहणानर्हेषु नानुमानं तस्य पक्षाश्रयहेतुधर्मव्यापकान्वयमात्रातिरिक्तेषु प्रवृत्त्ययोगात् साध्यसामान्यस्य तु विवक्षितविशेषविरुद्धव्याप्तत्वेन तदाकर्षकत्वायोगात् अतोऽतीन्द्रियधर्मकल्पनाद्वरं दृष्टेषु केषुचिद्वैषम्यमात्रस्वीकार इति तात्पर्यम् ॥ ३६ ॥ इत्येकादशेन्द्रियसिद्धिः ॥

उक्तेष्विन्द्रियेषु एकमेवान्तःकरणमिति तत्त्वं सांख्यास्त्वाहुः "करणं त्रयोदशविधमिति"। "अन्तःकरणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यमिति"। अन्ये तु चित्ताख्यमन्तःकरणमन्यदाहुः तदनुभाषते। "सांख्यैरिति" ॥

मू० सांख्यैस्त्रेधोक्तमन्तःकरणमिह मनोबुद्ध्यहङ्कारभेदाच्चित्तं चान्ये चतुर्थं विदुरुभयमसत्तादृशश्रुत्यभावात्। तत्तत्त्वोक्तिमात्रं न हि करणभिदामाह क्लृप्तिस्तु गुर्वी बुद्ध्याद्याख्यानिरूढा क्वचिदिह मनसो वृत्तिवैचित्र्य*योगात् ॥ ३७ ॥

तदिदं मतद्वयं निष्प्रमाणकमित्याह। "उभयमसदिति"। कथमित्यत्र श्रुत्या कल्पनया वा तत्सिद्धिरिति विकल्पे प्रथमस्यासिद्धिमाह। "तादृशेति"। ननु तान्यपि त्रीणि सुबालोपनिषदि पृथिव्यादितत्त्वपङ्क्तौ मनसोऽनन्तरं पठ्यन्त इत्यत्राह "तत्तदिति"। अयमभावः न हि तत्त्वपङ्क्तिपाठमात्रान्मनस्सहपाठमात्राद्वा करणत्वं सिद्ध्येत् तथा सत्यव्यक्तादीनामपि तत्प्रसङ्गात् इति। द्वितीयं दूषयति "क्लृप्तिरिति"। एकस्यैव हि मनसः स्मृत्यनुभवभेदेन वा

* वैचित्र्यमात्रादिति पाठान्तरम्।

संकल्पविकल्पभेदेन वा वृत्तिभेदमन्येऽप्याहुः श्रूयते च कामस्संकल्प इत्यादावेतत्सर्वं मन एवेति आयुर्घृतमित्यादिवत्सामानाधिकरण्यं पुरुषधर्मा एव हि वस्तुतः कामादयोऽध्यवसायादयश्च तदिह पुरुषबुद्धिभेदनियतसामग्रीभेदव्यवस्थितं वृत्तिभेदमा न करणभेदकल्पकमिति भावः । ननु चक्षुश्च द्रष्टव्यञ्च नारायण इत्यादिना पञ्चज्ञानेन्द्रियाण्युक्त्वा मनश्च मन्तव्यं च नारायणः बुद्धिश्च बोद्धव्यं च नारायण ऽहङ्कारोऽहङ्कर्तव्यञ्च नारायणः चित्तञ्च चेतव्यञ्च नारायण इत्याम्नातम् अनन्तरञ्चैवं कर्मेन्द्रियाण्यधीतानि अतः करणगणमध्यपाठादग्र्यप्रायनयेन बुद्ध्यादीन्यपि करणानि स्युरित्यत्राह । "बुद्ध्याद्याख्येति" । तथा च भाष्यम् अध्यवसायाभिमानचिन्तावृत्तिभेदान्मन एव बुद्ध्यहङ्कारचित्तशब्दैर्व्यपदिश्यते इति । अतस्तत्त्ववर्गमध्ये मनोऽनन्तरं बुद्ध्यादिचित्तान्तपाठोऽपि मनस एव हि वृत्तिभेदविशिष्टस्येति नेतुं शक्यम्, न च चित्तं नाम तत्त्वान्तरं सृष्टिप्रलयप्रकरणेषु पठ्यते अयमेव त्वहङ्कार उत्कृष्टजनावमानहेतुरित्यादि प्रथमसूत्रभाष्यमहमर्थहेयत्वनिरासपरतयाऽन्यार्थम्, अन्वरुद्ध्याप्युपपत्तेः, अनुग्राहकत्वमात्रेण परम्परया वा गर्वहेतुत्वोक्तेरनिरोधादिति ॥ ३० ॥ इत्यन्तःकरणवैविध्यभङ्गः ॥

नन्वेवं बाह्यकरणभेदोऽप्यपोहितुं शक्यः मनोवदेकस्य वृत्तिभेदात्पृथक्कार्यव्यपदेशोपपत्तेः । आहुश्च बाह्यैकदेशिनः एकैकदेहेष्वेकमेवेन्द्रियं प्रदेशभेदैस्तु रूपादिप्रकाशनशक्तिनियमः षडायतनागमोऽपि तथैव स्थाप्यः स्वरूपभेदप्रयोजनाभावात् ।

कल्प्यते शक्तिभेदश्चेच्छक्तिरेवेन्द्रियम्भवेत् ।

इति चायुक्तम्, धर्मिकल्पनातो वरं हि धर्मकल्पनम् प्रदेशानामेव तत्तत्करणत्वोपपत्तौ प्रदेशक्लृप्तिरनर्थिकेति चेन्न ? देहव्यापिनः

स्पर्शस्योभयसंमतेः, तस्य च करतलप्रकोस्य नेत्रादिषु स्पर्शग्रहणशक्तिवैषम्यदृष्टेः। अतश्चैकस्यैव सर्वत्र देहे स्पर्शनत्वं तत्र तत्र चक्षुरादित्वं चेति तदेतदाह। "एकमिति"।

मू० एकं तत्तत्प्रदेशप्रतिनियततया शक्तिभेदं प्रपन्नं देहव्यापीन्द्रियं चेत्प्रथममिह भवेदागमेनैव बाधः॥ नो चेत्स्याद्देहभेदप्रतिनियततया सर्वजन्तोस्तदेकं भेदाम्नानादक्लृप्तेरपि न च भजते देह एवेन्द्रियत्वम्॥ ३८॥

किमेकेन्द्रियस्य श्रुतस्य कल्पितस्य वा शक्तिभेदव्यवस्थापनमिति विकल्पमभिप्रेत्याद्यं दूषयति। "प्रथममिति"। बाधस्य दूषणान्तरादौद्वृत्यसूचनाय प्राथम्योक्तिः। आगमेनैव धर्मिग्राहकेणेवेत्यर्थः। गौरवदोषश्च क्लृप्तिपक्षे वक्तव्यः नास्मत्पक्ष इति चाभिप्रेतम् इन्द्रियक्लृप्तिः प्रागेव निरस्ता। अत्र तदेकत्वक्लृप्तावतिप्रसङ्गमाह। "नो चेदिति"। यथैकमेवाकाशं तत्तत्पुरुषादृष्टोपार्जितकर्णशष्कुल्यवच्छेदभेदैः प्रतिपुरुषं व्यवस्थितोपकारकमिति वैशेषिकादिभिः कल्प्यते तथा त्वयाऽप्येकमेवेन्द्रियं तत्तद्भोगायतनभेदनियतशक्तिकं सर्वोपकारकं कल्प्यमिति भावः। न चैवमस्त्विति वाच्यम् अपसिद्धान्तात्। ननु च नानादेहमध्येषु वसतः कथमेकत्वमिति चेत् चक्षुर्गोलकाद्यवच्छिन्नानामिन्द्रियप्रदेशभेदानां कथम् न कथञ्चिदिति चेत्तर्ह्यनेकेन्द्रियवादः। गुञ्जैकत्वमस्त्विति चेत् किमतः ग्राहकांशानां मिथो विभक्तत्वात्।

न च तत्ता तदन्यस्य न च तस्य ततोऽन्यता।
सत्ताद्यैर्जैनवद्वाच्या सर्वमानविरोधतः॥

प्रकृतौ पौर्णमासयागे प्रथममुपांशुयागस्य पश्चादग्नीषोमीयस्य मन्त्रपाठक्रमेण क्लृप्तत्वादग्नीषोमीयनिर्वापात्प्रागाज्यनिर्वापः पूर्वन्यायेनेति पूर्वपक्षे सिद्धान्तमाह । प्रकृताविति । प्रकृतौ पूर्णमासयागे अङ्गानामनुष्ठानं यथाक्रमं यथा पाठः तथा प्रतीयेत ज्ञातव्यः स्वशब्दत्वादङ्गप्रतिपादकशब्दधर्मत्वात्, पाठस्येति शेषः । पाठक्रमेण प्रबलेन मुख्यक्रमबाध इति भावः ॥ १५ ॥

ब्राह्मणपाठापेक्षया मन्त्रपाठस्य बलीयस्त्वम् । अधि· ९ ।

मन्त्रतस्तु विरोधे स्यात्प्रयोगरूपसामर्थ्यात्तस्मादुत्पत्तिदेशः सः ॥ १६ ॥

मन्त्रब्राह्मणपाठक्रमे प्रबलदुर्बलभावः चिन्त्यते । पूर्णमासयागे प्रथममुपांशुयागमन्त्रः पश्चादग्नीषोममन्त्रः । तयोरुत्पत्तिवाक्यपाठक्रमः तद्विपरीतोऽस्ति । एवं सत्युभयोरविशेषादिच्छैव नियामिकेति पूर्वपक्षे सिद्धान्तमाह । मन्त्रेति । ब्राह्मणपाठक्रमस्य मन्त्रतः मन्त्रपाठक्रमेण विरोधे मन्त्रक्रमेणानुष्ठानं स्यात् । प्रयोगरूपे प्रयोगरूपक्रियोत्पत्तौ सामर्थ्यात्कारणत्वात् । न ह्यनुष्ठीयमानक्रियास्मरणमन्तराऽनुष्ठानं संभवति । तत्स्मरणं मन्त्राधीनम् । अतः मन्त्रक्रमः प्रबल इति भावः । सः ब्राह्मणपाठः उत्पत्तौ स्वरूपज्ञानविषये उद्देश उपदेशो यस्य तादृशः । अनुष्ठाने विप्रकृष्ट इति भावः ॥ १६ ॥

प्रयोगवचनाच्चोदकस्य बलवत्त्वम् । अधि· १० ।

तद्वचनाद्विकृतौ यथाप्रधानं स्यात् ॥ १७ ॥

आग्नावैष्णवमेकादशकपालं निर्वपेदभिचरन् सरस्वत्याज्यभागा स्याद्बार्हस्पत्यश्चरुरिति श्रुतम् । अत्र उपांशुयागाग्नीषोमवदङ्गपाठाभावात्प्रधानक्रमेण निर्वापः प्रकृतिवदेव वेति संशये पूर्वपक्षमाह । तदिति । विकृतौ उक्तयागे यथाप्रधानं प्रधानानुक्रमवद् अङ्गानुष्ठानं स्यात् । तद्वचनात् । प्रधानक्रमबोधकप्रधानवचनपाठबलात् ॥ १७ ॥

विप्रतिपत्तौ वा प्रकृत्यन्वयाद्यथाप्रकृति ॥ १८ ॥

सिद्धान्तमाह । विप्रतीति । विप्रतिपत्तौ मुख्याङ्गक्रमविप्रतिपत्तौ

विरोधे यथाप्रकृति प्राकृतक्रम एव कर्तव्यः । प्रकृतौ अन्वयात् क्रमस्य क्लृप्तत्वात् । प्रकृतितः अतिदिश्यमानानामङ्गानां क्रमसहितानामेव प्राप्त्या न क्रमाकाङ्क्षेति भावः ॥ १८ ॥

विकृतौ क्व चित्प्रकृतिधर्मानतिदेशः । अधि० ११ ।

विकृतिः प्रकृतिधर्मत्वात्तत्काला स्याद्यथाशिष्टम् ॥ १९ ॥

चातुर्मास्ये श्रुतम्, अग्नये ऽनीकवते पुरोडाशमष्टाकपालं निर्वपति साकं सूर्येणोद्यता मरुद्भ्यः सांतपनेभ्यो मध्यन्दिने चरुं मरुद्भ्यो गृहमेधिभ्यः सर्वासां दुग्धे सायं चरुमिति । इमा इष्टयः प्रकृतिवद् द्व्यहसाध्या उत सद्यःकाला इति संशये पूर्वपक्षमाह । विकृतिरिति । विकृतिः उक्तेष्टयः तत्काला प्रकृतिकाला द्व्यहसाध्या स्यात् । प्रकृतेर्धर्मो यत्र तत्त्वाद्विकृतेः । यथा शिष्टं विहितं प्रकृतौ द्व्यहकालत्वं तथा ऽत्रापीति । यद्वा । यथा शिष्टं शेषाङ्गकलापः प्रकृतः तथा कालो ऽपीति ॥ १९ ॥

अपि वा क्रमकालसंयुक्ता सद्यः क्रियेत तत्र विधिरनुमानात्प्रकृतिधर्मलोपः स्यात् ॥ २० ॥

सिद्धान्तमाह । अपीति । प्रातर्मध्यन्दिने सायमिति क्रमदिनावयवरूपकालाभ्यां संयुक्ता विकृत्युत्पत्तिः सा सद्यः क्रियेत सद्यः करणस्य शब्दादेव प्रतीतिः । यथा देवदत्तः प्रातः पृथुकान्भुङ्क्ते मध्याह्ने ऽन्नं रात्रौ मोदकानित्यत्र एकदिनसाध्यत्वं शब्दादवगम्यते तथा ऽत्रापीति भावः । अत्र विकृतौ प्रकृतितो द्व्यहप्राप्तिरनुमानादतः प्रकृतिधर्मस्य द्व्यहकालस्य लोपः ॥ २० ॥

कालोत्कर्ष इति चेत् ॥ २१ ॥

ननु सवनीयपश्वङ्गयागयोरुत्कर्षः तथा त्रयमेकं कर्म मध्यन्दिनादिशब्द उत्कर्षप्रापकः । इत्थं च पूर्वदिने कालत्रये त्रयाणामन्वाधानं परेद्युस्त्रिषु कालेषु यागत्रयमिति शङ्कते । कालेति । काले मध्यन्दिनादौ उत्कर्षः ॥ २१ ॥

न तत्संबन्धात् ॥ २२ ॥

दूषयति । नेति । तत्संबन्धात् । उत्पत्तिवाक्यसंबन्धात् । उत्पत्तिवाक्यसंबन्धानां नोत्कर्षप्रापकत्वमिति भावः ॥ २२ ॥

अनुयाजाद्युत्कर्षप्रयाजान्तापकर्षौ । अधि० १२ ।

अङ्गानां मुख्यकालत्वाद्यथोक्तमुत्कर्षे स्यात् ॥ २३ ॥

तिष्ठन्तं पशुं प्रयजतीत्यत्र पशौ प्रयाजापकर्षः आग्निमारुतादूर्ध्वमनूयाजैश्चरन्तीति अनूयाजोत्कर्षश्च श्रुतः । श्रुतस्यैवोत्कर्षापकर्षौ उत प्रयाजान्तस्यापकर्षः अनूयाजाद्यग्रिमाङ्गानां यावतामुत्कर्ष इति संशये पूर्वपक्षमाह । अङ्गानामिति । अङ्गानां प्रयाजानूयाजरूपश्रूयमाणाङ्गातिरिक्तानां मुख्यस्य यः समीपकालः तत्संबन्धित्वाद् यथोक्तं यावच् श्रुतं तावद् उत्कर्षे कर्तव्ये स्यात् । उत्कर्षशब्दः अपकर्षोपलक्षकः ॥ २३ ॥

तदादि वाऽभिसंबन्धात्तदन्तमपकर्षे स्यात् ॥ २४ ॥

सिद्धान्तमाह । तदादीति । तदादि अनूयाजाद्यग्रिमं सर्वमुत्कृष्यते । तदन्तं प्रयाजान्तं यावदपकृष्यते । संबन्धात् प्रयोगविधिसंबन्धात् । प्रयोगविधिना प्रयाजपूर्वत्वस्य अनूयाजोत्तरत्वस्य च क्लृप्तत्वादिति भावः ॥ २४ ॥

प्रकृत्या प्रोक्षणादीनां सौमिकपूर्वभावित्वम् । अधि० १३ ।

प्रकृत्याकृतकालानाम् ॥ २५ ॥

ज्योतिष्टोमे सुत्यादिने पाठक्रमः । प्रथमं प्रातरनुवाकः तदनन्तरं प्रचरणीहोमाः ततः सवनीयपुरोडाशनिर्वापः । एवं स्थिते प्रातर्यावभ्यो देवेभ्योऽनुब्रूहि ब्रह्मन्वाचं यच्छ प्रतिप्रस्थातः सवनीयान्निर्वपेति प्रैषबलेन निर्वापान्तानामपकर्षः । देवस्त्वा सविता मध्वाऽनक्त्विति पुरोडाशालङ्कारादि तदुत्तरकर्मणां बहिष्पवमाने स्तुत आहाग्नीदग्नीन्विहर बर्हिस्तृणीहि पुरोडाशाँ अलंकुर्विति तदन्तोत्कर्षः । एवं सति मध्यवर्तिनां सौमिकधर्माणां प्रचरणीहोमादीनां व्रीहिप्रोक्षणादीष्टिधर्माणाम् अनुष्ठाने इच्छैव नियामिकेति पूर्वप॰ सिद्धान्तमाह । प्रकृत्येति । कृत्या दर्शपूर्णमासप्रयोगेण कृतकालानां ज्ञातकालानां निर्वापानन्तरं

स्मृतानां प्रोक्षणादीनामलंकारपर्यन्तानामनुष्ठानं, ततः सौमिकानां, निर्वापोत्तरं स्मृतप्रोक्षणादिपरित्यागे मानाभाव इति भावः ॥ २५ ॥

शब्दविप्रतिषेधाच्च ॥ २६ ॥

शब्दविप्रतिषेधस्त्वेवम् अलंकुर्वित्युक्तः प्रोक्षणादीन् प्रतिपद्येत परमते । अस्मन्मते अलंकुर्वित्युक्ते अलंकरणमेव प्रतिपद्यते । अयं भावः । प्रातरनुवाकप्रैषानन्तरं प्रतिप्रस्थात्रा निर्वापे कृते प्रोक्षणादि अलंकरणपर्यन्तमकृत्वा प्रचरणीहोमादिसौमिकतन्त्रं प्रारभेद् बहिष्पवमानस्तोत्रपर्यन्तम् । ततः अग्नीदग्नीन्विहरेति पुरोडाशानलंकुर्विति प्रैषं दद्यात्तदाऽलंकरणात्प्राक्तनप्रोक्षणादीनामवशिष्टत्वात् तावत्पर्यन्तं प्रतीक्षां कुर्यात् । न हीदमुचितम् । पुरोडाशानलंकुर्वित्यत्र लोट् प्राप्तकालार्थः । प्रोक्षणादीनामननुष्ठितत्वेनालङ्करणकालाप्राप्तौ तदर्थकलोड् विरुध्यते । प्रोक्षणाद्यलङ्करणपर्यन्तमनुष्ठाय सौमिकतन्त्रोपक्रमे तेनैव क्रमेण बहिष्पवमाने स्तुते अलङ्करणकालप्राप्तौ लोड् न विरुध्यतइति ॥ २६ ॥

वैकृतयूपकर्ममात्रापकर्षः । अधि० १४ ।

असंयोगात्तु वैकृतं तदेव प्रतिकृष्येत ॥ २७ ॥

दर्शप्रकृतिके अग्नीषोमीयपशौ यूपोत्पत्तिः पठिता । दीक्षासु यूपं छिनत्तीत्यपकर्षे तत्पूर्ववर्तिनः अग्नीषोमप्रणयनस्याप्यपकर्षः तदन्तापकर्षस्य क्लृप्तत्वादिति पूर्वपक्षे सिद्धान्तमाह । असंयोगादिति । वैकृतं स्वप्रकृतिभूतदर्शे अविद्यमानं यूपच्छेदनं तदेव तन्मात्रमेव प्रतिकृष्येत अपकृष्येत । असंयोगात् । अङ्गान्तरैः सह प्रयोगविधिपरिगृहीतक्रमलक्षणसंयोगस्यान्यत्राक्लृप्तत्वात् । अत्रैव ग्रहीतव्ये वचनेन दीक्षासमयएव ग्रहणात्प्रयाजापकर्षवैषम्यमिति भावः ॥ २७ ॥

दाक्षिणाग्निकहोमानपकर्षः । अधि० १५ ।

प्रासङ्गिकं च नोत्कर्षेदसंयोगात् ॥ २८ ॥

आग्निमारुतादूर्ध्वमनूयाजैः चरन्तीति अनूयाजोत्कर्षे तदाद्युत्कर्षनियमेन अनूयाजोत्तरवर्तियावद्धर्माणामुत्कर्षवत्पिष्टलेपफलीकरणानामप्युत्कर्ष इति पूर्वपक्षे सिद्धान्तमाह । प्रासङ्गिकमिति । प्रासङ्गिकं पश्वर्थे

सत् प्रसङ्गादुपकारकं पुरोडाशस्यानूयाजकर्म नोत्कर्षेत् । पिष्टलेपफलीकरणहोमौ स्वस्थानाच्च्यावयितुमसमर्थौ, प्रासङ्गिकत्वाप्रासङ्गिकत्वरूपविरुद्धधर्मवत्त्वेन तयोरसंबन्धात् । साजात्याभावादिति भावः ॥ २८ ॥

पुरोडाशाभिवासनान्तस्य दर्शे ऽनपकर्षः । अधि॰ १६ ।

तथा ऽपूर्वम् ॥ २९ ॥

पाठक्रमेण कपालासादनादूर्ध्वं पौर्णमास्यां वेदिकरणं प्राप्तम् । अमावास्यायां वेदकरणानन्तरं सा वेदिर्वेदं कृत्वा वेदिं करोतीति वचनेन पूर्वेद्युरपकृष्टा सती तदन्तं यावत्पूर्वकर्मापकर्षतीति पूर्वपक्षे सिद्धान्तमाह । तथेति । यथा प्रासङ्गिकं तदादित्वेन पिष्टलेपहोमं नोत्कर्षति तथा अपूर्वमपि तदन्तं नापकर्षतीति । अयं भावः । पौर्णमासी न दर्शप्रकृतिः । येन हेतुना अयमपकर्षविधिः । प्रकृतौ क्लृप्तकालस्यातिदेशे वचनेन ततः पूर्वकालप्रापकस्यैवापकर्षपदार्थत्वात् । अमावास्यायां वेदकालोत्तरकालो ऽपूर्वा विधीयतइति ॥ २९ ॥

सान्तपनीयाया अग्निहोत्रानुत्कर्षकत्वम् । अधि॰ १७ ।

सांतपनीया तूत्कर्षेदग्निहोत्रं सवनवद्वैगुण्यात् ॥ ३० ॥

चातुर्मास्ये मरुद्भ्यः सांतपनेभ्यो मध्यन्दिने चरुमिति सान्तपनीयोपक्रान्ता दैवादग्निहोत्रकालपर्यन्तमुत्कृष्टा । तत्र सान्तपनीयाप्रयोगमध्ये अग्निहोत्रमनुष्ठेयमुताग्निहोत्रस्याप्युत्कर्ष इति संशये पूर्वपक्षमाह । सान्तपनीयेति । सूत्रे उत्कृष्यमाणेति पूरणीयम् । उत्कृष्यमाणा सान्तपनीया अग्निहोत्रमुत्कर्षेत् । स्वकालाच्च्यावयेत् । सवनवत् । यथा प्रातःसवनमुत्कृष्यमाणं माध्यन्दिनं सवनमुत्कर्षति तथा । किं च वैगुण्यमपि प्रणयनाद्यङ्गलोपेन ॥ ३० ॥

अव्यवायाच्च ॥ ३१ ॥

अव्यवायात् । सान्तपनीयाङ्गप्रधानयोर्मध्ये अग्निहोत्रेण व्यवधानाभावो ऽपि सिध्यत्यतो ऽप्यग्निहोत्रोत्कर्षः ॥ ३१ ॥

असंबन्धात्तु नोत्कर्षेत् ॥ ३२ ॥

सिद्धान्तमाह । असंबधादिति । असंबन्धात् । एकप्रयोगानन्तःपातित्वाद् नोत्कर्षेदग्निहोत्रम् ॥ ३२ ॥

प्रापणाच्च निमित्तस्य ॥ ३३ ॥

होमकाले जीवनरूपनिमित्तस्य प्राप्तत्वान्निमित्ते सति नैमित्तिकमनुष्ठेयमिति आह । प्रापणादिति । व्याख्यातम् ॥ ३३ ॥

संबन्धात्सवनोत्कर्षः ॥ ३४ ॥

संबन्धात्सवनोत्कर्ष इति । संबन्धात् । एकप्रयोगपठितत्वात् । अयं भावः । एकप्रयोगपठितत्वेन प्रयोगविधिपरिगृहीतप्रातःसवनसमाप्त्युत्तरकालो ऽप्यङ्गं माध्यन्दिनसवने प्रातःसवनमध्ये ऽनुष्ठाने स बाध्येतेति ॥ ३४ ॥

उक्थ्यानुरोधेन षोडश्युत्कर्षः । अधि॰ १८ ।

षोडशी चोक्थ्यसंयोगात् ॥ ३५ ॥

ज्योतिष्टोमे षोडशिनं प्रकृत्य श्रूयते, तमुक्थ्येभ्यः पराञ्चं षोडशिनं गृह्णातीति । उक्थ्यग्रहस्य दैवादुत्कर्षे अकालप्राप्तौ उक्थ्यात्प्रागेव षोडशिस्तोत्रमुपक्रम्य स्वकाले षोडशिप्रचारः तत उक्थ्यप्रचारः, समयाध्युषिते सूर्ये षोडशिनः स्तोत्रमुपाकरोतीति अस्तसमये स्तोत्रोपक्रमविधानादिति पूर्वपक्षे सिद्धान्तमाह । षोडशीति । उक्थ्योत्कर्षे षोडश्युत्कृष्यते । उक्थ्यसंयोगात् । उक्थ्योत्तरकाले विधानात् । अर्धास्तकालस्तु षोडशिस्तोत्रकालः । स त्वङ्गकालः । उक्थ्योत्तरकालः षोडशियागस्य प्रधानस्य कालः । न ह्यङ्गकालानुरोधेन प्रधानकालविरोधो युक्त इति भावः ॥ ३५ ॥

इति श्रीमज्जैमिनिसूत्रवृत्त्यां पञ्चमस्याध्यायस्य प्रथमः पादः ॥ १ ॥

वाजपेयपशूनां सर्वेषामेकदोपाकरणादिधर्मानुष्ठानम् । अधि॰ १ ।

सन्निपाते प्रधानानामेकैकस्य गुणानां सर्वकर्म स्यात् ॥ १ ॥

वाजपेये प्राजापत्यपशुषु सप्तदशसु उपाकरणनियोजनाञ्जनादिसंस्काराः प्रकृतितः प्राप्ताः तान्सर्वानेकपशौ समाप्य पश्वन्तरं व्रजेद् उत प्रथमसंस्कारं यावत्पशुषु कृत्वा तथैव द्वितीयादि कुर्यादिति संशये पूर्वपक्षमाह । सन्निपातइति । प्रधानानां संस्कार्याणां बहूनामेकप्रयोगे

सन्निपाते प्रत्येकमेकैकगुणानां सर्वं समग्रं कर्म निश्शेषं यथा तथा ऽनुष्ठानं स्यात् । तथा सति प्रकृतौ उपाकरणानन्तर्यं नियोजनस्य क्लृप्तं तदनुगृहीतं भवति । सिद्धान्तपक्षे प्रथमपशोर्नियोजनमितरपशूनां सप्तदशोपाकरणैर्व्यवहितमिति प्रकृतिकोपः स्यादिति ॥ १ ॥

सर्वेषां वैकजातीयं कृतानुपूर्व्यत्वात् ॥ २ ॥

सिद्धान्तमाह । सर्वेषामिति । सर्वेषां पशूनामेकैकजातीयमुपाकरणत्वादिना सजातीयं सर्वेष्वेकजातीयं कृत्वा तथा परो ऽप्यनुष्ठेय इति फलितम् । वैश्वदेवीं कृत्वा प्राजापत्यैश्चरन्तीत्यनेन सप्तदशानां साहित्ये सिद्धे युगपत्सप्तदशक्रियाणामेककर्तृकाणामसंभवात् । क्षणभेदमात्रस्यापेक्षितत्वेन एकसंस्कारस्यैव कृतानुपूर्व्यात् । अनेनैव न्यायेन दर्शपूर्णमासे ऽङ्गानुष्ठानम् ॥ २ ॥

सहस्राश्वप्रतिग्रहस्थले एकैकस्यैकदा सर्वधर्मानुष्ठानम् । अधि॰ २ ।

कारणादभ्यावृत्तिः ॥ ३ ॥

नन्वश्वप्रतिग्रहेष्टिष्वपि तथा ऽनुष्ठानं स्यादत आह । कारणेति । तत्र कारणात् प्रधानबाधरूपकारणाद् अभ्यावृत्तिः एकस्मिन्नेव यावत्संस्कारसंपादनम् । यत्र सहस्रमश्वाः प्रतिगृहीताः तावत्य इष्टयः प्राप्ताः तत्र प्रथमपुरोडाशस्याङ्गारयुतकपालेष्वासादनं कृत्वा शेषाणामासादने क्रियमाणे प्रथमपुरोडाशो भस्म स्यात् । अतः आसादनमारभ्योद्वासनान्तं काण्डानुसमयेनेति भावः ॥ ३ ॥

मुष्टिकपालादीनां समुदायानुसमयः । अधि॰ ३ ।

मुष्टिकपालावदानाञ्जनाभ्यञ्जनवपनपावनेषु चैकेन ॥ ४ ॥

दर्शपूर्णमासयोः चतुरो मुष्टीन्निर्वपेदिति । अत्राग्नेयाग्नीषोमीययोरेकैकमुष्टिं निरुप्य तथैव द्वितीयतृतीयमुष्टिनिर्वापा उत एकस्य चतुरो मुष्टीन्निरुप्यापरस्यापि तथा निर्वाप इति संशये पूर्वपक्षमाह । मुष्टीति । मुष्टौ एकेन अनुसमयः, न चतुर्मुष्टिनिर्वापानन्तरमपरनिर्वापः पूर्वाधिकरणसिद्धान्तात् । तथा ऽऽग्नेयस्यैकं कपालमुपधायाग्नीषोमीयस्यैकं, तथा

ऽऽग्नेयस्यैकावदानं कृत्वा ऽग्नीषोमीयस्यैकमवद्येत्। तथा दीक्षितसंस्कारे त्रिराङ्क्ते इत्यत्र एकचक्षुष एकमञ्जनं कृत्वा ऽपरचक्षुष एकमेवं त्रिः। दीक्षितसंस्काररूपमभ्यञ्जनमपि तथा। प्रतिदिशं त्रिस्त्रिर्वपतीत्यत्र एकैकवपनक्रमेण त्रित्वं संपादयेत्। तथा चित्पतिस्त्वा पुनात्विति सप्तभिर्मुखं, वाक्पतिस्त्वा पुनात्विति सप्तभिः मुखाधो नाभिपर्यन्तं, देवस्त्वा सविता पुनात्विति नाभिमारभ्य पादपर्यन्तं सप्तभिरिति विहितम्। इदं सत्रे कुलायनामके चातिदिष्टं, तत्र सर्वेषां यजमानानां प्रथमं मुखस्य पश्चान्नाभिपर्यन्तस्य ततः पादपर्यन्तस्य। अयं भावः निर्वापपदार्थस्य प्रत्येकमुष्टावपि क्लृप्तत्वेनैकमुष्टिरपि पदार्थ इति पदार्थानुसमयो युक्त इति भावः ॥ ४ ॥

सर्वाणि वैककार्यत्वादेषां तद्गुणत्वात् ॥ ५ ॥

निर्वापस्वरूपभेदस्य लोकतो ऽवगमे ऽपि अङ्गत्वापरपर्यायपदार्थभेदस्य शास्त्रैकगम्यत्वाद् इत्यभिप्रायेण सिद्धान्तमाह। सर्वाणीति। सर्वाणि चतुःसंख्याविशिष्टमुष्टिरेकः, पदार्थ इति शेषः। एककार्यत्वात्। एकापूर्वं युगपदन्वयात्। संख्यामुष्ट्युभयविशिष्टनिर्वापस्यापूर्वोद्देशेन विधानात् तद्गुणत्वात्। विशिष्टस्यापूर्वाङ्गत्वाद् विशिष्ट एव पदार्थः एकमुष्टिस्तु पदार्थैकदेशः। पूर्वाधिकरणे पदार्थानामेवानुसमय इत्युक्तो न पदार्थैकदेशस्यानुसमय इति भावः। एवं यदाग्नेयो ऽष्टाकपाल इत्यत्राष्टत्वविशिष्टस्याङ्गत्वम्। द्विर्हविषो ऽवद्यतीति त्रिराङ्क्ते त्रिरभ्यङ्क्ते त्रिस्त्रिर्वपतीति एकविंशत्या पावयतीति सर्वत्र संख्याविशिष्टस्य पदार्थत्वान्न प्रत्येकमनुसमयः ॥ ५ ॥

अवदानस्य प्रदानान्तानुसमयः। अधि० ४।

संयुक्ते तु प्रक्रमात्तदन्तं स्यादितरस्य तदर्थत्वात् ॥ ६ ॥

द्विर्हविषो ऽवद्यतीति द्वित्वविशिष्टावदानस्य पदार्थत्वात्तस्यानुसमयसंभवादाग्नेयस्यावदाय होमात्प्रागेवाग्नीषोमावदानमिति पूर्वपक्षे सिद्धान्तमाह। संयुक्तइति। संयुक्ते चतुरवत्तं जुहोतीति चतुरवत्तसंबद्धे

होमे, विधीयमाने इति शेषः । प्रक्रमात् । चतुरवत्तेनोपक्रमात् । इतरस्य तदर्थत्वात् । होमार्थत्वात् । तदन्तं होमान्तमेकः पदार्थः स्यात् । उपस्तृणाति द्विर्हविषो ऽवद्यति सकृदभिघारयतीति चतुरवत्तावयवत्वेनैव विधानमिति भावः ॥ ६ ॥

अञ्जनादेः परिव्याणान्तानुसमयः । अधि० ५ ।

वचनात्तु परिव्याणान्तमञ्जनादिः स्यात् ॥ ७ ॥

अग्नीषोमपशौ यूपसंस्काराः अञ्जनाभ्यञ्जनाष्टाश्रीकरणादयः । ते यूपैकादशिन्यामतिदेशेन प्राप्ताः । तत्र पदार्थानुसमयो न वेति संशये सिद्धान्तेनोपक्रमते । वचनादिति । अञ्जनादिपरिव्याणान्तं यजमानो यूपं नोत्सृजतीति वचनेन यजमानान्वारम्भस्याङ्गत्वात्तदसंभवात् ॥ ७ ॥

कारणाद्वा ऽवसर्गः स्याद्यथा पात्रवृद्धिः ॥ ८ ॥

पूर्वपक्षमाह । कारणादिति । कारणाद् अध्वर्योः सहायापेक्षारूपकारणात् । अवसर्गः यजमानातिरिक्तकल्पना स्यात् । यथा पात्रवृद्धिः, अष्टावुपभृति इत्यनूयाजार्थस्य प्रकृतौ एकोपभृति द्रव्यैकत्वेन ग्रहणे ऽपि यत्र प्रयाजानूयाजयोर्यत्राज्यं पृषदाज्यमिति द्रव्यभेदः तत्रानुक्तमपि पात्रान्तरं कल्प्यते, तथा ऽत्र यजमानकार्ये ऽन्वारम्भे ऽन्यः कल्प्यः । इत्थं च प्रयोगविधिपरिगृहीतप्रयोगप्राशुभावः सिध्यतीति भावः ॥ ८ ॥

न वा शब्दकृतत्वान्न्यायमात्रमितरदर्थात्पात्रवृद्धिः ॥ ९ ॥

दूषयति । न वेति । इतरत् प्रयोगविधिपरिगृहीतप्रयोगप्राशुभावः न्यायमात्रं प्रतिज्ञाहेतूदाहरणगम्यम् अनुमानगम्यमिति यावत् । प्रकृतस्य अञ्जनादिपरिव्याणान्तकालपर्यन्तं यूपमुद्दिश्य यजमानकर्तृकान्वारम्भस्य शब्दकृतत्वात्प्रत्यक्षश्रुतिगम्यत्वादानुमानिकबाध इति भावः । उक्तस्थले पात्रवृद्धिरर्थाद् अनुपपत्त्या । प्रकृतौ अष्टावुपभृतीत्युपभृतमुद्दिश्य अष्टत्वसंख्याकं ग्रहणं विधीयते, न त्वेकत्वविशिष्टोपभृतमुद्दिश्य । उद्देश्यसंख्याया अविवक्षितत्वात् । तत्रत्यमेकत्वं प्रकृतावार्थिकम् । आर्थिकस्यानङ्गत्वात् सति प्रयोजने विकृतौ पात्रवृद्धौ बाधकाभाव इति भावः ॥ ९ ॥

दैवताद्यवदानेषु पदार्थानुसमयः । अधि० ६ ।

पशुगणे तस्य तस्यापवर्जयेत् पश्वेकत्वात् ॥ १० ॥

अग्नीषोमीयपशौ दैवतान्यवदाय न तावत्येव होतव्यं सौविष्टकृतान्यवद्यति । सौविष्टकृतान्यवदाय न तावत्येव होतव्यमैडान्यवद्यतीति । दर्शपूर्णमासवद्धोमान्तमकृत्वा अवदानत्रयं प्रथमं कृत्वा पश्चात्क्रमेण होमः अग्नीषोमीयपशौ सिद्धः । प्रकृतौ एकस्मिन्पशौ अवदानत्रयस्य काण्डानुसमयः । एवमेव प्राजापत्यपशुगणे एकैकपशोः अवदानत्रयं संपाद्य द्वितीयपशोरपि तथैवावदानमित्यभिप्रायेण पूर्वपक्षमाह । पशुगणइति । पशुगणे तस्य तस्य अवदानस्य होमस्य च, एकैकपशाविति पूरणीयम् । अपवर्जयेत् । समापयेत् । पश्वेकत्वात् प्रत्येकस्मिन्पशौ प्रकृताविव पश्वेकत्वस्य तुल्यत्वात् । तथा च प्रकृत्यनुग्रहायेति भावः ॥ १० ॥

दैवतैर्वैककर्म्यात् ॥ ११ ॥

सिद्धान्तमाह । दैवतैरिति । दैवतैरवदानैरनुसमयः, इदं सौविष्टकृदाद्युपलक्षणम् । कार्यः । पश्चात्सौविष्टकृतैरनुसमयः । ततः ऐडैरवदानैः ततो होम इति क्रमः । एककर्मत्वात् । एकप्रयोगत्वात् । पशुसंस्कारवत् ॥ ११ ॥

मन्त्रस्य चार्थवत्त्वात् ॥ १२ ॥

मन्त्रस्येति । मन्त्रस्य, त्वं ह्यग्ने प्रथमो मनोतेति मन्त्रस्य अर्थवत्त्वात् । तन्त्रसंभवाद् लाघवरूपफलवत्त्वात् ॥ १२ ॥

नानाबीजेष्टौ उलूखलादीनां तन्त्रता । अधि० ७ ।

नानाबीजे एकमुलूखलं विभवात् ॥ १३ ॥

राजसूये, अग्नये गृहपतये पुरोडाशमष्टाकपालं निर्वपति कृष्णानां व्रीहीणां सोमाय वनस्पतये श्यामाकं चरुमिति । तत्र एकमुलूखलमुत प्रतिबीजं भिन्नं वेति संशयः । तदर्थं कृष्णाजिनास्तरणादितण्डुलनिष्पत्तिपर्यन्त एकः पदार्थः कृष्णाजिनास्तरणादयः पदार्थावयवाः उत ते ऽपि

पदार्थो इति । तत्र सिद्धान्तेनोपक्रमते । नानेति । नानाबीजे उक्तकर्मण्यपि एकमुलूखलम् । विभवात् । एकेनैवावहननसंभवात् ॥ १३ ॥

विवृद्धिर्वा नियमादानुपूर्व्यस्य तदर्थत्वात् ॥ १४ ॥

पूर्वपक्षमाह । विवृद्धिरिति । विवृद्धिः उलूखलवृद्धिः । आनुपूर्व्यस्य पाठक्रमस्य नियमात् प्रकृतौ क्लृप्तत्वात् । अयं भावः । उलूखले हविरावापः तदव्यवहितोत्तरक्षणे अवहननं प्राप्तं हविषः प्रक्षेपावहननयोः तण्डुलस्य शूर्पेण परावापस्य च असति बाधके पदार्थानुसमयो युक्तः । कृष्णाजिनास्तरणादीनां पदार्थावयवत्वाभावात् । यावद्बीजानां हविरावपनमेकोलूखले न संभवत्यतः उलूखलवृद्धिरावश्यकीति । अत्र एवोक्तं तदर्थत्वात् । उलूखलस्य हविरावापार्थत्वात् । परस्परं बीजानां मेलनभिया वृद्धिरिति भावः ॥ १४ ॥

एकं वा तण्डुलभावाद्धन्तेस्तदर्थत्वात् ॥ १५ ॥

सिद्धान्तं व्यवस्थापयति । एकमिति । एकमुलूखलम् । एकबीजस्य तण्डुलभावात् । तण्डुलसिद्धिपर्यन्तं संपाद्य अपरबीजस्य तथा पर्यायेणानुष्ठानम् । अवपूर्वकहन्तेः तदर्थत्वात् तण्डुलनिष्पादकव्यापारलक्षणया उलूखलाधिश्रयणमारभ्य तण्डुलनिष्पत्तिपर्यन्तक्रियाकलापार्थत्वात् । तावत्क्रियाकलाप एकः पदार्थः तेनानुसमय इति भावः ॥ १५ ॥

अग्नीषोमीयपशौ प्रयाजानूयाजयोः पात्रभेदः । अधि० ८ ।

विकारे त्वनूयाजानां पात्रभेदोऽर्थभेदात् ॥ १६ ॥

पशौ अनूयाजार्थं पृषदाज्यं विहितं तदर्थं पात्रान्तरमुत प्रयाजहोमेन रिक्तायामुपभृति पश्चात्पृषदाज्यग्रहणमिति संशये उलूखलवत्पर्यायेणानुष्ठानमिति पूर्वपक्षे सिद्धान्तमाह । विकारइति । अनूयाजानां विकारे प्राकृतद्रव्यादन्यद्रव्यकत्वे पात्रभेदः पात्रवृद्धिः अर्थस्य द्रव्यस्य भेदात् । अष्टावुपभृतीति अष्टसंख्याकग्रहणस्यैकपदार्थतया तन्मध्ये न क्रियान्तरानुष्ठानमिति भावः ॥ १६ ॥

नारिष्टहोमस्योपहोमपूर्वत्वम् । अधि० ६ ।

प्रकृतेः पूर्वोक्तत्वादपूर्वमन्ते स्यान्न ह्यचोदितस्य शेषाम्नानम् ॥ १७ ॥

नक्षत्रसत्रे प्रधानहोमानन्तरमुपहोमाः, अग्नये स्वाहा कृत्तिकाभ्यस्स्वाहेति वैकृताः पठिताः । प्रकृतितः नारिष्टहोमाः प्राप्ताः । तयोः समुच्चय इति दशमे वक्ष्यति । तत्र पूर्वापरभावविचारे सिद्धान्तमाह । प्रकृतेरिति । प्रकृतेः प्राकृतधर्माणां पूर्वोक्तत्वात् । उत्पत्तिवाक्यएव पूर्वपठितत्वात् । उत्पत्तिवाक्यश्रवणवेलायां कथंभावाकाङ्क्षापूरकतया प्रकृतिवदिति अध्याहृतत्वादिति भावः । अपूर्वं वैकृताङ्गमन्ते स्यात् । हि यतः अचोदितस्य अनुत्पन्नकर्मणः शेषाम्नानमङ्गपाठः संभवति । अतः उत्पत्त्यनन्तरमुत्पन्नकर्मणः सन्निधिपाठबलादङ्गत्वग्रहणं पाश्चात्त्यं, प्राकृतानां तूत्पत्तिवेलायामङ्गत्वग्रह इति प्राकृतानां पूर्वत्वमिति भावः ॥ १७ ॥

मुख्यानन्तर्यमात्रेयस्तेन तुल्यश्रुतित्वादशब्दत्वात्प्राकृतानां व्यवायः स्यात् ॥ १८ ॥

पूर्वपक्षरूपमात्रेयमतमाह । मुख्येति । आत्रेय आचार्यः वैकृतानां मुख्यस्य प्रधानस्य आनन्तर्यं प्राकृतात्पूर्वत्वं मनुते । तेन प्रधानेन तुल्यश्रुतित्वात् । यथा प्रधानस्य प्रत्यक्षश्रवणं तथा वैकृतानां प्रत्यक्षश्रुतत्वात् प्राथम्यम् । प्राकृतानां नारिष्टहोमानामशब्दत्वात् । आनुमानिकत्वेन विलम्बोपस्थितत्वात् । व्यवायः प्रधानेन साकं व्यवायः अन्तरायः स्यात् । व्यवधानं यथा तथा ऽनुष्ठानमिति फलितम् ॥ १८ ॥

अन्ते तु बादरायणः तेषां प्रधानशब्दत्वात् ॥ १९ ॥

बादरायणाचार्यमतं सिद्धान्तमाह । अन्ते त्विति । बादरायणः अन्ते प्राकृतधर्मान्ते वैकृतान् मनुते । तेषां प्राकृतानां प्रधानशब्दत्वात् । प्रधानविषयशाब्दविषयत्वात् । पूर्वोक्तदिशा उत्पत्तिवाक्यगम्यत्वादिति फलितम् ॥ १९ ॥

तथा चान्यार्थदर्शनम् ॥ २० ॥

तथा चेति । तथा च पूर्वज्ञातस्य पूर्वमनुष्ठानमिति सिद्धौ च अन्य-

स्यार्थस्य दर्शनम्, आग्नेयं प्रथममग्निर्हि प्रथममवगत इति प्रथमानुष्ठाने प्रथमावगमस्य हेतुत्वं दर्शयति ॥ २० ॥

विदेवनादीनामभिषेकपूर्वत्वम् । अधि० १० ।

कृतदेशात्तु पूर्वेषां स देशः स्यात्तेन प्रत्यक्षसंयोगा-न्न्यायमात्रमितरत् ॥ २१ ॥

राजसूये, अक्षैर्दीव्यति शौनःशेपमाख्यापयति अभिषिञ्चतीति पाठक्रमः । माहेन्द्रस्तोत्रं प्रत्यभिषिञ्चतीत्यभिषेकस्यापकर्षे तावन्मात्रस्यापकर्षः दार्शिकवेदिवदिति पूर्वपक्षे सिद्धान्तमाह । कृतेति । कृतदेशाद् अभिषेचनीयाख्यसोमयागाङ्गभूतमाहेन्द्रस्तोत्रसमीपे माहेन्द्रस्तोत्ररूपक्लृप्तदेशाद् अभिषेकात्पूर्वेषां देवनादीनां स देशः स एव देशः स्यात् । तेन अभिषेकेण प्रत्यक्षसंयोगात् । अभिषेकात्पूर्वं प्रत्यक्षपाठात् । ननु अभिषेचनीयाख्यसोमयागोत्तरपाठोऽस्ति तदुत्तरपाठे तस्मिन्सोमयागे अतिदेशप्राप्तयावदङ्गोत्तरत्वं क्लृप्तं विदेवनादीनां तदन्तापकर्षे अभिषेचनीयाङ्गत्वं विदेवनादिषु बाध्येतेत्यत आह । इतरत् । अभिषेचनीयाङ्गोत्तरत्वं न्यायमात्रं काल्पनिकं तदङ्गानां तत्पूर्वं पाठाभावादिदं दुर्बलं बाध्यतइति भावः ॥ २१ ॥

सावित्रहोमादीनां दीक्षणीयापूर्वत्वम् । अधि० ११ ।

प्राकृताच्च पुरस्ताद्यत् ॥ २२ ॥

अग्निचयने प्रथमं वैकृतान् सावित्रहोमान् उखासंभरणादीन्पठित्वा पश्चात्प्राकृतदीक्षा विहिता, षड्भिर्दीक्षयतीति । अस्य सावित्रहोमात्प्रागनुष्ठानं नक्षत्रेष्ट्युपहोमन्यायादिति पूर्वपक्षे सिद्धान्तमाह । प्राकृतेति । यद् वैकृतं प्राकृतात्पुरस्तादग्रे पठितं तस्य स एव देशः । नारिष्टहोमास्त्वत्यन्तमपठिता इति वैषम्यम् ॥ २२ ॥

याजमानसंस्काराणां रुक्मप्रतिमोकात्पूर्वभावित्वम् । अधि० १२ ।

सन्निपातश्चेद्यथोक्तमन्ते स्यात् ॥ २३ ॥

चयनएव दीक्षणीयहोमानन्तरं, चोदकतः दीक्षितसंस्काराः प्रत्यक्षवचनपाठक्रमेण रुक्मधारणं च प्राप्तम् । तयोर्मध्ये वैकृतं रुक्मधारणं

प्रथमं, सावित्रहोमन्यायादिति पूर्वपक्षे सिद्धान्तमाह । सन्निपात इति । सन्निपाते प्राकृतवैकृतसन्निपाते यथोक्तं प्रत्यक्षश्रुतं रुक्मधारणमन्ते स्यात् । अयं भावः । दीक्षाहोमानन्तरं दीक्षितसंस्काराणामुपस्थितानामनुष्ठानानन्तरं रुक्मधारणे कृते ऽपि दीक्षोत्तरत्वबोधकः पाठो न विरुध्यते । दीक्षायाः सावित्रपाठात्प्रागनुष्ठाने सावित्रहोमोत्तरत्वबोधकः तदुत्तरपाठो विरुध्यतइति वैषम्यमिति ॥ २३ ॥

इति श्रीमज्जैमिनिसूत्रवृत्त्यां पञ्चमस्याध्यायस्य द्वितीयः पादः ॥ २ ॥

प्रयाजादीनामेकादशादिसंख्यायाः सर्वसंपाद्यत्वम् । अधि० १ ।

विवृद्धिः कर्मभेदात्पृषदाज्यवत्तस्य तस्योपदिश्येत ॥ १ ॥

अग्नीषोमीयपशौ श्रूयते, एकादश प्रयाजान्यजतीति । अत्र एकादशत्वसंख्यायाः प्रतिप्रयाजमन्वयः उत समुदायइति संशये पूर्वपक्षमाह । विवृद्धिरिति । पृषदाज्येनानूयाजान्यजतीत्यत्र पृषदाज्यस्य यथा प्रत्येकमन्वयं तथा एकादशत्वस्य प्रत्येकमन्वय उपदिश्येत । तथा च समिदादिकर्मणां भेदात्तदनुसारेण विवृद्धिः पञ्चपञ्चाशत्प्रयाजा इत्यर्थः । प्रयाजोद्देशेन संख्याविधानादुद्देश्यगतसाहित्यस्य अविवक्षणात् प्रत्येकं संख्यान्वय इति भावः ॥ १ ॥

अपि वा सर्वसंख्यत्वाद्विकारः प्रतीयेत ॥ २ ॥

सिद्धान्तमाह । अपि वेति । एकादशत्वसंख्यायाः सर्वसंख्यत्वात् समुदायवृत्तिसंख्यारूपत्वात्तस्य समुदायस्य विकारः आवृत्तिः प्रतीयेत । यथा इतरनिरपेक्षतया पृषदाज्यस्य प्रत्येकमन्वयः संभवति तथा संख्याया अन्वयो न संभवति । एकस्यां व्यक्तावेकादशत्वान्वयासंभवादिदमेव वैषम्यमिति भावः ॥ २ ॥

प्रथमादीनां तिसृणामुपसदां स्वस्थानावृत्तिः । अधि० २ ।

स्वस्थानात्तु विवृध्येरन्कृतानुपूर्व्यत्वात् ॥ ३ ॥

क्वचित् षडुपसद इति श्रुतम् । तत्राभ्यासेन संख्यापूरणमिति पूर्वाधिकरणे स्थितम् । तत्र तिसृणामुपसदां द्विरावृत्त्या षट्त्वमुत प्रत्येकमेकैकस्य द्विरावृत्त्या षट्त्वमिति संशये, अनुवाको द्विवारं पठ्यतामि-

त्युक्ते निखिलो ऽनुवाको द्विवारं पठ्यते, तथा निखिलोपसदां द्विरावृत्तिरिति पूर्वपक्षे सिद्धान्तमाह। स्वेति। कृतानुपूर्व्यत्वात् प्रकृतौ क्लृप्तक्रमत्वात् स्वस्थानाद् विवृध्येरन्। प्रकृतौ प्रथमोपसदनन्तरं द्वितीयोपसत् तदुत्तरं तृतीयोपसत् तदनन्तरं प्रवर्ग्योद्वासनम् एवं क्रमः। प्रथमदिने प्रथमोपसदो द्विरावृत्तौ तथैव द्वितीययोरनुष्ठाने प्राकृतक्रमो न बाध्यते। समुदायावृत्तौ तृतीयोपसदनन्तरं प्रवर्ग्योद्वासनं त्यक्त्वा प्रथमोपसदनुष्ठाने क्लृप्तक्रमबाध इति भावः॥ ३॥

सामिधेनीषु आगन्तूनामन्ते निवेशः। अधि॰ ३।

समिध्यमानवतीं समिद्धवतीं चान्तरेण धाय्याः स्युर्द्यावापृथिव्योरन्तराले समर्हणात्॥ ४॥

प्रकृतौ नित्यत्वेन पञ्चदश सामिधेनीरुक्त्वा ततः एकविंशतिमनुब्रूयात्प्रतिष्ठाकामस्येति श्रुतं, तत्संख्यासंपत्तये ऋगागमो ऽस्ति। आगच्छन्तीनामृचां क्व समावेश इति प्रश्ने पूर्वपक्षमाह। समिध्येति। प्रकृतौ पञ्चदशसामिधेनीमन्त्रमध्यवर्तिनी या समिध्यमानपदघटिता ऋक् सा समिध्यमानवती समिध्यमानो अध्वर इति। या च समिद्धपदवती समिद्धो अग्नआहुतेति। तयोः अन्तरेण मध्ये धाय्याः। धीयन्तइति धाय्याः। आगन्तुका ऋचः स्युः। तयोरन्तरालविधायकवाक्यशेषभूतार्थवादे द्यावापृथिवीमध्यत्वेन स्तुतत्वात्। स्तुतिवाक्यं च, इयं वै समिध्यमानवती असौ समिद्धवती यदन्तरा तद्धाय्येति स्तुतिवाक्येन सर्वेषां धाय्यापदवाच्यानामागन्तूनामुभयमध्यवर्तित्वेन स्तुतेरिति भावः॥ ४॥

तच्छब्दः वा॥ ५॥

सिद्धान्तमाह। तदिति। तच्छब्दाः पृथुपाजवत्यौ धाय्ये इति वेदे यत्र प्रयुक्ताः तच्छब्दाः तद्वाचका धाय्याशब्दाः न तु योगेन सर्वासामागन्तूनां वाचकाः रूढिर्योगमपहरतीति न्यायात्। पृथुपाजाद्योरेव तदन्तरालदेशः अन्यासामन्ते निवेशः॥ ५॥

उष्णिक्ककुभोरन्ते दर्शनात्॥ ६॥

उक्तार्थे लिङ्गमप्याह। उष्णिगिति। त्रैधातवीयायाम् उष्णिक्क-

कुभौ धाय्ये इति वचनेन उष्णिक्छन्दस्कस्य प्रसो अग्ने इति ऋचः, प्रहोत्रे पूर्व्यं वच इति ककुप्छन्दसश्च समिध्यमानवत्ता। तयोः समिद्वत्योः, अन्तरदेशं दर्शयित्वेति शेषः। अधाय्यायाः अग्ने त्री ते वाजिनेति त्रिष्टुप्छन्दसः, त्रिवत्या परिदधातीति वचनेनान्ते दर्शनात्। इतरथा त्रिवत्या अपि धीयते इति योगेनान्तरैव प्राप्तौ त्रिवत्या परिदधातीत्यनेनान्ते निवेशनं विरुध्येतेति भावः॥ ६॥

बहिष्पवमाने आगन्तूनां पर्यासोत्तरकालता। अधि॰ ४।

स्तोमविवृद्धौ पुरस्तात्पर्यासादागन्तवः स्युः तथा हि दृष्टं द्वादशाहे॥ ७॥

ज्योतिष्टोमे बहिष्पवमाने त्रयस्तृचाः। तेषां नामानि स्तोत्रीयः अनूरूपः पर्यासश्चेति। एवं प्रकृतिस्थितिः। एवमेकविंशेनातिरात्रेण प्रजाकामं याजयेदिति स्तोमवृद्धिः श्रूयते। सा वृद्धिः ऋगागमेन पूरणीयेति दशमे वक्ष्यते। द्वादशाहे स्तोत्रीयानुरूपयोरनन्तरमागन्तुका ऋचः वृषण्वत्यः पठिताः। पाठक्रमेण अनुरूपानन्तरं पर्यासात्प्राक् स्थानं क्लृप्तम्। तथैव क्लृप्त्या सर्वागन्तूनामन्यत्रापि पर्यासांशात्प्रागेव निवेश इत्यभिप्रायेण पूर्वपक्षमाह। स्तोमेति। सूत्रार्थः पूर्वग्रन्थेनावगतप्रायः॥ ७॥

पर्यास इति चान्ताख्या॥ ८॥

पर्यासशब्दार्थमाह। पर्यास इति। अन्ताख्या अन्तपर्यायः॥ ८॥

अन्ते वा तदुक्तम्॥ ९॥

सिद्धान्तमाह। अन्तइति। आगन्तूनामन्ते निवेश इत्युक्तं प्राग्, अन्ते तु बादरायण इति सूत्रेण॥ ९॥

वचनात्तु द्वादशाहे॥ १०॥

ननु द्वादशाहे कथं मध्ये निवेश इत्यत आह। वचनादिति। तत्सन्निधिपठितं तत्रैव विश्रान्तमिति भावः॥ १०॥

अतद्विकारश्च॥ ११॥

अतिदेशेन प्राप्तिभ्रमं दूरीकरोति। अतदिति। उक्तस्य प्रतिष्ठाकामं याजयेदित्यस्य द्वादशाहविकृतित्वाभावाद् नातिदेशः॥ ११॥

शाभावनिबन्धनं किंचित्कार्यं प्राप्तं यस्य प्रतिषेधो विज्ञायेत, आभीयं तु शास्त्रं स्वकार्यं कुर्यादेव, अत एत्वशाभावशास्त्राभ्यां स्वकार्ययोरेत्वशाभावयोः प्रवर्त्तितयोः स्थानिनोरभावात्तन्निबन्धनं धित्वं न स्यादेव। शास्त्रासिद्धत्वे त्वयमर्थः, आभीयं शास्त्रं निष्पन्नमपि स्वकार्यं न करोतीति, अत एत्वशाभावशास्त्राभ्यां स्वकार्ययोरेत्वशाभावयोरप्रवृत्तत्वादनिवर्त्तितत्वाच्चैत्वधिभावशास्त्रस्य स्थानिबुद्धिरेव वर्त्ततइति तन्निबन्धनं कार्यं सिध्यति, अतो व्यापकत्वाच्छास्त्रस्यैवासिद्धत्वम्, आ भादिति शास्त्रस्यैव विषयत्वेन निर्द्देशाच्च। यद्ययं स्वतन्त्रविधिः स्यात्तदा भाद्ग्रहणं विषयनिर्द्देशार्थं वा स्यात्, आ भाच्छास्त्रे ऽत्र कर्त्तव्ये ऽसिद्धवदिति, असिद्धवद्भवतो वा निर्द्देशार्थम्, अत्रग्रहणं तु विषयार्थम्, आ भाद्यच्छास्त्रं तदसिद्धवद्भवति अत्रैवाभीये शास्त्रे कर्त्तव्यइति, तत्राद्ये पक्षे असिद्धवद्भवतो निर्द्देशाभावाद्यत्किंचनाष्टाध्याय्यां कार्यं तत्सर्वमाभीये कर्त्तव्ये असिद्धवत्, ततश्च धिन्विकृण्व्योर चेत्यस्यासिद्धत्वाद्धिनुते कृणुतइत्यतो लोपो न स्यात्, अत्रग्रहणं चानर्थकं स्यात्, अपरिपूर्णत्वादध्याहारेणैवा भाद्यत्तत्र कर्त्तव्यइत्यर्थलाभात्, द्वितीये तु पक्षे समानाश्रयत्वं विशेषो न लभ्येत, ततश्च प्रशमय्येति मितो ह्रस्वस्यासिद्धत्वाल्लघुपूर्वो मकारो न भवतीति ल्यपि लघुपूर्वादित्ययादेशो न स्यात्, प्रबेभिदय्येति, भिदेर्यङन्ताद् णिचि यस्य हल इति यलोपस्यासिद्धत्वाल्लघुपूर्वादुत्तरो णिज्न भवति, यकारेण व्यवधानादित्ययादेशो न स्यात्, प्रस्तनय्येति, अदन्तात्स्तनशब्दइत्यस्माद् णिच्यल्लोपस्यासिद्धत्वाल्लघोरेव परो णिच् न तु लघुपूर्वादित्ययादेशाप्राप्तिः। पशुं सनोतीति जनसनखनेति विट्, विड्वनोरित्यात्वं, सनोतेरन इति षत्वं, पशुषाः, ततः शसि पशुषो नवाजानित्यादावात्वस्यासिद्धत्वा'दातो धातो'रित्यालोपो न स्यात्। चाखायितेति, खनेर्यङि द्विर्वचनात्परत्वा'द्ये विभाषे'त्यात्वे द्विर्वचने तृचि आत्वस्यासिद्धत्वा 'द्यस्य हल' इति यलोपः स्यात्, पपुष इत्यादौ च दोषो वक्ष्यते, अधिकारे आ भाद्ग्रहणं चानर्थकं स्यात्, अधिकारादेव तदर्थलाभात्। तथाहि। 'श्नान्नलोप' इत्यत्रास्मिन्नुपस्थिते सति श्नादु-

त्तरस्य नकारस्य लोपो भवति स चासिद्धवद्भवती[1]त्ययमर्थो भवति, एवमनुदात्तोपदेशेत्यादावपि, तत्किमसिद्धवद्भवतो निर्द्देशार्थेनाभाद्ग्रहणेन, न चासिद्धवद्भवत इयत्तावधारणार्थमाभाद्ग्रहणम्, अधिकारे ह्यस्मिन्नवध्यनिर्द्देशाद्युवोरनाकावित्यादीनामपि असिद्धत्वं स्यादिति वाच्यं, ङ्याप्प्रातिपदिकादितिवदन्तरेणाप्यवधिनिर्द्देशमधिकारपरिमाणावगतेः । नन्वसत्याभाद्ग्रहणे ऽधिकारेऽस्मिन्सति यत्रैतदधिकृतं तदेव सूत्रं तद्विहितं वा कार्यमत्रग्रहणेन परामृश्येत, अन्यस्य संनिहितस्याभावात्, ततश्च 'श्नान्नलोप' इत्यस्यायमर्थः स्यात, श्नादुत्तरस्य नकारस्य लोपो भवति, स चासिद्धवद्भवत्यत्रैव, श्नान्नलोपे कर्त्तव्यइति, एवं सर्वत्र, ततश्च चिणो लुगित्यत्रैवेष्टं सिध्येदकारितरामिति,गतः गतवानित्यादावन्यस्मिन्नाभीये ऽन्यस्याभीयस्यासिद्धत्वानापादनादतो लोपादि स्यादेवाभाद्ग्रहणं तु कृत्वा विधावाश्रीयमाणे तस्यैव संनिहितस्यात्रग्रहणेन परामर्शादाभीयमाभीयेसिद्धवत्स्वस्मिन्नन्यस्मिन्वेत्ययमर्थो लभ्यते । उच्यते । आधिकारेप्यस्मिन्सति अनुदात्तोपदेशेत्यादौ तत्रैव कर्त्तव्ये तस्यैवासिद्धवचने न किंचित्प्रयोजनमस्तीति तत्कार्यविशेषरूपपरित्यागेन इदमसिद्धवद्भवति अत्र कर्त्तव्यइत्येवं सामान्यरूपेण परामर्शादन्यस्मिन्नप्यन्यस्यासिद्धत्वं भविष्यति, तदेवमाभाद्ग्रहणमतिरिच्यमानं विषयार्थं विज्ञायते, अधिकाराच्चासिद्धवद्भवतीवगतिः, अत्रग्रहणं तु समानाश्रयत्वप्रतिपत्त्यर्थं, यद्युभे अप्याभीये एकमेव निमित्तमाश्रित्य प्राप्नुतः, एवमन्योन्यस्मिन्नसिद्धवद्भवति, किमत्रग्रहणमतिरिच्यतइत्यतः समानाश्रयत्वप्रतिपत्तिः, नेत्याह, अन्वर्थार्थएवायं, तथाहि । अनुदात्तोपदेशेत्यत्रास्मिन्नुपस्थिते सत्ययमर्थो भवति, अनुदात्तोपदेशानां लोपो भवति झलादौ क्ङिति परतः, स चासिद्धवद्भवति, कुत्र कर्त्तव्ये,अत्र यदा भात्तत्रेति, कोर्थः, क्ङित्यनुनासिकलोपो भवतीत्युक्तम्, अत्रैव क्ङिति निमित्ते सति यदाभीयं प्राप्नोति तत्र कर्त्तव्यइति, एवं सर्वत्र, एवं च विस्पष्टमक्षरैरेव समानाश्रयत्वं प्रतिपादितं भवति । यद्ययमधिकारस्ततो यत्रास्योपस्थानं

१ अत्र कर्त्तव्ये इत्यधिकम् ङ· पु· ।

तत एवारभ्य यदा भात्तत्रैव तस्यासिद्धत्वं स्यात् न तु स्वस्मात्पूर्वेष्वितरेषु, यद्देशस्थेन हि वक्त्रा आङुच्चार्यते तत एवारभ्य मर्यादाभिविधिप्रतिपत्तिः, यथा आ पाटलिपुत्राद्वृष्टो देव इति, एवं च घ्वसोरेद्धावित्यस्यायमर्थो भवति, अस्तेर्हौ एकारः, स चेत आरभ्य यदा भात्तत्रासिद्धवदिति, ततश्च पूर्वत्र धित्वे नासिद्धवत्स्यात्, स्वतन्त्रे तु विधौ अत्रैव प्रदेशे आङर्थं प्रतिपादयन् अत एवारभ्य यदा भात्तदसिद्धवद्भवत्यत्रैव कर्त्तव्यइति, श्नान्नलोपइत्यारभ्य च्च्त्व्यत्रास्त्व्येत्येवमन्तानां सर्वेषामेवान्योन्यस्मिन्नसिद्धत्वमापादयति। उच्यते। द्वौ पक्षौ शब्दाधिकारश्चार्थाधिकारश्च, ततश्च शब्दाधिकारे स्यादेष दोषः, अर्थाधिकारे त्वस्मिन्नेव प्रदेशे आङर्थं प्रतिपादयन् पूर्ववत्प्रतिपादयति, स च प्रतिपादितार्थादुत्तरत्रोपतिष्ठते, उपस्थितश्च तत्रतत्रोपस्थितेनात्रग्रहणेन विशेष्यतइति सर्वमिष्टं सिद्धं, तदनेन सूत्रेणायमर्थः सम्पादितः, 'आत्रलोप' इत्यारभ्यापादपरिसमाप्तेर्यानि सूत्राणि तान्यन्योन्यस्मिन्नसिद्धवद्भवन्ति, तानि चेत्तुल्यनिमित्तानीति, तदेतत्सर्वं वृत्तौ यथास्थानं योज्यं, तदाश्रयमेव भवतीत्यत्रासिद्धवदिति वक्ष्यमाणमपकृष्टव्यं, विभिन्नाश्रयं व्याश्रयं विभिन्ननिमित्तमित्यर्थः। 'असिद्धवचनमित्यादि'। उत्सृज्यते आदेशेन निवर्त्यतइत्युत्सर्गः स्थानी, स लक्षणं निमित्तं यस्य तदुत्सर्गलक्षणं, तस्य भावः, प्रवृत्तिर्यथा स्यात्, एतच्च शास्त्रासिद्धत्वाश्रयणाल्लभ्यतइत्युक्तम्। 'आगहीति'। बहुलं छन्दसीति शपो लुक्, अनुदात्तोपदेशेत्यादिनानुनासिकलोपः। 'जहीति'। हन्तेर्जः। 'अभाजीति'। भञ्जेश्च चिणीत्यनुनासिकलोपः, रागः, 'रञ्जेश्च' 'घञि च भावकरणयोरि'त्यनुनासिकलोपः। 'अत्रग्रहणं किमिति'। यद्यपि समानाश्रयत्वप्रतिपत्त्यर्थमिति पूर्वमेवात्रग्रहणस्य प्रयोजनमुक्तं तथापि समानाश्रयत्वप्रतिपत्तेः किं फलमिति प्रश्नावसरोस्त्येव। 'पपुष इति'। पा पाने, 'आतो लोप इटि च'। 'चिच्युष इति'। चिञ् चयने, 'एरनेकाच' इति यणादेशः। 'लुलुविषइति'। लूञ् छेदने, कथं पुनरत्र व्याश्रयत्वमित्याह। 'आलोपादीनि हीति'। नन्वेवमपि नैवात्राल्लोपादीनि सिध्यन्ति, अन्तरङ्गाणि हि तानि, अन्तर्भूतस-

म्प्रसारणापेक्षत्वात्, बहिरङ्गं सम्प्रसारणं, बहिर्भूतविभक्त्यपेक्षत्वात्, ततः किम्, असिद्धं बहिरङ्गमन्तरङ्गे, तत्राह । 'असिद्धं बहिरङ्गमन्तरङ्ग इत्यादि'। 'एतदिति'। वचनापेक्षं नपुंसकत्वं, किमिति न प्रवर्त्तते ऽत आह । 'एषा हीति'। 'आ भाच्छास्त्रीयेति'। वाह ऊडित्यत्र ज्ञापितत्वात्, ततः किमित्याह । 'तस्यामिति'। अन्तरङ्गबहिरङ्गयोर्युगपत्सन्निधानं नास्तीति, परिभाषया सह यौगपद्यमेष्टव्यं, परिभाषासन्निधावन्तरङ्गबहिरङ्गयोरवस्थानाभावादित्यर्थः । वसुसम्प्रसारणं चैकं परिभाषाया आल्लोपादीनां चाश्रय इति समानाश्रयत्वमप्यस्ति, एतच्च नाजानन्तर्यइत्यनाश्रित्योक्तम्, आल्लोपादयो ह्यचोरानन्तर्यमाश्रित्य प्राप्नुवन्ति । 'वुग्युटाविति'। तत्र युटा तावत्सिद्धत्वं न वक्तव्यं, युड्विधानसामर्थ्यात् यण् न भविष्यति, तत्र यकारद्वयश्रवणार्थं युड्विधानं, यणो मयो द्वे भवत इति द्विर्वचनविधानात्, 'हलो यमां यमि लोप'इति पक्षे लोपविधानाच्च पक्षे यकारद्वयश्रवणस्य सिद्धत्वात्, वुको ऽपि सिद्धत्वं न वक्तव्यं, कथं नाप्राप्ते उवङ्यारभ्यमाणो वुक् तस्यापवादो भविष्यति । ननु च बाधकप्रवृत्तिवेलायां यद्विरुध्यते तद्बाधकेन निवर्त्तितं न प्रवर्त्तते, उवङ्निरवकाशे वुकि प्रवर्त्तमाने ऽसिद्धत्वात्स्वमात्मानमदर्शयच्छक्यो बाधितुमिति वुकि कृते तस्यासिद्धत्वात्स्यादेव, एवं तर्हि वुङ् करिष्यते, भुवो लुङ्लिटोरुदुपधाया इति सूत्रमस्तु, तत्र च 'ओः सुपी'त्यत ओरित्यनुवर्त्तिष्यते, तेन भुवोङ्गस्योपधाया उकारस्य ऊद्भवतीत्याश्रयणे उवङि कृतऊकारो भविष्यति, यद्येवं बभूव बभूविथेति गुणवृद्ध्योरवावोश्च कृतयोरुवर्णउपधा न भवतीत्यूत्वं न स्यात्, तत्रापीन्धिभवतिभ्यां चेति पितोऽपि लिटः कित्त्वाद्गुणवृद्ध्योरभावे उवङि ऊद्भविष्यति, यद्येवमिन्धिभवतिभ्यां चेति सूत्रं कर्त्तव्यं स्यात्, वुकि पुनः क्रियमाणे इन्धेश्छन्दोविषयत्वाद्भुवो वुको नित्यत्वादिति न्यायात्तच्च कर्त्तव्यं भवति, अवश्यं च वुको नित्यत्वमाश्रित्य बभूवेति साधयितव्यम्, अन्यथा ऽचो ञ्णितीत्यत्रैक इत्यनुपस्थानादनिग्लक्षणा वृद्धिः स्यादेव, एवं तर्हि नार्थो वुका नापि कित्त्वेन, ओः सुपीत्यत्रावर्णमपि प्रश्लिष्यते, अकारो-

कारयोराद्गुणे कृते ङसिङसोश्चेति पूर्वैकादेशेन निर्द्देशात्, तेन बभूविथेति गुणवृद्ध्योरवावोश्च कृतयोरवर्णस्याप्युपधाया ऊङ्भविष्यति, बभूवतुरित्यादावुवङि कृते उवर्णस्यापि, यद्येवमोः सुपीत्यवर्णस्यापि निर्द्देशात्कीलालपः पश्येत्यादावपि यण् स्यात्, परत्वादातो धातोरिति लोपो बाधको भविष्यति, लोपस्यावकाशः संयोगपूर्वाकारान्तो धातुः, अकारप्रश्लेषस्योत्तरत्रावकाशः, बभूव, बभूविथ, कीलालपः पश्येत्यत्रोभयप्रसङ्गे परत्वादाकारलोपः, विप्रतिषेधे ह्यसिद्धत्वं नास्तीति ज्ञापयिष्यते। एवमपि कीलालपौ सर्वनामस्थाने भसञ्ज्ञाया अभावादाकारलोपाप्रसङ्गाद्यण् स्यात्, एवं तर्ह्योः सुपीत्यत्राचि श्नुधात्वित्यतो य्वोरित्यनुवर्त्तिष्यते, ततश्चाकारोकारसमुदायनिर्द्देशेपि य्वोरित्यनेन विशेषणसामर्थ्यादुकारस्यैव यण् भविष्यति न त्ववर्णस्येति, सामर्थ्यादवर्णग्रहणमुत्तरार्थमेव सम्पद्यते, तदेवं सत्यप्यस्मिन्योगे वुग्युटोः सिद्धत्वं न वक्तव्यमिति भाष्ये स्थितम्। ये त्वाहुः, भुवो वुग्लुङ्लिटोरित्यत्र ओरित्यनुवर्त्तनीयम्, उवर्णान्तस्य भुवो वुग्यथा स्यात् बोभाव, बोभविथेति यङ्लुकि पिति लिटि इन्धिभवतिभ्यां चेत्यत्र श्तिपा निर्द्देशादसति कित्त्वे गुणवृद्ध्योः कृतयोरनुवर्णान्तस्य माभूदित्येवमर्थम्, एवं च बभूव बभूविथेत्यत्रापि गुणवृद्ध्योः कृतयोः वुकोऽप्रसंगादनित्यत्वादिन्धिभवतिभ्यां चेति कित्त्वमारम्भणीयं, तत्र च ङिदित्यधिकारात्कित्त्वङित्त्वयोरुभयोरपि विधानाद्बभूवेत्यनिग्लक्षणापि वृद्धिर्न भवति, एष एव च कित्त्वे श्तिपा निर्द्देशं वुकि च तदभावं कुर्वतः सूत्रकारस्याभिप्राय इति तेषां वुकः सिद्धत्वं वक्तव्यमेव, न च वत्करणं स्वाश्रयमपि यथा स्यादिति वुकः सिद्धत्वं लभ्यते, सत्यसति वा वतावतिदेशेष्वातिदेशिकाविरुद्धस्वाश्रयकार्यानिवर्त्तनात्सिद्धत्वासिद्धत्वयोस्तु विरोधात्कथं वतिना सिद्धत्वप्रापणं कथं वा विषयविभागो लभ्येत, स्थानिवदित्यादौ तु वतिमन्तरेण संज्ञा स्यादिति वत्करणमतिदेशार्थं सत् स्वाश्रयप्रतिपत्त्यर्थं वर्ण्यते, एवं तर्हि श्नसोरल्लोप इति तपरकरणाल्लिङ्गात्क्वचित्सिद्धत्वमनुमीयते, तद्धि आस्तामित्यादावाटो मा भूदिति। यदि चेदमसिद्धत्वं नित्यं स्यात् आटोऽसिद्धत्वादेव लोपो न

भविष्यतीति किं तपरकरणेन, वत्करणं तु प्रतिपत्तिलाघवार्थमेव, तथा च 'षत्वतुकोरसिद्धः,' 'गोतोणिदि'त्यादौ वतिमन्तरेणापि परत्र परशब्दप्रयोगादेवातिदेश आश्रितः, तत्रापि चाविरुद्धं स्वाश्रयं भवत्येव। अत्राङ्मर्यादायां यदि स्याद्भाधिकारीयस्यासिद्धत्वं न स्यात्, न चाभाद्ग्रहणं विषयार्थम्, असिद्धवद्भवतस्तु परिज्ञानमधिकारादेवेत्युक्तम्, अतो मर्यादार्थेप्याङि भाधिकारे ऽप्यस्योपस्थानं न विहन्यते, तस्मादेवं वक्तव्यं भाधिकारीये कर्त्तव्ये भाधिकारीयस्य पूर्वस्यैव प्रकरणस्याप्यसिद्धत्वं नोक्तं स्यादिति। सत्यम्। अयमेव दोषः, तत्र सूर्यशेकदिगिति अणि कृते यस्येति लोपः, ङीप्, पुनरणो यस्येतिलोपः, अत्रेदानीं 'सूर्यतिष्ये' ति यलोप इष्यते सौरी बलाकेति, स न प्राप्नोति, भाधिकारीये यलोपे यस्येति लोपस्यासिद्धत्वाभावादकारस्यानुपधात्वात्, स्थानिवद्भावश्च यलोपविधिं प्रति निषिद्धः, तमिमं मर्यादापक्षे दोषं दृष्ट्वाह। 'आ भादित्ययमभिविधावाङिति'। 'भाधिकारेप्यसिद्धवद्भवतीति'। भाधिकारेपि यदवस्थितं तत्रापि कर्त्तव्ये तत्रत्यमन्यच्चासिद्धवद्भवतीत्यर्थः, एवं व्याख्याता वृत्तिः। कानि पुनरस्य योगस्य प्रयोजनानि, इह पादोस्यास्तीति, 'अत इनिठनौ, पादिकः, उदकं वहतीत्यण्, संज्ञायामुदभावः, उदवाहस्यापत्यमत इञ्, औदवाहिः, सारणवारणशब्दाभ्यां ल्युडन्ताभ्यामत इञ्, सारणिः, वारणिः, शातनपातनशब्दाभ्यां टित्त्वान्ङीप्, शातनी, पातनी, स्रंसेर्ध्वंसेर्ण्यन्तादक्कि स्रंस्यते ध्वंस्यते, अत्र यस्येतिलोपे णिलोपे च कृते पद्भाव, ऊठ्, नस्तद्धिते, अल्लोपोनः, अनिदितामित्येते विधयः प्राप्नुवन्ति, लोपस्यासिद्धत्वान्न भवन्ति, तत्र। अचः परस्मिन्निति स्थानिवद्भावेनाप्येतानि सिद्धानि, 'शाहौ' वित्यत्र शास् हाविति पदच्छेदः, शासः शासित्ययमादेशो भवति, किमर्थमिदम्, इत्वबाधनार्थं, ततो हुझल्भ्य इति धित्वं, धि चेति सलोपः, शाधीति सिद्धं, धि सकारे सिचो लोप इति नाश्रीयते, चकाधीत्येव भवितव्यमिति निर्णेष्यते, 'घ्वसोरेद्धावभ्यासलोपश्चे' त्यत्रापि श्नसोरल्लोप इत्यतो विषयार्थमल्लोप इत्यनुवृत्तेरल्लोपविषयत्वं भवदकारस्यैव भविष्यति, ततः पूर्ववद्घ्रस्वसलोपयो-

रेधीति सिद्धम्, इह च कुरु इति कुउहि इति स्थिते हिलुक्च प्राप्नोति गुणश्च, परत्वाद्गुणे कृते 'अत उत्सार्वधातुके' इत्युत्वं च प्राप्नोति हि लुक्च, नित्यत्वाद्धिलुकि कृतेपि सार्वधातुकग्रहणसामर्थ्याद्भूतपूर्वेपि तस्मि-न्नुत्वं सिद्धम्, । 'लुङ्लङ्लृङ्क्ष्वडुदात्त' इत्यत्रोपदेशइत्यनुवृत्तेर्द्धिलकारकनि-र्द्देशाश्रयणाद्वा लुङादिषु लावस्थायामेवाडाटौ भवत इति अकारि ऐक्षी-त्यत्र चिणो लुगिति नित्ये लुकि कृते ऽडाटौ सिद्धौ, एवं चासन्नित्यत्रापि प्रागेव श्नसोरल्लोपादाटि कृते तपरकरणाल्लोपाभावः, एवं चायन्नित्य-त्रापि इणो यणिति यणादेशात्प्रागाटि सति सिद्धमिष्टं, यद्येवम् ऐज्यत औप्यतेति, लङो लावस्थायां यजिवप्योरनजादित्वादटि सति आटश्चेति वृद्धिर्न स्यात्, अत्र परिहारमाडजादीनामित्यत्र वक्ष्यामः । अतो हेरित्यत्र च उतश्च प्रत्ययादित्यतः प्रत्ययग्रहणापकर्षणाज्जहीत्यत्र हन्तेर्जभावे लुङ्न भविष्यति । 'अतो लोप' इत्यत्र चानुदात्तोपदेशेत्यत उपदेशग्रहणानु-वृत्तेरुपदेशे यदकारान्तं तस्य लोप इति गतः गतवानित्यत्रानुनासिकलोपे कृते संप्रत्यकारान्तत्वेपि तदभावः, इहापि तर्हि न स्यात् 'धिन्विकृ-ण्व्योर च' धिनुतः, नोपदेशग्रहणेनाङ्गमभिसम्बध्यते यदङ्गमुपदेशकाले ऽकारान्तमिति, अपि तु आर्द्धधातुकमभिसम्बध्यते, आर्द्धधातुकोपदेशे यदकारान्तमिति, एतदुक्तं भवति यदार्द्धधातुकमुत्पन्नं न मुहूर्त्त-मात्रमप्यनकारान्तात्परं तत्र तदन्तस्य लोप इति धिनुत इत्यत्र चोप्र-त्ययसन्नियोगेनाकारविधानादुप्रत्यय उत्पन्नो न कदा चिदपि अनतः पर इति, इह च मघमस्यास्तीति छन्दसीवनिपौ चेति वनिबन्ताच्छस्, श्वयुवमघोनामिति सम्प्रसारणं, मघ उत् अस् इति स्थिते सम्प्रसारणमाश्रित्य यस्येति लोपः प्राप्तस्तस्यासिद्धत्वान्न भवति, नात्रासिद्धत्वं लभ्यते, व्याश्रयत्वात् शसि सम्प्रसारणं, सम्प्रसारणे यस्येति लोपः, तस्मान्मघ-वच्छब्दोव्युत्पन्नं प्रातिपदिकं, ततश्च तद्धिताभावादेव लोपाभावः, इह च कं स्विद्गर्भं प्रथमं दध्र आप इति, दधातेर्लिटि धा इरे इति स्थिते नित्यत्वाद्दिरयोरे इति छान्दसो रेभावः, लिट् छन्दसि सार्वधातुकमपीति शप्, शपः श्लुः, द्विर्वचनम्, 'ई हल्यघो' रिति प्रतिषेधात्तु 'श्नाभ्यस्तयो-

रात' इति सिद्धो लोपः, घुव्यतिरिक्तेषु माप्रभृतिषु छान्दसत्वाद्यथादर्शनं भविष्यति, इह तर्हि कुर्वः कुर्मः कुर्यादिति, कृउवस् कृउमस् कृउयात् इति स्थिते 'नित्यं करोतेः' 'ये चे'ति लोपश्च प्राप्नोति करोतेर्गुणश्च, तत्रोभयोर्नित्ययोः परत्वाद्गुणे कृते अत उत्सार्वधातुकइत्युत्वं बाधित्वा नित्यत्वादुकारलोपे कृते सार्वधातुकपरउप्रत्यये विधीयमानमुत्वं न स्यात्, न च सार्वधातुकएव परतः शक्यमुत्वं विधातुं, तथाहि सति कुरुत इत्यादौ विकरणव्यवायेपि न स्यात्, क्व तर्हि स्यात् यत्र विकरणस्य लोपः, कुर्यात् कुर्म इत्यादौ, यद्यप्यत्रापि स्थानिवद्भावाद्व्यवधानं तथापि वचनादीदृशं व्यवधानमाश्रीयते, तस्माद्वक्तव्यमिदं प्रयोजनं, न प्रयोजनं, सत्यप्युकारलोपे तस्य स्थानिवद्भावात्प्रत्ययलक्षणेन वा अत उदित्यत्र म्वोर्य इत्यनुवृत्तेर्वा उत्वं भविष्यति। इह तर्हि कारिष्यतइति चिण्वदिटो-सिद्धत्वाण्णिलोपो भवति, अन्यथा अनिटीति प्रतिषेधः स्यात्, तत्र चिण्वदिट् चेति चकारः समुच्चये, इट् च यच्चान्यत्प्राप्नोति, किं चान्यत्प्राप्नोति, णिलोपः, अवश्यं चकारेणैव णिलोपः समुच्चेतव्यः, अन्यथा चिण्वदिटोसिद्धत्वेपि वलादिलक्षणेनेटा सेड्बुद्धिरेव णिलोपशास्त्रस्यास्मिन्विषये वर्त्तत इति लोपो नैव स्यात्, 'चिणोलुगि'त्यत्र चानुदात्तोपदेशेत्यतः क्ङिद्ग्रहणमनुवर्त्य तस्य चिण इति पञ्चम्या षष्ठ्यां प्रकल्पितायां चिण उत्तरस्य क्ङितो लुग्विधीयते, तेनाकारितरामित्यादौ तरपो न भविष्यति, इह तर्हि शुन इति 'श्वयुवमघोना'मिति संप्रसारणे शुअन् अस् संप्रसारणपूर्वत्वं बाधित्वा अल्लोपोन इत्यकारलोपे सति विभक्तेरनुदात्तनिवृत्तिस्वरः प्राप्नोति, कृतेस्मिन्योगे संप्रसारणस्यासिद्धत्वान्न संयोगाद्वमन्तादिति प्रतिषेधादल्लोपे ऽसति संप्रसारणपूर्वत्वे सति एकादेश उदात्तेनोदात्तइत्याद्युदात्तं पदं भवति, नात्राल्लोपे सत्युदात्तनिवृत्तिस्वरस्य प्रसंगो 'न गोश्वन्सावर्ण'ति प्रतिषेधात्, नैष उदात्तनिवृत्तिस्वरस्य प्रतिषेधः, कस्य तर्हि, तृतीयादिस्वरस्य, स च श्वभ्यां श्वभिरिति हलादौ विभक्तावुदात्तलोपाभावे चरितार्थः, एवं तर्हि न लक्षणप्रतिषेधं शिष्मः, किं तर्हि येन केन चित्प्राप्तस्य तृतीयादिस्वरस्य, यत्र तर्हि तृतीयादिर्नास्ति शुनः पश्येति,

तत्रोदात्तनिवृत्तिस्वरः प्राप्नोति, एवं तर्हि तृतीयादिग्रहणमपि निवर्त्तिष्यते, अविशेषेण विभक्तिस्वरमात्रस्य प्रतिषेधः, ज्ञापकाद्वा सिद्धं, यदयं श्वन्शब्दं गौरादिषु पठति तज्ज्ञापयति नोदात्तनिवृत्तिस्वरः शुन्यवतरतीति । एवमपि विद्यते विशेषः, अल्लोपेन वा निवृत्तौ सत्यां पूर्वत्वेन वा अल्लोपे सति बहवः श्वानो यस्यामिति बहुव्रीहेरुपधालोपित्वाद 'न उपधालोपिन' इति ङीपा भाव्यं बहुशुनीति, तदभावे तु बहुश्वेति भवति, गौरादिङीषोप्यनुपसर्जनाधिकारादत्राप्रसङ्गः, किञ्च ज्ञापकात्सामान्येन वा निषेधादुदात्तनिवृत्तिस्वराभावेपि कथमाद्युदात्तं पदं भवति, नह्यल्लोपे सत्येकादेशस्वरोस्ति, ततश्च सर्वानुदात्तं पदं स्यात्, तदेतद्भवति प्रयोजनं, न प्रयोजनम्, अन्तरङ्गत्वात्पूर्वत्वं भवति, न च वार्णादाङ्गस्य बलीयस्त्वं, व्याश्रयत्वात्, विभक्तिरल्लोपस्य निमित्तं, पूर्वत्वस्य तु श्वन्शब्दाकारः, इह तर्हि भूयानिति भूभावस्यासिद्धत्वादोर्गुणो न भवेदिति, दीर्घोच्चारणसामर्थ्याच्च भविष्यति, अस्ति दीर्घोच्चारणे प्रयोजनं, किम्भूम्नेति, निपातनादप्येतत्सिद्धमुत्तरपदभूम्नीति, इदं च सूर्येणैकदिक् सौरी बलाकेति द्वयोरकारयोर्यस्येति लोपेपि वचनसामर्थ्याद्भूतपूर्वगत्योपधाश्रयणाल्लोपो भविष्यति, तदेवं न सन्ति प्रयोजनानि, प्रतिपत्तिगौरवपरिहारार्थं सूत्रमारब्धम् ॥

"श्नान्न लोपः" ॥ नेति पृथक्पदं लुप्तषष्ठीकं, तेनोत्तरत्रोपधाग्रहणेन नकारो विशेष्यते । 'श्नमयमुत्सृष्टमकारो गृह्यतइति' । अन्यस्य श्नस्यासंभवात् । 'अनक्तीति' । अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु, भञ्जो आमर्द्दने, हिसि हिंसायां, शकारवतोग्रहणं किम् । इह माभूत् नन्दिता नन्दकः, एवं वक्ष्यामि नाल्लोपोऽनिदितामिति, ततो हल उपधायाः क्ङितीति, अनिदितामित्येव, इहापि न स्यात् हिनस्तीति, पामादिभ्यो नः, अस्य च ग्रहणं स्यात्, एवं तर्हि क्ङितीति वर्त्तते, सत्सप्तमी चैषा क्ङिति सतीति, तेन हिनस्तीत्यत्र तिपः पित्त्वादङित्त्वेपि श्नममेव ङितमाश्रित्य लोपो भविष्यति, इहापि तर्हि प्राप्नोति नन्दमान इति, चानशो ङित्त्वात्, एवं तर्हि नशब्दमेव क्ङित्त्वेन विशेषयिष्यामः,

क्ङिती नशब्दादिति, तस्मान्नाल्लोप इति वक्तव्यमिति पृच्छति । 'शकारवतो ग्रहणं किमिति' । 'यज्ञानामिति' । यजयाचेत्यादिना नङ्, श्चुत्वं, तस्यासिद्धत्वान्नशब्द एवायम्, ननु यद्यपि नामि दीर्घादयं लोपः परः, सुपि चेत्येतद्दीर्घत्वमस्मात्परं तत्र कृते नादिति व्यपदेशाभावादेव लोपो न भविष्यत्यत आह 'सुपि चेत्यादि' । 'स्थानिवद्भावादिति' । पूर्वस्मादपि विधौ स्थानिवद्भावात् । अथ गृह्यमाणेपि शकारवतो ग्रहणे विश्नानां प्रश्नानामित्यत्र कस्मान्न भवति । ननु संप्रति श्नरूपत्वादत्रैव प्राप्नोति अत आह । 'विश्नानामिति' । अत्र संग्रहश्लोकः ॥

नान्नस्यायं विधेयो ननु लुबनिदितां नन्दिता चापि सिध्ये-
द्धिंसेर्न प्राप्तिरेवं क्ङिति सति तु तथा नन्दमानो न सिद्ध्येत् ।
क्ङिच्चाच्चेच्चाथ यत्नाद्बहुवचनविधौ दुष्यति स्थानिवत्त्वा-
द्विश्नानां लक्षणोक्तप्रतिपदवचनात्सिद्ध एवेत्यदोषः ॥

लोपनं लुप्, लोप इत्यर्थः । राल्लोप इति प्रकृते लोपग्रहणं विस्पष्टार्थम् ॥

"अनिदितां हल उपधायाः क्ङिति" ॥ इकार इत्संज्ञको येषां ते इदितः, ततोन्ये ऽनिदितः, तेषां विशेषणं हल इति, व्यत्ययेन त्वेकवचनम् । 'सनीस्रंस्यतइति' । नीग्वञ्चुस्रंस्वित्यादिना ऽभ्यासस्य नीगागमः । 'नानन्द्यतइति' । टुणदि संमृद्धौ, यङ्, दीर्घोकितः । 'नह्यतइति' । कित्परत्वेन नकारो विशेष्यते, येन नाव्यवधानमित्येकेन व्यवधानमाश्रीयतइत्येतत्तु दुर्ज्ञानमिति भावः । 'लगिकम्प्योरिति' । इदित्त्वाद्वचनं, कृच्छ्रप्राप्तिरत्रोपतापो न रोगः, शरीरविकारइत्येव सिद्धत्वात्, शरीरविकारोत्र व्याधिरुच्यते, न स्वाभाविकः स्थौल्यादिः । 'विलगितः विकम्पितइति' । गत्यर्थाकर्मकेत्यादिना कर्त्तरि क्तः । 'मित्त्वादुपधाह्रस्वत्वमिति' । एतदेव मित्त्ववचनं ज्ञापकं रञ्जेरक्ङित्यप्युपधालोपो भवतीति । 'रजकरजनरजःसूपसंख्यानमिति' । कित्त्वात्सिद्धं, कित एते औणादिकाः प्रत्ययाः, 'क्वुन् शिल्पिसंज्ञयोः' । रजकः, पुंयोगान्ङीष्, रजकी, अपुंयोगे तु नैव ङीषा भवितव्यं, रञ्जेः क्युन्, रजनः, स च बाहुलकात्क्वित्, रजनी, भूरञ्जिभ्यां किच्चेत्यसुन्, शिरः, रजः ॥

"दंशसञ्जस्वञ्जां शपि" ॥ 'परिष्वजतइति'। ष्वञ्ज परिष्वङ्गे, अनुदात्तेत्, उपसर्गात्सुनोतीत्यादिना षत्वम् ॥

"रञ्जेश्च" ॥ 'पृथग्योगकरणमुत्तरार्थमिति'। उत्तरत्र रञ्जेरेवा- नुवृत्तिर्यथा स्यात् दंशिप्रभृतीनां माभूत् ॥

"घञि च भावकरणयोः" ॥ 'राग इति'। 'हलश्चे'ति करणाधिकरणयोर्घञ्, चजोः कुघिण्ण्यतोरिति कुत्वम् ॥

"स्यदो जवे" ॥ जवो वेगः। 'गोस्यदइति'। गोर्गतिविषयो वेग इत्यर्थः। 'तैलस्यन्दइति'। तैलस्य स्रवणमित्यर्थः ॥

"अवोदैधौद्मप्रश्रथहिमश्रथाः" ॥ उन्दी क्लेदने, इन्धी दीप्तौ, श्रन्थ मोचनहर्षयोः ॥

"नाञ्चेः पूजायाम्" ॥ उदाहरणे मतिबुद्धिपूजार्थेत्यादिना वर्त्तमाने क्तः, 'क्तस्य च वर्त्तमान' इति कर्त्तरि षष्ठी, अथ नाञ्चेरिटीत्येव कस्मान्नोक्तं, नैवं शक्यं वक्तुम्, इह हि न स्यात्, समञ्चते गुरुः, गुरुं सम- ञ्च्यागत इति, इड्विधौ वृत्तिकारो वक्ष्यति, निष्ठायां यस्य विभाषेतिप्र- तिषेधे प्राप्ते क्त्वायां, तथा 'उदितो वे'ति विकल्पे प्राप्ते पूजायां नित्य- मिड्विधीयते इति तेन गुरुमङ्क्त्वेति पूजायामसाधुरेव ॥

"क्त्वि स्कन्दिस्यन्दोः" ॥ 'न क्त्वा सेडिति कित्त्वप्रतिषेधादे- वेति'। तेन सेटः क्त्वाप्रत्ययस्योदाहरणं न प्रदर्शितमिति भावः ॥

"जान्तनशां विभाषा" ॥ मक्त्वा मङ्क्त्वा, नष्ट्वा नंष्ट्वा, 'मस्जिन- शोर्झली'ति नुम्। अन्तग्रहणं विस्पष्टार्थं, वर्णग्रहणादेव तदन्तविधि- लाभात् ॥

"शास इदङ्हलोः" ॥ अङ्गाक्षिप्तस्य प्रत्ययस्य हला विशेषणात्तदा- दिविधिरित्याह। 'हलादौ च क्ङितीति'। 'क्वौ च शास इति'। नित्यत्वा- त्क्विपो लोपे हलादेरभावाद्वचनं,प्रत्ययलक्षणेन तु सिद्धं, यत्र कार्यं वर्णरूपमेव निमित्तत्वेनाश्रीयते तद्वर्णाश्रयत्वात्प्रत्ययलक्षणेन न भवति यथा रायः कुलं

रैकुलमित्यायादेशः, यत्तु वर्णविशिष्टप्रत्ययनिमित्तं तद्भवत्येव, यथा अनृणेडिति, हलादौ पिति सार्वधातुके विधीयमानस्तृणह इमागमः, इदमपीत्वं हलादौ क्ङिति प्रत्यये विधीयमानं लोपेऽपि भवति । 'आशीरिति' । सकारस्य रुत्वे 'र्वोरुपधाया' इति दीर्घः । अथाशास्ते आशास्यमान इत्यत्र कस्मान्न भवतीत्याह । 'यस्माच्छासेरिति' । अङ्विधौ तावत्परस्मैपदिभ्यामर्त्तिसर्तिभ्यां साहचर्यात्परस्मैपदिनः शासेर्ग्रहणम्, इहाप्यङ्संसर्गाद्विशिष्टस्य शासेर्ग्रहणं संसर्गस्य विशेषावगतिहेतुत्वात्, यथा सवत्सा धेनुरानीयतां सकलभा सकिशोरेति गवादिर्धेनुः प्रतीयते, ननु च नात्राङ् केवलो निमित्तमपि तु हलादिरपि, स चात्मनेपदिनोऽपि संभवति तत्कृतः संसर्गाद्विशिष्टस्य प्रतीतिः । नैष दोषः । साधारणासाधारणसंबन्धिसंनिपाते यस्यासाधारणः संबन्धी संनिहितस्तस्यैव ग्रहणं भवति, यथा वृद्धानां किशोरीणां च मध्ये धेनवो बध्यन्तामित्युक्ते बडवा धेनवो बध्यन्ते, तस्मादङ्हलोर्द्वयोरप्युपादाने यस्माच्छासेरङ् विहितस्तस्यैव ग्रहणं, 'शासिवसिघसीनां चे'ति षत्वविधौ शासिमात्रस्य ग्रहणं द्रष्टव्यं, आशिषि लिङ्लोटा वित्यादिनिर्देशात् ॥

"शा हौ" ॥ 'उपधाया इति निवृत्तमिति' । तद्ध्युपधाग्रहणं क्ङितीत्यनेन संबद्धम्, इह च क्ङिद्ग्रहणं निवृत्तमिति वक्ष्यति, तेन तत्संबद्धमुपधाग्रहणं च निवृत्तम् । 'स्थानेयोगा षष्ठी भवतीति' । एतच्च शब्दाधिकारपक्षस्याश्रयणाल्लभ्यते, अर्थाधिकारे त्विहाप्यवयवसंबन्धा[२]न्न सर्वस्य स्यात् । 'क्ङितीत्यपि निवृत्तमिति' । उत्तरत्र पुनः क्ङिद्ग्रहणात् । 'तेनेति' । अन्यथा सार्वधातुकमपिदिति वचनात्पित्त्वपक्षे ङित्त्वाभावाच्छाभावो न स्यात्, माभूत्पित्त्वपक्षे, दृश्यमानस्तु प्रयोगोऽपित्त्वपक्षेऽप्युपपद्यते ऽत आह । 'शाधीत्याद्युदात्तमपीति' । यदि तु पिति शाभावो न स्यात् तदा शाधीत्येतत्सति शिष्टेन प्रत्ययस्वरेणा-

१ स्मतीति इं॰ पु॰ पा॰ ।
२ संबन्धं एव स्यादिति इं॰ पु॰ पा॰ ।

न्तोदात्त एव स्यात्. आद्युदात्तमपि दृश्यते, तस्मात्पित्त्यपि शाभाव एव द्रष्टव्यः, इहाहाविति वक्तव्यम्, उपधाया इत्येव, आकारस्याकारवचनमित्त्वबाधनार्थं, ततो हुझल्भ्यो हेर्धिरिति धित्वं, 'धि चे'ति सकारलोपः, येषां तु धि सकारे सिचो लोप इति पक्षस्तेषां शाभाव एव विधेयोऽन्यथा उपधाया इत्यस्य निवृत्तावपि सकारस्याकारे तस्यासिद्धत्वाद्धयपि धित्वं लभ्यते, उपधायास्तु पूर्वणत्वमाशङ्कितविरोधात्[1] ॥

"हन्तेर्जः" ॥ श्तिपा निर्देशो यङ्लुङ्निवृत्त्यर्थः ॥

"अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति" ॥ उपदिश्यन्तइत्युपदेशाः, अनुदात्ताश्च ते उपदेशाश्च, उपदिश्यमानावस्थायामनुदात्ता इत्यर्थः । अनुनासिकेति पृथक्पदं लुप्तषष्ठीकमनुदात्तोपदेशानां विशेषणं, तेन तदन्तविधिः । 'यमिरमीत्यादि' । यमिर्यमन्तेष्विति श्लोको वक्ष्यते । 'वनतेरिति' । वन षण संभक्तौ । 'सनोतेरात्वं वक्ष्यतीति' । 'जनसनखनां सञ्झलोरित्यनेन । अतत अतथा इति । 'तनादिभ्यस्तथासो'रिति सिचो लुक् । 'इह च यथा स्यादिति' । अन्यथा क्तिनि नित्स्वरेण संप्रत्युदात्तत्वान्न स्यात् । 'इह च मा भूदिति' । अन्यथा प्रत्ययस्वरे कृते शेषनिघाते संप्रत्यनुदात्तत्वाच्छान्तइत्यादावपि स्यात् ॥

"गमः क्वौ" ॥ 'अध्वगत इति' । अध्वनो गन्तार इत्यर्थः । अनुनासिकलोपे कृते ह्रस्वस्य तुक् । 'संयदिति' । संपूर्वाद्यमेः क्विप् । 'परीतदिति' । तनोतेः क्विप्, 'नहिवृतिवृषी'त्यादिना पूर्वपदस्य दीर्घः । 'क च्चेति' । चकारादनुनासिकलोपश्च । 'अग्रेगूरिति' अनुनासिकलोपे कृते अकारस्य ऊकारः, क्वचिद् ऊङिति ङकारः पठ्यते, न तस्य प्रयोजनमस्ति, 'ओः सुपी'ति यणादेशो धातुत्वाद्भवति, अग्रेग्वौ, अग्रेग्वः । 'अग्रेभूरिति' । एवं च कृत्वा अचि श्नुधात्वित्यत्र भ्रूग्रहणं न कर्त्तव्यं धातुत्वादेव सिद्धम् ॥

१ अविरोधादिति नास्ति इं० पु० ।

"विड्वनोरनुनासिकस्यात्" ॥ 'अग्रेगा इत्यादि'। यद्यप्यकारविधानेपि सवर्णदीर्घेण सिद्ध्यति, अतो गुण इति पररूपत्वे हि अतोलोपमेव विदध्यात्, ये त्वकारोपधा न भवन्ति तदर्थं दीर्घोच्चारणं घुण घूर्ण भ्रमणे, अन्येभ्योऽपि दृश्यन्त इति वनिप्, घ्वा वा, घूरावा, क्षिणु क्षावा, क्षणु रावा, ओणट अवावा ॥

"जनसनखनां सञ्झलोः" ॥ झल्शब्देनात्र झलादिर्गृह्यते, अङ्गेनाक्षिप्तस्य प्रत्ययस्य झला विशेषणात्, क्ङिद्ग्रहणं तस्य विशेषणं, प्रकृतं तु झल्ग्रहणं सनो विशेषणम्। 'तदिहेति'। वाक्योपन्यासे। 'विप्रतिषेधादिति'। सनोतेस्तनोत्यादिपाठस्यावकाशोऽन्यत्तनादि कार्यं, 'तनादिकृञ्भ्य उः,' 'तनादिभ्यस्तथासो'रिति, इह त्वात्वविधौ सन्ग्रहणस्यावकाशः सन्, सिषासति, स्यतः सातवानित्यत्रोभयप्रसङ्गे परत्वादात्वं भवति। ननु चासिद्धकाण्डे वक्ष्यति, पूर्वत्रासिद्धे नास्ति विप्रषेधोऽभावादुत्तरस्येति, यत्र किलैकस्याप्यसिद्धत्वे विप्रषेधाभावस्तत्र का कथा द्वयोरप्यसिद्धत्वइत्यत आह। 'घुमास्थागापाजहातीत्यादि'। 'विप्रतिषेधो भवतीति'। विप्रतिषेधेन व्यवस्थायां क्रियमाणायामसिद्धत्वं न भवतीत्यर्थः। कथं कृत्वा ज्ञापकं, हल्ग्रहणस्यैतत्प्रयोजनं हलादौ यथा स्यादिह माभूत् गोदः कम्बलद इति, यदि चात्र विप्रतिषेधो न स्याद्धल्ग्रहणमनर्थकं स्यात्, अस्त्वत्रेत्वं, तस्यासिद्धत्वादियङादेशे असत्याल्लोपे तत्सिद्धं स्यात्, सति विप्रतिषेधे आल्लोपस्यावकाशः पार्ष्णित्रमङ्गुलित्रमिति, ईत्वस्य दीयते मीयते, गोदइत्यादावर्साति हल्ग्रहणे परत्वादीत्वं स्यादिति हल्ग्रहणमर्थवद्भवति। नैतदस्ति ज्ञापकं, व्यवस्थार्थमेतत्स्यात्, असति हि तस्मिन्नीत्वस्यासिद्धत्वादाल्लोपः, तस्यासिद्धत्वादीत्वमिति चक्रकमव्यवस्था प्राप्नोति, नास्ति चक्रकप्रसङ्गः, नह्यव्यवस्थाकारिणा शास्त्रेण भवितव्यं, शास्त्रतो नाम व्यवस्था, तत्र पूर्वमीत्वं तस्यासिद्धत्वादाल्लोपः, लोपेनावस्थानं भविष्यति, एवमपि कुत एतत् ईत्वास्यासिद्धत्वादाल्लोपः, लोपेनावस्थानमिति, न पुनर्विपर्ययः स्यात्, पूर्वमाल्लोपः, तस्यासिद्धत्वादीत्वमीत्वेन व्यवस्थानमिति। एवन्तर्हि यदि व्यव-

स्यार्थमेतत्स्याच्चैवायं हल्ग्रहणं कुर्वीत, अविशेषेणायमीत्वं कृत्वा तस्याजादौ लोपमवादं विदधीत, कथ,मिदमस्ति आतो लोप इटि च, ततो घुमास्थागापाजहातिसां लोपो भवति इटि चाजादौ च क्ङितीति, किमर्थं पुनरिदमित्वं, वक्ष्यति तस्य बाधनार्थं तत्, ईद्यति घ्वादीनां, तत एर्लिङि, वान्यस्य संयोगादेः, न ल्यपि, मयतेरिदन्यतरस्यां, ततो यति च, यति च ईद्भवति, आत इत्येव, सोयमेवं लघीयसा न्यासेन सिद्धे सति यति यद्धल्ग्रहणं करोति तद्गरीयांसं यत्नं मारभते, तज्ज्ञापयत्याचार्यो भवतीह विप्रतिषेध इति, इह झल्ग्रहणं शक्यमकर्त्तुं, कथं योगविभागः कर्त्तव्यः, जनसनखनामनुनासिकस्याकारादेशो भवति, झलि क्ङिति, ततः सनि च, जनसनखनामाकारादेशो भवति झलीत्येव ॥

"ये विभाषा" ॥ 'जायतइति'। यक्। 'नित्यं जादेशो भवतीति'। तस्यानवकाशत्वात्, तेन श्यनि जायतइत्येव भवति न तु कदाचिज्जन्यतइति ॥

"सनः क्तिचि लोपश्चास्यान्यतरस्याम्" ॥ अस्यग्रहणमनन्तरस्य क्तिचो मा भूद्व्यवहितस्यापि धातोरेव यथा स्यात्, क्रियमाणे हि तस्मिन्कार्यित्वेन प्राधान्याद्व्यवहितस्यापि धातोरेव परामर्शो भवति। अन्यतरस्यांग्रहणमनर्थकं, विभाषेति प्रकृतत्वादत आह । 'अन्यतरस्यांग्रहणमिति'। ननु नैतद्विस्पष्टनीयं प्रकृतमनुवर्त्ततइति, तदाह । 'ये संबद्धं हीति' ॥

"आर्द्धधातुके" ॥ 'चिकीर्षितेति'। सनन्तात्तृच् भवतीति सर्वत्रातो लोपे कृते अतो दीर्घो यञीत्यस्य कोवकाशः, वचनात्पचाव इत्यादौ लोपं बाधित्वा दीर्घोस्तु, तत्र चरितार्थमदुपदेशाल्लसर्वधातुकानुदात्तत्वमिति तदपि न ज्ञापकं सार्वधातुके ऽतो लोपाभावस्य, यत्तर्ह्यदिप्रभृतिभ्यः शपो लुकं शास्ति तज्ज्ञापयति न शपो ऽतो लोप इति, तत्राह । 'अदिप्रभृतिभ्यः शप इति'। ये तर्हि न गुणवृद्धिभाजोऽदि[1]प्रभृतयस्तेषामदादिषु पाठोनर्थकः, सत्यम् । बृहत्त्वं वृत्ततेत्यादावतो लोपे आर्द्धधातु-

१ अदिहनियावेति इं॰ पु॰ पा॰ ।

काधिकारस्य प्रयोजनं, बेभिद्यते इत्यत्र शपि सार्वधातुके न भवति, यङो यकारोपदेशस्तु हलन्तेषु चरितार्थः । 'कायतीति' । णिज्विधानं प्रत्ययलक्षणार्थमियङर्थं च स्यात् । 'यान्तीति' । ननु 'श्नाभ्यस्तयोरात' इत्येवियमार्थं भविष्यति सार्वधातुके श्नाभ्यस्तयोरेवेति । नैतदस्ति । विपरीतोऽपि नियमस्स्यात् श्नाभ्यस्तयोः सार्वधातुकएवेति, तदा च ययतुरित्यादौ न स्यात्, श्नाग्रहणं तूत्तरार्थं स्यात् । 'अदातामिति' । लुङ्, गातिस्थाघ्वित्यादिना सिचो लुक् । 'चिण्वद्भावे सति वृद्धिः स्यादिति' । नन्वतो लोपो वृद्धेः पूर्वविप्रतिषेधेन, तद्यथा चिकीर्षकइति, अदिहनिमावाप्रभृतिभ्यः शपो लुग्विधानेन सार्वधातुकेतो- लोपाभावस्य ज्ञापितत्वात्स्वाश्रयोतो लोपो माभूच्चिण्वद्भावात्तु चिणि तस्य दर्शनात्स्यादेव, वृत्तिकारेण तु प्राप्तिमात्रमाश्रित्य वृद्धिः स्यादित्युक्तं, दोषोपलक्षणं वा वृद्धिग्रहणं, लोपेपि रूपासिद्धिरेव । 'ततो युक् प्रसज्येतेति' । आद्गुणस्तु वार्णत्वाच्च लभ्यते, इट्प्रसङ्गस्तु विशेषा- भावान्नोक्तः, प्रयोजनसंग्रहश्लोको गतार्थः । 'भ्रस्जोरोपधयोरमन्यतरस्यां,' 'दीङोयुडचि क्ङिती' त्यत्र तु नास्य प्रयोजनं, कथं, भृज्जतेः सार्वधातुके तुदादित्वाच्छः, तत्र ग्रहिज्यादिसूत्रेण संप्रसारणं, दीङोपि दिवादित्वान् श्यना भाव्यमित्युक्तान्येव प्रयोजनानि ।

असिद्धत्वनिवृत्त्यर्थं द्वितीयाध्यायगोचराः ।
आदेशा नेह विहिता, वुगाल्लोपौ प्रयोजनम् ॥

अन्यथा

अस्त्यादेशस्य भवतेरसिद्धत्वाच्च वुग्भवेत् ।
न चाचख्युतुरित्यादावाल्लोपः ख्याञसिद्धितः ॥

"भ्रस्जो रोपधयोरमन्यतरस्याम्" ॥ रमित्ययं रोपधयोर्यदि स्थाने भवति मित्त्वमस्यानर्थकं स्यात्, अथाचोन्त्यात्पर आगमो रोपधयोः श्रवणं प्राप्नोति तत्राह । 'रोपधयोरिति' । 'स्थानषष्ठीनिर्देशादिति' । रोपधयोरिति तावत्स्थानषष्ठी, स्थानं च प्रसङ्गः, रोपधयोः प्रसङ्गे रम् प्रयुज्यते, रोपधे न प्रयुज्येते इत्यर्थः । प्रयुज्यमानश्च रम् मित्त्वादन्त्या-

[*Page* 284]. In the example 'The sandal paintings, &c.' the suggestive circumstances (*e. g.* the changes in the body of the go-between) may be due to diverse causes, being even here spoken of as caused by bathing, and as such not being restricted to dalliance as the cause, the effects (the marks in the body) are *non-exclusive* (*i. e.* anomalous, having no invariable concomitant, and hence there can be no inference with regard to them, in the absence of an invariable concomitant, in the shape of a cause to which alone the effects, the marks, could be strictly attributed).

The upholder of the "Suggestion-Theory" however attributes suggestiveness to the marks, &c. helped by the words 'mean' and the like. The *meanness*, not being conclusively proved, how can there be an inference (based on it)? It is no fault however to the upholder of the "Suggestion Theory" to assert that by such and such a meaning, such and such a meaning is implied, independently of any such restrictions as invariable concomitance, &c. (That is to say, in this theory the implication of the meaning may be based on mere probability: and as such it is not necessary, in this case, to have the 'meanness, &c.' conclusively proved, in order to be able to suggest the meaning that the go-between had been receiving the embraces of the lover).

Thus ends Chapter V. of the *Kāvya-prakāça* in which are determined the sub-divisions of Poetry Suggestive and those of that of Subordinate Suggestion.

CHAPTER VI.

ON FANCIFUL WORD AND MEANING.

(Having described "Middle-class" Poetry, the author describes Poetry of the Inferior kind).

Fanciful Word and Meaning.

48.—[*Page* 286]. Poetry of two kinds—of Fanciful Word and Meaning—was spoken of above. Among these the Fancy is said to belong to Word or Meaning (as the case may be), on the ground of relative subserviency and predominance.

[*Page* 287]. By this we do not mean that in Fanciful Meaning there is no Fanciful Word, *or vice versa.* Because it is declared: " Metaphor and many others have been said by some to be the Figure (Embellishment); since the face of a woman though beautiful is not charming if devoid of ornaments. Others again assert those Figures, Metaphor, &c., to be merely external, attributing Figure only to the denotations of nouns and verbs; hence they call (Figure) only the charmingness of sound or word; there is no such charm, according to them, in the meaning. We however lay down twofold Figure: With regard both to Word and Meaning."

Fanciful Word.

[*Page* 290.] To exemplify Fanciful Word:—

प्रथमतरुणच्छायस्तावत्ततःकनकप्रभः
तदनु विरहोत्ताम्यत्तन्वीकपोलतलद्युतिः ।
उदयति ततो ध्वान्तध्वंसक्षमः क्षणदामुखे
सरसविसिनीकन्दच्छेदच्छविर्मृगलाञ्छनः ॥

["The moon rises first with a shade of red, then he becomes golden; after that he has the lustre of the cheeks of a slender woman under the pangs of separation; then towards night (as night advances) he has the splendour of a piece of the bulbous root of a fresh lotus-stalk, and is then capable of destroying darkness."

Fanciful Meaning. [*Page* 291.] To exemplify Fanciful Meaning :—

ते दृष्टिमात्रपतिता अपि कस्य नात्र
क्षोभाय पक्ष्मलदृशामलकाः खलाश्च ।
नीचाः सदैव सविलासमलीकलग्ना
ये कालतां कुटिलतामिव न त्यजन्ति ॥

[" Whom do not the locks of woman with fair-lashed eyes, and evil people, agitate (make tremble or disturb)—both of whom low (hanging low, with reference to the lock) and delighting in (beautifully) perjury (hanging on the forehead), never give up their blackness and crookedness (curls with reference to the lock, and fraudulence and dishonesty with regard to the wicked), even though they are only looked upon (and in the case of the *curls, hanging only over the eyes*)"]

[*Page* 292]. Though all poetry ends in Excitant, &c., yet these two kinds of poetry are said to be non-suggestive, since in these *Rasa* is not explicitly manifested. There are many divisions of Figures of Word (Verbal Figures) and Meaning (Sense-Figures), all of which will be treated of under "Figures" (Ch. IX and X).

Thus ends Chapter VI. of the *Kāvya-prakāça* in which are described Fanciful Word and Meaning.

CHAPTER VII.

OF DEFECTS OF POETRY.

Having determined the form of Poetry, the author now lays down the general definition of Blemishes or Defects.

Definition of a *Defect*.

49.—Blemish is the repressor of the principal meaning,—the principal, being the *Rasa* and the Expressed Meaning, as being its substratum (a help); Word, &c. are also that (principal), inasmuch as they are needed both by *Rasa* and the Expressed Meaning.

Repression consists in hindering (or marring) the agreeableness (of poetry).

Word, &c. includes Letters and Sentence.

[*Page* 296]. The Author next states the specific definitions of these various kinds (of defects).

Defects of the Word.

50—51.—A faulty Word is such as (1) unpleasant to the ear (unmelodious), (2) grammatically anomalous, (3) not used (by good poets) *i.e.* unconventional, (4) incapable of giving sense, (5) having its meaning suppressed (by another), (6) having an improper signification, (7) meaningless, (8) inexpressive, (9) threefold indecorous, (10) ambiguous, (11) unintelligible, (12) vulgar, (13) having its meaning such as has to be guessed out; and a faulty Word, when occurring in a compound, is—(14) obscure, (15) having the predicate subordinated or suppressed (non-discriminated), and (16) of repugnant implication, (*i. e.* affording a signification contrary to the one desired to be conveyed).

Examples of the aforesaid defects.

(1)—To exemplify the "*unpleasant to the ear*" (having unmelodious letters).—

[*Page* 298]. "अनङ्गमङ्गलगृहापाङ्गभङ्गितरङ्गितैः ।
आलिङ्गितः स तन्वंग्या कार्त्तार्थ्यं लभते कदा"॥

["When will he have his desires fulfilled on being embraced by the slender-bodied woman, (lovely) through her glances (appearing as if they were) the abode of Cupid"].

Here कार्तार्थ्यम् is unmelodious.

[*Page* 299]. (2)—To exemplify *grammatical anomaly.*—

"एतन्मन्दविपक्व &c .... दीनन्त्वामनुनाथते &c."

[O thou the daughter of the village lord! the elephants being suppliants for the favour of fearlessness, request you not to cover with leaves your breasts,—breasts black, as the interior of the half-ripe Tinduka fruit in the centre and slightly yellowish on the borders, and tangible by the hands of handsome Çabara youths.]

Here in अनुनाथते lies the anomaly. The root नाथ् is used in the आत्मनेपद only when it is used in a benedictive sense as in सर्पिषो नाथते ('may butter be mine'), according to the Sutra "आशिषि नाथः" (Pāṇini II. iii. 15). ["The root नाथ (is used) in (the sense of) benediction"]. In the Sloka however the meaning is "request, or ask a favour, beg, &c., hence the proper reading should be 'अनुनाथति स्तनयुगम्'

[*Page* 302]. (3)—To exemplify '*not used*' (though quite a proper form yet not regarded by poets)—

"यथायं दारुणाचारः......तथा मन्ये दैवतोऽस्य" &c.

["Since this man is always seen to be cruel in his actions therefore I ween that his Superintending Deity is either a ghost or a demon."]

Here though the word दैवत is correct enough in the masculine, yet this form is not used by standard writers (who generally use it in the Neuter).

[*Page* 303]. (4)—To exemplify the one *incapable of giving sense*, (*i. e.* its denotatative power not extending to the sense in which it is used).

"तीर्थान्तरेषु स्नानेन..... हन्ति सम्प्रति सादरम्"

["After having acquired some merit by bathing in other sacred places, he now reverentially repairs to the Celestial River."]

Here (*a*) 'हन्ति' in the sense of 'going' is faulty.

(5)—To exemplify that *of suppressed meaning*—*i. e.* when a word with a double meaning is used in the less known (uncommon) one :—

"यावकरसार्द्रपादप्रहारशोणितकचेन दयितेन"

["The young girl, unsteady through fear, was suddenly kissed by him, who had his locks reddened on account of being hit by her feet painted with अलक्त"].

Here the meaning of the word शोणित, *i. e.* 'reddened' is suppressed by its more common meaning—*blood.*

(6)—To exemplify that of *improper signification.*—

"तपस्विभिर्या सुचिरेण लभ्यते प्रयत्नतः सत्रिभिरिष्यते च या ।
प्रयान्ति तामाशु गतिं यशस्विनो रणाश्वमेधे पशुतामुपागताः" ॥

["The glorious men killed in the sacrifice of battle quickly attain to that condition which is obtained by ascetics after a long time, and which is eagerly looked for by sacrificers."]

[*Page* 305]. Here the word पशु signifies *cowardice* which is improper (as applying to heroic persons).

(7)—To exemplify the *meaningless* (words like 'च' &c. put in to make up the metre).—

"उत्फुल्लकमलकेसर......मम हि गौरि" ।

["O revered Gauri, whose lustre is like that of the dust of the filaments of a full blown lotus! may my desires be fulfilled through your kindness."]

[*Page* 306]. Here the word हि is uselessly put in.

(8)—To exemplify the Inexpressive(*b*) :—

(*a*) Though mentioned in the *Dhātupatha* as meaning 'to go,' the root 'हन्' is incapable of connoting that sense.

(*b*) "Inexpressive" is that which cannot denote the object meant, as possessing the attributes meant to reside therein. It is thus different from the 'Incapable,' whose denotation does extend to a certain portion of the signification. The Inexpressive is of three kinds (1) when the denotation does not extend to the attribute, (2) when it does not extend to the object, and (3) when it does not extend to either. The first is an example of (1).

"अवन्ध्यकोपस्य विहन्तुरापदाम् भवन्ति वश्याः स्वयमेव देहिनः ।
अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः" ॥

[*Kirātārjuniya.*]

["To him who has his wrath unimpeded and who is a remover of evils, to both of these, men submit themselves of their own accord. Of a wrathless (quiet) man on the other hand, even an enemy is not afraid; as people do not honour an ungenerous though a loving friend."]

[*Page* 307]. Here the word जन्तु is used in the sense of a 'non-giver' to which its denotation does not extend.

Or again

"हाधिक् सा किल तामसी शशिमुखीदृष्टामया यत्र सा ।
तद्विच्छेदरुजा ऽन्धकारितमिदं दग्धन्दिनं कल्पितम्" ॥ &c. &c.

["Ah! The time when that moon-faced one was seen by me is (said to have been) Dark (night), and this the present cursed time darkened by the pangs of her separation is said to be (*light*) Day. What should I do? Fate is verily averse to my welfare,—or else why is not the whole universe transformed, for me into that very night?"]

Here दिन means 'full of light' to which its denotation cannot apply.

An example where the signification is changed on account of a prefix—

"जङ्घाकाण्डोरुनालो नखकिरणलसत्केसरालीकरालः
प्रत्यग्रालक्तकाभाप्रसरकिसलयो मञ्जुमञ्जीरभृङ्गः ।
भर्तुर्नृत्तानुकारे जयति निजतनुस्वच्छलावण्यवापी-
सम्भूताम्भोजशोभां विदधदभिनवो दण्डपादो भवान्याः ॥

["Ever glorious is the new *Dandapāda (a)* of Gauri imitating her husband's dance—the Dandapāda (or the legs) bearing the splendour of a lotus grown in the tank of her exquisite

(*a*) The *Sangītaratnākara* thus defines—"The feet raised high is called the Dandapāda."

beauty (the lovely growing sheen of the body)—having for its stalk, the large thighs, for its filaments, the lustre of the nails, for its leaves, the bright Ālakta paintings fringing the feet, and lastly, having the beautiful anklet for the humming bees."]

Here the signification of विदधत् is meant to be transferred to that of दधत्.

[*Page* 310]. (9)—To exemplify the *threefold Indecorous*—according as implying Shame, Disgust or Inauspiciousness—

((*a*) of *Shame*)—

"साधनं सुमहद्यस्य यन्नान्यस्य विलोक्यते ।
तस्य धीशालिनः कोऽन्यः सहेतारालितां भ्रुवम् ॥"

["Whose accomplishments are such as belong to none else,—of this intelligent man who can bear the curved brow (anger)?].

[*Page* 311]. ((*b*) of Disgust)—

"मुग्धा कुड्मलिताननेन ददती वायुं स्थिता तत्र सा" &c., &c.

["He who had his lips marked with the freely bestowed kisses of a strange woman, having been hit (by his wife) with a sportive lotus, stood for sometime rubbing his eyes as if pained by the dusts of the flower falling in them. The young girl also stood puffing air with her budded mouth into his eyes. And she, either through her own mistake or through his cunningness was often kissed by him even without any request, &c., for reconciliation."]

(and (*c*) of Inauspiciousness)—

[*Page* 312]. "मृदुपवनविभिन्नो मत्प्रियाया विनाशात् ।
घनरुचिरकलापो निस्सपत्नोऽद्य यातः ॥"

["By the destruction of my beloved, this dense and lovely peacock train ruffled by mild breeze, is left unrivalled; for in the presence of the hair-braids of that lovely-braided one, slightly ruffled in dalliance, yet interspersed with flowers, whom could the peacock captivate?"]

Among these three साधन, वायु and विनाश respectively signify shame, disgust and inauspiciousness.

पदमत्र कारणापत्तिवाचीत्यत्राह "अनुपक्तस्येति, उत्क्रान्तिवेलायां कारणापत्तिप्रयोजनाभावात् इति भारवाहकस्य देहिनः सभारस्यैव यष्ट्यवष्टम्भेन विश्रमतुल्यः सुषुप्तौ विश्रमः, अपनीतभारस्य विश्रमतुल्यो महाप्रलये, यथा च कञ्चुकोष्णीषवतस्तद्रहितस्य च विश्रमस्तद्वत् कारणे लीनस्य करणकलेवररहितस्य द्विपरार्द्धकाले विश्रम इति प्रयोजनविभागः सुषुप्तिप्रलययोः शरीरान्वयव्यतिरेकाभ्यामवगतस्तदभावादित्यर्थः । अव्यक्तादेः पुनःसृष्टिरुक्ता चेत् कारणापत्तिः प्रयोजनं च कल्प्यं, सा च नास्तीत्याह "पुनस्तत्राव्यक्तादिसृष्ट्यवचनाच्चे"ति, सुषुप्तौ जीवमात्रस्याविभागापत्तिः प्रलय एव विशिष्टस्य लयापत्तिः उत्क्रान्तौ तु भूतसूक्ष्मविशिष्टस्य लयानुपपत्त्या संयोगमात्रमेव विशेष्यांशस्य प्रलय इति चेत् तेजः—शब्दस्य विशेष्यभूतजीवमात्रविषयत्वाभावात् अनुषक्तपदार्थवैरूप्यायोगादिभिश्च, एवं विभागानर्हभूतसूक्ष्मविशिष्टस्य लयानुपपत्त्या प्रयोजनाभावाव्यक्तादिसृष्ट्यवचनाभ्यां च संपत्तिः संयोगः नित्यान्तरवस्थिते ऽपि परमात्मनि तदानीं संसर्गविशेषः शास्त्रैकसमधिगम्य । परे त्विदमधिकरणद्वयं परविद्यानिष्ठविषयं व्याचक्षते तत्र गताः कलाः पञ्चदशप्रतिष्ठा इति प्रतिष्ठा—शब्दवाच्यस्वकारणेषु कलानां लयं पूर्वपक्षीकृत्य षोडशकलाः पुरुषं प्राप्यास्तं गच्छन्तीति श्रुत्या ब्रह्मणि लयः इयं विद्वद्दृष्टिः स्वकारणेषु लयोक्तिस्त्वविद्वद्दृष्ट्या स्यात्स्वकारणेषु लयेऽपि तैः पृथिव्यादिभिः सह ब्रह्मणि लयश्चोपपन्नः इति सिद्धान्तयन्ति प्रथमे ।

सू० पुनस्तत्राव्यक्तादिसृष्ट्यवचनाच्च ॥ अविभागाधिकरणं समाप्तम् ॥

टी० स च ब्रह्मविदः परमात्मनि कलाप्रलयः सावशेषः उत्क्रान्त्यादाविवेति पूर्वपक्षं कृत्वा भिद्येते चासां नामरूपे पुरुष इति वचनादविद्याकल्पितानां विद्यानिमित्तप्रलये सावशेषत्वानुपपत्तेश्च निरवशेषः प्रलय इति द्वितीये सिद्धान्तयन्ति, तत्राद्ये ब्रह्मण्येव लयसमर्थनम्प्रत्यक्ष-

विरुद्धं श्रुतिविरुद्धं च, भस्माद्यवस्थो हि देहः पृथिव्यादिषु लीयमानो दृष्टः, "पृथिव्यप्सु प्रलीयते आपस्तेजसि लीयन्त" इति च श्रुतिः नायमविद्वद्दृष्ट्या लय उच्यते इन्द्रियाणि तन्मात्रेषु तन्मात्राणि भूतादौ लीयन्ते भूतादिर्महति लीयते इत्यादिनोक्तस्य सेन्द्रियाणां तन्मात्रादीनां भूतादिप्रभृतिषु लयस्याविद्वद्दृष्ट्याऽप्यववगतत्वात्सांख्यदृष्टिरियमिति चेत्ततः किं यतः श्रुत्यविरोधः तत्र सांख्यदृष्टेः श्रुतिमूलत्वान्न निराकरणीयता तद्वैक आहुः कुतस्तु खलु सोम्यैवं स्यादितिवत् परमतत्वेनोपन्यस्य श्रुत्यैव निराकृतत्वाभावाच्च नोपेक्ष्यता, पराशराद्युपबृंहणानुगृहीता चेयं श्रुतिः, सर्वस्य तज्जत्वश्रुतिविरोधात् परमतत्वमिति चेन्न सर्वस्य तज्जत्वश्रुतिविरोधेन आकाशाद्वायुरित्याद्युक्तसर्गस्यापि परमतत्वप्रसङ्गात् तत्तदवस्थब्रह्मणः कारणत्वादविरोधश्चेत् लयेऽपि तुल्यम्, अत एव पुरुषं प्राप्यास्तं गच्छन्तीति चोपपन्नम् । एवमद्वारकलयस्य श्रुतिप्रत्यक्षविरोधात् सद्वारकलयस्य सर्वसाधारणतया श्रुतिप्रत्यक्षसिद्धतया ब्रह्मविदो विशेषाभावाच्चाद्याधिकरणवर्णनमयुक्तम् इतरत्र च निरवशेषलयो नाम किं निरवयवविनाशः? उत पृथिवीत्वादिप्रहाणम्? उत मुक्तस्य पुनर्देहारम्भायोग्यत्वम्? उत चेतनान्तरयुक्तस्यापि देहारम्भायोग्यत्वं? न प्रथमः "तदेतदक्षयं नित्यंजगन्मुनिवराखिलम्। आविर्भावतिरोभावजन्मनाशविकल्पव"दिति नित्यत्ववचनात्। नापि द्वितीयः ब्रह्मविद्देहस्यापि भस्मीभावादिदशायां पृथिवीत्वानुवृत्तिदर्शनात् पृथिवीत्वादिप्रहाणस्य समष्टितत्त्वलयदशाभावित्वात् तस्य च प्राकृतप्रलयभावित्वात् नैमित्तिकादिप्रलयेषु पृथिवीत्वादिप्रहाणस्य प्रमाणाभावात् भिद्येते चासां नामरूपे इति श्रुतेर्देवमनुष्यादिनामरूपविषयतया वा प्राकृतप्रलयविषयतया वार्थवत्त्वाच्च । न तृतीयः मुक्तस्यापुनरावृत्तेर्वक्ष्यमाणतया तं प्रति देहारम्भकत्वशङ्काया असम्भवेनाविचार्य्यत्वात् । न चतुर्थः नियामकाभावात्, न हि देवदत्तस्याङ्गुलीयतया परिणतः कनकांशो यज्ञदत्तं प्रति न तथा परिणमतीति नियन्तुं शक्यम्, अतोऽनुपपन्नम् । अपरे तु "तानि परे"इति सूत्रञ्च पृथगधिकरणयन्ति तैश्च सूत्रार्थः परैरिव वर्णितः । तत्रानुपपत्तिश्च

पूर्ववत्, अविभागसूत्रनिर्वाहोऽपि पूर्वोक्तयैव दिशा निरस्तः । अन्ये तु वागादिलयस्यामुख्यत्वादस्वयोनौ लयसम्भवेऽपीह लयस्य मुख्यत्वात्तेजः-प्रभृतिभूतानां स्वयोनिष्विति पूर्वपक्षं कृत्वा तन्त्वादीनां भस्माद्यवस्था-नामस्वयोनौ विनाशदर्शनानुगृहीतात्तेजःपरस्यामिति वचनात् हृदिस्थे परमात्मनि लय इत्याह्वे सिद्धान्तयन्ति । अनन्तरे च स एव मरणे भूत-लयः किं स्थूलभेदे स्थिते वस्त्वन्तरसंश्लेषमात्रम्? उत जीवानामिव स्थूल-भेदनिवृत्त्या सूक्ष्मशक्तिभेदयोगेनैव नीरक्षीरन्यायादविभागप्राप्तिलक्षण इति संशय्य पूर्ववाक्यत्रयानुषक्तस्य सम्पत्तिशब्दस्यात्रानुवृत्त्या संश्लेषमात्रमिति पूर्वपक्षं कृत्वा मरणे भूतेभ्यः समुत्थाय तान्येवानुविनश्यतीति जीववि-नाशदर्शनात्तद्वदविभागापत्तिरिति सिद्धायन्ति भूतानां करणानां च महाप्रलये सूक्ष्मशक्तिभेदोऽपि नावशिष्यते, मरणे तु सोऽविशिष्यते शरीरा-न्तरार्थं तेषां गमनोपपत्तेरिति चाहुः । तत्र तावद्धृदयस्थः परदेवताप्राज्ञात्म-शब्दवाच्यः परमात्मा नामेश्वर एव तत्र लयोमुख्य इत्यनुपपन्नम् । ईश्वरां-शास्य निमित्तकारणत्वात्, अस्वयोनावपि लयो दृष्ट इति चेत् न भस्मा-द्यवस्थतन्त्वादीन्प्रति साक्षादनुपादानत्वेऽपि प्राणाल्योपादानत्वात् पृथि-व्यास्तत्र लय उपपन्नः ईश्वरः प्राणाद्यापि न भूतकरणग्रामोपादानमिति न तत्र मुख्यलयसंभवः । सन्मात्रे लय इति चेन्न तस्य परदेवताप्राज्ञात्म-शब्दवाच्यत्वाभावादंशत्रयव्यतिरेकेण सन्मात्रस्य कस्यचित् घटशरावाद्य-वस्थमृद्वदवस्थानानभ्युपगमाच्च, तस्माल्लय इति सिद्धान्तस्तस्य च मुख्यत्वेऽभ्युपगते सत्यस्वयोनौ परमात्मनि लय इत्यपि अनुपपन्नं, वच-नन्तु वाङ्मनसीतिवदन्यथासिद्धत्वादस्वयोनौ लये प्रमाणं न स्यात्, अनन्तरे चाधिकरणे स्थूलभेदनिवृत्त्या जीववदविभाग इति यत्तन्निरूपणी-यम्भूतकरणानां महाप्रलयवद्विनाशस्तावदनभ्युपगतः लोकान्तरगमनश्रव-णात् सूक्ष्मशक्तिभेदावशेषस्थूलभेदविशेषनिवृत्तिर्नाम किं मनुष्यादिसन्नि-वेशप्रहाणम्? उत पृथिवीत्वादिप्रहाणं? न प्रथमः, संस्थानापगमस्य प्रत्य-क्षतया निरूपणीयत्वाभावात्, न द्वितीयः लोकान्तरगमनानुपपत्तेः, यदि निवृत्तस्थूलाकाराणां परमात्मनि संपत्तिर्निरूप्या सा तु तानि पर इत्यत्र

निरूपितेति निरूपणीयाभावादतिभागाधिकरणानारम्भ एव स्यात् ॥
अविभागाधिकरणं समाप्तम् ॥

तदोकोऽधिकरणम् । **सू० तदोकोऽग्रज्वलनन्तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ॥ १६ ॥**

भा० एवं गत्युपक्रमावधि विद्वदविदुषोः समानाकार उत्क्रान्तिप्रकार उक्तः, इदानीं विदुषो विशेष उच्यते—तचेदमाम्नायते "शतं चैका च हृदयस्य नाड्यस्तासां मूर्द्धानमभिनिःसृतैका तयोर्द्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ती"ति अनया नाडीनां शताधिकया मूर्द्धन्यनाड्यैव विदुषो गमनमन्याभिरेव चाविदुषो गमनमित्ययं नियम उपपद्यते नेति संशयः, किं युक्तं, नियमो नोपपद्यत इति कुतः, नाडीनां भूयस्त्वादतिसूक्ष्मत्वाच्च दुर्विवेचनतया पुरुषेणोपादातुमशक्यत्वात्तयोर्द्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्तीति यादृच्छिकीमुत्क्रान्तिमनुवदतीति युक्तमित्येवं प्राप्ते प्रचक्ष्महे "शताधिकये"ति, विद्वान् शताधिकया मूर्द्धन्ययैव नाड्योत्क्रामति, न चास्या विदुषो दुर्विवेचनत्वं विद्वान् हि परमपुरुषाराधनभूतात्यर्थप्रियविद्यासामर्थ्याद् विद्याशेषभूततयाऽऽत्मनोऽत्यर्थप्रियगत्यनुस्मरणयोगाच्च प्रसन्नेन हार्देन परमपुरुषेणानुगृहीतो भवति, ततश्च तदोकः तस्य जीवस्य स्थानं हृदयमग्रज्वलनं भवति, अग्रे ज्वलनं

प्रकाशनं यस्य तदिदमग्रज्वलनं तत्प्रसादात्—परमपुरुषप्रसादात्प्रकाशितद्वारो विद्वांस्तां नाडीं विजानातीति तया विदुषो गतिरुपपद्यते ॥ तदोकोऽधिकरणं समाप्तम् ॥

टी० सू० तदोकोग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ॥ १६ ॥ अवान्तरसङ्गतिमाह "एव"मिति, उत्क्रान्तौ ब्रह्मणि सम्पत्तेर्विद्वदविदुषोस्तुल्यत्वात् समाना चेत्यादिसूत्रमत्र वक्तव्यं तथा न कृतं, तत्र हेतुर्विदुषोब्रह्मसम्पत्तावविवादः, तत्रेत्यादि किं विदुषो मूर्द्धन्यनाड्यैव गमननियमः सम्भवति? नेति किं ययोर्ध्वमायन्निति यादृच्छिकगमनानुवादः? उत नाडीविशेषेण गमननियमनविधिः? किं नाड्योदुर्विवेचाः? उत सुविवेचाः? दुर्विवेचात्वे यादृच्छिकगत्यनुवादपक्षस्य न्याय्यत्वान्नियमासम्भवः, सुविवेचत्वे नियमविधिपरत्वोपपत्तेर्गतिनियमसम्भवः । परे तु अपरविद्याविषयमिमं विचारमाहुः तत्पूर्ववदयुक्तं तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामतीति इदं वाक्यमत्रापेक्षितं पूर्वत्रोपात्तत्वान्नात्रोदाहृतं तदोकोऽधिकरणं समाप्तम् ॥

रश्म्यनुसाराधिकरणम् । सू० रश्म्यनुसारी ॥ १७ ॥

भा० विदुषो हृदयाच्छताधिकया मूर्द्धन्यनाड्या निर्गतस्यादित्यरश्मीननुसृत्यादित्यमण्डलगतिः श्रूयते । "अथ यत्रैतस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्वमाक्रामत" इति, तच्च रश्म्यनुसारेणैवेत्ययं गतिनियमः सम्भवति नेति चिन्तायां निशि मृतस्य विदुषोरश्म्यनुसारासम्भवादनियमः, वचनं तु पक्षप्राप्तविषयमिति प्राप्ते उच्यते "रश्म्यनुसारी"ति, रश्म्यनुसार्य्येव विद्वानूर्ध्वं गच्छति कुतः, "अथैतैरेव रश्मिभिरित्यवधारणात्, पाक्षिकत्वे

ह्येवकारोऽनर्थकः स्यात् । यदुक्तं हि निशि मृतस्य रश्म्य-सम्भवात् रश्मीननुसृत्य गमनं नोपपद्यत इति तन्न नि-श्यपि सूर्य्यरश्म्यनुसारः सम्भवति, लक्ष्यते हि निश्यपि निदाघसमये औष्ण्योपलब्ध्या रश्मिसद्भावः हैमन्तादौ तु हिमाभिभवाद्दुर्दिन इवोष्मानुपलम्भः, श्रूयते च नाडीर-श्मीनां सर्वदाऽन्योन्यान्वयः,तद्यथा"महापथ आतत उभौ ग्रामौ गच्छतीमं चामुं च एवमेवैत आदित्यस्य रश्मय उभौ लोकौ गच्छन्तीमं चामुञ्च अमुष्मादादित्यात्प्रता-यन्ते त आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः प्रतायन्ते तेऽमुष्मिन्नादित्ये सृप्ता इति, तस्मान्निश्यपि रश्मिसम्भवा-न्निशि मृतानामपि विदुषां रश्म्यनुसारेणैव ब्रह्मप्राप्तिर-स्त्येव ॥ रश्म्यनुसाराधिकरणं समाप्तम् ॥

टी० सू० रश्म्यनुसारी ॥ १७ ॥ अवान्तरसङ्गतिः स्फुटा? किं रश्म्यनुसारेण गमननियमो विदुषः सम्भवति नेति? किं रश्मिभिरूर्द्धमा-क्रामत इति वाक्यं पाक्षिकगमनानुवादकम्? उत नियमविधिपरं? किं निशि प्रेतस्य रश्म्यनुसारेण गमनं सम्भवति नेति? किं निशि रश्मयस्स-म्भवन्ति नेति? न चेन्निशि रश्म्यनुसारसम्भवाच्छ्रुतेः पाक्षिकगत्यनुवाद-कतया नियमासम्भवः, सन्ति चेन्निशि रश्म्यनुसारभवाच्छ्रुतेर्नियमवि-धिपरतया रश्मिभिरेव गतिनियमसम्भवः । पूर्वपक्षमुक्त्वा राद्धान्तमाह "उच्यत"इति, ऊष्मोपलम्भयोग्यरश्मिसद्भावसत्यप्यन्धकारस्थितिरुपपद्यते रश्मीनामल्पत्वात् यथोद्धृताग्नौ प्रदेशे सूक्ष्माग्न्यवयवसंपर्कादौष्ण्योपल-ब्धावपि सूक्ष्माग्न्यवयवैर्न तिमिरं निरस्यते तद्वदिति । नाडीषु सृप्ताः सम्बद्धा इत्यर्थः ॥ रश्म्यनुसाराधिकरणं समाप्तम् ॥

निशाऽधिकरणम् । **सू० निशि नेति चेन्न सम्बन्धस्य यावद्देहभावित्वाद्दर्शयति च ॥ १८ ॥**

सू० इदमिदानीं चिन्त्यते विदुषो निशि मृतस्य ब्रह्मप्राप्तिरस्ति नेति, यद्यपि निशायां सूर्य्यरश्मिसम्भवाद्रश्म्यनुसारेण गतिर्निशायामपि सम्भवति तथाऽपि निशामरणस्य शास्त्रेषु गर्हितत्वात् परमपुरुषार्थलक्षणब्रह्मप्राप्तिर्निशामृतस्य न सम्भवति, शास्त्रेषु दिवामरणं प्रशस्तं विपरीतं निशामरणं, "दिवा च शुक्लपक्षश्च उत्तरायणमेव च । मुमूर्षतां प्रशस्तानि विपरीतं तु गर्हितम्" इति, दिवामरणनिशामरणयोः प्रशस्तत्वविपरीतत्वे चोत्तमाधमगतिहेतुत्वेन स्याताम । अतो निशिमरणधोगतिहेतुत्वान्न ब्रह्मप्राप्तिहेतुरिति चेन्न विदुषः कर्मसम्बन्धस्य यावद्देहभावित्वात् ।

टी० सू० निशि नेति चेन्न सबन्धस्य यावद्देहभावित्वाद्दर्शयति च ॥ १८ ॥ सङ्गतिः स्फुटा किं निशि मृतस्य विदुषो ब्रह्मप्राप्तिः सम्भवति नेति ? किन्निसामरणस्याधोगतिहेतुत्वं निशि मृतस्य ब्रह्मप्राप्त्यभावं ज्ञापयति नेति ? निशामरणानन्दावचनं किं विद्वदविद्वत्साधारण ? मुताद्वद्विषयमिति, साधारणत्वे निशि मरणस्याधोगतिहेतुत्वेन ब्रह्मप्राप्त्यभावावगमात् निशि मृतस्य न ब्रह्मप्राप्तिः, अविद्वद्विषयत्वे निशामरणस्याधोगतिहेतुतया ब्रह्मप्राप्त्यभावानवगमान्निशि मृतस्यापि स्याद् ब्रह्मप्राप्तिः पूर्वपक्षमुक्त्वा राद्धान्तमाह "तन्ने"ति, प्रारब्धकर्मणोऽनेकदेहहेतुत्वसम्भवात् कथं कर्म्मसंबन्धस्य यावद्देहभावित्वं प्रारब्धसमाप्तिरस्तु अभुक्तपूर्वाण्यपि कर्माणि सन्ति कर्मणोयावद्देहभावित्वेन कथं निशामरणस्याधोग-

तिहेतुत्वं परिहृतं, तथा च सति निशामरणनिन्दावचनस्य का गतिरित्यत्राह—

भा० एतदुक्तं भवति, अनारब्धकार्याणामधोगतिहेतुभूतानां कर्मणां विद्यासम्बन्धेनैव विनाशादुत्तरेषां चाश्लेषात्प्रारब्धकार्य्यस्य च चरमदेहावधित्वाद्बन्धहेत्वभावाद्विदुषो निशि मृतस्यापि ब्रह्मप्राप्तिः सिद्धैव । दर्शयति च श्रुतिः "तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य" इति-दिवा च शुक्लपक्षश्चेत्यादिवचनमविद्वद्विषयम् ॥ निशाऽधिकरणं समाप्तम् ॥

टी० "एतदुक्तं भवती"ति, दिवानिशाविभागनिरपेक्षं प्रारब्धकर्मावसाने मोक्षश्रवणात्तस्य तावदेव चिरमिति वाक्यमुपात्तं नन्वप्रशस्तकाले-निशि मृतं शरीरं न चरमं स्यात्, चारम्ये सिद्धे हि ब्रह्मप्राप्तसिद्धिः, नैवम् "अथ यो दक्षिणे प्रमीयते पितृणामेव महिमानं गत्वेत्यारभ्य तस्माद्ब्रह्मणो महिमानमाप्नोतीति दक्षिणायनाद्यप्रशस्तकालमृतस्यापि ब्रह्मप्राप्तिश्रवणात् अप्रशस्तकालमृतस्यापि ब्रह्मप्राप्तिश्रवणात् अप्रशस्तकालमरणेन हेतुना चरमदेहत्वं न बाध्यम् अतोयथोक्त एवार्थ इति । इतरे त्वयोऽपीदं सूत्रद्वयमपि रश्म्यनुसारविषयमेकमधिकरणमाहुः निशि रविरश्मयो न सन्तीति चेत् न नाडीरविरश्मिसंबन्धस्य यावद्देहभावित्वात्, तथा अमुष्मादादित्यात्प्रतायन्त इति श्रुतिर्दर्शयतीति योजयन्ति, न यदि निशि रवि रश्मयः स्युः तर्हि निशि मृतस्य ब्रह्मप्राप्तिर्न स्यात् तस्य रविरश्म्यनपेक्षत्वे दिवाऽपि तैर्विना गमनसंभवाद्रश्म्यनुसारशास्त्रवैयर्थ्यं रात्रौ मृतस्य ब्रह्मप्राप्तिर्वा न स्यात्, माभूदिति न वाच्यं विद्यायाः पाक्षिकफलतया तत्र प्रवृत्त्यनुपपत्तेः, यावदुदयं प्रतीक्षणकल्पनमप्ययुक्तं स यावत् क्षिपेन्मनस्तावदादित्यङ्गच्छेदिति शैघ्र्यावगमादित्युपपादयन्ति निशि मृतस्य ब्रह्मप्राप्तिर्न स्यादिति प्रसङ्गो निशामरणनिन्दावचनम-

स्पर्शनस्य पुञ्जस्य भागाश्चक्षुरादय इत्यप्यसत् नियामकाभावात् अवावयविसामान्यसादृश्यापोहादिभिरैक्यकल्पने अपसिद्धान्तातिप्रसङ्गौ, देहातिरिक्तेन्द्रियकल्पनञ्चास्मिन्पक्षे अपार्थम्। न ह्यत्र दृष्टहानिरदृष्टकल्पना वा कुतस्तद्गौरवम्। अतिरिक्तेन्द्रियकल्पनेऽपि देहावयवानां नियतोपकारकत्वमिष्यते। अस्तु तर्ह्ययमेव पक्ष इत्यत्राह। भेदाम्नानादिति। अयं भावः भौतिकाद्देहात् इन्द्रियाणां सात्त्विकाहङ्कारोपादानकत्वेन भेदाम्नानात्—क्लृप्तिप्रसङ्गाभावात् बाधाच्च मुधाऽत्र लघुपक्षोक्तिरिति ॥ ३८ ॥

इत्यैकेन्द्रियवादभङ्गः ॥

यदेतेष्विन्द्रियेषु मनसः कैश्चिन्नित्यत्वमुक्तम्। तदिन्द्रियोत्पत्तिश्रुत्यैव निरस्तम्। प्रकृत्येकदेशपरिणतिर्मन इति सिद्धे विभुत्वानुमानानि च बाधितानि, यत्तु मनो विभु सर्वदा स्पर्शरहितद्रव्यत्वात्, ज्ञानासमवायिसंयोगाधारत्वात् नित्यत्वे सति द्रव्यानारम्भकद्रव्यत्वात् आत्मादिवदित्यादि तदेतत्सर्वमात्माणुत्ववादिनम्प्रति न शोभते ज्ञानासमवायिसंयोगाधारत्वञ्चात्ममनसोरसिद्धम्। ज्ञाननित्यत्वस्य साधयिष्यमाणत्वात् नित्यत्वे सति द्रव्यानारम्भकद्रव्यत्वादित्येतच्चोत्पत्तिश्रुत्याऽपहृतविशेषणम्। द्रव्यानारम्भकत्वं च भवतामवयव्यनारम्भकत्वं, तच्चास्माकमणुष्वपि विद्यते। यदपि सर्वदा विशेषगुणशून्यद्रव्यत्वात् कालवदिति। असिद्धमिदमौपनिषदानाम्, त्रिगुणद्रव्ये मनसि सत्त्वादिविशेषगुणसम्मतेः, दूरस्थस्मृत्या मनोविभुत्वं कल्प्यमिति चेन्न। अनुभवसंस्कारप्रत्यासत्त्यैव तदुपपत्तेः। एवमन्यदपि, तदिहैकादशानामणवश्चेति सूत्राभिप्रेतमविभुत्वमातिष्ठते। "सूक्ष्माणीति" ॥

**मू० सूक्ष्माण्येकादशाक्षाण्यपि न यदि कथं देह-
तो निष्क्रमादिश्चित्ताणुत्वे तु सर्वेन्द्रियसमुद-
यने धीक्रमोऽप्यस्तु मानम् ॥ वृत्त्याद्यादे-
र्दवीयः प्रमितिजनकता वृत्तिराप्यायनार्थैः
भूतैर्जातप्रसर्पः श्रुतिमितमपि चानन्त्यमेषां
स्वकार्यैः ॥ ३९ ॥**

विपक्षे बाधकं वदन्नेवाच प्रमाणमाह । "न यदीति" । परोक्तानुमानानाञ्च विपक्षे दण्डश्च नास्ति सर्वच कार्योपलब्धेरिन्द्रियान्तराणामिव सञ्चारादप्युपपत्तेः, तमुत्क्रामन्तं शरीरं यदवाप्नोति इति श्रुतिस्मृतिसंवादाच्च, आदिशब्देन देहान्तरावाप्तिगत्यागतिसङ्ग्रहः न चैतेषां जीववदणुत्वं विशेषतोदृश्यते तथा सति श्रोचादीनामनेकाधिष्ठानवर्तित्वं स्पर्शनरसनयोश्च पृथुप्रदेशव्यापित्वं न स्यात् सिद्धेऽपि ह्यणुत्वे वि*कासतया वृत्तिविशेषद्वाराप्यायकप्रचयाद्वा पृथुत्वमङ्गीकार्यम् । अन्यथा पिपीलिकादिशरीरस्थस्य स्पर्शनस्य गजादिशरीरप्रवेशे तादृशपृथुत्वासिद्धिप्रसङ्गात् गजादिभ्यः कीटादिशरीरप्रवेशे तु तादृशस्सङ्कोचः । मनसस्तु परमाणुत्वेऽपि सद्वारकविषयसम्बन्धसिद्धेरविरोधः । तच "युगपज्ज्ञानानुत्पत्तिर्मनसोलिङ्गमिति" परोक्तं मनोविभुत्ववादप्रतिषेधोपयोगादनुमन्यते । "चित्ताणुत्वे त्विति" । अयम्भावः व्यासङ्गदशायां समग्रैरपि बाह्येन्द्रियैर्युगपज्ज्ञानानि नोत्पद्यन्ते दीर्घशष्कुलीभक्षणादिषु च व्यासङ्गदृष्टान्तेन धीक्रमोऽनुमेयः क्रमभाविकारणान्तरसापेक्षो ह्यसौ, न चादृष्टभेदोऽपेक्ष्यः तस्य दृष्टोपहारेण चरितार्थत्वात् अन्यथाऽतिप्रसङ्गात् प्रतिबन्धकाभावे ह्यदृष्टोप-

* विकासशक्त्येति पाठान्तरम् ।

नीतदृष्टसामग्र्यैव कार्यसिद्धिर्नियता तदिह कारणान्तरं यदि विभु स्यात् युगपदनेकेन्द्रियसम्बन्धितया युगपत्पञ्चविषयज्ञानोत्पत्तिप्रसङ्गः, एवं देहपरिमाणत्वेऽपि । न च मनसस्ततोऽपि सूक्ष्ममध्यमपरिमाणत्वे प्रमाणमस्ति विभुनोऽपि मनसः केनचिच्छरीरावयवेनावच्छिन्नतयैव कार्यकरत्वमिति चेन्न । तस्य निष्कम्पत्वेऽन्यत्र कार्याभावप्रसङ्गात् सञ्चारित्वे तु तादृशवेगवतस्तस्य देहातिरिक्तत्वमणुत्वं च साधीयः किमन्तर्गडुना व्यापकेन मनसा । यस्तु सर्वेषां देहावयवानां यथासम्भवमवच्छेदकत्वं ब्रूयात् तस्य प्रागुक्तप्रसङ्गानतिवृत्तिः, अतिगौरवञ्च यद्येवमिन्द्रियाणि देहान्तस्थानि तथा कथं चक्षुश्श्रोत्रयोर्दूरस्थग्राहकत्वमित्यत्राह । "वृत्त्येति" । वृत्तिद्वारा सम्बन्धादित्यर्थः । ननु वृत्तिर्यदि स्वरूपं देहपरिच्छिन्नत्वान्न दूरस्थे वृत्तिः धर्मोऽपि न धर्मिणमतिवर्ततेत्यत्राह । "वृत्तिरिति" । भूतैः सहेति वा चारैः पश्यन्तीतिवद्वा योज्यम् । यद्यप्यप्राप्यकारित्वं हैतुकगत्या हठा*त्कारेण वक्तुं शक्यम् । तथाऽपि दिवीव चक्षुराततमित्याद्यागमिकव्यवहारस्वारस्यबाधाभावाद्वृत्तिद्वारा प्राप्त्युक्तिः । नयनरश्मिगतितत्प्रतिघातादिकञ्च भाष्योक्तम् । ननु प्राणशब्दनिर्दिष्टानीन्द्रियाणि प्रक्रम्य सर्व एवानन्ता इति श्रुत्या सर्वेषामिन्द्रियाणां विभुत्वं ग्राह्यमित्यत्राह । "श्रुतिमितमिति" । यथोक्तं भाष्ये हृदयस्थानाञ्चेन्द्रियाणां तत्तन्नाडीभेदैस्तत्तत्प्रदेशविशेषप्रसर्पात् तत्रतत्र कार्यकरत्वञ्चावधातव्यम् । अत्र सर्वे प्राणा अनूत्क्रामन्तीति श्रुतेस्सङ्कोचकाभावात् मनष्षष्ठानीत्यादेश्च न्यूनसंख्याव्यवच्छेदमात्रेणाप्युपपत्तेः कर्मेन्द्रियाणां प्रतिशरीरमुत्पत्तिविनाशं व्यष्टिसमष्टिभावराहित्यञ्च वदन्तः प्रत्युक्ताः ॥ ३६ ॥ इतीन्द्रियाणां सूक्ष्मत्वम् ॥

* हठात्कारेणेति पाठश्चिन्तनीयः हठादित्यानुपूर्वीकस्याव्ययस्यानुपलभ्यमानत्वात् । बलात्कारेणेतिवद्वा साधुभावः समर्थनीयः ।

यदुक्तं "वृत्त्यात्त्यादेर्देवीयः प्रमितिजनकतेति," तत्र बाह्यै-रेवमुच्यते वृत्तिप्रसरणे क्रमयौगपद्यविकल्पायोगाद् दूरस्थविषया प्राप्तिर्न भवतीति अतो यद्रूपग्राहकं यच्छब्दग्राहकमिन्द्रियं तदप्राप्य ग्राहि यथा मन इति तत्र तावत् प्रत्यनुमानमाह । "प्राप्येति" ।

सू० प्राप्यग्राहीन्द्रियत्वाद्विमतमितरवत्प्राप्तिरुक्त-प्रकारा वृत्तिं दृष्टेर्निरुन्द्धे विरलपटनयादम्बुकाचादिरच्छः। नो चेद्गृह्येत योग्यं सममिह निखिलं निष्फले छादकादौ स्थैर्यं तदोग्यभावो न हि गलति समा सन्ततिस्त्वन्मतेऽपि ॥ ४० ॥

ननु गृह्यमाणस्य वर्तमानक्षणस्य पूर्वक्षणवर्तीन्द्रियसम्बन्धायोगादिन्द्रियान्तराणामप्यसम्बन्धग्राहकतया साध्यविकलो दृष्टान्तः । मैवम् क्षणभङ्गकु*सृतेः प्रागेव निरासात् ॥

अतिप्रसङ्गोऽसम्बन्धग्रहणे स्यात्समन्त्विदम् ।
सम्बन्धग्रहणेऽपीति न सद्योग्यान्वितग्रहात् ॥
गृहीतस्येष्यते कश्चित्सम्बन्धोव्यभिचारतः ।
न सम्बन्धस्य सर्वस्य ग्रहणं व्यभिचारतः ॥

नात्र कर्मेन्द्रियैरनैकान्त्यं यथा स्वं व्यापारेण स्प्रष्टृग्राहिशब्देन विवक्षितत्वात् तस्य च सर्वत्र प्राप्तविषयत्वात् न च मनसा तस्यापि बाह्येन्द्रियद्वारा बहिर्विषयप्राप्तेः, यद्वा बाह्यज्ञानेन्द्रियत्वादिति मनः कर्मेन्द्रियव्यवच्छेदः । ननु उन्मिषितमात्रं चक्षुश्चन्द्रं गम-

* दुर्मार्गस्येत्यर्थः ।

यति । न चैकस्मिन्क्षणे तावान्देशो वृत्त्या लङ्घयितुं क्षमः क्रमे तु प्रतिपरमाणवच्छेदं विलम्ब्य गमनात् प्रतीतिरपि विलम्बेत दूरासन्नग्रहणकालतारतम्यं च स्यात् । मैवम् उदयत्येव सवितरि सकलदिग्व्यापिन्यां प्रभायामिव इन्द्रियवृत्तेस्तादृशवेगातिशयस्याविस्मयनीयतया पद्मपत्रशतवेधनीत्या यौगपद्याभिमानोपपत्तेः । ननु सिद्धे गमने यौगपद्याभिमानक्लृप्तिः नात्र तत्सिद्धप्रतीति चेन्न स्वाभ्युपगतसाम्यात् बुद्धिसन्ततेश्शरीरान्तरगमनं दीपालोकादिगमनञ्च दृष्टं क्लृप्यं वा नाद्यः, त्वयाऽप्यनभ्युपगमात्, द्वितीये तु तथेहापि किं न स्यात् न देहान्तरादौ गतिः प्राप्तिर्वा किन्तु तत्र तत्र देशकालनैरन्तर्येणोत्पत्तिमात्रमिति चेत्तथेहापि त्वया क्लृप्यताम् अविशेषात् । ननु प्राप्तिः क्लृप्या तदभावस्त्वनुपलम्भमात्रेण सिद्धप्रतीति चेन्न । योग्यानुपलब्धेरभावात् अतीन्द्रियस्य हि प्राप्तिरपि तथैव अतो नात्र बाधशङ्का । ननु दूरस्थत्वाद्विषयेन्द्रिययोः प्राप्तिर्बाधितेत्यत्राह । "प्राप्तिरिति" । वृत्तिद्वारेति शेषः । उक्तप्रकारेति पुनरनुवचनं वाद्यन्तरोक्तप्राप्तिप्रकारनिरासार्थम् । अथापि क्वचिद्व्यवहितग्रहणदर्शनात्प्रमाणतस्तर्कतश्च बाधः स्यादित्यत्राह । "वृत्तिमिति" । अच्छः—आलोकाद्यनुप्रवेशानुगुणसन्निवेशवानित्यर्थः । दृश्यते ह्यनाविलसलिलमूलप्रविष्टस्सूर्यालोकः तत्रत्यं च तत्प्रतिफलनदीप्तं शिलाविशेषादि यथावत्प्रसरमत्यन्तनिरोधं च परिहर्तुं विरलपटनिदर्शनम् । अत एव हि तत्राविशदप्रतिभासः सरन्ध्रत्वे स्फटिकादिषु सलिलगलनादिप्रसक्तिः स्यादिति चेन्न । आलो*कप्रकाशवत्सु सर्वेषु सलिलप्रवेशस्य त्वया दुर्वचत्वात् अच्छिद्रपरलवकसंपुटस्थगितकर्पूरकस्तूरिकादिगन्धनिस्सरणन्यायाच्च द्रव्यविशेषप्रवेशानुगुणसन्निवेशवत्त्वं काचादेरङ्गीकार्यम्

* प्रवेशवत्स्विति पाठान्तरम् ।

अप्राप्यग्रहणेऽपि हि कुड्यादिव्यवहितं न ग्राह्यं काचादिव्यवहितन्तु ग्राह्यमिति वस्तुस्वभाववैचित्र्यं त्वयाऽपि स्वीकृतम् ।

नीरन्ध्रेऽप्यम्बुकाचादौ दृक्प्रभादेः प्रवेशनम् ।
वस्तुस्वभाववैचित्र्यादिति केचित्प्रचक्षते ॥

सर्वत्र स्वरूपयोग्यत्वायोग्यत्वाभ्यामेव ग्रहणाग्रहणे । तत्र च्छादकतदभावौ निरर्थकौ इति वदतां बाधकं स्वोक्तानुमानस्य विपक्षे बाधकम् अयस्कान्तनिदर्शनेऽपि च्छादकनैष्फल्येऽतिप्रसङ्गमभिप्रेत्याह । "नो चेदिति"। इह योग्यं निखिलं सर्वस्मिञ्जगति स्वरूपयोग्यं सर्वं समं गृह्येत अविशेषाद्युगपदेवेत्यर्थः । आदिशब्देन अतिदूरत्वकालविप्रकर्षादिकं दृष्टान्ततया गृह्णाति । छादकाभावः स्वरूपतस्सहकारि न तु प्राप्तिविरोधिप्रत्यनीकतयेति चेन्न । आलोकादिप्राप्तिविरोधिच्छत्रादिन्यायस्यात्रानपायात् । न च यत्र क्वचिच्छादकाभावः सह कुर्यात् अतिप्रसङ्गात् किन्तु नयनार्जवदेशे अयं च नियमः प्राप्तिविरोधिनिवृत्तिरूपतयेति युक्तमुत्पश्य । रूपग्रहणसामग्र्यामेव प्रदीपादि च्छादकं प्रभाप्रतिघातार्थं दृष्टम् । उन्मीलितनिमीलितचक्षुषः पिठरकावृतदीपप्रभान्यायेन पूर्वप्रसृतनयनप्रभाया विनाशादतिक्रमाद्वा ग्राह्यग्रहणाभावः अत्र गृहीतच्छन्नमपि गृह्येतेति प्रसङ्गारूढम् । तदा सममिति पूर्वमिवेत्यर्थः तच्च क्षणभङ्गेन योग्यायोग्यभेदकल्पनया परिजिहीर्षितः सर्वलोकप्रसिद्ध्यनुसारिणा स्वमतेनोत्तरमाह । स्थैर्य इति । अयमभावः छादनदशायां पूर्वगृहीतस्य स्वरूपयोग्यत्वं स्थितं नष्टं वा । आद्ये कथं न गृह्येत प्राप्तेरप्रयोजकत्वात् । द्वितीये नाशकं न दृष्टं छादकमेव स्वरूपयोग्यतानाशकमिति चेन्न । अव्यवहितदेशस्थैरप्यग्रहप्रसङ्गात् यं प्रति व्यवधिस्तम्प्रति योग्यता नष्टेति चेत् छादकापगमेऽप्यग्रहप्रसङ्गात्

तदपगमात्पुनरुत्पद्यत इति चेन्न हन्त अदृश्यमानानन्तोत्पत्तिनाशकल्पनात् प्रतिपुरुषनियतानन्तयोग्यताभेदकल्पनाच्च वरं प्रदीपप्रभान्यायेन प्राप्तिविघातकतया छादकसाफल्यस्वीकारः। परपक्षेणाऽपि प्रसङ्गस्थैर्यमाह । समेति । अपिरन्वारोहद्योतकः क्षणभङ्गपक्षेऽपि योग्यक्षणादयोग्यक्षणोत्पत्तौ कारणक्षणस्य सर्वैरदृष्टस्तत्तत्स्वरूपातिरिक्तशक्तिभेदोवा सहकारिभेदोवा कल्प्यः उभयमपि स्वमतबाधकं दृष्टं छादकमेवायोग्यक्षणोत्पादनसहकारीति चेन्न अपसिद्धान्तात् छादकस्य किञ्चित्करत्वानपायात् तोयादिव्यवहितेऽप्यग्रहप्रसङ्गात् छन्नस्य च सर्वादृश्यत्वप्रसङ्गात् नेत्रसन्निकृष्टेन पद्मकरतलादिना दवीयस्तरदिवाकरे क्षणोत्पत्तेरत्यद्भुतत्वाच्च तस्मादस्मदुक्तमेव छादकसाफल्यम् उक्तातिप्रसङ्गस्सांख्यादिपक्षेऽपि समः। यदि ह्यहङ्कारविकारयोश्चक्षुश्श्रोत्रयोर्यावद्विशस्थविषयग्राहित्वं दृष्टं तावत्पृथुत्वं तत्तच्छरीरोत्पत्तिसमयसिद्धं तत्राधिष्ठानाद्बहिरवस्थितांशोवृत्तिरित्युच्यत इति तदा निमीलनाद्यवस्थायामपि ग्राहकत्वप्रसङ्गः प्राप्तेरनपायात् । अथ पृथ्व्या संतताऽपि बहिर्वृत्तिर्दीपप्रभान्यायेन विनश्यति अत एव च्छन्नग्रहणाभाव इति तथात्वेऽप्येकस्यादृश्यमानपृथुत्वाणुत्वाद्यनन्तावस्था। स्वतोभिन्नाभिन्नवृत्त्यंशनाशः तन्नाशेऽपि स्वरूपावस्थानमित्यादिबहुविधकल्पनापात इति । यत्तु कैश्चिदुच्यते निष्क्रान्तमात्रमेव चाक्षुषं तेजो बाह्येन बहुदेशव्यापिना चन्द्रसूर्यादिज्योतिषा सम्वलितं तावत्प्रथिमानमवयविनमारभते तेन च सम्बन्धादुन्मिषितस्य दूरस्थग्रहणं दूरासन्नयोर्युगपद्ग्रहणं च सिध्येदिति तदयुक्तं निष्क्रमणकल्पनस्य गुरुत्वात् । अनिष्क्रान्तमेव किं नावयविनमारभेत आन्तरनिष्क्रमणवद्बाह्यप्रवेशोपपत्तेः । अपि चास्मिन्पक्षे त्रिभुवनविवरव्यापिना तेजसा सह चाक्षुषतेजस्संवलनात्तेन सम्बद्धं सर्वं युगप-

द्भासेत पश्चाद्भागादिस्थितं च । अथार्जवावस्थानमपेक्षणीयमित्युच्येत तदाऽस्मद्ध्याप्रेस्सिद्धत्वात् अन्यथा दर्पणतरङ्गादिसन्निधाने स्वमुखादिग्रहणं न स्यात् । किं च निमीलिताक्षस्यापि प्राङ्निष्ठ्यूतनयनमहस्सम्भवबाह्यालोकानुवृत्त्या दृश्यदर्शनानुवृत्तिः स्यात् अतः प्रागुक्तप्रकारैव प्राप्तिरिति ॥ ४० ॥ इति चक्षुरादेः प्राप्यकारित्वम् ॥ भवतु चक्षुषस्तैजसाप्यायितत्वान्मणिप्रभान्यायेन काचिद्वृत्तिः श्रोत्रस्य त्वाकाशाप्यायितस्य सा कथमित्यत्राह । शब्दमिति ॥

मू० शब्दं गृह्णाति दूराभ्युदितमपि बहिस्सन्तता श्रोत्रवृत्तिर्दिग्भेदासन्नतादिग्रहणमपि तदा तत्र तत्सन्निधानात् । इत्येकेऽन्ये तु दूरान्तिकगतजनताशब्दधीकालभेदात् श्रोत्रायातस्य तस्य ग्रहमनुमितिमप्याहुरस्मिन्दिगादेः॥४१॥

विकारिद्रव्यस्य तावत्स्वरूपत आप्यायकद्वारा वा तत्र तत्र वृत्तिरविरुद्धा न चानुपलम्भविरोधः योग्यत्वाभावात् अन्यथा स्वेष्टमपि भज्येत । तवापि हि बुद्धिसन्ततेः शरीरान्तरगमनमालोकादिगमनं च दृष्टं कल्प्यं वा । नाद्यः अशक्यत्वादनभ्युपगमाच्च । न द्वितीयः तद्वदत्रापि कल्पनोपपत्तेः, न हि तत्र गतिः प्राप्तिर्वा कल्प्यते किन्तु तत्र तत्रोत्पत्तिमात्रमिति चेत्तथात्रापि त्वया कल्प्यम् अविशेषात् न च शब्दात्मकाः पुद्गलाः श्रवणदेशमायाता दृश्यन्त इति युक्तं शब्दस्य रूपादिवद्गुणत्वोपपत्तेः पुद्गलत्वायोगात् । नापि शब्दस्यैवागमनं बाह्यैकेन्द्रियग्राह्यतया श्रुत्यादिभिश्च रूपादेरिवाद्रव्यस्य क्रियानुपपत्तेः । न च शब्दस्य तद्व्यञ्जकस्य वा वीचीतरङ्गन्यायकल्पना अत्यन्तगौरवात्, न च व्याप्तं श्रोत्रं युगपत्सार्वत्रिकशब्दोपलम्भप्रस-

ङ्गात्, न च प्रतिनियतैः प्रदेशैश्शक्तं नियामकाभावात् श्रोत्रसमवायेन शब्दो गृह्यत इति पक्षस्तु इन्द्रियाणामभौतिकत्वस्थापनयाऽपास्तः अतोयथोपलम्भं तत्तज्जन्तुषु स्ववृत्त्या तावद्देशव्याप्तं श्रोत्रं तत्तद्देशे शब्दं गृह्णातीति । एवमनभ्युपगमे दोषमभिप्रेत्याह । दिग्भेदेति । यदि श्रोत्रवृत्तिस्तत्रतत्र न स्यात् कथं तद्विशिष्टः शब्दो गृह्येत न ह्यत्र प्राच्यादिप्रतिनियतं लिङ्गं दृश्यते । नापि दूरासन्नत्वनियतम्, अतश्शब्दस्वरूप इव तदुत्पत्तिदेशविशेषेष्वपि श्रोत्रवृत्तेः शक्तिः कार्यकल्प्या। आसत्तितारतम्यानुरोधेन विशदाविशदावभासश्च चक्षुर्वृत्तिनयेन नेतव्यः। अत्र पक्षान्तरं स्थापयितुं सांख्यानुसारिणां पक्षोऽयमिति निगमयति । इत्येक इति । बुद्ध्यन्तरानुगुणमतान्तरमाह । अन्ये त्विति । दूरस्थस्ताड्यमानभेर्या दशकोणाभिघातात्पश्चाद्विलम्बेन शब्दं शृणोति वादकास्तदासन्नाश्च विलम्बितं तदेतद्गन्धाश्रयविपर्यन्यायमन्तरेण कथं स्यात् अत एवानुवातप्रतिवातयोरतिदूरानतिदूरश्च शब्दो गृह्यते बहिरन्तर्गृहगतानाञ्च दूरस्थशब्दग्रहणे स्फुटास्फुटधीश्च अतः श्रोत्रप्रदेशायातभूतधर्मस्य शब्दस्य ग्रहणं तस्यायातत्वमाश्रयद्वारकं शब्दगन्धसूर्यालोकरत्नप्रभादयोधर्म्यतिवर्तिनो गतिमन्तश्च इत्यात्मसिद्धिवाक्ये शब्दशब्दो गन्धशब्दवदाश्रयलक्षकः ।

गुहासौधादिसंक्षोभः प्रतिशब्दश्च जृम्भते ।
निस्साणादिप्रणादेन तदेतत्पक्षसङ्गतम् ॥

नन्वेवं दिगादिविशिष्टोपलम्भः कथमित्यत्राह । अनुमितिमिति । आदिशब्देन दूरासन्नत्वग्रहः दृष्टान्तप्रदर्शनं च ।

यथा मयूरवीणादेः शब्दोऽयमिति गृह्यते ।
तथा प्राच्यादिजातोऽयमिति लिङ्गात्तयाविधात् ॥

तत्र यद्यपि शब्दस्य विशेषः कोऽपि दुर्वचः ।
तथाऽपि विदितस्तैस्तैर्लिङ्गं स्यात्सम्मतेष्विव ॥

नन्विमौ द्वावपि पक्षौ हाठि*कौ पूर्वत्र दिगादिषु श्रोत्रस्य शक्तिकल्पनागौरवात् उत्तरत्र दुर्वचलिङ्गदर्शनक्लृप्तिरिति । हन्त एवं वदन् किं शब्दग्रहे दिगादिग्रहणमेव नास्तीति मन्यते सदपि वा निष्कारणकं सकारणमपि वा कारणान्तरसिद्धमिति । नाद्यः सर्वलोकधीविरोधात् सामग्रीवैकल्यात्तु कदाचिद्दिगादिरहितधीः न द्वितीयः आगन्तोरहेतुकत्वविरोधात्, न तृतीयः आगमादेरत्रासम्भवात् । भ्रान्त्याऽत्र दिगादिरिति चेन्न । प्रतिपुरुषनियतदिगध्यासहेतुभूतधर्मविशेषग्रहाभावात्, भावे वा तत एव तत्तदनुमानोपपत्तेः तद्वदेव च दिगादेरपि उपलम्भोपपत्तेः । न चाबाधितांशे भ्रान्तिक्लृप्तिर्युक्ता अतःप्रत्यक्षतोऽनुमानतो वा च दिगादि ग्रह इत्यन्यतरपक्षोऽनतिक्रमणीयः । शब्दस्य नित्यविभुत्वात्तदाश्रितत्वाद्वा श्रोत्रेण नित्यसम्बन्ध इति वादस्त्वद्व्यसरे निरसिष्यत इति ॥ ४१ ॥ इति श्रोत्रवृत्तिशब्दाश्रयागमनपक्षौ ॥

इन्द्रियचिन्तानन्तरं भूतचिन्ता प्राप्ता प्रथममाकाशे चार्वाकैरपि सम्मन्तव्यं प्रमाणविशेषं पुरस्करोति । प्रत्यक्षमिति ॥

सू० प्रत्यक्षं व्योम नीलं नभ इति हि मतिश्चक्षुषैवास्मदादेः कूपोऽसौ रन्ध्रमेतत्पतति खग इहेत्यादिधीश्चात्र मानम् । आधारोऽत्रातपादिर्यदि भवति कथं तस्य चेहेति बोधस्तस्यांशैश्च क्षयणौ तच्छिथिलगति न च व्योमवागातपादौ ॥ ४२ ॥

* हठपरिगृहीतावित्यर्थः ।

कथमित्यत्राह । नीलमिति धूम्रादेरुपलक्षणमेतत् आरोपितं नभसि तलत्वादिवन्मलिनत्वादिकमिति चेत् असावारोपश्चाक्षुषोऽन्यो वा । आद्येऽधिष्ठानमपि चाक्षुषमेष्टव्यम्, अन्यथाऽतिप्रसङ्गात् द्वितीयस्त्वसम्भवी निमीलिताक्षस्य तादृशारोपादृष्टेः, अत एव अनुमिते नभसि नैल्यारोप इत्यपि निरस्तम् । न च नीलं नभ इति धीरेव नास्ति विश्वविसंवादात् नाप्यसावचाक्षुषः अस्मदादिचक्षुर्व्यापारानुविधानात्, नभसि विततानां पार्थिवावयवानां कृष्णगुणमात्रं चक्षुषा गृह्यत इति चेन्न । नीलं नभ इति धर्मिपर्यन्तबुद्धेः, गुणिलिङ्गत्वाच्चात्र नीलादिशब्दानां एतेन नीलरूपस्मृतिप्रमोषोऽयमिति पक्षोऽपि निरस्तः । ननु नभसि स्वतोनैल्याभावात् पक्षीकृतेऽप्यस्मिन्नैल्यस्य पार्थिवांशमात्रनिष्ठत्वात् तस्मिन्नेवांशे स्यादसौ चाक्षुषधीः । मैवम् । तस्य नभश्शब्दार्थत्वायोगात् नीलपटन्यायस्य चात्र ग्राह्यत्वात् बालातपसन्निधावरुणं नभ इत्यादिबुद्धेः । तत्राप्यरुणातपग्रहणमात्रमिति चेत्कस्तर्हि तत्र नभश्शब्दार्थः । न ह्यनेकार्थोऽयं शब्द अनुवृत्तमनतिप्रसङ्गि च निमित्तं दुर्लभं पृथिव्यूर्ध्वत्वादेस्तथात्वाभावात् चन्द्रिकादिविशेषानादरेण विरलावस्थितद्रव्यमात्रं नभ इति चेन्न वियति विरला चन्द्रिकेत्यादिपृथग्व्यपदेशात् । वैरल्यदर्शनमपि नभःप्रत्यक्षतामन्तरेण न घटते तत्तन्मध्यप्रदेशानां तैस्तैरस्पृष्टता हि विरलता । तथा च मध्यदेशभूतं नभः प्रत्यक्षम् । परस्परासंयोगमात्रं वैरल्यमिति चेन्न भिन्नकालेषु गुणादिषु च विरलधीप्रसङ्गात् वर्तमानानामासन्नदेशस्थानां द्रव्याणामसंयोगो विरलतेति चेन्न । चन्द्रिकादिष्वसंयुक्ततेजःकणानाम् आसन्नदेशतया नभस एव ग्राह्यत्वात् विरलविरलतरादिबुद्धौ असंयोगाविशेषे मध्यदेशाल्पत्वभूयस्त्वग्रहणमन्तरेण का गतिः । दूरदूरतरादिस्थितिरिति चेत् तथाऽपि दूरासन्नदेशतया नभः प्रत्यक्षमेव ।

द्विशस्तत्र देशत्वं स्यादिति चेत्, उपाध्यतिरेकिण्यामपि तस्यां प्रत्यक्षत्वस्य नभस्समानचर्चत्वात् दीर्घेण ह्रस्वेन च स्पृष्टं योग्यत्वमेव दूरत्वमासन्नत्वं च अतोनात्र प्रदेशबुद्ध्यपेक्षेति चेन्न। तयोस्तत्तत्स्वरूपत्वेऽतिप्रसङ्गात्। अनतिरेके तु देशविशेषस्थित्युपलम्भमन्तरेण तदसिद्धेः। अत्र चाक्षुषमेवोपलम्भान्तरमप्युदाहरति। कूपोऽसाविति। कूपरन्ध्रादयोहि तत्तद्देशविशेषतया सर्वलोकप्रत्यक्षसिद्धाः आवरणाभावमात्रं तु निरसिष्यते। पक्षिणश्च पतनदेशतया नभः प्रत्यक्षयामः तत्र इहप्रत्ययस्यान्यथासिद्धिमाशङ्कते आधार इति। इहेति प्रतीयमानत्वमात्रमिहाधारत्वम्। परिहरति। कथमिति। इह नभस्यातपादिरिति व्यतिरेकनिर्देशान्नातपादिरिह शब्दार्थः स्यादिति भावः अत्रोदयनाद्युक्तमाशङ्कते। तस्यांशैरिति। आतपाद्यंशास्तदाधारीकृत्यर्थः। दूषयति। त्र्यणाविति। परैस्त्र्यणुकानामप्रत्यक्षद्व्यणुकाश्रितत्वस्वीकारादंशैरिह प्रतीतिनिर्वाहस्तत्र कुण्ठित इत्यर्थः। माभूत्स्वांशैः त्र्यणुकानामिहेति धीः त्र्यणुकसमुदायमिहेति निर्दिश्य प्रत्येकं तदाधेयतयोपचर्यतामित्यत्र क्लिष्टगतो लोकव्यवहारं प्रतिपद्यति। न चेति। इह नभसि त्र्यणुकम् इह व्योम्न्यातपः इत्यादि व्यवहारे त्र्यणुकतत्समुदायादिव्यतिरिक्ते कुत्रचिन्नभःपर्यायाणां प्रयोगः प्रसिद्धः सर्वलोकप्रतीतिव्यवहारोल्लङ्घनं तु सर्वक्षोभकं साहसमिति भावः। चशब्दाद्योतकोऽवधारणार्थो वा ॥ ४२ ॥ आकाशस्य प्रत्यक्षत्वे परोक्तं बाधकं शङ्कते। रूपेति ॥

मू० रूपस्पर्शोज्झितत्वान्न भवति गगनं दर्शनस्पर्शनार्हं घ्राणश्रोत्रे रसज्ञाऽप्यवगमयति न द्रव्यमन्यत्त्वबाह्यम्। तस्मान्नाध्यक्षवेद्यं वियदिति यदि न प्रत्ययस्यापरोक्ष्यात् पक्षीका-

रेण नैल्यं पटमलिनिमवद्भाषितं वोपकुर्यात् ॥ ४३ ॥

नभो न चाक्षुषं रूपशून्यद्रव्यत्वात् नापि स्पार्शनं स्पर्शशून्यद्रव्यत्वादिति हेतुद्वयविभागः । अन्येषां तु बाह्येन्द्रियाणामत्रासंभवमाह । घ्राणेति । घ्राणादीनि हि स्ववेद्यगुणाश्रयमपि नावगमयन्ति किं पुनर्द्रव्यान्तरमिति भावः । मानसप्रत्यक्षमिह दूरनिरस्तमित्याह । अन्यदिति तुशब्दोऽत्रात्यन्तासम्भवपरः । अबाह्यम् आत्मतद्धर्मव्यतिरिक्तेषु न स्वातन्त्र्येण प्रवर्तत इत्यर्थः । संकलितमाह । तस्मादिति । अस्मदादीति विशेषणीयं चोद्यस्य दत्तोत्तरत्वाभिप्रायेण प्रतिवक्ति । नेति । अभिप्रेतं व्यनक्ति प्रत्ययस्येति । अयम्भावः न रूपादिविरहाच्चाक्षुषत्वहानिः रूपादिप्रत्यक्षत्ववद्यथादर्शनं व्यवस्थोपपत्तेः । प्रतिप्रयोगश्च विगीतमस्मदादिबाह्येन्द्रियग्राह्यं बाह्यत्वे सत्यस्मदाद्यपरोक्षधीविषयत्वात् अविगीतवत् । नात्र हेतुरसिद्धः परिशेषप्राप्तेः । न तावदक्षागमिकी नभःप्रतीतिः तदनभिज्ञानामपि सम्भवात् । नाप्यानुमानिकी सिद्धेऽपि तदनुमाने अनधिगततादृशानुमानानां नभःप्रतीतेः । तदेवमाकाशस्यात्रानुमानादिविषयत्वायोगात् आबालपण्डितमनुभूयमानत्वाच्च तद्बुद्धिरपरोक्षेति सिद्धम् । नन्वसिद्धस्य सिद्धस्य वा नभसः प्रत्यक्षत्वसाधनं नाद्यः अनुमानकथाबाह्यत्वात्, न द्वितीयः अनुमानतस्तत्सिद्धेस्त्वदनभ्युपगमात् प्रत्यक्षतस्तत्सिद्धेरस्मदनभ्युपगमादिति मैवम् उभयसम्मतादागमतोऽपि तत्सिद्धेः । आस्तामागमः पृथिव्याद्यतिरिक्तस्य नभःप्रतीतिविषयस्य कस्य चिदुभयसंमत्या पक्षीकारोपपत्तेः । अन्यथा कथमन्यत्र त्वदुक्तप्रत्यक्षत्वानुमानं जीवेत् सर्वलोकप्रत्यक्षविरुद्धं च तत् । तथापि तत्स्वीकारे बुद्धिव्यतिरिक्ततया बाह्यार्थस्सर्वोऽप्यप्र-

त्यक्ष इति वदन्सोचान्तिक एव समर्थः स्यात् । तदेवं नीरूपस्यापि नभसश्चाक्षुषत्वं निर्व्याघातं भाष्ये त्वस्य पञ्चीकरणेन रूपवत्तया चाक्षुषत्वाविरोधवचनं वैभ*वात्स्यात् । यथारूपरूपिरूपसमवेतरूपैकार्थसमवेतानां चाक्षुषत्वमविशिष्टमङ्गीक्रियते तथा रूपिद्रव्यसम्वलितस्यापि क्वचित्स्यात् न चातिप्रसङ्गः समचर्चत्वात्, न हि रूपिद्रव्यं रूपैकार्थसमवेतं वा चक्षुर्ग्राह्यं योग्यतानियमस्य दुर्लङ्घत्वादिति । तदेतदभिप्रेत्याह । पञ्चीकारेणेति ॥ ४३ ॥ इत्याकाशस्यास्मदादिप्रत्यक्षत्वम् ॥

अथाकाशस्यानुमानतस्सिद्धिं निराकरोति । शब्दस्येति ॥

मू० शब्दस्याधारभूतं कथमपि गगनं शक्यते नानुमातुं स्वेच्छातः पारिशेष्यक्रम इह कथितोऽतिप्रसङ्गादिदुःस्थः ॥ निष्क्रान्त्यादेर्न तद्धीस्सति नभसि यतोनास्ति कुड्यादिकेऽसौ रोधस्त्वावारकैश्चेत्तदभवनवशान्निष्क्रमादिश्च सिद्ध्येत् ॥ ४४ ॥

शब्दः क्वचिदाश्रितो गुणत्वादित्येतावता तावन्न पृथिव्याद्यतिरिक्तशब्दाश्रयसिद्धिः सर्वस्य किञ्चिद्वाचात् परिशेषहेतूनां तु विपक्षे बाधकाभावात् न हि शब्दस्य पृथिव्याद्याश्रितत्वे किञ्चिदनिष्टं स्यात् पुष्पादिगन्ध इतिवद्भेर्यादिशब्द इति सर्वलोकबुद्ध्यनुविधाने कल्पना च लघ्वी । शब्दो विभुगुणो न भवति बाह्येन्द्रियग्राह्यगुणत्वादिति विपरीतपरिशेषस्यापि सुशकत्वात् स्पर्शेन पृथिव्यादिधर्मः नीरूपेन्द्रियग्राह्यत्वादित्यादिभिः पृथिव्याद्यतिरिक्तस्पर्शना-

* विदुषां किमशोभनमिति रीत्या विस्तरवाक्पाटवकृतं स्यादित्यर्थः ।

धारकल्पनप्रसङ्गाच्च । तदेतदभिप्रेत्याह । स्वेच्छातइति । आदिशब्देन विपरीतप्रसङ्गसंग्रहः । निष्क्रमणं प्रवेशनमित्याकाशलिङ्गमिति परोक्तं प्रतिवक्ति । निष्क्रान्त्यादेरिति । उपपादयति । सतीति । यत्राकाशस्तत्र सर्वत्र निष्क्रमणादिकं न सिद्ध्यतीति आकाशव्याप्ते कुड्यादौ निष्क्रमणादेरशक्यत्वात् । न च कुड्यादिष्वाकाशोनास्तीति वाच्यम् तस्य सच्छिद्रत्वाभावत्वप्रसङ्गादिति भावः । सहकारिवैकल्यात्कुड्यादिषु निष्क्रमणादिकार्यप्रतिरोध इति शङ्कते । रोध । इति । तुशब्दः केवलाकाशाद्विशेषद्योतकः । एवं सति निष्क्रमणादेरन्यथासिद्ध्या निर्मूलं नभःकल्पनमित्यभिप्रायेणाह । तदभवनेति । न हि निष्क्रमणादेराकाशं समवायि देहादिक्रियाया नभोनिष्ठत्वाभावात् नाप्यसमवायि । द्रव्यस्य तथात्वानभ्युपगमात् समवायिकारणप्रत्यासन्नत्वायोगाच्च । निमित्तं तु ईश्वराद्यतिरिक्तमपूर्वमिह नापेक्ष्यमिति भावः ॥ ४४ ॥ इत्याकाशानुमेयत्वभङ्गः ॥

ननु शरीरादिष्वाकाशोऽवकाशदानेनोपकरोतीति तत्तच्छास्त्रसिद्धमतोऽस्य निष्क्रमणादिलिङ्गत्वं ग्राह्यं तदिदमनुभाषते । यत्त्विति ॥

मू० यत्त्वाकाशोऽवकाशप्रद इति कथितं शास्त्रतस्तत्र योऽसावन्योन्यस्पर्शभाजां विहतिरिह न सा प्राच्यतत्त्वेष्विव स्यात् ॥ इत्यैदम्पर्यमूह्यं न यदि कथमिवान्येषु लभ्योऽवकाशः सिद्धादेः स्वप्रभावाज्जल इव कथितो युज्यते मज्जनादिः ॥ ४५ ॥

शास्त्राभिप्रेतमस्योपकारकत्वं शिक्षयति । तत्रेति । पृथि-

व्यादिचतुष्कस्येव स्पर्शवत्प्रतिघातित्वमाकाशस्य नास्ति तत्पूर्वेषामिवाहङ्कारादितत्त्वानाम् अतः प्राणिसञ्चारादिप्रतिघातकत्वाभावादस्योपकारकत्वकथनमिति तात्पर्यं निपुणनिरूपणीयम् । न ह्याकाशेन द्वेयमवकाशाख्यं द्रव्यान्तरमस्तीति भावः । आकाश एव तर्ह्यवकाशः स्यादित्यत्राह । न यदीति । अस्पर्शत्वविशेषान्महदादिप्रदेशानामप्यवकाशत्वं ग्राह्यम् । ननु स्पर्शवतां मिथःप्रतिघातकत्वनियमो नास्ति भूमावुन्मज्जति निमज्जतीत्यादिसिद्धप्रतिपादनादित्यत्राह । सिद्धादेरिति । अनेन जन्मौषधिमन्त्रतपस्समाधिभूतसिद्धिमतां तत्तदुपष्टब्धानां च संग्रहः । जलदृष्टान्तेन विभज्य प्रवेशनं पुनश्शीघ्रसंभेदश्च सूच्यते । केचित्तु सिद्धादीनां प्रभावविशेषेण भूम्यादिषु प्रवेशप्रतिघात एव नास्तीति मन्यन्ते काचादिषु नीरन्ध्रेषु नयनप्रभादेरिवेति ॥ ४५ ॥ इत्यवकाशनिरूपणम् ॥

अत्र केचिच्चार्वाकास्सौगताश्च प्राहुः चत्वार्येव भूतानि आकाशस्त्वावरणाभाव एव स च निस्स्वभावः तुच्छतयैवोपलम्भात् यत्र चावरणं न तत्राकाशः अभित्त्वा दुर्दर्शत्वात्, भेदे त्वावरणाभावस्यैव सिद्धेः । यदि तत्राकाशः स्यात् निरवकाशं न किंचित्स्यात् अतो घटतदभावन्यायादावरणेष्वसत्त्वादयमावरणाभावस्तदिह शून्यधातुसंज्ञिते च निस्तत्त्वेऽप्यावरणाभावे खपुष्पादिषु तत्तच्छ*ब्दादिवन्मिथ्याजले मृगतृष्णिकादिशब्दवच्च व्यामोहैकनिबन्धना व्योमादिशब्दाः । अत्र नञुपश्लेषाभावादसद्रूपतातिरस्कारः, अत्र च तलत्वविपुलत्वमलिनत्वादिकमध्यासमन्तरेण न कथंचिदप्युपपद्यते प्रतियोगिगतानां च स्मर्यमाणानां गृह्यमाणेऽस्मिन्नध्यासः । अस्ति चासौ

* तत्तच्छब्दवदिति पा० ।

तद्विकारे ऽप्यपूर्वत्वात् ॥ १२ ॥

ननु द्वादशाहप्रकृतिके आगन्तूनामन्ते निवेशो ऽस्तु तत्प्रकृतिके अहीनसत्रादौ पर्यासस्थाने निवेशः स्यादेवेत्यत आह । तदिति । तद्विकारे ऽपि अहीनसत्रादौ वृषण्वत्यतिरिक्तानामृचामन्तएव निवेशः । अपूर्वत्वाद् अक्लृप्तस्थानत्वात् । अयं भावः । वृषण्वतीनां पाठक्रमेण स्थानस्य पर्यासप्राग्देशरूपस्य क्लृप्तत्वात्तत्स्थानविशिष्टानां तासामतिदेशः । तद्भिन्नानामपूर्वाणामृचां तत्स्थाने मानाभावादन्तएव निवेश इति ॥ १२ ॥

बहिष्पवमाने आगन्तूनां साम्नां मध्ये निवेशः । अधि· ५ ।

अन्ते तूत्तरयोर्दध्यात् ॥ १३ ॥

विवृद्धस्तोमकक्रतुषु माध्यन्दिनसवनार्भवपवमानयोः सामागमो न ऋगागम इति दशमे वक्ष्यते । तत्रागन्तूनां साम्नामन्ते मध्ये वा निवेश इति संशये पूर्वपक्षमाह । अन्तइति । उत्तरयोर्माध्यन्दिनार्भवपवमानयोः । आगन्तव इति स्तोमविवृद्धाविति सूत्रान्मण्डूकप्लुत्या ऽनुवर्तते । अन्ते दध्याद् योजयेत् । लिङ्गव्यत्यासेन विभक्तिव्यत्यासेन च नपुंसकं द्वितीयाविभक्तिरूपम् आगन्तूनीति ॥ १३ ॥

अपि वा गायत्रीबृहत्यनुष्टुप्सु वचनात् ॥ १४ ॥

सिद्धान्तमाह । अपि वेति । गायत्रीत्रिष्टुबनुष्टुप्सु सामावापः नान्यच्छन्दस्कासु वचनात् । त्रीणि ह वै यज्ञस्योदराणि गायत्री बृहत्यनुष्टुप् चात्र ह्येवावपन्त्यत एवोद्वपन्तीति वचनात् ॥ १४ ॥

ग्रहेष्टकादीनां क्रत्वग्निशेषत्वम् । अधि· ६ ।

ग्रहेष्टकमौपानुवाक्यं सवनचितिशेषः स्यात् ॥ १५ ॥

अदाभ्यं गृह्णाति अंशुं गृह्णातीत्यनारभ्य श्रुतम् । एषां ग्रहाणां प्रकृतौ समावेश इति तथा चित्रिणीरुपदधाति वज्रिणीरुपदधातीत्यासामिष्टकानामपि चयने समावेश इति च तृतीये स्थितम् । तथा ऽपि ग्रहाणामदाभ्यादीनि सवनाङ्गम् । तथा उदाहृता इष्टकाः चित्यङ्गं ग्रहैः

सवनानामिष्टकाभिः चितेश्च जघन्यत्वाद् इत्यभिप्रायेण पूर्वपक्षमाह । यहेति । औपानुवाक्यमनारभ्य पठितम् । शेषं स्पष्टम् ॥ १५ ॥

क्रत्वग्निशेषो वा चोदितत्वादचोदना तु पूर्वस्य ॥ १६ ॥

सिद्धान्तमाह । क्रत्वग्नीति । क्रतुशेषाः उक्तग्रहा, अग्निशेषा इष्टकाः चोदितत्वात् । यो ऽदाभ्यं गृहीत्वा यजते इति यागाङ्गत्वस्य. इष्टकाभिरग्निं चिनुतइति द्वितीयाश्रुत्येष्टकासामान्यं प्रति अग्नेः प्राधान्यस्य च चोदितत्वात् । पूर्वसवनचित्यङ्गत्वस्य अचोदना प्रमाणागम्यत्वाभावः ॥ १६ ॥

चित्रिण्यादीनां मध्यमचितावुपधानम् । अधि· ७ ।

अन्ते स्युरव्यवायात् ॥ १७ ॥

भवत्वग्न्यङ्गत्वमेतासामुपधानं यावदन्ते । क्लृप्तक्रमैः पदार्थैरव्यवधानं संपद्यतइत्यभिप्रायेण पूर्वपक्षमाह । अन्तइति । स्पष्टम् ॥ १७ ॥

लिङ्गदर्शनाच्च ॥ १८ ॥

उक्तार्थे लिङ्गमप्याह । लिङ्गेति । आवपनं वा उत्तमा चितिरन्या अन्या उपदधाति । आवपनं निराश्रितानां निवासस्थानम् ॥ १८ ॥

मध्यमायां तु वचनाद्ब्राह्मणवत्यः ॥ १९ ॥

सिद्धान्तमाह । मध्यमायामिति । याः ब्राह्मणवत्यः लिङ्गक्रमसमाख्याभिरक्लृप्तस्थानाः केवलं ब्राह्मणवाक्यविहितमात्राः ताः मध्यमचितौ वचनात् । यां कां चन ब्राह्मणवतीमिष्टकामभिजानीयात्तां मध्यमायामुपदध्यादिति वचनात् ॥ १९ ॥

लोकंपृणातः पूर्वं चित्रिण्याद्युपधानम् । अधि· ८ ।

प्राग् लोकंपृणायाः तस्याः संपूरणार्थत्वात् ॥ २० ॥

भवतु मध्यमचितौ, तत्रापि सर्वान्ते अव्यवधानायेति पूर्वपक्षे सिद्धान्तमाह । प्रागिति । लोकंपृणेष्टकाभ्यः प्राक्, तस्याः लोकंपृणायाः संपूरणार्थत्वाच् छिद्रपूरणार्थत्वात् । लोकंपृणानन्तरमुपधाने आसां छिद्रपूरकाभावेन सच्छिद्रमेवेदं स्यादिति भावः ॥ २० ॥

इष्टिसंस्कृताग्नावग्निहोत्राद्यनुष्ठानम् । अधि० ६ ।

संस्कृते कर्म संस्काराणां तदर्थत्वात् ॥ २१ ॥

केवलमाधानमात्रे जाते पवमानेष्टेः प्रागप्यग्निहोत्राद्यनुष्ठेयमिति उत्सूत्रे पूर्वपक्षे सिद्धान्तमाह । संस्कृतइति । संस्कृते यावत्संस्कारसंस्कृते वस्तुनि सति पश्चात्कर्म अग्निहोत्रादिरूपं संस्कारस्य कर्मार्थत्वात् । आधानपवमानेष्टिभ्यामाहवनीयसिद्धौ पश्चात्तस्मिन्होम इति भावः ॥ २१ ॥

अनन्तरं च व्रतं तद्भूतत्वात् ॥ २२ ॥

ननु आहिताग्निर्न्न ह्लिचं दार्वभ्यादध्यादित्यादीनि आहिताग्निकर्तृकाणि व्रतानि तान्यपि पवमानेष्ट्यनन्तरं स्युरित्यत्राह । अनन्तरमिति । अनन्तरमाधानानन्तरं व्रतं तस्य आधानस्य भूतत्वाद् उत्पन्नत्वात् । आहिताग्निर्न्न ह्लिचमिति पूर्वोदाहृतवाक्येन आहितः आधानसंस्कृतः अग्निर्यस्येति व्रतनिमित्तत्वेन आधानस्यैव ग्रहणादिति भावः ॥ २२ ॥

पूर्वं च लिङ्गदर्शनात् ॥ २३ ॥

नन्वग्निं वै सृष्टमग्निहोत्रेणानुद्रवन्तीत्यर्थवादलिङ्गं प्रागिष्टेरग्निहोत्रं द्रढयतीति पूर्वपक्ष्याशङ्कते । पूर्वमिति । पूर्वमिष्टेः पूर्वमग्निहोत्रमुक्तलिङ्गात् ॥ २३ ॥

अर्थवादो वा ऽर्थस्य विद्यमानत्वात् ॥ २४ ॥

समाधत्ते । अर्थेति । अर्थस्य अग्निहोत्रस्य आधानाङ्गभूतस्य तूष्णीं विहिताग्निहोत्रस्य विद्यमानत्वात् । तदर्थवादः, न नित्याग्निहोत्रप्राप्त्यर्थः ॥ २४ ॥

न्यायविप्रतिषेधाच्च ॥ २५ ॥

न्यायस्य आधानाङ्गभूताग्निहोत्रार्थवादस्यमीमांसारूपस्य विप्रतिषेधाद् विरोधात् । तथा हि ब्रह्मवादिनो वदन्ति होतव्यमग्निहोत्रं न होतव्यमिति यद्यजुषा जुहुयाद् अयथापूर्वमाहुतिं जुहुयाद् यत्र

जुहुयाद् अग्निः पराभवेत् तूष्णीमेव होतव्यम् इति । अत्र यजुषा होमपक्षे अयथापूर्वमिति दोषो दत्तः यथापूर्वं सर्वसंमतः पवमानेष्ट्युत्तरं यजुषा अग्निहोत्रहोमः तद्विरुद्धः स्यादिति दूषणदानेन पवमानेष्टेः प्राग् यजुषा होमो न सर्वसंमत इति न्यायविप्रतिषेधो ज्ञेयः ॥ २५ ॥

अग्निचिद्वर्षणादिव्रतानां क्रत्वन्ते ऽनुष्ठानम् । अधि॰ १० ।

संचिते त्वग्निचिद्युक्तं प्रापणान्निमित्तस्य ॥ २६ ॥

अग्निचिद्वर्षति न धावेदिति अयं नियमः केवलं चित्युत्तरमुत चितावनुष्ठितक्रतूत्तरमिति संशये पूर्वपक्षमाह । संचितइति । अग्निचिद्युक्तम् । अग्निचित्पदयुक्तवाक्यविहितं व्रतं संचिते चयनमात्रनिर्वृत्तौ सत्यां कार्यं निमित्तस्य चयनानुष्ठानरूपस्य प्रापणात् । प्राप्तत्वात् । आधानव्रतवत् ॥ २६ ॥

क्रत्वन्ते वा प्रयोगवचनाभावात् ॥ २७ ॥

सिद्धान्तमाह । क्रत्वन्तइति । क्रत्वन्ते चित्यधिकरणक्रत्वन्ते व्रतानि चितिप्रयोगवचनाभावात् । चितेर्यः प्रयोगः अनुष्ठानं तद्बोधकशब्दाभावात् । अयं भावः । अग्निचिदित्यत्र, अग्नौ चेरिति पाणिनिसूत्रं, चितिरूपे ऽग्नौ तत्साध्यकर्मणि क्रतौ निवृत्ते तस्माच्चिधातोः क्विप् कर्तरि स्यादित्यर्थः । इत्थं चाग्निचित्कर्तृक्रतमिदं, क्रत्वनुष्ठानं विना ऽग्निचित्पदप्रवृत्तिनिमित्तमेव नास्तीति क्रत्वनुष्ठानात्प्राग् न वर्षति धावननिषेधः । पूर्वाधिकरणे आहिताग्निकर्तृकनियमः । तत्राहितपदेन पवमानेष्ट्यन्तानुष्ठातर्याहितशब्दप्रयोग इत्यत्र नानुशासनमिति वैषम्यमिति ॥ २७ ॥

अग्नेः कर्मत्वनिर्देशात् ॥ २८ ॥

उक्तार्थे युक्त्यन्तरमाह । अग्नेरिति । य एवं विद्वानग्निं चिनुतइत्यत्र अग्निपदोत्तरद्वितीयाश्रवणेन अग्निरीप्सिततमः प्रतीयते चयनेनाग्निं भावयेदिति । अयं भावः अग्नेः कर्मत्वनिर्देशादुक्तदिशा अग्न्यर्थत्वे चयनस्य सिद्धे तदर्थत्वं च न तदुत्पादकत्वं प्रत्यक्षविरोधात् । किं तु अग्निना कार्ये क्रतुरूपे जननीये सहकारितया । सहकारित्वमपि साङ्गक्र

तुसमाप्तिपर्यन्तमग्न्याधारतया । अतः साङ्गप्रधानसाधनभूताग्न्याधारतानिमित्तं चिद् इत्यनेन प्राप्तम् । तन्निमित्तं क्रतूत्तरमेव संपद्यतइति ॥ २८ ॥

दीक्षाया इष्टिसिद्धत्वम् । अधि॰ ११ ।

परेणावेदनाद्दीक्षितः स्यात्सर्वैर्दीक्षाभिसंबन्धात् ॥ २९ ॥

आग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षिष्यमाण इति, दण्डेन दीक्षयतीति, दीक्षितो न ददाति न जुहोतीत्यादयो दीक्षितनियमाः सर्वान्तउतेष्ट्यन्तइति संशये पूर्वपक्षमाह । परेणेति । परेणाध्वर्युणा आवेदनान्निर्देशादूर्ध्वमदीक्षिष्टायं ब्राह्मण इति निर्देशादूर्ध्वमित्यर्थः । दीक्षितः स्यात् । सर्वैः पूर्वोदाहृतवाक्यैः दीक्षाभिसंबन्धात् । दीक्षारूपक्रियया संबन्धप्रतिपादनात् । विनिगमकाभावादिति भावः ॥ २९ ॥

इष्ट्यन्ते वा तदर्थो ह्यविशेषार्थसंबन्धात् ॥ ३० ॥

सिद्धान्तमाह । इष्ट्यन्तइति । दीक्षणीयेष्ट्यन्तएव दीक्षितः । हि यतः तदर्थो दीक्षितत्वसंपादनार्था सेष्टिः क्रियार्थक्रियायां विधीयमानल्टः श्रवणादिति भावः । दण्डेन दीक्षयतीत्यत्र अविशेषेण क्रियाविशेषशून्येन अर्थेन द्रव्यरूपार्थेन संबन्धात् । अयं भावः । दीक्षितत्वमलौकिको धर्मः तदुत्पादने क्रियैव समर्था न दण्डादिरूपं द्रव्यं, क्रियायामपि तदुत्पादकत्वं शास्त्रैकगम्यं दीक्षिष्यमाण इत्यत्र ल्टा इष्ट्याः कार्यं तदिति प्रतिपत्तुं शक्यते । दण्डेन दीक्षयतीत्युक्ते दण्डस्यायोग्यत्वात्क्रियाविशेषस्याश्रवणाद्वैषम्यमिति । इदमुपलक्षणं धारणरूपक्रियाद्वारा तस्य जनकत्वे यावत्कालं शास्त्रे धारणं विहितं तदुत्तरमेव तदुत्पत्तिरिति वक्तव्यतया मेखलया यजमानं दीक्षयतीति मेखलाधारणस्यावभृथपर्यन्तं सत्त्वात्तदुत्तरमेव दीक्षितनियमाः स्युः ॥ ३० ॥

समाख्यानं च तद्वत् ॥ ३१ ॥

यथोक्तयुक्त्या दीक्षितत्वसंपादकत्वमिष्टेः तद्वद् दीक्षणीयेति समाख्यानमपि तत्साधकम् ॥ ३१ ॥

काम्येष्टीनामनियमेनानुष्ठानम् । अधि० १२ ।

अङ्गवत्क्रतूनामानुपूर्व्यम् ॥ ३२ ॥

ऐन्द्राग्नमेकादशकपालं निर्वपेत्प्रजाकाम इत्यादिकाम्येष्टयः क्रमेण पठिताः । तासामनुष्ठानं पाठक्रमेण उत यथेच्छमिति संशये पूर्वपक्षमाह । अङ्गवदिति । क्रतूनां काम्येष्टीनामानुपूर्व्यं पाठक्रमेणानुष्ठानम् अङ्गवत्प्रयाजादिवत् ॥ ३२ ॥

न वा ऽसंबन्धात् ॥ ३३ ॥

सिद्धान्तमाह । नेति । न पाठक्रमः असंबन्धात् तेषां परस्परमसंबन्धात्प्रयोगभेदादिति भावः ॥ ३३ ॥

काम्यत्वाच्च ॥ ३४ ॥

काम्यत्वात् । यथा पाठः तेनैव क्रमेण तत्तदिच्छा भवतीत्यत्रापि मानाभावादिति भावः ॥ ३४ ॥

आनर्थक्यान्नेति चेत् ॥ ३५ ॥

ननु क्रमेण पाठानर्थक्यमाशङ्कते । आनर्थक्यादिति । न, यथेच्छक्रमो न इति चेत् ॥ ३५ ॥

स्याद्विद्यार्थत्वाद्यथा परेषु सर्वस्वारात् ॥ ३६ ॥

क्रमपाठस्य अपूर्वजनकत्वेन सार्थकतां दर्शयति । स्यादिति । स्पष्टो ऽर्थः ॥ ३६ ॥

यज्ञानामग्निष्टोमपूर्वकत्वम् । अधि० १३ ।

य एतेनेत्यग्निष्टोमः प्रकरणात् ॥ ३७ ॥

एष वाव प्रथमो यज्ञो यज्ज्योतिष्टोमस्तदेतेनानिष्टवाचान्येन यजेतेत्यत्र एतच्छब्देन सप्तसंस्याग्रहणमुत ज्योतिष्टोमग्रहणमिति संशये पूर्वपक्षस्यातिशिथिलतयोत्तरपक्षमाह । य एतेनेति । स्पष्टो ऽर्थः ॥ ३७ ॥

लिङ्गाच्च ॥ ३८ ॥

उक्तार्थे लिङ्गमाह । लिङ्गाच्चेति । लिङ्गमेवं पूर्वोदाहृतवाक्यशेषः श्रूयते, तस्य नवतिशतं स्तोत्रीया इति । नवत्युत्तरशतमित्यर्थः । एतत्संख्यासंपत्तिश्चेत्थम् । बहिष्पवमानस्य त्रिवृत्त्वात् स्तोत्रीयाः ९ । एकैका-

ज्यस्तोत्रस्य पञ्चदशेति चतुर्णामाज्यस्तोत्राणाम् ६०। माध्यंदिने पवमाने १५। पृष्ठस्तोत्राणि चत्वारि एकैकस्य सप्तदशेति मिलित्वा ६८। आर्भवपवमाने संख्या १७। यज्ञायज्ञीये २१। एवं च नवत्युत्तरं शतम्। इदं लिङ्गं ज्योतिष्टोमातिरिक्ते नास्त्यतो ऽपि एतच्छब्दवाच्यो ज्योतिष्टोम इति भावः ॥ ३८ ॥

ज्योतिष्टोमविकाराणामग्निष्टोमपूर्वकत्वम् । अधि० १४ ।

अथान्येनेति संस्थानां सन्निधानात् ॥ ३९ ॥

पूर्वोदाहृतवाक्ये, नान्येन यजेतेत्यत्रान्यशब्दः सप्तसंस्थामात्रपरः सत्राहीनादिसाधारणो वेति संशये पूर्वपक्षमाह । अथेति । यथा एतद्घटान्यमानयेत्युक्ते ऽपि एतद्घटभिन्नं स्वगेहस्थमेवानयति न गेहान्तरस्थं, तथा प्रकृते ऽपि ज्योतिष्टोमान्या ज्योतिष्टोमसन्निहिताः संस्था एवेति भावः ॥ ३९ ॥

तत्प्रकृतेर्वा ऽऽपत्तिविहारौ हि न तुल्येषूपपद्येते ॥ ४० ॥

सिद्धान्तमाह । तत्प्रकृतेरिति । सः ज्योतिष्टोमः प्रकृतिर्यस्य यस्य तावतां सर्वेषामन्यशब्देन ग्रहणम् । हि यतः, आपत्तिः अन्यस्य यत्स्वातन्त्र्यं तत्प्राप्तिः, विहारः अन्यपदार्थैरन्यस्योपभोगः । तुल्येषु स्वाभिन्नेषु भेदाघटितसादृश्यवत्सु नोपपद्यते । अयं भावः । ज्योतिषां त्रिवृत्पञ्चदशसप्तदशैकविंशादिरूपाणां स्तोमो यत्रेति व्युत्पत्त्या ज्योतिष्टोमपदवाच्याः सर्वाः संस्थाः तथा ऽपि येन स्तोत्रेण क्रतुसमाप्तिः तन्नाम्ना व्यवहारः । ज्योतिष्टोमत्वं च सप्तसंस्थासाधारणं रूपम् । एतेनेत्यनेन प्रथमसंस्थारूपस्याग्निष्टोमस्यैव ग्रहणमिति सिद्धम् । तत्प्रतियोगिकभेदवानित्यनेन शेषसंस्थानां षण्णामेव ग्रहणे ज्योतिष्टोमनिष्ठस्वातन्त्र्यप्राप्तिरूपापत्तेरन्यभोगसाधनैरवश्योपभोगरूपविहारस्य चार्थवादेन कथनं विरुध्यते । प्रजापतिर्वा अग्निष्टोमः उत्तरानेकाहानसृजत ते सृष्टा अब्रुवन्न वै प्रभवाम इति तेभ्यः स्वातन्त्र्यं प्रायच्छत्तया च ते प्राभवन्निति । आपत्तिः प्राप्तिः । यथा वा अग्नेर्जाता अन्ये ऽग्नयो विह्रियन्त एवं वा एतस्माद्यज्ञादन्ये क्रतवो विह्रियन्त इति । एतस्माज्ज्योतिष्टोमादन्ये क्रतवः

विह्रियन्ते शोभन्ते । ज्योतिष्टोमादङ्गानवाप्य शोभन्ते इति स्तुतिः विहारप्राप्तिरूपा अहीनसत्रादिष्वन्यशब्देन गृह्यमाणेषु तेषां ज्योतिष्टोमान्यत्वादन्यस्मिञ् ज्योतिष्टोमे यत्स्वातन्त्र्यमितरनिरपेक्षफलजनकत्वं तद् अन्येषामहीनादीनामपीत्युपपद्यते । यदि संस्थामात्रं तदा तस्य ज्योतिष्टोमरूपत्वे तत्र स्वातन्त्र्यस्य क्लृप्तत्वेन तत्प्राप्तिकथनम् अनयैव दिशा विहारप्राप्तिकथनं च विरुध्येतेति ॥ ४० ॥

प्रशंसा च विहरणाभावात् ॥ ४१ ॥

पूर्वपक्ष्याशङ्कते । प्रशंसेति । प्रशंसा केवलमविद्यमानगुणैः स्तुतिमात्रम् । कुतः, विहरणाभावात् । ज्योतिष्टोमाङ्गानां प्रकरणेन ज्योतिष्टोमएव विश्रान्तत्वेनोत्तरक्रतुषु तदसंक्रमात् । विहारपदमाप्तेरप्युपलक्षकम् । तस्याप्यभावात् पूर्वसूत्रेण तत्प्राप्तिविरोध इत्युक्तं तन्नेति भावः ॥ ४१ ॥

विधिप्रत्ययाद्वा न ह्यकस्मात्प्रशंसा स्यात् ॥ ४२ ॥

समाधत्ते । विधीति । विधिप्रत्ययात् प्रकरणेन ज्योतिष्टोमे विश्रान्ता अपि प्रकृतिवत्कर्तव्यम् इत्यतिदेशविध्यनुभवात् तं गृहीत्वैव विहारप्रशंसा । तद्धर्माणां प्रापकशास्त्राभावे अकस्मात्प्रशंसा कथं स्यात् ॥ ४२ ॥

एकानेकस्तोमक्रानां सर्वेषामग्निष्टोमपूर्वकत्वम् । अधि० १५ ।

एकस्तोमो वा क्रतुसंयोगात् ॥ ४३ ॥

अस्त्वन्यशब्दस्य ज्योतिष्टोमविकारपरत्वं तथाऽपि त्रिवृन्मात्रस्तोमको यः तथा पञ्चदशमात्रस्तोमकश्च यः एवमेकस्तोमका ये तेषामेव ग्रहणं नेतरेषामित्यभिप्रायेण पूर्वपक्षमाह । एकस्तोम इति । एकस्तोमे अन्यशब्दः । क्रतुसंयोगात् । अर्थवादे यो वै त्रिवृदन्यं यज्ञक्रतुमापद्यते स तं दीपयतीति । त्रिवृत्स्तोमः अन्यं क्रतुं चोदकशास्त्रेण प्राप्नोति सः त्रिवृत्तं क्रतुं दीपयतीति एकस्यैव त्रिवृतः क्रतुना संबन्धात् ॥ ४३ ॥

सर्वेषां वा चोदनाविशेषात्प्रशंसा स्तोमानाम् ॥ ४४ ॥

सिद्धान्तमाह । सर्वेति । अन्यपदेन सर्वेषां ग्रहणं चोदनाविशेषात् ।

न्यशब्दशक्यार्थाविशेषात् । दीपयतीति स्तोमानां स्तुतिमात्रं, न हि सर्वक्रतुग्रहणे प्रशंसा विरुध्यते यतः संकोचः स्यात् ॥ ४४ ॥

इति श्रीमज्जैमिनिसूत्रवृत्त्यां पञ्चमस्याध्यायस्य तृतीयः पादः ॥ ३ ॥

पाठक्रमापेक्षया श्रुत्यर्थयोर्बलवत्त्वम् । अधि० १ ।

क्रमकोपो ऽर्थशब्दाभ्यां श्रुतिविशेषादर्थपरत्वाच्च ॥ १ ॥

श्रुत्यर्थक्रमयोः पाठक्रमेण विरोधे, यथा ऽऽश्विनग्रहग्रहणे अग्निहोत्रयवागूपाके च, प्रमाणानां साम्यात्प्रबलदुर्बलभावे मानाभावाद्विकल्पेनानुष्ठानमिति पूर्वपक्षे सिद्धान्तमाह । क्रमेति । अर्थः पूर्वोदाहृतद्वितीयप्रमाणं शब्दः प्रथमं श्रुत्याख्यं प्रमाणं ताभ्यां क्रमप्रतिपादने क्रमकोपः पाठक्रमस्य बाधः स्यात् । श्रुतिविशेषात् । प्रत्यक्षश्रुतिगम्यत्वात् । अर्थपरत्वाद् अग्निहोत्ररूपार्थसाधकत्वेन यवागूपाकस्य तात्पर्यविषयत्वात् । पाठक्रमस्य आनुमानिकवाक्यगम्यत्वेन यवागूपाके फलकल्पनापत्त्या च दौर्बल्यमिति भावः ॥ १ ॥

मुख्यक्रमेणाग्नेयस्य पूर्वमवदानाद्यनुष्ठानम् । अधि० २ ।

अवदानाभिघारणासादनेष्वानुपूर्व्यं प्रवृत्त्या स्यात् ॥ २ ॥

दर्शयागे दध्युत्पत्तौ पूर्वं प्रवृत्तिरस्ति पश्चात्पुरोडाशोत्पत्तौ, मन्त्रपाठक्रमेण प्रदानं त्वग्नेः पश्चादिन्द्रस्य । एवं सति तत्तद्धविरवदानादौ क्रमविप्रतिपत्तौ पूर्वपक्षमाह । अवदानेति । अवदाने हविषां प्रयाजशेषाभिघारे वेद्यामासादने च आनुपूर्व्यं क्रमः प्रवृत्त्या प्रथमप्रवृत्त्या स्यात् ॥ २ ॥

यथाप्रदानं वा तदर्थत्वात् ॥ ३ ॥

सिद्धान्तमाह । यथेति । प्रदानक्रमेण अवदानादि तेषामवदानादीनां तदर्थत्वात् । प्रदानार्थत्वात् । मुख्यक्रमात्प्रवृत्तिक्रमो दुर्बल इति भावः ॥ ३ ॥

लिङ्गदर्शनाच्च ॥ ४ ॥

लिङ्गेति । प्रयाजशेषाभिघारे प्रथमं ध्रुवामभिघारयेत्प्रथममाज्यभागौ हि यक्ष्यन्भवतीति । प्रथममाज्यभागयोरग्नीषोमयोः प्रदानं तदीयं द्रव्यं ध्रुवायामस्ति तदभिघारप्राथम्ये प्रथमप्रदानकथनं लिङ्गम् ॥ ४ ॥

इष्टिसोमयोः पौर्वापर्यानियमः । अधि० ३ ।

वचनादिष्टिपूर्वत्वम् ॥ ५ ॥

दर्शपूर्णमाससोमयागयोः पूर्वापरभावो नियतो न वेति संशये पूर्वपक्षमाह । वचनादिति । दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेति वचनादिष्टिपूर्वत्वम् ॥ ५ ॥

सोमश्चैकेषामग्न्याधेयस्यर्तुनक्षत्रातिक्रमवचनात्तदर्थे-नानर्थकं हि स्यात् ॥ ६ ॥

सिद्धान्तमाह । सोमश्चेति । एकेषां केषां चिद्यजमानानां सोमः सोमयागश्च पूर्वो भवति । अग्नाधेयस्य य ऋतुः वसन्तादिः नक्षत्रं रोहिण्यादि तदतिक्रमवचनात् । सोमेन यक्ष्यमाणो नर्तुं सूर्क्षेन नक्षत्रमिति तयोः त्यागवचनश्रवणात् । तदर्थेन पूर्वपक्षसिद्धार्थेन योगे कालबाधकमिदं वचनं निरर्थकमेव स्यात् । कालबाधे फलाभावात् । सोमस्याधानानन्तर्ये वसन्ते ज्योतिषा यजेतेति सोमकालानुरोधेनाधानस्य प्राप्तवसन्तादिकालबाधः सफल इति भावः ॥ ६ ॥

तदर्थवचनाच्च नाविशेषात्तदर्थत्वं स्यात् ॥ ७ ॥

इतश्चाधानानन्तर्यं सोमस्येत्याह । तदिति । विशेषात् । सोमेन यक्ष्यमाण इतिविशेषवचनपूर्वतः तदर्थत्वात् सोमार्थत्वादाधानस्य तदर्थत्वं सोमार्थत्वं सोमेन कदा चिद्वा यक्ष्यमाण इति तात्पर्यं तदा इष्टिपशुबन्धादिभिः सर्वैरेव कदाचिद्यक्ष्यमाणत्वात्सोमो ऽपि तेभ्यो ऽविशिष्ट इति सोमेन यक्ष्यमाणो ऽग्नीनादधीतेत्यत्र यक्ष्यमाणान्तं पदं व्यर्थमेव स्यात् । तस्मात्तदाधानं केवलं सोमार्थं सत् स्वानन्तर्यमेव सोमस्य ज्ञापयतीति भावः ॥ ७ ॥

अयक्ष्यमाणस्य च पवमानहविषां कालविधा-नादानन्तर्याद्विशङ्का स्यात् ॥ ८ ॥

साधकान्तरमाह । अयक्ष्यमाणस्येति । यो ऽयक्ष्यमाणो ऽग्निमादधीत स पुरा संवत्सरात्पवमानहवींषि निर्वपेदिति । अयक्ष्यमाणः सोमेनेत्यर्थः । अनेन वचनेन पवमानहविषां सोमयागकर्तृत्वाभावे निमित्ते

कालविशेषो विधीयते । यावज्जीवं सोमयागकर्तृत्वाभाववान् पवमाने-ष्ट्यधिकारी न शास्त्रतः प्रसिध्यति सोमयागस्य नित्यत्वात् । तस्माद-नन्तरमयक्ष्यमाण इत्येव तदर्थो वाच्यः । तथा चेदृशकालविधानाद् आनन्तर्यात् सोमयागस्याधानानन्तर्याद् विशङ्का संशयाभावः स्यात् ॥ ८ ॥

इष्टिरयक्ष्यमाणस्य तादर्थ्येन सोमपूर्वत्वम् ॥ ९ ॥

एतदधिकरणफलमाह । इष्टिरिति । सोमेनानन्तरमयक्ष्यमाणस्य पूर्वमिष्टिः तादर्थ्येन सोमार्थत्वेन यक्ष्यमाणस्य इष्ट्याः सोमपूर्वत्वमिति विचारफलम् ॥ ९ ॥

ब्राह्मणस्यापीष्टिसोमयोः पौर्वापर्यानियमः । अधि० ४ ।

उत्कर्षाद्ब्राह्मणस्य सोमः स्यात् ॥ १० ॥

सोमपूर्वत्वविकल्पे ब्राह्मणस्य सोमपूर्वत्वं नियतं न वेति संशये पूर्वपक्षमाह । उत्कर्षादिति । ब्राह्मणस्येष्टेः पूर्वं नियमेन सोमः स्यात् । अग्नीषोमीयस्य वचनादुत्कर्षात् । आग्नेयो वै ब्राह्मणो देवतया स सोमेनेष्ट्वा ऽग्नीषोमीयो भवतीति यदेवादः पौर्णमासं हविः तदनुनिर्वपेदुभयदेवत्यो भवतीति वचनेन सोमोत्तरमग्नीषोमीयस्योत्कर्षात् । अग्नीषोमयागं विना शेषयागैः फलानुत्पत्तेः षड्यागानामुत्कर्ष इति भावः ॥ १० ॥

पौर्णमासी वा श्रुतिसंयोगात् ॥ ११ ॥

पूर्वपक्षान्तरमाह । पौर्णमासीति । केवलं पौर्णमासीत्रिकम् उत्कृ-ष्यते श्रुतिसंयोगात् । पूर्वोक्तवचने पौर्णमासं हविरनुनिर्वपेदिति श्रव-णात् ॥ ११ ॥

सर्वस्य चैककर्मत्वात् ॥ १२ ॥

प्रथमपूर्वपक्षं द्रढयति । सर्वेति । सर्वस्य षड्यागसमूहस्य उत्कर्षः एककर्मत्वाद् एकस्मिन्फले समुच्चयेन जनकत्वात् ॥ १२ ॥

स्याद्वा विधिः तदर्थेन ॥ १३ ॥

पक्षद्वयमसहमानः तृतीयं पूर्वपक्षमाह । स्यादिति । तदर्थेन ज्यो-तिष्टोमार्थेन ज्योतिष्टोमाङ्गत्वेन विधिः अपूर्वकर्मविधिः स्यात् पौर्णमा-सनामकमपूर्वं कर्म विधीयतइति भावः ॥ १३ ॥

प्रकरणात्तु कालः स्यात् ॥ १४ ॥

प्रथमपक्षमाह । प्रकरणादिति । प्रकरणाद् दर्शपूर्णमासप्रकरणात् कालः सोमयागोत्तरत्वरूपः कालविधिः स्यात् । प्रकरणबाधभिया तदुत्तरत्वरूपकालविधिमङ्गीकृत्य दर्शपूर्णमासयोरुभयोरुत्कर्षो न्याय्य इति भावः ॥ १४ ॥

नर्तुं प्रतीचेदित्यादिना सोमकालबाधः । अधि० ५ ।

स्वकाले स्यादविप्रतिषेधात् ॥ १५ ॥

एवं पूर्वपक्षे स्थिते अधिकरणान्तरमारभते । स्वेति । सोमेन यक्ष्यमाणो नर्तुन्सूर्क्षेन्न नक्षत्रमित्यनेनाधानकालो बाध्यतउत सोमयागकाल इति संशये पूर्वपक्षसूत्रं, स्वेति । ज्योतिष्टोमः स्वकाले स्यात् । ज्योतिष्टोमस्य प्रधानत्वेन तत्कालस्याविप्रतिषेधात् । अङ्गभूताधानकालस्यैव बाध इति भावः ॥ १५ ॥

अपनयो वाऽऽधानस्य सर्वकालत्वात् ॥ १६ ॥

सिद्धान्तमाह । अपनयो वेति । अपनयः प्रधानकालस्य बाधः । आधानस्य यदैवैनं यज्ञउपनमेद् अथादधीतेति सोमानुष्ठानश्रद्धायामाधानकालो न शोध्य इत्यर्थकेन वचनेनाधानकालबाधे तस्य सर्वकालत्वात् । बाधितस्य पुनर्बाधासंभवादिति भावः ॥ १६ ॥

पौर्णमास्यूर्ध्वं सोमाद्ब्राह्मणस्य वचनात् ॥ १७ ॥

पूर्वमुपक्रान्तपूर्वपक्षस्योत्तरं सिद्धान्तमाह । पौर्णमासीति । पौर्णमास्येव सोमादूर्ध्वं ब्राह्मणस्य वचनात् पूर्वोदाहृतवचनात् ॥ १७ ॥

एकं वा शब्दसामर्थ्यात्प्राक्कृत्स्नविधानम् ॥ १८ ॥

पौर्णमासं हविरपि न कृत्स्नमेकमग्नीषोमीयमेव । शब्दस्य पूर्वोक्तवचने अदःशब्दस्य सामर्थ्यात् । अदः पौर्णमासमित्यनेन समीपवर्त्तिन एव निर्देशादिति भावः । अतः प्राक् सोमात्प्राक् कृत्स्नस्य अग्नीषोमातिरिक्तस्य सर्वस्य विधानमनुष्ठानम् ॥ १८ ॥

आज्यस्य सोमादनुत्कर्षः । अधि० ६ ।

पुरोडाशस्त्वनिर्देशे तद्युक्ते देवताभावात् ॥ १९ ॥

नन्वग्निर्वै ब्राह्मण इति पूर्वोदाहृतवाक्ये केवलाग्नेरप्युपक्रमाद-दःशब्देन तदपि कुतो न गृह्यतइत्यत आह । पुरोडाश इति । पुरोडाशः अग्नीषोमीयपुरोडाशः तद्युक्ते अग्नियुक्ते सोमे देवतात्वसत्त्वात् । अनिर्देशे पूर्ववाक्ये उभयदेवत्यो भवतीति निर्देशेन एकदेवताकहविषः अनिर्देशात् । न केवलाग्नेरुत्कर्षः ॥ १९ ॥

आज्यमपीति चेत् ॥ २० ॥

ननु उपांशुयागे वैष्णवो ऽग्नीषोमीयः प्राजापत्यो वेति पक्षे अग्नीषोमीयसत्त्वादुपांशुयागो ऽप्युत्कृष्यतामिति शङ्कते । आज्यमिति । आज्यमाज्यद्रव्यकः उपांशुयागः ॥ २० ॥

न मिश्रदेवतात्वादैन्द्राग्नवत् ॥ २१ ॥

नेति । मिश्रदेवतात्वात् । एकदेवतात्वद्विदेवतात्वोभयमिश्रत्वाद्यागस्य तस्य यागस्य विष्णुः प्रजापतिश्च पक्षे भवतः । अतो द्विदेवत्यत्वं तस्मिन्ननियतमिति भावः । ऐन्द्राग्नवदिति एतदधिकरणाष्टमसूत्रे योज्यं दृष्टान्तरूपं न त्वत्रानाकाङ्क्षितत्वात् ॥ २१ ॥

विकृतानामिन्द्राग्नादीनां सद्यःकालता । अधि० ७ ।

विकृतेः प्रकृतिकालत्वात्सद्यस्कालोत्तराततिः तयोः प्रत्यक्षशिष्टत्वात् ॥ २२ ॥

ऐन्द्राग्नमेकादशकपालं निर्वपेत्प्रजाकाम इत्याद्या विकृतयः एकाहसाध्या उत द्व्यहसाध्या इति संशये सिद्धान्तेनोपक्रमते । विकृतेरिति । उत्तराततिः विकृतीष्टिसंघातः सद्यस्काला स्यात् । प्रकृतौ अमावास्यापौर्णमासीरूपो यः कालः यश्च पूर्वेद्युरिध्माबर्हिः करोतीति कालः तयोः प्रत्यक्षशिष्टत्वात् । प्रत्यक्षवचनविहितत्वात् । तत्र युक्तं द्व्यहकालसाध्यत्वम् । विकृतेः द्व्यहसाध्यत्वस्य प्रकृतिकालत्वादेव ग्रहणं चोदकशास्त्रेणैव प्राप्तं, तस्य य इष्ट्या पशुना यजेत सो ऽमावास्यायां पौर्णमास्यां वेति प्रत्यक्षवचनेन बाधितमिति भावः ॥ २२ ॥

द्वैयहकाल्ये तु यथान्यायम् ॥ २३ ॥

पूर्वपक्षमाह । द्वैयेति । विकृतेः द्वैयहकाल्ये दिनद्वयानुष्ठेयत्वे यथान्यायं प्रकृतिवत्कर्तव्यमिति न्यायसिद्धं भवति ॥ २३ ॥

वचनाद्वैककाल्यं स्यात् ॥ २४ ॥

तच्च द्वैयहकाल्यं प्रकृतावेव युक्तं न विकृतावित्याह । वचनादिति । पूर्वेद्युरिध्माबर्हिः करोतीति वचनात्तत्र तत् । विकृतौ चोदकशास्त्रमानुमानिकं तस्य य दृष्टेत्यनेन बाध इति भावः ॥ २४ ॥

सोमात्साचाय्यविकारादीनामुत्कर्षः । अधि० ८ ।

सान्नाय्याग्नीषोमीयविकारादूर्ध्वं सोमात्प्रकृतिवत् ॥ २५ ॥

सान्नायविकाराः पशुयागादयः काम्यपशुयागाः अग्नीषोमीयविकाराः अग्नीषोमीयमेकादशकपालं निर्वपेद्यं कामो नोपनमेदिति । ईदृशा विकृतयः सोमात्पूर्वमनुष्ठेया उत पश्चादिति संशये पूर्वमप्यविशेषादनुष्ठेयमिति पूर्वपक्षे सिद्धान्तमाह । सान्नाय्येति । स्पष्टार्थः । प्रकृतिवदित्यनेन प्रकृतौ द्वयोः सोमोत्तरकालस्य क्लृप्तत्वात्तद्विकृतौ तद्बाधो ऽयुक्त इति सूचितम् ॥ २५ ॥

सोमविकाराणां दर्शपूर्णमासाभ्यामूर्ध्वं कर्तव्यत्वम् । अधि० ९ ।

तथा सोमविकारा दर्शपूर्णमासाभ्याम् ॥ २६ ॥

ज्योतिष्टोमविकारा अहीनादयः पूर्वं सोमानुष्ठाने ऽपि प्राग् दर्शपूर्णमासाभ्यां कर्तव्याः उत तदूर्ध्वमिति संदेहे अविशेषादिच्छयेति पूर्वपक्षे सिद्धान्तमाह । तथेति । यथा सान्नायादिप्रकृतीनां ज्योतिष्टोमोत्तरत्वं तथा सोमविकाराणां दर्शपूर्णमासौ तयोरुत्तरं दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेति वाक्यस्थत्वाप्रत्ययेन दर्शपूर्णमासोत्तरकालस्य श्रुतिप्रमाणेनाङ्गत्वं क्लृप्तम् । सोमेन यक्ष्यमाणो ऽग्नीनादधीतेति आधानसोमयोः पूर्वोक्तयुक्त्या ऽऽनन्तर्यमात्रे सिद्ध आर्थिकं दर्शपूर्णमासपूर्वत्वमार्थिकस्याङ्गत्वाभावेनातिदेशासंभवाद्दर्शपूर्णमासोर्ध्वकालस्याङ्गभूतस्यातिदेश इति भावः ॥ २६ ॥

इति श्रीमज्जैमिनिसूत्रवृत्त्यां पञ्चमस्याध्यायस्य चतुर्थः पादः ॥ ४ ॥

समाप्तश्च पञ्चमो ऽध्यायः ॥ ५ ॥

यागादिकर्मणां स्वर्गादिफलसाधनत्वम्। अधि० १।

द्रव्याणां कर्मसंयोगे गुणत्वेनाभिसंबन्धः॥ १॥

षष्ठाध्यायारम्भः। तत्र प्रथमाधिकरणमध्यायविषयाधिकारोपोद्घातरूपम्। तथा हि। फलभोगित्वमेवाधिकारित्वम्। तच्च फलसिद्धौ तद्भोगादि। एतदधिकरणसिद्धान्तयुक्त्या फलस्यासिद्धौ पूर्वपक्षस्यैव दृढत्वेन फलाभावे अधिकाराध्यायो निर्विषयः स्यात्। अतः तदुपोद्घातत्वं युक्तम्। वस्तुतस्तु इदमधिकरणं सर्वशास्त्रस्यैवोपोद्घातरूपम्। तथा हि। उक्तयुक्त्या फलासिद्धौ भावार्थाधिकरणं लुप्तम्। तत्र किं भावशब्दाः फलसंबन्धिन उत द्रव्यगुणशब्दा इति यः संशयः तस्यानुपस्थितिः तदनुपस्थितौ फलस्य कालान्तरभाविनः कारणत्वं न संभवतीत्यपूर्वकल्पनमित्यपूर्वाधिकरणलोपः। ततः अपूर्वप्रयुक्तशब्दान्तरादिप्रमाणकः कर्मभेदो लुप्तः। एवं भेदाभावे सर्वं कर्मैकमेवेति अङ्गाङ्गिभावविचारलोपः। तन्मूलप्रयुक्तिक्रमविचारलोपः। एवं सप्तमादिषु प्रयाजादीनामतिदेशादिलोपः कर्मण ऐक्यादिति। अतः निखिलशास्त्रोपोद्घातरूपमिदमधिकरणम्। दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यत्र स्वर्गकामः यागं प्रति गुणः उत प्रधानमिति संशये पूर्वपक्षमाह। द्रव्याणामिति। द्रव्याणां स्वर्गादीनां कर्मणा यागेन संयोगे संबन्धे श्रूयमाणे गुणत्वेन संबन्धः कार्यः। अयं भावः। पूर्वपक्षे स्वर्गशब्दः सुखसाधनद्रव्यमात्रपरः द्रव्यस्य क्रियासाधनत्वं लोकसिद्धं, तस्य यावतः प्राप्तावाक्षेपेण कर्तुः यत्सुखसाधनं तेनैवायं कार्यः याग इति नियम्यते। स्वर्गकामः इत्यत्र स्वर्गेच्छावान्पुरुषो बुध्यते। तदिच्छाया आकारश्च मम स्वर्गेण यागो भवत्विति। स्वर्गस्तु द्रव्यरूपः सिद्धः यागस्तु श्रवणवेलायामसिद्ध इति सिद्धसाध्ययोः समभिव्याहारे सिद्धं साध्यायोपयुज्यतइति न्यायाद् यागस्य भाव्यत्वमेवोचितम्। अपि च भावनायां प्रथममन्वयवेलायां भाव्याकाङ्क्षा पश्चात्साधनाकाङ्क्षा, तत्र भाव्याकाङ्क्षायां पदान्तरोपात्तस्य भाव्यत्वापेक्षया एकपदश्रुत्या यागस्यैव अन्वयो भाव्यत्वेनोचितः। यद्यपि स्वर्गकाम इति विशिष्टार्थस्यैव विधिः प्रतीयते तथाऽपि आख्यातलक्षितकर्तृत्वेन

पुरुषस्य प्राप्तत्वात् पुरुषस्यानुवादः स्वर्गमात्रं साधनत्वेन विधीयते । यथा श्येने अतिदेशप्राप्तऋत्विजः अनूद्य लोहितोष्णीषादिरूपगुणमात्रविधानं तथेति अलं विस्तरेण ॥ १ ॥

असाधकं तु तादर्थ्यात् ॥ २ ॥

सिद्धान्तमाह । असाधकमिति । तादर्थ्यात् । स्वर्गार्थत्वाद्यागस्य असाधकं स्वर्गो यागसाधको न । अयं भावः । पुरुषस्य प्रथमं फले इच्छा फलं सुखं दुःखाभावो वा । तदनन्तरं तयोः कृत्यसाध्यत्वात्तदुपायसाध्यत्वाद् उपायेच्छा ततः तद्विषयिणी प्रवृत्तिः इति लोकानुभवः । क्रियायाः सुखदुखातिरिक्तत्वं लोकगम्यमतः तद्विषयिणी इच्छा न संभवति । तयोः साधनविषयिण्यपि न । तव मते यागस्य फलाभावात् । मन्मते स्वर्गकामस्य भाव्यत्वेनान्वये विशेष्ये पुरुषे भाव्यत्वासंभवे ऽपि सविशेषणे हि विधिनिषेधौ सति विशेष्ये बाधे विशेषणमुपसङ्क्रामत इति न्यायेन स्वर्गे साध्यतोपपत्तिः । यत्तु असिद्धस्य साधनत्वं न संभवतीति तन्न । तृप्तिकामो भोजनं कुर्यादित्यादौ असिद्धस्यापि भोजनस्य तृप्तिसाधनत्वग्रहणे सिद्धसाध्ययोरि[ति] न्यायस्य व्यभिचारात् । तस्माद्यागस्य स्वर्गफलत्वमपरिहार्यमिति सर्वो ऽपि शास्त्रारम्भः सार्थक इति ॥ २ ॥

प्रत्यर्थं चाभिसंयोगात्कर्मतो ह्यभिसंबन्धस्तस्मात्कर्मोपदेशः स्यात् ॥ ३ ॥

ननु पदश्रुत्या भाव्यत्वं यागस्येत्युक्तं तस्योत्तरं किमित्याकाङ्क्षायामाह । प्रत्यर्थमिति । हि यतः उक्तयुक्त्या कर्मतः यागेन साकं कस्यचित्सम्बन्ध आवश्यको ऽतः प्रत्यर्थं स्वर्गं प्रति अभिसंयोगः साध्यताख्यः संबन्धः कल्प्यः । तस्मात्स्वर्गमुद्दिश्य कर्मोपदेशः यागविधिः । अयं भावः । उक्तयुक्त्या उत्पत्तिशिष्टपुरोडाशाद्यवरुद्धे यागे द्रव्यस्यानाकाङ्क्षित्वाद् यागप्रवृत्त्यर्थं फलस्याकाङ्क्षितत्वात् पदश्रुतिं बाधित्वा वाक्यश्रुत्यादर इति भावः ॥ ३ ॥

यागादिषु मनुष्यस्यैवाधिकारः । अधि० २ ।

फलार्थत्वात्कर्मणः शास्त्रं सर्वाधिकारं स्यात् ॥ ४ ॥

दचः परः प्रयुज्यते, यस्य तु देशान्तरे विधानं नास्ति स स्थानिदेश एव भवति, तत्प्रसङ्गे हि तस्य विधानं, विशिष्टदेशश्च स्थानिनः प्रसङ्गः, इह तु मित्त्वेनायं न्यायो बाध्यते, स्थानषष्ठीनिर्देशसामर्थ्यात्तु देशान्तरे प्रयुज्यमानोऽपि रोपधे निवर्त्तयतीति सर्वमवदातम् । भारद्वीजीयास्तु सनः क्तिचीत्यतो लोपग्रहणमनुवर्त्त्य रोपधयोर्लोपं रमागमं चान्यतरस्यां विदधति । 'भ्रज्जनमिति' । ल्युटि सकारस्य जश्त्वं दकारस्तस्य चुत्वं जकारः । 'पूर्वविप्रतिषेधेनेति' । रमोऽवकाशः भ्रष्टा भ्रष्टुं, संप्रसारणस्यावकाशः भृज्जति, सार्वधातुकत्वादत्र रमोऽप्रसंगः, भृष्टः भृष्टवानित्यत्र पूर्वविप्रतिषेध, अथैवं कस्मान्नोक्त भ्रस्जोरस ऋदन्यतरस्यामिति, भ्रस्जेः संबन्धी रसिति यो ऽयं संघातस्तस्य ऋ इत्ययमादेशो भवतीत्यर्थः । तस्याक्ङिति गुणे कृते भर्जनमित्यादि रूपं भवति, ऋकाराभावपक्षे तु भ्रज्जनमिति, क्ङिति ऋकारपक्षे भृष्टमिति तदभावपक्षे तु ग्रहिज्यादिसूत्रेण संप्रसारणे सति तदेव रूपं भवतीति पूर्वविप्रतिषेधो न वक्तव्यो भवति । उपदेशग्रहणमपि नानुवर्त्यं, नह्यत्र पक्षे रीकः प्रसंगोऽस्ति, अत्रापि पक्षे पूर्वविप्रतिषेधो वक्तव्यः, क्व, सिचि वृद्धावभार्क्षीदिति, अन्यथा ऋकारविकल्पं बाधित्वा परत्वाद्धलन्तलक्षणा वृद्धिर्नित्यं प्राप्नोति, रम्भावे तु क्रियमाणे परत्वाद्वृद्धौ कृतायामपि पुनः प्रसङ्गविज्ञानमिति सिद्धमभार्क्षीदिति । न चान्तरङ्गत्वात्पूर्वमृकारः, न सिच्यन्तरङ्गमस्तीति वक्ष्यमाणत्वात् । एवं तर्हि नित्यत्वादृभावः, स हि कृतायामपि वृद्धौ प्राप्नोत्यकृतायामपि, एकदेशविकृतस्यानन्यत्वात्, शब्दान्तरप्राप्तिरपि नास्ति, वृद्धिस्तु कृते ऋभावे ऋकारस्याकृते त्वकारस्येति शब्दान्तरप्राप्तेरनित्या, तस्मादृकार एव विधेयः, तथा तु न कृतमित्येव, भ्रस्जेर्भृज्जिरित्युच्यमाने यङ्लुकि दोषः, साभ्यासस्य भृज्जिभावः प्राप्नोति, इष्यते तु तत्रापि रोपधयोरेव निवृत्ती रम्भावश्च बरीभृज्यतइति, यङि संप्रसारणे 'रीगृत्वत इति वक्तव्य'मिति रीक्, तस्य तन्मध्यपतितस्य तद्ग्रहणात्प्रसङ्गः ॥

"अतो लोपः" ॥ 'धिनुतः कृणुतइति' । इवि दिवि धिवि प्रीणनार्थाः, कृवि हिंसाकरणयोः, लट्, तस्य तस्, 'धिन्विकृण्व्योर च' ति

उप्रत्ययो ऽकारोन्तादेशश्च, तस्य चोप्रत्यये ऽतो लोपः, एकवचने त्वन्त्येनातो लोपमुप्रत्ययस्य गुणे कृते ऽतो गुण इति पररूपेणापि सिद्धिः। 'चेता स्तोतेति'। तपरकरणस्य पृथग्व्यावर्त्यस्य दर्शयिष्यमाणत्वात्तद्रहितस्याकारमात्रस्येदं प्रत्युदाहरणम्, एवं च गुणवृद्धोर्दीर्घेषु चरितार्थत्वाद्द्वयेषु लोपप्रसङ्गः, ननु च परत्वाद्गुणो भविष्यति, तस्मात्कुटादिषु गुपुरीषोत्सर्गे ध्रुव गतिस्थैर्ययोरित्यत्र लोपप्रसङ्ग उदाहार्यः। 'धाता वातेति'। असति तकारे ऽत्रापि लोपप्रसङ्गः, आतो लोप इटि चेत्येतन्नियमार्थं भविष्यति, आत इट्येवाजादौ च क्ङिति नान्यत्रेति। नैतदस्ति, विपरीतोऽपि नियमः स्यात्, आत एवेटि नान्यस्येति, तथा च चिकीर्षितेत्यत्र न स्यात्। 'वृद्धिदीर्घाभ्यामिति'। 'अचो ञ्णिती'ति वृद्धेरवकाशः गौरिति, अतो लोपस्यावकाशः चिकीर्षितेति, चिकीर्षक इत्यत्रोभयप्रसङ्गे पूर्वविप्रतिषेधः, वृद्धौ तु युकि चिकीर्षायक इति स्यात्, अकृत्सार्वधातुकयोरित्यस्य दीर्घस्यावकाशः चीयते, अतो लोपस्यावकाशः स एव, चिकीर्ष्यत इत्यत्रोभयप्रसङ्गे पूर्वविप्रतिषेधः ॥

"यस्य हलः"॥ यस्येति यद्यागन्तुको ऽकारः, ततो वर्णग्रहणम्, अन्यथा तु संघातग्रहणमिति सन्देहसम्भवादाह। 'यस्येति संघातग्रहणमिति'। अतस्याकारस्याविवक्षायां कारणाभावादिति भावः। 'अतो लोप इत्यनेनैव सिद्धत्वादिति'। अस्तु तर्हि नियमः, यस्य हल एव नान्यतः, लोलूयिता पोपूयिता, केमर्थ्याद्धि नियमो भवति विधेयं नास्तीति कृत्वा, इह चास्ति विधेयं, किम्, अन्त्यस्य लोपः प्राप्तः सर्वस्य विधेयः, तत्रापूर्वो विधिरस्तु नियमो वेति, अपूर्वो विधिरेव भविष्यति, एवमपि क्यस्य विभाषायां दोषः, समिधमिच्छति समिध्यति, समिध्यतेस्तृच्, इट्, समिधिता, यदा लोपस्तदा सर्वस्य लोपः, यदा त्वलोपपक्षस्तदा सर्वस्यालोपः प्राप्नोति, संघातग्रहणे हि यस्य हल इत्यनेन येन नाप्राप्तिन्यायेन अतो लोपो बाध्यो यलोपो ऽपि क्यस्य विभाषेति विकल्पेन बाध्यः, ततश्च पक्षे संघातस्यैव श्रवणं स्यात्, यलोपवदल्लोपस्यापि

१. कुटादिष्विति नास्ति ह पु०।

विकल्पेन बाधनादित्यत आह । 'हल इति वेत्यादि' । एवं च क्यस्य विभाषेति यकारस्यैव विकल्पेन लोपो ऽकारस्य त्वतो लोप इत्यनेन नित्यमिति, सिद्धमिष्टमवश्यं चातो लोप एवात्रैष्टव्यः, अन्यथा पापचक इत्यादावत उपधाया इति वृद्धिः स्यात्, स्थानिवद्भावाच भवति, तस्मात्संघातस्य ग्रहणमवयवशस्तु लोप इति, तदेव युक्तम् । 'मव्यितेति' मव्यतिः संयोगान्तोस्ति, ज्वरत्वरादिसूत्रे तु वकारान्त उदाहृतः ॥

"क्यस्य विभाषा" ॥ क्यस्येति क्यच्क्यङोः सामान्येन ग्रहणं, क्यषस्तु हलन्तादसम्भवः । 'समिधमिवात्मानमाचरतीति' । अपपाठोयम् । एवं हि क्यङो वाक्यं न प्रदर्शितं स्यात्, क्यचश्च द्वितीयं वाक्यमनर्थकं स्यात्, विधिभेदाचानर्थकमिति चेत्, यद्येवमधिकरणाच्चेति वक्तव्यमित्यस्यापि प्रदर्शनीयं स्यात्, तस्मात्समिदिवाचरतीति पाठः, अत्र के चित्कण्ड्वादियकोपि ग्रहणमिच्छन्ति, क्यस्येति कितो यकारस्य ग्रहणे तात्पर्यम्, आदित्वं ककारस्याविवक्षितं वदन्ति । नेति वयम् । आदित्वाविवक्षायां प्रमाणाभावात् ॥

"णेरनिटि" ॥ इयङादिभिरेव सर्वस्य विषयस्यावष्टब्धत्वादनवकाशो णिलोपस्तेषां बाधक इत्याह । 'इयङ्यणित्यादि' । ननु पाचयतेः पाक्तिर्याजयतेर्याष्टिरित्युदाहरिष्यति, ण्यासश्रन्थो युजिति युजि प्राप्ते क्तिचजादिभ्य इति क्तिन्प्रत्ययः, क्त्विज्वापुनरयं द्रष्टव्यः, तत्कथमनवकाशः । उच्यते । यद्येतावत्प्रयोजनं स्यादनिटीति न वक्तव्यं स्यात्, अतोनिटीति वचनादार्द्धधातुकमात्रविषयतास्यावसीयते, ततश्च युक्तमियङादीन्प्रत्यपवादत्वं, वार्त्तिककारेण तु पूर्वविप्रतिषेधः पठितः 'ण्यल्लोपावियङ्यण्गुणवृद्धिदीर्घेभ्यःपूर्वविप्रतिषेधेने'ति । 'अततक्षदिति' । अत्र चङो ङित्त्वाद्गुणस्याप्रसङ्गः, संयोगपूर्वत्वादेरनेकाच इति यणोप्यप्रसङ्गः, इयङ एवायं विषयः, अत्रेयङि सति पुनः प्रसङ्गविज्ञानात् भवन्नपि लोपोन्त्यस्य स्यात् । 'आशिशदिति' । एरनेकाच इति यणोत्र प्रसङ्गः । अत्र सत्यपि यणि असिद्धत्वात्पुनः प्रसंगविज्ञानेन वा णिलोपे सति सिद्धमिष्टम्, एवं गुणवृद्धिदीर्घविषयेपि द्रष्टव्यं, न च गुणवृद्ध्योरयादेशप्रसंगः, आर्द्धधातुक

बलीय इति णिलोपः । 'ज्ञीप्सतीति' । 'आप्ज्ञप्यृधामित्' 'अज्झनगमां सनी'ति दीर्घप्रसङ्गः, अनिटीति शक्यमत्तुं, कथं कारयिता, 'निष्ठायां सेटीत्येतन्नियमार्थं भविष्यति, सेटि यदि भवति निष्ठायामेवेति, विपरीतस्तु नियमो न भवति निष्ठायां सेट्येवेति, अनिटोनिष्ठाया असंभवात्, असंभवश्चोत्तरसूत्रे वक्ष्यते, अथ वा 'अयामन्ताल्वाय्येत्निष्णुषि' त्यत्र णेरिति योगविभागः क्रियते, सेट्यार्द्धधातुके णेरयादेशो भवति लोपस्यापवादः ॥

"निष्ठायां सेटि" ॥ 'सेटीति किमिति' । अनिटि पूर्वेण सिद्धत्वात्सेडर्थमेवेदं सूत्रं भविष्यतीति प्रश्नः, सामर्थ्यात्पूर्वसूत्रप्राप्तेरेव व्यावृत्तिरित्युत्तरम् । 'संज्ञपितइति' । 'वा दान्तशान्तपूर्णे'त्यत्र ज्ञपेर्निपातनमाश्रीयते ज्ञप्तः ज्ञपित इति । 'अथ पुनरिति' । प्र[1]तिपत्तृविप्रतिपत्त्या संदिग्धाभिधानम् । 'कालावधारणार्थमिति' । सेड्ग्रहणे क्रियमाणे यदा निष्ठा सेड्भवति तदा लोपो भवति न प्रागिति कालावधारणं लभ्यते, किं पुनः स्यादृद्येवमर्थं सेड्ग्रहणं न क्रियेत तत्राह । 'अकृते हीति' । 'णिलोपे सतीति' । नित्यत्वात्, स हि कृतेपीटि प्राप्नोत्यकृतेपि, इट् पुनरनित्यः, णिलोपे सत्येकाच इति प्रतिषेधात्, यस्य च निमित्तं लक्षणान्तरेण विहन्यते न तदनित्यं, नहि वालिसुग्रीवयोर्युध्यमानयोर्भगवता रामेण वालिनि हते सुग्रीवापेक्षया वालिनो दौर्बल्यं मन्यन्ते शूरमानिनः । सत्यं, कार्यगतभावाभावविवक्षायां तु तत्राश्रीयते । 'इट्प्रतिषेधः प्रसज्येतेति' । एकदेशविकृतस्यानन्यत्वात्, एतच्च पूर्वस्मादपि विधौ स्थानिवद्भावमनाश्रित्योक्तं, भाष्ये तु सूत्रमिदं प्रत्याख्यातं सप्तमे, णेरध्ययने वृत्तमित्ययं योगस्त्रेधा विभक्तव्यः, क्रमविपर्ययश्चाश्रयणीयः, णेरित्येको योगः, तत्र निष्ठायां नेडिति वर्त्तते, एयन्तादुत्तरस्या निष्ठाया इण्न भवति, ततो वृत्तं, वृत्तमिति निपात्यते, णिलोपः, किमर्थमिदं, नियमार्थम्, अत्रैव निष्ठायां णेर्लोपो भवति नान्यत्रेति, क्व माभूत्, कारितं हारितं, केमर्थक्यान्नियमो

1 व्याख्यातृ—इति इं॰ पुस्तके पाठः ।

भवति, विधेयं नास्तीति कृत्वा, इह चास्ति विधेयं, किं, गुणाभावः, एवं तर्हि तन्त्रावृत्त्येकशेषाणामन्यतमाश्रयणादेकस्य नियमार्थत्वमपरस्य गुणनिषेधार्थत्वं भवति, ततोऽध्ययने, वर्तेरध्ययनएव णिलोप इति ॥

"शमिता यज्ञे" ॥ 'तृचि संबुध्यन्तमेतदिति'। उदाहृताभिप्रायमेतत्, सूत्रे तु शुद्धप्रथमैकवचनान्तं, सर्वासु च विभक्तिषु निपातनं प्रथमैकवचनस्याविवक्षितत्वात्, तथा च सूत्रार्थकथनसमये इडादौ तृचीति सामान्येनोक्तं, प्रयोगोपि तथाविध एव शमितारो यदत्र सुकृतमिति, शमितृभ्यश्चैवैनन्तच्चिगृहितृभ्यश्चेति च, शामित्रमिति तद्धितेपि भवति, सूत्रे च संबुध्यन्तं विवक्षितं चेच्छमितर्यज्ञइति प्राप्नोति ॥

"अयामन्ताल्वाय्येत्न्विष्णुषु" ॥ 'गण्डयन्तइति' गडि सेचने घटादिः, मडि भूषायाम्, आभ्यामौणादिको झच्, 'झोन्तः'। 'स्पृहयालुरिति'। स्पृहिगृहीत्यादिना आलुच्। 'स्पृहयाय्यइति'। भृदक्षिस्पृहिभ्य आय्यः। 'स्तनयित्नुरिति'। औणादिकइत्नुः च्। 'पारयिष्णवइति'। णेश्छन्दसीति इष्णुच्। 'नेति वक्तव्ये इति'। णिलोपे हि प्रतिषिद्धे गुणे सत्ययादेशः सिद्धः, मात्रालाघवं च भवति। 'उत्तरार्थमिति'। ल्यपि लघुपूर्वादित्यत्र न गुणो नाप्ययादेशः ॥

"ल्यपि लघुपूर्वात्" ॥ अत्र केचिदाचार्येण ल्यपि लघुपूर्वस्येति षष्ठ्यन्तमध्यापिताः, अन्ये पञ्चम्यन्तं, तत्राद्यपक्षे प्रशमय्येत्यादौ व्यञ्जनान्ते न स्यात्, नह्यत्र णिर्लघुपूर्वः किं तर्हि व्यञ्जनपूर्वः, न चाव्यवहिते संभवति व्यवहितं पूर्वमाश्रयितुं युक्तं, प्रचकास्य गत इत्यादावतिप्रसङ्गश्च, क्व तर्हि स्यात्, प्रगणय्य प्रस्तनय्येत्यादौ, यद्यप्यत्राल्लोपे कृते णिर्लघुपूर्वो न भवति, व्याश्रयत्वादल्लोपस्यासिद्धिरपि नास्ति तथापि भूतपूर्वलघुपूर्वतामाश्रित्यात्रैव स्यात्, तथा प्रांचकीर्य्येत्यादावपि प्रसङ्गः, संप्रति गुरुपूर्वत्वेपि भूतपूर्वगत्या, तस्माद् द्वितीयं पक्षमाश्रित्य व्याचष्टे। 'लघुपूर्वाद्वर्णादिति'। नन्वत्रापि पक्षे प्रशमय्येत्यादौ ह्रस्वादीनामसिद्धत्वादयादेशाप्रसङ्गः, क्व तर्हि स्यात्, मृदमाचष्टइति णिचि 'प्रकृत्यैकाजि'ति प्रकृ-

निभावाट्टिलोपाभावे प्रमृदय्य गत इत्यादौ स्यादत आह । 'ह्रस्वयलोपाल्लोपानामिति' ॥

"विभाषापः" ॥ आप्लृ लम्भने चुरादिः, आप्लृ व्याप्तौ स्वादिः, द्वयोरपि ग्रहणम् । इह इङ् अध्ययने, णिच्, 'क्रीङ्जीनां णा'वित्यात्वम्, अर्त्तिह्रीत्यादिना पुक्, अध्याप्य गत इत्यत्रापि प्राप्नोति, आप्रूपस्य भावात्, तस्मात्सानुबन्धको निर्द्देश्यः, आपुलिति पठितव्यम्, आप्लृशब्दान्ङसिः, ऋकारलृकारयोः सवर्णत्वादत उदित्युत्वम्, 'उरण् रपर' इत्यत्र रप्रत्याहारग्रहणाल्लपरत्वं, सकारस्य संयोगान्तलोपः, तर्त्तार्हि तथा पठितव्यं, नेत्याह । 'इङादेशस्येति' ॥

"निष्ठायामण्यदर्थे" ॥ 'ण्यतः कृत्यस्यार्थौ भावकर्मणी इति' । यद्यपि भव्यगेयादावाप्लाव्यापात्यशब्दयोः कर्त्तापि पक्षे ण्यदन्तयोर्वाच्यस्तथापि क्षियः संनिधानात्तदीयो ण्यदर्थ एव पर्युदस्यते । 'प्रक्षीणमिदं देवदत्तस्येति' । अधिकरणवाचिनश्चेति कर्त्तरि षष्ठी । 'अधिकरणइति' । क्तः प्रत्यय इत्यनुषङ्गः । एवमक्षितमिति भावइत्यत्रापि ॥

"वाक्रोशदैन्ययोः" ॥ 'क्षितायुरिति' । पूर्ववत्कर्त्तरि क्तः । 'क्षीणकइति' । अनुकम्पायामिति कन् । प्राप्तविभाषेयम् । अण्यदर्थइत्येव, क्षितं सर्वमस्य, क्षितमस्य तपस्विनः ॥

"स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशे ऽज्झनग्रहदृशां वा चिण्वदिट् च" ॥ चिणीव चिण्वत्तत्र तस्येवेति सप्तमीसमर्थाद्वतिः, स्यसिच्सियुट्तासिष्विति प्रतियोगिनि सप्तमीनिर्द्देशात्, यथा मथुरावत्पाटलिपुत्रे प्रासाद इति । 'भावकर्मविषयेष्विति' । अनेन भावकर्मणोरिति विषयसप्तमीति दर्शयति । भावकर्मणोर्ये स्यादयो वर्त्तन्ते तेष्विति तु विज्ञायमाने सीयुडेको विशेषितः स्यात्, स्यादयो न विशेषिताः स्युः, भावकर्मणोर्लादेशवाच्यत्वात्सीयुटश्च तद्भक्तत्वात्, अथ भावकर्माभिधायी प्रत्ययो भावकर्मशब्दाभ्यामभिधीयते तदायमर्थः स्यात् भावकर्मवाचिनि प्रत्यये परतो ये स्यादय इति, तदा

त्तिभावाट्टिलोपाभावे प्रमृदय्य गत इत्यादौ स्यादत आह । 'ह्रस्वयलोपाल्लोपानामिति' ॥

"विभाषापः" ॥ आप्लृ लम्भने चुरादिः, आप्लृ व्याप्तौ स्वादिः, द्वयोरपि ग्रहणम् । इह इङ् अध्ययने, णिच्, 'क्रीङ्जीनां णा'वित्यात्वम्, अर्त्तिह्रीत्यादिना पुक्, अध्याप्य गत इत्यत्रापि प्राप्नोति, आप्रूपस्य भावात्, तस्मात्सानुबन्धको निर्द्देश्यः, आपुलिति पठितव्यम्, आप्लृशब्दान्ङसिः, ऋकारलृकारयोः सवर्णत्वादत उदित्युत्वम्, 'उरण्-रपर' इत्यत्र रप्रत्याहारग्रहणाल्लपरत्वं, सकारस्य संयोगान्तलोपः, तर्हि तथा पठितव्यं, नेत्याह । 'इङादेशस्येति' ॥

"निष्ठायामण्यदर्थे" ॥ 'ण्यतः कृत्यस्यार्थौ भावकर्मणी इति' । यद्यपि भव्यगेयादावाप्लाव्यापात्यशब्दयोः कर्त्तापि पक्षे ण्यदन्तयोर्वाच्यस्तथापि क्षियः संनिधानात्तदीयो ण्यदर्थ एव पर्युदस्यते । 'प्रक्षीणमिदं देवदत्तस्येति' । अधिकारणवाचिनश्चेति कर्त्तरि षष्ठी । 'अधिकरणइति' । क्तः प्रत्यय इत्यनुषङ्गः । एवमक्षितमिति भावइत्यत्रापि ॥

"वाक्रोशदैन्ययोः" ॥ 'क्षितायुरिति' । पूर्ववत्कर्त्तरि क्तः । 'क्षीणकइति' । अनुकम्पायामिति कन् । प्राप्तविभाषेयम् । अण्यदर्थे-इत्येव, क्षितं सर्वमस्य, क्षितमस्य तपस्विनः ॥

"स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशे ऽज्झनग्रहदृशां वा चिण्वदिट् च" ॥ चिणीव चिण्वत्तत्र तस्येवेति सप्तमीसमर्थाद्वतिः, स्यसिच्सियुट्तासिष्विति प्रतियोगिनि सप्तमीनिर्द्देशात्, यथा मथुरावत्पाटलिपुत्रे प्रासाद इति । 'भावकर्मविषयेष्विति' । अनेन भावकर्मणोरिति विषयसप्तमीति दर्शयति । भावकर्मणोर्ये स्यादयो वर्त्तन्ते तेष्विति तु विज्ञायमाने सीयुडेको विशेषितः स्यात्, स्यादयो न विशेषिताः स्युः, भावकर्मणोर्लादेशवाच्यत्वात्सीयुटश्च तद्भक्तत्वात्, अथ भावकर्माभिधायी प्रत्ययो भावकर्मशब्दाभ्यामभिधीयते तदायमर्थः स्यात् भावकर्मवाचिनि प्रत्यये परतो ये स्यादय इति, तदा

स्यादयो विशेषिताः सीयुडविशेषितः, नहि तद्युक्तस्य तेन सह पौर्वापर्यं संभवति, तस्मात्सर्वानुग्रहाय विषयसप्तम्येव युक्ता । 'यदा चिण्वत्तदेडागमो भवतीति' । चकारस्य संनियोगार्थत्वात् । 'कस्येति' । षष्ठीनिर्दिष्टस्यागमो भवति स्यादयश्च सप्तमीनिर्दिष्टाः, अञ्झनग्रहदृशामिति षष्ठीनिर्दिष्टम्, अङ्गस्येति च वर्तते, अतोऽजन्तादीनामङ्गानामेवागमित्वं युक्तमिति विपर्ययं मन्यमानस्य प्रश्नः । 'स्यसिच्सीयुट्तासीनामेवेति' । कथमित्याह । 'ते हि प्रकृता इति' । संनिहिता इत्यर्थः । नन्वङ्गमपि प्रकृतं योगविभक्तिकं च तत्राह । 'अङ्गस्य त्विति' । 'लक्ष्यविरोधादिति' । यद्वा सप्तमे योगविभागः क्रियते, आर्द्धधातुकस्येट्, परिभाषेयं, यो यात्कश्चिदिडागमः स सर्व आर्द्धधातुकस्यैव द्रष्टव्यः, तेनायमपीडागमः स्यादीनामेव भवति नाङ्गस्य । 'कानि पुनरिति' । चिणि यदेवाहत्य विहितं तदेवातिदिश्यते आहोस्वित् चिणि दृष्टमात्रमिति प्रश्नः । तत्र द्वितीयः पक्ष आश्रीयत इति श्लोकेन दर्शयति । 'चिण्वद्वृद्धिरिति' । यथा चिणि वृद्धिः तथा स्यादिष्वपीष्यते, घानिष्यते एतदेकं प्रयोजनम्, एवमुत्तरत्रापि । प्रत्येकं संबन्धेन यथायोगमतिदेशो योज्यः । 'दर्शयिष्यत इति' । 'आतो युक् चिण् कृतो' रिति युक् एतच्चिण्याहत्य विहितं, यच्च हो हन्तेर्ञ्णिन्नेष्विति कुत्वमघानीत्यत्र दृष्टं तदपि प्रयोजनं घानिष्यत इति, यच्च चिण्णमुलोर्दीर्घोऽन्यतरस्यामिति दीर्घविकल्पविधानं तदपि प्रयोजनम्, एतदपि चिण्याहत्य विहितं शमिष्यते शामिष्यत इति । शमेर्णिचि 'मितां ह्रस्वः, लृटि स्ये चिण्वद्भावेन दीर्घविकल्पः, 'णेरनिटीति' णिलोपः । नन्वनिटीत्युच्यते सेट् चायमत आह । इट् चासिद्ध इति' । आ भाच्छास्त्रीये णिलोपे कर्त्तव्ये आ भाच्छास्त्रीयश्चिण्वदिडसिद्धः, तेनानिडादित्वात्सिद्धो णिलोप इत्यर्थः । 'मे इति' । सूत्रकारायमाणस्य वचनम् । ननु चास्य चिण्वदिटोवकाशः ये ऽनिटः, येषु स्वद्गुनोः स्य इत्यादि प्रतिपदविधानं नास्ति, आर्द्धधातुकस्येत्यस्यावकाशः सेड् योस्य विषयो न भवति, यस्तु सेडस्य च सूत्रस्य विषयस्तत्र परत्वा 'दार्द्ध-

धातुकस्येड्वलादे'रित्ययमेव प्राप्नोति, तत्कथमसिद्धत्वमत आह । 'नित्यश्चायमिति'। अयं चिण्वदिण्नित्यः, कृतेऽपि वलादिलक्षणइट् प्राप्नोति, अकृतेऽपि, नह्ययं वलादित्वमपेक्षते । अस्मिंस्तु कृते वलादिलक्षण इण्न प्राप्नोति, तस्माद्वल्निमित्त इडनित्यः । विघातो निमित्ताभावादप्रवृत्तिः, सोऽस्यास्तीति विघाती, तदेवं नित्यत्वात्सेड्भ्योऽप्यनेनैवेड् भवति, अयं चासिद्धइति न भवति णिलोपाभावदोषः, अवश्यं चानेनैव सेड्भ्योऽपीडिष्टव्यः, अन्यथा एतदिट्संनियुक्तश्चिण्वद्भावोऽपि न स्यात्, न च शब्दान्तरप्राप्तेरस्याप्यनित्यत्वम्, आकृतिपक्षे शब्दान्तरत्वाभावात् । 'प्रकृतस्येटो दीर्घत्वमिति'। वलादिलक्षणस्य प्रकृतत्वात् । 'गुणे कृतइति'। परत्वान्नित्यत्वाच्च । 'उपदेशग्रहणाद् भवतीति'। यद्यपि करोतिरुत्तरकालमनजन्त उपदेशेत्वजन्त एव, यदि चिणि दृष्टमात्रस्यातिदेशो हनि णिङादेशा अपि प्राप्नुवन्ति, तेषामपि तत्र दृष्टत्वादत आह । 'अङ्गाधिकारविहितमिति'। अङ्गस्येति प्रकृत्य यद्विहितं चिणि दृष्टं तदेवातिदिश्यते, संनिहितत्वात्, न च हनिणिङामादेशा एवंविधा इति तेषामनतिदेशः । अत्र वार्तिकं, 'वधभावात्सीयुटि चिण्वद्भावो विप्रतिषेधेने'ति, वधभावस्यावकाशः, वध्यात्, वध्यास्तां, वध्यासुः, चिण्वद्भावे हन्ग्रहणस्यावकाशः, घानिष्यते, अघानिष्यत, अघानिषाताम् । अघानिषत घानिषीष्टेत्यत्रोभयप्रसङ्गे चिण्वद्भावो भवति विप्रतिषेधेन । अथेदानीं चिण्वद्भावे पुनःप्रसङ्गविज्ञानात् वधादेशः कस्मान्न भवति, सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति, ननु द्वितीयाध्याये, तत्रार्धधातुकइति विषयसप्तमी, ततः किमन्तरङ्गो वधभावः, नैतदस्ति । लिङीति विशेषनिर्देशात्परसप्तमी, यत्र तु विशेषनिर्देशाभावो ऽस्तेर्भूरित्यादौ तत्रैव विषयसप्तमी भव्यादिसिद्धये ॥

"दीङो युडचि क्ङिति" ॥ 'दीङ इति पञ्चमीनिर्देशादिति'। षष्ठ्यां त्वस्यां दीङ एवादितो युट् स्यात्, पञ्चम्यां तूभयनिर्देशे पञ्चमी निर्देशो बलीयानिति अचीति सप्तम्याः षष्ठ्यां प्रकल्पितायामजादेर्युड्

भवति, सप्तमीनिर्देशस्तूत्तरार्थः, तदादिविध्यर्थश्च । 'विधानसामर्थ्या-च्चेति' । यदि युटोसिद्धत्वेन यणादेशः स्यात् युड्विधानमनर्थकं स्यात् । उपदिद्व्यइति रूपे विशेषाभावात्, न च यकारद्वयश्रवणाद्विशेषः, 'हलो यमां यमि लोप'इति पक्षे यलोपविधानात् । न च पक्षे श्रुतिभेदः, 'यणो मय'इति द्विर्वचनविधानादेव सिद्धत्वात्, श्रुतिभेदोपि व्यञ्जना-त्परस्यैकस्यानेकस्य वा यकारस्य कीदृश इति चिन्त्यम् । 'उपदानमि-ति' । 'मीनातिमिनोतिदीङां ल्यपि चे'त्यात्वं, दीङ इत्यनुबन्धनिर्देशो यङ्लुकि माभूदिति ॥

"आतो लोप इटि च" ॥ इहाचि क्ङित्यार्धधातुकइति त्रयाणां प्रकृतत्वाद्विशेषणविशेष्यभावे च कामचारात्तेषामन्यतमेनानुभूता-न्यतरविशेषणेनाऽनुभूतोभयविशेषणेनाननुभूतविशेषणेन वा इटः समु-च्चयसंभवाद् द्वादश पक्षाः संभवन्ति । तत्र यदि तावद्विशेषणसंबन्धा-त्प्रागेवाचा इटः समुच्चयः, अङ्गाक्षिप्तश्च प्रत्ययो वा विशेष्यते, इट्य-जादौ च प्रत्ययइति विज्ञायते, तदेड्ग्रहणमनजाद्यर्थं भवति, अजादे-रिटोऽजादिना प्रत्ययेन समुच्चयासंभवात्, तदा च ङिदार्धधातुके अ-जादेरेव विशेषणे व्यवतिष्ठेते नेटः, हलादेरिटः क्ङित्वासंभवात्, आर्ध-धातुकत्वाद्व्यभिचाराच्च, ततश्च दासीयेत्यादौ लोपप्रसङ्गः, अथ क्ङिद्वि-शिष्टेनाचा समुच्चयः, क्ङित्यजादौ भवतीटि चेति, ततोऽक्ङिदर्थमन-जाद्यर्थं चेड्ग्रहणं भवति पपिथ दासीयेति, अथार्धधातुकविशिष्टेनाचा समुच्चयस्ततो ऽक्ङिदर्थमनजाद्यर्थमनार्धधातुकार्थं चेड्ग्रहणं, पपिथ, दासीय,व्यत्यरे,इतीण्मात्रे लोपप्रसङ्गः, तदेवमचा समुच्चये चत्वारः पक्षाः, एवमार्धधातुकेन, एवं क्ङितेति द्वादशपक्षाः । तयोरप्युभयविशिष्ट-योस्तएव दोषा यांस्त्वत्रोचाम । अथाविशेषितेनार्धधातुकेन समुच्चयस्तदा नार्धधातुकार्थमिड्ग्रहणमिति व्यत्यरइत्यत्रैव प्रसङ्गः, अथ क्ङिद्विशिष्टेना-र्धधातुकेन समुच्चयस्तदा ऽक्ङिदर्थमनार्धधातुकार्थमिड्ग्रहणं, पपिथ, व्य-त्यरे, अथाज्विशिष्टेनार्धधातुकेन समुच्चयः, अनजाद्यर्थमनार्धधातुकार्थं चेड्ग्रहणं दासीय, व्यत्यरे, अथाज्विशिष्टेन क्ङिता समुच्चयः, ततोनजाद्य-

थमङ्किदर्थं चेड्ग्रहणं दासीय, पपिथ, अथार्द्धधातुकविशिष्टेन क्ङिता समुच्चयः, तदानार्द्धधातुकार्थमक्ङिदर्थं चेट्ग्रहणं, व्यत्परे,पपिथ, । तदेवमेकादशपक्षा दुष्टाः, द्वादशःपक्षःशिष्यते ऽविशिष्टेन क्ङिता समुच्चय इति, अत्र च पक्षे अच्यार्द्धधातुकइति विशेषणद्वयमविशेषाद् द्वावपि क्ङिदिटावुपनिपततीति अक्ङिदर्थमेवेड्ग्रहणं भवति, तेन पपिथेत्यादावाल्लोपो भवति दासीय व्यत्परे इत्यनजादावनार्द्धधातुके च न भवति। स एष निर्दोषः पक्षस्तमिममाश्रयति। 'इत्यजादावार्द्धधातुकइति'। 'क्ङिति चेति'। अजादावार्द्धधातुकइत्यनुषङ्गः। 'दासीयेति'। आशिषि लिङ्, उत्तमैकवचनमिट्, 'इटोत्'।अत्र सीयुट इड्भक्तत्वादिटो ऽजादित्वाभावः ॥

"ईद्यति" ॥ दीर्घविधानमुत्तरार्थम्, अध्यगीष्ट । इह तु गुणेन भवितव्यमिति हृस्व एव विधेयः ॥

"घुमास्थागापाजहातिसां हलि" ॥ माग्रहणेन मेङ् प्रणिदाने, माङ् माने मा मानइति सर्वेषां ग्रहणम्, एवं गा इत्यत्रापि गाङ्गतौ, गै शब्दे, गा स्तुतौ छन्दसि, इणो गा लुङि, इणवदिक इति वक्तव्यं, गाङ् लिटीति, सर्वेषां गारूपाणां ग्रहणं, गामादाग्रहणेष्वविशेष इति वचनात् । 'जुहोतीति'। ओहाक् त्यागे । 'जिहातेरिति'। ओहाङ् गतावित्यस्य। भृञामिदित्यभ्यासस्येत्वे सति जहातीति निर्देशो नोपपद्यते । कामं हागित्यपि निर्देशेन भवति जिहातेः प्रसंगस्तथा तु न कृतमित्येव । 'एतद्देवेत्यादि'। यथा चैतज्ज्ञापकं तथा जनसनखनामित्यत्रोक्तम् । ईत्वे वकारप्रतिषेधः, वकारस्य निमित्तभावेन प्रतिषेधो वकारप्रतिषेधः, वकारादावीत्वं न भवतीत्यर्थः । 'आतो मनिन्क्वनिब्वनिपश्च'। घृतं पिबन्ति घृतपावानः, वसां वसापावानः, क्वनिपीत्वं न भवति, धीवरी पीवरीत्यत्र त्वौणादिकमीत्वं ध्याप्योर्वा संप्रसारणं, तथा त्र स्थः क चेत्यत्र क्विपि ईत्वाभाव उदाहृतः ॥

"वान्यस्य संयोगादेः" ॥ 'स्थेयादिति'। अन्यस्य ग्रहणे ऽक्रियमाणे पूर्वयोगो ऽन्येषु सावकाशः, अयमपि ग्लायादित्यादिषु, स्थेयादित्यत्रोभयप्रसङ्गे परत्वादयमेव विधिः स्यादित्यन्यस्य ग्रहणम् ॥

"न ल्यपि" 'यदुक्तमिति'। ईत्वं न त्वनन्तरमेत्वम्, प्राप्त्यभवात् ॥

"मयतेरिदन्यतरस्याम्" ॥ 'अपमित्येति'। उदीचां माङो व्यतीहारइति क्त्वाप्रत्ययः, इत्त्वे कृते तुक् ॥

"आङजादीनाम्" ॥ ऐज्यतेत्यादौ यजिवपिवहीनां हलादित्वादाण् न प्राप्नोति, संप्रसारणे कृते ऽजादित्वाद्भविष्यति, परत्वाल्लादेशेभ्यः प्रागटा भवितव्यं, ततो लादेशैः, ततो यका, ततः संप्रसारणेन, अत आह। 'इहेति'। लादेशस्यान्तरङ्गत्वं लकारमात्रापेक्षित्वात्। अडागमस्तु लकारविशेषमङ्गं चापेक्षतइति बहिरङ्गः, कृताकृतप्रसंगित्वाद्विकरणस्य नित्यत्वं, नन्वडागमोऽपि कृतेपि विकरणे प्राप्नोत्यकृतेपीति नित्य एव, ततश्च परत्वादडागम एव प्राप्नोति, तत्राह। 'शब्दान्तरप्राप्तेरिति'। शब्दान्तरप्राप्तिमेव दर्शयति। 'कृते हीति'। अङ्गस्याडागमः कृते विकरणे विकरणान्तमङ्गमकृते तु धातुमात्रमित्यस्ति शब्दान्तरप्राप्तिः। ननु विकरणोपि शब्दान्तरप्राप्तेरनित्यः। तथाहि। स कृते ऽडागमे तदादेर्धातोर्भवति अकृतेतु धातुमात्रात्, अत आह। 'शब्दान्तरस्येति'। षष्ठीनिर्दिष्टस्य यद्विधीयते आगम आदेशो वा तत्रैषा परिभाषा न पञ्चमीनिर्देशइत्यर्थः। 'नित्यत्वादेवेति'। एवकारः पौनर्वचनिकः, नित्यत्वादडागमं बाधतइति पूर्वमुक्तमत्रापि स एव हेतुरिति। अडागमस्तु संप्रसारणे कृते न प्राप्नोति, आटा बाधितत्वात्, यस्य निमित्तं लक्षणान्तरेण विहन्यतइति तु न सार्वत्रिकमिति भावः। अयं योगः शक्यो ऽकर्तुम्। अजादीनामपि पूर्वसूत्रेणाडेवास्तु, कथमाटश्चेति वृद्धिः, अटश्चेति वक्ष्यामि, इहापि तर्हि प्राप्नोति अकार्षीत्, अचीति वर्त्तते, एवमपि स्वपेर्लङ् सिप्, अड्गार्ग्यगालवयोरिति सिपो ऽट्, रुत्वं, हशि चेत्युत्वम्. अस्वपोहसचित्यत्र वृद्धिप्रसङ्गः, अजादौ धातौ वृद्धिं वक्ष्यामि, तर्हि धाताविति वक्तव्यं, न वक्तव्यं, यदेतदुपसर्गादृति धाताविति तत्पूर्वत्रापकृष्यते, अटश्चेत्यत्र चकारस्तस्यैव विधेः समुच्चयार्थः, अटो विध्यन्तरं बाधित्वा वृद्धिरेव यथा

स्यात्त्ते:ाटिटदित्यादौ परमप्यतो गुणे पररूपं बाधित्वा वृद्धिरेव भवति, यथा सिद्धान्तेपि, औसीयत् औङ्कारीयत् 'उस्यपदान्तात्,' 'ओमाङोश्चे'ति पररूपं न भवति, उत्तरार्थं तस्योद्ग्रहणं छन्दस्यपि दृश्यते सुरुचो वेन आवः, अट एवात्र छान्दसं दीर्घत्वं भविष्यति, पूरुषो नारक इति, यथा आसचित्यत्रापि लावस्थायामेवाटि कृते अअस्‌ल इति स्थिते अटश्चेति वृद्धिश्च प्राप्नोति लादेशश्च, तत्रान्तरङ्गत्वाल्लादेशः, वृद्धिर्ह्यटमचं च निमित्तमपेक्षते, कृते लादेशे वृद्धिश्च प्राप्नोति श्नसोरल्लोपश्च, तत्रान्तरङ्गत्वाद्वृद्धिः, नानाश्रयत्वाच्च वार्णादाङ्गं बलीय इति नास्ति, कृतायां वृद्धौ तपरकरणादाकारस्य लोपाभावः, इह च आयन्निति इणो लङि अटि अइअन्, अटश्चेति वृद्धिः प्राप्नोति इणो यणिति यणादेशश्च, तत्रान्तरङ्गत्वाद्वृद्धिः, नानाश्रयत्वाच्च वार्णादाङ्गं बलीय इति नास्ति, इणो यण् एरिति योगविभागादिवर्णान्तस्येणो यण्विधानादेकारस्य तदभावादायादेशे सिद्धमिष्टम् । अत्र श्लोकौ ।

अजादीनामटा सिद्धं वृद्ध्यर्थमिति चेदटः ।
अस्वपोहसतीत्यत्र धातौ वृद्धिमटः स्मरेत् ॥
पररूपं गुणेनाट ओमाङोर्हसि तत्समम् ।
छन्दोर्थं बहुलं दीर्घं इणस्त्योरन्तरङ्गतः ॥

इति ।

"न माङ् योगे" ॥ यद्ययमनन्तरस्याट एव प्रतिषेधः स्यात्तत्संयुक्तमेव प्रतिषेधं कुर्यात् आडजादीनाममाङ्योगइति, असंयुज्य तु प्रतिषेधात्सर्वस्य प्राकरणिकस्य प्रतिषेधो विज्ञायतइत्याह । 'लुङ्लङ्लृङ्क्षु यदुक्तं तन्न भवतीति' । तत्र लृङ उदाहरणं न प्रदर्शितं माङ्योगे तदसंभवात्, ङित्त्वविशिष्टस्योपादानमस्मदादेशो यो माशब्दस्तस्मात् द्वितीयाया इति तद्योगे प्रतिषेधो माभूत्, सुखिनं मा अकार्षीदिति, अथ कथं मा वालियथमन्वगाः, स्वच्छन्दमनुवर्त्तन्ते न शास्त्रमृषयः किल ॥

"बहुलं छन्दस्यमाङ्योगेऽपि ॥ 'मा वः क्षेत्र इति'। वः युष्माकं क्षेत्रे भार्यायां परबीजानि परेषां वीर्याणि मा वाप्सुः, उप्तानि मा भूवन्, वपेः कर्मणि लुङ्, व्यत्ययेन परस्मैपदं, झेर्जुस्, सिच्, वदव्रजेति वृद्धिः, क्वचित्तु माङ् योगेपि भवति इति प्रक्रम्यावाप्सुरिति पठ्यते तथाध्ययनं तु न क्वचिद्दृष्टम् । 'अभित्था इति'। भिदेस्थास्, झलो झलीति सिचो लोपः । 'आवरिति'। पूर्वसूत्रे वृत्तावेव व्युत्पादितम् ॥

"हुश्ना रे" ॥ 'दध्र इति'। ननु चात्र परत्वाद्रेभावे कृते अनजादित्वादाल्लोपो न प्राप्नोत्यत आह । 'धाञो रेभावस्यासिद्धत्वादिति'। नन्वेवमपि रेभावे कृते तस्यैवेडागमः प्राप्नोति, न च रेभावस्य वैयर्थ्यं, कृसृभृप्रभृतिष्वनिट्सु चरितार्थत्वादित्यत आह । 'अत्रेति'। कथं पुनर्लाक्षणिकस्य तस्य इरशब्दस्य रेशब्दस्य रेभावो भवति, कथं वा स्वप्रवृत्तिमपेक्ष्य तस्मिंश्चिडागमे कृते पुनः स्वयं प्रवर्त्तमानस्यात्माश्रयदोषो न भवति, तत्राह । 'तदर्थं चेति'। द्विवचननिर्द्देशाद् दोषद्वयं न भवतीत्यर्थः ॥

"अचि श्नुधातुभ्रुवां य्वोरियङुवङौ" ॥ इश्च उश्च य्वू,तयोर्य्वोः, ह्रस्वयोरिदं ग्रहणं दीर्घयोरपि तु कार्यं भवति सवर्णग्रहणात्, य्वोरितिवर्णग्रहणात्ताभ्यां श्न्वादीनां तदन्तविधिः, तत्र निर्द्दिश्यमानस्यादेशा भवन्तीत्येवान्त्यस्य सिद्धेर्ङकारो विस्पष्टार्थः । 'आप्नुवन्तीत्यादि'। यत्संयोगपूर्वमेकाच् तदिहोदाहरणम्, अन्यत्र हुश्नुवोः सार्वधातुके एरनेकाच इति यणा भाव्यं, लुलुवतुरित्यादिकं तु भवत्येव, ओः सुपीति वचनात् । 'इयङुवङ्भ्यामिति'। गुणवृद्ध्योरवकाशः, चेता गौः, इयङुवङोरवकाशः, चिक्षियतुर्लुलुवतुः, चयनं चायकः लवणं लावक इत्यत्रोभयप्रसंगे विप्रतिषेधः । 'तनुवमिति'। अधातुत्वादप्राप्तउवङ् विधीयते । 'तन्वमिति'। वा छन्दसीत्यमि पूर्वत्वाभावे यण् । 'विष्वमिति'। 'विषुव इति'। सत्सूद्विषेति क्विप् । अत्र नित्यमोः सुपीत्यनेन यण् प्राप्तः, स्वर्गादिषु यजुर्वेदइयङुवङौ, बह्वृचे यण् ॥

"अभ्यासस्यासवर्णे" ॥ पूर्वमङ्गस्याजादौ प्रत्यये विधानादिद-मारभ्यते । 'इयेषेति' । अत्र गुणस्य स्थानिवद्भावविषये यदुक्तव्यं तद् द्विर्वचनेचीत्यत्रोक्तम् ॥

"स्त्रियाः" ॥ 'स्त्री इत्येतस्येति' । स्त्रीप्रत्यन्तानां स्त्र्यर्थवृत्तेर्वा शब्दस्य ग्रहणं न भवति, 'आएनद्याः' 'कुमार्यौ वयसी' त्यादिनिर्दे-शात् । 'उत्तरार्थमिति' । उत्तरत्र स्त्रिया एवानुवृत्तिर्यथा स्यात् श्नुधातु-भ्रुवां माभूत् ॥

"इणो यण्" ॥ अत्र सूत्रार्थकथनानन्तरं क्वचित्पठ्यते, अन्तरङ्ग-त्वादिको यणचीति सिद्धे समानाश्रये वार्णादाङ्गं बलीय इति ज्ञापनार्थं वचनमिति, तदयुक्तं, इयङादेशापवादोयमिति वक्ष्यति तत्कथमिय-ङ्विषये यण् प्रवर्त्तते । 'इयङादेशापवादोयमिति' । इयङादेशस्यैवाप-वाद इत्यर्थः । कुत इत्याह । 'मध्येपवादा इति' । एवं सति यदिष्टं सिद्धं तद्दर्शयति । 'गुणवृद्धिभ्यामिति' । यदि तु नाप्राप्ते विध्यन्तरे आर-म्भात्सर्वमेव विध्यन्तरं यण् बाधेत गुणवृद्धिविषयेपि स्यात् । अथेणो नेत्येव कस्मान्नोक्तम्, इयङादेशे हि प्रतिषिद्धे इको यणचीत्येव यण् भवि-ष्यति, अहो सूक्ष्मदर्शी देवानांप्रियः यदिदमपि न दृष्टम्, ईयिव, ईयिम, कर्मणि ईयिरे, अत्रेयङि प्रतिषिद्धे सवर्णदीर्घः स्यात्, तस्माद्यणेव विधेयः॥

"एरनेकाचोऽसंयोगपूर्वस्य" ॥ 'तेन संयोगो विशेष्यतइति'। यद्य-प्यन्यपदार्थं प्रति गुणभूतः संयोगस्तथापि स एव विशेष्यते, धातोरित्य-नुवृत्तस्य प्रयोजनान्तराभावात्, अस्तीदं प्रयोजनमिवर्णं विशेषयिष्यामी-ति, नैतदस्ति, यद्यधातोरिवर्णो ऽसंयोगपूर्वो भवितव्यमेव तस्य यणा 'इको यणची'ति, तद्यथा कुमार्यौ कुमार्य इति । ननु ग्रामणीवद-धातोः पूर्वसवर्णं बाधित्वा यण् माभूदिति धातुनैवेवर्णो विशेषणीयः, नेत्याह, इयङ्बाधनार्थो यण्, न चाधातोरियङः प्रसङ्गोस्ति, तत्कथमधातु-निवृत्त्यर्थो धात्वनुवृत्तिरुपपद्यते, तस्मात्सुष्ठूक्तं गुणभूत एव संयोगो वि-शेष्यतइति । 'अङ्गविशेषणं माभूदिति' । अन्यथाधिकारेण संनिहितस्य तस्यैव विशेषणं स्यादसंयोगपूर्वग्रहणं, ततश्च यवक्रियौ यवक्रिय इति,

यत्रापि प्रसज्येत, नह्यत्राङ्गस्य संयोगः पूर्वावयव इति, ननु च य्वोरिति प्रकृतं तत्र एरित्यनुच्यमाने ओरपि यण् स्यात् लुलुवतुरित्यादौ, ततश्च तन्निवृत्त्यर्थमपि स्यादित्यत आह । 'लुलुवतुर्लुलवुरित्येतत्त्विति'। इह एरित्यनुच्यमानेनैवोरपि सिद्धत्वादोः सुपीत्येतन्नियमार्थं भवति, ओः सुप्येवेति, विपरीतस्तु नियमो न भवति ओरेव सुपीति, न भूसुधियोरिति यण्प्रतिषेधात्, ततश्चास्मादेव नियमाल्लुलुवतुरित्यादौ सिद्धत्वादेरित्येतदोर्निवृत्त्यर्थं नोपपद्यत इति पूर्वार्थमेव प्रयोजनं, यदि त्वसंयोगपूर्वयोरिति द्विवचननिर्देशेन य्वोरेवैतद्विशेषणमुच्येत तर्ह्येरिति शक्यमकर्तुम्। 'इहापि न स्यादिति'। यदि धातुना संयोगो न विशेष्येतेति भावः। क्वचिदिहापि यथा स्यादिति पाठस्तत्र प्रकृतत्वाद्यणादेश इत्यर्थः। 'गतिकारकाभ्यामित्यादि'। इष्टिरेवैषा। 'परमनियाविति'। भावे कर्त्तरि वा क्विप्॥

"ओः सुपि"॥ 'सकृल्ल्वाविति'। क्रियाविशेषणत्वात्सकृदित्यस्य कारकत्वम्। 'कटप्रुवाविति'। क्विब्वचीत्यादिना क्विप् दीर्घश्च॥

"वर्षाभ्वश्च"॥ न भूसुधियोरिति प्रतिषेधे प्राप्ते वचनम्। 'पुनर्भ्वश्चेत्यादि'। एवं च पुनर्वर्षाकारेषु भुव इति सूत्रन्यासः॥

"न भूसुधियोः"॥ भूशब्देन तदन्तस्य ग्रहणं केवलस्य यण्प्राप्त्यभावात्। न चोवङः प्रतिषेधः, विच्छिन्नत्वात्, 'वर्षाभ्वश्चे'त्यारम्भाच्च। 'सुधियाविति'। ध्यायतेः क्विप्, दृशिग्रहणात्संप्रसारणम्॥

"हुश्नुवोः सार्वधातुके"॥ अनेकाचोसंयोगपूर्वस्य ओरिति चानुवर्त्तते, यद्यपि हुश्नुवोरुवर्णान्तत्वमव्यभिचारि तथाप्यसंयोगपूर्वग्रहणमोर्विशेषणं यथा स्यात् हुश्नुवोर्माभूदित्येवमर्थमनुवर्त्यमोरित्येतत्, हुश्नुविशेषणे हि तक्ष्णुवन्तीत्यादावेव प्रतिषेधादाप्नुवन्तीत्यादौ न स्यात्, तत्र श्नुप्रत्ययान्तस्यासंयोगपूर्वस्येति व्यधिकरणे षष्ठ्यौ, श्नुप्रत्ययान्तस्याङ्गस्यावयवो ऽसंयोगपूर्वो य उकारस्तस्येत्यर्थः। अनेकाच इति त्वङ्गेन समानाधिकरणमेव, सार्वधातुकग्रहणं जुहोत्यर्थे न श्नन्वर्थमव्यभिचारात्। 'जुह्वतीति'। अदभ्यस्तात्। 'जुह्वदिति'। नाभ्यस्ताच्छतुरिति

नुम्प्रतिषेधः । 'योयुवति रोरुवतीति' । युरु इत्येताभ्यां यङ्लुगन्ताभ्यां लटि पूर्ववच्छेरुवङ्भावः । 'इदमेवेत्यादि' । एतच्च 'यङोचि च' त्यत्र छन्दोनुवृत्तिमाश्रित्योक्तं, जयादित्यस्तु तत्र छन्दोनुवृत्तिं नाशिश्रियत् । कथं पुनरेतज्ज्ञापकमित्याह । 'छन्दसि हीति' । छन्दसि यङ्लुगन्तनिवृत्त्यर्थं हुश्नुग्रहणं न भवति, ततः परस्य तिङ आर्द्धधातुकत्वात्, यणादेशस्याप्रसङ्गादित्यर्थः । तथा चात्र वार्तिकं 'यङ्लुगर्थमिति चेदार्द्धधातुकत्वात्सिद्ध' मिति । स्यादेतत् । यङ्लुगन्तादन्यद्व्यावर्त्यं भविष्यति, अतो न ज्ञापकं हुश्नुग्रहणमित्यत आह । 'न चेति'। 'असंयोगपूर्वमिति' । असंयोगपूर्वोवर्णान्तमित्यर्थः । अत्र ओरित्यनुवृत्तेर्मिमतइत्यादौ न भविष्यति, अनेकाच इत्यनुवृत्तेर्युवन्तीत्यादौ, अयुवन्नरुवन्नित्यत्राप्यटोऽसिद्धत्वादेकाच्त्वमेव, असंयोगपूर्वस्येत्यनुवृत्तेः प्रोर्णुवन्तीत्यत्र न भविष्यति, तन्वन्तीत्यादौ च भवितव्यमेव यणा, तस्माद्यङ्लुगन्तादन्यद् व्यावर्त्यं न सम्भवति, आह च हुश्नुग्रहणमनर्थकमन्यस्याभावादिति ॥

"भुवो वुग्लुङ्लिटोः" ॥ 'अभूवन्निति' । गातिस्थेत्यादिना सिचो लुक् । 'अभूवमिति' मिपोऽम्भावः । लुङ्लिटोरिति किं, भवति भविष्यति, शप्स्ययोर्न भवति । यदि क्ङितीत्यनुवर्तिष्यते, अभूवमित्यत्रापि तर्हि न स्यात्, एवं तर्ह्योरित्यनुवर्तिष्यते, गुणे कृते अनुवर्णान्तत्वाच्च भविष्यति, अभूवमित्यत्र 'भूसुवोस्तिङी'ति गुणप्रतिषेधादुवर्णान्तत्वं, नात्र शक्यमोरित्यनुवर्तयितुम्, एतच्चेन्धिभवतिभ्यां चेत्यत्र विस्तरेणोक्तम् ॥

"ऊदुपधाया गोहः" ॥ उदाहरणेषु णिच् ण्वुल्, णिनिः, आभीक्ष्ण्ये णमुल्, घञित्येते प्रत्ययाः, सर्वत्र गुणे कृते ओकारस्य ऊकारः । 'उपधाया इति किमिति' । ओरित्यनुवृत्तेरोकारस्य भविष्यति स चोपधैवेति प्रश्नः । ननु च ओरित्युच्यते न चास्योपधोकारः सम्भवति, ओरित्यनुवृत्तिसामर्थ्याद्गोह इति विषयोपलक्षणं भविष्यति, न तु कृतगुणप्रतिपत्त्यर्थम् । 'अन्त्यस्य माभूदिति' । नोपलक्षण-

[*Page* 313]. (10)—To exemplify the *Ambiguous.*—

"आलिङ्गितस्तत्र भवान् सम्पराये जयश्रिया ।
आशीः परम्परां बन्द्यां कर्णे कृत्वा कृपां कुरु ॥"

["Having been embraced by victory in battle, and having heard the proper series of these benedictions, have compassion on me (or, have compassion on the captured women)."]

Here the ambiguity lies in the meaning of the word बन्द्यां-whether it implies the *captive women* or "revered."

[*Page* 314]. (11)—To exemplify the *unintelligible* (the special technicality of a certain System of Philosophy, &c.)—

"सम्यग्ज्ञानमहाज्योतिर्दलिताशयताजुषः ।
विधीयमानमप्येतन्न भवेत् कर्म बन्धनम् ॥"

["To him who has his desires burnt by the extreme lustre of true wisdom, the actions though done by him, do not become a bondage."]

Here, the word आशय in the sense of 'desire' is a special technicality of the Yoga Philosophy.

[*Page* 316]. (12)—To exemplify the *Vulgar* (used only by lower class of people)—

"राकाविभावरी &c.............कटिश्च हरते मनः ॥"

["This thy face transferring to itself as it were, the lustre of a moonlit night, and these thy buttocks splendid as a golden block, captivate the heart."]

Here the use of the word कटि is Vulgar.

[*Page* 317]. (13)—To exemplify *that of which the meaning has to be guessed out.* (*a*) ("Some Indication, like Denotation, is conventional, through capability, *i. e.* tradition; some are accepted on the spot for some special purpose; others again, through inability, (*i. e.* neither through tradition nor with any special motive) are never introduced;" what is meant here is the third, the sort of Indication not rightly allowable)—

(*a*) A quotation from the *Çlokavārtika.*

"शरत्कालसमुल्लासिपूर्णिमाशर्वरीप्रियम् ।
करोति ते मुखं तन्वि चपेटापातनातिथिम् ॥"

["Thy face, O slender one! gives a slap as it were on the face of the moon, the beloved of the autumnal full-moon night."]

Here 'subjugation' or defeat is meant to be indicated by "giving a slap" (which cannot be due either to convention or to any other motive).

[*Page* 318]. The syntactical connection (of the Kārikā) is that (the following refer to words) only when occurring in a compound; the preceding ones referring to words, singly as well as when forming a compound.

(14)—To exemplify the *obscure* (having its signification interrupted)—

"अत्रिलोचनसम्भूतज्योतिरुद्गमभासिभिः ।
सदृशं शोभतेऽत्यर्थं भूपाल तव चेष्टितम् ॥"

["Thy actions, O king! shine like those blooming by the light of him who is born out of the eyes of Atri."]

Here the meaning is—'like the Kumuda flowers blooming by the light of the moon; who was born out of Atri's eye,' (and this is certainly obscure).

(15)—To exemplify *that where the predicate is subordinated*, *i. e.* not properly discriminated—

[*Page* 320]. "मूर्ध्नामुद्वृत्तकृत्ताविरलगलगलद्रक्तसंसक्तधारा-
धौतेशाङ्घ्रिप्रसादोपनतजयजगज्जातमिथ्यामहिम्नाम् ।
कैलासोल्लासनेच्छाव्यतिकरपिशुनोत्सर्पिदर्पोद्धुराणां
दोष्णां चैषां किमेतत् फलमिह नगरीरक्षणे यत् प्रयासः ॥"

["What is the use of these my heads and arms, if I have to make efforts even in protecting this city of mine,—the heads whose greatness (now false) was trumpeted to the world through victories gained by the kindness of Siva's feet, washed as they

were by the unimpeded current of blood flowing from these (the heads) majestically cut off; and these arms, full of intense pride, manifesting as they did, an intense desire for raising the Kailāsa mountain."]

[*Page* 321]. Here मिथ्यामहिम्नाम् ("of false greatness") is not a subordinate adjunct (as it clearly is made), but the chief predicate (and this is not properly discriminated, being mixed up in the Bahuvrihi compound (जातमिथ्यामहिम्नाम्), and thus appearing as a subordinate adjunct.)

[*Page* 322]. Or again—

"स्रस्तां नितम्बादवरोपयन्तीं पुनः पुनः केसरदामकाञ्चीम् ।
न्यासीकृतां स्थानविदा स्मरेण द्वितीयमौर्वीमिव कार्मुकस्य ॥"
[*Kum. Samb.*]

["She, frequently moving up the zone of Bakula flowers, falling from her hips,—the zone appearing like the second bowstring kept by Cupid, knowing where to keep things, in her charge, as it were."]

Here only *secondness* is to be predicated, and as such the proper reading would be मौर्वीं द्वितीयाम् ।

[*Page* 323]. Or again—

"वपुर्विरूपाक्षमलक्ष्यजन्मता दिगम्बरत्वेन निवेदितं वसु ।
वरेषु यद्बालमृगाक्षि मृग्यते तदस्ति किं व्यस्तमपि त्रिलोचने ॥"
[*Kum. Samb.*]

["His body is with an odd number of eyes, he is of unknown stock, his wealth might be inferred from his having the quarters for his dress,—thus O thou fawn-eyed one! is there in Çiva, any of the qualities, even singly, that one looks for in a husband?"]

[*Page* 324]. Here what is to be predicated is that his family is unknown (hence it should be अलक्षिता जनिः ।).

Or again—

"आनन्दसिन्धुरतिचापलशालिचित्तसन्दाननैकसदनं क्षणमप्यमुक्ता ।
या सर्वदैव भवता तदुदन्तचिन्ता तान्तिं तनोति तव सम्प्रति
धिग्धिगस्मान् ॥"

["She was not left by you even for a moment—she, the ocean of joy, the one source, as it were of an agency captivating the heart, owing to her great fickleness. Of her now the very mention disgusts you,—woe to us!"]

[*Page* 325]. Here the predication ought to be negative—"न मुक्ता"—as it is in—

"नवजलधरः सन्नद्धोऽयच्च दृप्तनिशाचरः &c."

["This is fresh and dense cloud, not a vain-glorious demon. This bow at a distance is a rainbow, not the bow of that demon. This is the downpour of rain, not a flight of arrows. And lastly, this is the lightning bright as a golden line on a test-stone, not my beloved Urvaçī"]; nor is any other signification got at by making न मुक्ता, a compound as अमुक्ता, as it is in the following;—

"जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः ।
अगृध्नुराददे सोऽर्थान् असक्तः सुखमन्वभूत्" ॥

["Though unterrified, he protected himself; though untroubled, he had recourse to Duties; though not greedy, he accepted wealth; and though unattached, he enjoyed comforts"] where अत्रस्त &c. signify the propriety of गोपन &c.

(16)—To exemplify that of Contrary Signification or *Repugnant Implication*—

"सुधाकरकराकारविशारदविचेष्टितः ।
अकार्यमित्रमेकोऽसौ तस्य किं वर्णयामहे" ॥

[*Page* 329]. ["What shall I describe of him who is a purposeless (disinterested) friend, having his actions as pure as the rays of the moon."]

Here the meaning desired to be conveyed is that "he is a friend without any motive of his own;" the implication however is that is "a companion in evil deeds."

Or again—

चिरकालपरिप्राप्तलोचनानन्ददायिनः ।
कान्ता कान्तस्य सहसा विदधाति गलग्रहम् ॥

["The loving wife embraces the neck of her beloved, rejoicing her eyes on account of having got him after a long separation."]

Here the meaning desired to be conveyed is "Embrace;" (but गलग्रह implies a kind of throat-disease).

[*Page* 330]. Or again—

"न त्रस्तं यदि नाम भूतकरुणासन्तानशान्तात्मनः
तेन व्यारुजता धनुर्भगवतो देवाद्भवानीपतेः ।
तत्पुत्रस्तु मदान्धतारकवधाद्विश्वस्य दत्तोत्सवः
स्कन्दः स्कन्द इव प्रियोऽहमथ वा शिष्यः कथं विस्मृतः" ॥

["He, when breaking the bow, feared not the revered husband of Çiva's wife, who is quiescent through his sympathy for the living creatures. His son Skanda, of course, was the source of joy to the universe, on account of his having killed the haughty demon Tāraka (and as such he could not be feared). But how was, his disciple, I myself, loved like Skanda, be lost sight of?"

[*Page* 331]. Here the word भवानीपति implies the existence of another husband for Gaurī.

Or again—

"गौरपि यद्वाहनताम् प्राप्तवतः सोऽपि गिरिसुतासिंहः ।
सविधे निरहङ्कारः पायाद्वः सोऽम्बिकारमणः" ॥

["May the husband of Ambikā protect you,—he in whose proximity even Gaurī's lion is devoid of all ill-feeling towards the ox, which has become Çiva's means of conveyance."]

[*Page* 332]. The word अम्बिकारमण has a contrary (and repulsive) signification. (अम्बिका meaning 'mother').

To exemplify *unmelodiousness* occurring in a compound—

"सा दूरं च सुधासान्द्रतरङ्गितविलोचना ।
बर्हिनिर्ह्रादनार्होऽयं कालश्च समुपागतः" ॥

["She, whose eyes are lovely and graceful (moving) like waves of nectar, is at a distance; and this season, accustomed to the noise of peacocks, is arrived"].

(Here, बर्हिनिर्ह्रादनार्हाऽयम् is unmelodious).

Similarly are others (weak in grammar, &c.) to be known.

Defects of the sentence.

[Page 333]. 52.—Besides *grammatical anomaly, incapability of giving sense* and *meaninglessness*, the rest are found in sentence also; and some of them in parts of words as well.

Some—*i. e.* not all. Respective examples—

(1) "सोऽध्यैष्ट वेदांस्त्रिदशानयष्ट पितॄनतार्प्सीत्सममंस्त बन्धून् ।
व्यजेष्ट षड्वर्गमरंस्त नीतौ समूलघातं न्यवधीदरींश्च" ॥

["He studied the Vedas, offered sacrifice to the Gods and oblations to the fathers, honoured his friends, suppressed the six-fold (Desire, Anger, Avarice, Delusion, Pride and Envy) took pleasure in polity and uprooted his enemies"].

(This is of *unmelodiousness*).

[*Page* 335]. (2) "स रातु वो दुश्च्यवनो भावुकानां परम्पराम् ।
अनेडमूकताद्यैश्च द्यतु दोषैरसम्मतान्" ॥

["May Indra bring you happiness in succession! and may he strike your enemies with dumbness and deafness!"]

Here दुश्च्यवन for Indra and अनेडमूक for *deaf* and *dumb* are *not used*.

(3) "सायकसहायबाहोर्मकरध्वजनियमितक्षमाधिपतेः ।
अब्जरुचिभास्वरस्ते भातितरामवनिप ! श्लोकः" ॥

["O king, thy fame shines resplendent like the moon—thou having thy sword for thy companion, and master of the earth bounded by the Ocean."]

Here the words सायक, मकरध्वज, क्षमा, अब्ज, श्लोक, standing respectively for *sword, ocean, earth, moon* and *fame,*—are more commonly known to be synonymous with *arrow, cupid, forgiveness, lotus* and *poem,* respectively (and as such have their desired signification suppressed).

The above is an instance of *suppressed meaning.*

[*Page* 336]. (4) " कुविन्दस्त्वं तावत् पटयसि गुणग्राममभितो
यशो गायन्त्येते दिशि दिशि च नग्नास्तव विभो ।
शरज्ज्योत्स्नागौरस्फुटविकटसर्वाङ्गसुभगा
तथाऽपि त्वत्कीर्तिर्भ्रमति विगताच्छादनमिह " ॥

[" You, the Lord of the Earth, spread on all sides, multitude of good qualities; and these bards are singing your praises in all quarters; and yet thy fame, beautiful and bright as the autumnal moon, wanders about open and unfurled."]

[*Page* 337]. Here the words कुविन्द, &c. signifying another meaning (the weaver at his loom, &c.) implies a hatred for the panygerised individual and hence the *signification is improper.*

(5) " प्राभ्रभ्राड् विष्णुधामाप्य विषमाश्वः करोत्ययम् ।
निद्रां सहस्रपर्णानां पलायनपरायणाम् " ॥

[" Having got at beautifully clouded sky, the sun makes the lotus' sleep run away "].

Here the words प्राभ्रभ्राट्, विष्णुधाम, विषमाश्व, निद्रा and पर्ण cannot be expressive of *beautiful, sky, sun, closed* and *leaves,* in which sense they are here used. (This is an instance of *inexpressiveness*).

[*Page* 338]. (6) " भूपतेरुपसर्पन्ती कम्पना वामलोचना ।
तत्तत्प्रहरणोत्साहवती मोहनमादधौ " ॥

[" The angry army of the king in marching and energetically striking, stupefied the enemies."]

Here the words उपसर्पण, प्रहरण and मोहन, produce shame (as implying a *woman repairing to her lover, &c.)* and hence are *Indecorous.*

"तेऽन्यैर्वान्तं समश्नन्ति परोत्सर्गं च भुञ्जते ।
इतरार्थग्रहे येषां कवीनां स्यात् प्रवर्तनम्" ॥

["Those who make use other poets' ideas, eat out of his vomittings and sluttings."]

[*Page* 339]. Here the words *vomitting*, &c. produce disgust (and hence this becomes *Indecorous*).

"पितृवसतिमहम् व्रजामि तां सह परिवारजनेन यत्र मे ।
भवति सपदि पावकान्वये हृदयमशेषितशोकशल्यकम्" ॥

["With all my family I shall go to my father's place; there in proximity with the pure family, all the pangs of my heart will be removed."]

Here the words पितृवसति &c. as signifying the *crematory*, &c. are inauspicious and hence *Indecorous*.

(7) "सुरालयोल्लासपरः प्राप्तपर्याप्तकम्पनः ।
मार्गणप्रवणो भास्वद्भूतिरेष विलोक्यताम्" ॥

["See this resplendent glory—desirous for heaven, supplied with sufficient military force, expert in archery."]

Here we have *Ambiguousness*,—it being doubtful whether the words सुरालय, कम्पने, मार्ग and भूति mean *heaven*, *army*, *arrow* and *glory* respectively, or *drinking place*, *shaking*, (through intoxication), *begging* and *ashes*.

[*Page* 340]. (8) "तस्याधिमात्रोपायस्य तीव्रसंवेगताजुषः ।
दृढभूमिः प्रियप्राप्तौ यत्नः सफलितः सखे!" ॥

["O friend! that man—by means of knowledge such as self-control, &c., and practising intense renunciation—permanently got his loved object."]

Here the words अधिमात्र, संवेग &c. are used in their Yogic technical sense.

(9) "ताम्बूलभृतगल्लोऽयं भल्लं जल्पति मानुषः ।
करोति खादनं पानं सदैव तु यथा तथा" ॥

वलम्बमानानां नानिष्टः स्यात् विद्यायाः पाक्षिकफलत्वं च निशामरणस्यविद्यानिष्पत्त्यभावनिबन्धनत्वाश्रवणेन परिहृतं स्यात्, अतोऽपेक्षितं स्यात् निशि मृतस्य मोक्षसमर्थनमिति तदर्थमधिकरणभेदो न्याय्यः नाडीरविरश्मिसंबन्धनियमाभिधानमपेक्षितमिति चेत् सत्यं, तस्य तु प्रतिज्ञायामपेक्षितत्वादाभिप्रायिकत्ववर्णनमुचितम् अन्यथाऽपेक्षितार्थान्तरप्रतिज्ञाया उपपत्तेश्चानभिहितत्वप्रसङ्गात्, प्रतिज्ञाहेत्वोरुभयोरप्याभिप्रायिकत्वकल्पनादपि पूर्वप्रतिज्ञाया उपपत्तिमात्रस्याभिप्रायिकत्वकल्पनं न्याय्यमिति । निशाधिकरणं समाप्तम् ॥

दक्षिणायनाधिकरणम् ।

सू० अतश्चायनेऽपि दक्षिणे ॥ १९ ॥

वृ० निशि मृतस्यापि विदुषो ब्रह्मप्राप्तौ यो हेतुरुक्तः तत एव हेतोर्दक्षिणेऽप्ययने मृतस्य ब्रह्मप्राप्तिः सिद्धा, अधिकाशङ्का तु "अथ यो दक्षिणे प्रमीयते पितॄणामेव महिमानं गत्वा चन्द्रमसः सायुज्यं गच्छती"ति दक्षिणायने मृतस्य चन्द्रप्राप्तिश्रवणाच्चन्द्रमसं प्राप्तानां च तेषां यदा तत्पर्य्यवैत्यथैतमेवाध्वानं पुनर्निवर्त्तन्त इति पुनरावृत्तिश्रवणात्, भीष्मादीनां च ब्रह्मविद्यानिष्ठानामुत्तरायणप्रतीक्षादर्शनात् दक्षणायने मृतस्य ब्रह्मप्राप्तिर्न सम्भवतीति, परिहारस्तु अविदुषां पितृयाणेन पथा चन्द्रमसं प्राप्तानामेव पुनरावृत्तिर्विदुषस्तु चन्द्रं प्राप्तस्यापि, तस्माद्ब्रह्मणो महिमानमाप्नोतीति वाक्यशेषात्तस्य दक्षिणायनमृतस्य चन्द्रप्राप्तिर्ब्रह्मप्रपित्सतो विश्रामहेतुमात्रमिति गम्यते वाक्यशेषा-।देऽपि पूर्वोक्तादेव बन्धहेत्वभावाद्विदुषश्चन्द्रं प्राप्तस्यापि ब्रह्मप्राप्तिरनिवार्या, भीष्मादीनां यो-

गप्रभावात्स्वच्छन्दमरणानां धर्मप्रवर्त्तनायोत्तरायणप्राशस्त्यप्रदर्शनार्थस्तथाविधाचारः । ननु च विदुषो मुमुक्षून्प्रति पुनरावृत्त्यपुनरावृत्तिहेतुत्वेन कालविशेषविधिर्दृश्यते "यत्र कालेत्वनावृत्तिमावृत्तिं चैव योगिनः । प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ । अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणं । तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥ धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् । तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्त्तते । शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते । एकया यान्त्यनावृत्तिमन्यया वर्त्तते पुनरि"ति तत्राह—

टी० सू० अतश्चायनेऽपि दक्षिणे ॥ १९ ॥ अवान्तरसङ्गतिः स्फुटा किं दक्षिणायनमृतस्यापि विदुषो ब्रह्मप्राप्तिः सम्भवति नेति ? किमथ योदक्षिण इति दक्षिणायनमृतस्य चन्द्रप्राप्तिवचनं ब्रह्मप्राप्त्यभावं गमयति नेति? चन्द्रप्राप्तानामावृत्तिवचनं किं विद्वदविद्वत्साधारणम्?उताविद्वद्विषय?मिति किं भीष्मादीनाङ्कालप्रतीक्षाकालविधानस्मरणसहकृतसामान्यश्रुत्यनुरोधेन साधारणत्वसमाश्रयणं न्याय्यम्? उत ब्रह्मणो महिमानमिति वाक्यशेषानुरोधेनाविद्वद्विषयत्वसमाश्रयणं न्याय्य? मिति साधारण्याश्रयणे न्याय्ये सत्यावृत्तिवचनस्य साधारण्येन ब्रह्मप्राप्त्यभावावगतकतया न ब्रह्मप्राप्तिः, अविद्वद्विषयत्वाश्रयणेन्याय्येसत्यावृत्तिवचनस्याविद्वद्विषयतयाऽथयोदक्षिण इति वाक्यस्य ब्रह्मप्राप्त्यभावानवगमकत्वाद्दक्षिणायनमृतस्य विदुषोऽपि ब्रह्मप्राप्तिः स्यात्, दक्षिणायनमृतस्येति उदगयने प्रमीयते दक्षिणे प्रमीयत इत्यत्र धूमादिमार्गलिङ्गाभावात् ब्रह्मप्राप्तिवचनाच्चार्चिरादिगतस्यैव मरणकालविशेषेण मार्गे संमानविशेष उच्यत इत्यर्थः । उत्तरसूत्रशङ्कामाह "नत्वि"ति,

सू० योगिनः प्रति स्मर्यते स्मार्त्ते चैते ॥ २० ॥

भ्रू० नाच मुमुक्षून्प्रति मरणकालविशेषोपादानं स्मर्य्यते, अपि तु योगिनो योगनिष्ठान्प्रति स्मार्त्ते स्मृतिविषयभूते स्मर्त्तव्ये देवयानपितृयाणाख्ये गती स्मर्य्येते, योगाङ्गतया अनुदिनं स्मर्त्तुं, तथा ह्युपसंहारः "नैते सृती पार्थ जानन् योगी मुह्यति कश्चन । तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुनेति । अग्निर्ज्योतिर्धूमो रात्रिरिति च देवयानपितृयाणे प्रत्यभिज्ञायेते । उपक्रमे च यत्र काले त्विति काल—शब्दः कालाभिमानिदेवतातिवाहिकपरः, अग्न्यादेः कालत्वासम्भवात्, अतस्तेऽर्चिषमभिसम्भवन्तीति विहितदेवयानानुस्मृतिश्च विद्यानिष्ठान्प्रति विधीयते, न मुमूर्षून्प्रति मरणकालविशेषः ॥ दक्षिणायनाधिकरणं समाप्तम् ॥

टी० सू० योगिनः प्रति स्मर्य्यते स्मार्त्तेचैते ॥ २० ॥ स्मार्ते इति सौत्रं पदं तद्व्याचष्टे "स्मृती"ति, योगयुक्तो भव मार्गानुसन्धानरूपयोगयुक्तो भवेत्यर्थः । अन्यथा सङ्गत्यभावप्रसङ्गात्, यत्र काले त्विति, मध्ये उपसंहारे च मार्गविधानपरत्वदर्शनान्महावाक्यस्वारस्येनोपक्रमो बाध्यत इत्यभिप्रायेणाग्निर्ज्योतिरित्यादिवचनमुक्तं, योगिन इति सौत्रयोगिशब्दश्चतुर्विधभगवदुपासकसाधारणः, भक्तियोगस्य तेषां साधारणत्वात्, तत्र मुमुक्षोर्देवयानानुसंधानमैश्वर्य्यार्थियोगिनः पितृयाणानुसन्धानमिति विधीयत इति श्रुतौ गतिद्वयं विहितं तदनुसन्धानमत्र विधीयत इत्यर्थः । न मुमूर्षून्प्रति कालविशेष इति, विधीयत इत्यन्वयः, । अत्र परे चापरे च योगिनः प्रतीति सूत्रमेवं व्याचक्षते योगिनः प्रति स्मार्त्तोपासनार्थोऽयं

स्मार्त्तः कालविनियोगः प्रत्यासन्नत्वात्, अतः श्रौतेषूपासनेषु नावतरति यदि तत्रापि कालवाचिशब्दः कालाभिमानिदेवतापरः तदा न श्रुतिविरोध इति, अग्न्यादिशब्दानां कालवाचित्वाभावेन नैते सृती इति निगमनाच्च कालविधिपरत्वायोगात् विषयव्यवस्थया निर्वाहो भाष्येऽनादृतः । अन्ये त्विदं सूत्रमेवं व्याचक्षते योगिनः—प्राणायामेन वायुविजयपराः योगिनः प्रति एतौ अयनरूपकालौ स्मर्य्येते, ते हि शक्नुवन्त्येव स्वच्छन्देन मर्त्तुममर्त्तुं चेति तदयुक्तं प्रशस्तकाले मर्त्तव्यमिति विधिश्चेदग्न्यादिकीर्त्तनस्य विफलत्वान्नैते सृती इत्युक्तत्वाच्छ्रुतिसिद्धमार्गप्रत्यभिज्ञाभङ्गप्रसङ्गाच्च ॥ दक्षिणायनाधिकरणं समाप्तम् ॥ इति शम् । नमः पूर्वाचार्येभ्यः ॥

इति श्रीभगवद्रामानुजाचार्यविरचिते शारीरकमीमांसाभाष्ये चतुर्थाध्यायस्य द्वितीयः पादः ॥ २ ॥

श्रीमते रामानुजाय नमः ।

अथ चतुर्थाऽध्यायस्य तृतीयः पाद आरभ्यते ॥

अर्चिराद्यधिकरणम् । **सू० अर्चिरादिना तत्प्रथितेः ॥ १ ॥**

भा० विदुष उत्क्रान्तस्य नाडीविशेषेण हार्दानुग्रहाद्गत्युपक्रम उक्तः, तस्य गच्छतो मार्ग इदानीं निर्णीयते तत्र श्रुतिषु मार्गप्रकारा बहुधाऽऽम्नायन्ते छान्दोग्ये तावत् "यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवं विदि पापं कर्म न श्लिष्यते" इत्युपक्रम्य ब्रह्मविद्यामुपदिश्याम्नायते अथ यदु चास्मिञ्छव्यं कुर्वन्ति यदु च नार्चिषमेवाभिसम्भवन्त्यर्चिषोऽहरह्न आपूर्य्यमाणपक्षमापूर्य्यमाणपक्षाद्यान् षडुदङ्ङेति मासांस्तान् मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषे,

मानवः स एनान् ब्रह्म गमयत्येष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्त्तं नावर्त्तन्ते नावर्त्तन्ते" इति, तथाऽचैवाष्टमे अथैतैरेव रश्मिभिरूर्द्ध्वमाक्रमत इति कौषीतकिनश्च देवयानमार्गमन्यथाऽधीयते "स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोकं स वरुणलोकं स आदित्यलोकं स इन्द्रलोकं स प्रजापतिलोकं स ब्रह्मलोकमि"ति, तथा वृहदारण्यके "य एवमेतद्विदुर्ये-चेमेऽरण्ये श्रद्धां ।

टी० सू० अर्चिरादिना तत्प्रथितेः ॥ १ ॥ पादसङ्गतिमाह "विदुष" इति, ब्रह्मविदो मार्ग इति दर्शयितुं यथा पुष्करपलाश आपो न श्लिष्यन्त इत्याद्युदाहृतं शव्यं–शवयोग्यं संस्कारं यत् यदि शवसंस्कारं यदि कुर्वन्ति यदि वा न कुर्वन्ति अर्चिषमेव तेऽभिसंभवन्ति प्राप्नुवन्तीत्यर्थः। उदङ् आदित्य इत्यध्याहार्य्यं छान्दोग्ये अर्चिरादिका गतिः श्रूयते कौषीतकीवाक्ये अग्निलोकादिका वृहदारण्यकेऽप्यर्चिरादिका तत्रैव वाय्वादिका च आडम्बरं वाद्यविशेषः अन्यत्र विद्यान्तरे किं विद्वानर्चिरादिना एव मार्गेण गच्छति? उत ततोमार्गान्तरेण वेत्यनियमः? किं सर्वविद्यास्वेको मार्ग आम्नायते? उत नानामार्गा? इति, किं क्रमान्तराम्नानात् नानामार्गसमाश्रयणं न्याय्यम्? उतादित्यादिप्रत्यभिज्ञानेन मार्गैकत्वाश्रयणं न्याय्यमिति, नानामार्गाश्रयणस्य न्याय्यत्वे नानाविद्यासु नानामार्गाम्नानादनियमः, मार्गैकत्वाश्रयणे न्याय्ये सर्वविद्यासु मार्गैकत्वाम्नानादर्चिरादिनैवेति नियमः, अनेकरूपत्वादित्यनेन क्रमभेदः क्रमिभेदश्च विवक्षितः । एवं प्राप्त इति क्रमक्रमिभेदात्कथं मार्गैक्यमित्यत्राह–

भू० सत्यमुपासते ते ऽर्चिषमभिसंभवन्ति, अर्चिषोऽहरन्ह आपूर्य्यमाणपक्षमापूर्यमाणपक्षाद्यान्षण्मासानुदङ्ङादित्य

एति सामान्मासेभ्यो देवलोकं देवलोकादादित्यमादित्या-द्वैद्युतं वैद्युतात्पुरुषो मानवः स एत्य ब्रह्मलोकान् गमयति" इति, तत्रैव पुनरन्यथा। यदा वै पुरुषो ऽस्माल्लोकात्प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीर्षते यथा रथचक्रस्य खन्तेन स ऊर्द्धमाक्रमते स आदित्यमागच्छति तस्मै स तत्र विजिहीर्षते, यथा आडम्बरस्य खन्तेन स ऊर्द्ध्वमाक्रमते स चन्द्रमसमागच्छति तस्मै स तत्व विजिहीर्षते यथा दुन्दुभेः खमित्यादि, तत्र संशयः किमर्चिरादिरेक एव मार्ग आभिः श्रुतिभिः प्रतिपाद्यते इति तेनैव ब्रह्म गच्छति विद्वान्? उत तस्मादन्ये अन्यत्र मार्गा इति तैर्वे ऽनेन वेत्यनियम इति, किं युक्तम् अनियम इति, कुतः अनेकरूपत्वान्नैरपेक्ष्याच्चेत्येवं प्राप्तेऽभिधीयते—अर्चिरादिनेति, अर्चिरादिरेक एव मार्गः सर्वत्र प्रतिपाद्यते, अतोऽर्चिरादिनैव गच्छन्ति कुतः तत्प्रथितेः, तस्यैव सर्वत्र प्रथतेः, प्रथितिः—प्रसिद्धिः तस्यैव सर्वत्र प्रत्यभिज्ञानादित्यर्थः, प्रत्यभिज्ञानात्स एव मार्गः सर्वत्र न्यूनाधिकभावेन प्रतिपाद्यत इति विद्यागुणोपसंहारवदन्यत्र उक्तानामन्यत्रोपसंहारः क्रियते, छान्दोग्ये तावदुपकोसलविद्यायां पञ्चाग्निविद्यायां चैकरूप एवाम्नायते, वाजसनेयके च पञ्चाग्निविद्यायां तथैवार्चिरादिरल्पान्तर आम्नायते, अतस्तत्रापि स एवेति प्रतीयते, अन्यत्रापि सर्वत्राग्न्यादित्यादयः प्रत्यभिज्ञायन्ते ॥ अर्चिराद्यधिकरणं समाप्तम् ॥

टी० सर्वत्रेति प्रत्यभिज्ञानं दर्शयति "छान्दोग्ये ताव"दिति, अत्यान्तर इति संवत्सरशब्दस्थाने देवलोकशब्द इति भावः । सर्वत्र बहुषु प्रदेशेष्वित्यर्थः । परविद्यासु ब्रह्मप्रत्यभिज्ञानेऽपि गुणानन्त्यादुपसंहारो न शक्यते इति विद्यैक्यासम्भवः, मार्गान्वयिनां पदार्थानां द्वादशसंख्याऽन्तर्भूतत्वात् चिन्तायो यतयाऽग्न्यादिप्रत्यभिज्ञानुगुण्येन मार्गैक्यमिति भिदा । अत्र परे तु भिन्नविद्याशेषत्वाच्च भिन्नत्वम् । अथैतैरेव रश्मिभिरित्यवधारणात् यावत् क्षिपेन्मनस्तावदादित्यङ्गच्छेदिति शैघ्र्यवचनाच्चेति पूर्वपक्षयुक्तीराहुः । भिन्नविद्याशेषत्वेऽपि सुकृतदुष्कृतप्रहाणे भिन्नत्वादर्शनान्मन्दतया तदुपेक्षा । रश्मिभिरेवेत्ययोगव्यवच्छेदे एवकारमात्रस्य प्रमाणसिद्धबाधकत्वायोगात् अर्चिरादीनां देवतात्वेन मार्गदैर्घ्यहेतुत्वाभावेन शैघ्र्याविरोध इति तदनास्था । अन्ये तु ये चत्वारः पथयो देवयाना इति मन्त्रवर्णाद्बहुत्वावगमाच्च पूर्वपक्षमाहुः । अर्चिरादिका वाय्वादिका सूर्य्यद्वारेणेति सूर्यादिका रश्मिमती देवलोकवती वरुणादिलोकादिमती चेति चतुष्टयाधिक्यादमुत्तुविषयत्वाच्च तदनुपन्यासः । मन्त्रवर्णस्तु चातुराश्रम्याभिप्रायो वाऐष्टिकपाशुकसौमिकदार्वीहोमिकगत्यभिप्रायो वा । अर्चिराद्यधिकरणं समाप्तम् ॥

वाय्वधिकरणम् । **सू० वायुमब्दादविशेषविशेषाभ्याम् ॥ २॥**

भू० अर्चिरादिनैव गच्छन्ति विद्वांस इत्युक्तम्, तत्रार्चिरादिके मार्गे छन्दोगा मासादित्ययोरन्तराले संवत्सरमधीयते मासेभ्यः संवत्सरं संवत्सरादादित्यमिति, वाजसनेयिनस्तु तयोरेवान्तराले देवलोकम् ।

टी० सू० वायुमब्दादविशेषविशेषाभ्याम् ॥ २ ॥ सङ्गतिः स्फुटा संवत्सरादित्ययोर्मध्यप्राप्तौ वायुदेवलोकौ किमनियतक्रमेण निवेशयितव्यौ? उतनेति,? किं वायुदेवलोकशब्दावर्थान्तरपरौ ? उत नेति किं देवलोकशब्दस्य देवावासपरत्वं न्याय्यमुत वायोर्देवगृहत्वश्रवणानुरोधेन

वायुपरत्वं न्याय्यं? देवावासपरत्वे न्याय्ये तयोः शब्दयोरर्थान्तरपरत्वाद-नियतक्रमेण निवेशः, वायुपरत्वे सत्यर्थान्तरत्वाभावादनियतक्रमेण निवेशाभावः स्यात् । अर्चिरादिनैवेत्यादि, संशयं वक्तुं विषयं शोधयति तत्रेत्यादिना, श्रुत्यर्थपाठप्रवृत्तिमुख्यकाण्डाः क्रमप्रमाणानि, तत्र प्रातिपदिकाभिहितो विभक्त्यभिहितश्च श्रौत एवेत्यत्र पञ्चम्यभिहितं संवत्सरदेवलोकयोर्मासादूर्ध्वत्वमविशिष्टं, तत्र संवत्सरस्य मासादूर्ध्वभावित्वे अधिककालानां न्यूनकालोत्तरनिवेशरूपार्थस्वभाववोऽधिकहेतुरस्ति अतो मासानन्तरं संवत्सरप्राप्तिः, तत ऊर्ध्वमादित्यात् पूर्वं देवलोक इति स्थितं, बृहदारण्यके अन्यत्रादित्यात्पूर्वं वायुः श्रुतः कौषितकीवाक्येऽग्नेः परत्वेन वरुणात् पूर्वत्वेन वायुः पाठक्रमसिद्धः तत्र पाठक्रमात् बलीयसा वाजसनेयकोक्तश्रौतक्रमेण पाठक्रमप्राप्तस्याग्न्यनन्तरत्वस्य बाधितत्वादादित्यात् पूर्व एव वायुः प्राप्तः देवलोकस्य प्राप्तः तत्र संशय इत्यर्थः ॥

सू० मासेभ्यो देवलोकं देवलोकादादित्यमिति, उभयत्रापि मार्गस्यैकत्वादुभावुभयत्रोपसंहार्य्यौ, तत्र मासादूर्ध्वमभिहितयोः संवत्सरदेवलोकयोः पञ्चम्याऽभिहितस्य श्रौतक्रमस्य तुल्यत्वेऽप्यर्चिषोऽहरन्ह आपूर्य्यमाणपक्षमापूर्य्यमाणपक्षाद्याः षडुदङेति मासांस्तानित्यधिककालानांन्यूनकालेभ्य उत्तरोत्तरत्वेन निवेशदर्शनात् संवत्सरस्यैव मासादनन्तरं बुद्धौ विपरिवृत्ते संवत्सर एव मासादूर्द्ध्वं निवेशयितव्य इति, तत ऊर्ध्वं देवलोक इति निश्चीयते, अन्यच वाजसनेयिनः "यदा वै पुरुषोऽस्माल्लोकात्प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य

सिद्धः दुःखाभावे सुखाभिमानात् आलोकाभावे च नीलत्वबहलत्वाद्यध्यासस्य वैशेषिकादिभिरङ्गीकारात् शशशृङ्गं तीक्ष्णमित्यादिशब्दजन्याध्यासदृष्टेश्च । वदन्ति च शब्दज्ञानानुपाती वस्तुशून्योविकल्प इति एष बन्ध्यासुतो यातीत्यादिषु अतोनास्त्येव नभ इति तत्राह । सद्रूपेणेति ॥

सू० सद्रूपेणैव भानान्न भवति वरणाभावमात्रं विहायः संसर्गाभावमात्रं न च भवति यतो नास्ति संसर्गबोधः । अत्यन्ताभावनाशावजननिरपि वा सत्सु तेष्वेव न स्युस्तादात्म्याभावसिद्धिः कथमपि च भवेत्तं तमर्थं विहाय ॥ ४६ ॥

अयम्भावः, सर्वं हि वस्तुजातं संविद्व्यवस्थाप्यं, संविद्यते च भावरूपतयैव नभः, भावान्तरमेवाभाव इति स्थापयिष्यते । अन्यथाऽपि ब्रूमः, नाभावस्य निस्स्वभावता, अभावस्वभावतयैव तत्सिद्धेः स्वान्यस्वभावतया सिद्धिस्तु न कस्यापि । न च स्वेन स्वभावेन सिद्धस्य परस्वभावविरहादसत्त्व,मतिप्रसङ्गात् । उक्तं च न्यायभाष्ये असच्चासदिति गृह्यमाणं तथाभूतं विद्यमानमविपरीतं च तत्त्वमिति । तुच्छतयैवोपलब्ध्यापि निरस्तं निस्स्वभावत्वं, तुच्छता ह्यभावप्रतियोगित्वम्, अभावत्वं वस्त्वन्तरशून्यत्वमन्यद्वा किञ्चित् । न प्रथमः, स्वकालादिषु सतामभावप्रतियोगिनां यथाप्रमाणं तत्तत्स्वभावविशिष्टत्वात् । न द्वितीयः,दत्तोत्तरत्वात् । न तृतीयः,ईदृशतुच्छत्वस्य स्वरूपाविरोधिनस्सर्वत्र सुलभत्वात् । न चतुर्थः, अस्मन्मतविरोधिनस्त्वदिष्टस्य कस्यचित्कुतश्चिदप्यसिद्धेरिति । यत्त्वावरणेष्वाकाशो नास्तीति, तदसत्,

त्वदुक्तियुक्त्यैव तत्सिद्धेः । अभित्त्वा दुर्दर्शत्वं हि व्यवहितत्वात् । अत एव तत्र नास्तीति न निश्चाय्यम् । भित्त्वा तु प्रेक्षणे नभस्तत्र दृश्यत एव । न चात्रावरणाभावमात्रोपलम्भः इहावरणं नास्तीति साधिकरणस्य तस्योपलम्भात् इहाकाश इतिवत्स्वात्मन्येव भेदोपचारात्स्यादिति चेन्न । बाधकाभावात् । अधिकरणानवस्थाप्रसङ्गो बाधक इति चेन्न । आकाशादेस्साधिकरणतयैवोपलम्भ इत्यनभ्युपगमात् । इहाकाश इतिवदित्यत्र चाकाशशब्देनावरणाभावविवक्षायां पक्षदृष्टान्तभेदाभावः, त्वदनभ्युपगतस्य परमतसिद्धस्य त्वया दृष्टान्तीकर्तुमयोग्यत्वात्, प्रतिबन्दिग्रहणमात्रमिदमिति चेन्न इह मूर्ते वस्तुनि आकाशसम्बन्ध इति प्रतीतौ विरोधाभावात् आवरणाभावधीरपि तथैव स्यादिति चेत्, अस्त्वेवं, तथाऽपि कदाचिदिह तारकेत्यादिवन्निरधिकरणतया गगनोपलम्भे तदतिरिक्तनभस्सिद्धिनिषेधः । आवरणेषु निरवकाशत्वं च विशेषणराहित्यात्, आवरणरहितमेव ह्याकाशमन्यद्वा किञ्चिदवकाशः, न त्वाकाशमात्रमावरणेष्वविद्यमानतया तदभाव आकाश इति चायुक्तं सर्वेषां स्वस्मिन्नविद्यमानतया स्वाभावत्वप्रसङ्गात् । यत्तु व्योमादिशब्दा व्यामोहैकनिबन्धना इति तदसत् प्रमाणसिद्धे क्वचिद्वस्तुन्येव सर्वशब्दानां व्युत्पत्तेः तद्विषयतयैव च व्यवहारात् खपुष्पादिषु त्वयोग्यसमभिव्याहारादन्यथा धीः । मृगतृष्णादिशब्दा अपि जलाध्यासाधिकरणार्कमरीचिव्यूहादिविषयाः । यद्यपि तलत्वादिकमाकाशेऽध्यस्तम् अल्पत्वविपुलत्वादिकं त्ववच्छेदकभेदायत्तं तथाऽपि सत्येवारोपः यत्त्वसति दुःखाभावे सुखाध्यासो दृष्ट इति तदर्भकवाक्यं सत्येव दुःखाभावे सुखारोपात् अभावस्य भावान्यत्वमात्रमेव ह्यसत्त्वं सिद्धं तेन च स्वरूपसन्नेवासौ । आलोकाभावे नीलत्वाध्यासस्त्वस्मान्प्रति नोदाहर्तव्यः । अत एवाध्यस्तनैल्यमालोकाभावमात्रमेव नीलं नभ इति

भातीति निरस्तम् । आलोकदेशे च नभःप्रतीत्यनुवृत्तेः । नन्वस्मदिष्टक्षणिकत्वादिकं क्वचित्ते सिद्धमसिद्धं वा उभयथापि कथं तत्प्रतिक्षेपः कथं वा तस्मिन्केषां चित्सत्यताभ्रमं निर्वहि*ष्यसि इत्थम् एतदुत्तरक्षणवृत्तित्वाभावो हि यत्र क्वचिदन्यत्र सिद्धः स सर्वस्मिन्कुतश्चिदारोप्यते प्रतिक्षिप्यते चेति सुस्थमेतत् । एवमन्यत्सर्वमपि चिन्त्यम् । शशशृङ्गं तीक्ष्णमित्यादिषु च प्रमिते शशादौ शृङ्गवत्त्वारोपः शृङ्गादौ च प्रमिते सत्या ऽसत्या वा तीक्ष्णधीः इत्येतावत्सहृदयहृदयारूढं नात्रासति किञ्चिदारोप्यते । एवमनभ्युपगमे वर्णक्रमनिर्देशवत्स्यात् एतेन शशस्तीक्ष्णशृङ्गवानित्यपि निरूढम् । भूतेषु भाविषु च कथं भ्रम इति चेत् कथं वर्तमानेषु । तेषां सत्वादिति चेन्न । स्वकालसत्त्वस्य कालान्तरासत्त्वस्य च साधारणत्वात् इति आवरणाभावश्च सत्योऽसत्योवा संसर्गाभावादिविभागं नातिक्रामेदिति मत्वा तत्र तत्र दूषणमाह । संसर्गेत्यादिना पद्यशेषेण । संसर्गाभावस्तावन्निरूप्यमाणः संसर्गिनिरूप्यसंसर्गप्रतियोगिकतयाऽधिकरणप्रतियोगिभूतसंसर्गिबोधाभावे कथं बुद्ध्येत । अत्यन्ताभावोऽपि संसर्गाभावभेद एव यथा अश्वे गोत्वस्य शशे वा शृङ्गस्य तथा च अत्रावरणं नास्तीति साधिकरणभूताभावधीरनिवार्या । खपुष्पवदावरणानामत्यन्तासत्त्वे तु शून्यवादश्शरणम् । वर्तमानेषु चावरणेषु तत्प्रध्वंसप्रागभावौ दुर्वचौ । तौ हि किमन्यत्र विद्यमानानामुताविद्यमानानाम् । नाद्यः तेषां तदुभययोगात् । न द्वितीयः तत एव, न हि शशे शृङ्गस्य नाशप्रागभावौ तदिह

* अत्र वहधातोरनिट्कत्वेन निर्वक्ष्यसीत्येव पाठो युक्तो न त्वान्ध्राक्षरपुस्तकस्थः सेट्कपाठः । दहित्वा च वहित्वा चेत्यादौ तु सेट्कपाठः स्मार्त इति न स दृष्टान्तकोटिनिविष्टः । संज्ञापूर्वकविधेरनित्यत्वमाश्रित्य तथा पाठसमर्थनं तु तथाप्रयोगसत्त्वनिश्चयनिबन्धनमित्यकिंचिदेतत् । अन्तर्भावितणिचकत्वेनार्थसमर्थनसंभवेऽपि पदसमर्थनं सर्वथाऽसंभव्येवेति विचारयन्तु विद्वासः स्वयमेवेति कृतमधिकप्रयत्नेन । निर्वाहयिष्यसीत्येव वा पाठः स्वार्थे च णिजिति न बहु चोद्यावतार इति युक्ततरमुदीक्षामहे ।

सर्वावरणनाशादिकं दुर्वचमसम्भवात् कतिपयावरणनाशादिकं चावरणादेशेऽप्यस्ति इति तत्रापि निष्क्रमणादिप्रसङ्गः । ननु संसर्गं तु विधिरेकेनापि तन्निषेधस्तु सर्वप्रतियोगिकः तद्वदत्रापि सर्वावरणाभावे व्योमधीः स्यात् । न असम्भवस्योक्तत्वात् । एवं सति च संसर्गाभाव एव नामान्तरेणोच्यते तत्र च दत्तमेवोत्तरम् । अस्तु तर्ह्यावरणतादात्म्याभावोऽसौ स्यात् । स ह्यसिद्धप्रतियोगिकतया स्वयमप्यसिद्धः तदात्मनश्चाकाशस्य तुच्छत्वं युक्तमिति तत्राह । तादात्म्येति । चो दूष्यसमुच्चये श्रुत्यादिविरोधरूपदूषणसमुच्चये वा । असिद्धप्रतियोगिकत्वमस्य क्वचिदपि तादात्म्यपदार्थाभावाद्वा । आवरणद्वयस्य तदभावाद्वा । नाद्यः अभावप्रतियोगित्वेन तत्कल्पनस्यासिद्धिप्रसङ्गात् । न हि क्वचित्सिद्धिमन*पेक्षकस्य क्वचिदपि कल्पना माध्यमिकमतोत्थाप†नप्रसङ्गात् । नोत्तरः संसर्गाभावस्याप्यसिद्धप्रतियोगिकत्वापातात् न ह्येतत्कालीन एतद्भूतलघटसंसर्गो निषिध्यमान इहान्यत्र च सिद्धः घटसंसर्गमात्रं यत्र क्वचित्सिद्धमिति चेत् घटतादात्म्यमपि तथैवास्तु तर्ह्युभयत्राप्यसिद्धप्रतियोगिकत्वं किं नश्छिन्नमिति चेन्न । अतिप्रसङ्गस्योक्तत्वात् अत्यन्ताभावोऽप्यसिद्धप्रतियोगिक इति पक्षश्च निरस्तः ।

तत्रतत्र स्वतादात्म्यं सिद्धमन्यत्र कल्प्यते ।
बाधकैः क्षिप्यते चेति नास्माकमिह विप्लवः ॥

सर्वत्र तादात्म्याभावस्तत्तद्वस्तुनिष्ठतयैव सिद्ध्येत् न तु तन्मध्यादिदेशतया यथा मिथस्संयुक्ते वियुक्ते वा सिंहे गजान्यत्वं गजे च सिंहान्यत्वमिति । इदमावरणं न भवतीति तादात्म्यनिषेधश्च कस्यचिदावरणस्य वा अनावरणस्य वा आद्ये विरोधः

* क्वचित्सिद्धिमनपेक्ष्य कस्यचिदिति पाठोयुक्तः ।
† मतोत्थानप्रसङ्गादिति पाठान्तरं युक्तम् ।

आवरणान्तरं न भवतीति विवक्षायामविरोध इति चेत् सत्यं तथाऽपि न तथाकाशप्रतीतिविषयावरणाभावसिद्धिः । द्वितीये त्वावरणान्यद्रव्यमिदङ्कारास्पदं सिद्धमत्येव । नन्वावरणाभाव एवेदंकारगृहीतः आवरणतादात्म्याभावाधिकरणतया बुध्यतां, न हि तत्तदभावयोस्तादात्म्यमिति मैवं न ह्यावरणतादात्म्याभावस्यावरणान्यत्वं बुध्वा कश्चित्तच नभःपर्यायान्प्रयुङ्क्ते निष्क्रमणादौ वा प्रयतत इति अलमतिविस्तरेण । आकाशे चाविशेषादिति सूत्रभाष्ये चैतत्सर्वमनुसन्धेयमिति ॥ ४६ ॥ इत्याकाशस्यावरणाभावमात्रत्वभङ्गः ॥

सोऽयमाकाशस्सर्वव्यापी नित्यश्चेति वैशेषिकादयः । जैनास्तु तत्र लोकाकाशः आलोकाकाशश्चेति विभागमप्याहुः । मूलप्रकृतिर्विभ्विति सांख्याः । मनोविभ्विति बौद्धाः । तेषां पक्षं सहेतुकमनुभाषते । नित्यत्वादीति ।

सू० नित्यत्वाद्यम्बरादेर्यदि निरवयवद्रव्यताद्यैः
प्रसाध्यं कः स्याद्बाधो विपक्षे कथमिव
निगमे बाधकोऽत्रानुमा स्यात् । बाधस्सामा-
न्यदृष्ट्या श्रुतिसमधिगते नैव कुत्रापि शक्य-
स्तेनामूर्तत्वलिङ्गान्न सृजति विमतो मूर्तमि-
त्याद्यपास्तम् ॥ ४७ ॥

नित्यत्वं व्यापित्वं च पृथक्साध्यं प्रत्येकं तयोरेते हेतवः विगीतं नित्यं विभु च निरवयवत्वे सति महत्त्वात् सर्वदा निष्प*न्दत्वे सति महत्त्वात् सर्वदा स्पर्शरहितद्रव्यत्वात् इत्यादयः निरवयवेन्द्रियग्राह्यगुणत्वादित्याकाशस्यैव । ज्ञानासमवायिसंयोगाधारत्वात्

* निःस्पन्दत्वे सतीत्येव पाठोयुक्तो न तु मूर्द्धन्यंघटितस्तस्यापाणिनीयत्वात् ।

इति मनस एव। एतेषां साधारणमप्रयोजकत्वमभिप्रेत्याह। कः स्यादिति। न ह्येतेषामनित्यत्वादौ किञ्चिदनिष्टं स्यात् स्वाच्छन्द्येनानिष्टकल्पने विपरीतकल्पनस्यापि शक्यत्वात्। अक्षोभ्यं दूषणान्तरमाह। कथमिवेति। येष्वनित्यत्वम् अविभुत्वं चेति स्पष्टादिवादैस्तत्त्वान्तरावृतत्वादिवाक्यैश्च सिद्धं तेषु तद्विरुद्धसाधनमागमबाधितमित्यर्थः। उक्तेषु च हेतुषु निरवयवत्वादिकं पञ्चीकरणवादिशास्त्रविरुद्धं सर्वदा स्पर्शरहितद्रव्यत्वादिति विभुत्वसाधने अणुत्वेन श्रुतिसिद्धैर्जीवैरनैकान्त्यं ज्ञानासमवायिसंयोगाधारत्वम् आत्ममनसोरसिद्धं च। ज्ञानद्रव्यत्वादेर्वक्ष्यमाणत्वात् ज्ञानावस्थानां चात्ममनस्संयोगासमवायिकारणकत्वाभावात्। किं चात्र नित्यत्वसाधनमाकाशदिद्रव्यपक्षीकारेण वा। आकाशत्वाद्यवस्थापक्षीकारेण वा। आद्ये सिद्धसाध्यता द्वितीये तु स्वानभ्युपगतपक्षीकारेण युक्तः श्रुत्येव तदङ्गीकारे तयैव बाधः। अनुमानेन श्रुतिबाधे तु हेतुकप्रलापैश्श्रुतिप्रमाणस्य निश्शेषोच्छेदप्रसङ्गमभिप्रेत्याह। बाध इति। प्रत्यक्षविरोधरहितानन्यपरश्रुत्या यथावदधिगतेऽर्थे येन केनचित्सामान्यतोदृष्टेन बाधशङ्कायां श्रौतहिंसा न धर्मः हिंसात्वात् सम्मतवत् विगीतमस्थि पवित्रम्। अस्थित्वात् शङ्खवत्। इत्यादेरपि प्रसङ्गः स्यादिति भावः। उक्तं दूषणं प्रस्तुते पक्षे साध्यान्तरविषयहेत्वन्तरेष्वपि दर्शयति। तेनेति। आकाशो न स्पर्शवदुपादानं स्पर्शशून्यत्वात्। एवं वाय्वादिकमपि न तेजःप्रभृत्युपादानं रूपशून्यत्वात् रसशून्यत्वात् इत्यनुमानजातं श्रुत्यादिविरोधादपास्तमित्यर्थः॥ ४७॥

इत्याकाशादेरनित्यत्वाव्यापित्वादि॥

अथ पराभिमतां विश्वव्यापिनीं दिशमनभ्युपगच्छंस्तत्कल्पकानामन्यथासिद्धिमाह। प्रागिति।

सू० प्राक्प्रत्यक्त्वादिभेदं भजतु वियदिदं भानुयोगादिभेदादस्यैवोपाधिभेदादधिकदिश इव स्तां परत्वापरत्वे ॥ व्योमोत्तीर्णेऽपि देशे प्रभवतु तदुपाध्यन्वितैस्तत्तदर्थैर्दूरत्वादिव्यवस्था स्वयमुत विभुना ब्रह्मणा किं परैर्नः ॥ ४८ ॥

यदि प्रागादिधीव्यवहारसिद्धौ दिक् तत्त्वं कल्प्यते तत्सम्प्रतिपन्नं व्योमैव भवतु । सूर्योदयाद्युपाधिभेदेन तद्विभागात् पूर्वदक्षिणपश्चिमाद्युपाधिकॢप्तिश्चाधिकेऽनधिकेऽपि समाना । अप्रत्यक्षायां च दिशि प्रत्यक्षैरुपाधिभिरवच्छेदधीर्दुर्लभा । सूर्योदयादिविशेषितातपादिभिरेव प्रागादिधीव्यवहारसिद्धौ किं तदन्यकल्पनया । शाखाचन्द्रनयाच्चातपादेस्सूर्योदयादेश्च सम्बन्धधीर्युज्येत उपहितस्य शब्दार्थत्वान्न दिक्शब्दस्य व्योमातपादिपर्यायता स्यात् । ननु साक्षात्सम्बन्धरहितसंयुक्तसंयोगभूयस्त्वाल्पत्वनिबन्धने दूरासन्नपरत्वापरत्वे तत्तत्सम्बन्धोपनायकव्यापकद्रव्ययोगमन्तरेण कथं स्यातामित्यत्राह । अस्यैवेति । न हि त्वया कल्प्यमानमपि दिक् तत्त्वं तदुपाधियोगमन्तरेण परत्वापरत्वे जनयेत् । तथा सति तैरेवोपाधिभिरुपहितं व्योमाद्येव परत्वादिसिद्धौ पर्याप्तम् । अधिकशब्देन कल्पनागौरवं सूच्यते । नन्वाकाशः परिच्छिन्न इति भवत्सिद्धान्तः तथा च कथमाकाशरहितप्रदेशे दूरत्वादिकॢप्तिरित्यत्राह । व्योमेति । दूरत्वादिसिद्ध्यनुगुणोपाधिमद्भिर्महदादिभिस्तत्सिद्धिः स्यात् व्योमोत्तीर्ण इत्युपलक्षणं व्योमसम्पृक्तद्रव्यादिभिरपि तदुपपत्तेः । अनियमेन बहूनां दिक्त्वकल्पने गौरवं स्यादिति चेन्न । असिद्धकल्पनादनेके-

रपि सिद्धेरेव निर्वाहस्य लघुत्वात् । यद्येकमेव सर्वत्र दिग्व्यवहार-कारणमिष्यते तदा सर्वव्यापिना सर्वहेतुभूतेन परमात्मनैव सर्वं सिद्ध्येत् तस्यैव सन्तु उपाधिभेदास्सहकारिणः । अथ वा तत्तदुपाधयस्तावत्प्रत्यक्षाः तत्सम्बन्धोऽपि साक्षात्परम्परया वा दूरासन्नादेर्दृष्ट एव तद्दृष्ट्या च परत्वादिसिद्धौ किं तदुपहितगवेषणया कार्यविशेषाणामन्यतस्सम्भवे च न क्वचित्तदतिरिक्तं कल्प्यमित्यभिप्रायेणाह । किं परैर्न इति । परैर्व्यापकेश्वरव्यतिरिक्तैः उपाधिमात्रव्यतिरिक्तैर्वेत्यर्थः । नः ईश्वरमिच्छतां गौरवभीतानां चेति यावत् ॥ ४८ ॥

ननु यद्याकाशादयः परधर्मं परत्र घटयेयुः ततः पाण्ड्यदेशस्थितेन जपाकुसुमेन पाटलीपुत्रस्थितं स्फटिकमणिमुपरञ्जयेयुः । विश्वमपि व्यामिश्रसर्वस्वभावं स्यादिति प्रसक्तिमुद्भाव्य परिहरति । अन्यस्मिन्निति ॥

मू० अन्यस्मिन्नन्यधर्मान् घटयतु वियदाद्यत्र नातिप्रसक्तिः सिद्ध्यत्कार्योपयुक्तोपनयननियमोपिततच्छक्तिक्लृप्तेः । एवं ह्यवाधिकायामपि दिशि भवतोऽतिप्रसङ्गो निषेध्यो धर्मी धर्मश्च कल्प्यौ तव तदितरता स्यात्तु काले स्वमानात् ॥ ४९ ॥

हेतुमाह । सिद्ध्यदिति । यथा कलमबीजस्याङ्कुरजननशक्तिकल्पनेऽपि न कोद्रवाङ्कुरजनकत्वं दृश्यमानकार्यानुगुणकारणशक्तिकल्पनात् । तथा वियदादिष्वपि परत्वादिसिद्ध्युपयुक्तोपनायकतयेव तच्छक्तिक्लृप्तेरित्यर्थः । अत्र प्रतिबन्दिमभिप्रेत्याह । एवं हीति । नन्ववधिकाया दिशस्तावदर्थतया धर्मिग्राहकेण सिद्धिः न तथा

वियदादेः तत्स्वरूपस्यान्यतस्सिद्धत्वादिति चोद्यं विपरीतफलमित्यभिप्रायेणाह । धर्मीति । नावश्यं धर्मिग्राहकेणैव सर्वत्र शक्तिसिद्धिः गृहीतेष्वपि धर्मिषु तत्तत्कार्यदर्शनेन तन्नियतशक्तिक्लृप्तेः अतएव नातिप्रसङ्गः अयस्कान्तादिवत्तन्नियमात् यन्निबन्धनस्त्वतिप्रसङ्गः स सिद्धे कल्प्येऽपि समसमाधिः । एवं स्थिते वरमुभयकल्पनादेककल्पनम् । ननु शक्तिरपि कल्प्यमाना न निराधारा कल्प्यते तस्मात्साधारशक्तिकल्पने शक्तिविशिष्टाधारकल्पने वा समं गौरवं तन्न । यद्यपि शक्तितद्वन्तौ मिथोऽवच्छिन्नौ तथाऽपि सिद्धांशस्य कल्प्यत्वायोगादसिद्धांशनियतैव क्लृप्तिरिति विशेषसिद्धिः स्यादिति भावः । नन्वेवं वियदादेरेव सूर्यपरिस्पन्दाद्युपनायकत्वसम्भवात्तदन्यः कालो न सिद्ध्येदित्यत्राह । तदितरतेति । न हि वयं परत्वादिलिङ्गैराकाशाद्यतिरिक्तं कल्पयामः किन्त्वागमिकमभ्युपेमः अतो न तस्यासिद्धिरिति भावः ॥ ४६ ॥ यदि पृथक्त्वेन लोकवेदादिप्रसिद्धा दिगपन्हूयेत तथा वायुरपि । अस्य ह्युपलभ्यमानः स्पर्श उष्णाश्शीतोऽनुष्णाशीतोवा चेथापि न च्छान्दोग्याधीततेजोऽबन्नातिरेकस्सिद्ध्येत् तिर्यक्पवनमप्यदृष्टवशात्तेषामेव स्यात् शब्दधृतिकम्पैरपि नातिरिक्तमनुमातव्यं तैरेव तत्सम्भवात् ।

वातोपनीततत्तद्भूतान्तरावयवन्यायादनुद्भूतरूपतया दुर्दर्शत्वं स्यादित्यत्राह । संख्यानमिति ॥

मू० संख्यानं तत्त्वपङ्क्तौ क्वचिदपि न दिशः कालवद्वा न भेदः कण्ठोक्तौ व्याक्रियादिव्यवहरणमपि ह्यन्यथैवोपपन्नम् । श्रोत्रादुक्तस्तु लोकप्रभृतिवदुदयस्तस्य तत्रा-

प्ययोवा नैतावत्तत्त्वभेदं गमयति न च तच्छ्रोत्रतामान्यपर्यात् ॥ ५० ॥

अयम्भावः न हि वयमप्रत्यक्षस्य वायोः स्पर्शशब्दधृतिकम्पलिङ्गैस्सिद्धिरिति वदामः येन तेषामन्यथासिद्धिरुच्येत किन्तु तेषु तेषु शास्त्रेषु तत्त्वपङ्क्तौ परिगणनात् नैवं दिक्तत्त्वं गण्यत इति। तच्च कालप्रतिबन्दिं निस्तरति। कालवद्धेति। अस्ति हि रूपान्तरं तद् द्विजकालसंज्ञम् इत्यादि। ननु दिग्देशकालेष्वस्तातिः इत्यादिषु देशाद्भिन्ना दिक् कालवच्छास्त्रेषु व्यवह्रियत इत्यत्राह। व्याह्रियेति। प्रमाणसिद्धदिक्तत्त्वानुसारेण तत्कार्यविशेषविधायिनां शास्त्राणां तत्स्वरूपनिष्कर्षे तात्पर्याभावान्न ततस्त्वदिष्टसिद्धिरित्याशयः। अथ स्यात् प्राणाद्वायुरजायत इत्यादौ वाय्वादितत्त्वैस्सह दिशः पृथक्सृष्टिरुच्यते अतस्तद्वद्दिशोऽपि तत्त्वान्तरत्वं स्यात्। एवं दिशः श्रोत्रम् इति तद्वदप्ययोऽपि श्रूयत इत्यत्राह। श्रोत्रादिति। लोकप्रभृतिवदिति प्रतिबन्दिवचनम्। अत्र हि नाभ्यादासीदन्तरिक्षम्। इत्यादिभिर्न तत्त्वतस्सृष्टिश्श्रूयते किन्तु ब्राह्मणक्षत्रियचन्द्रसूर्यादिव्यष्टिसृष्टिप्रकरणे अन्तरिक्षस्वर्गादिकल्पनम्। अतोदिक्सृष्टिरपि व्यष्टिविषया न तत्त्वान्तरं कल्पयितुं शक्नुयादित्याह। नैतावदिति। अथापि दिशः श्रोत्रोपात्तस्य व्यष्टिविशेषत्वं स्यादित्यत्राह। न चेति। श्रोत्रतां—श्रोत्रोपादानतामित्यर्थः। न ह्यीन्द्रियाणि कस्य चिदुपादानानीति प्रागेवोक्तम्। गत्यभावादत्र विशेषः कल्प्यतामित्यत्राह। आन्यपर्यादिति। अत्र हि दिगुपाधीनां तद्देवतानां वा भगवतः श्रोत्रात् चन्द्रादेरिव सृष्टिः स्यात् अतस्तत्त्वान्तरकल्पनं निर्मूलमित्यर्थः ॥ ५० ॥ इति दिश आकाशादावन्तर्भावः ॥

आकाशे चिन्तिते प्रसङ्गाद्दिगन्तर्भाव उक्तः। अथाकाशानन्तरभाविनि वायोस्स्वरूपतस्सम्प्रतिपन्ने प्रमाणविप्रतिपत्तिं निरस्यति। वातो वातीति ॥

मू० वातो वातीति साक्षान्मतिरितरसमा स्पर्श-
तोऽनानुमा नासावन्धेऽन्येषु प्रसङ्गान्न पुनर-
गमकं स्पर्शनं रूपशून्ये ॥ अन्याक्षग्राह्यता-
द्विविधगुणविरहो ह्यन्यदक्षं न रुन्द्धे निर्ग-
न्धो नीरसोऽपि स्फुरति यदनलो दर्शन-
स्पर्शनाभ्याम् ॥ ५१ ॥

त्वगिन्द्रियपवनसंयोगे सति सावधानस्य वातो वातीति धीस्तावद् दुरपलपा सा साक्षात्काररूपा क्षित्यादिधीसमत्वादित्यर्थः । यच्च गुणेन गुण्यनुमानमाहुः तत्प्रतिषेधति । स्पर्शत इति । न हि गन्धादिवदिह गुणमात्रोपलम्भ इति भावः । अन्यथाऽतिप्रसङ्गमाह । अन्ध इति । अन्धे पुरुषे अन्येषु पृथिव्यादिषु भूतेषु त्वगिन्द्रियेण या स्पर्शधीस्सा स्पर्शमात्रविषया तत्तद्द्रव्यानुमितिहेतुस्स्यात् अन्धोक्तिश्चक्षुषा द्रव्यग्रहणनिवृत्त्यर्था उपलक्षणमेतदन्धतमसमध्यस्थस्य । सा ऽऽलोकेऽपि निमीलितचक्षुषः, न चेतद्युक्तं दर्शनस्पर्शनाभ्यामेकार्थग्रहणाभ्युपगमात् अन्यथा द्रव्यापन्हवप्रसङ्गाच्च । ननु नीरूपं कथं प्रत्यक्षम् आत्मादीन् पश्य कथं बाह्याक्षग्राह्यं रूपादीन्निरूपय, कथं स्पर्शनवेद्यं स्पर्शमेव परामृश, इत्यभिप्रायेणाह । न पुनरिति । तथाऽपि नीरूपद्रव्यं कथं बाह्येन्द्रियग्राह्यं त्वगिन्द्रियग्राह्यं वेत्यत्राह । अन्याक्ष इति । इन्द्रियाणां स्वग्राह्यविशेषगुणोपधानेन हि द्रव्यग्राहकत्वमितिवदकल्पना । ततश्चेन्द्रियान्तरग्राह्यविशेषगुणविरहेऽपि वायोस्त्वगिन्द्रियग्राह्यत्वमविरुद्धमित्यर्थः । यदि रूपशून्यद्रव्यत्वाद्वायुरप्रत्यक्ष इत्युच्येत तदा रसशून्यद्रव्यत्वात्तेजोऽपि किं तथा गन्धशून्यद्रव्यत्वाद्वा अतोऽवादि इन्द्रियान्तरग्राह्यविशेषगुणविरहो नेन्द्रियान्तर-

वेद्यत्वविरोधीति । अत्राविगीतमुदाहरणमाह । निर्गन्ध इति ॥ ५१ ॥ वायुप्रत्यक्षतायां परोक्तमनिष्टं शङ्कते । संख्येति ॥

मू० संख्याद्यास्स्पर्शनास्स्युस्तदधिकरणकास्स्पर्शने गन्धवाहे तेषां द्रव्योपलम्भप्रतिनियतनिजाध्यक्षयोग्यत्वतश्चेत् ॥ इ*ष्टस्त्वंशेन चात्मप्रभृतिषु सहते तैः प्रसिद्ध्यन्ति सर्वे तद्वाह्ये व्याप्तिरिष्टा यदि सततगतेरप्यसावस्तु बाह्ये ॥ ५२ ॥

वायौ त्वगिन्द्रियग्राह्ये तन्निष्ठसंख्यापरिमाणादिद्वीन्द्रियग्राह्यवर्गोऽपि तेन सह त्वचा गृह्येत तेषां संख्यादीनां स्वाधारद्रव्योपलब्धियोग्यतासमानयोग्यताकत्वादित्यर्थः । अत्रांशत इष्टप्रसङ्गतामाह । इष्टमिति । उपलभ्यते ह्येका वह्निशिखा एका वारिधारेत्यादिवत् एकोऽयं वायुरिति । रन्ध्रभेदनिष्क्रान्तेषु च वायुषु सावधानं स्पृशतो द्वित्वद्विपृथक्त्वादयोभान्ति यावता च त्वगिन्द्रियभागेन वायुस्सम्बध्यते तावदवच्छिन्नं तत्परिमाणं च गृह्यत एव न हि घटादावपि त्वगिन्द्रियसम्बद्धप्रदेशाभ्यधिकवर्तिपरिमाणं तेन गृह्यते, स्पृष्टापसृते वायौ संयोगविभागौ स्फुटौ एकस्मिन् शरीरे अनेकैर्वंशरन्ध्रादिभिरनेकेषु वायुस्रोतस्सु प्रवर्तितेषु तत्तदपेक्षया परत्वापरत्वे अपि सुलभे कर्म च वातीति प्रत्ययात् । अन्यथा सरित्प्रवाहे स्यन्दनं च त्वचा न गृह्येत यस्तु वायोः संमूर्च्छनाद्यवस्थासु संख्यादेरग्रहः स तोयादावपि समः । प्रसङ्गस्य व्याप्तिभङ्गमप्याह । न चेति । आत्मनि तावदद्याप्यहमेक इति धीस्स्यात् तथाऽपि तत्परिमाणं न गृह्यते अत

* दृष्टं त्वंशेनेति पा० ।

एव न ह्यणुत्वविभुत्वदेहपरिमाणत्वसन्देहः । एवमन्यदपि । तथा बाह्येष्वपि द्रव्योपलम्भेऽपि द्वित्वचित्वाद्यग्रहो दृष्टः । उक्तव्यतिरिक्तेष्वयं नियम इति शङ्कते । तद्ग्राह्य । इति । सान्तर्हासमाह । सततगतेरिति । यथादर्शनं व्यवस्था त्वयाऽपि दुस्त्यजेति भावः ॥ ५२ ॥ इति वायुप्रत्यक्षत्वम् ।

अथ राजसमहान् प्राण इति वदतः प्रतिवक्तुं प्राणस्य वायुविशेषतां विवक्षुस्तत्र विशेषापह्नवं प्रतिषेधति । न प्राण इति ॥

मू० न प्राणोवायुमात्रं सह परिपठनान्न क्रिया द्रव्यतोक्तेस्तेजोवद्वा न तत्त्वान्तरमगणनतोवायुताऽनुच्छ्वनाच्च ॥ तस्माद्वातो विशेषं घनजलकरकान्यायतः प्राप्य कंचिद्देहान्तर्दाशविध्यं भजति बहुविधोपक्रियोवृत्तिभेदैः ॥ ५३ ॥

वायुत्वप्रसिद्ध्याऽसौ वायुमात्रमिति चेन्न । सर्वत्र सामान्यप्रसिद्ध्या विशेषत्यागप्रसङ्गात् । अयोग्ये च नानुपलम्भबाधः । श्रुतिप्राप्तं हेतुमाह । सहेति । एतस्माज्जायते प्राणोमनस्सर्वेन्द्रियाणि च खं वायुर्ज्योतिरापः इति सृष्टिवाक्ये वायुप्राणयोस्सह पाठात् । न चात्र प्राणशब्दोऽन्यार्थः । अबाधे अप्रसिद्धत्यागायोगात् । न च वायुसामान्ये प्राणशब्दप्रसिद्धिः । जगत्प्राण इति समाख्या तु न तदंशस्य शक्तिं गमयेत् देहावच्छेदमात्रेण विशेषात्पृथगुक्तिरिति चेन्न । तत्सृष्ट्युक्तेः प्रयोजनमान्द्यात् । अस्तु तर्हि वायोः क्रियाविशेषः प्राणः । स्तिमितवायौ प्राणशब्दप्रयोगाभावात् उच्छ्वासादौ प्रयोगाच्चेत्यत्राह । न क्रियेति । हेतुमाह । द्रव्यतोक्तेरिति । वायुर्द्रव्यमिति ताव-

त्सिद्धं प्राणे च तदुक्तिस्सार्वत्रिकी प्राणस्स्पन्दत इति च पृथग्व्यपदिशन्ति। उक्तश्च सह पाठो न तत्क्रियायाः अग्न्यप्रायनयविरोधात्। न च मनःप्रभृतीनां क्रिया तैस्सहात्र पठ्यत इति भावः। यद्यसौ वायुविकारविशेषः वह्निरिव तत्त्वान्तरं स्यादित्यत्राह। तेजोवदिति। यदि तत्त्वपङ्क्तौ निविष्टः प्राणः भूतान्तरवत् पृथक्संख्यायेत न ह्येवमसावित्याह। अगणनत इति। तत्त्वपरिगणनं च पूर्वपूर्वनियतस्वभावपरित्यागेन विकारान्तरसृष्टौ न तु विकारमात्रे पृथिव्या ओषधय इत्यादिषु प्रसङ्गात् प्राणे च वायुत्वं न निवृत्तम्। अतश्च न तत्त्वान्तरमित्याह। वायुताऽनुवृत्तेश्चेति। तथाऽपि देहोपादानत्वावस्थापन्नोवायुः प्राणस्स्यात् किमधिककल्पनयेत्यत्राह। तस्मादिति। अयम्भावः यावद्ध्यस्मिन् शरीरे प्राणोवसति तावदायुः अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः प्राणापानसमायुक्तः पचामीत्यादिषु देहात्पृथक्त्वेन प्राणवायुः प्रसिद्धः। अतो न देहोपादानवायुरसौ। किन्तु योगाद्युपयुक्तशास्त्रवेद्यविशेषवान् कश्चिद्वायुरयमिति वायुत्वानुवृत्तिव्यक्त्यै जलमयकरकानिदर्शनम्। दाशविध्यं प्राणापानादिभेदैर्नागकूर्मादिभेदैश्च दशविधत्वं, तत्तद्वृत्तिभिरुपकारप्रपञ्चस्तत्तदागमेषु ग्राह्यः। अयं चार्थो न वायुक्रिये पृथगुपदेशादित्यधिकरणसिद्धः आपोमयः प्राण इति तु अन्नमयं हि सोम्य मनस्तेजोमयी वागिति वदाप्यायनपरम् अन्यथाऽनेकशास्त्रविरोधात् ॥ ४२ ॥ इति प्राणस्य वायुविशेषत्वम्।

अत्र कश्चिदाह प्राणसंवादादिष्विन्द्रियैस्सह प्राणः पठितः प्राणशब्दश्च साधारणः प्रयुक्तः देहस्योपकरणत्वं च समानम् ॥ अतः प्राण इन्द्रियमिति। एतदनूद्य परिहरति। प्राण इति ॥

मू० प्राणोऽक्षं प्राणशब्दादुपकरणतया चेन्द्रियाण्येवेत्ययुक्तं शब्दैक्यं ह्यैकजात्यं व्यभिचरति न च प्राणताऽक्षेषु मुख्या ॥ देहस्यानक्षभावेऽप्युपकृतिरधिका तत्समानोक्त्यदृष्टिर्न प्राणे सात्त्विकाहंकरणविकृतिता लक्षणं तद्धि तेषाम् ॥ ५४ ॥

सहपाठमात्रं न तज्जातीयत्वसाधकमित्यभिप्रायः । प्राणशब्दवाच्यत्वं नेन्द्रियत्वसाधकमित्याह शब्दैक्यमिति । अन्यथा अनेकार्थशब्दलोपप्रसङ्ग इति भावः । अत्र च प्राणशब्दः क्वचिन्मुख्यः क्वचिद्भाक्तः । एवमप्येकशब्दप्रयोगमात्रात्साजात्ये वैजात्यमेव जगति लुप्येतेत्यभिप्रायेणाह । न चेति । चेतनोपकरणत्वस्य व्यभिचारमाह । देहस्येति । चेतनोपकारकत्वं देहे संदृश्यते न तत्रेन्द्रियत्वमिष्यते । इन्द्रियशब्दप्रयोगाभावात्तत्रानिन्द्रियत्वमित्यत्राह । तत्समेति । इन्द्रियत्वोक्तेरदर्शनं देहे प्राणेऽपि समम् । अतः प्राणोऽपि नेन्द्रियमित्यर्थः । इन्द्रियलक्षणनिवृत्त्या च प्राणे तच्छब्दवाच्यत्वनिवृत्तिरित्यभिप्रायेणाह । न प्राण इति । सात्त्विकाहङ्कारोपादानकत्वमेवेन्द्रियलक्षणं परोक्तलक्षणानुपपत्तेरित्यभिप्रायेणाह । लक्षणमिति । यत्तु शरीरयोगे सत्येव साक्षात्प्रमितिसाधनम् इन्द्रियमिति । अत्र कर्मेन्द्रियेष्वव्याप्तिस्तावदास्तां स्वेदादिशैत्याभिव्यञ्जकव्यजनवातादेरुक्तलक्षणयोगादतिव्याप्ति दुर्वारा शरीरसंयुक्तमतीन्द्रियमिति विशेषणेऽपि चाक्षुषतेजःकणानां चूर्णविक्षेपवद्विसर्पे मूलस्कन्धस्य प्रमितिसाधनत्वाभावात् अग्रस्कन्धस्य शरीरसंयुक्तत्वायोगात् नोभयत्राप्येतद्विशिष्टमिन्द्रियलक्षणमस्ति परम्परया सम्बन्धस्त्वतिप्रसञ्जकः । आ दृष्टुरा-

चन्द्रमसश्च कश्चिच्चक्षुरिन्द्रियावयवी तदानीमेव निष्पन्न इत्यत्र न किञ्चित्प्रमाणमन्यत्र सम्प्रदायात् । इन्द्रियदोषवदिन्द्रियगुणाश्च शरीरसंयुक्तास्साक्षात्प्रमितिसाधकास्सन्ति तैश्चानैकान्त्यं सुवचं शुद्धेष्वपि परोक्तलक्षणेषु न प्रस्तुते तत्सिद्धिरिति ॥ ५४ ॥ इति प्राणस्यानिन्द्रियत्वम् ॥

वायोरनन्तरं वह्निनिरूपणे प्राप्ते प्राणसङ्गत्या वैश्वानरं तावच्छिक्षयति । प्राणेति ॥

सू० प्राणापानाख्यभस्त्रारभसविसृमरः प्राप्य वैश्वानराख्यां मध्ये देहं हुताशो वसति जलनिधावौर्ववत्सर्वभक्षः । तत्तद्विद्यासु वेद्यं त्वन इव हि परज्योतिषः सोऽपि रूपं नात्मानौ तौ जडत्वाज्जनिविलयमुखैर्भेदकण्ठोक्तिभिश्च ॥ ५५ ॥

तस्य मध्ये महानग्निरित्यादिकमिहानुसन्धेयं वारिनिर्वाप्यत्वनिवृत्त्यै वाडवनिदर्शनं प्राणवैश्वानरविचारस्य प्रधानशास्त्रार्थोपयोगमभिप्रेत्याह । तत्तदिति । अनः प्राणः । अथ यदतः परो दिवो ज्योतिर्दीप्यत इत्यारभ्य इदं वाव तत् यदिदमस्मिन्नन्तः पुरुषे ज्योतिरित्याद्यामनन्ति छन्दोगाः । प्रसङ्गान्नास्तिकयोगिजननिरासाय द्वितीयसरवक्तव्यमुपक्षिपति । नात्मानाविति । अजडो नित्यो भूतभौतिकविलक्षणश्चात्मा स्थापयिष्यते ॥ ५५ ॥ इति प्राणवैश्वानराग्न्योस्साङ्गत्यमनात्मत्वं च ॥

अथात्र धर्मधर्मिणोः सजातीयत्वे निदर्शनार्थे लोकबुद्ध्यनुगुणं भाष्यस्थं प्रभानिरूपणं प्रदर्शयति । धर्म इति ॥

दर्शपूर्णमासाधिकारः अन्धादिसाधारण्य उत यावदङ्गसहितप्रधानानुष्ठानसमर्थस्येति संशये पूर्वपक्षमाह। फलेति। शास्त्रं दर्शपूर्णमासाभ्यामिति वाक्यं सर्वाधिकारं सर्वेषामधिकारदर्शकं सर्वेषां कर्मणः यागात्फलार्थत्वात् फलेच्छावत्त्वात् ॥ ४ ॥

कर्तुर्वा श्रुतिसंयोगाद्विधिः कार्त्स्न्येन गम्यते ॥ ५ ॥

सिद्धान्तमाह। कर्तुरिति। कार्त्स्न्येन कर्तुः यावदङ्गसहितप्रधान. कर्तुः विधिः। अधिकारविधिः श्रुतिसंयोगात्। उक्तार्थे विधितात्पर्यात्। सेतिकर्तव्यताकप्रधानस्यैव प्रधानापूर्वजनकत्वबोधनादन्धादीनामाज्यावेक्षणादियावदङ्गानुष्ठानासंभवाचाधिकार इति भावः ॥ ५ ॥

यागादिषु स्त्रीपुंसयोरुभयोरधिकारः। अधि० ३।

लिङ्गविशेषनिर्देशात्पुंयुक्तमैतिशायनः ॥ ६ ॥

पुंस एवाधिकारः किं स्त्रिया अपीति संशये पूर्वपक्षमाह। लिङ्गेति। लिङ्गविशेषस्य पुल्लिँङ्गस्य स्वर्गकाम इत्यत्र निर्देशात् पुंयुक्तं यजमानत्वमिति ऐतिशायनमतम् ॥ ६ ॥

तदुक्तित्वाच्च दोषश्रुतिरविज्ञाने ॥ ७ ॥

. ननु ग्रहैकत्वाधिकरणउद्देश्यविशेषणानामविवक्षेति स्थिते कथमयं पूर्वपक्षो ऽत आह। तदिति। तदुक्तित्वात्। लिङ्गस्य विवक्षितत्वादेव अविज्ञाने दोषश्रुतिः। अयं भावः गर्भेणाविज्ञातेन भ्रूणहेति। अस्यार्थः। गर्भिण्या हनने उदरस्थो गर्भः पुमान्स्त्री वेत्यज्ञानाद् भ्रूणहत्यापापं प्राप्नोति। भ्रूणो यज्ञः तच्चाशकः। यदि स्त्रीपुंसयोरधिकारः तदा गर्भमात्रहनने यज्ञकर्तृवधः संपन्न इत्यविज्ञातपदं व्यर्थं स्यात्। पुरुषमात्रस्य तथात्वे स्त्रीगर्भे न दोषः पुंगर्भे यज्ञहा। अन्यतरनिर्णयाभावेन शङ्का अविज्ञातइत्यनेन सूचिता। तस्मादत्रोद्देश्यगतमपि पुंस्त्वं विवक्षितमिति ॥ ७ ॥

जातिं तु बादरायणो ऽविशेषात्तस्मात्स्त्र्यपि प्रतीयेत जात्यर्थस्याविशिष्टत्वात् ॥ ८ ॥

सिद्धान्तमाह । जातिमिति । अविशेषात् पुंस्त्वस्याविवक्षणात् । जातिं स्वर्गविषयकेच्छामधिकारितावच्छेदकत्वेन बादरायणाचार्यो मनुते । जात्यर्थस्य तादृगिच्छाया उभयत्राविशेषेण सत्त्वेन स्त्र्यपि अधिकारिणी । यदुक्तं लिङ्गविशेषेण विवक्षितं लिङ्गं तद्, अविज्ञातो वा एष गृह्यते यदाग्रयण, इतिविधिस्तावकं सद् न पुंस्त्वविवक्षायां समर्थमिति भावः ॥ ८ ॥

विभक्त्येति चेन्न ॥ ९ ॥

पशुना यजेतेत्यत्र कथं विवक्षेति शङ्कते । विभक्त्येति । एकत्वबोध इति शेषः ॥ ९ ॥

चोदितत्वाद्यथाश्रुति ॥ १० ॥

समाधत्ते । चोदितेति । चोदितत्वाद् विहितत्वाद् यथा श्रुतं तथा । अत्र त्वनुवाद्यगतमिति भावः ॥ १० ॥

द्रव्यवत्त्वात्पुंसां स्याद् द्रव्यसंयुक्तं क्रयविक्रयाभ्यामद्रव्यत्वं स्त्रीणां द्रव्यैः समानयोगित्वात् ॥ ११ ॥

स्त्रिया नाधिकारः स्वस्वत्वाश्रयद्रव्याभावादिति सिद्धान्तमाक्षिपति । द्रव्येति । यतो द्रव्यसंयुक्तं द्रव्यसाध्यं कर्मातः द्रव्यवत्त्वात् पुंसामेवाधिकारः स्त्रीणां क्रयविक्रयाभ्यां द्रव्यैः समानयोगित्वात् साध्यसाधनभावसंबन्धात् । पितुः स्वकन्याविक्रयेण द्रव्यस्य साध्यत्वात् स्त्रीद्रव्ये साध्यतासंबन्धः । भर्तुः क्रयसाधनत्वं संबन्धः तादृशसंबन्धवत्त्वाद् अद्रव्यत्वम् । अयं भावः । पित्रा विक्रीतत्वात्पितृद्रव्येणासंबन्धः । भर्त्रा क्रीतत्वाद्दासादिवत्पतिद्रव्येणासंबन्धः । अतो ऽद्रव्येति स्त्रीणामद्रव्यत्वम् । अद्रव्यायाः द्रव्यसाध्यक्रतुः कथं भवेदतो नाधिकारः । शतमधिरथं दुहितृमते दद्यादिति विक्रयलिङ्गम् ॥ ११ ॥

तथा चान्यार्थदर्शनम् ॥ १२ ॥

भर्तुः क्रयलिङ्गं दर्शयति । तथा चेति । तथा च पितुः विक्रये सिद्धे च अन्यार्थस्य भर्तुः क्रयस्य च दर्शनं, या पत्या क्रीता ऽथान्यैश्चरतीति क्रयदर्शनवाक्यम् ॥ १२ ॥

तादर्थ्यात्कर्मतादर्थ्यम् ॥ १३ ॥

ननु कर्तनादिना सा ऽपि द्रव्यं लभतामत्राह । क्रीतत्वेन तादर्थ्यात् । भर्त्रर्थत्वात् । भर्त्रर्थं यत्कर्म तदेव तया कार्यं नान्यत्कर्तनादि । अत एव स्मृतिः । भार्या दासश्च पुत्रश्च निर्धनाः सर्वएव ते । यत्ते समधिगच्छन्ति यस्य ते तस्य तद्धनमिति ॥ १३ ॥

फलोत्साहाविशेषात्* ॥ १४ ॥

एवं पक्षं दूषयति । फलेति । फलोत्साहः फलेच्छा तस्याविशेषादस्त्यधिकारः स्त्रियाः ॥ १४ ॥

अर्थेन च समवेतत्वात् ॥ १५ ॥

तस्या द्रव्याभावो ऽसिद्ध इत्याह । अर्थेति । समवेतत्वाद्युक्तत्वात् । पत्नी हि पारिणाय्यस्येशे इति श्रुत्या धर्मे चार्थे च कामे च नातिचरितव्येति स्मृत्या च तस्या द्रव्यस्वामित्वं सिद्धमिति भावः ॥ १५ ॥

क्रयस्य धर्ममात्रत्वम् ॥ १६ ॥

यत्र क्रयः लोके गवादीनां तत्र कस्याश्चिद्दश मुद्राः अपरस्यास्त्याश्च ततो न्यूनो ऽधिको वा दृश्यते । इह तु क्रयो विक्रयश्च नियतद्रव्यक इत्यदृष्टार्थ एवेत्याह । क्रयस्येति । धर्ममात्रत्वमदृष्टसाधनत्वम् ॥ १६ ॥

यागे दंपत्योः सहाधिकारः । अधि० ४ ।

स्ववतोस्तु वचनादैककर्म्यं स्यात् ॥ १७ ॥

एवमपरिसमाप्ते एतदधिकरणे विचारान्तरम् । पत्न्या अधिकारे सिद्धे यजमानेन तया च पृथगेव यज्ञः कार्य इति पूर्वपक्षे सिद्धान्तमाह । स्वेति । स्ववतोर्वचनात् । आज्यस्य एकप्रयोगे उभययोगे उभयोरवेक्षणवचनादैककर्म्यं मिलित्वैकप्रयोगः ॥ १७ ॥

लिङ्गदर्शनाच्च ॥ १८ ॥

उक्तार्थे लिङ्गमाह । लिङ्गेति । मेखलया यजमानं दीक्षयति योक्त्रेण पत्नीं मिथुनत्वायेति, भिन्नप्रयोगे यजमानप्रयोगे योक्त्राभावेन मिथुनत्वं विरुध्येत ॥ १८ ॥

* भाष्ये तुशब्दघटितः पाठः ।

क्रीतत्वात्तु भक्त्या स्वामित्वमुच्यते ॥ १९ ॥

पूर्वशेषं पूरयति । तत्र सिद्धान्ताक्षेपसूत्रम् । क्रीतेति । पत्न्याः क्रीतत्वात् स्वामित्वं द्रव्यस्वामित्वं भक्त्या गौणवृत्त्योच्यते न मुख्यवृत्त्या ॥ १९ ॥

फलार्थित्वात्तु स्वामित्वेनाभिसंबन्धः ॥ २० ॥

दूषयति । फलेति । फलार्थित्वाद् मिलितयोः फलार्थित्वश्रवणाच्च गौणवृत्त्या स्वामित्वं किं तु मुख्यस्वामित्वेनाभिसंबन्धः ॥ २० ॥

फलवत्तां च दर्शयति ॥ २१ ॥

फलवत्तां मिलितयोः फलवत्तां दर्शयति, यज्ञस्य युक्तौ धुर्यावभूतां संजानानौ विजहतामरातीः, दिवि ज्योतिरजरमारभेथामिति श्रुतिः ॥ २१ ॥

एकस्यैव पुंस आधाने ऽधिकारः । अधि० ५ ।

द्व्याधानं च द्वियज्ञवत् ॥ २२ ॥

क्षौमे वसानावग्निमादधीयातामिति श्रुतमतः आधानं पुंद्वयकर्तृकमुत स्त्रियं गृहीत्वा द्विवचनमिति संशये पूर्वपक्षमाह । द्वीति । द्व्याधानं द्वाभ्यां पुरुषाभ्यामाधानं कर्तव्यं द्विवचनश्रवणात् । द्वियज्ञवद् एतेन राजपुरोहितौ यजेयातामितिवत् ॥ २२ ॥

गुणस्य तु विधानत्वात्पत्न्या द्वितीयशब्दः स्यात् ॥ २३ ॥

सिद्धान्तमाह । गुणस्येति । गुणस्य क्षौमस्य विधानत्वात् । विधीयमानत्वात् । द्वितीयशब्दः द्विवचनशब्दः पत्न्या पत्नीं गृहीत्वा स्यात् । वसन्ते ब्राह्मण इत्युत्पत्तिवाक्ये एकवचनश्रवणादेककर्तृत्वं, क्षौमवस्त्रपरिधानकर्तृत्वं द्वयोरिति भावः ॥ २३ ॥

पत्न्या यावदुक्ताशीर्ब्रह्मचर्यादावेवाधिकारः । अधि० ६ ।

तस्या यावदुक्तमाशीर्ब्रह्मचर्यमतुल्यत्वात् ॥ २४ ॥

उक्तरीत्या पत्न्या अधिकारे सिद्धे सर्वं याजमानं तस्याः अपि, किं वा यावदुक्तमिति संशये फलभोक्तृधर्माविशेषाद् उभयोरिति पूर्वपक्षे

सिद्धान्तमाह । तस्या इति । यावदुक्तं, पत्नीं सन्नह्यति पत्नीं वाचयतीत्यादिभिः श्रुतं, नातो ऽधिकमतुल्यत्वात् । अध्ययनाभावेन यजमानातुल्यत्वात् । किं च आशीः आशीर्वाचका मन्त्रा आयुर्दा अग्ने ऽस्यायुर्मे देहीत्यादयः केवलप्रार्थनारूपाः ब्रह्मचर्यपदेन फलिसंस्काराः सर्वे ग्राह्याः । उभयोस्तुल्यम् ॥ २४ ॥

यागे शूद्रस्यानधिकारः । अधि० ७ ।

चातुर्वर्ण्यमविशेषात् ॥ २५ ॥

कर्मण्यधिकारः त्रैवर्णिकानामुत चातुर्वर्ण्यस्येति संशये पूर्वपक्षमाह । चातुरिति । अविशेषात् । विशेषवचनाभावात् ॥ २५ ॥

निर्देशाद्वा त्रयाणां स्यादग्न्याधेये संबन्धः क्रतुषु ब्राह्मणश्रुतेरित्यात्रेयः ॥ २६ ॥

वसन्ते ब्राह्मणो ऽग्निमादधीत, ग्रीष्मे राजन्यः, शरदि वैश्य, इति त्रयाणां निर्देशादाधाने ब्राह्मणश्रुतेः ब्राह्मणादिश्रुतेः क्रतुषु दर्शपूर्णमासादिष्वसंबन्धः आहवनीयाभावाद् इत्यात्रेयमतम् ॥ २६ ॥

निमित्तार्थे च बादरिः तस्मात्सर्वाधिकारः स्यात् ॥ २७ ॥

वसन्ते इति वाक्यं निमित्तार्थकं ब्राह्मणकर्तृकत्वे निमित्तं वसन्तः । एवं क्षत्रियादेस्तत्तत्कालो नियम्यते । शूद्रस्यानियतकाल इत्यभिप्रायं बादरिमतमाह । निमित्तेति । स्पष्टो ऽर्थः ॥ २७ ॥

अपि वा ऽन्यार्थदर्शनाद्यथाश्रुति प्रतीयेत ॥ २८ ॥

सिद्धान्तमाह । अपि वेति । अन्यत्र अर्थदर्शनात् त्रैवर्णिकं गृहीत्वा तत्तन्निमित्ते अर्थदर्शनात् । यथा पयो ब्राह्मणस्य व्रतं, यवागू राजन्यस्यामिक्षा वैश्यस्येति, एवं बार्हद्गिरं ब्राह्मणस्य ब्रह्मसाम कुर्यात्पार्थुरश्मं राजन्यस्य रायोवाजीयं वैश्यस्येति यथा निमित्तत्वं तथा ऽऽधानवाक्यउत्पत्तिवाक्ये वसन्तादिश्रवणेन निमित्तत्वासंभवाद् यथाश्रुति वसन्तादिविशिष्टमपूर्वकर्म प्रतीयते ॥ २८ ॥

निर्देशात्तु पक्षे स्यात् ॥ २९ ॥

पुनर्निमित्तत्वपक्षमेवोत्थापयति । निर्देशादिति । निर्देशाद् य एवं विद्वानग्निमाधत्ते इत्युत्पत्तिवाक्यनिर्देशात् । पक्षे उक्तनिमित्ते वसन्तादिः स्यात् ॥ २९ ॥

वैगुण्यान्नेति चेत् ॥ ३० ॥

पूर्वोक्तपयोव्रतादीनां ब्रह्मसामादीनामभावेन शूद्रकर्तुर्विगुणः स्यादित्याशङ्कते । वैगुण्यादिति ॥ ३० ॥

न काम्यत्वात् ॥ ३१ ॥

परिहरति । नेति । काम्यत्वात्स्वर्गकामो यजेतेति अविशेषेण श्रवणेन तस्यापि शूद्रस्यापि कामनावत्त्वात् । पयोव्रतादीनां तत्तत्कर्तृकत्वे निमित्ते नियमः शूद्रस्यानियमाद्येन केनापि व्रतादीति भावः ॥ ३१ ॥

संस्कारे च तत्प्रधानत्वात् ॥ ३२ ॥

व्रतस्य पुरुषसंस्कारत्वाद्यस्य श्रूयते तस्यैव नान्यस्येत्याह । संस्कार इति । संस्कारे पयोव्रतरूपसंस्कारे तत्प्रधानत्वात्पुरुषप्रधानत्वात् ॥ ३२ ॥

अपि वा वेदनिर्देशादपशूद्राणां प्रतीयेत ॥ ३३ ॥

उपनयनस्य वेदग्रहणार्थत्वात्त्रैवर्णिकानामेव उपनयनं विहितम् । वसन्ते ब्राह्मणमुपनयीत ग्रीष्मे राजन्यं शरदि वैश्यमिति शूद्रस्योपनयनाभावेन वेदाभावात् त्रैवर्णिकानामेवाधाने ऽधिकार इत्याह । अपि वेति । वेदस्य त्रैवर्णिकेषु निर्देशादपशूद्राणां शूद्रभिन्नानामेवाधिकारः प्रतीयेत ॥ ३३ ॥

गुणार्थत्वान्नेति चेत ॥ ३४ ॥

उपनयनं पुरुषसंस्कारः न विद्यार्थं इत्याह । गुणार्थत्वात् संस्कारार्थत्वाच्च उक्तार्थसिद्धिः ॥ ३४ ॥

संस्कारस्य तदर्थत्वाद्विद्यायां पुरुषश्रुतिः ॥ ३५ ॥

दृष्टे संभवत्यदृष्टकल्पनमन्याय्यमिति भावेनाह । संस्कारस्येति । संस्कारस्य उपनयनस्य तदर्थत्वाद्विद्यार्थत्वाद्विद्यायामेव ब्राह्मणादिपुरुषश्रुतिः ॥ ३५ ॥

विद्यानिर्देशान्नेति चेत् ॥ ३६ ॥

स्वर्गकामश्रवणादेव विद्या कल्पनीयेत्याशङ्कते । विद्येति । विद्यानिर्देशात् कल्पनादिति चेत् ॥ ३६ ॥

अवैद्यत्वादभावः कर्मणि स्यात् ॥ ३७ ॥

परमसिद्धान्तमाह । अवैद्यत्वादिति । अवैद्यत्वात् । विद्याभावात् । कर्मण्यधिकाराभावः स्यात् ॥ ३७ ॥

तथा चान्यार्थदर्शनम् ॥ ३८ ॥

अवैद्यत्वे साधकमाह । तथा चेति । एतच् श्मशानं यः शूद्रः तस्माच्छूद्रसकाशे नाध्येयमिति । समीपे अध्ययनाभावः, किमु वक्तव्यं विद्याभाव इति भावः ॥ ३८ ॥

यागे निर्धनस्याप्यधिकारः । अधि० ८ ।

त्रयाणां द्रव्यसंपन्नः कर्मणो द्रव्यसिद्धित्वात् ॥ ३९ ॥

द्रव्यहीनो दर्शपूर्णमासादावधिक्रियते न वेति संशये पूर्वपक्षमाह । त्रयाणामिति । कर्मणो द्रव्यसिद्धित्वात् । द्रव्यसाध्यत्वात् त्रिवर्णानां मध्ये द्रव्यवानधिकारी ॥ ३९ ॥

अनित्यत्वात्तु नैवं स्यादर्थाद्धि द्रव्यसंयोगः ॥ ४० ॥

सिद्धान्तमाह । अनित्यत्वादिति । दारिद्र्यस्यानित्यत्वाद् नैवं स्यात् । दरिद्र इति का चन जातिर्न स्यात् । अर्थात् संपादनाद् द्रव्यसंयोगो भविष्यति ॥ ४० ॥

अङ्गहीनस्यापि यागे ऽधिकारः । अधि० ९ ।

अङ्गहीनश्च तद्धर्मा ॥ ४१ ॥

यो द्रव्यस्य न्याय उक्तः स एवाङ्गहीने । अन्धत्वमौषधेन दूरीकृत्याधिकारीति भावः ॥ ४१ ॥

अचिकित्स्याङ्गवैकल्यस्य यागानधिकारः । अधि० १० ।

उत्पत्तौ नित्यसंयोगात् ॥ ४२ ॥

यस्तु चिकित्सादिभिरङ्गवैकल्यं परिहर्तुमक्षमः स नाधिकारीति सिद्धान्तमाह । उत्पत्ताविति । उत्पत्तिवेलायामेव यो ऽन्धः तस्यान्धत्वस्य नित्यसंयोगादपरिहार्यत्वान्नाधिकारी ॥ ४२ ॥

दर्शपूर्णमासयोः त्र्यार्षेयस्यैवाधिकारः । अधि॰ ११ ।

अत्र्यार्षेयस्य हानं स्यात् ॥ ४३ ॥

त्रार्षेयं वृणीतइत्युक्त्वा तत्समीपे एकं वृणीते द्वौ वृणीते त्रीन्वृणीते न चतुरो वृणीते न पञ्चातिप्रवृणीतइति श्रुतम् । अत्राव्यार्षेयाणां क्रतावधिकारो ऽस्ति न वेति चिन्तायामेकं वृणीतइत्यादिश्रवणादेकाद्यार्षेयाणामस्त्यधिकार इति पूर्वपक्षे सिद्धान्तमाह । अत्र्यार्षेयस्येति । अत्र्यार्षेयस्य त्र्यार्षेयभिन्नस्य हानमधिकाराभावः स्यात् । एकादीनामपि विधाने वाक्यभेदापत्तेः त्रीन्वृणीतइति विधिः शेषो ऽर्थवाद इति भावः ॥ ४३ ॥

चातुर्वर्ण्यातिरिक्तस्य रथकारस्याधाने ऽधिकारः । अधि॰ १२ ।

वचनाद्रथकारस्याधाने सर्वशेषत्वात् ॥ ४४ ॥

वर्षासु रथकार आदधीतेति आधानं त्रैवर्णिकभिन्नस्येति सिद्धान्तेनोपक्रमते । वचनादिति । आधानस्य वसन्तादिवाक्यैर्विहिताधानस्य सर्वशेषत्वात् । त्रैवर्णिकाङ्गत्वाद्वचनादुदाहृतवचनाद्रथकारस्य वक्ष्यमाणजातेः ॥ ४४ ॥

न्याय्यो वा कर्मसंयोगाच्छूद्रस्य प्रतिषिद्धत्वात् ॥ ४५ ॥

पूर्वपक्षमाह । न्याय्य इति । कर्मसंयोगात् । रथनिर्माणरूपक्रियासंबन्धात् । रथं करोतीति व्युत्पत्त्या त्रैवर्णिक एव रथकारवाच्यो न्याय्यः । शूद्रस्य शूद्रप्रभृतेः प्रतिषिद्धत्वात्कर्मानधिकारात् ॥ ४५ ॥

अकर्मत्वात्तु नैवं स्यात् ॥ ४६ ॥

इमं पक्षं दूषयति । अकर्मेति । अकर्मत्वात् । त्रैवर्णिकानां शिल्पिकर्मनिषेधाद् नैवं, त्रैवर्णिको न रथकारवाच्यः ॥ ४६ ॥

आनर्थक्यं च संयोगात् ॥ ४७ ॥

संयोगात् । ब्राह्मणाद्याधानेषु वसन्तादिकालसंयोगात् । पुनर्वर्षर्तुविधानानर्थक्यम् ॥ ४७ ॥

गुणार्थमिति चेत् ॥ ४८ ॥

गुणार्थमिति पूर्वपक्षसूत्रम् । गुणार्थे निमित्तार्थे त्रैवर्णिकेष्वेव रथकारणक्रियानिमित्तः कालो विधीयतइति भावः ॥ ४८ ॥

उक्तमनिमित्तत्वम् ॥ ४९ ॥

उक्तमनिमित्तत्वमिति सिद्धान्तसूत्रम् । अयं भावः । य एवं विद्वानग्निमाधत्तइत्यनेनाधानस्य प्राप्तौ वसन्तादिकालो निमित्ते विधेयः । स च न संभवति कालस्यानुपादेयत्वाद्, इति निमित्तत्वं न संभवतीत्युक्तं प्राग् अस्मिन्नेव पादे इति ॥ ४९ ॥

सौधन्वनास्तु हीनत्वान्मन्त्रवर्णात्प्रतीयेरन् ॥ ५० ॥

तर्हि अत्र को ऽधिकारीति उच्यते । सौधन्वना इति । त्रैवर्णिकाद्धीनाः सौधन्वना जातिविशेषाः अत्राधिकारिणः । सौधन्वना ऋभवः सुरचक्षस इति मन्त्रलिङ्गात् । ऋभूणां त्वा देवानां व्रतपते व्रतेनादधामीति रथकारस्येति लिङ्गात् । तद् अधिकृतत्वं प्रतीयेत ज्ञातव्यम् ॥ ५० ॥

त्रैवर्णिकभिन्नस्य निषादस्य रौद्रयागे ऽधिकारः । अधि० १३ ।

स्थपतिर्निषादः स्याच्छब्दसामर्थ्यात् ॥ ५१ ॥

एतया निषादस्थपतिं याजयेदित्यत्र त्रैवर्णिकानामधिकार उत निषादस्यैवेति संशये निषादानां स्थपतिरिति व्युत्पत्त्या त्रैवर्णिकानामेवाधिकार इति पूर्वपक्षे सिद्धान्तमाह । स्थपतिरिति । यः स्थपतिः स एव निषादः स्यात् । शब्दसामर्थ्यात् । शब्दनिष्ठमुख्यवृत्तिसामर्थ्यात् । अयं भावः षष्ठीतत्पुरुषे लक्षणापत्त्या कर्मधारय एव युक्त इति ॥ ५१ ॥

लिङ्गदर्शनाच्च ॥ ५२ ॥

कूटं दक्षिणेति । कूटं निषादानामेवोपकारकं नार्याणाम् ॥ ५२ ॥

इति जैमिनिसूत्रवृत्तौ षष्ठस्याध्यायस्य प्रथमः पादः ॥ १ ॥

सत्रे प्रत्येकस्य सत्रिणः फलसंबन्धः । अधि० १ ।

पुरुषार्थैकसिद्धित्वात्तस्य तस्याधिकारः स्यात् ॥ १ ॥

ऋद्धिकामाः सत्रमासीरन्नित्यत्र एकस्मिन्कर्मण्यनेककर्तृविधाने प्रयोगभेदापत्तेः एकप्रयोगनिर्वाहकं सप्तदशपुरुषनिष्ठं कर्तृत्वं व्यासक्तं, तथा सति तेषां फलमपि विभक्तम्, न तु प्रत्येकं संपूर्णं फलमित्युत्सूत्रे पूर्वपक्षे सिद्धान्तमाह । पुरुषार्थेति । तस्य तस्य प्रत्येकपुरुषस्याधिकारः संपूर्णफलभोगः स्यात् । पुरुषार्थस्य फलस्य एकसिद्धित्वात् । प्रत्येकपुरुषात्सिद्धिरुत्पत्तिर्यस्य तत्त्वात् । अयं भावः ऋद्धिकामा इति वाक्यम् ऋद्धिसाधनं सत्रं तदपि बहुकर्तृकं फलजनने समर्थमिति ज्ञापयति । तथा च संपूर्णर्द्धिकामः अपरं संपूर्णर्द्धिकाममुक्त्वा वदति, मम यज्ञे त्वमपि सहायो भव तव मम च कार्यं भविष्यति । अन्यथा उभयोरपि न फलं फलसाधने बहुकर्तृकत्वश्रवणादिति मिलित्वा स्वतन्त्राः संपूर्णफलकामाः सन्त एव प्रवर्तन्त इति ॥ १ ॥

अपि वोत्पत्तिसंयोगाद्यथा स्यात्सत्त्वदर्शनं तथा भावो विभागे स्यात् ॥ २ ॥

नन्वेकस्मिन्प्रयोगे बहूनां कर्तृत्वं मुख्यं न संभवति अदृष्टत्वात् । ऋत्विजामन्यत्र दृष्टं न मुख्यम् । तदनधीनत्वादत आह । अपि वेति । नैतद्विरुद्धं यथा सर्वदर्शनम् । यथा ऽश्वं पश्यन्तु इति बहूनां नियोगे बहुकर्तृकाश्वदर्शनक्रिया एकक्षणे संपद्यते तथा भावः अनुष्ठानं विभागे पुरुषभेदे ऽपि स्यात् । अध्वर्युणा ऽऽहवनीये हविषि प्रक्षिप्ते बहुभिः एकक्षणे त्यागरूपानुष्ठानसंभवाद् इति भावः । ननु बहुषु मुख्यकर्तृत्वे किं मानमित्यत्राह । उत्पत्तिसंयोगात् । उत्पत्तिवाक्ये कर्त्रन्वयिबहुत्वसंख्याश्रवणात् । दर्शपूर्णमासादावुत्पत्तिवाक्ये एकवचनश्रवणेन कर्त्रैक्यं सिद्धं पश्चाच्चत्वार ऋत्विज इत्युत्पन्नशिष्टसंख्योत्पत्तिशिष्टं प्रबलमेकत्वं बाधितुमसमर्थं सद्गौणकर्तृत्वे पर्यवस्यति । इह तु बहुत्वसंख्योत्पत्तिशिष्टा सर्वा ऽपि मुख्या ऽतः न व्यासक्तं कर्तृत्वं न वा फलांशभागित्वमश्रवणात् । ऋद्धिकामा इत्यस्य ऋद्ध्यंशे लक्षणां विना तदलाभात् । लक्षणायां मानाभावादिति भावः ॥ २ ॥

दर्शादौ कर्त्रैक्यनियमः । अधि० २ ।

प्रयोगे पुरुषश्रुतेर्यथाकामी प्रयोगे स्यात् ॥ ३ ॥

ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादौ आख्यातप्रतिपाद्यमेकत्वं विवक्षितं न वेति संशये पूर्वपक्षमाह । प्रयोगइति । प्रयोगे उदाहृतवाक्ये पुरुषश्रुतेः पुरुषमात्रश्रुतेः प्रयोगे अनुष्ठाने यथाकामी यथेच्छमेको द्वौ त्रयो वा यागं निर्वर्तयेयुः । अयं भावः । यजेत स्वर्गकाम इत्यनेन यागेन फलं प्राप्नुयादित्यर्थः, न यागं कुर्यादिति । तथा च भावनायाः अविधाने आक्षेपलभ्यकर्तुरनुष्ठानं प्रति गुणत्वाभावाद् वाक्ये श्रूयमाणपुरुषस्य फलं प्रति प्रधानत्वाच्चोद्देश्यगतसंख्या ऽविवक्षितेति भावः ॥ ३ ॥

प्रत्यर्थं श्रुतिभाव इति चेत् ॥ ४ ॥

सिद्धान्ती शङ्कते । प्रत्यर्थमिति । प्रत्यर्थम् । अर्थमर्थं प्रतीति प्रत्यर्थम् । अर्थभेदेनेति फलितम् । श्रुतिभावः गुणप्रधानभावः स्वर्गकामइतिपदप्रतिपाद्यपुरुषस्य फलं प्रत्युद्देश्यत्वात्तद्गतसंख्या ऽविवक्षिता भवतु । तथा ऽप्याख्यातेन यागानुरक्तां क्रियां विदधता क्रियागुणभूतकर्तुराक्षेपात्तदुपात्तसंख्या विधेयगता कर्तृपरिच्छेदकतया विवक्षिता ऽपि वक्तव्येति । अन्यथा पुरुषव्यापारशक्ताख्यातस्य प्राप्त्यर्थत्वे लक्षणापत्तेरिति भावः ॥ ४ ॥

तादर्थ्ये न गुणार्थता ऽनुक्ते ऽर्थान्तरत्वात्कर्तुः प्रधानभूतत्वात् ॥ ५ ॥

गुणप्रधानभाव एकत्र न संभवतीत्याह । तादर्थ्ये नेति । तादर्थ्ये फलस्य तदर्थत्वे तत्र प्राधान्याच्च गुणार्थता गुणभूतो यो यागः तदर्थता तदङ्गत्वं पुरुषस्य न । प्रधानत्वगुणत्वयोर्विरोधादिति भावः । ननु अनयोर्विरोधो न शब्दगम्यो ऽत आह । अनुक्ते ऽर्थान्तरत्वात् । अनुक्ते ऽपि शब्दागम्ये ऽर्थान्तरं प्रमाणान्तरं प्रत्यक्षादि तत्त्वात् । तद्गम्यत्वात् । लोके यत्र प्रधानत्वं राज्ञि तत्र न गुणत्वमप्रधानत्वमिति दृष्टमिति भावः । कर्तुः प्रधानभूतत्वादिति तादर्थ्ये हेतुः ॥ ५ ॥

चोदनैकत्वात्* ॥ ६ ॥

अग्निहोत्रं जुहोति दध्ना जुहोतीतिवाक्यद्वयप्रतिपाद्ये यागे विरुद्धो गुणप्रधानभावो दृश्यते ऽत आह । चोदनेति । एको विधिः एकस्मिन्प्राधान्यं तत्रापरस्याङ्गत्वं वदेत् । इह पुरुषं प्रधानीकृत्य तत्र फलस्याङ्गत्वम् एवं यागं प्रधानीकृत्य तत्र कर्तुरङ्गत्वं चेति उभयं वक्तुमक्षम एको विधिः । अग्निहोत्रविधौ वाक्यभेदात्तथा कथनं युक्तमिति भावः ॥ ६ ॥

अपि वा कामसंयोगे संबन्धात्प्रयोगायोपदिश्येत प्रत्यर्थं हि विधिश्रुतिर्विषाणावत् ॥ ७ ॥

सिद्धान्तमाह । अपि वेति । आख्यातस्येति शेषः । कामस्य कामशब्दस्य संयोगो यस्मिन् यजेत स्वर्गकाम इति वाक्ये आख्यातस्य संबन्धात् । घटकत्वसंबन्धात् । प्रयोगाय पुरुषप्रवृत्त्यर्थमुपदिश्यते श्रूयते । अयं भावः । यथा तृप्तिकामेन भोजने ऽनुष्ठिते ऽनुष्ठातरि तृप्तिप्राप्तिरवश्यं भाविनीति पुरुषे फलप्राप्तिरर्थसिद्धेति, तथेह पुरुषप्राधान्यं न शास्त्रतात्पर्यविषयः किं त्वनेन यागानुष्ठानमेव विधीयते । अनुष्ठानविधौ अनुष्ठानसाधनकर्ता ऽनुष्ठानाङ्गं तत्परिच्छेदकतया ऽऽख्यातसंख्या विवक्षितेति । यत्रैकस्मिन्नेव गुणप्रधानभावः शास्त्रविषयः तत्र तत्तात्पर्यज्ञापिका श्रुतिर्दृश्यते । यथा कृष्णविषाणया कण्डूयतइत्यत्र तृतीयाश्रुतिः । विषाणे तृतीयाश्रुत्या ऽङ्गत्वं चात्वाले कृष्णविषाणां प्रास्यतीत्यत्र द्वितीयाश्रुत्या प्राधान्यं तथा नात्रेति वक्तुं दृष्टान्तमाह । प्रत्यर्थमिति । प्रत्यर्थे प्राधान्यार्थे विधेयत्वार्थे विधिश्रुतिर्विधितात्पर्यज्ञापिका श्रुतिर्यथा विषाणायां तथा ऽत्र नेति फलितम् ॥ ७ ॥

अन्यस्यापीति चेन्न ॥ ८ ॥

ननु कर्तारमुद्दिश्य फलप्राप्तिर्यदि न विधीयते किं त्वनुष्ठानमात्रं तर्हि परस्य स्वर्गकामनावता ऽप्यनुष्ठेयं स्यात् । न हि स्वर्गकाम इत्यत्रात्मनः परस्य वेति विशेषः श्रूयते इत्याह । अन्यस्येति ॥ ८ ॥

अन्यार्थेनाभिसंबन्धः ॥ ६ ॥

* इदं सूत्रं भाष्ये वार्त्तिके च न दृश्यते ।

इदं दूषणं परिहरति । अन्यार्थेति । अन्यार्थेन अन्यस्य स्वर्गेच्छावता समं कर्तुः नाभिसंबन्धः । नाभेदः । आत्मनेपदश्रवणादिति पूरणीयं, कर्तृगामिनि क्रियाफलएवात्मनेपदस्य साधुत्वादिति भावः ॥ ९ ॥

फलकामो निमित्तमिति चेत् ॥ १० ॥

स्वर्गकामपदं निमित्तत्वद्योतकं यावज्जीवपदवदित्याह । फलेति । फलकामः स्वर्गकामशब्दः निमित्तं निमित्तत्वद्योतकम् ॥ १० ॥

न नित्यत्वात् ॥ ११ ॥

नेति । निमित्तं न, नित्यत्वात् । निमित्तत्वसूचकणमुलप्रत्ययादेरभावादिति भावः ॥ ११ ॥

कर्म तथेति चेत् ॥ १२ ॥

युवं हि स्थः स्वःपती इति द्वयोर्यजमानयोः प्रतिपदं कुर्यादिति वाक्यमेककर्मणि उभयकर्तृकत्वं द्रढयतीत्याह । कर्मेति । अस्मिन्सूत्रे उदाहृतवाक्यार्थानुपपत्तेरिति हेतुः पूरणीयः । कर्म ज्योतिष्टोमादि तथा उभयकर्तृकमपि क्वचित् ॥ १२ ॥

न समवायात् ॥ १३ ॥

दूषयति । नेति । समवायात् । एतेन राजपुरोहितौ सायुज्यकामौ यजेयातामिति क्लृप्तोभयकर्तृके सावकाशत्वात् ॥ १३ ॥

आरब्धकाम्यकर्मणो ऽपि समाप्तिनियमः । अधि० ३ ।

प्रक्रमात्तु नियम्येतारम्भस्य क्रियानिमित्तत्वात् ॥ १४ ॥

कारीर्या वृष्टिकामो यजेतेति वृष्टिसाधने प्रवर्तते । मध्ये संपन्नायां वृष्ट्यां तत्रैव विरामः उत समापनीयमिति संदेहे सिद्धान्तसूत्रमाह । प्रक्रमादिति । प्रक्रमात् कर्मारम्भाद् नियम्येत कर्मसमाप्तिर्नियम्य । कुतः । आरम्भस्य क्रियानिमित्तत्वात् क्रियायां समाप्तिक्रियायां निमित्तत्वात् । अयं भावः यजेतेत्यत्र विधिगम्यशब्दभावनोद्देश्यत्वमाख्यातार्थरूपार्थभावनायां, सा चार्थभावना समाप्तिरूपा । नारम्भसमाप्त्युभयरूपा । आरम्भं विना समाप्तेरसम्भवेन समाप्तिविधाने तस्यार्थिकस्य विध्यविषयत्वात् । पाकविधौ वह्निसम्पादनमिव । तथा च

समाप्त्युद्देशेनैव प्रवृत्तत्वात् तत्सिद्धिरावश्यकीति । कामनायाः अनुष्ठाननिमित्तत्वादनुष्ठानस्य समाप्तिरूपत्वान्निमित्तस्य कामनाशे ऽपि समाप्तिरनुष्ठेयेति फलितो ऽर्थः । यथा च्युतो निवृत्तावप्याचमनं तथा ॥ १४ ॥

फलार्थित्वाद्वा नियमो यथा ऽनुपक्रान्ते ॥ १५ ॥

सिद्धान्तमाक्षिपति । फलेति । फलार्थित्वाद्यागस्येति शेषः । फलसाधनत्वमात्रप्रतिपादनात् । निमित्तत्वस्य फलेच्छायाः पूर्वाधिकरणे निरस्तत्वादनियमः समापनीयमित्यनियमः । यथा ऽनुपक्रान्ते कामनासत्त्वे ऽपि आरम्भाभावे समाप्त्यभावः । तथा ऽऽरम्भे ऽपीति भावः ॥ १५ ॥

नियमो वा तन्निमित्तत्वात्कर्तुस्तत्कारणं स्यात् ॥ १६ ॥

कामनायाः समाप्त्यनिमित्तत्वे ऽपि आरम्भस्य समाप्तिनिमित्तत्वमावश्यकमित्याह । नियमो वेति । नियमः समाप्तिनियमः । आरम्भस्येति मण्डूकप्लुतिन्यायेन प्रथमसूत्रादनुवृत्तिः । आरम्भस्य तन्निमित्तत्वात् । समाप्तिनिमित्तत्वात् । अनुष्ठानस्य फलं किमित्याकाङ्क्षायामाह । कर्तुः आरम्भकर्तुः तद् असमापनं कारणं प्रत्यवायकारणं स्यात् । यो यज्ञस्त्युत्त्वा न यजते वैधातवीयेन यजेत इति प्रायश्चित्तश्रवणादितिभावः ॥ १६ ॥

आरब्धलौकिककर्मणः समाप्त्यनियमः । अधि० ४ ।

लोके कर्मणि वेदवत्ततो ऽधिपुरुषज्ञानम् ॥ १७ ॥

गृहाद्यारम्भकर्तुः समाप्तिरावश्यकी न वेति चिन्तायां पूर्वपक्षमाह । लोकइति । लोके कर्मणि गृहारम्भादौ वेदवद् वैदिककर्मवत् समाप्तिरावश्यकीति भावः । ननु शास्त्रप्रतिपादितो ऽयं नियमः गृहनिर्माणादिकमशास्त्रमत आह । तत इत्यादि । पुरुषमधिकरोतीत्यधिपुरुषं गृहादिनिर्माणं, षष्ठ्यर्थे द्वितीया तद्विषयं ज्ञानं ततः शास्त्राद्, अतः इदमप्यशास्त्रीयं नेति भाः ॥ १७ ॥

अपराधे ऽपि च तैः शास्त्रम् ॥ १८ ॥

साधकान्तरं स्वमते पूर्वपक्ष्याह । अपराधेति । अपराधे रथनिर्माणसमये आरे भग्ने तैः शिल्पिभिः शास्त्रं प्रायश्चित्तशास्त्रम्, आरे भग्ने इन्द्रबाहुर्बन्धव्यः पायसेन ब्राह्मणो भोजयितव्य इति, पठ्यत इतिशेषः ॥ १८ ॥

अशास्त्रात्तूपसंप्राप्तिः शास्त्रं स्यान्न प्रकल्पकं तस्मा-
दर्थेन गम्येताप्राप्ते शास्त्रमर्थवत् ॥ १९ ॥

शिल्पिशास्त्रं न वेदमूलमित्यभिप्रायेण सिद्धान्तमाह । अशास्त्रेति । अशास्त्रा निर्मूला उपसंप्राप्तिः गृहादिनिर्माणप्राप्तिः तस्माच्च शास्त्रं शिल्पिशास्त्रं न प्रकल्पकम् अकल्पकम् । स्वमूलवेदानुमापकं नेत्यर्थः । अर्थेनेति । अर्थेन स्वरक्षणादिप्रयोजनेन गम्येत ज्ञातव्यः । ननु शिल्पिशास्त्रस्य निर्माणफलं किमित्याकाङ्क्षायामाह । अप्राप्त इति । अप्राप्ते गृहनिर्माणादिकौशल्यशून्ये पुरुषे शास्त्रमर्थवत् सफलं स्वबुद्ध्या कर्तुमक्षमः शास्त्रं दृष्ट्वा कुर्यादित्यर्थः ॥ १९ ॥

देवताश्रये च* ॥ २० ॥

ननु यागे ऽग्न्यादिवद्गृहनिर्माणाङ्गवास्तुपुरुषादीनां सत्त्वाच्छ्रुतिमूलत्वमित्याशङ्कायामाह । देवतेति । देवताश्रये देवताङ्गत्वप्रतिपादके ऽपि, न प्रकल्पकमित्यनुवर्तते । पूर्वस्मात्तदपि निर्मूलमिति भावः ॥ २० ॥

प्रतिषिद्धकर्मणामनुष्ठाने ऽनिष्टप्राप्तिः । अधि० ५ ।

प्रतिषेधेष्वकर्मत्वात्क्रिया स्यात्प्रतिषिद्धानां
विभक्तत्वादकर्मणाम् ॥ २१ ॥

न कलञ्जं भक्षयेदिति पर्युदासो निषेधो वेति संशये पूर्वपक्षमाह । प्रतिषेधेष्विति । प्रतिषेधेषु सिद्धान्तिनो निषेधत्वेनाभिमतेषु न कलञ्जमिति वाक्येषु अकर्मत्वात् भक्षणविरोधिसंकल्पविधित्वात् क्रिया स्यात् तत्कामनारहितपुरुषैर्भक्षणमनुष्ठेयं स्यात् । अयं भावः नञो न भावनायामन्वयः, भक्षणव्यवहितत्वात् । न कलञ्जेन, समासापत्तेः । भक्षणे अन्वेतीत्यपि न । तथा सति भक्षणाभावस्य कृत्यसाध्यतया कर्तव्यताप्रतिपादकविध्यनन्वयात्तस्मादगत्या नेक्षेतोद्यन्तमादित्यमितिवद् भक्षणपदस्य भक्षणविरोधिसंकल्पादौ लक्षणा । तस्य कर्तव्यतया विधानम् । तस्य फलाकाङ्क्षायां विश्वजिन्न्यायात्स्वर्गः फलं तत्फलेच्छारहितेन भक्षणं कर्तव्यमिति फलितमिति । अकर्मणां भक्षणविरुद्धसंकल्परूपकर्मप्रतिपादकानां

* इदमपि सूत्रं भाष्ये वार्त्तिके च न दृश्यते ।

पर्युदासरूपाणां निषिद्धानां च विभक्तत्वात् परस्परं भिन्नत्वादित्यर्थः। नञ्पदसमभिव्याहृतधातोः स्वविरुद्धार्थे लक्षणा यादृशवाक्ये स पर्युदासः। प्रवर्तकवाक्यमिति फलितम्। यच्च निवर्तकं तस्य निषेधरूपत्वात् ॥ २१ ॥

शास्त्राणां त्वर्थवत्त्वेन पुरुषार्थो विधीयेत तयोरसमवायित्वात्तादर्थ्ये विध्यतिक्रमः ॥ २२ ॥

प्राजापत्यव्रतदृष्टान्तवैषम्यं दर्शयन् सिद्धान्तमाह। शास्त्राणामिति। प्राजापत्यव्रते त्रीणि शास्त्राणि सन्ति तस्य व्रतमित्येकं, नेक्षेतोद्यन्तमादित्यमिति द्वितीयम्। एतावता हैनसा भवतीति तृतीयम्। शास्त्राणां त्रयाणां वाक्यानामर्थवत्त्वेन एकार्थप्रतिपादकत्वेन पुरुषार्थः पुरुषस्यार्थः फलं यस्मादिति व्युत्पत्त्या ईक्षणविरोधी नेक्षिष्यइति संकल्परूपः विधीयते। अयं भावः। तस्य व्रतमित्यत्र व्रतशब्दार्थो मानसो व्यापारः। तदुत्तरं मानसव्यापारविशेषजिज्ञासायां नेक्षेतेति ईक्षणविरोधी संकल्पः। तस्य फलजिज्ञासायां तृतीयं वाक्यमिति त्रयमेकवाक्यतापन्नं भवतीति लक्षणा धातोर्युक्तेति। तयोः प्रथमतृतीयवाक्ययोः, न कलञ्जमित्यत्रासमवायित्वात्। अभावात्। तादर्थ्ये, चतुर्थ्यर्थे सप्तमी, शक्यार्थलाभाय विध्यतिक्रमः। विधीयमानार्थनिषेधः स्यात्। नञ्समभिव्याहारे भक्षणानुष्ठानापरपर्यायो भावना विधीयते नञा तन्निषेधः। इत्थं च धातोः मुख्यार्थः संपद्यते तदर्थे व्यवहितान्वयोऽपि न दोषायेति भावः ॥ २२ ॥

गुर्वनुगमनादीनामुपनयनोत्तरकालकर्तव्यत्वम्। अधि॰ ६।

तस्मिंस्तु शिष्यमाणानि जननेन प्रवर्तेरन् ॥ २३ ॥

क्षुतआचामेदित्यादिस्मार्तधर्माः जन्मप्रभृति उतोपनयनमारभ्येति संशये पूर्वपक्षमाह। तस्मिन्निति। तस्मिन्मन्वादिग्रन्थे, शिष्यमाणानि पठ्यमानानि आचमनादीनि जननेन जन्ममात्रेण प्रवर्तेरन्। विशेषाश्रवणादिति शेषः ॥ २३ ॥

अपि वा वेदतुल्यत्वादुपायेन प्रवर्तेरन् ॥ २४ ॥

सिद्धान्तमाह। अपि वेति। स्मृतीनां वेदतुल्यत्वाद् उपायेन उपनयनेन सह प्रवर्तेरन् ॥ २४ ॥

त्वे प्रमाणमस्ति, ततश्चासम्भवादोरित्यस्य निवृत्तावन्त्यस्य स्यात् । 'गमहनजनखनघसा'मिति लोप उपधाया यथा स्यादित्युत्तरार्थमप्यवश्यमुपधाग्रहणं कर्त्तव्यमिति भावः । 'विकृतग्रहणं विषयनियमार्थमिति' । गुह इत्युच्यमाने धातुनिर्द्देशोयं भवति, ततश्च कुहिद्विषयेपि तत्स्वरूपप्रयुक्तमूत्वं स्यात् । तस्मादूत्वस्य विशिष्टो विषयो निर्दिष्टो यथा स्यादिति विकृतस्य कृतगुणस्य ग्रहणं कृतं, विषयार्थतां स्पष्टयति । 'यत्रेति' । गुणविषये यथा स्यादित्यर्थः । 'अयादेशप्रतिषेधार्थं च केचिदिच्छन्तीत्यादि' । पूर्वविषयावधारणे तात्पर्यमित्युक्तं तच्चाकूहितीत्युच्यमाने सिद्ध्यति, लाघवार्थं तु गोह इत्युक्तं, तच्च कालावधारणार्थमप्यर्थाद्भवति, गुणोत्तरकालमूत्वमिति, इदानीं तूभयत्रापि तात्पर्यमित्युक्तं भवति । गुणविषये भवति तत्रापि कृते गुण इति । यदि हि प्रागेव गुणादूत्वं स्यात् तदा 'ल्यपि लघुपूर्वा'दित्ययादेशे तस्य सिद्धत्वाल्लघुपूर्वो हकार इत्ययादेशः स्यात्, यदा तु गुणे कृते तस्य स्थाने ऊत्वं तदा तस्यासिद्धत्वेप्योकारस्य गुरुत्वादयादेशाभावः सिद्ध्यतीति, तदेतद् दूषयति । 'व्याश्रयत्वादिति' । कथं व्याश्रयत्वमित्याह । 'णावूत्वमिति' ॥

"दोषो णौ" ॥ किमर्थं दुर्षेर्विकृतस्य ग्रहणं क्रियते न दुष इत्येवोच्येत, विषयार्थमिति चेत्, न, णाविति विषयस्य साक्षान्निर्द्देशात्, प्रदूष्य गत इत्यादावयादेशप्रतिषेधार्थमिति चेत्, न, दत्तोत्तरत्वात्, उक्तोत्तरमेतत्, व्याश्रयत्वादसिद्धत्वं नास्तीति, तस्माद्दुष इत्येव वक्तव्यमत आह । 'विकृतग्रहणमिति' । क्रमः प्रस्तावः, प्रकरणमित्यर्थः ॥

"वा चित्तविरागे" ॥ चित्तविरागश्चित्तस्याप्रीतता, प्राप्तविभाषेयं, णावित्येव, चित्तस्य दोषः ॥

"मितां ह्रस्वः" ॥ 'रजयतीति' । रञ्जेर्णौ मृगरमणउपसङ्ख्यानमित्युपधालोपः ॥

"चिण्णमुलोर्दीर्घोन्यतरस्याम्" ॥ 'न ह्रस्वविकल्प एव विधीयतेति' । एवमपि ह्रस्वपक्षे अशमीति सिद्ध्यति, पक्षान्तरे अशामीति

यथाप्राप्तं दीर्घ एवावस्थास्यतइति भावः । 'शमयन्तं प्रयुङ्क्तइति'। यद्यपि चिण्विषये कर्म प्रदर्शनीयं भूतकालश्च, तथापि णिजुत्पत्तये हेतुव्यापारमात्रप्रदर्शनमत्र विवक्षितं न कर्त्ता नापि वर्त्तमानः काल इति न दोषः । 'णिलोपस्य स्थानिवद्भावादिति'। स्थानिवद्भावे हि सति यश्चिण्णमुल्परो णिः, न तस्मिन्मिदङ्गं, पूर्वेण णिचा व्यवधानात्, यस्मिंश्च मिदङ्गं न स चिण्णमुल्परः, परेण णिचा व्यवधानात्, ततश्च ह्रस्वविकल्पो न स्यात् पूर्वेण नित्यमेव तु ह्रस्वः स्यात् । ननु दीर्घविकल्पेपि यावता स्थानिवद्भावः कथमिवैतत्सिद्ध्यति, तत्राह । 'दीर्घविधौ त्विति'। न पदान्तद्विर्वचनेत्यादिना स्थानिवद्भावप्रतिषेधाद्दीर्घविकल्पस्यायं विषय एवेत्यर्थः । 'तथेत्यादि' । अत्र दीर्घविधौ त्वजादेशो न स्थानिवद्भवतीत्यनुषङ्गः, शमेर्यङ्, द्विर्वचनं, नुक्, णिच्यतो लोपः, यस्य हलः, शंशमि इति स्थिते यदा ततश्चिण्णमुलौ भवतः, तदा दीर्घविकल्पः सिध्यति, अजादेशस्य स्थानिवत्त्वाभावादित्यर्थः । एतदेव स्पष्टयति । 'योसाविति'। 'यश्च यङ्कारइति'। णौ लुप्यतइत्यनुषङ्गः । एवं तावद्दीर्घविधौ त्वजादेशो न स्थानिवद्भवतीत्येतत्स्पष्टीकृतं, णिलोपस्य स्थानिवद्भावाद् ह्रस्वविकल्पो न स्यादिति यदुक्तं तत्समर्थयते। 'ह्रस्वविकल्पेत्विति'। णेर्णिः, णिणिः, सोन्तो यस्य स णिण्यन्तः, एतेन यङ्ण्यन्तइति व्याख्यातम् । 'असिद्धिरेवेति' । कस्य, प्रकृतत्वाद्दीर्घस्य, एवकारेण तु शब्देन चैतद्दर्शयति । णिचमाश्रित्य वृद्धिविधानादस्ति दीर्घस्य शङ्का, णिलोपस्य तु स्थानिवद्भावादयं विकल्पो न स्यादित्येव दोषः, यङ्ण्यन्ते तु भवतु नामायं विकल्पस्तथापि पक्षे दीर्घस्य श्रवणं न सिध्यति, णिचमपेत्य वृद्धौ कर्त्तव्यायामतो लोपस्य स्थानिवद्भावाद्दीर्घस्यानुत्पत्तेरिति । स्यादेतत् । दीर्घविकल्पे विधीयमाने यदि नाम स्थानिवद्भावोनास्ति तथापि नैवात्र दीर्घः सिध्यति, असिद्धवदत्राभादिति णियङोर्लोपस्यासिद्धत्वादित्यत आह । 'व्याश्रयत्वादिति'। व्याश्रयत्वमेव दर्शयति । 'णौ हीत्यादि'। किं च हेड वेष्टने घटादिः, तस्य ह्रस्वाभावपक्षे अहेडीति स्यात्, दीर्घे तु ह्रस्वस्य कृते अहीडीति भवति, तस्मादतोपि हेतोर्दीर्घ एव विकल्पनीयः ॥

"ल्हादो निष्ठायाम्" ॥ ह्लादी सुखे च, ईदित्वान्निष्ठायामनिट्, क्वचित्पठ्यते 'ह्लाद इति योगविभागः क्रियते, क्तिन्यपि यथा स्यात् प्रल्हत्तिरिति,' भाष्ये तु नैतद्दृष्टम् ॥

"छादेर्घेऽद्व्युपसर्गस्य" ॥ 'उरश्छद इति'। 'छद आवरणे, चुरादिर्णिच्, पुंसि संज्ञायामिति करणे घः, कर्मणि षष्ठ्या समासः, ननु चात्र घे परतो णयन्तमङ्गं तस्योपधाऽकारः, न च सा ह्रस्वभाविनी, न च शक्यं वक्तुं णिलोपे कृते आकारो ह्रस्वभाविन्युपधेति, णिलोपस्यासिद्धवदत्राभादित्यसिद्धत्वादचः परस्मिन्निति स्थानिवद्भावाच्चेत आह। 'णिलोपस्य चेति'। अपर आह। णाविति वर्त्तते, घे परतो यो णिस्तत्र यदङ्गं तस्योपधाया ह्रस्वः, छादेरिति चेकानिर्द्देशो न णिचेति। ननु यत्र त्रिप्रभृतयः सन्ति द्वावपि तत्र स्तस्तत श्चाद्व्युपसर्गस्येत्येव सिद्धं किं सूत्रशिष्टया ऽत आह। 'उत्तरा हीति'। एतदेव लोकव्यवहारेण द्रढयति। 'नहीति' ॥

"इस्मन्त्रन्क्विषु च" ॥ 'अर्चिशुचिहुसृपिच्छा[1]दिच्छ्य इसि' रितीसिप्रत्ययः, मनिन् सर्वधातुभ्यः, ष्ट्रन्सर्वधातुभ्यः, योगविभागाद्द्विप्रभृत्युपसर्गादपि भवति समुपच्छदिः ॥

"गमहनजनखनघसां लोपः क्ङित्यनङि" ॥ 'जघ्नतुरिति'। अभ्यासाच्चेति कुत्वम्। 'जज्ञ[2]तुरिति'। जन जनने परस्मैपदी जोहोत्यादिकः नकारस्य चुत्वम्। 'जज्ञ इति'। जनीप्रादुर्भावे, अनुदात्तेत् दैवादिकः। 'जक्षतुरिति'। लिट्यन्यतरस्यामिन्त्यदेर्घस्लादेशः, घकारस्य चर्त्वं, शासिवसिघसीनां चेति षत्वम्। 'अक्षन्निति'। 'लुङ्सनोर्घस्लृ' मन्त्रेघसेति च्लेर्लुक्। 'अचीत्येवेति'। अचि श्नुधात्वित्यतः, तस्य तु दोषो णाविष्यत आरभ्योपयोगो न प्रदर्शितः, क्वचिद्व्यभिचाराभावात्, क्वचिदसंभवात्, इह तूपयोगः, तथा चोत्तरसूत्रे हलि चेति वक्ष्यति ॥

[1] छदिभ्यइति पा ई० पु०।
[2] जज्ञुरिति ण० ई० पु०।

"तनिपत्योश्छन्दसि" ॥ 'वितत्निरइति'। लोपविधानसामर्थ्यादसिद्धत्वेपि तस्मात् एकहल्मध्यइत्येत्वाभ्यासलोपौ न भवतः। 'पप्तिमेति'। लिट्, मस्, इट् ॥

"घसिभसोर्हलि च" ॥ सूत्रे चकारस्य पाठो ऽनार्षः। तथा च वार्त्तिकं हल्ग्रहणमपरिभाष्यमन्यत्रापि दर्शनादिति। 'तथा न क्रियतइति'। यदि क्रियेत अनच्कत्वाद् द्विर्वचनं न स्यादितिभावः। पूर्वत्राचीत्यधिकारादिह हलीत्युक्तं, तदुपादानादचि न स्यादिति चकारेण समुच्चयः, यदि पूर्वत्रैवाचीत्यनुवर्त्तते नेहेत्युच्येत ततो हलि चेति शक्यमकर्त्तुमुत्तरार्थे तु तत्कृतम् ॥

"हुझल्भ्यो हेर्धिः" ॥ 'हलादेरिति'। हुझल्भ्य इति पञ्चम्या हलीति सप्तम्याः षष्ठीप्रकल्प्यतइति भावः। यद्येवं यस्मिन्विधिरित्यस्याभावात्तदादिविधिर्न स्यात्, हलीत्यनुवृत्तिसामर्थ्याद्धलन्तत्वाभावाच्च भविष्यति। 'भिन्धीति'। श्नसोरल्लोपः। 'प्रीणीहीति'। ई हल्यघोः। 'जुहुतामिति'। लोटो लङ्वत् तसस्ताम्। 'रुदिहीति'। शब्दान्तरप्राप्त्या द्वयोरप्यनित्ययोः परत्वादिटि कृते पुनर्द्धित्वप्रसङ्गः। 'इहेत्यादि'। धित्वस्यावकाशो ऽनाशिषि जुहुधीति, तातङोवकाशो हुझल्भ्यो ऽन्यः, जीवतात्त्वमिति, आशिषि हुझल्भ्यः तूभयप्रसङ्गे परत्वात्तातङ्, अथ कृतेपि तस्मिन् स्थानिवद्भावाद्धित्वं कस्मान्न भवति, तत्राह। 'तत्र कृतइति'। भिन्धकि च्छिन्धकीत्यत्रापि तर्हि परत्वेन धित्वे कृते अकज्न स्यादित्य आह। 'भिन्धकीति'। अपर आह, स्थान्यादेशयोर्द्वयोरपीकार उच्चारणार्थः, हकारस्य धकार आदेशः, हलीत्यपि नानुवर्त्यं, न क्वाप्यनिष्टप्रसङ्ग इति ॥

"श्रुशृणुपृकृवृभ्यश्छन्दसि" ॥ 'उरुंकृदुरुणस्कृधीति'। नश्च धातुस्थोरुषुभ्य इति णत्वं, कः करदिति विसर्जनीयस्य सत्वम्। 'अन्येषामपि दृश्यतइति दीर्घत्वमिति'। न केवलं शृणुधी गिर इत्यत्र, श्रुधीहवम्, अपावृधीत्यत्राप्यनेनैव दीर्घत्वम्। 'अतोन्यत्रेति'। शृणुधीत्यतोन्येषु सर्वोदाहरणेषु ॥

१ उरुकृदिति मुद्रितमूलपुस्तके नास्ति।

"अङ्कितश्च" ॥ 'मलोपाभावस्त्विति'। अनुदात्तोपदेशेत्यादिना यो मलोपस्तस्याभाव: । 'अङ्कित्त्वादेवेति'। नासौ यत्र साध्य इत्येषशब्दार्थ: । 'यमेः शपो लुगिति' बहुलं छन्दसीत्येव, एव मुत्तरत्रापि ॥

"चिणो लुक्" ॥ चिण इति पञ्चमी न षष्ठी विधानसामर्थ्यात् । 'प्रत्ययस्येति'। प्रत्ययस्य लुक्श्लुलुप इति वचनादङ्गाधिकाराच्चैतल्लभ्यते, तेनाकारितरामिति तशब्दस्य तरप आमश्च यः संघातस्तस्य युगपल्लुङ्ङ् भवति, प्रत्येकं प्रत्ययत्वेपि सङ्घातोऽप्रत्ययो ह्ययम् । ननु चेदमस्मिचसिद्धमिति भेदनिबन्धनो विषयविषयिभावस्तत्कथं चिणो लुक्चिणो लुक्येवाऽसिद्धो भवति अत आह । 'चिणो लुगित्येतदिति'। अथ वा क्ङितीतिवर्तते, चिण इति पञ्चमी तस्य षष्ठीं प्रकल्पयिष्यति, तेन क्ङितः प्रत्ययस्य लुग्विधीयमानस्तरपो न भविष्यति ॥

"अतो हेः" ॥ 'गच्छेति'। इषुगमियमां छः । 'धावेति' । धावु गतिशुध्योः, पाघ्रादिसूत्रेण सर्त्तेर्धावादेशः । 'लुनीहिति' । प्वादीनां ह्रस्वः, ई हल्यघोः, ननु चात्रानवर्णान्तत्वादेव न भविष्यति, ईत्वमेव हि परत्वाद्भवति तत्राह । 'ईत्वस्येति' । नन्वेवमप्युत्तरसूत्रे उतः प्रत्ययादिति यदुपात्तमुपाधिद्वयं तस्मादेवात्र प्रत्युदाहरणद्वयेपि न भविष्यति, यदि च लुनीहीत्यत्र परत्वादीत्वं भवति ततोसिद्धत्वं नास्ति, विप्रतिषेधविषये तदभावस्योक्तत्वात्, तस्मादत इत्यस्य इहि अधीहीति प्रत्युदाहरणं, तपरकरणस्य याहि वाहीति ॥

"उतश्च प्रत्ययादसंयोगपूर्वात्" ॥ उतः प्रत्ययादित्यनयोर्विशेषणविशेष्य भावे कामचारः, तत्र

उकारस्य विशेष्यत्वे तेन नास्ति तदन्तता ।
न सम्भवति चोकारः प्रत्ययान्तो यदा पुनः ॥
विशेष्यते उकारेण प्रत्ययस्तत्तदन्तता ।
आश्रीयते प्रत्ययस्य तत्पक्षद्वयसम्भवः ॥

तत्राद्ये पक्षे तनु कुरु इत्यादावेव स्यात्, सुनु चिनु इत्यादौ तु न स्यात्, तथा उकारस्य प्रत्ययस्यासंयोगपूर्वत्वादसंयोगपूर्वग्रहणमस्मिन्पक्षे

अङ्गविशेषणं विज्ञायेत, ततश्च चिणु इत्यादौ न स्यात्, चिणु हिंसायां तानादिकः, अत्र धातौ गुणो न भवतीत्याहुः। तस्मादुकारो विशेषणं तेन तदन्तविधिः, यद्येवं तनु कुरु अत्र न प्राप्नोति इकार एवात्र प्रत्ययो न तदन्तः, अत्रापि तदन्तः, कथं, व्यपदेशिवद्भावात्। एवं स्थिते॥

यद्यसंयोगपूर्वत्वमुकारान्तविशेषणम्।
आप्नुहीत्यत्र हेर्लुक् स्यात्प्रतिषेधस्तु तत्त्वुहि॥
तस्माद्विशेषणमिदमुकारस्यैव गृह्यताम्।

ननु च येन विधिस्तदन्तस्येति उकारस्तदन्तस्य सञ्ज्ञा, ततः किं,

सञ्ज्ञिप्रत्यायनपरा सञ्ज्ञा तस्या विशेषणम्।
अयुक्तमिति चेदत्र समाधिरभिधीयते।
विशेषणं तदन्तस्य सञ्ज्ञा, सत्यं, तथापि तु।
विशेषणत्वस्फुरणात्प्रागेवो तोविशेषणम्।
स्यादस्य संयोगपूर्वत्वं, पश्चात्तु विशेषणम्।
प्रत्ययस्येति, नैवेह किञ्चिदस्ति तिरोहितम्॥

तदिदमुक्तम्, 'योयमुकारोऽसंयोगपूर्वस्तदन्तात्प्रत्ययादिति'। 'युहि स्हीति'। ननु जुहोतेः परस्य हेर्धित्वविधानादेव धातोः परस्य न भविष्यति, सत्यं, विशिष्टविषयमेतज्ज्ञापकं स्यादिति प्रत्ययग्रहणं छन्दसि चेति च वक्तव्यमिति, एवं च छन्त्वोत्तरसूत्रे ऽन्यतरस्यांग्रहणं न कर्त्तव्यं भवति॥

"लोपश्चास्यान्यतरस्यां म्वोः"॥ अस्येत्यनेनोकारान्तः प्रत्ययः प्रत्यवमृश्यते, अस्येत्यनुच्यमाने म्वोरिति षष्ठ्याश्रयणे न म्वोरेव लोपो विज्ञायेत, एवंचोतश्च प्रत्ययादसंयोगपूर्वादिति पञ्चमी न बाधिता भवति। 'लुगितिवर्त्तमानइत्यादि'। यदि हि प्रकृत एव लुक् क्रियेत सर्वस्यैव प्रत्ययस्य स्यात्। लुगादयः सर्वादेशा इति सञ्ज्ञाविधाववोचाम, सर्वस्य लोपे कृते सुन्वः सुनुव इति न सिध्येत् तस्मादन्त्यस्य लोपार्थं लोपग्रहणं, किं च कुर्वः कुर्म इत्यत्र लुकि सति गुणो न स्यात् न लुमताङ्गस्येति प्रतिषेधात्, लोपे तु सति भवति॥

"नित्यं करोतेः"॥ 'करोतेःप्रत्ययान्तस्येति'। उतश्च प्रत्ययादि-

त्यनुवृत्तेर्लभ्यते, उकारलोपस्येत्यादिना सोपपत्तिकां दीर्घप्राप्तिमनूद्य प्रतिषेधं दर्शयति । आरम्भसामर्थ्यादेव सिद्धे नित्यग्रहणंविस्पष्टार्थम् ॥

"अत उत्सार्वधातुके" ॥ 'करोतिरुप्रत्ययान्तस्येति' । उतश्च प्रत्ययादित्यनुवृत्तेर्लभ्यते ।'सार्वधातुकइति किमिति' । सत्यपि सार्वधातुकग्रहणे स्यतास्यन्तस्य प्रसङ्गः करिष्यावः कर्त्ताराविति । स्यतासिभ्यां व्यवधानाच भविष्यति, कुरुत इत्यत्रापि तर्हि उप्रत्ययेन व्यवधानाच स्यात्, तस्मात्सार्वधातु केपरतः करोतेरङ्गस्येत्यर्थासम्भवात्सार्वधातुके परतो यदङ्गं तदवयवस्य करोतेरित्याश्रयणीयम्, एवं च स्यतास्यन्तस्यापि प्रसङ्ग इत्युतश्च प्रत्ययादित्यवश्यमनुवर्त्यम्,उप्रत्ययान्तात्करोतेः परं क्ङित्सार्वधातुकमेवेति प्रश्नः । 'भूतपूर्वेपीति' । कुरुहि इति स्थिते उत्वं च प्राप्नोति हि लुक्च, नित्यत्वाद्धिलुकि कृते क्ङितः परस्याभावादुत्वं न स्यात्प्रत्ययलक्षणं च न लुमताङ्गस्येति प्रतिषिद्धं, तस्माद्भूतपूर्वेपि सार्वधातुके यथा स्यादिति सार्वधातुकग्रहणम् । असिद्धो हिलुक् तस्यासिद्धत्वादुत्वं भविष्यति, तस्माद्विस्पष्टार्थं सार्वधातुकग्रहणं,यथा पुनरस्योत्तरत्राप्युपयोगाभावः तथा तत्रतत्र वक्ष्यते । इह यद्यपि भाव्यमानोप्युकारः सवर्णान् गृह्णाति तथाप्यान्तर्यतो मात्रिकस्यातो मात्रिक उकार एव भविष्यति नार्थस्तकारेण तत्राह । 'तपरकरणमिति' । असति हि तस्मिन्नुप्रत्ययमाश्रित्योकारस्य लघूपधलक्षणो गुणः स्यात् स माभूदिति तपरकरणं, तस्य हि प्रयोजनं लक्षणान्तरेणापि दीर्घो माभूत् ॥

"श्नसोरल्लोपः" ॥ तपरकरणं किम् । आटो माभूत्, आस्ताम् आसन्, असिद्ध आट्, एवं तर्ह्याभीयस्यासिद्धत्वमनित्यमिति ज्ञापनार्थं तपकरणम् । अथात्र सार्वधातुकाधिकारस्योपयोगो नेत्याह । श्नः सार्वधातुक एव, अस्तेरप्यार्द्धधातुके भूभावेन भाव्यं, नन्वनुप्रयोगे भूभावो नास्ति ईहामासुः । सत्यं, तत्र द्विर्वचने हलादिशेषे च कृते येन नाप्राप्तिन्यायेनातो गुणे इति पररूपं बाधित्वा अत आदेरिति दीर्घत्वे कृते परस्याकारस्य सत्यपि लोपे सिद्धमिष्टम् ॥

"श्नाभ्यस्तयोरातः" ॥ 'लुनतइति' । लट्, आत्मनेपदेष्वनतइति झस्यादादेशः । 'लुनतामिति' । लोटि आमेतः । 'अलुनतेति' । लङ्,

मिमतइत्यादौ भृञामिदितीत्त्वम् । 'यान्ति वान्तीति'। असति च्छि श्नाभ्यस्तग्रहणे अतो गुणाइत्यत्र तपरकरणस्य यानमित्यादावकृङिति चरितार्थत्वादिह लोप एव स्यादितिभावः । 'अलुनादिति'। उत्तरसूत्रे क्ङितीत्यस्य सम्बन्धः स्थित एवेति नायमीत्त्वस्य विषयः, इहाकारेणाभ्यस्तविशेषणादाकारान्तस्य लोपो जायतीत्यत्र न भवति, तत्र निर्दिश्यमानस्यादेशा इति वा अलोन्त्यस्येति वा आकारस्यैव लोप इत्यादिमत्वा व्याख्यातम् । 'आइत्येतस्याभ्यस्तानां चाकारस्येति'। आकारान्तानामिति तु व्याख्येयम्, अत्रापि आ सार्वधातुक एव सम्भवति, एवमभ्यस्तमप्याकारान्तं, ववतुरित्यादौ भवत्येव लोपः ॥

"ई हल्यघोः" ॥ 'लुनन्तीति'। असति हल्ग्रहणे ईत्वलोपयोः पर्यायः स्यात्, एकविषयत्वात् । घुसंज्ञकेष्वेव वा लोपः स्यात्, अत्रापि पूर्ववत् सार्वधातुकमेव सम्भवति ॥

"इद्दरिद्रस्य" ॥ इदमपि सार्वधातुकएवान्यत्र लोपविधानात् । 'सिद्धश्चेति'। यथा प्रत्ययविधौ प्रत्ययविधानकालएव सिद्धो भवति तथा लोपः कर्त्तव्यः, आर्द्धधातुकइति विषयसप्तम्याश्रयणीयेति भावः । 'आकारान्तलक्षणइति'। आर्द्धधातुकइति परसप्तम्यां तस्योत्पत्तिं प्रतीक्ष्य लोपः कर्त्तव्यः, ततश्च श्याद्व्यधेत्याकारान्तलक्षणो णप्रत्ययः स्यात्, तत्र कृतेऽनेन लोपश्च प्राप्नोति युक्च, तत्र लोपस्य शब्दान्तरप्राप्त्याऽनित्यत्वं, युकस्तु लोपे कृतेऽप्राप्तिः, ततश्च उभयोरप्यनित्ययोः परत्वाद्युक् स्यात्, अथापि लोपः स्यादेवमपि अदरिद्र इत्यत्राच्कावशक्तावित्येष स्वरो न स्यात्, ईषद्दरिद्रमित्यत्र चातो युजिति युच् स्यात्, । 'दरिद्रायकइति'[1]। ण्वुलि, युक् । 'दरिद्राणइति'। ल्युट् । 'दिदरिद्रासतीति'। तनिपतिदरिद्राणामुपसंख्यानमिति व्यवस्थितविभाषा, तेन लोपपक्षे इट्, अन्यत्रेडभावः, । 'अद्यतन्यामिति'। लुङ एषा पूर्वाचार्यसंज्ञा । 'अदरिद्रासीदिति'। यमरमनमातां सक्चेति, एकाच इति तत्रानुवर्त्ततइत्येकीयं मतं, चिणि अद-

१ दरिद्रायक इति ण्वुलि युगिति नास्ति ई॰ पु॰ ।

रिद्रिअदरिद्रीय, णलिददरिद्रौ[1] । 'छान्दसं ह्रस्वत्वमिति' । अन्यथा आतो धातोरिति लोपे दरिद्र इति निर्देशः स्यात् ॥

"भियोऽन्यतरस्याम्" ॥ 'हलादौ क्ङिति सार्वधातुकइति' । नैतेषामत्रोपयोगः, तथा च प्रत्युदाहरणं न प्रदर्शितम् । तथाहि । अजादावप्यस्तु बिभ्यतीति, एरनेकाच इति ह्रस्वस्यापि यण् भविष्यति, न चेत्वविधेर्वैयर्थ्यं, हलादौ चरितार्थत्वात्, तथा बिभेतीति अक्ङित्यपि भवतु गुणो भविष्यति, इत्वविधिश्च क्ङिति चरितार्थः, तथाभ्यस्तस्येत्यनुवृत्तेर्भीतइत्यादावार्द्धधातुके न भविष्यति, क्वसावपि तर्हि प्राप्नोति, छान्दसः क्वसुः, दृष्टानुविधिश्छन्दसि ॥

"जहातेश्च" ॥ अत्रापि न सार्वधातुकइत्यस्योपयोगः, अत एवास्य प्रत्युदाहरणं न प्रदर्शितम्, अभ्यस्तस्येत्यनुवृत्तेरार्द्धधातुके न भविष्यति, लिडजादिः ॥

"आ च हौ" ॥ सार्वधातुकमेव हि ॥

"लोपो यि" ॥ अभ्यस्तस्येत्यनुवृत्तेर्यङि न भविष्यति, यद्यपि यङ्कारेण सह द्विर्वचनाय जहातिरभ्यस्तम् ॥

"घ्वसोरेद्धावभ्यासलोपश्च" ॥ 'देहि धेहीति' । दाञ्धाञो रूपे, दोदाण्धेटां तु विकरणेन हि व्यवहितः, देङात्मनेपदी । 'शिद्यमिति' । न सूत्रे श्रूयमाणश्शकारो विभक्तिसकारस्य श्चुत्वेनागतः, किं तर्हि औत्पत्तिको लोपशब्दसम्बन्धी, विभक्तेस्तु हल्ङ्यादिलोप इति भावः । संज्ञाशब्दे च कृतानुबन्धः संज्ञिनः कार्यं सम्पादयति, यथा इमुटष्टित्वम् । एतच्च नानर्थके ऽलोन्त्यविधिरित्यनाश्रित्योक्तम् ॥

"अत एकहल्मध्येऽनादेशादेर्लिटि" ॥ एकशब्दोऽसहायवचनो न सङ्ख्यावचनो, मध्याभावात्, द्विवचनान्तस्य च समासः, द्वयोरेव मध्यसम्भवात्, अच लिटीति यदि विधीयमानयोरेत्वाभ्यासलोपयो[2]र्निमित्तनिर्देशः स्यात्, आदेशो न विशेषितः स्यात्, ततश्च नेमतुः,

१ आत औणल इत्यत्रौकारेणैव सिद्धे औकारविधानं दरिद्रातेरालोपेऽकृते अवणार्थमिति निर्णीतत्वादिति–इं० पु० टि० । २ लोपयोरिति नास्ति० इं० पु० ।

नेमुः, सेहे, सेहाते, सेहिरे, अत्रापि प्रतिषेधः स्यात्, नत्वसत्वयोः कृतयोरङ्गस्यादेशादित्वा,त्तस्माद्गुणभूतस्याप्यादेशस्यायं निमित्तनिर्देश इति दर्शयति । 'लिटि परत इति' । लिटि परत्रावस्थिते य आदेशो विधीयते स आदिर्यस्याङ्गस्य नास्तीत्यर्थः । 'चत्सरतुरिति' । अयुक्तमिदमादेशादित्वात्, क्वचित्तु तत्सरुरिति पठ्यते, तदप्ययुक्तं, संयोगान्तत्वेन लिटः कित्त्वाभावात् तस्मात्तत्सरतुः, तत्सरुरिति प्रत्युदाहरणं, त्सर छद्मगतौ । 'चकणतुरिति' । कणतिः शब्दार्थधातुवर्गे भ्वादौ पठ्यते । 'जगणतुरिति' । गण संख्याने, चुरादित्वात्तत्र णिच् प्राप्नोति, यदि नेष्यते अनित्यण्यन्ताश्चुरादयः, एतच्च घुषिरविशब्दन इत्यत्र वक्ष्यते । यद्यपि कुहोश्चुरिति चुत्वं लिट्याहत्य न विहितम्, अभ्यासनिमित्ते तु प्रत्यये विधानाल्लिण्निमित्तमपि भवति, सर्वथा लिड्युत्पन्ने पश्चाद्भवति । 'अनैमित्तिके नत्वसत्वे इति' । ततश्च प्रागेव लिडुत्पत्तेस्ताभ्यां भवितव्यं, तेन तदाश्रङ्गं लिटिय आदेशस्तदादि न भवति, यदि[1] लिटा आदेशो विशेष्यते एत्वमलिट्यपि प्राप्नोति, पक्तः पक्ववानिति, नैष दोषः । चकारः समुच्चये,नान्वाचये तेन यत्राभ्यासलोपस्तत्रैवैत्वम्, इह तर्हि स्यात् पिपठिषति, क्ङितीति वर्तते, एवमपि पापठ्यते अत्रापि प्राप्नोति, नैष दोषः । इह ह्यभ्यासकार्येषु ह्रस्वहलादिशेषावुत्सर्गौ, तयोरन्ये ऽपवादास्तत्रेह दीर्घोऽकित इति दीर्घत्वं च प्राप्नोति अनेन लोपश्च, तत्र दीर्घस्यावकाशो बाभाष्यते, अस्य विधेरवकाशः पेचतुः पेचुः, पापच्यतइत्यत्रोभयप्रसङ्गे अपवादविप्रतिषेधाद्दीर्घत्वेनायमभ्यासलोपो बाध्यते, तत्संनियोगशिष्टत्वादेत्वमपि न भविष्यति, अभ्यासविकारेषु उभयसमावेशो यत्र सर्वेषां प्रवृत्तिस्तत्र, इह तु यद्यपि दीर्घत्वे कृतेपि एत्वाभ्यासलोपयोः प्रसङ्गस्तयोस्तु कृतयोर्न दीर्घस्य प्रसङ्ग इति न सर्वेषां प्रवृत्तिः । ननु च बभणतुर्बभणुरित्यादावभ्यासजश्त्वचर्त्वयोरसिद्धत्वादनादेशादित्वात् एत्वाभ्यासलोपाभ्यां भाव्यं, विप्रतिषेधस्य तु जहसतुर्जहसुरित्यादौ यत्र कुहोश्चुरिति चुत्वं क्रियते सावकाशः स्यादत आह । 'इहेति' । अत्रैव ज्ञाप-

१ तर्हीत्यधिकम् सं॰ पु॰ ।

क्रमाह। 'तथा चेति'। 'रूपाभेदेष्विति'। यत्रादेशस्य स्थानिना सह रूपभेदो नास्ति तत्रेत्यर्थः। शसिदद्योरिति'। अभ्यासे चर्चेति सर्वत्र जश्चरोः प्राप्तयोरन्तरतमपरिभाषाव्यापारलब्धमिदं वक्ष्यते प्रकृतिचरां प्रकृतिचरः प्रकृतिजशां प्रकृतिजश इति, तेन शसेः शकारस्य शकारो ददेर्दकारस्य दकार इति, तावप्यादेशादी भवतः, यदि चाभिन्नरूपोऽप्यादेश इहाश्रीयेत तत आदेशादित्वादेव प्रतिषेधे सिद्धे 'न शसददवादिगुणाना'मिति शसिदद्योः प्रतिषेधोऽनर्थकः स्यात्, कृतस्तु ज्ञापयति रूपाभेदे य आदेशः स इह नाश्रीयत इति, यदि पुनराश्रीयेत किं स्यादित्यत आह। 'अन्यथेति'। प्रकृतिर्जश् प्रकृतिश्चर्च्चादिर्येषां तेषां न स्यात्, वचनं तु रेणुरित्यादौ चरितार्थम्। 'अहं पपचेति'। उत्तमे णलि णित्त्वाभावपक्षे रूपं, णित्त्वपक्षे तु परत्वाद्वृद्धौ कृतायां तपरकरणादकाराभावादेवाप्रसङ्गः। 'देभतुरिति'। अन्यियन्यीत्यादिना लिटः कित्त्वे सति न लोपः। 'नशिमन्योरलिट्येत्त्वमिति'। अलिटीति पादपूरणार्थोऽनुवादः, श्लोको ह्येवं भाष्ये पठितः॥

नशिमन्योरलिट्येत्वं छन्दस्यमिपचोरपि।
अनेशन्मेनकेत्येतद्व्योमानं पेचिरन् लिङि॥

इति। अनेशचिति, क्रोन्तादेशः, अनेशत्रस्येषवः, अनेशमिति तु प्रायेण पाठः, तत्र मिपोऽम्भावः। 'चिपकादिष्विति'। चिपकादिषु हि इत्वप्रतिषेधो वक्ष्यते, एतच्च न यासयोरित्यत्राशिषि चोपसङ्ख्यानमित्यनाश्रित्योक्तं;छन्दसीतिवचनान्मेनकेति भाषायां न प्राप्नोति, यदीष्यते पृषोदरादिषु द्रष्टव्यः। 'लुङ्क्षियतइति'। छान्दसत्वात्, बहुलं छन्दसीति वा शपो लुप्तत्वात्,। 'पेचिरन्विति'। पचेरचिति प्राप्ते, क्वचित्पठ्यते यजिवप्योश्च, आयेजे आवेपे, यजेर्वपेश्च लङि इति छन्दस्यपि दृश्यत इत्यनजादेरप्याडिति, अपर आह। लिटि तस्य एशादेशः, सम्प्रसारणपूर्वत्वे वा, छन्दसीत्यनुवृत्तेर्यणादेशः, एत्वाभ्यासलोपौ, उदात्तवता तिङेत्याङः समास इति, तथा चावयुन्ति यच्छश्चयोश्च मनुरायजे पिता, आयेज इत्या येजे इति॥

"थलि च सेटि" ॥ 'पेचिथेति'। क्रादिनियमात्प्राप्तस्येट उपदेशेत्वत इति प्रतिषेधे प्राप्ते ऋतो भारद्वाजस्येति नियमात्पक्षे इट्। 'पपक्थेति'। अन्येषां मतेन प्रतिषेधः, थल्ग्रहणमनर्थकं, पेचिवेत्यादावन्यत्र सेटि कित्त्वात्पूर्वेण भवितव्यमेवात आह। 'थल्ग्रहणं विस्पष्टार्थमिति'। किमत्र विस्पष्टनीयं तद्दर्शयति। 'अकृद्विदर्थमित्यादि'। आरम्भसामर्थ्यादेवायं निश्चयः स्यादत्र पूर्वेण न सिद्ध्यति तदर्थमिति, बहवश्च विशेषाः प्रकृताः अत एकहल्मध्यइत्यादयः, तत्र सति थल्ग्रहणे सन्देहः स्यात् किमनकारार्थं वचनं ददिविथ, ररादिथ इति, अथानेकहल्मध्यार्थं तत्सरिथेति, अथादेशार्थं बभणिथेति, उताल्लिडर्थं पठित इति उताकृडिदर्थमिति, तत्रात इत्यादयो विशेषा अनुवर्तन्ते क्ङितीत्येतत्तु निवर्ततइति व्याख्यानमन्तरेण दुर्ज्ञानं, तस्माद्विस्पष्टार्थं थल्ग्रहणं कृतम्॥

"तृफलभजत्रपश्च" ॥ फल निष्पत्तौ, ञिफला विशरणे, द्वयोरपि ग्रहणम्। 'गुणार्थमिति'। न शसददवादिगुणानामिति प्रतिषेधं बाधितुमित्यर्थः। 'श्रयतुरिति'। पूर्ववत्कित्त्वनलोपौ॥

"राधो हिंसायाम्" ॥ अनेकार्थत्वाद्धातूनां राधो हिंसायां वृत्तिः। ननु च नात्रापूर्वमवर्णग्रहणमस्ति, प्रकृतश्च मात्रिकस्तपरकरणात्, तत्कथमवर्णस्यानएत्वं भवतीत्युक्तमत आह। 'अत इत्येतदिति'। अत इति तावत्स्वरितत्वादुपतिष्ठते, तत्तपरत्वकृतस्य कालविशेषस्य मात्रात्मकस्यासंभवात्तमपास्यावर्णमात्रं प्रतिपादयति। 'अथ वेति'। पूर्वत्र त्वत इति विरोध्युपादानादात इत्यस्यानभिसंबन्धः। 'एकहल्मध्ये चेति'। अत्र एकहल्मध्ये इत्येव, अत आतइति च द्वयमपि नानुवृत्तम्, एकहल्मध्यइत्यनुवृत्तेर्यत्तच्छब्दाध्याहारेण स्थानी लभ्यतइत्यर्थः॥

"फणां च सप्तानाम्" ॥ बहुवचननिर्देशादाद्यर्थो गम्यतइत्याह। 'फणादीनामिति'। फण गतौ, राजृ दीप्तौ, टुभ्राशृ टुभ्लाशृ टुभ्राजृ दीप्तौ, स्यमु स्वन ध्वन शब्दे, अन्त्यवर्जं फणादयः सप्त, अत्र राजप्रभृतीनामप्येत्वमवर्णस्य भवति, उक्तोऽत्र न्यायो राधोर्हिंसायामित्यत्र॥

"न शसददवादिगुणानाम्" ॥ अत्र वस्तुतो यो गुणसंज्ञकोकारस्तत्रैव यदि प्रतिषेधस्तर्हि विधिप्रतिषेधयोरेकविषयत्वाद्विकल्पः स्यात्, ततश्च 'वा नृधमुचसा' मिति यद्वाग्रहणं तदेवादितः पाठं स्यात्, तस्माद्गुणग्रहणेन तच्छब्दरूपितस्य तद्भावितस्य ग्रहणमित्याह। 'गुण इत्येवमभिनिर्वृत्तस्य चेति'। तस्य संबन्धी यो ऽकार इत्यर्थः। संबन्धित्वमपि तस्य तत्स्थानिकत्वात्तदवयवत्वाच्च यथायोगं वेदितव्यम्। 'शशसतुरिति'। शसु हिंसायां, दद दाने, अनुदात्तेत्, टुवम् उद्गिरणे। 'विशशरतुरिति'। शॄ हिंसायाम्, ऋच्छत्यृतामिति गुणः, यदुक्तं गुणइत्येवमभिनिर्वृत्तस्येति तदुदाहरणं दर्शयति। 'गुणशब्दाभिनिर्वृत्तस्येति'। उरण् रपर इत्यत्र सिद्धं तु प्रसङ्गे रपरत्वादिति वचनाद्गुणो भवन्नेव रेफशिरस्को ऽभिनिर्वर्तते, एवमभिनिर्वृत्तस्यार् शब्दस्यावयवोकारः, लुलविथेत्यत्र तु अभिनिर्वृत्तस्योकारस्य स्थाने ऽवादेशस्तदवयवोकारः, क्वचित्पठ्यते गुणशब्देनात्र शसादीनां ग्रहणसामर्थ्यात्तद्भावितस्यग्रहणमित्य कारमात्रस्य हि ग्रहणे शशिदद्भोर्वकारादीनां च ग्रहणमनर्थकं स्यादिति किल तस्यार्थः॥

"अर्वणस्त्रसावनञः" ॥ उकार उगित्कार्यार्थः, तेन सर्वनामस्थाने नुम् भवति। 'स च नञ उत्तरो न भवतीति'। चेदित्यनुषङ्गः। 'अर्वतीति' उगित्त्वाचान्तत्वाद्वाङीप्। 'आर्वतमिति'। तद्धितेपि भवति, असाविति प्रसज्यप्रतिषेधो न पर्युदासस्तेन नञिवयुक्तन्यायाभावाद्विभक्तेरेव ग्रहणं न भवति, तथा च सुश्चेत्परो न भवतीति प्रथमैकवचनस्य चात्र ग्रहणं न सप्तमीबहुवचनस्य, व्याख्यानात्॥

"मघवा बहुलम्" ॥ मघवेति षष्ठ्यर्थे प्रथमा। 'मघोन इति'। श्वयुवमघोनामिति संप्रसारणं पूर्वत्वमाद्गुणः। ननु च मघमस्यास्तीतिमघवान्, मघमिति धननाम, छन्दसीवनिपौ वक्तव्याविति वनिप्, संप्रसारणे कृते पूर्वस्य भसंज्ञायां यस्येति लोपप्रसङ्गः, व्याश्रयत्वादसिद्धत्वमपि नाशङ्कनीयं, शसि संप्रसारणे यस्येति लोपः, य एवं तर्ह्यन्यदेवेदमव्युत्पन्नं भविष्यति, तथा चैतस्य भाषायां प्रयोग उपपद्यते, यथा तु भाष्यं तथा न केवलमस्यैव चार्वणोपि भाषायामसाधुः प्रयोगः। आह हि।

'अर्वणस्तृ मघोनश्च न शिष्यं छान्दसं हि तत् ।
मतुब्वन्योर्विधानाच्च छन्दस्युभयदर्शनात्' ॥

ऋधातोर्वनिपि गुणे च कृते अर्वन्निति रूपं, तस्माद्द्विचि मतुपि अर्वन्तावित्यादि सिद्धं भवति, वनिप्यर्वणामित्यादि, मघशब्दादपि प्रत्ययद्वये सिद्धं भवति, नार्थः सूत्रद्वयेनेत्यर्थः । मघोन इत्यादौ तु यस्येतिलोपाभावश्छान्दसत्वादेव । 'माघवनमिति' । अन्निति प्रकृतिभावः ॥

"पादः पत्" ॥ 'पादिति' । 'पादशब्दोलुप्ताकारो गृह्यत इति' । पादयतेः क्विबन्तस्याप्यत्र ग्रहणमिति येन विधिस्तदन्तस्येत्यत्र भाष्यकारेणोक्तं, तस्मादपिशब्दाध्याहारेणायं ग्रन्थोयोज्यः, लुप्ताकारः पादशब्दोपि गृह्यते, पादयतेः क्विबन्तोपि, अङ्गाधिकारे तस्य च तदुत्तर पदस्य चेति वक्तव्यात्तदन्तस्याङ्गस्येत्यत्रापि तस्य चाङ्गस्येति द्रष्टव्यं, तदन्ते तु वक्तव्यमस्तीति तस्यैव प्राधान्येनोपन्यासस्तद्दर्शयति । 'स चेति' । यद्यपि पाच्छब्देन तदन्तः समुदायःप्रत्याय्यते तथापि विशेषणत्वेन यो निर्द्दिश्यते तत्रापि यतः षष्ठी श्रूयते तस्यैवादेशः, न प्रतीयमानस्य समुदायस्येत्यर्थः । 'द्विपद इति' । द्वौ पादावस्येति बहुव्रीहिः, संख्यासुपूर्वस्येत्यन्तलोपः । 'द्विपदिकामिति' । पादशतस्य संख्यादेरिति वुन् लोपश्च, व्याघ्रपाच्छब्दो गर्गादिः ॥

"वसोः संप्रसारणम्" ॥ 'पेचुषइति' । पचेः क्वसुः, एत्वाभ्यासलापौ, कथं पुनर्ह्रानुबन्धकस्य क्वसोर्ग्रहणमित्याह । 'वसुग्रहण ति' । एतच्च शत्रादेशस्य वसोरुकारानुबन्धकरणाल्लभ्यते, तस्य ह्येतदेव प्रयोजनमिह सामान्यग्रहणं यथा स्यादिति, उगित्कार्यस्य स्थानिवद्भावेनैव सिद्धत्वात् ॥

"वाह ऊठ्" ॥ 'वाह इति' । वहेर्ण्विप्रत्ययान्तस्य ग्रहणं, ण्विश्च सोपपदाद्विहित इति सामर्थ्यादत्र तदन्तविधिरित्याह । 'वाह इत्येवमन्तस्येति' । 'संप्रसारणं भवतीति' । संप्रसारणग्रहणानुवृत्तिं दर्शयति । तेन वकारस्य स्थाने भवति, अन्यथाऽन्त्यस्य स्यात्, उदाहरणेषु 'छन्दसि सहः,' 'वहश्चेति' ण्विः । 'प्रष्ठौहेत्यादि' । वाह इत्येतावता

प्रकृतं संप्रसारणमेव विधेयमिति प्रश्नः । का रूपसिद्धिरित्याह । 'संप्रसारणे कृतइति' । 'गुणे चेति' । कृतइत्यनुषङ्गः । ण्विप्रत्ययमपेक्ष्य प्रत्ययलक्षणेन गुणः । नन्वेवं शालीन्वहतीत्यादावनकारान्तउपपदे शाल्यूहइति न सिध्यति, तत्राह । 'अनकारान्ते चेति । चकारादकारान्तउपसर्गेपीति द्रष्टव्यं, तेन प्रोह इत्यादावेङि पररूपप्रसंग इति न चोदनीयम् । 'ज्ञापनार्थमिति' । कथमेतज्ज्ञापकमित्याह । 'तस्यां हि सत्यामिति' । बहिरङ्गस्य बहिरङ्गत्वं बहिर्भूताजादिप्रत्ययापेक्षत्वात्, अन्तर्भूताण्व्यपेक्षत्वाद्गुणोन्तरङ्गः ॥

"श्वयुवमघोनामतद्धिते" ॥ 'शौवमिति' । नस्तद्धितइति टिलोपः । 'यौवनमिति' । यूनो भावइति 'हायनान्तयुवादिभ्योण्, अन्निति प्रकृतिभावः, मघवा देवतास्य माघवनः, प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणाद्युवतिशब्दस्यापि संप्रसारणप्रसंगस्तथा मघवत इत्यादौ 'मघवा बहुल' मिति त्रादेशे कृते एकदेशविकृतस्यानन्यत्वात्प्रसंगइत्याह । 'श्वादीनामित्यादि' । कथमेतल्लभ्यतइत्याह । 'एतदर्थमिति' । 'अन इत्युभयोः शेष इति' । न त्वनन्तरस्यैव, योगविभागसामर्थ्यात्, न चैवमपि मघवतेत्यादावेकदेशविकृतस्यानन्यत्वात्प्रसंगः, सामान्यातिदेशे विशेषानतिदेशात् ॥

"अल्लोपोनः" ॥ अदिति पृथक् पदं लुप्तविभक्तिकं, तेनातो धातोरित्यादौ केवलस्य लोपशब्दस्य संबन्धः । 'राजकीयमिति' । गर्तोत्तरपदाच्छ इत्यधिकारे राज्ञः क चेति छः, ककारस्यान्तादेशः, अत्रैकदेशविकृतस्यानन्यत्वात्प्रसंगः ॥

"षपूर्वहन्धृतराज्ञामणि" ॥ किमिदं नियमार्थमाहो स्विद्विध्यर्थं, कथं चेदं नियमार्थं कथं वा विध्यर्थं, यद्यन्निति प्रकृतिभावोनन्तरस्यैव टिलोपस्य तदाल्लोपस्य प्रकृतिभावेनानिवर्तितत्वात्पूर्वेणैव सिद्धे नियमार्थम्, अथाविशेषेणाल्लोपटिलोपयोर्द्वयोरपि प्रकृतिभावस्ततो विध्यर्थम्, तत्रापि नियमपक्षे यदि तावदेवं नियमः षपूर्वादीनामण्येवेति तत इह न स्यात् ताक्षण्यः,सामनादौ तु प्रसंगः । अथाप्येवं नियमः षपू

र्वादीनामेवाणीति भवेत्, इह न स्यात् सामनो वैमनः, ताद्यण्यइत्यत्र तु प्रसंगः, अथाप्युभयनियमः स्यात्, अपूर्वादीनामेवाणि, अपूर्वादीनामण्येवेति, एवमपि सामनो वैमनस्ताच्चण्य इति सिद्धं सामसु साधुः सामन्योच प्राप्नोति, तस्मादुभयोः प्रकृतिभाव इत्याश्रित्य विध्यर्थमिदमित्याह । 'तस्याकारस्य लोपो भवतीति' । 'ताद्यण्इति' । इदमर्थेण्, अपत्ये तु कारितलक्षणो यञो भवति । 'उभावपि न भवत इति' । टिलोपमात्रव्यावृत्तिर्निषेधेनापि सिध्यति, तत्प्रकृत्येतिवचनान्निवृत्तिरुभयोरपि ॥

"विभाषा ङिश्योः" ॥ जसःशी, औङ आपः, नपुंसकाच्चेति योयं शीशब्दस्तस्येह ग्रहणं न जस्शसोः शिरित्यस्य ह्रस्वान्तस्य, तत्र संज्ञाया अभावात् ॥

"न संयोगाद्वमन्तात्" ॥ स्याद्वकारमकाराभ्यां संयोगस्य विशेषणात् तदन्तविधिरत्रेति विस्पष्टार्थमन्तग्रहणम् ॥

"अचः" ॥ 'अच इत्ययमञ्चतिर्लुप्तनकारो गृह्यतइति' । प्रत्याहारग्रहणं तु न भवति, यदि स्यादजन्तस्याङ्गस्य लोपो भवतीत्यर्थः स्यात्ततश्चातो धातोरित्येतदनर्थकं स्यात्, यच्च अप्राग्वागुदक्प्रतीचो यदिति निर्द्दिशति, यच्च चावित्याह, ततो ज्ञायते अञ्चतेरेवात्र ग्रहणमिति, एतेन पचाद्यचोप्यग्रहणम् ॥

"आतो धातोः" ॥ 'एवमादि सिद्धं भवतीति' । सूत्राद्विश्चिरस्मदादिप्रयोगेपीति भावः । सूत्रे तु सोत्रो निर्द्देश इत्येव सिद्धम् ॥

"मन्त्रेष्वाङ्यादेरात्मनः" ॥ आङिति पूर्वाचार्यप्रक्रियया तृतीयैकवचनस्य ग्रहणम् । 'आङोन्यत्रापि दृश्यतइति' । तस्मादाङीति न वक्तव्यमित्यर्थः । आत इत्यनुवृत्तेरादेरित्यपि शक्यमकर्त्तुम् । 'त्मन्येति' । सप्तम्येकवचनस्य याशब्द आदेशः ॥

"तिविंशतेर्डिति" ॥ तिग्रहणं किम् । अन्त्यस्य माभूत्, सिद्धोन्त्यस्य लोप उत्तरसूत्रेण, सिद्धे सत्यारम्भो नियमार्थः स्यात्, डित्येव यथा

१ अन्तवागिति॰ पा॰ ६॰ पु॰ ।

["This man having his cheeks full of beetle leaves, speaks rapidly as he eats and drinks always."]

Here the words गल्ल &c. are *vulgar*.

[*Page* 341]. (10) "वस्त्रवैडूर्यचरणैः क्षतसत्त्वरजःपरा ।
निष्कम्पा रचिता नेत्रयुद्धं वेदय साम्प्रतम्" ॥

["This unshaking object (*i. e.* the earth) has its third besides Goodness and Passion (*i. e.* Darkness) removed by means of the feet of the gem of the sky (the Sun); so open your eyes."]

Here (*a*) the meaning is that "the Immoveable object (the Earth) has her darkness removed by the Sun, so open your eyes." This meaning has to be *guessed out*.

[*Page* 342]. (11) "धम्मिल्लस्य न कस्य प्रेक्ष्य निकामं कुरङ्गशावाक्ष्याः ।
रज्यत्यपूर्वबन्धव्युत्पत्तेर्मानसं शोभाम्" ॥

["Whose heart is not impassioned, on seeing the loveliness of the elegantly-braided locks of the fawn-eyed one?"]

Here the syntactical connection of धम्मिल्ल with शोभा &c. is *abstruse*.

(12) "न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः
सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः ।
धिग्धिक् शक्रजितम् प्रबोधितवता किं कुम्भकर्णेन वा
स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः" ॥

[*Hanumannātaka* Act IV.]

["In the first place it is a disgrace to me that I have enemies—and even that an ascetic slaughtering before my very eyes, the host of my demons; and still Rāvana lives! Woe, woe to

(*a*) The *Pradīpa*:—The word वस्त्र through its denotation, indicates the word अम्बर by which again is the 'sky' signified—thus आकाश is signified by वस्त्र through Indicative Indication, neither based on tradition, nor brought about for any special purpose; and hence it is faulty.

Meghanāda! What has come out of the awakened Kumbhakarṇa! And what is the good of my wielding these arms, fully, unnecessarily developed by plundering the hamlets of heaven!"]

[*Page* 343]. Here (*a*) the proper form should be अयमेव न्यक्कारः. And again, the 'development of the arm' is the subject by itself—and not as qualified by '*useless*,' which ought to have been mentioned separately by itself, as the predicate (and should not have been mixed up in a compound). Here the order of words is changed; hence the defect lies not in the words but in the sentence.

[*Page* 344]. Or again—

(13) "अपाङ्गसंसर्गि तरङ्गितं दृशोर्भुवोररालान्तविलासि वेल्लितम् ।
विसारि रोमाञ्चनकञ्चुकं तनोस्तनोति यो ऽसौ सुभगे तवागतः" ॥

["O beautiful one! Here is come who gives the corners of your eyes a wavelike motion, brings about an elegant curved motion to your eyebrows, and who gives to your body a bodice as it were of horripilation."]

[*Page* 345]. Here the words यः and असौ signify merely the subject (the predicate; a following सः—being left out.)

The word तत्—having the sense of *pre-mentioned, known,* or *experienced*—does not stand in need of the use of a यत्. To exemplify respectively :—

[*Page* 346]. "कातर्यं केवला नीतिः शौर्यं श्वापदचेष्टितम् ।
अतः सिद्धिं समेताभ्यामुभाभ्यामन्वियेष सः" ॥

तत्—the sense of pre-mentioned.

[*Raghuvansa* XVII.]

["Thinking pure policy to be timidity, pure bravery to be beastly, he always joined the two in his actions."]

(*a*) Here the usual order of the subject and predicate is inverted; since न्यक्कार is the predicate and not अयम्; since as a rule, the predicate must always follow the subject. (Vide the quotations in the *Commentary*).

(तत् in the sense of *known*)—

"द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः।
कला च सा चान्द्रमसी कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी" ॥

[*Kumārasambhava* V.]

["Two things have attained to deplorable conditions by giving themselves up to Çiva—that resplendent lustre of the moon and yourself the very moonlight of the world!"]

(तत् in the sense of experienced) (*a*)—

[*Page* 347]. "उत्कम्पिनी भयपरिस्खलितांशुकान्ता
ते लोचने प्रतिदिशं विधुरे क्षिपन्ती।
क्रूरेण दारुणतया सहसैव दग्धा
धूमान्धितेन दहनेन न वीक्षिताऽसि" ॥

[*Ratnāvalī* IV.]

["Trembling and having the ends of thy cloth furling, and casting thy *those* glances on all sides, thou wert burnt by the cruel fire enveloped in smoke; and wert not seen."]

The word यत् also, when used in the latter clause of a sentence, through its power, does not require a तत् in the previous clause. To exemplify—

[*Page* 348]. "साधु चन्द्रमसि पुष्करैः कृतं मीलितं यदभिरामताधिके।
उद्यता जयिनि कामिनीमुखे तेन साहसमनुष्ठितम्पुनः ॥

["The lotus on the rising of the lovelier moon, acted wisely, that it shut herself up; but this moon took too arrogant a step in rising even when the more glorious face of a woman had appeared."]

(*a*) Cf. *Uttaracharita*—

सैवौष्ठमुद्रा स च कर्णपाशः।
नेत्रेपुनर्यद्यपिरक्तनीले तथापि सौभाग्यगुणास्स एव ॥

When used in the previous clause, however, the word यत् does require a following तत्; as for example, in the Çloka just quoted, if the order of the two parts of the first half, were inverted. When both (यत् and तत्) are used, then, of course, they stand in need of nothing else. Sometimes even when not used, both are understood to exist through their power of application,—*e. g.*

[*Page* 349]. " ये नाम केचिदिह नः प्रथयन्त्यवज्ञां
जानन्ति ते किमपि तान् प्रति नैष यत्नः ।
उत्पत्स्यते ऽस्ति मम कोऽपि समानधर्मा
कालो ह्ययं निरवधिर्विपुला च पृथ्वी " ॥

[*Mālatīmādhava*, Act I.]

["Those who would deride me in this work, they know something;—and this is not an attempt for them. Some one equal to me will be born, or might be existing even at present,—since time is infinite and the universe immense."]

Here the sense is "this is an attempt for *those, who* will be born, &c."

Thus the above stanza अपाङ्गसंसर्गि, &c., having a यत् in the former part of the sentence, does stand in need of following तत्.

The असौ (in the stanza) cannot be said to stand for तत्; since in the following couplet असौ does not mean सः

"असौ मरुच्चुम्बित चारुकेसरः प्रसन्नताराधिपमण्डलाग्रणीः ।
वियुक्तरामातुरदृष्टिवीक्षितो वसन्तकालो हनुमानिवागतः " ॥

[*Hanumannātaka*, Act VI.]

["This Spring-time is arrived like Hanumān—having his locks kissed by Vāyu his father (having its flower filaments wafted by the air), the foremost in the army of Sugrīva, the husband of Tārā (having a lovely moon) and looked upon by Rāma (or Rāmā = woman) under pangs of separation."]

If you make असौ identical with सः; the use of this latter in the following, would be redundant—

"करवालकरालदोस्सहायो युधि यो ऽसौ विजयार्जुनैकमल्लः ।
यदि भूपतिना स तत्र कार्ये विनियुज्येत ततः कृतं कृतं स्यात्" ॥

["If *this* man with his arm armed with sword, *who* is the only equal of Arjuna, were employed by the king in his work, then would the work be perfectly done."]

[*Page* 352]. If it is urged that in the following as इदम् implies तत्, so would अदस् do the same—

"यो ऽविकल्पमिदमर्थमण्डलं पश्यतीश निखिलम्भवद्वपुः ।
आत्मपक्षपरिपूरिते जगत्यस्य नित्यसुखिनः कुतो भयम्" ॥

["Whence is there fear to him who sees only your form throughout the universe and who thus finds it full of his own followers (full of आत्मा nothing else)?"],—

We reply—If this were so, then in the above stanza अपाङ्ग-संसर्गि, &c., असौ would stand in a different clause altogether, as अस्य does here, and not always together with यत्.

तत् in proximity with यत्, signifies *celebrity*, *e. g.*—

"यत्तदूर्जितमत्युग्रं क्षात्रं तेजो ऽस्य भूपतेः ।
दीव्यताक्षैस्तदाऽनेन नूनं तदपि हारितम्" ॥

[*Vēṇīsaṁhāra*, Act I.]

["That fierce and glorious warlike spirit also of the king was lost by him in gambling."]

[*Page* 354]. *Objection:* In the following—

"कल्याणानां त्वमसि महसां भाजनं विश्वमूर्ते
धुर्यां लक्ष्मीमथ मयि भृशं धेहि देव प्रसीद ।
यद्यत् पापं प्रतिजहि जगन्नाथ नम्रस्य तन्मे
भद्रं भद्रं वितर भगवन् भूयसे मङ्गलाय" ॥

[*Mālatīmādhava*, Act I.]

["O thou of manifold forms! who art the receptacle of all that is good! be propitiated and ordain to me permanent prosperity! O thou the Lord of the Universe! Whatever evil there is in me, remove that! And for my good give all prosperity."],—

after using the reduplicated यद्यत् why does only a single तत् follow?

Reply:—The reduplicated यद्यत् implies collectively all existing evils in whichever form rampant; and to all these evils taken collectively, does the following तत् refer.

[*Page* 357]. Or again (to exemplify the clausal blemishes in a compound)—

" किं लोभेन विलङ्घितः स भरतो येनैतदेवं कृतम्
मात्रा, स्त्रीलघुतां गता किमथ वा मातैव मे मध्यमा ।
मिथ्यैतन्मम चिन्तितं द्वितयमप्यार्यानुजोऽसौ, गुरु-
र्माता तातकलत्रमित्यनुचितं मन्ये विधात्रा कृतम् " ॥

["Did Bharata fall a victim to avarice, that he got this done through his mother? Or has our middle mother, degraded herself to this feminine inferiority? Both these thoughts of mine are wrong,—for he (Bharata) is a noble gentleman's (Rāma's) younger brother, and she, (Kaikeyī) the revered one, my father's wife. Thus I think that this evil deed was brought about by Fate alone."]

Here आर्यस्य and तातस्य must have been put independently, and not subordinated by being mixod up in a compound. Similarly the other compounds may be exemplified.

[*Page* 358]. To exemplify "*contradictory signification.*"—

(14) " श्रितक्षमा रक्तभुवः शिवालिङ्गितमूर्तयः ।
विग्रहक्षपणेनाद्य शेरते ते गतासुखाः " ॥

["Those (victorious kings) merciful, and having the world attached to them, lie untroubled after having done with all their quarrels, and having their bodies embraced by prosperity."]

Here the meaning desired to be conveyed is that 'those merciful kings lie untroubled;' but the couplet suggests the meaning that they have been killed (these having their bodies fallen and senses and life disappeared, having fallen on the earth, lying in a pool of blood, and having their bodies embraced by jackals.')

[*Page* 359]. To exemplify, respectively, the blemishes possible in particles of words—

1. (The *Unmelodious*):—

"अलमतिचपलत्वात् स्वप्नमायोपमत्वात्
परिणतिविरसत्वात् सङ्गमेनाङ्गनायाः।
इति यदि शतकृत्वस्तत्त्वमालोचयाम-
स्तदपि न हरिणाक्षीं विस्मरत्यन्तरात्मा" ॥

["'Have done with this attachment to women, an attachment which is unsteady, and resembles a dreaming illusion, and quite unpleasant in its effects,' though this truth I do often ponder over, yet my inner soul forgets not the fawn-eyed one."]

Here the frequent repetition of त्वात् (is not pleasant to the ear.)

[*Page* 360]. Or again—

"तद्गच्छ सिद्ध्यै कुरु देवकार्यमर्थोऽयमर्थान्तरलभ्य एव।
अपेक्षते प्रत्ययमङ्गलब्ध्यै बीजाङ्कुरः प्रागुदयादिवाम्भः" ॥

[*Kumārasambhava*, Canto III.]

["Then go for your success and perform the work of the Gods; this is to be obtained only through another means. This work, to be fulfilled, stands in need of an agent in your person, as does sprout before shooting forth, need a supply of water."]

Here द्ध्यै and ब्ध्यै are unmelodious.

2. (To exemplify that of '*Suppressed Meaning*'):—

[*Page* 361].

"यश्चाप्सरोविभ्रममण्डनानां सम्पादयित्रीं शिखरैर्बिभर्ति।
बलाहकच्छेदविभक्तरागामकालसन्ध्यामिव धातुमत्ताम्" ॥

["Who bears on his peak a heap of mineral substances, which accomplish the *toillete* of the celestial females,—he bears it like the untimely red evening hues interspersed with pieces of clouds (which would here be the snowy peak)."]

Here मत्ता in the sense of '*intoxicated*' suppresses the meaning desired to be conveyed.

3. (To exemplify the *Meaningless*):—

"आदावञ्जनपुञ्जलिप्तवपुषां श्वासानिलोल्लासित-
प्रोत्सर्पद्विरहानलेन च ततः सन्तापितानां दृशाम् ।
सम्प्रत्येव निषेकमश्रुपयसा देवस्य चेतोभुवो
भल्लीनामिव पानकर्म कुरुते कामङ्कुरङ्गेक्षणा" ॥

["The fawn-eyed one is sprinkling her tears profusely, sharpening as it were, the arrows of Cupid,—the tears (rushing) from eyes in which at first has been rubbed the jetty dye, and which latterly have been heated, so to say, by the fire of (the pangs of separation) blazing high on account of (being blown by) the hot breath."]

[*Page* 362]. Here the plural in दृशाम् is meaningless: since only one 'fawn-eyed' woman is spoken of; nor can plurality be assigned to the eyes the ground of their manifoldness of action, as in अलसवलितैः &c., on—because these actions are not mentioned here. Nor does the word दृक् (eye) stand here for action. And lastly, the *Atmanēpada* affix in कुरुते is meaningless; since the action of the principal verb, (the subjugation of all men of sensibility) does not exist in the subject, the fawn-eyed woman.

4. (To exemplify the *Inexpressive*):—

[*Page* 363]. "चापाचार्यस्त्रिपुरविजयी कार्तिकेयो विजेयो
शस्त्रव्यस्तः सदनमुदधिर्भूरियं हन्तकारः ।
अस्त्यैवैतत्, किमु कृतवता रेणुकाकण्ठबाधां
बद्धस्पर्धस्तव परशुना लज्जते चन्द्रहासः" ॥

[*Bālarāmāyana*, Act II.]

खन्तेन स ऊर्द्धमाक्रमते स आदित्यमागच्छतीत्यादित्यात्पूर्वं वायुमधीयते । कौषीतकिनस्तु स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोकमित्यग्निलोकशब्दनिर्दिष्टादर्चिषः परं वायुलोकमधीयते, तच्च कौषीतकिनां पाठक्रमेणार्चिषः परत्वेन प्राप्तस्य वायोर्वाजसनेयितान्तेन स ऊर्ध्वमाक्रमते स आदित्यमागच्छतीत्यूर्द्धशब्दनिर्दिष्टश्रौतक्रमेण पाठक्रमाद्वलीयसा आदित्यात्पूर्वं प्रवेशो निश्चीयते, अत आदित्यात्पूर्वं संवत्सरादूर्द्धं देवलोकोवायुश्च प्राप्तौ तत्रेदं चिन्त्यते किं देवलोकोवायुश्चार्थान्तरभूतौ यथेष्टक्रमेण विद्वानभिगच्छेत्? उतानर्थान्तरत्वेन संवत्सरादूर्द्धं देवलोकं सन्तं वायुमभिगच्छेदिति? किं युक्तं, भिन्नार्थत्वं प्रसिद्धेः, भिन्नार्थत्वे चोर्ध्वशब्देन पञ्चम्या चोभयोः संवत्सरादित्यान्तराले श्रुतिक्रमेण प्राप्तत्वाद्विशेषाभावाच्च यथेष्टमिति प्राप्ते उच्यते वायुमब्दादिति, वायुं संवत्सरादूर्ध्वमभिगच्छेत् कुतः—

टी० मासेभ्यो देवलोकं देवलोकादादित्यमिति देवलोकस्यादित्यात् पूर्वत्वं पञ्चम्यभिहितं स ऊर्ध्वमाक्रमत इति वायोरादित्यात्पूर्वत्वं प्रातिपदिकाभिहितं विशेषाभावाच्चेति यथापूर्वं संवत्सरस्य मासानन्तरत्वे पञ्चमीमात्रादधिकोऽधिककालानां न्यूनकालोत्तरनिवेशो हेतुरुक्तः, तथाऽत्र श्रुतिप्रमाणादधिकं प्रमाणं नास्तीत्यर्थः । सिद्धान्तमाह "वायु"मिति, अविशेषविशेषाभ्यां—सामान्यविशेषाभ्यां, देवलोक—शब्दः सामान्यशब्दः वायु—शब्दो विशेषः । लोकपरत्वव्यावृत्त्यर्थमाह "वायुश्चासा"विति, उक्त-

भा० अविशेषविशेषाभ्यां वायोरेव निर्दिष्टत्वात्, देवलोकशब्दो ह्यविशेषेण सामान्येन देवानां लोक इत्यनेन रूपेण वायुमभिधत्ते स वायुमभिगच्छति तस्मै स तत्रेति वायुशब्दो विशेषेण वायुमभिधत्ते, अतो देवलोकवायुशब्दाभ्यामविशेषविशेषाभ्यां वायुरेवाभिधीयत इति, संवत्सरादूर्द्ध्वं वायुमेवाभिगच्छेत् कौषीतकिनां वायुलोकशब्दश्चाग्निलोकशब्दवत् वायुश्चासौ लोकश्चेति व्युत्पत्त्या वायुमेवाभिधत्ते, वायुश्च देवानामावासभूत इत्यन्यच्च श्रूयते "योऽयं पवत एष देवानां गृहा" इति, वाय्वधिकरणं समाप्तम् ॥

टी० स्यावयवार्थस्य प्रामाणिकत्वं दर्शयति "वायुश्च देवाना"मिति, ननु "संवत्सरः खलु वै देवानां पूरि"ति श्रुत्यनुरोधेन देवलोक–शब्दस्य संवत्सरविषयत्वं किं न स्यात्, नैवं संवत्सरस्य देवपरत्वोक्तेः स्तुतिमात्रत्वात् वायोर्देवगृहत्वस्य वास्तवत्वादवास्तवग्रहाणेन वास्तवस्वीकारस्य न्याय्यत्वाच्च ज्योतिर्मयक्षत्त्रवैमानिकदेवतागणस्य वायुपाशधृतत्वात् वायोर्देवगृहत्वं हि यथार्थः । परे चापरे चाहुः मासानन्तरमर्थक्रमात् संवत्सरस्तदनन्तरं देवलोकः तदनन्तरं वायुरिति वायुमब्दादिति सूत्रनिर्देशः छान्दोग्यश्रुत्यपेक्षः, तत्र संवत्सरस्य पठितत्वादिति तदयुक्तं देवलोकवायुशब्दयोः सामान्यविशेषरूपेणैकार्थत्वे संभवत्यर्थभेदकल्पनाऽनुपपत्तेः, देवलोकादूर्ध्वं वायोर्निवेशे सति देवलोकादादित्यमिति श्रौतक्रमभङ्गश्च देवलोकस्य सूत्रेणानिरूपितत्वं च स्यात्, वायोरब्दादूर्ध्वं निवेशपरत्वादस्य सूत्रान्तराभावाच्च संदिग्धेऽर्थे न्यायश्च वक्तव्य एव स ऊर्ध्वमाक्रमते स आदित्यमागच्छति देवलोकादादित्यमागच्छति देवलोकादादित्यमिति श्रौतक्रमसाम्यात्, भवति च संशयः वायुदेवलोकयोरेकत्वे च न संशयसम्भवः, अत एवाविशेषविशे-

याभ्यामिति सौत्रपदस्य वायोरग्न्यानन्तर्यं शाब्दक्रमविशेषाभावादादित्यात् पूर्वत्वे ऊर्द्ध्व-शब्देन विशेषावगमाच्चेति व्याख्यानमप्ययुक्तम्, अतो-यथाभाष्यमेव सूत्रार्थः । अन्यैस्तु वायुः किमग्नेरुपरि निवेशयितव्यः? उत संवत्सरस्योपरि? उतादित्यस्याधस्ता? दिति संशय उक्तः । तदचतुरम् अग्नेरानन्तर्य्यपक्षस्तावन्मन्दः, तस्य पाठक्रमप्रतिपन्नस्य श्रौतक्रमेण स्फुटबाधात्संशयशिरोऽन्तरद्वयन्तु वायुदेवलोकयोरैकत्वेऽनुत्थितं स्यात्, अतः पृथक्त्वैकत्वे संशयितव्ये एकत्वे नियमेन वायुप्राप्तिः पृथक्त्वे विकल्पेन प्राप्तिश्च फलम्, अतः सहेतुकः सफलः संशयो भाष्योक्त एव ज्यायान् ॥

वाय्वधिकरणं समाप्तम् ॥

वरुणाधिकरणम् ।

सू० तडितोऽधिवरुणः संबन्धात् ॥ ३ ॥

भू० कौषीतकिनां स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोकं स वरुणलोकं स आदित्यलोकं स इन्द्रलोकं स प्रजापतिलोकं स ब्रह्मलोकमित्यत्राग्निलोकशब्दस्यार्चिःपर्य्यायत्वेन प्राथम्यमविगीतं, वायोश्च संवत्सरादूर्द्ध्वं निवेश उक्तः, आदित्यस्याप्यत्र प्राप्तपाठक्रमबाधेन देवलोकादादित्यमादित्याच्चन्द्रमसमिति वाजसनेयकोक्तश्रुतिक्रमादेव लोकशब्दभिहितादायोरुपरि निवेशः सिद्धः, इदानीं वरुणेन्द्रादिषु चिन्ता प्राप्ता किमेते वरुणादयो यथापाठं वायोरूर्ध्वं निवेशयितव्याः? आहोस्विद्विद्युतोऽधीति, विशये, अर्चिःप्रभृतिषु सर्वेषर्च्चिषोऽर्हरिति श्रुतिक्रमोपरोधाद्विद्युतः परस्ताच्च तत्पुरुषो मानवः स एनान् ब्रह्म गमयतीति विद्युत्पुरुषस्य

ब्रह्मगमयितृत्वश्रवणाच्च सर्वथावकाशाभावेनाप्राप्तौ चोपदेशवैयर्थ्यादवश्यं कस्यचिद्बाध्यत्वे पाठक्रमानुरोधेन वायोरनन्तरं वरुणो निवेशयितव्यः वाय्वादित्ययोः क्रमस्य बाधितत्वेन

टी० सू० तडितोऽधिवरुणः सम्बन्धात् ॥ ३ ॥ किं वरुणादयो यथापाठंनिवेशयितव्याः ? किं विद्युतोऽधी ? ति किं वरुणस्य विद्युत्सम्बन्धानुरोध उपपत्तो नेति ? अनुपपत्तौ यथापाठनिवेशः, उपपत्तौ विद्युतोऽधिनिवेशः, कौषीतकीनामित्यादिना वक्ष्यमाणार्थवैशद्याय पूर्वोक्तार्थं द्रढयति, तत्रार्चिषः प्राथम्ये वायोः संवत्सरात् पूर्वत्वे[1] आदित्यस्य वायोरूर्ध्वत्वे च कौषीतकीवाक्याविगानं विगीतविषये तस्य दौर्बल्यं चाह निरूपितांशनिरूपणीयांशप्रदर्शनार्थेन कौषीतकिनाभित्यादिना, आदित्यस्यापाति, अत्र कौषीतकीवाक्ये उपदेशावैयर्थ्यायेति क्रमिबाधादपि क्रमबाधो न्याय्यः इति भावः । इन्द्रप्रजापती अपि ह्यत्रैव निवेशयितव्याविति, वरुणे वाय्वन्तरे सति इन्द्रप्रजापत्योरन्यत्र निवेशे क्रमद्वयभङ्गः स्यात्, तस्मादेकक्रममात्रभङ्गेन तयोरपि क्रमिणोः सावकाशत्वं युक्तमिति भावः । वरुणस्तावदित्यादि विद्युच्च वरुणाभिमानविषयं जलं च मेघोदरस्थं तत्र विद्युतः स्फुटतरदृश्यत्वात् सलिलस्य तथा दृश्यत्वाभावाच्च सलिलस्य विद्युत उपरि स्थितिर्गम्यते एवमभिमानविषययोः सम्बन्धानुरूपमभिमानिदेवतयोरपि ।

सू० इन्द्रप्रजापती अपि ह्यत्रैव निवेशयितव्याविति प्राप्ते उच्यते तडितोऽधिवरुण इति, वरुणस्तावद् विद्युत उपरिष्टान्निवेशयितव्यः कुतः सम्बन्धात्, मेघोदरवर्त्तित्वाद्विद्युतो हि वरुणेन सम्बन्धो लोकवेदयोः, प्रसिद्धः, एतदुक्तं

१ ऊर्ध्वत्वे पा० ।

भवति वरुणादीनामुपदेशावैयर्थ्याय क्वचिन्निविशतिव्यत्वे सति पाठक्रमादर्थक्रमोबलीयानिति विद्युतोऽधिवरुणो निवेशयितव्यः, ततश्चामानवस्य गमयतृत्वं व्यवधानसह-मित्यवगम्यते तस्य व्यवधानसहत्वादिन्द्रादेश्च उपदिष्ट-स्यावश्यं निवेशयितव्यस्य वरुणादुपरि उपदिष्टत्वादागन्तू-णामन्ते निवेशयितव्यत्वाच्च वरुणादुपरीन्द्रादिर्निवेशयि-तव्य इति, ॥ वरुणाधिकरणं समाप्तम् ॥

टी० संबन्धो न्याय्य इति तदिदमभिमानिन उर्ध्वं जलाभिमानी वरुण इति भावः । किं च द्युपर्जन्यपृथिवीक्रमेण पर्जन्यः स्वर्गादनन्तरस्यः तडित्ततोऽप्यधस्तडित्पुरुषस्योपरि वरुणो मेघोदरे तडित्सम्बन्धोऽस्तु तेन पाठक्रमं बाधित्वा कथं तडिदुपरि वरुणनिवेशः कथं नेन्द्रप्रजापत्योस्त-त्रावकाश इत्यत्राह "एतदुक्त"मिति, अर्थक्रमस्य पाठक्रमात् बलीयस्त्वेन वरुणस्य तडिदुपरि निवेशः कौषीतकीपाठक्रमानुरोधात् आगन्तूनामन्ते निवेशयितव्यत्वरूपान्मीमांसासिद्धन्यायाच्चेन्द्रप्रजापत्योर्वरुणोपरिनिवेशः। तडितोऽधिगमयितृत्वाव्यवधानाय वरुणस्तडितः पूर्वं निवेश्यः तथा सति मेघोदरसंबन्धरूपार्थक्रमोऽपि स्यादिति चेन्न तथा सतीन्द्रप्रजाप-त्योर्यथापाठं वरुणतडिन्मध्यनिवेशेऽर्थक्रमभङ्गात् तडिदानन्तर्य्ये वरुणेन्द्र-प्रजापतीनां पाठक्रमभङ्गप्रसङ्गः, तस्मात्पाठक्रमानुरोधेन अर्थक्रमानुविधाने सम्भवति न पाठक्रमभङ्गोयुक्तः । तडितोगमयितृत्वमव्यवहितमिति न श्रुतं तस्मात्तस्य गमयितृत्वं व्यवधानसहमित्ययमेव क्रम इत्यर्थः । अत्रा-स्मदाचार्य्याणां वरदमिश्राणाम् अयं श्लोकः "अर्चिरहस्सितपक्षानुदगय-नाब्दमरुदर्केन्दून् । अपि वैद्युतवरुणेन्द्रप्रजापतीनातिवाहिकानाहुरि"ति, । वरुणाधिकरणं समाप्तम् ।

आतिवाहिकाधि-करणम् ।

सू० आतिवाहिकास्तल्लि-ङ्गात् ॥ ४ ॥

भा० इदमिदानीं चिन्त्यते, किमर्च्चिरादयो मार्गचिन्हभूता? उत भोगभूमयः? अथवा विदुषां ब्रह्म प्रेप्सतामतिवोढार? इति, किं तावद् युक्तं मार्गचिन्हभूता इति, कुतः उपदेशस्य तथाविधत्वाल्लोके हि दृश्यते ग्रामान्प्रति गन्तॄणामेवंविधोदेशिकैरुपदेशः—इतो निष्क्रम्यामुकं वृक्षममुकीं नदीममुकं च पर्वतपार्श्वं गत्वा ऽमुकं ग्रामं गच्छेति । अथवा भोगभूमय एताः स्युः कालविशेषतया प्रसिद्धानामहरादीनां मार्गचिन्हत्वानुपपत्तेः, अन्यस्य च मार्गचिन्हभूतस्यैतेषामनभिधायित्वाद्, भोगभूमित्वं च एत एव लोका यदहोराचाण्यर्द्धमासा मासा ऋतवः संवत्सरा इत्यहरादीनां लोकत्ववचनादुपपद्यते, अत एव कौषीतकिनोऽग्निलोकमागच्छतीत्यादिना लोक-शब्दानुविधानेनार्चिरादीन् पठन्तीत्येवं प्राप्ते ब्रूमःआतिवाहिका इति, विदुषामतिवाहे परमपुरुषेण नियुक्ता आतिवाहिकाः देवताविशेषाः एतेऽर्चिरादयः, कुतः तल्लिङ्गात्—अतिवहनलिङ्गात्, अतिवहनं हि गन्तॄणां गमयितृत्वं तच्च तत्पुरुषोऽमानवः स एनान्ब्रह्म गमयतीत्युपसंहारे श्रूयमाणं पूर्वेषामप्यविशेषश्रुतानां स एव संबन्ध इति गमयति ।

टी० सू० आतिवाहिकास्तल्लिङ्गात् ॥ ४ ॥ अनन्तरसङ्गतिः स्फुटा किमर्चिरादयो मार्गसिद्धभूता भोगभूमयः? उतातिवोढार? इति, किं लौकिकोपदेशप्रक्रमानुरोधो न्याय्यः किमेते एव लोका यदहोराचाण्यर्द्धमासा ऋतवः संवत्सर इति वाक्यानुरोधो युक्तः? उत गमयितृत्वलिङ्गानुरोध

उचितः ? आद्ये मार्गचिन्हत्वं, द्वितीये भोगभूमित्वं, तृतीये त्वातिवाहिकत्वम् । अथवेत्यादि, भोगभूमित्वस्याप्यवाचकाः शब्दा इत्यत्राह "एत एव लोका" इति, लोकाअहरादिशब्दवाच्या इत्यस्य वाक्यस्यार्थ इति पूर्वपक्षिणो हृदयम् । अत्राहरादिकालविशेषाणां लोकशब्दवाच्यत्वमुक्तं स्यात् न भोगभूमीनामहरादिशब्दवाच्यत्वमित्यत्राह 'अत एव कौषीतकिन" इति, लोक-शब्दानुविधानमनुवृत्तिः तस्मै स तत्र विजिहीषते इत्यपि लोक त्वसाधकहेतुरर्थसिद्धः । राद्धान्तमाह "एव"मिति, तर्ह्यहरादिशब्दाः कथं देवतावाचिन इत्यत्राह-

भू० वदन्ति चार्चिरादयः शब्दाः अर्चिराद्यात्मभूतानभिमानिदेवताविशेषान्, तं पृथिव्यब्रवीदितिवत् । यद्येवं तत्पुरुषोऽमानवः स एनान् ब्रह्म गमयतीति वैद्युतस्यैव पुरुषस्य ब्रह्म प्रति गमयितृत्वश्रुतेः, विद्युतः परेषां वरुणादीनां कथमातिवाहिकत्वेनान्वय इत्यत आह-

सू० वैद्युतेनैव ततस्तच्छ्रुतेः ॥ ५ ॥

ततो विद्युत उपरि वैद्युतेनामानवेनैवाहिवाहिकेन विदुषामाब्रह्मप्राप्तेर्गमनम् । कुतः तच्छ्रुतेः स एनान् ब्रह्म गमयतीति तस्यैव गमयितृत्वश्रुतेः, वरुणादयस्तु अनुग्राहका इति तेषामप्यतिवाहिकत्वेनान्वयो विद्युत एव ॥ आतिवाहिकाधिकरणं समाप्तम् ॥

टी० "वदन्ति चे"ति, तं पृथिव्यब्रवीत् आपो वा अकामयन्त अग्निर्वाग् भूत्वा मुखं प्राविशत् आदित्यश्चक्षुर्भूत्वा अक्षिणी प्राविशदितिवदिति भावः । उत्तरसूत्रशङ्कामाह-"यद्येव"मिति, सू० वैद्युतेनैव ततस्तच्छ्रुतेः ॥ ५ ॥ ततः-शब्दस्य पश्चाद्भावपरत्वव्यावृत्त्यर्थं व्याचष्टे "ततो विद्युत" इति, तर्ह्यातिवाहिकेषु वरुणादीनामन्वयः कथमित्य-

त्राह "वरुणादयस्त्वि"ति, परेषां पक्षे नातीव विरोधः सगुणोपासकविषयमित्येतावत् तु पूर्वमेव प्रत्युक्तं तेषां परेषां च उपपादनप्रकारवैषम्यमेव न तूपपाद्यवैषम्यं, स एतान् ब्रह्म गमयतीति गमतितुरमानवत्वं दर्शयति इदं त्वविशेषणं मानवगमयितृत्वव्यवच्छेदकत्वात् पूर्वेषां मानवत्वेन गमयितृत्वे लिङ्गम्, अमानवत्वं नाम मनोदेशातिगत्वम् अचेतनानामग्न्यादीनां गमयितृत्वायोगात्, संपिण्डितकरणग्रामस्योत्क्रान्तस्यापि स्वातन्त्र्येण गमनायोगात् अर्चिराद्यभिमानिनो देवा आत्मानो गमयितारोऽभ्युपगन्तव्या इति, अमानवशब्दस्य यौगिकत्वेऽपि व्यवच्छेद्यस्य मानवत्वं गमयेत् न गमयितृत्वं, विशेषणं हि स्वप्रत्यनीकाकारयोगं व्यवच्छेद्यस्य दर्शयति न त्वाकारान्तरसाम्यं चन्द्रमसा संवादादिदर्शनात् अत्यन्तापटुकरणत्वमपि दुर्वचम् अतस्तदादरः । अन्ये तु वरुणस्य तडित्सम्बन्धोवर्षद्वारकः स तस्य वाय्वादित्याभ्यामपि तुल्यः वायुर्वै वृष्ट्या ईशे तस्माद्वायुप्रच्युतादिवो-वृष्टिरिति याभिरादित्यस्तपति रश्मिभिस्ताभिः पर्जन्योवर्षतीति च तयोर्वृष्टिहेतुत्वश्रवणात्ततश्च केवलार्थक्रमेण विघन उपरिवेशनादपि पाठक्रमसहकृतार्थक्रमवशादादित्यस्याधस्ताद्वरुणो निवेशनीय इति सिद्धान्तयन्ति तडितोऽधीति सूत्रं विद्युत उपरि वरुणनिवेशनपरं व्याख्यातं तत्र वाय्वादित्यतडिद्भिः संबन्धस्य समानतया ऽतिप्रसङ्गमपहारार्थं शङ्कान्तरमेवमुपन्यस्तं स एनान् ब्रह्म गमयति इति श्रवणाद्विदुषामन्येन नेतव्यत्वमप्रतीयते न तु स्वयं गन्तृत्वं तत्र प्रजापतिरिन्द्रश्च चेतनत्वात् स्वस्वलोकावधि नेतारौ विद्युतस्त्वचेतनत्वात् इन्द्रलोकावधिनेतृत्वानुपपत्तेर्नेतृविशेषाकाङ्क्षायां वरुणस्य विद्युत्सम्बन्धश्चास्तीत्याकाङ्क्षासहकृतात् संबन्धाद्विद्युत उपरि वरुणो निवेशनीय इत्युक्त्वा तर्ह्यर्चिरादीनामप्यचेतनत्वेन नेतृत्वानुपपत्तेस्तत्रापि नेतृभिरन्यैर्भवितव्यमिति शङ्कापरिहारार्थमर्चिरादीनां चेतनत्वेन नेत्रन्तरनैराकाङ्क्ष्यप्रतिपादकमातिवाहिका इत्यादिसूत्रं व्याख्यातम् । अस्मिन्सूत्रे मार्गपरत्वे भोगभूमित्वं चार्चिरादीनां पूर्वपक्षीकृत्य देवतात्वं समर्थितं तलवकारिणां गुहासि देवोऽसीत्यादिश्रुतौ तमग्निरभिप्रवहति तं वायुरभिप्रवहतीत्यादिना पृथिव्यग्निर्वा-

मू० धर्मो भाति प्रभैका बहलविरलताद्यत्र दृष्टानुसारात् सा दीपांशा विशीर्णा इति यदि बहुधा कल्पनागौरवादिः । रत्नादीनां स्थिराणां विशरणविहतेर्निष्प्रभत्वादि च स्यात् तेजस्तत्सप्रभाकं तिमिरहरतया सापि तेजोविशेषः ॥ ५६ ॥

प्रदीपादिधर्मभूता तद्वत्स्वयमप्यपेक्षा विष्वक्प्रसृता सूक्ष्मांशुक-न्यायेन सुघटितसङ्घातलक्षणा प्रभा सर्वेषां भाति तत्र मूलाग्रयोर्बह लत्वविरलत्वोष्णत्वानुष्णत्वाद्युपलम्भस्तत्तद्वस्त्वन्तरेष्विव नैक्यबा-धक इत्यभिप्रायेणाह । बहलेति । अन्यथा स्थूलमूलत्वादिना दीपादि-ष्वपि नैक्यं सिद्ध्येदिति भावः । अवयवविशरणवादमनूद्य प्रतिव-क्ति । सेति । विशरणक्रिया तत्स्वभावानां वेगवतां तेजोऽवयवा-नामनुपशान्तवेगानामेव संभूय किञ्चिदुद्गमनेन दीपाद्यवयव्यारम्भणं घनीभूतानामनन्तरक्षणे विशरणम् । ऊर्ध्वगमनशीलानां च तेषां तत्त-दंशतश्च तिर्यगूर्ध्वमधश्च प्रसरणं तादृशप्रसरणहेतुवैचित्र्यं बहल-विरलत्वादिसिद्ध्यै केषांचिद्वेगातिशयः इत्याद्यनुपलब्धविविधार्थ-कल्पनागौरवं प्रसज्यते । आदिशब्देन सर्वलोकोपलम्भशास्त्रविरोध-सङ्ग्रहः । बाधकान्तरमाह । रत्नादीनामिति । प्रत्यभिज्ञाविषयप्रधा-नोदाहरणतया प्रसिद्धेषु स्थिरतरेषु रत्नादिषु प्रतिक्षणविनाशोऽवयव विशरणं च न कल्पयितुं शक्यम् । अतस्तेषु त्वदुक्तप्रकारेण प्रभो-त्पत्तिकल्पनायोगान्निष्प्रभत्वप्रसङ्ग इत्यर्थः । परिशेषतः स्वाभिमत-माह । तेज इति । उक्तानुपपत्त्या । दीपादितेजः प्रभाविशिष्टमेवोत्प-द्यते इत्यर्थः । ननु प्रभा द्रव्यं न तत्त्वपङ्क्तौ गण्यते तद्बहिर्भावश्चा-

पसिद्धान्तः । अन्तर्भावश्च न वायुपर्यन्तेषु रूपवत्त्वात् । न तोयपृथिव्यो रसगन्धादिरहितत्वान्न तेजसि तद्धर्मतयाऽभ्युपगमादः, अतो विशीर्णतेजोऽतिरिक्ता प्रभा नास्तीत्यत्राह । तिमिरहरतयेति । तिमिरहरत्वं तेजस्त्वमात्रे हेतुः विशेषशब्दस्तु प्रतीतिसिद्धावान्तरवैषम्यव्यक्त्यर्थः । तिमिरहरत्वं चात्र भास्वररूपविशिष्टतया न तेजस्त्वमात्रेण अतो न साध्याविशेषशङ्का । एवं नीरसत्वे सति रूपवत्त्वादित्यपि हेतुः ॥ ५६ ॥ इति प्रभायाः प्रभावदवयवातिरेकतेजस्त्वे ॥

अत्र ग्रन्थान्तरसिद्धमतान्तरमाह । भाष्य इति ॥

मू० भाष्ये भास्वत्प्रभादौ प्रतिहतिबहलीभावपूर्वं यदुक्तं तेन स्रोतस्समाधिं परमतनयतः प्राहुरेके प्रभायाम् ॥ वस्तुन्यन्ते विकल्पैः स्फुटविघटनयोर्वक्तुराप्तस्य वाचोस्तात्पर्यं तर्कमानानुगुणमधिगुणैश्चिन्त्यमन्ते वसद्भिः ॥ ५७ ॥

करतलेनाहिमकररश्मीनां गतिप्रतिहतिः । तथैव तत्र बहलतया स्फुटोपलम्भश्चाभाष्यत । प्रतिबिम्बनिरूपणे च नयनरश्मीनां दर्पणे प्रतिहतिरुक्ता तदेतत्प्रभाप्रभावतां सहोत्पत्तिनाशपक्षे नोपपद्यते। दृश्यते च रत्नप्रभादेरपि प्रतिघातकसन्निधौ सङ्कोचस्तदपगमे विकासश्च । अतः पाञ्चभौतिकस्य रत्नादेः पार्थिवाद्यंशेन दृढावस्थितस्यापि तेजोंऽशेन गन्धादिन्यायवता विशरणप्रसरणादिकं युज्यते आतपवारणादिवृत्तान्तश्च वर्षवारणादिन्यायात्किरणगतितत्प्रतिघातावनुमापयति निवृत्ते चातपे क्षितिजलयोरौष्ण्योपलम्भात्तेजोंऽशविशरणसङ्क्रमणे गम्येते । प्रभातद्वतोराश्रयाश्रयित्वादि

भाषणं तु परसम्मत्यैव तन्मतनिदर्शनं प्रभा हि प्रदीपादिना सह जनिध्वंसिनीति केचित् । तथाऽपि सांख्या इन्द्रियवृत्तिनिदर्शनतया आहुः ।

दीपप्रभा यथा तस्मिन्विनश्यति विनश्यति ।
तथा बहिर्गताऽप्येषा मूलच्छेदाद्विनश्यति ॥ इति ॥

ननु विरुद्धभाषणादुभयं त्यक्त्वा सौगतगतिरिह संग्राह्येत्यत्राह । वस्तुनीति । न तावदिह सिद्धे वस्तुनि विकल्पः । न च वाक्ययोरैकार्थ्यं क्लिष्टगत्या कल्प्यं विरोधस्फोटत्वात् । आप्तवाक्ये च नोभयत्यागः सहजक्षणिकपुञ्जद्वयपक्षस्य क्षणभङ्गनिरासेनैव निरस्तत्वाच्च । अतोऽन्यतरवाक्यस्य अन्यपरत्वे प्राप्ते प्रमाणतर्कानुगुणं परमार्थतात्पर्यं प्रज्ञादिशालिभिश्छात्रैः प्रतिबोद्धव्यमिति ॥ ५७ ॥ इति प्रभाविषयग्रन्थद्वयगमनिका ॥

ननु दीपादीनां स्थिरतया गृहीतानामपि क्षिप्रविनाशित्वमभ्युपगतं तच्चा ऽवयवविशरणपक्ष एवोपपद्यते तथाऽऽहुः । अवयवविरणलिङ्गजबोधसहायेन चक्षुषा भेदं ज्वालेषु निर्णयाम इति ॥

पक्षान्तरेषु तु प्रत्यभिज्ञा दुर्बाधेत्यत्राह । प्राच्य इति ॥

मू० प्राच्ये स्नेहादिनाशे चरम इव दृढोऽनन्तरं दीपनाशः सामग्र्यन्यान्यकार्यं जनयति च न चानेकदीपप्रतीतिः । साम्यादेः स्यात्तु तद्धीः प्रवहणभिदुरास्तप्रभास्तत्प्रदीपा निर्बाधा भास्करादौ प्रथयति नियतं प्रत्यभिज्ञा स्थिरत्वम् ॥ ५८ ॥

दाह्यविनाशानन्तरं वह्नि*नाश इति चरमदीपादिषु दृष्टम् इदं च सर्वेषां प्रतिक्षणं च दीपदशादिप्रक्षयो दीपादिषु प्रत्यक्षः। प्रयोगश्च प्राच्यस्नेहदशादिनाशः स्वानन्तरभाविस्वजनकदीपनाशवान् दीपारम्भकस्नेहादिनाशत्वात् अन्त्यवत् इति। सावधानं प्रपश्यद्भिश्च प्रवाहवद्दीपो दृश्यते दशाग्रमारभ्य तन्मूलपर्यन्तं प्रतिक्षणमन्यो ऽन्यो दीपः प्रवर्तमानो निवर्तमानश्च दृष्टः। प्रयोगान्तरमभिप्रेत्याह। सामग्रीति। द्वितीयादिस्नेहादिसामग्री दीपजनिका अविकलदीपजनकजातीयसमुदायत्वात् आद्यवत्। अन्यथा प्रथमापि नोत्पादयेत् तथा च जितं चार्वाकैः। नन्वस्तु प्रतिक्षणदीपारम्भः प्रतिक्षणविनाशस्तु कुतस्त्य इत्यत्र पूर्वानुमानसिद्धे ऽपि युक्त्यन्तरबाधमाह। न चेति। यदि द्वितीयादिक्षणे पूर्वपूर्वदीपनाशो न स्यात् अनेकघटाद्युत्पत्तिनयाद्युगपदनेकदीपोपलब्धिः स्यात् न चैवमस्ति। निगमयति। साम्यादेरिति। प्रभया सहोत्पत्तिपक्षेऽप्येवं दीपादेराशुतरविनाशित्वं सिद्धं यत्र तु सामग्र्यनुवृत्त्यादिहेतुविरहः तत्र स्थिरत्वप्रसङ्गो न दोष इत्यभिप्रायेणाह। निर्बाधेति ॥ ५८ ॥ इति स्थिरास्थिरतेजोविभागः ॥

यत्तु हेमादेस्तैजसत्वमाहुः त्रपुसीसलोहरजतसुवर्णानां तैजसानामग्निसंयोगाद्द्रवत्वमद्भिस्सामान्यमिति तत्प्रागेव पाञ्चभौतिकत्वसाधनात्प्रत्युक्तम्।

विशेषतश्च परोक्तेर्भङ्गाय ब्रूमः। वर्णानामिति ॥

मू० वर्णानां तादृशत्वादतिकठिनतया गौरव-

* नात्र शाङ्कराणामिव वन्हिनाशः स्वयमेवेत्यभिप्रायस्तत्पक्षस्यातिबालबुद्धिविलसितत्वेन तथा दुर्भणत्वात्। किन्तु दाह्यनाशे वन्हेर्वन्हिनाशे च दाह्यनाश इत्ययमर्थः। एतत्तत्त्वं चास्माभिर्दीपिकाख्येहपूर्त्तौ व्यवस्थापितमित्यधिकं जिज्ञासमानैस्तत्र द्रष्टव्यम्।

स्यापि भूम्ना । धात्रीभागैः प्रभूतैस्स्फुट-
मिह घटिता धातवो हाटकाद्याः ॥ तादृ-
क्त्वेऽपि स्फुरत्वाद्यनितरसुलभं किंचिदन्वी-
क्ष्य तज्ज्ञैः व्याख्यातं तैजसत्वं विधितदि-
तरयोस्तन्त्रसौकर्यसिद्ध्यै ॥ ५९ ॥

हेमरूप्यादिवर्णाः पार्थिवत्वाभिमताभ्रकशुक्त्यादिसमा दृश्य-न्ते अन्यथा कथं तत्तद्भ्रमः काठिन्यं च तेष्वधिकं तच्च स्वतः पृथिव्या एव काठिन्यवान् यो बिभर्ति इत्यादिदर्शनात् गुरुत्वं च तेषु तेषु भूयिष्ठं तेजोमात्रे तु न तत्प्रसङ्गः । जले तु सदप्येतन्नैवं क्वचिदति-शयितं न चाऽऽप्यत्वं तेषामिच्छसि तदिह पञ्चीकृतारब्धव्यष्टिप्रपञ्चे हेमादिषु पार्थिवांशः प्रभूत इति निश्चीयते । कथमन्यथा निष्के तु सत्यवचनमित्यादि निरुह्येत तथात्वे तैजसत्वस्मरणं कथमित्यत्राह । तादृक्त्वेऽपीति । स्फुरत्तादि तैजससमानं वर्णविशेषं स्वतश्शुद्धत्वं चेत्य-र्थः । तज्ज्ञैः तथाभूतवेदिभिः व्याख्यातं विशेषतः प्रकथितम् । किमर्थ-मित्यत्र तैजससमाख्यानेषु विधिनिषेधसाधारण्यसौकर्यार्थमित्यत्राह । विधीति । ननु सर्पिर्जतुमधूच्छिष्टानां पार्थिवानामत्यन्तताऽपलुप्तद्रवत्वं दृष्टं न तथा हेमादौ ततस्तेषामपार्थिवत्वं मैवम् एवमपि तोयान्यत्व-स्य दुस्साधत्वात् द्रवत्वविशेषात्तैजसत्वसाधने च न कश्चिद् दृष्टा-न्तः । पाकजद्रवत्वेन पार्थिवत्वसाधने तु सर्पिराद्यस्ति अलुप्तद्रवत्वं च हेमादेस्तदुपष्टम्भकपार्थिवांशोऽप्यस्ति । अन्यथा तत्र तदानीं काठिन्यानुवृत्तिप्रसङ्गात् अतः पचविपच्चमात्रवृत्तित्वाद्विरुद्धता ॥

अवान्तरविशेषाच्च नातज्जातीयता भवेत् ।
अतिप्रसङ्गसाम्राज्यादशेषापह्नवेन वा ॥

न च हेमादिशब्दानां युक्तं दृष्टप्रमाणतः ।
अलोकव्यवहारार्हं कुत्रचिद्वृत्तिकल्पनम् ॥ ५९ ॥

इति हेमादितैजसत्वोक्तितात्पर्यम् ॥

तेजोऽनन्तरे तोये विप्रतिपन्नार्थाभावात्तदुल्लङ्घनेन तमसः पृथिव्यामन्तर्भावमाह । नैल्यादिति ॥

मू० नैल्याद्भौमं तमिस्रं चटुलबहलताद्यन्वया-त्तन्न नैल्यं छायावत्पारतन्त्र्यं त्वयस इव मणौ दृष्टिसिद्धात्स्वभावात् ॥ स्पर्शाख्याति-र्न रूपं हरति हरिशिलालोकवत्तत्र चा-क्ष्णोर्नालोकोऽर्थ्यस्ससिद्धाञ्जननयनदिवाभी-तदृष्ट्यादिनीतेः ॥ ६० ॥

तमः खलु चलं नीलं परा*परविभागवत् ।
प्रसिद्धद्रव्यवैधर्म्यान्नवभ्यो भेत्तुमर्हतीति ॥

य एवं वदन्ति तान्प्रत्युभयसम्मतेन नीलत्वेन पार्थिवत्वं साध्यते द्रव्यान्तरकल्पने गौरवात् । अवान्तरविशेषश्च न वैजात्य-हेतुरित्युक्तं प्रभातुल्यत्वपक्षे पित्तवद्दृक्प्रभापसर्पपक्षेऽपि नीलत्वाद्भौ-मत्वं सिद्धमेव ॥ ये त्वाहुः वियति विततानां सूक्ष्माणां पृथिव्य-वयवानां कृष्णो गुणस्तम इति तेषां निराधारनैल्योपलम्भो ऽशक्य-साधन इत्यभिप्रायेणाह । तन्न नैल्यमिति । हेत्वन्तरमाह चटुलेति । चटुलत्वबहलत्वविरलत्वादिकं हि द्रव्यधर्म एव न च तदुपलम्भो नास्ति नीलोपलम्भो वा । विश्वविरोधात् । न चालोकापसर्पणा-दिहेतुभेदैश्चटुलत्वमारोपितं प्रत्यक्षभ्रमेषु गुणमात्राधिष्ठानत्वादृष्टेः ।

* परावरविभागवदिति पा० ।

गन्धो वातीत्यादिष्वपि द्रव्याभिप्रायेण प्रयोगः । यदि स्वतन्त्रद्रव्यं तमः तदा तत्तद्गत्यागत्यनुविधानं कथमित्यत्राह । छायावदिति । यथाऽयस्कान्तस्थितिगत्यनुविधानं पृथग् द्रव्यस्याप्ययसो दृश्यते तथा ऽत्रापि स्यात् यथादृष्टि स्वभावव्यवस्थापनात् । ननु पार्थिवत्वरूपवत्वे स्पर्शवत्वव्याप्ते। न च ध्वान्ते स्पर्श उपलभ्यते अतस्ते उभे तस्य न स्त इत्यत्राह । स्पर्शाख्यानिरिति । तमःस्पर्शस्यायोग्यत्वादित्यभिप्रायेण नीलत्वसाम्याच्च हरिशिलालोकदृष्टान्तः, यन्नीलं तदालोकसहकृतचक्षुर्ग्राह्यं तमश्च न तथा ततश्चाक्षुषप्रत्ययाभावे नीलत्वाभिमान इत्यत्राह । तच्च चेति । आलोकोपलब्धावालोकान्तरं न सहकारि तथा ऽत्र स्यात् विषयस्य सतस्तत्र सहकारित्वमिति चेत्। अथापि वस्तुभेदे वैरूप्यं सिद्धम्। एवं ध्वान्ते ऽप्यालोकनैरपेक्ष्यं स्यात्। अलङ्घनीयनिदर्शनान्तरमाह। ससिद्धाञ्जनेति। अञ्जनविशेषसहकृतं हि चक्षुरन्धतमसेऽपि पदार्थान्दर्शयति तथेहापि स्यात् तत्र सहकार्यन्तरप्रभावादिति चेत् अत्राप्यालोकाभावस्य सहकारिणः प्रभावादित्यङ्गीकुरुष्व। यथा च किं चिद्बहलालोकग्राह्यं किंचिन्मन्दालोकेनापि तथा किंचिदालोकग्राह्यं किंचिन्न तथेति यथादर्शनं नियमः । दृक्स्वभावाच्च यथा दिवाभीतादिदृष्टेरालोकनैरपेक्ष्यं तथा दृश्यस्वभावादिहापीति किं नेष्यते । अस्त्वेवं तथाऽप्यालोकमध्ये किं नोपलभ्यत इति चेत् आलोकनाश्यत्वादिति केचित् उत्सारितत्वादित्यन्ये मध्यन्दिनोल्काप्रकाशादिवदभिभवादित्यपरे ।

अद्रव्यत्वादिपक्षाणामत्रासम्भवसिद्धये ।
आद्यमेव तमोध्वान्तमिति केचिदुपाचरन् ॥

किंच तेजस इव तमसोऽपि शरीरत्वाम्नानादालोकमध्ये तमस्सृष्टिवचनादेकस्मिन् काले तमस्तेजःप्रलयपाठाच्चास्य द्रव्यत्वप्रा-

कृतत्वसिद्धौ रूपवत्त्वेन वायुपर्यन्तव्यपोहः। कृष्णरूपवत्त्वाच्च वह्निजलव्यावृत्तिः सिध्येत् यत्कृष्णं तदन्नस्येति श्रुत्यनुसाराच्च। तदिदं तमः परब्रह्माच्छादकाविद्यानिदर्शनतया विषयावारकं कैश्चिदुक्तं तदसत्।

तमोव्यवहितालोकस्थितनानार्थदर्शनात्।
दृग्गतेरविरुद्धस्य दृश्यच्छादकता कथम्॥
अतो म*र्त्यादिदृष्टीनां दृश्यसम्बन्धमांसतः।
दर्शनप्रतिघातित्वं स्वभावात्तमसि स्थितम्॥ ६०॥

इति तमसः पार्थिवत्वम्॥

ये त्वाहुः आलोकाभाव एवालोकविरोधित्वलक्षणसमानधर्मस्मारितनैल्योपरक्तो नीलन्तम इति गृह्यते नञुपश्लेषरहितशब्दवाच्यत्वन्तु प्रलयवादिशब्दन्यायेन स्यादिति तान्प्रतिवक्ति नालोकेति।

मू० नालोकाभावमात्रं तिमिरमविरतं नीलमित्येव दृष्टेर्नैल्यं त्वारोपितं चेत्कथमिव न भवेत्क्वापि कस्यापि बाधः। आरोपे चात्र नैल्यं न भवति नियतं भास्वरान्यत्वसाम्यान्नात्रादृष्टं नियन्तृ प्रतिनियतगुणारोपकॢप्तेर्गुरुत्वात्॥ ६१॥

अबाधितं नीलोपलम्भं हेतुमाह। अविरतमिति। आरोपितं नीलरूपत्वं नाभावत्वविरोधीत्यभिप्रायेणाशङ्कते। नैल्यन्त्विति। आरोपस्य कालभेदेन पुरुषभेदेन वा बाधव्याप्तिमभिप्रेत्याह। कथमिवेति। अविरतमिति सूचितमेतेन व्यञ्जितम्। ननु तमो न नीलम् असत्यालोके चक्षुषा प्रतीयमानत्वादिति बाध इति चेन्न।

* मार्जारमूषकादेः प्रत्यक्षे तमो न प्रतिबन्धकमिति मर्त्यपदम्।

दृष्टान्तासिद्धेः आलोकाभाव एव दृष्टान्त इति चेन्न । त्वत्पक्षे पक्षदृष्टान्तभेदाभावात् अस्मन्मते तु भावातिरिक्ताभावासिद्धेः, आलोकाभावे दिवाभीतादिचक्षुर्ग्राह्यैर्नीलैर्व्यभिचाराच्च दृग्वैषम्यवद्दृश्यवैषम्यं च व्यवस्थापकं स्यादित्युक्तम् । अतोऽस्मदादिविशेषणेऽप्यनिस्तारः तमोधर्मभूतनैल्यादिदृष्टान्तस्तु तदभावसाधने विरुद्धः । आरोपितनैल्यादिदृष्टान्तस्तु शुक्तिरूप्यशशशृङ्गादिवदनादेयः अनारोपितं तु सत्येवालोके चक्षुषा गृह्यते तथाऽपि भ्रान्तिदशायां गृह्यमाणारोपाभावेऽपि चाक्षुषभ्रान्तिविषयत्वादेवायं हेतुस्सिद्ध इति चेन्न । तमसि नैल्यारोपसिद्धिमन्तरेणास्य हेतोरनुत्थानात्, भवति हि बाधाद्दृष्टान्तलाभः तेन च स इति मिथस्संश्रयः अस्पर्शत्वादिबाधकान्तरन्तु निरस्तम् । अथ नीलमित्येवेत्यवधारणतात्पर्यभेदसिद्धं दूषणान्तरमाह । आरोपे चेति । अयम्भावः आरोप एवात्र न सम्भवति अभावस्य हि स्वरूपमेव हि भेद इति मन्यसे अतस्तद्ग्रहे तदग्रहे वा कथमारोपः एवं च ब्रूषे । आलोको हि भास्वरः तद्विरोधी च तदभावः कृष्णद्रव्यमपि भास्वरान्यत्वात्तथैव अत आलोकविरोधित्वसाधर्म्यादकृष्णे कृष्णधर्माध्यास इति । एवं सति रक्तपीतादीनामपि तथात्वाविशेषात्तत्र तदारोपः किं न स्यादिति । अथ यदुक्तं काणादैः आरोपे सति निमित्तानुसरणं न तु निमित्तमस्तीत्यारोप इति तदयुक्तम् । आरोपे सतीत्यसिद्धेः निमित्तस्य चानन्तिप्रसङ्गिनोऽनुसरणायोगात् यथा च रज्जौ सर्पाध्यासः तथा कदाचिदम्बुधाराद्यध्यासोऽपि किं न भवति सत्यां च सामग्र्यां कार्यानुत्पत्तिरिति न लौकिकमेतन्न च यौक्तिकं यच्चोक्तमदृष्टादिकं चात्र नियामकमवसेयमिति तद्दूषयति । नात्रेति । विचित्रादृष्टभेदविषमिते जगति सर्वजन्तुसाधारणस्य दुरुपशमतावन्मात्रभ्रमहेतोरदृ-

ष्टविशेषस्य कल्पने ऽतिगौरवं स्यादित्यभिप्रायेणाह । प्रतिनियतेति ॥ ६१ ॥ आलोकाभावपक्षस्यागमवैगुण्यमाह । ध्वान्तमिति ॥

मू० ध्वान्तं तेजश्च नासीदिति मुनिभिरुपाख्यायिसंवर्तवार्ता भावाभावौ निषेद्धुं तदुभयविधिवद्व्याहतत्वादशक्यम् । अन्तर्यं तुच्छतेजःसहपठिततमोदेह इत्यामनन्ति स्याच्चाभावोऽपि भावान्तरमतिमथने वक्ष्यमाणक्रमेण ॥६२॥

अर्थोपादानमेतत् शब्दस्तु नासीत्तमोज्योतिरभून्न चान्यदिति कथमस्य प्रकृतविरोधित्वमित्यत्राह । भावाभावाविति । न हि कस्यचिदेकदैकत्र भावाभावविधिश्शक्यते तद्वदुभयनिषेधोऽप्यशक्यः अन्तत उभयनिषेधस्य उभयविधिविश्रमणेन व्याघातादिति भावः ॥ ६२ ॥ इति तमस आलोकाभावमात्रत्वभङ्गः ॥

भूप्रसङ्गात्तद्भ्रमणादिपक्षं निराकर्तुं स्वपक्षं तावदाह । तिष्ठतीति ॥

मू० तिष्ठत्युर्वीभचक्रं पवनरयवशाद् भ्राम्यतीत्युक्तमाप्तैर्भ्रान्तैः क्लृप्तं त्रिलोकीभ्रमणमिह तथा मेदिनी भ्रान्तिपातौ । तद्भ्रान्तौ प्राक्प्रतीचोः प्रसजति पतने पत्रिणोस्तारतम्यं पाते गुर्व्यास्तु तस्याः प्रलघु दिवि समुत्क्षिप्तमेनां न यायात् ॥ ६३ ॥

आप्तैः पुराणादिकर्तृभिस्तदनुसारिभिश्च । आप्तैश्च तेषां हिरण्मयेन सविता रथेनेत्यादिश्रुत्यनुसारात् अस्मिन् पक्षे सर्वलोको-

पलम्भस्वारस्यमस्ति । न च गणितादिविरोधः कक्षीकृतश्चायं पक्षः क्वार्तान्तिकैरपि । यथा ह्यार्यभटः ॥ उदयास्तमयनिमित्तं नित्यप्रवहेण वायुनाक्षिप्तः ॥ लङ्कासमपश्चिमगो भपञ्जरस्सग्रहो भ्रमतीति ॥

केश्चित् उत्ताना ह वै देवगवा वहन्ति इत्यादिनिर्वहणाय त्रैलोक्यभ्रमणं स्वीकृतं तदुपालभ्यते भ्रान्तैरिति ॥ यथा स्वयं भ्राम्यन्तो बालिशा भुवं भ्राम्यन्तीमभिमन्यन्ते तथेदमिति भावः । यदि स्थिरतयैव दृष्टानां ग्रहनक्षत्राणां भ्रमणं कल्प्यते तदविशेषाद्ध्रुवोऽपि कल्प्यतामिति चेन्न । अपेक्षितस्यान्यथैव सिद्धेः अत्र अनुलोमगतिर्नौस्थ इत्यादिषु स्थापितस्य भूभ्रमणवादस्य जैनोक्तस्य च भूपतनस्य भ्रान्तिकल्पितत्वमतिदिशति । तथेति । इषीकाप्रोतपक्षिकादिवत्स्वदेशं मुञ्चती द्रुततरमधरोत्तरवृत्त्या भूः भ्रमतीति हि तद्भ्रान्तिपक्षः अथोत्क्षिप्ताश्शरशिलादयः स्वदेशे तदासन्ने वा कथं निपतेयुः, नित्यं च स्वदेशपश्चिमभाग एव तेषां निपातस्स्यात् उड्डीनाश्च पक्षिणो न कुलायमासीदेयुः, प्रत्यङ्मुखं पततां च तेषां गन्तव्यानि स्वयमपि तूर्णं प्रति गच्छेयुः, प्राङ्मुखं गच्छतां तु दुःखेनापि न सन्निकृष्येरन् एकदिशःस्थिते च वर्षति वलाहके मुहूर्तान्महीशतयोजनमात्रं सिच्येत, अतिकुशलानामपि धन्विनां दक्षिणोत्तरदिग्देशावस्थितस्थिरलक्ष्यवेधो न स्यात् शरविहङ्गादीनामपि धरणीसममेव वायुना नोदनोक्तप्रसङ्ग इति चेन्न । तथाविधस्य प्रबलमारुतस्यानुपलम्भनिरस्तत्वात् सर्वेषां प्रत्यङ्मुखगतिप्रतिरोधप्रसङ्गाच्च । यो हि महापृथिवीं प्रभञ्जनः प्रसभमावर्तयति तं कथं लघीयांसो विहङ्गादयः प्रतिसरेयुः, किन्तु पृथिव्याः पूर्वमेव प्राङ्मुखं दूरमपनीयेरन् । किं च ज्योतिर्गणभ्रमणहेतुर्मारुतश्शास्त्रानुज्ञानात् प्रत्यक्षविरोधाभावाच्च सङ्गृह्यते भूभ्रमणहेतुस्त्वसौ शास्त्रोपलम्भविरोधान्न कल्प्यः । भुव एव वायुवद-

दृष्टवशात्तादृशभ्रमणोपपत्तेः । स्यादेवं किं नश्छिन्नमिति चेन्न । उपलम्भानुसारस्य च्छिन्नत्वात् । अत एव अनन्ततारागृहभ्रमणकल्पनादेः कभ्रमणकल्पनं वरमित्ययुक्तं ताराभ्रमणादेरागमिकस्याकल्प्यत्वाच्च तदेतत्सर्वमभिप्रेत्याह । तद्भ्रान्ताविति । भूपतने दोषमाह । पात इति ॥ अयं भावः पातोहि भुवो न तावदुपलम्भागमाभ्यां तयोरिह तद्विपरीतत्वात् । नाप्यनुमानतः गुरुत्वात्पतनस्य प्रतिबन्धके निरोधोपपत्तेः निरालम्बने नें निरवधौ नभसि नित्यं निपतन्तीमलब्धप्रतिष्ठां भुवं कः प्रनिरुन्ध्यादिति चेन्न वासुदेवस्य वीर्येण विधृतानीत्यादिना तत्सिद्धेः । भूपतने चोत्क्षिप्ताश्मशिलादयो न कदाचिद्भुवं प्राप्नुयुः गौरवप्रकर्षकाष्ठाभूताद्भूमण्डलादतिलघीयसां रजःप्रभृतीनामधिकपतनकल्पनं चोपहास्यं पोतवालुकादिन्यायस्त्विह दुर्वचः उपष्टम्भकादिविशेषस्यानभ्युपगमात् तत्कल्पने च तस्याप्यन्यत्कल्प्यम् इत्यनवस्थानात् वायुविशेषस्योपष्टम्भकत्वकल्पने तेनैव नित्यमपतनमिति किं न रोचते तदिह युक्तिमात्रशरणानां निराधारापि स्वभावादेव तिष्ठति भूमिः आगमानुविधायिनां तु सर्वाधारेण ब्रह्मणा सोपधानं निरुपधानं च विधृतेति, अतएव । पृथिव्याधारस्थिरतकर्परकृप्तिर्निरस्ता कर्परस्यापि निराधारस्य स्थित्यनुपपत्तेः चतुरुदधिसंक्षोभसहत्वस्य पृथिव्यामेव कल्पयितव्यत्वात् । ये च पतनोत्पतनस्वभावभूतचतुष्टयमयत्वान्न पतति नोत्पतति च भूपिण्ड इत्याहुः तेषामन्यूनानतिरिक्ततादृशावस्थानोचितपरिमाणैर्भूतैरारब्धः परिदृश्यमानमृच्छिलादिविलक्षणश्चागत्यान्य एव भूपिण्ड इत्यादिकल्पना केवलमूहमात्रसिद्धा अन्ये दक्षिणोत्तरध्रुवयोरयस्कान्तसमाधिं भूगोलस्यैव हि तादृशशक्तिकल्पनं युक्तं न तु दवीयसोरात्मस्थितिनिर्वाहापेक्षयोः ध्रुवयोः केचिद्भूगोलघनमध्यदेश एव

सर्वेषामधोधोदेशः तदभिमुखदत्तचरणा एव स्थलजलचरः सर्वो जन्तुवर्गः भूमिस्तु तदाश्रिता नानाकेसरपरिवृतकदम्बकुसुमग्रन्थिवत् मक्षिकावृतमधुगोलवच्च निभृति अमरा नराश्च परस्परमधःस्थिता मन्यन्ते । पतनं च सर्वेषां भूगोलमध्यदेशाभिमुखमेव पृथिव्यंशास्त्ववकाशालाभान्न तत्र तत्र प्रविशन्ति अतो महापृथिव्यां न कदाचित्पतनं तामपेक्ष्य कस्यचिदधोदेशस्याभावात् इति तदेतद्भुवोऽधस्तादुपरि च लोकानुपदिशद्भिश्शास्त्रैरुपरुध्येत । यस्तु—

पातालदेशः क्षितिगोलमध्ये सप्तोपदिष्टास्तलपूर्वकास्ते इति ।
यद्यपि मेरुर्योजनमात्रः प्रभाकरो हिमवता परिच्छिन्नः ।

नन्दनवनस्य मध्ये रत्नमयस्सर्वतोवृतः ॥ इत्यादि ।

तदिदं गणितविसंवादाभावेऽपि शास्त्रान्तरविरुद्धं न कल्प्यं न चोपदिष्टमिति श्रद्धातव्यम् ॥ ६३ ॥ इति भूभ्रमणादिवादभङ्गः ॥

भूपरिधिकल्पनादिषु वैदिकशास्त्रद्वयविरोधं परिहर्तुमाह । ज्योतिरिति ॥

मू० ज्योतिश्शास्त्रं पुराणाद्यपि न हि निगमग्राह्यमन्योन्यबाध्यं विद्यास्थानं तु सर्वं प्रतिनियतनिजोपक्रियांशे प्रमाणम् । तात्पर्यं तर्कणीयं तदिह बहुविदा भूपरिध्यादिभेदैर्दुर्ज्ञानं सर्वथा यन्मुनिभिरपि परैस्तत्र तूदासितव्यम् ॥ ६४ ॥

निगमग्राह्यमिति हेतुगर्भं, यद्युभयबाधोऽन्यतरबाधो वा न तत्र बाधितस्य वेदोपकारकत्वं स्यादिति भावः । कथं वा विरुद्धयोस्साकल्येन प्रामाण्यमित्यत्राह । विद्यास्थानमिति । येन येनो-

पकारेण दशविद्यास्थानानि वेदैरुपजीव्यन्ते तत्रांशे विरोधाभावात्प्रामाण्यं प्रतिष्ठितमित्यर्थः । अंशान्तरे कथमित्यत्राह । तात्पर्यमिति । न ह्यन्यपरवाक्यैरापातप्रतीतार्थस्थापनं यत्र च तात्पर्यं तत्र च न विरोध इति भावः । ननु ज्योतिरागमे पञ्च सिद्धान्ताः प्रवृत्ताः पुराणेष्वप्येवं मतभेदा दृढाः तत्रान्यतमप्रतिक्षेपे मुनयोऽपि यदि मुह्यन्ति किं कर्तव्यमित्यत्राह । दुर्ज्ञानमिति । परैः—ऋषिव्यतिरिक्तैरस्मदादिभिरित्यर्थः ॥ ६४ ॥ इति भूपरिमाणादिविरोधपरिहारः ॥

उद्दिष्टलक्षितेषु त्रिगुणानन्तरं कालः परीक्ष्यते तत्रापरस्मिन्परं युगपदयुगपच्चिरं क्षिप्रमिति काललिङ्गानि इति परोक्तेरानुमानिकः काल इति मन्वानः साङ्ख्यसौगतचार्वाकवञ्चितः कश्चित्कालं निन्हुते । सूर्येति ।

मू० सूर्यावृत्त्याद्युपाधिव्यतिकरवशतः कालतास्त्व-
म्बरादेरन्यस्मिन्नन्यधर्मापनयननियमः प्राग्व-
दत्रेति चेन्न । कल्पान्तेऽप्येककालः प्रकृतिपु-
रुषवद्ब्रह्मणोरूपमन्यन्निर्दिष्टोऽनाद्यनन्तोमु-
निभिरिति ततः कार्यता चास्य भग्ना ॥ ६५ ॥

आदिशब्देन विभुद्रव्यान्तरम् उपाधिविशेषाश्च सङ्गृह्यन्ते स्थविरयुवादिषु परत्वापरत्वनिर्वाहाय तत्कारणभूतबुद्धिविशेषविषयसूर्यपरिस्पन्दप्रकर्षनिकर्षादिघटकतया कालः कल्प्यते तत्र सम्प्रतिपन्नैराकाशादिभिरेव तत्तदुपाधिव्यतिकरितैः उपाधिभिरेव वा बुद्धिसन्निकर्षघटितैः तादृशोपाधिबुद्धिभिरेव वा अपेक्षितसिद्धौ किमिह तदतिरिक्तकल्पनया । यद्यतिप्रसङ्गभयाद् बुद्धिविशेषसम्बन्धानादरेण कालोऽन्यः कल्प्यते तथाऽप्यतिप्रसङ्गस्तदवस्थः यथादर्शनं व्यवस्था

च समानेति भावः । कालता परत्वादिनिर्वाहकतेत्यर्थः अत्र दिङ्निरूपणे दर्शितमतिप्रसङ्गं तद्वदेव परिहरति । अन्यस्मिन्निति । शास्त्रोक्तं न लाघवतर्कबाध्यमित्यभिप्रायेणाह । नेति । कथं शास्त्रे तदुक्तिरित्यत्राह । कल्पान्तेऽपीति । उक्तं हि वैष्णवे पुराणे विष्णोः स्वरूपात्परतोदिते द्वे इत्यारभ्य रूपान्तरं तद्द्विज कालसञ्ज्ञम् । इति कार्यभूताकाशाद्यन्तर्भावश्चानेन भग्न इति व्यनक्ति । तत इति । एतेन त्रिविधा प्रकृतिः कालः परमाकाशोऽव्यक्तमिति केषांचित्कल्पनापि निरस्ता । ननु जैननिराकरणे कालस्य त्वित्यादिना भाष्येण कालोनिराकृतइव भाति । मैवं सर्वप्रतिपत्तिषु तत्तत्पदार्थविशेषण-तया सर्वलोकानुभूतस्य न बौद्धादिभिर्नास्तित्वं वक्तुं शक्यं न त्वया पृथक् तदस्तित्वं साध्यं कालोऽस्तीत्यादिपृथग्व्यवहारस्तु पृथक्सिद्धविशेषणानां निष्कृष्य व्यवहारवदिति तन्निर्धारणे तात्पर्यात् अन्यथा शास्त्रैः स्वग्रन्थान्तरैस्सम्प्रदायैश्च विरोधस्स्यादिति ॥ ६५ ॥

इत्याकाशाद्यतिरिक्तकालसिद्धिः ॥

एवमपि कालस्य परमात्मव्यतिरिक्तत्वं न सिद्ध्यति रूपान्त-रमिति स्वरूपविवक्षोपपत्तेः तत्स्वरूपैक्ये प्रमाणसद्भावाच्चेत्यभिप्राये-णाह । काल इति ॥

मू० कालोऽस्मीति स्वगीता कथयति भगवान्का-
ल इत्याप्तवया हेतुः सर्वस्य नित्यो विभुरपि
च परः किम्परेणेति चेन्न । कालान्तर्यामि-
तादेः स खलु समुदितः सम्प्रतीते तु भेदे
साधर्म्यं नैक्यहेतुः स हि तदितरवद् घोषित-
स्त्वद्विभूतिः ॥ ६६ ॥

स्वशब्दोऽत्र परमात्मविषयः गीयते हि कालोऽस्मि लोक-

सयकृत्प्रवृद्धः इत्यादि। तद्वत् अनादिर्भगवान्काल इति पराशरेणोक्तमपि व्यापयति कथयतीति आप्रवर्यत्वमस्य देवतापारमार्थ्यं च इत्यादिभिस्सिद्धम्। नित्यविभुना परमात्मनैव त्रैकालिकसार्वत्रिकसर्वव्यवहारसिद्धिमभिप्रेत्याह। हेतुरिति। तदतिरिक्तकालकल्पनस्य निरर्थकत्वमाह। किं परेणेति। रूपान्तरमित्यत्र रूपगतिरयुक्तेत्यभिप्रायेण प्रतिवक्ति। नेति। कालेऽपि सामानाधिकरण्यं तत्तत्पदार्थान्तरेष्विव निर्वहतीत्याह। कालान्तर्यामितादेरिति। आदिशब्देन कालाभिमानिरूपसङ्ग्रहः। सन्ति हि जीवमनोऽहङ्काराभिमाननियतानुबन्धानि सङ्कर्षणादिरूपाणि तद्वदिहापि स्यात् कोऽभवानुयरूप इति प्रश्नसंघटनाच्च सर्वकार्यहेतुत्वनित्यत्वविभुत्वैस्तदैक्यसाधनं निरस्यति। सम्प्रतीते त्विति। वस्त्वन्तर इव भेदकण्ठोक्तिं व्यनक्ति। स हीति। ब्रह्मा दक्षादयः काल इत्यादिभिरिति शेषः। विष्णुमन्वादयः काल इति अत्र तु विष्णुशब्दोऽवतारपरः तस्य तद्विभूतित्वं च तादृशरूपेण ॥ ६६ ॥ इति कालस्येश्वरैक्यशङ्कानिरासः ॥

ये तु महदादिवत्कालतत्त्वमुत्पत्तिनाशवदिति तन्त्रान्तरानुसारिणो वदन्ति तान्प्रतिक्षिपति कालस्येति ॥

मू० कालस्योत्पत्तितः प्राक्परमपि च लयात् कालनास्तित्ववादी स्वोक्तिव्याघातभग्नो न वदति यदि तत्कोवदेत्कालसृष्टिम् ॥ आम्नस्तत्सृष्टिवादस्तदुपधिपरिणत्यादिभिस्सार्थकस्स्यान्नोचेत्तत्रापि पूर्वापरवचनहतिर्दुर्निवारप्रसङ्गा ॥ ६७ ॥

उत्पत्तेः पूर्वं नाशतः पश्चाच्च कालोनास्तीति वदन् किं तत्र पूर्वशब्दस्य पश्चाच्छब्दस्य निरर्थकत्वं मन्यते सार्थकत्वं वा

अग्निहोत्रादियावज्जीवकर्मणां स्वकालमात्रकर्तव्यत्वम् । अधि० ७ ।

अभ्यासो ऽकर्मशेषत्वात्पुरुषार्थो विधीयते ॥ २५ ॥

यावज्जीवमग्निहोत्रं जुहोति, यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेति वाक्येनाभ्यासो विधीयतइति द्वितीये स्थितम् । अयमभ्यासो ऽजस्रं कार्य उत सायंप्रातरिति संशये पूर्वपक्षमाह । अभ्यास इति । अयमभ्यासः अकर्मशेषत्वात् पुरुषार्थो विधीयते अतः सातत्येन होतव्यम् । अयं भावः । जीवने निमित्ते विधानान्निमित्तस्य सर्वदा सत्त्वादजस्रमनुष्ठानमिति ॥ २५ ॥

एतस्मिन्नसंभवन्नर्थात् ॥ २६ ॥

एतस्मिन्नजस्रानुष्ठाने । असंभवन् निद्राविहारादिलोपभियेति शेषः । अर्थात् निद्राहारादिरूपावश्यकानुष्ठानातिरिक्ते काले सर्वदा होतव्यमिति ॥ २६ ॥

न कालेभ्य उपदिश्यन्ते ॥ २७ ॥

सिद्धान्तमाह । कालेभ्यः विहितकालेभ्यो ऽन्यत्र न । यतः उपदिश्यन्ते कालाः, सायं प्रातरग्निहोत्रं जुहोतीति अमावास्यायाममावास्यया यजेतेत्यादिभिः ॥ २७ ॥

दर्शनात्काललिङ्गानां कालविधानम् ॥ २८ ॥

उक्तार्थे लिङ्गमप्याह । दर्शनादिति । काललिङ्गानां विहितकाल एवेत्यत्र लिङ्गानां दर्शनात् । अमावास्यां पौर्णमासीं वा ऽतिपादयतीति, तत्राननुष्ठाने प्रायश्चित्तश्रवणं लिङ्गम् । अतः काले विधानम् अनुष्ठानं नाजस्रम् । कालविधिना निमित्तसंकोचादिति भावः ॥ २८ ॥

अग्निहोत्रादीनां स्वकालावृत्त्या ऽऽवृत्तिः । अधि० ८ ।

तेषामौत्पत्तिकत्वादागमेन प्रवर्तेत ॥ २९ ॥

दर्शपूर्णमासादि सकृदनुष्ठेयमुत काले कालइति संशये सकृत्कृतश्चरितार्थे इति न्यायेन सकृदेवानुष्ठानमिति बहिः पूर्वपक्षे सिद्धान्तमाह । तेषामिति । तेषां विहितकालानामौत्पत्तिकत्वाद् उत्पत्तेरनुष्ठाने निमित्तत्वान्निमित्तस्यागमेन पुनः प्रवर्तेत ॥ २९ ॥

तथा हि लिङ्गदर्शनम् ॥ ३० ॥

तथा हि उक्तार्थे हि लिङ्गदर्शनम् । यो दर्शपूर्णमासयाजी सन्नमावास्यां वा पौर्णमासीं वा ऽतिपादयतीति प्रायश्चित्तश्रवणम् ॥ ३० ॥

दर्शादौ भेदादिनिमित्तावृत्त्या ऽऽवृत्तिः । अधि॰ ९ ।

तथा ऽन्तःक्रतुयुक्तानि ॥ ३१ ॥

यथा क्रतुनिमित्तावृत्तौ क्रत्वावृत्तिः तथा ऽन्तःक्रतुयुक्तानि क्रतुमध्ये यानि नैमित्तिकानि भिन्ने जुहोति छिन्ने जुहोतीत्यादीनि क्रत्वर्थानि तथा आवर्तन्ते ॥ ३१ ॥

गुर्वनुगमनादीनां प्रतिनिमित्तमावृत्तिः । अधि॰ १० ।

आचाराद्गृह्यमाणेषु तथा स्यात्पुरुषार्थत्वात् ॥ ३२ ॥

गुर्वनुगमनादिषु आचारप्राप्तेषु तथा आवृत्तिः स्यात् पुरुषार्थत्वात् । गुरुप्रीत्यर्थत्वात् ॥ ३२ ॥

ऋणत्रयापाकरणस्य ब्राह्मणक्षत्रियवैश्यानां नित्यत्वम् । अधि॰ ११ ।

ब्राह्मणस्य तु सोमविद्याप्रजमृणवाक्येन संयोगात् ॥ ३३ ॥

सोमवेदाध्ययनप्रजोत्पत्तयः नित्या उतानित्या इति संदेहे, अनित्याः नित्यत्वबोधकप्रमाणाभावादिति बहिः पूर्वपक्षे, सिद्धान्तमाह । ब्राह्मणस्येति । ब्राह्मणस्येति क्षत्रियवैश्ययोर्लक्षकम् । सोमविद्याप्रजं नित्यम् । ऋणवाक्येन ऋणशब्दघटितवाक्येन संयोगात् । त्रयाकरणैर्ऋणी भवतीति दोषश्रवणात् । जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवाञ्जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारिवासीति श्रुतिवाक्यम् ॥ ३३ ॥

इति श्रीमज्जैमिनिसूत्रवृत्त्यां षष्ठस्याध्यायस्य द्वितीयः पादः ॥ २ ॥

नित्ये यथाशक्त्यङ्गानुष्ठानम् । अधि॰ १ ।

सर्वशक्तौ प्रवृत्तिस्स्यात्तथाभूतोपदेशात् ॥ १ ॥

यावज्जीवमिति विहितनित्याग्निहोत्रे यावदङ्गानुष्ठानसमर्थ एवाधिकार्यथ वा यावच्छक्त्यङ्गानुष्ठानसमर्थो ऽप्यधिकारीति संशये पूर्वपक्षमाह । सर्वेति । सर्वशक्तौ प्रवृत्तिः स्यात् सर्वानुष्ठानसमर्थस्य प्रवृत्तिः

यागप्रवृत्तिः स्यात् । तथाभूतोपदेशात् । साङ्गानुष्ठानस्यैव विहितत्वात् ॥ १ ॥

अपि वा ऽप्येकदेशे स्यात्प्रधाने ह्यर्थनिर्वृत्तिर्गुणमात्रमितरत्र तदर्थत्वात् ॥ २ ॥

सिद्धान्तमाह । अपि वेति । एकदेशे अङ्गैकदेशानुष्ठाने ऽपि प्रयोगः स्यात् । प्रधाने प्रधानानुष्ठाने ऽपि अर्थस्य फलस्य प्रत्यवायाभावरूपस्य निर्वृत्तिः सिद्धिः । इतरत्र इतरफले स्वर्गादौ गुणमात्रं यावदङ्गानुष्ठानं यावदङ्गानुष्ठानस्य तदर्थत्वात् स्वर्गाद्यर्थत्वात् ॥ २ ॥

तदकर्मणि च दोषः तस्मात्ततो विशेषः स्यात्प्रधानेनाभिसंबन्धात् ॥ ३ ॥

ननु दर्शपूर्णमासेभ्यः प्रधानेभ्यः पृथक्कृत्वा नित्ये प्रयोगे अङ्गानामप्रयोजकत्वे प्रधानमप्यप्रयोजकं किं न स्यात्तत्राह । तदेति । तदकर्मणि तस्य प्रधानस्याननुष्ठाने दोषः श्रूयते । पथो वा एषो ऽध्यपथेनैतीति । तस्मात्ततः अङ्गाद् विशेषः प्रधानेनाभिसबन्धात् प्रधानमात्रानुष्ठानस्यावश्यकत्वात् ॥ ३ ॥

कर्माभेदं तु जैमिनिः प्रयोगवचनैकत्वात्सर्वेषामुपदेशः स्यात् ॥ ४ ॥

अमावास्यायाममावास्यया पौर्णमास्यां पौर्णमास्या यजेतेति साङ्गप्रधानानुष्ठानश्रवणं नित्ये यथाशक्ति काम्ये नेति वैरूप्यसूचकं नेति जैमिनिमतमाह । कर्मेति । कर्मणोः प्रयोगयोः अभेदमेकरूपतां जैमिनिराह । प्रयोगवचनस्य दर्शितस्यैकरूपत्वात् । प्रयोगद्वये ऽपि सर्वेषां यावदङ्गानाम् उपदेशः अनुष्ठानं स्यात् ॥ ४ ॥

अर्थस्य व्यपवर्गित्वादेकस्यापि प्रयोगे स्याद्यथा क्रत्वन्तरेषु ॥ ५ ॥

सिद्धान्तरहस्यमाह । अर्थस्येति । एकस्य प्रयोगे ऽपि किंचिदङ्गकनित्यप्रयोगे ऽपि फलं प्रत्यवायाभावः स्यात् । कुतः, अर्थस्य प्रधानस्याङ्गेभ्यः पृथक्कृतत्वात् । अमावास्यया यजेत पौर्णमास्या यजेतेत्यत्रा-

मावास्यापौर्णमासीशब्दौ न साङ्गप्रधानपरौ किं तु केवलप्रधानषड्याग-पराविति विद्वदधिकरणे प्रपञ्चितत्वान्न पूर्वसूत्राक्षेपावकाश इति भावः। इत्थं च नित्यकाम्यप्रयोगयोः परस्परमनपेक्षत्वान्नित्यं विगुणमपि कर्तव्यम्। अत्र दृष्टान्तमाह। यथा क्रत्वन्तरेषु यथा दर्शपूर्णमासाग्निहोत्रयोः परस्परनिरपेक्षत्वं तथा नित्यकाम्ययोरित्यर्थः ॥ ५ ॥

विध्यपराधे च दर्शनात्समाप्तेः ॥ ६ ॥

साधकान्तरमाह। विध्यपराधइति। विध्यपराधे ऽपि अङ्गानुष्ठानासंभवे ऽपि समाप्तेः दर्शनात्समापनस्य श्रुतत्वात्। तदेव यादृक्कीदृक् च होतव्यमित्यच्छिद्रकाण्डे दर्शनात्। यादृक्कीदृग् यथाकथं चिदङ्गहीनमपि प्रधानमनुष्ठेयमिति वाक्यार्थः ॥ ६ ॥

प्रायश्चित्तविधानाच्च ॥ ७ ॥

नित्ये किंचिदङ्गलोपे अभ्यनुज्ञासूचकमन्यदप्याह। प्रायश्चित्तेति। यस्याग्निमनुद्धृतं सूर्यो ऽभ्युदेति चतुर्गृहीतमाज्यं पुरस्ताद्धरेदित्यादिभिः प्रायश्चित्तश्रवणात्। अङ्गलोपे ऽपि अनुष्ठेयमिति ज्ञापयतीति भावः ॥ ७ ॥

अङ्गवैकल्ये काम्यस्य निष्फलत्वम्। अधि० २।

काम्येषु चैवमर्थित्वात् ॥ ८ ॥

यथा नित्यं विगुणमनुष्ठेयं तथा काम्यमिति पूर्वसिद्धान्तमाक्षिपन् पूर्वपक्षसूत्रमाह। काम्येष्विति। एवं विगुणस्याप्यनुष्ठानम्। अर्थित्वात् प्रधानजन्यफलेच्छायाः सत्त्वात् ॥ ८ ॥

असंयोगात्तु नैवं स्याद्विधेः शब्दप्रमाणत्वात् ॥ ९ ॥

एवं न, विधेः असंयोगात्। केवलप्रधानस्यापूर्वजनकत्वे तात्पर्याभावात्। अपूर्वजनकत्वस्य शब्दप्रमाणत्वाच्च शब्दैकगम्यत्वात्। केवलयागभावना न विधीयते किं त्वितिकर्तव्यतासहिता ऽपूर्वजनिकेति विधीयतइति भावः ॥ ९ ॥

अकर्मणि चाप्रत्यवायात् ॥ १० ॥

ननु नित्ये ऽपि तुल्यमत आह । अकर्मणीति । अकर्मणि नित्यानुष्ठाने यथा प्रत्यवायः तथा काम्ये अश्रवणाच्च काम्यनित्ययोः साम्यमिति भावः ॥ १० ॥

द्रव्यभेदे ऽपि कर्माभेदः । अधि० ३ ।

क्रियाणामाश्रितत्वाद् द्रव्यान्तरे विभागः स्यात् ॥ ११ ॥

इतः परमापादसमाप्ति यथाशक्तिप्रयोगचिन्ता । तत्र मुख्याभावे नीवारादिना क्रियमाणो यागो भिन्नः स एव वेति विचारे पूर्वपक्षमाह । क्रियाणामिति । क्रियाणां यावत्क्रियाणामाश्रितत्वाद् द्रव्याश्रितत्वाद् द्रव्यभेदे व्रीहिनीवारादिभेदे विभागः कर्मभेदः स्यात् ॥ ११ ॥

अपि वा ऽव्यतिरेकाद्रूपशब्दाविभागाच्च गोत्ववदैककर्म्यं स्यान्नामधेयं च सत्त्ववत् ॥ १२ ॥

सिद्धान्तमाह । अपि वेति । ऐककर्म्यं स्यात् । द्रव्यभेदे ऽपि दर्शपूर्णमासादिपदवाच्यत्वेनैकं स्यात् । अव्यतिरेकाद् व्यतिरेकसाधकाभावात् । तत्र हेतुमन्यमप्याह । रूपशब्दाविभागात् । तद्वाचकपदस्य दर्शपूर्णमासरूपस्य अभेदाद् वाच्यस्य दर्शत्वपूर्णमासत्वरूपधर्मस्य च ऐक्यात् । यथा गोपदैक्ये तद्वाच्यगोत्वैक्ये गोत्वावच्छिन्ना व्यक्तिरपूर्वा न, तथा । दृष्टान्तान्तरमाह । सत्त्ववत् । द्रव्यगुणकर्मणां भेदे ऽपि सत्त्वेन न भेदः सदितिनामधेयं च न पृथक् तथा ॥ १२ ॥

नित्यकर्मणो ऽनित्यप्रारब्धकर्मणश्च द्रव्यापचारे प्रतिनिधिना समापनम् । अधि० ४ ।

श्रुतिप्रमाणत्वाच्छिष्टाभावे ऽनागमो ऽन्यस्याशिष्टत्वात् ॥ १३ ॥

व्रीह्यभावे नीवारा ग्राह्या न वेति संशये पूर्वपक्षमाह । श्रुतीति । श्रुतिप्रमाणत्वात् । व्रीहिभिर्यजेतेति तृतीयाश्रुत्या ऽङ्गत्वप्रतिपादनात् । शिष्टाभावे विहितव्रीह्यभावे अन्यस्य नीवारादेः अनागमः अप्राप्तिः अशिष्टत्वात् । अनङ्गत्वात् ॥ १३ ॥

क्वचिद्विधानाच्च ॥ १४ ॥

क्व चिदिति । क्व चिज् ज्योतिष्टोमे सोमाभावे पूतीकानभिषुणोतीति प्रतिनिधिविधानात् । अत्र तथा नीवारप्रापकवचनाभावादिति भावः ॥ १४ ॥

आगमो वा चोदनार्थाविशेषात् ॥ १५ ॥

सिद्धान्तमाह । आगम इति । आगमः नीवारप्राप्तिः चोदनार्थाविशेषात् । चोदनार्थस्य यागस्याभिन्नत्वस्य पूर्वमेव व्यवस्थापितत्वात् । नीवारैरपि यागनिष्पत्तिसंभवादिति भावः ॥ १५ ॥

नियमार्थः क्व चिद्विधिः ॥ १६ ॥

ननु कथं पूतीकविधानं नीवारादिवत्स्वतः प्राप्तत्वादत आह । नियमार्थेति । विधिः पूतीकविधिः नियमार्थः प्रतिनिधित्वेनान्यस्यापि प्राप्तौ पूतीका एव ग्राह्या इति ॥ १६ ॥

तन्नित्यं तच्चिकीर्षा हि ॥ १७ ॥

ननु नियमार्थमिति कथमवगतमत आह । तदिति । हि यस्मात्कारणात् तच्चिकीर्षा यागचिकीर्षा नित्या । अकरणे प्रत्यवायश्रवणान्नित्या । अतः तत् पूतिकाप्रापणं नित्यम् अवश्यं शास्त्रं विना पक्षे प्राप्तं, मुख्यालाभेऽपि यागस्यावश्यकत्वादिति भावः ॥ १७ ॥

देवतामन्त्रक्रियाणामपचारे प्रतिनिध्यभावः । अधि० ५ ।

न देवताग्निशब्दक्रियमन्यार्थसंयोगात् ॥ १८ ॥

देवतादिप्रतिनिधिरस्ति न वेति संशये पूर्ववदस्तीति पूर्वपक्षे सिद्धान्तमाह । न देवतेति । देवता इन्द्रादिः, अग्निराहवनीयादिः शब्दो मन्त्रकलापः, क्रिया प्रयाजादिः, न प्रतिनिधिमर्हति । अन्यार्थेन अत्रार्थशब्दो न्यायपरः । तथा च प्रतिनिधिसाधको यो न्यायः तस्मादन्येन न्यायेन युक्तत्वाद्देवतादेः । अयं भावः । द्रव्यस्य पुरोडाशकार्यसाधकत्ववन्नीवारस्यापि तत्साधकत्वं प्रत्यक्षगम्यम् । देवतादेरदृष्टसाधकत्वं, विहितदेवताप्रयोज्यं यददृष्टं तदन्येन भवतीति शास्त्रमन्तरा ज्ञातुमशक्यमिति ॥ १८ ॥

देवतायां च तदर्थत्वात् ॥ १९ ॥

इतो ऽपि देवतायाः प्रतिनिधिर्नेत्याह । देवतायामिति । देवतायामग्न्यादिदेवतायां तदर्थत्वाद्धविरुद्देश्यत्वात् । दर्शहविषः उद्देश्यो ऽग्न्यादिः सूर्यादियोजने दर्शयागो न भवतीति भावः ॥ १९ ॥

प्रतिषिद्धद्रव्यस्य प्रतिनिधित्वाभावः । अधि० ६ ।

प्रतिषिद्धं चाविशेषेण हि तच्छ्रुतिः ॥ २० ॥

निषिद्धं माषादिकमपि न प्रतिनिधित्वेन ग्राह्यमित्याह सिद्धान्तसूत्रम् । प्रतिषिद्धमिति । माषादि प्रतिषिद्धं न, यतः तच्छ्रुतिः निषेधश्रुतिः अविशेषेण सामान्यरूपेण । अयज्ञिया वै माषा इति यज्ञत्वावच्छिन्ने निषेधादिति भावः ॥ २० ॥

स्वामिनः प्रतिनिध्यभावः । अधि० ७ ।

तथा स्वामिनः फलसमवायात्फलस्य कर्मयोगित्वात् ॥ २१ ॥

स्वामिनो ऽपि प्रतिनिधिर्नास्तीत्याह । तथेति । स्वामिनस्तथा न प्रतिनिधिः फलस्य कर्मयोगित्वात् । प्रयोक्तृगामित्वात् । फलसमवायात् प्रतिनिधौ फलोत्पत्त्यापत्तेः ॥ २१ ॥

सत्रे कस्य चित् स्वामिनो ऽपचारे प्रतिनिध्यादानम् । अधि० ८ ।

बहूनां च प्रवृत्तावन्यमागमयेदवैगुण्यात् ॥ २२ ॥

सत्रे बहूनां यजमानानां मध्ये एकमरणे अन्यो योज्य इति सिद्धान्तमाह । बहूनामिति । अवैगुण्यात्सप्तदशत्वसंख्यालोपभिया । शेषं स्पष्टम् ॥ २२ ॥

सत्रे प्रतिनिहितस्यास्वामित्वम् । अधि० ९ ।

स स्वामी स्यात्संयोगात् ॥ २३ ॥

मृतप्रतिनिधिः स्वामी न वेति चिन्तायां पूर्वपक्षसूत्रम् । स इति । सः प्रतिनिधिः स्वामी । तत्संयोगात् स्वामिस्थानसंबन्धात् ॥ २३ ॥

कर्मकरो वा क्रीतत्वात् ॥ २४ ॥

सिद्धान्तमाह । कर्मेति । कर्मकरः अध्वर्य्वादिवत्केवलकर्ता परिक्रीतत्वाद् द्रव्यदानेन ॥ २४ ॥

तस्मिंश्च फलदर्शनात् ॥ २५ ॥

फलं कस्येत्याकाङ्क्षायामाह । तस्मिंश्चेति । तस्मिन्मृते फलश्रवणात् । यः सत्राय दीक्षितानां प्रमीयेतापि तस्य फलमिति श्रुतिः ॥ २५ ॥

सत्रे प्रतिनिहितस्य यजमानधर्मग्राहित्वम् । अधि० १० ।

स तद्धर्मा स्यात्तत्कर्मसंयोगात् ॥ २६ ॥

यजमानप्रतिनिधौ यजमानकार्यमस्तीति सिद्धान्तमाह । स तद्धर्मेति । प्रतिनिधिः तद्धर्मा यजमानधर्मवान् । तस्य विहितकार्यकारी स्यात्तत्कर्मसंबन्धात् तत्कर्मार्थं नियुक्तत्वात् ॥ २६ ॥

श्रुतद्रव्यापचारे तत्सदृशस्यैव प्रतिनिधित्वम् । अधि० ११ ।

सामान्यं तच्चिकीर्षा हि ॥ २७ ॥

व्रीहीणामभावे सदृशमेव प्रतिनिधेयमुत यत्किं चिदिति संदेहे सिद्धान्तमाह । सामान्यमिति । सामान्यं व्रीहिसदृशं ग्राह्यम् । हि यस्माद् यागे प्रवृत्तस्य तच्चिकीर्षा यद्विषयिणी इच्छा तदलाभे तत्सदृशमेवेच्छतीति भावः ॥ २७ ॥

परिगृहीतद्रव्यापचारे तत्सदृशस्यैवोपादानं न तु वैकल्पिकद्रव्यान्तरस्य । अधि० १२ ।

निर्देशात्तु विकल्पे यत्प्रवृत्तम् ॥ २८ ॥

अग्नीषोमीयपशौ यूपः खादिरः पालाशश्चेति विकल्पेन विहितः, एवं सति यस्मिन्प्रयोगे खादिरो गृहीतः प्रथमं, स नष्टः, अन्यः खादिरो न लभ्यते, तत्र खादिरसदृशो ग्राह्य उत पालाश इति संशये सिद्धान्तमाह । निर्देशादिति । विकल्पे विषये यत्प्रवृत्तं यद्द्रव्यमङ्गीकृतं तत्सदृशं ग्राह्यमिति पूरणीयम् । निर्देशात् । प्रथमप्रवृत्तद्रव्यस्यैव अङ्गत्वेन निर्देशात् । यदा पालाशस्वीकारः तदा खदिरशास्त्रे अप्रामाण्यग्रहादिति भावः ॥ २८ ॥

अशब्दमिति चेत् ॥ २९ ॥

॥ विश्वनाथो विजयते ॥

॥ श्रीगणेशाय नमः ॥

॥ अथ माधवीया नामधातुवृत्तिः ॥

यस्या रूपप्रभावेन न ख्यातुमपि किं च न ।
शक्यते वस्तु लोकेषु जयत्येषा सरस्वती ॥ १ ॥
धातुपाठे निविष्टानां धातूनां यः पुरा व्यधात् ।
विवृत्तिं माधवीयाख्यां भाष्यज्ञहृदयङ्गमाम् ॥ २ ॥
तेन सायणपुत्रेण व्याख्या कापि विरच्यते ।
धातूनां प्रत्ययान्तानां गणसूत्रजुषामपि ॥ ३ ॥
तत्र प्रतिपदं शिष्टा गणसूत्रगता इमे ।
गणास्तत्रापि बहवः किं च सूत्राण्यधीयते ॥
आचार्येण पुरा प्रोक्तास्तानादौ विवृणोम्यहम् ॥ ४ ॥
एतावदेव सर्वस्मादर्थये सुमनोजनात् ।
[1]नामंस्त भवता सार्थमन्यथा तु न मे क्षतिः ॥ ५ ॥

'कण्ड्वादिभ्यो यक्' । एभ्यो यक् स्वार्थे । एते च धातवः प्रातिपदिकानि च । तत्र धातुत्वं यको धातुविहितत्वेन तन्निमित्तगुणनिषेधार्थेन कित्त्वेनावसीयते । प्रातिपदिकत्वं तु कण्ड्वादीनां केषांचिद्दीर्घान्तपाठात् । कण्डूयते इत्यादिरूपं तु ह्रस्वान्तादपि यकि मन्तूयतीत्यादिवत् 'अकृत्सार्वधातुकयो'रिति दीर्घेण भविष्यति । तत्र धात्वधिकारात् धातुभ्यो यक् प्रत्ययः । नन्वेवं प्रातिपदिकत्वमेवास्तु मास्तु दीर्घपाठः प्रत्ययस्य कित्त्वं च । न चा'कृत्सार्वधातुकयोर्दीर्घ' इति दीर्घविधौ अङ्गं धातुराश्रीयते किं त्वङ्गमात्रमेव । कण्डूरिति च कण्डूयशब्दात्सम्पदादित्वाद्भावे क्वावल्लोपे वलि लोपेन यलोपेन सिद्धं, यलोपे ऽल्लोपस्य स्थानिवत्त्वं 'न पदान्ते'ति निषिद्धं, वलि लोपश्च 'लोपो व्यो'रिति विधेयस्य पश्चान्निर्दिष्टस्य पूर्वनिर्दिष्टादपृक्तलोपात्पूर्वं

[1] मावमंस्त भवान् स्व र्थमिति पाठोपेक्षितः ।

भवति । यद्येवं कण्डूशब्दस्य यगन्तत्वेन धातुत्वादल्लोपस्य पूर्वविधौ स्थानिवत्त्वादुवङ् स्यात् । नैतदस्ति । सति स्थानिवत्त्वे ऽकारस्य तदन्त एव धातुर्नोकारान्तः । एवं तर्हि यण् प्राप्नोति । अस्तु,क्विबाश्रयः च्छ्वोः शूडित्यूड् भविष्यति, न चाल्लोपस्य स्थानिवत्त्वे वकारस्य क्विप्पर-त्वाभावः, वकारस्यादिष्टादचः पूर्वत्वात् । न च स्थानिवत्त्वेनानादिष्टा-दचः पूर्वत्वं, तस्याशास्त्रीयकार्यत्वात् । अत एवादिष्टादचः पूर्वत्वादूठि पुनरुवङभावः । यद्वा 'क्वौ लुप्तञ्च स्थानिव'दिति अल्लोपस्य स्थानि-वत्त्वनिषेधाद्यण्भावावप्रसङ्गः, यद्येवं कण्ड्वावित्यादावुवङ् स्यात्, न चेोः सुपीति यणः प्रसङ्गः, संयोगपूर्वत्वात् । अस्त्वत्रोवङ, क्विपः प्रत्य-यलक्षणेनोङ् भविष्यति । एवमपि पुनरुवङ् स्यात्, पुनरूडुवङो पर्याये-णेति व्यवस्था न स्यात् । किं च कण्डूरित्यादिवन्मन्तूरिति च स्यात्, न च भवतीष्टं मन्तूरित्यादि । अथ धातोः कर्मण इत्यतो वाग्रहण-मनुवर्तते, तेन यगभावपक्षे उत्यादावपि सिद्धं मन्तुरिति तथापि कण्डूरितिवद्दीर्घेऽपि अल्लोपयलोपयोश्च दुर्वारं मन्तूरित्यादि,तथा यग-भावपक्षे मन्तुरित्यादिवत्कण्डुरिति च स्यात्, सुखादिभ्यश्च यकि तस्या-धातुविहितत्वेनानार्द्धधातुकत्वादतो लोपाभावादकृत्सार्वधातुकयोरिति दीर्घे सुखायतीत्यादि स्यात्, न चेष्टं, सुख्यतीत्यादेरिष्टत्वात्, इह पाठे तु न कदा चन सुखादेरकारान्तता सिध्यति, तस्माद्यथान्यासमेवास्तु । नन्वेवमपि प्रातिपदिकेभ्यः कण्ड्वौ मन्तुरित्यादि यद्यपि सिध्यति तथापि धातुभ्यो यकि कण्डूयशब्दात् क्वावल्लोपयलोपयोरजादौ सुप्युवङि कण्डुवावित्यादि प्राप्नोत्येव, तथा मन्तूयादेर्मन्तूरित्यादि, सुख्यादेश्च सुगित्यादि हलन्तं, नैष दोषः । यगन्तेभ्यः क्विबेव नोत्पद्यते । उक्तं च भाष्ये नैतेभ्यः क्विब् दृश्यतइति, न तर्हि इदानीमुवङ् भवति कण्डु-वाविति, भवति, यदा प्रातिपदिकात्क्विबन्तात् क्यजन्ताद्वा क्विप्यल्लोप-यलोपययोः स्वाद्युत्पत्तिः, यद्येवं कण्ड्वादयः प्रातिपदिकान्येव सन्तु, यथान्यासं दीर्घान्ताश्च तथैव भवन्तु,ककारश्च प्रत्यये मासञ्जि, वाग्रहणं चानुवर्तिष्यते, तत्र कण्डूयति मन्तूयतीत्यादयो यकि भवन्ति, कण्डूः

कण्ड्वौ मन्तुरित्यादयश्च यगभावपक्षे प्रातिपदिकात् स्वाद्युत्पत्तौ, यगन्तात्क्विबभावस्येदानीमेवोक्तत्वात्स एव धातुः प्रातिपदिकं च कण्डूशब्दो भवति, तस्मात्स्वाद्युत्पत्तावुवङ् प्रसज्येत, तथाऽत एव यगन्तात्क्विबभावान्मन्त्वादेर्दीर्घत्वं सुखादेर्हलन्तत्वं न भवति किं कण्ड्वादीनां धातुत्वमाश्रित्य तेभ्यः प्रत्ययविधानेन, सत्यमेतदेवं स्यात् । सुख्यतीति न सिध्येत्, प्रातिपदिकात्प्रत्यये तस्यानार्धधातुकत्वेनातो लोपाप्रसङ्गात् ।

अथोदाहरणानि । कण्डूयति । कण्डूञो ञित्करणस्यावयवे कृतं लिङ्गं समुदायस्य विशेषकं भवतीति समुदायस्य ञित्त्वादात्मनेपदं भवति । एवमनुबन्धान्तरस्यापि समुदायार्थत्वं द्रष्टव्यम् ॥ १ ॥

मन्तु अपराधे ॥ रोषइत्यपरे । मन्तूयति । चन्द्रस्तु ञितं पठित्वा मन्तूयते इति चाह ॥ २ ॥

वल्गु पूजामाधुर्ययोः ॥ वल्गूयति ॥ ३ ॥

असु मनस् एतावुपतापे ॥ असूयति । असूयुः । 'मृग्वादयश्चे'त्युप्रत्ययः । अत्र वर्धमानहरदत्तगणरत्नमहोदधिकारा आद्यनुसारेणासुशब्दमसिति सान्तं पठित्वा असूञिति दीर्घान्तमेके पठन्तीत्याहुः । तन्मते चस्यति असूयति असूयते इति भवति ॥ ५ ॥

लेट् लोट् धौर्त्ये पूर्वभावे स्वप्ने च ॥ लेट्यति, लोट्यति, लेटिता, लोटिता, अकारस्यातो लोपे यलोपः । अत्र देवोऽर्थनिर्देशार्थं पूर्वशब्दं प्रतिनिर्देशार्थं मत्वा 'पूर्वतीति तु यत्स्वप्ने तत्कण्ड्वादिषु दर्शनादि'त्याह । तदेतन्मोघायां शाकटायनधातुवृत्तौ अर्थनिर्देशरहिते गणपाठे पूर्वस्य पाठाभावादयुक्तमिति पुरुषकारएव दूषितम् । अन्ये तु लेट्लोटौ दीप्त्यर्थावाहुः । अत्र लेला दीप्तावित्येके पठन्ति, पठ्यते च वातीभूतोलेलायतः, यदा वीतार्तिहस्तायेति ॥ ७ ॥

इरज् ईर्ष्यायाम् ॥ अत्र वर्धमानहरदत्तौ इरस् इरज् इरञ् ईर्ष्यायामिति त्रीन्पेठतुः । इरस्यति, इरज्यति, ईर्यतिर्मार्गावसानार्थोऽपि, उक्तं चेर्यतिरीर्ष्यापाधिरिति स्थितिरिति । ॥ ८ ॥

इयस् ऐश्वर्ये ॥

अमुं दुर्गो न पठतीति गणरत्नमहोदधौ ॥ ९ ॥

उषस् प्रभातीभावे ॥ उषस्यति रात्रिः ॥ १० ॥

वेद धौर्त्ये स्वप्ने च ॥ वेद्यति ॥ ११ ॥

मेधा आशुग्रहणे ॥ मेध्यति ॥ १२ ॥

तन्तस् पम्पस् दुःखे ॥ तन्तस्यति । पम्पस्यति ॥ १४ ॥

सुख दुःख तत्क्रियायाम् ॥ तच्छब्देन सुखदुःखार्थौ परामृश्येते । तेन सुखदुःखरूपायां क्रियायामित्यर्थो भवति, सुख्यति, दुःख्यति । सुखमनुभवति दुःखमनुभवतीत्यर्थः ॥ १६ ॥

सपर पूजायाम् ॥ अकारान्तोयं महोदधौ, सपर्यति ॥ १७ ॥

अरर आराकर्मणि ॥ आरा प्रतोदा । अर्यति ॥ १८ ॥

भिषज चिकित्सायाम् ॥ भिषज्यति भिषज्यते ॥ १९ ॥

भिष्णज उपसेवायाम् ॥ भिष्णज्यति ॥ २० ॥

इषुध शरधारणे ॥ इषुध्यति ॥ २१ ॥

चरण गतौ ॥ चरण्यति । वरण इति भोजः । उक्तं च तयोरुदाहरणं काव्ये वरणाश्चारण्यैर्वेलामिति ॥ २२ ॥

चुरण चौर्ये ॥ चुरण्यति ॥ २३ ॥

तुरण त्वरायाम् ॥ तुरण्यति ॥ २४ ॥

भुरण धारणपोषणयोः ॥ पणधारणयोरित्यन्ये । भुरण्यति ॥ २५ ॥

गद्गद वाक्स्खलने ॥ गद्गद्यति ॥ २६ ॥

एला केला खेला विलासे ॥ एलायति । केलायति । खेलायति । अत्रैलास्थाने इलेत्यपरे पठन्ति । इलायति ॥ २९ ॥

लेखा स्खलने च ॥ अकारान्तइत्यन्ये । तत्रातो लोपः, लेख्यति ॥ ३० ॥

लिट् अल्पार्थे कुत्सायां च ॥ लिट्यति ॥ ३१ ॥

लाट् जीवने ॥ लाट्यति ॥ ३२ ॥

हृणीङ् रोषणे लज्जायां च ॥ हृणीयते ॥ ३३ ॥

महीङ् पूजायाम् ॥ अत्र पूजा पूज्यमानकर्तृका, तेनायमकर्मकः, महीयते पूजामधिगच्छतीत्यर्थः ॥ ३४ ॥

रेखा श्लाघासादनयोः ॥ आसादनं प्राप्तिः प्रापणा वा, रेखायति । श्लाघामनुभवति अनुभावयति वेत्यर्थः ॥ ३५ ॥

द्रवस् परितापपरिचरणयोः । द्रवस्यति ॥ ३६ ॥

तिरस् अन्तर्द्धौ ॥ तिरस्यति ॥ ३७ ॥

अगद नीरोगत्वे ॥ अमुं भोजः नेच्छतीति गणरत्नमहोदधौ, लेखायतिरेखायतिवदर्थः ॥ ३८ ॥

उरस् बलार्थः ॥ उरस्यति । बलवान्भवतीत्यर्थः ॥ ३९ ॥

तरण गतौ ॥ तरण्यति ॥ ४० ॥

पयस् प्रसृतौ ॥ पयस्यति ॥ ४१ ॥

सम्भूयस् प्रभूतभावे ॥ सम्भूयस्यति । अत्र गणरत्नमहोदधौ अम्बर सम्बर सम्भर इति वामन इति, अम्बर्यति, सम्बर्यति, अत्र गणरत्नमहोदधावेव लेट्लोटाविति पठित्वा मतान्तरेण दान्तत्वमुक्त्वा लेट्यति लोट्यतीत्युक्तम्। अस्याकृतिगणत्वाद्रैधनादिभ्यो रायति धनायतीति चोक्तं, यदा कण्ड्वादिभ्यः सनुत्पद्यते तदा कण्ड्वादीनां तृतीयस्यैकाचो द्वे भवत इति कण्डूयियिषतीत्यादि भवति ॥ ४२ ॥

अथ सौत्रधातवः प्रक्रियन्ते ॥

'ऋतेरीयङ्' । अयं स्वार्थे, ऋतिर्घृणायां, सा चेह घृणा जुगुप्साकृपयोरित्युक्त्वापि ऋतीयाशब्दस्य निघण्टुषु निरूढा जुगुप्सैवेति व्याख्यातारः । अत्र प्रत्ययस्य कित्त्वेनापि गुणाभावस्य सिद्धौ ङित्करणमात्मनेपदार्थमपि, ऋतीयते, ऋतीयेते, ऋतीयां चक्रे इत्यादि, ङिल्लकारेषु अजादित्वा 'दाटश्चे'ति वृद्धौ आर्तीयत आर्तीयिष्ट आर्तीयिषतेति भवति, यदायमवर्णान्तादुपसर्गात्परो भवति तदो'पसर्गादृति धाता'वि ति वृद्धौ प्रार्तीयते उपार्तीयत इत्यादि भवति । अत्रोपसर्गग्रहणाद्धाताविति सिद्धे उपसर्गादृतीत्येव वक्तव्ये पुनर्धातुग्रहणं योगभेदेनाधिकविधानार्थमिति 'ऋत्यक'इति पाक्षिकः प्रकृतिवद्भावोऽत्र बाध्यते, उपसर्गग्रहणं प्राद्युपलक्षणमित्येतत्तु यत्रो'पसर्गादध्वन'इत्यादौ उपसर्गत्वं न सम्भवति तत्रैवे ीह तु सम्भवतीति हरदत्तादयः । तेना-

गता ऋतीयका अमुं देशम् आर्त्तीयको देश इत्यादौ यत्क्रियायुक्ताः प्रादयस्तं प्रति गत्युपसर्गसंज्ञा इत्याङादीनां गम्यादिक्रियापेक्षयोपसर्गत्वं न तु ऋतीयक्रियापेक्षयेति तां प्रत्युपसर्गत्वाभावादाद्गुणइति गुणः 'ऋत्यक' इति शाकलप्रकृतिभावश्च भवतः। यदायमीयङ् आयादय आर्धधातुके वेति वचनाद र्धध तुके न भवति तदा आनर्त, ऋर्तिता, ऋर्तिष्यति, आर्तीत्, आर्तिष्यत्, ऋर्तित्वा, ऋतित्वेत्यादि भवति, अत्र 'वञ्चिलुञ्च्यृतश्चे'ति सेटः क्तित्वविकल्पनात् पक्षे गुणो न, 'आयादय आर्धधातुके वे'त्यत्रार्धधातुकेत्यस्य विषयसप्तमीत्वादार्धधातुकेषु विषयभूतेषु आयादय उत्पद्यन्तइत्यर्थो न तु भूता निवर्तन्तइति, अन्यथा ऋतीयशब्दाल्लिटि प्रत्ययान्तत्वेनाम्ि ईयप्रत्ययस्य निवृत्तावर्तां चकारेति स्यात् आनर्तेति च न स्यात्। न चार्तितासि ऋर्तिष्यति ऋत्यात् आर्तीदित्यादौ परस्मैपदं न स्यात्, तथा तास्यादेरार्धधातुकस्येयङो निवृत्तेर्निमित्तत्वात्तदपेक्षो गुणो 'न धातुलोप आर्धधातुके' इति निषेधान्न स्यात्, अनेनाभिप्रायेण गुणाभावः, आर्तिष्ट ऋतिषीष्टेत्यादि स्यात्, ईयङन्तादुत्पन्नेषु तिङ्क्षु तदाश्रयेण पश्चादुत्पन्नेषु विकरणेषु आर्धधातुकेष्वीयङो निवृत्तिः क्रियते, ईयङो ङित्त्वात्तदन्ताच्चोत्पद्यमानास्तिङ आत्मनेपदान्येव, तथा क्तिनि ऋतिरिति न स्यात्, अप्रत्ययादित्यकार ईयङो निवृत्तावृत्तेति च स्यात्, एवमादीनि दूषणानि। अत्र क्वचिद्वृत्तिकारश्छङित्येव सिद्धे ऋतेरीयङ्वचनं ज्ञापकं धातुविहितानां प्रत्ययानामायनादयो न भवन्तीति। तेन शमेः खः, शङ्कुः, कमेष्ठः कण्ठ इति, अत्रेनिकादेशौ न भवतः। ननु ऋति शङ्छङित्युच्यमाने छङ आर्धधातुकत्वेन परत्वादिडागमे कृते छकारस्य प्रत्ययादित्वं विप्रतिपन्नमिति 'आयनेयी'त्यादिना विधीयमानः कथमीयादेशः सिध्यति, नैष दोषः। यदायनादिषूपदेशिवद्वचनस्य चोदितत्वादन्तरङ्गत्वादिटः पूर्वमीयादेशो भविष्यति। अत्र हरदत्तः। द्विवचनविभज्योपपदे इत्यत्र तरप्छसुनाविति वक्तव्ये इयसुन्वचनादधातुविहितानामपि प्रत्ययानामायनादयो न स्युः, वचनसामर्थ्याच्चेदुभयेषामपीति ज्ञापकं भङ्क्त्वा ठादौ बाहुलकादिकाद्यभावमाह ॥ १ ॥

'स्तम्भुस्तुम्भुस्कम्भुस्कुम्भुस्कुञ्भ्यः श्नुश्च'। एभ्यः कर्तृवाचिनि सार्वधातुके श्नुर्भवति, चकाराच्छ्ना च, तत्र पञ्चमो धातुषु पठितो व्याख्यातश्च, प्रथमतृतीयौ स्तम्भार्थौ, द्वितीयो निष्कोषणार्थः । चतुर्थो धारणार्थः, उदित्त्वं त्क्त्वायामिड्विकल्पार्थम्, अत एव श्नाव्यतिरिक्तविषयाश्चैते भवन्ति, स्तभ्नोति, स्तभ्नुतः, स्तभ्नुवन्ति, स्तभ्नोषि, स्तभ्नोमि, स्तभ्नुवः, स्तभ्नुमः, 'अनिदितामि'ति नलोपः, वस्मसो'र्लोपश्चास्यान्यतरस्यामि'त्युकारलोपः संयोगपूर्वत्त्वाच भवति, स्तभ्नाति, स्तभ्नीतः, स्तभ्नन्ति, स्तभ्नासि, स्तभ्नामि, हलादौ क्ङिती 'हल्यघो'रितीत्वम्, अजादौ तु 'श्नाभ्यस्तयो'रित्यालोपः, तस्तम्भ, तस्तम्भतुः, तस्तम्भुः, तस्तम्भिथ, तस्तम्भ, तस्तम्भिव, तस्तम्भिम, स्तम्भिता, स्तम्भिष्यति, स्तभ्नोतु, स्तभ्नुतात्, स्तभ्नुतां, स्तभ्नुवन्तु, स्तभ्नुहि, स्तभ्नवानि, हे 'हुतश्चे'ति लोपः संयोगपूर्वत्वाच्च भवति, स्तभ्नातु, स्तभ्नीतात्, स्तभ्नीतां, स्तभ्नन्तु, स्तभान, हौ हलः श्नःशानज्झाविति शानजादेशे 'ऽतो हे'रिति हेर्लुक्, अस्तभ्नोत्, अस्तभ्नुताम्, अस्तभ्नुवन्, अस्तभ्नोः, अस्तभ्नवम्, अस्तभ्नात्, अस्तभ्नीताम् । अस्तभ्नन्, स्तभ्नुयात्, स्तभ्नुयातां, स्तभ्नुयुः, स्तभ्नुयाः, स्तभ्नुयां, स्तभ्नीयात्, स्तभ्नीयातां, स्तभ्यात्, स्तभ्यास्तां, स्तभ्यासुः । यासुटः क्त्त्वादनुनासिकलोपः । अस्तभत्, अस्तभताम्, अस्तभन् 'जृस्तम्भ्व'ति परस्मैपदे च्लेर्वाङि 'अनिदितामि'ति नलोपः । अन्यदा सिचि अस्तम्भीदित्यादि । अस्तम्भिष्यत् । तिस्तम्भिषति, तास्तभ्यते, तास्तम्भीति, तास्तब्धि, तास्तब्धः, तास्तम्भतीत्यादि । स्तम्भयति । अतस्तम्भत्, अत्यष्टभ्नोत्, प्रत्यष्टभ्नोत्, प्रतिष्टभ्नाति, प्रत्यतष्टम्भत्, इत्यादौ स्तम्भेः 'प्राक् सितादड्व्यवायेपी'ति इणन्तादुपसर्गात्परत्वेन षत्वं, तत्राप्रतेरिति नानुवर्तते, प्रतितिष्टम्भिषति, 'स्थादिष्वभ्यासेने'ति षत्वम् । अवष्टभ्नाति, अवलम्बतइत्यर्थः । अवष्टब्धा सेना । आसन्नेत्यर्थः । 'अवाच्चालम्बनाविदूर्ययोरि'ति षत्वं, प्रत्यतस्तम्भेदित्यत्र 'स्तम्भुसिवुसहामि'ति निषेधात् 'स्तम्भे'रिति षत्वं न भवति, सन्वदित्वं लघुपरत्वा-

भावाच्च भवति, दीर्घत्वं त्वलघुत्वादपि न भवति। स्तम्भित्वा, स्तब्ध्वा, उदित्त्वादिड्विकल्पः, इटि 'न क्त्वा सेडि'ति कित्त्वप्रतिषेधाच्चानुषङ्गलोपः। स्तब्धः। 'यस्य विभाषे'त्यनिट्त्वं, प्रतिष्टब्धः, निष्टब्धः 'प्रतिष्टब्धनिष्टब्धौ चे'ति षत्वं, स्तम्भेरिति सानुषङ्गनिर्देशादयमेव स्तभिः सौत्रोऽत्र गृह्यते न त्वत्र भौवादिकः स्तभिनभीति प्रतिस्तम्भादयः प्रयोगास्तस्य द्रष्टव्याः। उत्तम्भः। 'तितुत्रेती' गुनिषेधः, 'उदः स्थास्तम्भोः पूर्वस्ये'ति पूर्वसवर्णस्तकारः, एवमुत्तभ्नोतीत्यादावपि, एवं स्तुभ्नोति स्तुभ्नाति, स्कभ्नोति, स्कुभ्नातीत्यादि स्तभ्नोतिवत्। विष्कभ्नोति, विष्कभ्नाति, विष्कम्भ इत्यादौ 'वेः स्कभ्नातेर्नित्य'मिति षत्वं, श्नानिर्देशः स्कम्भतेर्निवृत्त्यर्थ इति विष्कम्भ इत्यादावपि भवति ॥ ५ ॥

साति: सुखे ॥ अयं हेतुमण्ण्यन्त इति जिनेन्द्रहरदत्तौ, तन्मते सतिरिति प्रकृत्या भवितव्यं, सातिः सौत्रो धातुरिति वृत्तिबोधिन्यासयोः, सातयतीत्यादि। सातयः। 'अनुपसर्गाल्लिम्पे'त्यादिना शे शपि गुणायादेशौ ॥ ६ ॥

जु वेगितायां गतौ ॥ जवति, जोतेत्यादि, स्वरान्तत्वादनिट्त्वं, जुजूषति, अजीजवदित्यत्र णेश्चङि णौ कृतस्य स्थानिवत्त्वेनाभ्यासस्योवर्णान्तत्वादोः पुयण्जीतीत्वे 'दीर्घो लघो'रिति दीर्घः। जवनः। 'जुचङ्क्रम्ये'ति युच्, प्रजवी। प्रजोरिति इनिः। जूः। जुवौ, 'भ्राजभासे'ति क्विप् ताच्छीलिकः। तत्रैव सूत्रे जू इति दीर्घपाठाश्रयणात्क्विप्सन्नियोगेन दीर्घ इत्येके। अन्ये तूत्तरसूत्रे दृशिग्रहणस्येहाप्यभिसंबन्धाद् दीर्घ इत्याहुः। जूतिः। 'ऊतियूतिजूती'ति क्तिनि दीर्घान्तोदात्तत्वे निपात्येते। जवः। 'ऋदोरबि'त्यप्। जवसवौ छन्दसीत्यज्विधानं तत्रान्तोदात्तार्थं न तु भाषायामेतद्रूपनिवृत्त्यर्थं, विजावको नाम देशः, संज्ञायां ण्वुल्। वैजावकः, 'कच्छादिभ्यश्चे'त्यण् शैषिकः। 'कोपधादणि'त्येवाणि सिद्धे कच्छादिष्वस्य पाठो यदा भवादिर्मनुष्यस्तत्स्थो वा भवति तदा वैजावक इति, कच्छाद्यधिकारेण विधीयमानो मनुष्यतत्स्थयोर्वुञमुष्मादपि यथा स्यादिति ॥ ७ ॥

स्यादन्यत्र यस्येति लोपो माभूदिति । अथापि विधिनियमसंभवे विधेरेव ज्यायस्त्वम्, एवमप्यारम्भसामर्थ्यादलोन्त्यस्येत्येतस्मिन् बाधिते समुदायस्यैव षष्ठीनिर्दिष्टस्य लोपप्रसंगो न त्वसंशब्दितस्य तिशब्दस्य लोपः सिध्यति, तिग्रहणे तु सति तत्सामर्थ्यादलोन्त्यस्येत्यस्यानुपस्थानात्सर्वस्य तिशब्दस्य भवति, विंशं विंशकमित्यादौ तिलोपे कृते अतो गुणे पररूपत्वं, यस्येतिलोपस्तु न भवति, तिलोपस्यासिद्धत्वात् ॥

"टेः" ॥ 'डित्यभस्यापीति'। अवणार्थस्तु डकारो न भवति, कृतुपि तावद्देशे तन्नाम्नीति वर्त्तते, न च डकारवता प्रत्ययेन तन्नामा गम्यते देशः, डेपि प्रावृट्शरत्कालदिवां जइति निर्दिष्टत्वान्न अवणार्थो डकारः। 'मन्दुरज इति'। ङ्यापोः सञ्ज्ञाछन्दसोर्बहुलमिति ह्रस्वः ॥

"नस्तद्धिते" ॥ 'तेषामिति'। अचिति प्रकृतिभावः प्राप्त इत्यनुषङ्गः। 'पीठेन सर्पतीति पीठसर्पी, कलापिशब्दात्प्रोक्तार्थे कलापिनोण्, छन्दोब्राह्मणानि च तद्विषयाणि, तदधीतइत्यण्, प्रोक्ताल्लुक्, कालापाः, एवं कौथुमाः, किं पुनः कारणमुपचार आश्रीयते, न पुनर्मुख्यार्थवृत्तिभ्यां तेन प्रोक्तमित्याद्यर्थे ऽण् क्रियतइत्यत आह। 'शैषिकेष्विति'। केचित्तितलिशब्दं पठन्ति तिलानां तलं तितलं, पृषोदरादिः, तदस्यास्तीति तितली । 'एवं लाङ्गला इति' । उपचारादि सर्वमतिदिशति, उत्तरेषु त्रिष्विदमर्थेण्, एवमाश्मनइत्यत्रापि, चार्मे इत्यत्र विकारे, चार्मण इत्यत्रेदमर्थे, विकारेपि कोशादन्यत्र । 'शौव इति'। तस्येदमित्यण्, अत्र परत्वाद्वृद्धिप्राप्तौ द्वारादित्वात्तत्प्रतिषेधे ऐजागमे च कृते टिलोपः। 'शौवनोन्यइति'। विकारावयवयोस्तु प्राणि चादञिति प्रकृतिभावाभावाच्छौव इत्येव भवति। 'के पुनरिति'। प्रातिपदिकगणे पाठाभावात्प्रश्नः, आदिशब्दस्य प्रकारवचनत्त्वादाकृतिगणोयमित्युत्तरम् । 'सायम्प्रातिकमिति'। यथाकथञ्चित्कालवृत्तेरपि भवतीत्युक्तत्वात्कालसमुदायेपि ठञ् एव भवति, येषां च विरोधः शाश्वतिक इति निर्द्देशादिसुयुक्ता[१]न्तात्क इति कादेशाभावः। 'शाश्वतमिति'। भाष्यकारवचनादण् प्रत्ययः ॥

१ इसुसुक्तान्तात्कइति नास्ति॰ ई॰ पु॰।

"अह्नष्टखोरेव" ॥ 'द्व्यह इति'। न सङ्ख्यादेः समाहारइति अह्नादेशस्य प्रतिषेधः। 'द्व्यहीनइति'। तद्धितार्थे द्विगुः, समायाः खः, द्विगोर्वा, रात्र्यहः सम्वत्सराच्चेति खः। 'आह्निकमिति'। आर्हीयष्ठक्। 'एवकारकरणं विस्पष्टार्थमिति'। विपरीतनियमनिरासार्थं तु न भवतीत्याह। 'अह्न एवेति'। विपरीते हि नियमे अन्यस्य खे टिलोपाप्रसङ्गादात्माध्वानौ खइति प्रकृतिभावविधानमनर्थकं स्यादिति भावः॥

"ओर्गुणः" ॥ बाभ्रव्यादौ गोत्रे यञ्, शङ्कव्यादौ प्राक्क्रीतीय उगवादिभ्यो यत्, औपगवादावपत्येण्। 'सञ्ज्ञापूर्वको विधिरित्यादि'। भाष्येनुक्तमपि प्रयोगबाहुल्यादुक्तम्। तद्धितइत्येव,वोतो गुणवचनात् पट्वी॥

"द्रे लोपोकद्र्वाः" ॥ मद्रबाहुशब्दाद्बाह्वन्तात्सञ्ज्ञायामित्यूङ्, कद्रुशब्दादपि कद्रुकमण्डल्वोश्छन्दसि सञ्ज्ञायामित्यूङ्, ताभ्यामपत्ये स्त्रीभ्यो ढक्,अन्यत्र चतुष्पाद्भ्यो ढञ्, कमण्डलुपद आदधीतेति बह्वृच्ब्राह्मणं, सृगालो जम्बुः, शिवा जम्बूः। जम्बुरेव जम्बजम्बुकः॥

"यस्येति च" ॥ इश्च अश्च यं, समाहारद्वन्द्वे 'घ्यन्तादजाद्यदन्तं विप्रतिषेधेने'ति अशब्दस्य पूर्वनिपातः सौत्रत्वान्न भवति, यशब्दस्य तु ग्रहणं न भवति लिङ्गात्, यदयं गर्गशब्दस्य यञि कुमारशब्दस्य तु ङीपि लोपं निर्द्दिशति, ओतो गार्ग्यस्य, कुमार्या वयसीति, अत एव निर्द्देशादकारे तावद्ध्रस्वस्य ग्रहणं, तत्साहचर्यादिकारेपि, कार्ये तु दीर्घस्यापि भवति, सवर्णग्रहणात्। 'दाक्षीति'। इतो मनुष्यजातेरिति ङीष्, सखिशब्दादपि सख्यशिश्वीति भाषायामिति, सर्वत्र सवर्णदीर्घत्वेन रूपं सिध्यति किं लोपेन तत्राह। 'सवर्णदीर्घत्वे हीति'। 'अतिसखेरिति'। अतिक्रान्तः सखीमिति तत्पुरुषे लिङ्गविशिष्टपरिभाषया 'राजाहःसखिभ्यष्टजि' ति टच् न भवति, तस्यानित्यत्वात्, तत उपसर्जनह्रस्वत्वम्। 'एकादशस्येति'। ङीषा सह कृतस्य। 'असखीति प्रतिषेधः स्यादिति'। कथं पुनः सखिशब्दस्योच्यमानोतिसखिशब्दस्य प्रतिषेधः स्यात्, तदन्तविधिना, ग्रहणवता प्रातिपदिकेन तदन्तविधि-

नास्ति, एवं मन्यते कार्यकालं संज्ञापरिभाषमिति पक्षे घेर्ङितीत्यत्र घिसंज्ञाया उपस्थानादङ्गाधिकारे तस्य च तदुत्तरपदस्य चेत्यस्ति तदन्तविधिरिति, यद्वा शेषस्येकारोकारमात्रस्य घिसंज्ञा, न तदन्तस्य, ततः किम्, असखीत्यपि सखिशब्देकारस्य प्रतिषेधो न सखिशब्दस्य, एकादेशे च सखिशब्देकार एवायमिति तदन्तेऽपि प्रतिषेधः स्यादेव, लोपे तु सति यद्यप्युपसर्जनह्रस्वत्वे कृते रूपमविशिष्टं तथापि तस्य लाक्षणिकत्वाच्च भवति प्रतिषेधः। दौलेयादौ इतश्चानिञ इति ढक्। बलाकासुमित्राशब्दौ बाह्वादी। 'सौर्य इति'। नेनैकदिगित्यण्, एतच्च सूर्यागस्त्ययोश्छे च ड्यां चेत्यनपेक्ष्योदाहृतम्। 'इयङुवङ्भ्यामिति'। इयङुवङोरवकाशः श्रियौ भ्रुवौ, लोपस्यावकाशो दौलेयः, कामण्डलेयः।

"सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः"॥ यद्यत्र भत्वेन सूर्यादयो विशेष्यन्ते सूर्यादीनां भसंज्ञानामिति, ततः सूर्यस्य स्त्री सूरी, आगस्त्यस्य अगस्तीत्यादौ यत्र सूर्याद्येव भसंज्ञकं तत्रैव स्यात्सौरी बलाकेत्यत्र तु न स्यात्, नह्यत्र सूर्यशब्द ईति भसंज्ञकः किं तर्ह्यणन्तं, तस्मादनाश्रितरूपस्य भमात्रस्य लोपेन संबन्धः। सूर्यादिभिर्यकारो विशेष्यतइति दर्शयन्नाह। 'सूर्यतिष्यागस्त्यमत्स्येत्येतेषामिति'। भसंज्ञकस्य यो यकार उपधा तस्य लोपो भवति स चेत्सूर्यादीनां संबन्धीत्यर्थः। 'सौरीति'। अत्र ईति परतो भसंज्ञकमङ्गमणन्तं तस्य यकार उपधा यथा भवति तथा दर्शयति। 'अणि यो यस्येति लोप इति'। 'व्याश्रयत्वादिति'। अणि यस्येति लोपः, ईति यलोप इति व्याश्रयत्वम्। 'ईकारे तु य इति'। लोप इत्यपेक्षते। 'तस्याणन्तस्येति'। भसञ्ज्ञकस्याणन्तस्य यकार उपधा भवतीत्यर्थः। स्थानिवद्भावस्तु द्वयोरपि यस्येति लोपयोर्यलोपविधिं प्रति प्रतिषिद्धः। 'मत्स्यचरीति'। मत्सी भूतपूर्वेति चरट्, तसिलादिष्विति पुंवद्भावः, टित्त्वान्ङीप्, भवत्यत्र मत्स्यचरशब्द ईति भसंज्ञकः, मत्स्यसंबन्धी च यकारो न त्वसौ भसञ्ज्ञकस्योपधेति लोपाभावः। 'यग्रहणमुत्तरार्थमिति'। इह तु सूर्यादिसंबन्धी भसञ्ज्ञकस्योपधायकार एव न वर्णान्तरमिति नार्थस्तेन। 'सौरीयइति'। सौर्यशब्दाद्वृद्धाच्छः, एवमागस्तीयः। 'आगस्त्य

इति'। अपत्ये च्चण्यण्। 'तिष्यपुष्ययोरिति'। तिष्यस्य सूत्रेणैव प्राप्ते नक्षत्राणि नियमः, पुष्यस्याप्राप्ते विधिः, सूत्रे त्वर्थग्रहणे सिध्यस्यापि प्रसङ्गः, । 'अन्तिकस्येत्यादि'। छन्दस्येतदिष्यते। 'ककारादेः शब्दस्येति'। ककारस्याकारस्य चेत्यर्थः। 'आद्युदात्तश्चेति'। प्रत्ययस्वरस्यापवादः। 'अन्तितइति'। अपादाने चाहीयरुहोरिति तसिः। 'का[1]देश्चेति'। कशब्दस्येत्यर्थः। 'अन्तिषदिति'। सत्सूद्विषेत्यादिना क्विप्, बह्वृचास्तु व्यस्तमधीयते।'ये चेति'। दृश्यतइत्यपेक्षते। 'अन्तियइति'। भवे छन्दसीति यत्। कादिलोपस्यासिद्धत्वाद्यस्येति लोपाभावः॥

"हलस्तद्धितस्य"॥ 'त[2]द्धितइति निवृत्तमिति'। उत्तरसूत्रे पुनस्तद्धितग्रहणात्, तेनायमीत्येव विधिः॥

"आपत्यस्य च तद्धितेऽनाति"॥ 'गार्गकमिति'। गोत्रोक्षोष्ट्रेत्यादिना वुञ्, सङ्काशादिभ्यो ण्य इति वुञ्छणादिसूत्रेण चातुरर्थिकः, ततो धन्वयोपधाद्वुञिति जातादावर्थे। 'तद्धितग्रहणमित्यादि'। सोमो देवतास्येति सोमाट्ट्यण्, टित्त्वान्ङीप्, तत्र परतोऽनापत्ययकारस्याप्यस्य हलस्तद्धितस्येति लोपो यथा स्यादित्येवमर्थमिह तद्धितग्रहणं कृतम्, अन्यथा हि प्रकृतं तद्धितग्रहणमिहानुवर्त्तनीयं, तस्मिंश्चानुवर्त्तमाने तत्सम्बद्धमीतीत्यपि सम्बध्येत, [3]तच्चोभयमिह संबध्यमानं पूर्वसूत्रेपि सम्बध्येत, ततश्च पूर्वेणैव सिद्धे सत्युभयत्र तद्धितईति चेति नियमोयं विज्ञायेत, आपत्यस्यैवानाकारादौ तद्धिते ईति चेति, ततो यथा तद्धितेऽनापत्यस्य न भवति साङ्काश्यकइत्यादौ, तथा ईत्यपि न स्यात्, सौमी इष्टिरिति। तद्धितग्रहणे तु सति तेन पूर्वयोगे तद्धितग्रहणस्य निवृत्तिराख्यातेत्यापत्यानापत्ययोर्द्वयोरपि पूर्वेण ईति लोपो विधीयतइति सौमी इष्टिरित्यत्रापि यलोपः सिध्यतीत्यतस्तद्धितग्रहणम्। ननु च यद्युभयस्यायं नियमः स्याद्योगविभागोनर्थकः स्याद्धल आपत्यस्य

१ ककारादेश्चेति मुद्रितमूलपुस्तके पाठः। ई॰ पु॰ तादेश्चेति पाठो दृश्यते।
२ तद्धित इति निवृत्तमिति मुद्रितमूलपुस्तके नास्ति।
३ तच्चोभयमिह संबन्ध्यमानं पूर्वसूत्रेपि संबन्ध्येतेति ई॰ पु० नास्ति।

तद्धितस्यानातीत्येकमेव योगं कुर्यात्ततो योगविभागादन्यतरस्यैवानुवृत्तिः, तत्राप्यनातीतिवचनात्तस्यैव, एवमपि दोषो ऽनापत्यस्य तद्धितेपि प्राप्नोति, कथम्, आपत्यस्य यदि भवति अनाकारादावेवेति नियमसम्भवात्, साङ्काश्यकादौ लोपः स्यादेव, अनाकारादाविति नियमः, तत आकारादावपत्यानापत्ययोर्द्वयोरपि लोपप्रसङ्गो यद्यनापत्ये आकारादौ सम्भवति, अथ न सम्भवति तदा न कश्चिद्दोषः, आपत्यस्यैव तद्धिते तत्राप्यनाकारादेवेति नियमद्वयाश्रयणात् ॥

"क्यच्व्योश्च" ॥ 'गार्गीयतीति'। क्यचि चेतीत्वम्। 'गार्गायतइति'। अकृत्सार्वधातुकयोर्दीर्घः, क्यषस्त्वापत्यादसम्भवः। 'गार्गीभूतइति'। अस्य च्वाविती त्वम् ॥

"बिल्वकादिभ्यश्छस्य लुक्" ॥ बिल्वकादीनामस्मिन्प्रदेशे प्रातिपदिकगणे पाठाभावात्तत्परिज्ञानार्थमाह। 'नडादिष्विति'। नडादिषु बिल्वादयस्तावत्पठ्यन्ते, तत्र कुक्कि कृते यद्रूपं ककारान्तं तदिहानुकृतं, बिल्वक आदिर्येषामिति विग्रह्य समासः, जश्त्वेतु क्रियमाणे रूपविनाशप्रसङ्गान्न कृतमित्यर्थः। तेन बिल्वक आदिर्येषामिति अज्ञातादिषु यः कस्तदन्तानां ग्रहणं नाशङ्कनीयं, पाठाभावात्। 'छग्रहणं किमिति'। कृतकुगागमेभ्यः परस्तादन्यो न सम्भवतीति प्रश्नः। कथं पुनः कुको निवृत्तिप्रसङ्ग इत्याह। 'अन्यथा हीति'। इदमेव छग्रहणं ज्ञापकमस्त्येषा परिभाषेति। 'यकारमात्रस्येति'। उपधाया इत्यनुवृत्तेस्तस्यैव स्याद्यथापि तन्निवृत्तमेवमप्यादेः परस्येति परस्य प्रसङ्गादनिष्टमेव ॥

"तुरिष्ठेमेयस्सु" ॥ दोहीयसीत्यत्र घत्वादीनामसिद्धत्वात्पूर्वं तृशब्दस्य लोपे कृते पश्चान्निमित्ताभावात्तेषामभावः, लोपो भवतीत्युक्तन्तत्रान्त्यस्य प्राप्नोत्यत आह। 'सर्वस्येति'। कारणमाह। 'अन्त्यस्य हीति'। नन्वेवमनन्तरो लुगेव विधेयः, एवं सुखमेव सर्वस्य निवृत्तिर्लभ्यते ऽत आह। 'लुगित्येतत्त्विति'। कः पुनस्तदनुवृत्तौ दोषः स्यादत आह। 'तथाहीति'। न च पूर्वमेव गुणो भवति अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधतइतिवचनात्। 'इमनिज्ग्रहणमुत्तरार्थ-

मिति'। नेहार्थे, तृशब्दात्तस्यासम्भवात्, न चेदमेव कल्पकं भवितुमर्हति, उत्तरार्थतयाप्युपपत्तेः। नन्वेवमनादी गुणवचनादेवेति नियमादिष्ठेयसुनोरपि न सम्भवोत आह। 'इतरौ त्विति'॥

"टेः"॥ 'णाविष्ठवदिति'। सप्तमीसमर्थाद्वतिः, णावितिप्रतियोगिनि सप्तमीनिर्द्देशात्, तेनेष्ठनि यत्कार्यं तदतिदिश्यते न त्विष्ठनो यत्कार्यं तदपि, तेन बहूनाचष्टे बहयतीत्यत्रेष्ठस्य यिट् चेति णोर्यिट्न भवति, तदभावे तत्सन्नियोगशिष्टो भूभावोपि न भवति। केचित्तु भूभावमुदाहरन्ति भावयतीति। 'एतयतीति'। टिलोपातिदेशेनैव सन्नियोगशिष्टत्वाच्चकारनिवृत्तावपि सिद्धायां पुंवद्वचनं सन्नियोगशिष्टपरिभाषाया अनित्यत्वज्ञापनार्थं, तेन श्यैनेयः, ऐनेय इत्यादि सिद्धं भवति। अपर आह इडविडमाचष्टे ऐडविडयति, दरदमाचष्टे दारदयतीत्येवमादौ पुंशब्दातिदेशार्थं पुंवद्वचनमिति। ननु चेडविडादीनामिष्ठनि पुंवद्भावो न दृष्ट, इष्ठन एव तत्रासम्भवात्, नेष्ठनि दृष्टस्यातिदेशः किं तर्हि सम्भावितस्य, अन्यथा अतिराजयतीत्यादौ टिलोपो न स्यात्, प्रातिपदिकग्रहणं प्रकृतिमात्रोपलक्षणम्। तेन द्रोणीमाचष्टइत्यादावपि टिलोपो भवति, नात्र पुंवद्भावो ऽस्ति, अभाषित पुंस्कत्वात्। लिङ्गविशिष्ट परिभाषया वा ङीबन्तस्य ग्रहणम्। उक्तं हि, प्राक् यथाकथं चित्प्रातिपदिकग्रहणे लिङ्गविशिष्टं गृह्यतइति। स्यवयतीत्यादावत उपधाया इति वृद्धिर्न भवति, अङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्येति वचनात्। अस्यार्थः। अङ्गाधिकारविहिते कस्मिंश्चित्कार्ये वृत्ते पुनःकार्यान्तरस्य वृत्तौ प्राप्तायामविधिस्तस्य कार्यस्य, तच्चेदङ्गं निष्ठितं भवति, प्रयोगार्हं भवति, यत्र त्वनिष्ठितमङ्गं तत्र भवत्येव वृत्तिः, प्रापयति स्थापयतीति, कर्तारमाचष्टइत्यादौ तृशब्दस्य तुरिष्ठेमेयःस्विति लोपो भवति न वेति चिन्त्यम्॥

"स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः"॥ यद्यपि प्रकृतौ लोपशब्दो भावसाधनः तथापीह कर्मसाधनोपि ज्ञायते, यणादि परं लोप इति सामानाधिकरण्येन निर्द्देशात्, तदाह। 'यणादिपरं लुप्यतइति'। 'पूर्वग्रहणं विस्पष्टार्थमिति'। इको गुणवृद्धी इति

वचनाल्लुप्तावशिष्टस्य य इक् तस्य गुणो भविष्यतीति भावः । अत एव वचनादजादी प्रत्ययौ भवत इति । इनिमच् तु पृथ्वादिष्वपठितेभ्यो न भवत्यनभिधानात् ॥

"प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रप्द्राघिवृन्दाः" ॥ प्रियस्थिरोरुगुरुबहुलदीर्घाः पृथ्वादिषु पठ्यन्ते तेनैतेभ्यिमनिजनुवृत्तेश्चरितार्थत्वादितरेभ्यिमनिचः कल्पकमेतद्वचनं न भवति, तदाह । 'तेनान्येषामिति' ॥

"बहोर्लोपो भू च बहोः" ॥ 'भूयानिति' । आदेः परस्येत्यादेर्लोपः । 'अन्यथा हीति' । यदि पुनर्बहोरिति नोच्येत ततो यथा लोपः प्रत्ययानां भवति तथा भूभावोऽपि तेषामेव स्यात्, पर्यायेण तत्र लोप आदेर्भूभावः सर्वस्य शक्यते वक्तुं, पृथङ्निर्देशात्प्रत्ययानां न भविष्यति, अन्यथा भूलोपौ बहोरिति ब्रूयात्, एवं च कृत्वोत्तरपदभूम्नीति निर्देश उपपद्यतइति ॥

"इष्ठस्य यिट् च" ॥ 'लोपापवादो यिडागमइति' । नाप्राप्ते तस्मिन्नारम्भात् । 'तस्मिन्निति' । लोपापवादभूते, यदि तु लोपोऽप्यनुकृष्य विधीयते तदा इकारो नोच्चारणार्थः ॥

"ज्यादादीयसः" ॥ 'लोपस्येति' । यदि लोपो यिटा न व्यवहितः स्यात्तेनैव ज्यायानिति सिध्यतीति कृत्वा आदिति न वक्तव्यं स्यादिति भावः । कथं पुनर्लोपे सिद्धिरित्याह । 'लोपे हीति' । अकृत्साकारइत्यत्र कृङितीति नानुवर्त्ततइति भावः । उरुयेत्यादौ छान्दसत्वाद्दीर्घाभावः ॥

"र ऋतो हलादेर्लघोः" ॥ 'परिगणनं कर्त्तव्यमिति' । एवं च हलादेर्लघोरिति न वक्तव्यम् । 'मातयतीति' । उणादीनामव्युत्पन्नत्वात् तुरिष्ठेमेयःस्विति तृशब्दस्य लोपो न भवति, अत्र परत्वाट्टिलोपं बाधित्वा रभावः प्राप्नोति ॥

"प्रकृत्यैकाच्" ॥ 'इष्ठेमेयस्सु परत इति' । यदि त्विष्ठादीनामिहानुवृत्तिर्न स्यात्तदा श्रिये हितं प्राक् क्रीताच्छः, श्रीयं, ज्ञा देवतास्य ज्ञः स्थालीपाक इत्यत्र यस्येति लोपो न स्यात्, ततश्च श्रीयमित्यत्रेयङा-

देशः स्यात्, तस्मादनुवर्त्या इष्ठादयः । 'स्त्रजिष्ठइति' । अथ प्रादयः किमित्युपेक्षिताः, प्रेष्ठः, प्रेयान्, स्थेष्ठः, स्थेयानिति, असिद्धत्वात्प्रादीनां टिलोपो यस्येति लोपश्च न भविष्यतः, इह तर्हि श्रेष्ठः श्रेयानिति, अकारोच्चारणसामर्थ्याल्लोपो न भविष्यति, तस्माद्विन्मतोर्लुक्येवास्योदाहरणस्य संभवः, यद्येवं नाप्राप्ते टिलोपे आरभ्यमाणो विन्मतोर्लुक् लोपं बाधिष्यते, सत्यं, विन्नन्तस्य मत्वन्तस्य च टिलोपः प्राप्तस्तं बाधते, यस्तु तयोर्लुकि कृते अवशिष्टस्य टिलोपः प्राप्नोति तस्य कथं बाधकः स्यात्, नहि तस्मिन्नाप्राप्ते विन्मतोर्लुगारभ्यते, अवश्यं चैतदेवं विज्ञेयम्, अवशिष्टस्य यष्टिलोपस्तं न बाधतइति, अन्यथा यत्रावशिष्टमनेकाच् तत्रापि टिलोपो न स्यात्, ततश्च वसिष्टः वसीयानिति प्रत्युदाहरणं नोपपद्यते, एवं चातिशयेन ब्रह्मवान् ब्रह्मिष्ठः, अवशिष्टस्य नस्तद्धितइति टिलोपो भवति, बह्वृचब्राह्मणं च तस्माद्ब्राह्मणं ब्रह्मिष्ठं कुर्वीतेति, तथातिशयेन पयस्वी पयिष्ठ इति भवति, न तु पयसिष्ठ इति, अपर आह

इष्ठेमेयस्स्वनेकाचोप्यवशिष्टस्य नेष्यते ।
टिलोपो भाष्यकारेण प्रवृत्ते विन्मतोर्लुकि ॥

इति । 'प्रकृत्येत्यादि' । राज्ञोपत्यं राजन्यः, राजश्वशुराद्यत्, मनोरपत्यं मनुष्यः, मनोर्जातावञ्यतौ षुक्, ताभ्यां समूहे गोत्रोक्षोष्ट्रेत्यादिना वुञ् । 'आपत्यस्य चेत्यादि' । एतच्चानयोरपत्यवाचित्वमङ्गीकृत्योक्तं, यदा तु जातिमात्रमुभयत्र शब्दार्थः, अपत्यार्थस्तु नास्त्येवेति पक्षस्तदानापत्यत्वादेव लोपस्याप्रसङ्गाचार्थः प्रकृतिभावेन ॥

"इनण्यनपत्ये" ॥ 'सांकूटिनमिति' । कूट दाहे, दीर्घोपधः, अभिविधौ भावइनुण्, अणिनुणः ॥

"गाथिविदथिकेशिगणिपणिनश्च" ॥ मत्वर्थीयेन्नन्ता एते, गाथाशब्दो व्रीह्यादिः, विदथो यज्ञः ॥

"संयोगादिश्च" ॥ अयमपत्यार्थ आरम्भः ॥

"अन्" ॥ अनपत्यइति निवृत्तम् । 'सामनो वैमनइति' । तस्येदमित्यण्, सुयजोर्ङ्वनिप्, ह्रस्वस्य तुक्, सुत्वा, तस्यापत्यं सौत्वनः ॥

"ब्राह्मोऽजातौ" ॥ 'योगविभागोऽत्र क्रियतइति'। यदि न क्रियेत तदापत्यइत्यनुवर्त्तते वा न वा, तत्रानुवृत्तावनन्तरसूत्रेण प्रकृतिभावप्रतिषेधाचस्तद्धितइत्येव टिलोपस्य सिद्धत्वान्नियमार्थमेतद्भवति, अजातावेवापत्ये इति, तत्रापत्ये सिद्धमिष्टं ब्राह्मो नारदः, ब्राह्मणजातिरिति,अनपत्ये तु जातावजातौ च न क्वचिट्टिलोपः स्याद्ब्राह्मी ओषधिर्ब्राह्मं हविरिति,अननुवृत्तौ तु विधिनियमसम्भवे विधिरेव ज्यायानिति अनपत्ये 'अनि'ति प्रकृतिभावे प्राप्ते अजातौ टिलोपार्थं विध्यर्थमेतद्भवति, तत्र ब्राह्मं हविरित्यादि सिद्धं, ब्राह्मी ओषधिरिति न सिध्यति अजाताविति प्रतिषेधात्;ब्राह्मणी ओषधिरिति प्राप्नोति, अपत्ये च जातौ ब्राह्मण इति न सिध्यति, पूर्वसूत्रेण प्रकृतिभावे प्रतिषिद्धे टिलोपप्रसङ्गादिति भावः। विभक्तस्यार्थमाह । 'ब्राह्मइत्येतदिति'। 'सामर्थ्यादिति'। अपत्ये पूर्वेणैव टिलोपस्य सिद्धत्वाद्ब्राह्म इत्येतावता नियमस्य कर्त्तुमशक्यत्वाच्च, तत्रापत्येपि ब्राह्मो नारद इति परत्वादनेनैव टिलोपः। 'अपत्ये वेति'। अन्यथा अनपत्ये वापत्ये च जातौ प्रतिषेधः स्यात्, प्रसज्यप्रतिषेधश्चायमित्याह। 'अपत्ये जाताविति' ॥

"कार्मस्ताच्छिल्ये" ॥ 'यद्येवमिति'। यदि तु णप्रत्ययोऽयमित्यर्थः। 'नस्तद्धित इति टिलोपः सिद्ध इति'। अणि हि प्रकृतिभावः। 'ज्ञापनार्थमिति'। एवं च छत्रादिभ्यो णेति लाघवाय कर्त्तव्यं, णवचने प्रयोजनाभावात्। 'ताच्छीलिक इति'। तुल्यजातीयविषयत्वाज्ज्ञापनस्यैतल्लभ्यते, तेन तदस्यां प्रहरणं, प्रज्ञाश्रद्धार्चेत्यादिके णे हीन्न भवति ॥

"दाण्डिनायनहास्तिनायनाथर्वणिकजैह्माशिनेयवाशिनायनिभ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्मयानि" ॥ 'उपचारादिति'। मुख्यस्याध्ययनासम्भव उपचारे हेतुः। भ्रौणहत्येति तु निपातनानर्थक्यं, 'हनस्तोचिण्णलोरि'ति तकारस्य सिद्धत्वात्, न च नस्तद्धितइति टिलोपप्रसङ्गः, उभयोरनित्ययोः परत्वात्तस्यैव भावादत आह। 'हनस्तोचिण्णलोरिति'। धातुस्वरूपग्रहणे तत्प्रत्यये धातोरित्येवं विहितो यस्त-

त्रैव कार्यं विज्ञायते, न च ष्यञेवं विहितः किं तर्हि प्रातिपदिकादि-त्येवं, तेनात्र तो निपात्यते, कथं पुनर्ज्ञायते धातोः स्वरूपग्रहणे तत्प्र-त्यये कार्यं विज्ञायतइति, अत एव निपातनात्, एवं तर्हि कुत्वनिवृत्त्यर्थं निपातनं, नैवम् । [1]एवं तर्हि 'न क्वादे'रित्यत्र प्रकरणे भ्रूणघ्नः ष्यञीत्य-वक्ष्यत्, अतस्तत्त्वार्थमपि निपातनं सत् ज्ञापकमेव, ऐक्ष्वाकशब्दोयमाद्यु-दात्तो ऽन्तोदात्तश्चेष्यते, तत्रान्यतरस्य पाठे इतरस्योकारलोपो न सिद्ध्यति, तत्राह । 'स्वरसर्वनामेति' । उदात्तादीनामविभागेनावस्थानमेकश्रुतिः, सर्वनामवत्सर्वनाम, यथैव हि तस्यापत्यमित्यादौ उपगुप्रभृतीन्विशेषा-न्सर्वनाम प्रतिपादयति तथैकश्रुतिरप्युदात्तादीन्स्वरविशेषानिति एकश्रुतेः सर्वनामत्वम् । 'इयादेशापवाद इति' । केकयादिसूत्रेण प्राप्त इया-देशः, इह मित्रयुशब्दस्य चतुर्ग्रहणं क्रियते, गृष्ट्यादिषु प्रत्ययसिद्ध्यर्थं, यस्कादिषु लुगर्थं, केकयादिसूत्रे इयादेशार्थम्, इदं चतुर्थं युलोपार्थम्, तत्र द्विर्ग्रहणमकर्त्तुं शक्यमित्यभिप्रायेणाह । 'अथ किमर्थमिति' । 'लुगर्थः पाठो न कर्त्तव्य इति' । यञञोरित्येव सिद्धत्वात् । परिह-रति । 'नैतदस्तीति' । 'अण् प्राप्नोतीति' । यदि तु सङ्घाङ्कलक्षणेष्वि-त्यस्यानन्तरं न मैत्रेयादित्युच्येत तदा त्रीणि ग्रहणानि नार्थो निपातनेन । 'यलोप इति' । यशब्दस्य लोप इत्यर्थः ॥

"ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानि छन्दसि" ॥ 'मलोपो निपात्यतइति' । तस्यासिद्धत्वाद्यस्येति लोपाभावः । एवमप्यकृत्सार्व-धातुकयोर्दीर्घ इति दीर्घः प्राप्नोति, अङ्गवृत्तेः पुनर्वृत्ताविति वचनान्न भविष्यति । क्वचित्तु मकारलोप इति पठन्ति । तत्र यस्येति लोपे कृते प्रत्ययाकारस्य श्रवणम् ॥

इति श्रीह[2]रदत्तमिश्रविरचितायां पदमञ्जर्यां षष्ठस्याध्यायस्य

चतुर्थः पादः ॥

अध्यायश्चायं समाप्तः ।

शुभं भवतु ।

१ तथा हि इति इं पु· पा· ।
२ हरिहरेति इं पु· पा· ।

श्रीगणेशाय नमः ॥

अथ सप्तमोऽध्यायः ।

काशिकाव्याख्या पदमञ्जरी ।

"युवोरनाकौ" ॥ शास्त्रस्य लाघवार्थं युवू प्रत्ययौ उपदिष्टौ, तयोरनेनानाकावादेशौ विधीयेते, तत्रतत्र ह्यनाकयोरेवोपदेशे शास्त्रस्य गौरवं स्यात्, इह कस्मान्न भवति, यु मिश्रणे, युतः, युतवान्, उदितोर्युवोरिदं ग्रहणं, कथम्, ल्युडादिषूकारो ऽनुनासिक इत्सञ्ज्ञकः, एवमपि यूत्त्वा यूतः यूतवान् अत्र प्राप्नोति, ऊठस्त्वनुदिदवकाशः, अथार्थवतो युवुशब्दस्य ग्रहणम्, अनर्थकश्चायम्, तेन धात्वन्तस्य न भवति, भुज्युः मृत्युः कंयुः शंयुः ऊर्णायुरित्यादावुकारस्यानित्सञ्ज्ञकत्वादादेशाभावः । यदि तर्हि ल्युडादिषूकार इत्सञ्ज्ञकः नन्दनः कारकः, उगिदचामिति नुम् प्राप्नोति, उगितो झलन्तस्य नुम्, न चैतौ झलन्तौ, तर्हि झल्ग्रहणं कर्त्तव्यं, नेत्याह, यदेतन्नपुंसकस्य झलच इति झल्ग्रहणं तत्पुरस्तादपकृष्यते, उगिदचां सर्वनामस्थाने धातोर्झलः, युजेरसमासे, ततो नपुंसकस्य, झलइत्येव, ततोऽचः, नपुंसकस्येत्येव, तच्चावश्यं झल्ग्रहणमपकृष्टव्यम्, अन्यथोगितो लिङ्गविशिष्टस्यापि नुम् प्रसज्येत गोमती भवती, इह तर्हि नन्दना कारिका उगितश्चेति ङीप् प्राप्नोति, ज्ञापकात्सिद्धम्, यदयं क्वचिद्युवू षिट्टितौ करोति, शिल्पिनिष्वुन्, ट्युट्युलौ तुट् चेति, तज्ज्ञापयति न युवोरीकारो भवतीति, नैतदस्ति ज्ञापकम् । षित्करणं ङीषर्थम्, टित्करणमनुपसर्ज्जनार्थम्, टितो ह्यनुपसर्जनात् ङीप् भवति, उगितः पुनरविशेषेण, तथा शातनपातनशब्दौ ल्युडन्तौ गौरादिषु पठितौ, तत्र शातनितरा पातनितरा, नद्याः शेषस्यान्यतरस्याम्, उगितश्चेत्युगिल्लक्षणो ह्रस्वविकल्पः प्राप्नोति । ननु चोगित इत्येवमुगित्संज्ञाशब्दनेन या नदी विहिता तस्यास्तत्र ग्रहणं, नेत्याह । इह हि दोषः स्यात्, भोगवतितरा, गौरिमतितरा, शार्ङ्गरवादि-

ङीनन्तावेतौ तत्र ह्रस्वविकल्पो न स्यात्, दृश्यते चात्र[1] ह्रस्वविकल्पो भाष्यकारेण, तस्माच्चैवं शक्यम् उदितोर्युवोर्ग्रहणम् इति, न चेदेवं युतः युत्वा भुज्युः शंयुरित्यत्रापि प्राप्नोति, तत्राह। 'अनुनासिकयणोरिति'। सन्ति हि यणः सानुनासिका निरनुनासिकाश्च, तत्र येषामादेश दृश्यते तेषु यकारवकारावनुनासिकौ पठितव्यौ, तेन न क्वाप्यनिष्टप्रसङ्गः। 'प्रत्यययोरिति'। वस्तुकथनमेतत्, न त्वप्रत्ययनिवृत्त्यर्थं, तथाविधस्यानुनासिकस्य यणो ऽसम्भवात्। 'मृत्युरिति'। भुजिमृङ्भ्यां युक्त्युकाविति सूत्रे सहनिर्दिष्टत्वादिदमुदाहृतं, शक्यते ह्यत्र वक्तुमङ्गस्य यौ युवू, कौ चाङ्गस्य युवू, ययोरङ्गमित्येतद्भवति, कयोश्चैतद्भवति, प्रत्यययोः। न चैष प्रत्यय इति। आनर्थक्याच्च ट्युट्युलोस्त्वनादेशे कृते पश्चात्तुडित्यर्थवत्त्वं प्रत्ययत्वं च, किमुच्यते ऽनुनासिकत्वं न प्रतिज्ञायतइति, न पुनर्न पठ्यतइत्यत आह। 'प्रतिज्ञानुनासिक्या इति'। प्रतिज्ञयानुनासिक्यं येषां ते तथोक्ताः, सर्वत्र पाठाभावात्सतोपि वा पाठस्य सङ्कीर्णत्वात्प्रतिज्ञासमधिगम्यमेवानुनासिकत्वमित्यर्थः। युवोरिति समाहारद्वन्द्वश्चेत्स नपुंसकमिति नपुंसकत्वे सति औत्वगुणवृद्धितृज्वद्भावेभ्यो नुम् पूर्वविप्रतिषिद्धमिति वचनाद् घेर्ङितीति गुणं बाधित्वा इकोचि विभक्ताविति नुमि सति युवुन इति भवितव्यम्, इतरेतरयोगद्वन्द्वे तु द्विर्वचने यणादेशे च सति द्वयोर्वकारयोः श्रवणप्रसङ्गः, स्थानिवद्भावाद्धलि लोपो ऽपि नास्ति, तत्कथमयं निर्देश इत्याह। 'युवोरिति'। 'नपुंसकलिङ्गता चेति'। न भवतीति वक्ष्यमाणेन संबन्धः। मध्ये हेतुः। 'लिङ्गमशिष्यमिति'। 'छान्दसो वर्णलोप इति'। अकृतएव यणादेशे उकारस्य लोपः, कृते वा तस्मिन्न्यन्य[2]तरस्य वकारस्य, अपर आह। कर्मधारयोयम्, अवयवधर्मेण समुदायस्य व्यपदेशः। युश्चासौ समुदायो युश्चलक्षणो वुश्चासाविति तत्र समुदायस्य क्वचिदभावादवयवयोरेवानाकादेशाविति।

"आयनेयीनीयियः फढखच्छघां प्रत्ययादीनाम्" ॥ फकारादि-

१ अत्रापीति इं· पु· पा·।
२ इतरस्येति इं पु· पा·।

ष्वकार उच्चारणार्थः, व्यञ्जनमात्रं स्थानि, अन्ते फढखच्छघामित्यनच्क-निर्द्देशात्, एवं च निरनुबन्धकपरिभाषा न प्रवर्त्तते। 'आढ्यकुलीन इति'। अपूर्वपदादिति वचनात्कुलात्ख इत्यनेन सपूर्वपदादपि खो भवति, फक्क नीचैर्गतौ, ढौक्ट तौक्ट गत्यर्थौ, इह प्रत्ययाद्युदात्तत्वं संज्ञासंनियोगेन विधानादन्तरङ्गम्, एते त्वायन्नादयोऽङ्गाधिकारे विधानाद्बहिरङ्गाः, ततश्च यत्र स्वरार्थो ऽनुबन्धो नास्ति शिलाया ढो वृद्धाच्छ इत्यादौ तत्राद्युदात्तत्वे कृते पश्चाद्भवन्त एते आदेशा अस्वरकस्याच उच्चारणासम्भवादनियतस्वराः स्युरित्याशङ्क्याह। 'आयन्नादय इत्यादि'। अयमभिप्रायः। प्रत्ययादीनां फकारादीनामङ्गसम्बन्धाव्यभिचारात्प्रयोजनाभावादिहाङ्गस्येति न सम्बध्यते, तेन एतेऽप्यन्तरङ्गाः, तत्र परत्वादेतेषु कृतेषु पश्चादाद्युदात्तत्वमिति। अत्रैव ज्ञापकमाह। 'तथा चेति'। यदि प्रत्ययस्वरे कृते आयन्नादय आदेशाः स्युस्ततो घशब्दाकारस्योदात्तत्वे कृते घकारस्य हलः स्रंसनधर्मिणः स्रंसनधर्मिण्यनुदात्तआदेशे कृतेन्तोदात्तत्वं सिद्धमिति चित्करणमनर्थकं स्यादिति भावः। 'इयङिति'। 'वावचनं ज्ञापकमिति'। यदि धातुप्रत्ययानामप्येते आदेशाः स्युर्ऋतेश्छङित्येव ब्रूयात्, न च छङि सति वलादिलक्षणे इटि कृते अनादित्वादियादेशो न स्यादिति वाच्यम्, इदानीमेव ह्युक्तमन्तरङ्गा आदेशा इति। अपर आह। यदि धातुप्रत्ययेष्वेतज्ज्ञापकं प्रातिपदिकप्रत्ययेष्वपि शक्यं वक्तुं यदयमीयसुनं शास्ति तज्ज्ञापयत्याचार्यो न प्रातिपदिकप्रत्ययानामिमे आदेशा [1]इति, यदि स्युस्तर्हिच्छसुनमेव विदध्यात्। एतावन्तश्च प्रत्ययाः, धातुप्रत्ययाः प्रातिपदिकप्रत्ययाश्चेति, उच्यन्ते चादेशास्ते वचनात्सर्वत्रैव स्युरिति। 'इत्सञ्ज्ञया भवितव्यमिति'। न च वचनसामर्थ्यादित्सञ्ज्ञाया बाधनमित्याह। 'तद्धितेषु हीति'। 'प्रतिविधानं कर्त्तव्यमिति'। प्रतिविधानं तु प्राचामवृद्धात्फिन्बहुलमिति फिनो नित्करणादित्सञ्ज्ञाया अभाव इति। न च फेश्छ चेत्यत्र फिनः फिञश्च सामान्यग्रहणार्थं नित्करणं, वृद्धादित्यधिकाराद्धि फिञ एव तत्र ग्रहणं न फिनः॥

१ भवन्तीति, यदि स्युस्तरप्छसुनाविति छसुनमिति इं॰ पु पा॰।

"झोन्तः ॥ 'आदिग्रहणं निवृत्तमिति'। तदनुवृत्तौ हि शयान्ते इत्यत्र शीङो लेटि लेटोऽडाटाविति लावस्थायामेव प्राप्ते आटि सति झकारस्यानादित्वान्न स्यात्, कथं पुनः समासनिर्द्दिष्टानामेकदेशोऽनुवर्त्तते, नैष दोषः। अनाश्रितार्थकं शब्दमात्रं स्वरितत्ववशादनुवर्त्तते इति पक्षे यस्यैव स्वरितत्वं प्रतिज्ञातं तस्यैवानुवृत्तिः, अर्थाधिकारपक्षे तु समासार्थस्यैकत्वात्तस्यैवानुवृत्तिः स्याद्वा न वा, यद्वा प्रत्ययग्रहणं पूर्वसूत्रे पृथक् पदं लुप्तविभक्तिकं, तेन तस्यैवानुवृत्तिर्भविष्यति, आदेशे त्वकार उच्चारणार्थः, तेन पचन्तीत्यादौ श्रवणं न भवति ॥

"अदभ्यस्तात्" ॥ 'ददतीत्यादि'। जक्षतीत्यादौ यत्रोपदेशानन्तरमभ्यस्तसञ्ज्ञा तत्राप्यवश्यं विकरणाभावः प्रतीक्ष्यः, अन्यथा नित्यत्वाच्छपि कृते तेन व्यवधानान्न स्यात्, ततश्च ददतीत्यादावपि शपः श्लावभ्यस्तसञ्ज्ञायामदादेशो भवति। 'जुसादेशेन तु बाध्यतइति'। तस्यानवकाशत्वात्। 'अ[1]त्राप्यादेशे कृते प्रत्ययाद्युदात्तत्वं भवतीति'। उत्तरत्रेति भावः। इह त्वभ्यस्तानामादिरिति स्वरो भवति ॥

"आत्मनेपदेष्वनतः" ॥ अनभ्यस्तार्थमिदं वचनम्। 'चिन्वतामिति'। लोट्, टेरेत्वम्, आमेतः। 'च्यवन्तइति'। ननु चात्रापि प्रागेव शपः परत्वाददादेशप्रसङ्गः, अनतइत्यस्य तु बेभिद्यन्तइत्यादिरवकाश इत्यत आह। 'नित्यत्वादिति'। 'झकारविशेषणं किमिति'। अतानामात्मनेपदानामधिकृतस्य प्रत्ययस्य वा विशेषणे को दोष इति प्रश्नः। 'शयान्तेइति'। अत्राङ्गस्यानन्तरमात्मनेपदमाटस्तद्ग्रहणस्य तद्ग्रहणेन ग्रहणात्, झकारस्त्वाटा व्यवहितः, अन्तादेशस्त्वङ्गविशेषानुपादानादत्रापि भवति ॥

"शीङो रुट्" ॥ 'झादेशस्यात इति'। ननु च नेहाद्ग्रहणमस्ति, यदपि प्रकृतं तदपि प्रथमानिर्द्दिष्टं, षष्ठीनिर्द्दिष्टेन चेहार्थः, शीङ इत्येषा पञ्चमी अदिति प्रथमायाः षष्ठीं प्रकल्पयिष्यति, तस्मादित्युत्तरस्येति। 'शेरतइति'। सार्वधातुकावयवस्य झस्यादादेशस्तदागमो रुट्

१ इहापीति॰ इं॰ पु॰ पा॰।

तद्ग्रहणेन गृह्यते, अवयवस्य समुदायं प्रत्यवयवत्वं लोकेपि दृश्यते, यथा देवदत्तस्याङ्गुलिरिति, सार्वधातुकस्याप्यवयवो रुडिति शीङः सार्वधातुके गुण इति गुणो भवति, किं पुनः कारणं रुडागमो झादेशस्यातो विधीयते, न झकारस्यैव विधीयते, एवं हि न षष्ठी प्रकल्प्या भवत्यत आह। 'रुडयमिति'। यदि तु ककारासञ्जनेन पूर्वान्तः क्रियेत शेरतइत्यत्र गुणो न स्यादनिगन्तत्वात् तस्मात्परादिरेव वक्तव्यः, स यदि झकारस्यैव स्यात् ततो यथा शयान्तेइत्यत्राटा व्यवहितत्वाझस्यादादेशो न भवति तथा शेरतइत्यत्रापि न स्यात् रुटा व्यवहितत्वात्। ननु च युक्तमाटा व्यवधानं, सहि सार्वधातुकभक्तस्तदेव न व्यवदध्यात्, झकारं तु व्यवदधात्येव, रुट् पुनर्झकारभक्तः स कथं तस्य व्यवधायकः। उच्यते। गृह्यतां ताव-सद्ग्रहणेन तथापि निर्दिश्यमानस्यादेशा भवन्तीति यदत्र निर्दिश्यते झ इति विशिष्टं रूपं न तदनन्तरं, यश्चानन्तरो रेफझकारसमुदायो न स निर्दिश्यतइति न स्यादेवादेशः। अपर आह। आदेशो न स्यादिति, कोर्थः, झस्य न स्यादिति, कस्य तर्हि स्यात् आदेः परस्येति रुट एव स्यात्, न च रुटो वैयर्थ्यं स्यात्, झकारस्य श्रवणार्थत्वादिति, तच्चिन्त्यम-नेकाल्त्वात्सर्वादेशः प्राप्नोति, सर्वादेशे रुटो वैयर्थ्यमिति चेत् किं कुर्मो माभूदादेशः, शीङ इत्यनुबन्धोच्चारणं यङ्लुङ्निवृत्त्यर्थं, व्यतिशेश्यते, गुणोपि न भवति, तत्राप्यनुबन्धनिर्देशात्॥

"वेत्तेर्विभाषा"॥ 'संविद्रतइति'। 'समो गम्यृच्छी' त्यादिनात्मनेपदम्। 'वित्तइत्यादि'। विद विचारणे, रुधादिरनुदात्तेत्, सत्तालाभार्थयोस्तु विकरणव्यवधानादेवाग्रहणम्, अत्र च बहुवचनं प्रत्युदाहरणम्, इतरयोरुपन्यासो विचारणार्थस्येदं बहुवचने रूपमिति प्रदर्शनार्थम्, विदन्ते इति रूपस्य लाभार्थं तौदादिके स्वरितेत्त्वादात्मनेपदे एकवचने 'शे मुचादीना' मिति नुम्यपि कृते सम्भवात्। किं च वेत्तेरिति श्तिपा निर्देशादेव यङ्लुकि न भवति, व्यतिवेविदतइति॥

"बहुलं छन्दसि"॥ 'बहुलवचनादन्यत्रापि भवतीति'। एतद-

र्थमेव विभाषाग्रहणे प्रकृतेपि बहुलग्रहणं कृतम् । 'अदृश्रमिति'। 'द्वरितो वे' ति वाङ् ॥

"अतो भिस ऐस्" ॥ 'अतिजरसैरिति'। अत्रैव चैकारस्य श्रवणार्थमैसादेशः कृतः, वृक्षैरित्यादावेसादेशेपि वृद्ध्या रूपं सिद्धम्, अतो गुणइति पररूपं तु न भवति, यदि स्यादिसमेव विदध्यात् । 'परत्वादिति'। एत्वस्यावकाशो वृक्षेषु, ऐसोत्रकाशः कृतएत्वे, प्रागेत्वादुभयप्रसङ्गे परत्वादेत्वप्रसङ्ग इति चेन्मन्यसे अत ऐस् क्व भविष्यति, एत्वे कृते मुख्यमकारान्तं न भवतीति प्रश्नः । 'कृतएत्वे भौतपूर्व्यादिति'। भूतपूर्वस्य भावो भौतपूर्व्यं, सांप्रतिकाभावाद्भूतपूर्वगतिराश्रीयतइति भावः । 'एस् तु नित्यस्तथा सतीति'। एवं हि सत्यैस्भावो नित्यः, कृताकृतप्रसङ्गित्वादेत्वं त्वैसि कृते न प्राप्नोति, अझलादित्वात्, न च तत्र भूतपूर्वगतिः, मुख्यस्यैव सम्भवात्, एतच्चोद्यपरिहारमुत्सर्गापवादभावमनाश्रित्य कृतं द्रष्टव्यं, तदाश्रयणे हि नाप्राप्तएत्वआरम्भादैसपवाद इत्ययुक्तो विप्रतिषेधः स्यात् ॥

"नेदमदसोरकोः" ॥ इदमदसोरिति भिसपेक्षया सम्बन्धलक्षणा षष्ठी । 'एभिरिति'। त्यदाद्यत्वं, हलि लोप इतीद्भागस्य लोपः । 'अमीभिरिति'। ऐसि प्रतिषिद्धे बहुवचने झल्येदित्येत्वम्, एत ईद्बहुवचनइतीत्वमत्वे, अकोरित्येतदनर्थकं, कथं, विशिष्टरूपाश्रयोयं प्रतिषेधः, इदमदसोरिति तत्राकचि कृते रूपभेदादेव न भविष्यति, तत्राह । 'अकोरित्येतदेवेति'। ज्ञापनस्य प्रयोजनं सर्वके इत्यादौ सर्वनामकार्यप्रवृत्तिः, इमौ द्वौ प्रतिषेधावुच्येते द्वावपि शक्याववक्तुं, कथम्, एवं हि वक्ष्यामि, इदमदसोः कादिति, तन्नियमार्थं भविष्यति, इदमदसोः कादेव नान्यत इति, नैतदस्ति, विपरीतोपि नियमः स्यात्, इदमसोरेव कादिति, ततश्च सर्वकैरित्यादौ न स्यात्, एभिरित्यादौ च स्यादेव तन्मध्यपरिभाषा च न ज्ञापिता स्यात्, क्वचित्तु वृत्तावेव पठ्यते, इदमदसोः कादिति नोक्तं, विपरीतोपि नियमः स्यादिदमदसोरेव कादितीति ॥

["Your coacher in archery, was the Destroyer of the Three Cities,—your subduable was Kārtikēya (*a*) (or Kārtavīrya ?),—your abode too, the Ocean forced by your weapons,—and this Earth an object of gift (to be given away) for you;—though all this is so, yet my sword the Chandrahāsa is ashamed at ever having competed (or coped) with your Axe, which cut off the head of Rēṇukā."]

Here (*b*) in विजेय the future-passive-participial affix यत् is inexpressive of the past-participial affix क्त (which is meant here).

5*a*. (To exemplify the *Indecorous in shame*)—

"अतिपेलवमतिपरिमितवर्णं &c." ॥

["A rogue always talks little and that too very softly and quietly; though in reality he bears a heart made up as it were of poison."]

Here the use of the word पेलव (which is the name of a secret part of the body, in the Lāta language) is not decent.

5*b*. (To exemplify the *Indecorous in Disgust*)—

"यः पूयते सुरसरिन्मुखतीर्थे &c." ॥

["Under whose vision will this man fall, who is purified, by bathing in such sacred places as Gangā and others, and by strengthening all his intention or intellect by means of studying the Sciences,—he of a birth gentle and respectable, the (personified) vigour of energetic people."]

Here the use of the word पूय (implying *blood in a disgusting form*) is indecorous.

(*a*) Kārtavīrya would be the better reading,—more in compatible with the Purāṇic version of Paraçurāma's great victory over Kārtavīrya. And the subjugation of Kārtikēya by Paraçurāma, if it is found in the Purāṇas at all, is not half so well-known in Sanskrit classical literature, as his other victory over Kārtavīrya; for which latter too was his incarnation.

(*b*) The affix यत् expresses the sense of possibility, which implies futurity; here, however, the past victory is referred to; otherwise it would be no eulogy to Paraçurāma.

5c. (To exemplify the *Indecorous in inauspiciousness*)—

"विनयप्रणयैककेतनं सततं योऽभवदङ्ग तादृशः ।
कथमद्य स तद्वदीह्तां तदभिप्रेतपदं समागतः" ॥

["O friend! he who ere this, used to be the one abode as it were, of modesty and affection,—how am I to see him, now that he has got a position desired only by low people?"]

[*Page* 366]. Here (*a*) the use of the word प्रेत (which implies one who is dead) is not in good taste.

6. (To exemplify the *Ambiguous*)—

"कस्मिन् कर्मणि सामर्थ्यमस्य नोत्तपतेतराम् ।
अयं साधुचरस्तस्मादञ्जलिर्बध्यतामिह" ॥

["In which deed does his energy not manifest itself,—and since he is a virtuous character, join your palms (in reverence) to him."]

Here the ambiguity lies in साधुचर—does this mean that 'formerly he used to be virtuous' (resolving the word into साधु+the affix चरट्, signifying previous existence) or that 'he acts in the path of virtue' (making the word consist in साधु+चर, the root चर+the affix ट) (*b*).

7. (To exemplify the *Guessed Meaning*)—

"किमुच्यते ऽस्य भूपालमौलिमालामहामणेः ।
सुदुर्लभं वचोबाणैस्तेजो यस्य विभाव्यते" ॥

["What shall be said of this gem of the head-garland of kings!—he whose splendour appears such as is hard to be obtained even by the word-arrowed beings (the Gods)."]

(*a*) This fault is also found, as remarks the Com., in *Çakuntalā* VI.—"वयस्य! अन्यच्च शकुन्तलायाः प्रसाधनमभिप्रेतं लिखितुं विस्मृतमस्माभिः"।

(*b*) Pānini "भूतपूर्वे चरट्" ['चरट् is used to denote that which existed before'] (V. iii. 53.) and "चरेष्टः" (III. ii. 16.) ["The affix *ta* is added to the root 'char,' (in the active sense).]

[*Page* 367]. Here by the word वच: is indicated the word गी: (thus making गीर्वाण, a name of the Gods, by the relation of expressing the expressed—an indicative indication, based neither on tradition nor on any special motive, and hence faulty). It is not only the former word of a compound, but also the latter, that cannot bear a synonymous change,—e. g. जलधर (cloud) for जलधि (ocean); in बड़वानल it is the former word (that cannot bear the synonymous change into अश्वानल).

Though *of improper signification*, &c., are only forms of *Incapable of giving sense*, yet they are spoken of separately, because we must have had to exemplify them as so many subdivisions, and also because they have been separately treated of by some rhetoricians.

Defects of the Sentence.

53-55.—[*Page* 368]. The (faulty) sentence is such as—(1) of discordant or inappropriate letters, (2) having the Visarga blunted, (3) having the Visarga rejected; (4) Cacophonous (of unharmonious Euphony), (5) of Unrhythmical metre, (6) Deficient in words, (7) Redundant in words, (8) with repeated words, (9) having its excellence receding or falling off, (10) Resuming the concluded, (11) having a word isolated in a distinct half, (12) Devoid of an intended connection, (13) omitting a necessary (adjunct) statement, (14) with misplaced word, (15) having a compound out of place, (16) confused, (17) parenthetical, (18) Regardless of usage, (19) Wanting in Uniformity or Unconsonant, (20) Irregular in Syntax, (21) of undesirable or distasteful second entendre.

The concordance of letters with regard to *Rasa* will be spoken of later on (Ch. VIII.)

(1) The opposite of this, is the *discord of letters.*

To exemplify this in the Erotic—

"अकुण्ठोत्कण्ठया पूर्णमाकण्ठं कलकण्ठि माम् ।
कम्बुकण्ठ्याः क्षणं कण्ठे कुरु कण्ठार्तिमुद्धर" ॥

["O thou sweet-voiced! Bring about my embrace with that conch-necked one, even for a moment, and thus remove the pain of my neck,—of me, who am full to my very throat with longing for her.]

[*Page* 369.] To exemplify the same in the Furious—

"देशः सोऽयमरातिशोणितजलैर्यस्मिन् ह्रदाः पूरिताः
क्षत्रादेव तथाविधः परिभवस्तातस्य केशग्रहः ।
तान्येवाहितहेतिघस्मरगुरूण्यस्त्राणि भास्वन्ति मे
यद्रामेण कृतं तदेव कुरुते द्रोणात्मजः क्रोधनः" ॥

[*Vēṇīsanhāra*, Act III.]

["This ground is the same where tanks were filled (by Paraçurāma) with the blood of slaughtered foes. The disgraceful injury, in the shape of catching hold of the locks of one's father, is the same, (as of Paraçurāma's father), coming as it does from a Kshatriya (Dhrishtadyumna in the present instance, and Kārtavīrya in the case of Jamadagni). And further these my weapons too shine resplendent, being the suppressors of the weapons of the enemy—(see!) the wrathful son of Droṇa is doing what was done by Paraçurāma!"]

Here long compounds and harsh-sounding words would have been more in keeping with the sentiment; as in the following:—

[*Page* 370.] "प्रागप्राप्तनिशुम्भशाम्भवधनुर्द्वैधाविधाविर्भवत्-
क्रोधप्रेरितभीमभार्गवभुजस्तम्भापविद्धः क्षणात् ।
उज्ज्वालः परशुर्भवत्वशिथिलस्त्वत्कण्ठपीठातिथि-
र्येनानेन जगत्सु खण्डपरशुर्देवो हरः ख्याप्यते" ॥

[*Mahāvīracharita*, Act II.]

["May this blazing and powerful axe of mine be the guest of the surface of your neck—my axe through which Hara is known in the world as "Of broken Axe" (खण्डपरशु); the axe being moved by mine, Bhārgava's, pillar-like arms, terrific as being urged to action by the wrath excited by the bifurcation of the ever unbent bow of Çiva!"]

The words in the fourth foot, where there is no wrath (as referring to his preceptor), are quite in harmony with the sentiment (love for one's *Guru*).

[*Page* 371.] (2) & (3) To exemplify the '*Blunted Visarga*,' *i. e.* where the Visarga is transformed into उ, and 'the *Rejected Visarga*'—

[*Page* 372.] (*a*) "धीरो विनीतो निपुणो वराकारो नृपोऽत्र सः।
यस्य भृत्या बलोत्सिक्ता भक्ता बुद्धिप्रभाविताः ॥

["That king, is beautiful in form, expert, humble and firm; his servants, strong in intelligence, devoted to their master and proud of their strength."]

(4) Cacophony is the discordance in Euphony; this is three-fold—(4*a*) Disjunction, (4*b*) Indecorousness, and (4*c*) Harshness:—

[*Page* 373.] (4*a*) To exemplify *Disjunction*—

"राजन्विभान्ति भवतश्चरितानि तानि
इन्दोर्द्युतिं दधति यानि रसातले ऽन्तः"।
धीदोर्बले अतितते उचितानुवृत्ती
आतन्वती विजयसम्पदमेत्य भातः ॥

["O king! those thy actions appear bright and resplendent, which bear the splendour of the moon even in the innermost lower world; and the great force of thy intellect and arms directed to proper channels brings about thy victory and prosperity, and thus thou shinest in the world."]

(Here तानि, इन्दो and the whole of the 3rd foot.)

(*a*) In the first half the Visarga is blunted being changed into उ; and in the second it is altogether deleted.

[*Page* 374.] Or again

"तत उदित उदारहारहारिद्युतिरुच्चैरुदयाचलादिवेन्दुः ।
निजवंश उदात्तकान्तकान्तिर्वत मुक्तामणिवच्चकास्त्यनर्घः" ॥

["That great man of the exquisitely fascinating splendour in his family, shines like a pearl, having, like the moon, risen high from the rising mount and bearing the resplendence of a splendid pearl-necklace."]

In the former quotation the optional Disjunction (in तानि, इन्दो) is a fault even when occuring once; on the other hand, where the disjunction is caused by the intervention of a प्रगृह्य (*a*) and the like, it is the frequent repetition of such disjunction that constitutes a fault (as in the last example).

[*Page* 375.] (4*b*) "वेगादुड्डीय गगने चलण्डामरचेष्टितः ।
अयमुत्तपते पत्री ततोऽत्रैव रुचिङ्कुरु" ॥

["This bird of unrestrained action having flown to the sky with great velocity, finds it hot there; so rest here."]

Here there is indecorousness in Euphony (in चलण्डामर and रुचिङ्कुरु.)

(4*c*) "उर्व्यसावत्र तर्वाली मर्वन्ते चार्व्यवस्थितिः ।
नात्रार्जु युज्यते गन्तुं शिरो नमय तन्मनाक्" ॥

["Here near a sandy desert, there is a beatiful line of trees offering a good resting place; hence it is not proper to go through it straight, so lower your head a little."]

(Here the Euphony becomes harsh).

[*Page* 376.] (5) The *Unrhythmical is* threefold—(5*a*) the one which though quite fulfilling the conditions of the metre, is yet unmelodious (not pleasing to the ear); (5*b*) the second is that

---

a) प्रगृह्य is another name for words in the Dual Number ending in ई ऊ and ए and such a word does not change its form. *Vide* "ईदूदेद्द्विवचनम् प्रगृह्यम्" Pāṇini) and "प्लुतप्रगृह्या अचि नित्यम्" (Pāṇini.)

in which there is no hiatus on the last letter of the foot; and (5c) the third and the last is that which is not in harmony with the predominating *Rasa* (or sentiment) depicted.

(5a) To exemplify the first—

[*Page* 377.] "अमृतममृतं कः सन्देहो मधून्यपि नान्यथा
मधुरमधिकं चूतस्यापि प्रसन्नरसं फलम् ।
सकृदपि पुनर्मध्यस्थः सन् रसान्तरविज्जनो
वदतु यदिहान्यत् स्वादु स्यात् प्रियादशनच्छदात्" ॥

["There is no doubt that nectar is really nectar-like; nor is honey otherwise; the fruit of the mango too is of a pleasing and exceptionally sweet taste. Yet let any disinterested judge, capable of discriminating tastes, assert if anything in this world is sweeter than the lips of a beloved wife!"]

Here (*a*) यदिहान्यत्स्वादु, &c. is not pleasing to the ear.

[*Page* 378.] Or again

"यं परिहरिउं तीरइ मणअं पि ण सुंदरत्तणगुणेण ।
अह णवर जस्स दोसो पडिवक्खेहिं पि पडिवण्णो" ॥

["These actions of Cupid's are such as are incapable of being abandoned, on account of their elegance and beauty; they are such that even those who think of their non-relinquishableness as a fault, cannot but accept it to be a true fact."]

Here, in the Gāthā metre, the close proximity of a स-syllable (two shorts followed by a long, as in हरिउम्) and a भ-syllable (a long followed by two shorts, as in तोरइ) is unpleasing to the ear, (and is so laid down in works on metre.)

(5b) (To exemplify that where there is no hiatus on the last letter of the foot—

(*a*) In the *Hariṇī* metre on the sixth letter of every foot there must be a cæsura, a rest. This rule is broken in the present instance in the fourth foot where the 6th letter, हा, is inseparably connected with the following word: and hence one cannot rest on it.

"विकसितसहकारतारहारिपरिमलगुञ्जितपुञ्जितद्विरेफः ।
नवकिसलयचारुचामरश्रीर्हरति मुनेरपि मानसं वसन्तः" ॥

["The season of spring captivates the heart of even an ascetic—the season having a collection of black bees humming in the deep and fascinating fragrance of the full-blown mango-blossom, and who enjoys the luxury of Chowries in the shape of beautiful fresh leaves of trees."]

Here (*a*) in the word हारि, the letter रि being short, makes the metre halt. The proper reading would have been "हारिप्रमुदित, &c."

Or again

[*Page* 380.] "अन्यास्ता गुणरत्नरोहणभुवो, धन्या मृदन्यैव सा,
सम्भाराः खलु ते ऽन्य एव, विधिना यैरेष सृष्टो युवा ।
श्रीमत्कान्तिजुषां द्विषां करतलात् स्त्रीणां नितम्बस्थलात्
दृष्टे यत्र पतन्ति मूढमनसामस्त्राणि वस्त्राणि च" ॥

["The mines producing those splendid jewels of qualities must have been quite different; lucky that clay; those implements too must have been uncommon, by which this young man was framed by Brahmā; since the weapons fall down from the hands of his bright and resplendent enemies; and the cloth slurs away from the loins of elegant and beautiful women,—both of whom lose their senses, (the former through awe and the latter through being captivated by his extreme beauty)."]

Here the fault lies in the shortness of च, °णि च which if changed into °वपि, would be all right; since in that case पि, though it is in itself short, yet on account of its proximity to a double letter, it would attain to a certain length of accent, which would enable it to fulfil all necessary functions required of a long letter.

(*d*) Here as in the three preceding instances, the ground of faultiness lies in the slackness of construction. Though the accent on the last letter is laid down as optional and hence the metre is not prosodically lame, yet the short रि, cannot perform the functions of a long accent, as can the last letters of the foot of Vasanta-tilaka and Indravajrā; and as such the verse becomes unharmonious.

पुरन्तरिक्षं लोको दिवोऽहोरात्रेऽर्धमासामासाऋतवः संवत्सरो दिव्य-
गन्धर्वाप्सरसोऽर्देवा आदित्यश्चन्द्रमा इत्यातिवाहिका उच्यन्ते, ते
एवैते अर्चिरादयस्तन्नामधेयक्रमप्रत्यभिज्ञानलिङ्गात् देवानामेव महिमानं
गत्वा आदित्यस्य सायुज्यं गच्छतीति विदुषां तत्र सायुज्यप्राप्तिरर्चिरा-
दीनां देवतात्वे लिङ्गम् । अतो न तत्र नेत्रन्तरापेक्षा, विद्युतस्त्वचेतन-
तया तदपेक्षाऽस्तीति तस्या उपरि वरुणो नेतेति पूर्वपक्षं परिसमाप्य
सिद्धान्त उच्यते, वैद्युतेनैवेति सूत्रेण, आदित्याद्वैद्युतं वैद्युतात्पुरुषो मान-
व एत्य ब्रह्मलोकान् गमयतीति अमानवस्य पुरुषस्य ब्रह्मलोकगमयि-
तृत्वं वैद्युतस्यापादनत्वं चावगम्यते, अतो विद्युदभिमानी पुरुषो
वैद्युतः स च ब्रह्मलोकादर्वाचीनेषु लोकेषु नेतेति प्रतीतम् । अतो-
नेत्रन्तरनिराकाङ्क्षत्वाद्वरुणो यथाश्रुति वायोरुपर्येव वर्तते न तु तस्यास्ति
नेतृत्वमिति सिद्धान्तसूत्रं वर्णयन्ति । अतोच्यते आदित्यादधस्ताद्वरुण-
निवेशनस्य सिद्धान्तितत्वं तावदयुक्तं पाठक्रमार्थक्रमयोरुभयोरपि श्रौत-
क्रमबाध्यत्वात् स वायुमागच्छति तस्मै स तत्र विजिहीर्षते यथा रथ-
चक्रस्य खन्तेन ऊर्ध्वं आक्रमते स आदित्यमागच्छतीति देवलोकादादि-
त्यमिति च वायोरनन्तरमादित्यस्य श्रौतक्रमप्राप्तत्वात् तयोर्मध्ये स
वायुलोकं स वरुणलोकं स आदित्यलोकमिति पाठक्रमानुरोधेन वरुण-
निवेशनं हि श्रौतक्रमबाधितं स्यात्, एतदुक्तं भवति वाय्वादित्ययो-
र्मध्ये तडित उपरि च वरुणनिवेशनमर्थक्रमप्राप्तं तत्र वाय्वादित्ययोरर्थ-
क्रमस्य क्रमानुगृहीतया प्राप्तं तत्र वाय्वादित्ययोरर्थक्रमस्य श्रौतक्रम-
बाधितत्वादबाधितार्थक्रमेण तडित उपरि वरुणनिवेशनमेव युक्तमिति ।
किंच अर्थक्रमानुगृहीतपाठक्रमेण क्रमनिर्णये कर्त्तव्यत्वे वृष्टिहेतुत्वलक्ष-
णार्थक्रमसचिवेन स आदित्यलोकं स इन्द्रलोकं स प्रजापतिलोकमिति
पाठक्रमेणादित्यादुपरि इन्द्रनिवेशनप्रसङ्गः, आदित्याच्चेन्द्रमसमिति श्रौत-
क्रमविरोधात्तदयुक्तमिति चेत्पूर्वदर्शितश्रौतक्रमविरोधात् वायोरूर्ध्वं वरु-
णनिवेशनमयुक्तं यतः श्रौतक्रमाविरोधात् विद्युतः परं वरुणनिवेशन-
मेव युक्तम् अत एव तडितोऽधीति सिद्धान्तसूत्रं न तु पूर्वपक्षविषयम् ।

अत एवातिवाहिका इति सूत्रद्वयमधिकरणान्तरं भवितुमर्हतीति तस्य परोक्तयोजनाऽनुपपन्ना ॥ अतिवाहिकाधिकरणं समाप्तम् ॥

कार्याधिकरणम् । सू० कार्य्यं बादरिरस्य गत्युपपत्तेः ॥ ६ ॥

भा० अर्चिरादिनैव गच्छति विद्वान् अर्चिरादिरमानवान्तश्च गणः अतिवाहिको विद्वांसं ब्रह्म गमयतीत्युक्तम्, इदमिदानीं चिन्त्यते किमयमर्चिरादिको गणः कार्य्यं हिरण्यगर्भमुपासीनान्नयति? उत परब्रह्मोपासीनानेव? अथ परब्रह्मोपासीनान् प्रत्यगात्मानं ब्रह्मात्मकतयोपासीनांश्चेति विषये कार्य्यमुपासीनानेव गमयतीति बादरिराचार्यो मन्यते. कुतः, अस्य हिरण्यगर्भमुपासीनस्यैव गत्युपपत्तेः, न हि परिपूर्णं सर्वज्ञं सर्वगतं सर्वात्मभूतं परं ब्रह्मोपासीनस्य तत्प्राप्तये देशान्तरगतिरुपपद्यते, प्राप्तत्वादेव नित्यप्राप्तपरब्रह्मविषया ऽविद्यानिवृत्तिमात्रमेव हि परविद्याकार्यं कार्यं, तु हिरण्यगर्भरूपं ब्रह्मोपासीनस्य परिच्छिन्नदेशवर्तिप्राप्यप्राप्त्यर्थं गमनमुपपद्यते, अतोऽर्चिरादिक आतिवाहिकगणस्तमेव नयति ॥

टी० सू० कार्य्यं बादरिरस्य गत्युपपत्तेः ॥ ६ ॥ अवान्तरसङ्गतिमाह "अर्चिरादिनैवे"ति, कार्यं हिरण्यगर्भमुपासीनानिति, कार्य्योपासकस्य कार्य्यप्राप्तिः परोपासकस्य परप्राप्तिश्च तत्क्रतुन्यायसिद्धा, अत उपासितृविशेषे निश्चिते प्राप्तिसन्देहाभावात् संशयस्योपासितृभेदमूलत्वात् स एनानित्युपासितृणां प्रतिपन्नत्वाच्च उपासीनानित्यध्याहृतं, नयतिपदं सिद्धान्तसूत्रादाकृष्टं किमर्चिरादिको गणःकार्य्यं हिरण्यगर्भमुपासीनानेव नयति? उत परं ब्रह्म उपासीनानेव? उत परं ब्रह्मो-

पापासीनान्प्रत्यगात्मानं ब्रह्मात्मकतयोपासीनांश्चेति, किं परब्रह्मणि प्राप्ये गतिब्रह्मलोककशब्दावुपपद्येते नेति ब्रह्मोपासीनानामेव गमयितृत्वे तद्ध इत्थं विदुर्ये चेमे इत्यादिवाक्यसामञ्जस्यमस्ति नेति यदा तदा नोपपद्येते तदा कार्य्यमुपासीनानेव नयेत्, यदा गतिब्रह्मलोकशब्दावुपपद्येते यदा च तद्ध इत्थमित्यादिवाक्यसामञ्जस्यमस्ति तदा ब्रह्मोपासीनानेव नयेत्, यदा सामञ्जस्यं नास्ति तदा परं ब्रह्मोपासीनान् प्रत्यगात्मानं ब्रह्मात्मकतयोपासीनांश्च नयेत् उपास्तिनयत्योर्द्वयोरपि कर्म हिरण्यगर्भः कार्य्यमुपासीनानित्यादि सर्वगतत्वात् ब्रह्मणो मुक्तेन तत्प्राप्त्यर्थं न क्वचिद्गन्तव्यं सर्वगतत्वेऽपि देशविशेषप्राप्तानेव जानाति नान्यमिति न नियमोऽस्ति येन क्वचिद्गन्तव्यं सर्वज्ञत्वात् क्वचित्कल्याणगुणपूर्त्तिः क्वचिदपूर्त्तिरिति न तदर्थं गन्तव्यं सर्वतः परिपूर्णत्वात्, सम्बन्धविशेषसम्पादनाय नान्यत्र गन्तव्यं सर्वात्मत्वादिति विशेषणानां तात्पर्य्यं नित्यप्राप्तिश्चेदुपासनावैयर्थ्यमित्यत्राह "नित्यप्राप्ते"त्ति,

सू॰ विशेषितत्वाच्च ॥ ७ ॥

वृ॰ पुरुषोऽमानवः स एत्य ब्रह्मलोकान् गमयतीति लोक—शब्देन बहुवचनेन च लोकविशेषवर्तिनं हिरण्यगर्भमुपासिनमेवामानवो गमयतीति विशेष्यते । किंच प्रजापतेः सभां वेश्म प्रपद्यत इति कार्य्यस्य हिरण्यगर्भस्य समीपगमनमर्चिरादिना गतोऽभिसन्धत्ते । नन्वेवं तत्पुरुषोऽमानवः स एनान् ब्रह्म गमयतीत्ययं निर्देशो नोपपद्यते हिरण्यगर्भनयने हि स एनान्ब्रह्माणं गमयतीति निर्देष्टव्यं स्यात् अत आह—

सू० सामीप्यात्तु तद्व्यपदेशः ॥ ८ ॥

भा० "यो ब्रह्माणं विदधाती"ति हिरण्यगर्भस्य प्रथमजत्वेन-ब्रह्मसामीप्यात्तस्य ब्रह्म-शब्देन व्यपदेश इति गत्यनुपपत्तिविशेषणादिभिरुक्तैर्हेतुभिर्निश्चीयते इत्यर्थः । अथ स्यात् अर्चिरादिना हिरण्यगर्भप्राप्तौ एष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते तयोर्ध्वमायन्नमृतत्वमेतीत्यमृतत्वप्राप्त्यपुनरावृत्तिव्यपदेशो नोपपद्यते हिरण्यगर्भस्य कार्य्यभूतस्य द्विपरार्द्धकालावसाने विनाशश्रवणात् आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुनेति वचनाद्धिरण्यगर्भं प्राप्तस्य पुनरावृत्तेरवर्जनीयत्वादिति तत्राह—

टी० सू० विशेषितत्वाच्च ॥ ७ ॥ एतं ब्रह्मलोकं न विन्दन्ति इत्यादिषु कर्मधारयः स्वीकृतः तद्भावृत्त्यर्थे बहुवचनेन चेत्युक्तं, बहुवचनान्तलोक-शब्दे तात्पर्य्यम् ॥ उत्तरसूत्रशङ्कामाह "नन्वि"ति, । सू० सामीप्यात्तु तद्व्यपदेशः ॥ ८ ॥ गत्यनुपपत्तिविशेषणादिभिरिति आदि-शब्देन ब्रह्मेति निर्देशोपपत्तिर्गमनोपपत्तिश्च विवक्षिता कार्ये कारणोपचार इत्यर्थः । उत्तरसूत्रशङ्कामाह—

सू० कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् ॥ ९ ॥

भा० कार्यस्य ब्रह्मलोकस्यात्यये तदध्यक्षेण हिरण्यगर्भेणाधिकारिकेणावसिताधिकारेण विदुषा सह स्वयमपि तदाधिगतविद्योऽनः कार्य्याद् ब्रह्मलोकात्परं ब्रह्म प्राप्नोती-

त्यर्चिरादिना गतस्यामृतत्वप्राप्त्यपुनरावृत्त्यभिधानात् ते ब्रह्मलोके तु परान्तकाले परामृतात् परिमुच्यन्ति सर्वे” इति वचनाच्चावगम्यते ॥

सू० स्मृतेश्च ॥ १० ॥

भा० स्मृतेश्चायमर्थोऽवगम्यते “ब्रह्मणा स ह ते सर्वे सम्प्राप्ते प्रतिसंचरे । परस्यान्ते कृतात्मानः प्रविशन्ति परं पद”-मिति, अतः कार्य्यमुपासीनमेवार्चिरादिको गणो नयतीति बादरेर्मतम् । अथ जैमिनिः पक्षान्तरपरिग्रहेण प्रत्यवतिष्ठते ।

सू० परं जैमिनिर्मुख्यत्वात् ॥ ११ ॥

भा० परं ब्रह्मोपासीनमेवार्चिरादिर्नयतीति जैमिनिराचार्य्यो-मन्यते कुतः मुख्यत्वात् तत्पुरुषोऽमानवः स एतान् ब्रह्म गमयतीति ब्रह्म-शब्दस्य परस्मिन्नेव ब्रह्मणि मुख्यत्वात् प्रमाणान्तरेण कार्य्यत्वनिश्चये सत्येव हि लाक्षणिकत्वं युक्तं, न च गमनानुपपत्तिः प्रमाणं परस्य ब्रह्मणः सर्वगतत्वेऽपि विदुषो विशिष्टदेशगतस्यैवाविद्यानिवृत्तिशास्त्रात्, यथा हि विद्योत्पत्तिर्वर्णाश्रमधर्मशौचाचारदेशकालाद्यपेक्षा तमेतं वेदानुवचनेनेत्यादिशास्त्रादवगम्यते तथा निःशेष विद्यानिवर्त्तनरूपविद्यानिष्पत्तिरपि विशिष्टदेशगतिसापेक्षेति गतिशास्त्रादवगम्यते ॥

टी० “अथ स्या”दिति, सू० कार्य्यात्यये तदध्यक्षेण सहातः परमभिधानात् ॥ ९ ॥ अयमर्थः कथमवगत इत्यत्राह “ते ब्रह्मलोक” इति

परामृतात्परामृतं प्राप्य ल्यब्लोपे पञ्चमीति पूर्वपक्षिणोऽभिप्रायः । सू० स्मृतेश्च ॥ १० ॥ परस्य ब्रह्मणः अत्रेति पक्षान्तरपरिग्रहेण पूर्वपक्षात्पक्षान्तरेण न तु कृत्स्नसिद्धान्तेनेत्यर्थं, सू० परं जैमिनिर्मुख्यत्वात् ॥ ११ ॥ विद्यानिर्ष्पत्तिः विद्या हि स्वमाहात्म्यात् सूक्ष्मशरीरस्थितिहेतुरनुवर्तते तस्या निर्ष्पत्तिः कार्य्यकरत्वावस्थापत्तिः । यद्वा निष्पत्तिर्वितरां विकासः सा गतिसापेक्षेत्यर्थः नित्यत्वेऽपि । कालविशेषापेक्षावत् सर्वगतत्वेऽपि देशविशेषापेक्षा युक्तेति भावः । नित्यमुक्ततया कालविशेषापेक्षा न चेच्छास्त्रवैयर्थ्यं प्रत्यक्षविरोधश्च, उत्क्रान्त्यनुपपत्त्या न गतिरिति चेत्तत्राह–

सू० विदुष उत्क्रान्तिप्रतिषेधादि तु पूर्वमेव परिहृतम् । यत्तु ब्रह्मलोकानिति लोक–शब्दबहुवचनाभ्यां विशेषणात्कार्य्यभूतहिरण्यगर्भप्रतीतिरिति तदयुक्तं निषादस्थपतिन्यायेन ब्रह्मैव लोको ब्रह्मलोक इति कर्मधारयस्यैव युक्तत्वात्, अर्थस्य चैकत्वे निश्चिते बहुवचनस्य अदितिः पाशानितिवदुपपत्तेः, परस्य ब्रह्मणः परिपूर्णस्य सर्वगतस्य सत्यसङ्कल्पस्य स्वेच्छापरिकल्पिताः स्वासाधारणा अप्राकृताश्च लोका नात्यन्ताय न सन्तीति श्रुतिस्मृतीतिहासपुराणप्रामाण्यात् ॥

सू० दर्शनाच्च ॥ १२ ॥

दर्शयति च श्रुतिः मूर्द्धन्यनाड्या निर्गत्य देवयानेन गतस्य परब्रह्मप्राप्तिम्, एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत इति, यदुक्तं प्रजापतेः सभां वेश्म प्रपद्य इत्यर्चिरादिना गतस्य कार्य्य प्रत्यभिसंधिर्दृश्यत इति तत्रोत्तरम् ।

सू० न च कार्य्ये प्रत्यभिसन्धिः ॥ १३ ॥

न चायं प्रत्यभिसन्धिः कार्य्ये हिरण्यगर्भे अपि तु परस्मिन्नेव ब्रह्मणि वाक्यशेषे "यशोऽहं भवामि ब्राह्मणानामिति तस्याभिसन्धातुः सर्वाविद्याविमोकपूर्वकसर्वात्मभावाभिसंधानात्, अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात् प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवानीत्यभिसंभाव्यस्य ब्रह्मलोकस्याकृतत्वश्रवणात् सर्वबन्धविनिर्मोकस्य च साक्षात् श्रवणात्, अतः परमेव ब्रह्मोपासीनमर्चिरातिरानिवाहिको गणो नयतीति जैमिनेर्मतम् । इदानीं वादरायणस्तु भगवान्स्वमतेन सिद्धान्तमाह—

टी० "विदुष" इति, यस्त्वित्यादि नाऽन्त्यन्ताय न सन्तीति, न न सन्तिनिषेधप्रसङ्गो नास्ति सन्त्येव अत्यर्थं सन्त्येवेत्यर्थः । स्वेच्छापरिकल्पिता इत्यर्थः परमव्योमशब्दादीनां हृदयगुहादिस्थानपरत्वापादनेन लोकविशेषापलापो न युक्तः त्वयन्तमस्य रजसः पराके हिरण्मये परे कोशे विरजं ब्रह्मनिष्कलं तच्छुभ्रं ज्योतिषां ज्योतिस्तद्य आत्मविदो विदुरिति तदक्षरे परमे व्योमन्नित्यादिभिर्दुरपन्हवत्वादिति प्रमाणदार्ढ्यं विवचितम् । सू० दर्शनाच्च ॥ १२ ॥ उत्थायोपसंपत्तिवचनेन देवयानेन प्राप्तिसिद्धिः । उत्तरसूत्रशङ्कामाह "यदुक्त"मिति, । सू० न च कार्य्ये प्रत्यभिसंधि ॥ १३ ॥ उपपादकवाक्यवशात् परस्मिन्नेवेत्युक्तम् ॥

सू० अप्रतीकालम्बनान्नयतीति वादरायण उभयथा च दोषात्तत्क्रतुश्च ॥ १४ ॥

सू० अप्रतीकालम्बनान् प्रतीकालम्बनव्यतिरिक्तान्नयत्यर्चिरादिरातिवाहिको गण इति भगवान्बादरायणो मन्यते, एतदुक्तं भवति, कार्य्यमुपासीनान्नयतीति नायं पक्षः सम्भवति परमेवोपासीनानित्ययमपि नियमो नास्ति न च प्रतीकालम्बनानपि नयति, अपि तु ये परं ब्रह्मोपासते ये चात्मानं प्रकृतिवियुक्तं ब्रह्मात्मकमुपासते तानुभयविधान्नयति ये तु ब्रह्मकार्य्यान्तर्भूतं नामादिकं वस्तु देवदत्तादिषु सिंहादिदृष्टिवद्ब्रह्मदृष्ट्या केवलं वा तत्तद्वस्तूपासते न तान्नयति, अतः परं ब्रह्मोपासीनानात्मानञ्च प्रकृतिवियुक्तं ब्रह्मात्मकमुपासीनान्नयतीति, कुतः उभयथा च दोषात्, कार्य्यमुपासीनान्नयतीति पक्षे अस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्येत्यादिकाः श्रुतयः प्रकुप्येयुः, परमेव ब्रह्मोपासीनानिति च नियमे ॥

टी० सू० अप्रतीकालम्बनान्नयतीति बादरायण उभयथा च दोषात्तत्क्रतुश्च ॥ १४ ॥ प्रतीकालम्बनव्यतिरिक्त एव हि परब्रह्मोपासीनः तन्नयतीति दर्शनात् जैमिनिमतात् सिद्धान्तिमतस्य कोविशेष इत्यत्राह "एतदुक्त"मिति, कार्य्यमुपासीनोऽपि प्रतीकालम्बनो नामादिषु ब्रह्मदृष्ट्योपासीनश्च प्रतीकालम्बनः न च प्रतीकालम्बनानित्यत्र प्रतीकालम्बन–शब्दो दृष्ट्युपासनपरमात्र गोबलीवर्द्दनयात् प्रतीकालम्बनव्यतिरिक्तेषु केषांचिदर्चिरादिगतिर्जैमिनिनोक्ता प्रतीकालम्बनव्यतिरिक्तत्वोपाधिर्येषु तान् सर्वान्नयतीति सिद्धान्तमतमिति विशेषः कार्यमुपासीनान् नयतीति नायं पक्ष इति हिरण्यगर्भोपासीनानामर्चिरादिगतिरनुपपन्ना अर्चिरादिना गतस्य परब्रह्मप्राप्तेः, न हि हिरण्यगर्भोपासकस्य परब्रह्मप्राप्तिः, यथोपासनं हि फलं तस्मादर्चिरादिना परब्रह्मोपासक एव

पूर्वंच निरर्थकनिग्रहस्थानापत्तिः । उत्तरत्र च कालस्यैव तदर्थत्वात्तच्च कालनिषेधे स्ववचनविरोधः । अथ काले कालोनास्तीत्यविरोधं मन्येत तर्हि सृष्टिप्रलयमध्यकालेऽपि कालाभावात्तत्रापि कालनास्तितां ब्रूयादिति कथं कालसिद्धिः । गत्यभावान्मौनमाश्रित्य यः पूर्वं पश्चाच्चैनास्तीति न ब्रूयात् तदाऽस्मन्मतं न निषेधतीति नास्माभिरुत्तरं देयम् । अथ पार्श्वस्थो यदि कश्चिद् ब्रवीति तस्याप्युक्तदोषस्सम इत्यभिप्रायेणाह । तत्कोवदेदिति । सदेव सोम्येदमग्रआसीत् नासदासीन्नो सदासीत्तदानीम् । इत्यादिश्रुतिविरोधश्चाचाभिप्रेतः । विद्याकालौ भवत्कृतौ इत्यादिषु कालोत्पत्तिवचनं कथमित्यत्राह । आप्त इति । आप्तवाक्यस्य इत्यर्थः । यथा निमेषादिसंवत्सरान्तजनिश्रुतिः पक्षमासादिष्वागमापायिताप्रत्याख्यातिश्च उपाधीनां तत्संयोगादिपरिणतीनां तदभिमानिदेवतानां वा सृष्ट्या अर्थवती तथा ऽत्रापीत्यर्थः । अन्यथा तत्रापि विरोधमाह । नोचेदिति । पूर्वापरवचनहतिः पूर्वं परं च कालो नास्तीति वचनस्य बाध इत्यर्थः । अथ वा पूर्वापरग्रन्थविरोधः प्रलयादिकालमनूद्य हि प्रकृतिविकारास्सर्वे सृष्टिवाक्येषु प्रतिपाद्यन्ते ।

कालोपश्लिष्टवेषेण ह्यभूदस्ति भविष्यतीन् ॥
प्रयुञ्जते ऽर्थभेदेषु सदा चास्तिमनेहसः ॥ ६० ॥

इति कालोत्पत्तिवादपरिहारः ॥

नीरूपद्रव्यस्यापि प्रत्यक्षत्वसम्भवः प्रागेव साधित इति कृत्वा कालप्रत्यक्षत्वं लोकोपलब्ध्या नियमयति । काल इति ॥

मू० कालोऽध्यक्षावसेयः क्षणलवदिवसाद्यंशतोऽर्थान्विशिंषन् साक्षाद्धीस्तत्तदर्थेष्विव भवति

हि नः क्वापि कालान्वयेऽपि । तत्संयोगाः परत्वादय इति च ततो ऽप्येष नैवानुमेयो नो चेन्न क्वापि लोकव्यवहृतिविषयोऽप्यव्यक्तव-त्स्यादनेहा ॥ ६८ ॥

अवसीयमानप्रकारमाह । यथेति । यथामयं तिष्ठतीत्यादि-प्रकारेण तत्तदर्थविशेषणतयाऽवसीयत इति यावत् अभिज्ञायां यथारू-पेण प्रत्यभिज्ञायां दिवसादिरूपेण चेति विभागः । अनुमीयमानो भविष्यादित्यत्राह । साध्यादिति । प्रत्यक्षप्रतीतौ विशेषणतया दृश्य-मानस्य कालस्यानुमेयत्वे तत्तत्पदार्थानामपि सौत्रान्तिकोक्तनया-दानुमानिकत्वं प्रसज्यत इति भावः । न चासावनुमातुं शक्य इत्याह। तत्संयोगा इति । कालमनभ्युपगच्छतां बुद्धिविशेषसंघटितसूर्यावृत्त्या-द्युपाधिभिरेव वैशिष्ट्यं वस्तूनां परत्वादि अभ्युपगच्छतां तु तत्तदुपहि-तकालसंयोगाः । न च तदतिरिक्तं दृष्टं कल्प्यं वा इत्यद्रव्यसरे स्थापयिष्यते । कालस्यानुमेयत्वेऽनिष्टं प्रसञ्जयति । नो चेदिति । न हि परत्वापरत्वादिभिः कश्चित्कालोऽस्तीत्यनुमाय तद्विशिष्टतया पदा-र्थान्व्यवहरन्ति लौकिकाः अतः कालोऽप्यव्यक्तवच्छास्त्रैकवेद्य इति तद्वदेव लोकव्यवहारविषयो न स्यादित्यर्थः । नन्वस्मदादिप्रत्यक्षम-प्रत्यभिज्ञारूपं वर्तमानमात्रविषयमिति सम्मतम् । अतोऽस्य पूर्वापरका-लविशिष्टविषयत्वमसंभवि पूर्वापरव्यतिरिक्तं तु वर्तमानं न पश्यामः अतः कथं कालप्रत्यक्षत्वम् । इत्थं किं भवान्वर्तमानधियमेव नानुभ-वति सतीमपि वा निर्विषयां सविषयां वा कल्पितविषयां, न प्रथमः इदं पश्यामीत्यादिव्यवहारोच्छेदप्रसङ्गात् । अत एव न द्वितीयः । असत्वविषयधियास्त्वनभ्युपगमाच्च । न तृतीयः क्वचित्सिद्धस्यैवान्यत्र कल्प्यत्वात् । तथा च तत्सिद्धौ तत् । रूपादिषु दृष्टं वर्तमानत्वं काले

कल्प्यतामिति चेन्न । क्षणिकरूपादिसन्ततावपि पूर्वापरातिरिक्तवर्तमानत्वस्य त्वया दुर्वचत्वात् अन्यथा कालेऽपि तदुपपत्तेः कालमनिच्छतश्च ते* काले कथं कल्पना । निरधिष्ठानाऽसौ कल्पनेति चेन्न । त्रैदृशकल्पनाभ्युपगमे माध्यमिकागमप्रवेशप्रसङ्गात् । स्थिरवादे तु रूपादिष्विव केनचिद्रूपेण कालेऽपि वर्तमानत्वं सिद्धम् । ननु रूपादीनां वर्तमानकालसम्बन्धोवर्तमानत्वं नाऽसौ कालस्य स्यात् मैवं त्वयैव कालस्य वर्तमानत्वेन रूपादिवर्तमानत्वनिर्वाहात् ॥

वर्तमाननिषेधे च भविची विश्वनिन्हुतिः ।
न ह्यतीतं भविष्यद्वा प्रत्यक्षविषयोऽस्ति नः ॥
वर्तमानभ्रमश्चाच तत एव न सिद्ध्यति ।
पौर्वापर्यातिरिक्ता तु दुस्त्यजा वर्तमानता ॥
अतीतागामिधीरेव वर्तमानमतिर्यदि ।
भूतभाविसमस्ताप्त्या न शोकादिसमुद्भवः ॥
पूर्वापरत्वसम्भेदे वर्तमानमतिर्यदि ।
त्रिकालस्थेऽपि तत्सिद्धेः क्वातीतागामिता भवेत् ॥
प्रारब्धश्चासमाप्तश्च वर्तमानो य उच्यते ।
व्यापारसमुदायोऽसौ विवक्षितफलावधिः ॥
तचापि क्षणभेदेन नष्टत्वादिविकल्पतः ।
वैवक्षिकमिहान्यच्च वर्तमानत्वमक्षतम् ॥

ननु सतोविनाशप्रागभाव एव वर्तमानत्वं तद्विशिष्टेषु पदार्थेषु दृश्यमानेषु किं सतोवा ऽसतोवा कालस्य दृश्यमानतया । मैवं कालासत्त्वपक्षस्य निरस्तत्वात् । तत्सत्त्वे तु तत्साध्यानां पूर्वापर-

* नच वाहाहैव योगे । इति पाणिनीयेनानादेशशङ्का तु नेह प्रसरति च-शब्दस्य भिन्नान्वयाङ्गीकारादित्यवधारणीयम् ।

युगपदादिव्यवहारविशेषाणां तत्प्रतीतिपूर्वकत्वस्य स्वरसप्राप्तत्वात् किंचात्र सत इति वर्तमानत्वविवक्षायां किं विनाशप्रागभावोपश्लेषेण वर्तमानत्वमेव च वर्तमानत्वमित्युक्तं स्यात् । अथ प्रमाणसिद्धत्वादिरूपं सत्त्वं तदाऽपि विनाशस्य प्रागभावः प्रतियोगिस्वरूपमेवेति तेन रूपेण योगिभिर्गृह्यमाणं त्रैकालिकमपि वर्तमानं स्यात् अतोऽन्यदेव वर्तमानत्वं तच्च कालोपश्लेषेणैव गृह्यते वर्तमानकालोपाधिसम्बन्ध एव वस्तूनां वर्तमानत्वमित्यपि न वाच्यम् उपाधौ तदभावादवर्तमानत्वप्रसङ्गात् उपाधिभिरेव सर्वव्यवहारनिर्णये किमप्रत्यक्षकालकल्पनया ॥ ६८ ॥ इति कालप्रत्यक्षत्वम् ॥

यदि नित्य एकः कालः तस्य कथं परिच्छिन्नानेकस्वरूपत्वमित्यत्र प्रसिद्धं पक्षमाह । कालस्येति ॥

सू० कालस्योपाधिभेदात्कतिचिदभिदधत्यब्दमासादिभेदं तत्तद्रूपेण कालः परिणमत इति प्राहुरेके तदा तु । ये तत्रोपाधयः स्युस्त इह परिणतिं प्राप्नुयुस्सानुबन्धा नित्योव्यापी च तादृक्परिणतिभिरसौ सर्वकार्ये निमित्तम् ॥ ६९ ॥

आदिशब्देन भूतभविष्यत्त्वादेरपि सङ्ग्रहः । नित्यस्यापि कालस्य द्रव्यान्तराणामिवावस्थाभेदैस्सर्वमिदं स्यात् अवस्थाश्चात्रोपाधिसम्बन्धमात्ररूपा इति लघीयान्पक्षः । पक्षान्तरमाह तत्तद्रूपेणेति । यादव*प्रकाशैरप्यभ्युपगतोऽयं पक्षः कालोऽनाद्यनन्तोऽजस्रक-

* यादवप्रकाशप्रणीतं ब्रह्मसूत्रभाष्यं मया स्वयं बाल्ये अलवरराजकीयविद्यामन्दिरे दृष्टम् ।

णपरिणामी मुहूर्तहोराचादिविभागयुक्तवैषां परिणामस्पन्दहेतुः इति वचनात् । अयं भावः क्षणरूप एव कालस्य सर्वदा परिणामः तत्संख्याप्रकर्षतारतम्यान्मुहूर्तादिविभागः तत एव चाब्दादीनामाद्यन्तमध्यमाद्युत्पत्तिक्षणविकल्पचोद्यं निस्तीर्णं प्रतिपुरुषमिष्टक्षणारम्भे णाब्दादिगणनापि युक्तैव । अत्र च स्वतः क्षणादिभेदानभ्युपगमे कथमुपाधिभिरपि भेदः स्यात् तेषां कालमात्रेण सम्बन्धे तद्विशेषकत्वायोगात् । तदंशेन सम्बन्धे तु स्वत एव कालांशभेदसिद्धेः । ननु कालविकारेष्वपि कृत्स्नैकदेशसम्बन्धविकल्पदोषस्समानः, विकारान्तरेण भेदे ऽनवस्थाप्रसङ्गश्चेति चेन्न । आश्रयैकदेशवृत्तिगुणादिन्यायेन निर्वाहादिति । अयं परिहार उपाधिसम्बन्धमात्रपक्षेऽप्यविशिष्ट इत्यन्ये मन्यन्ते ॥

स्पन्दसन्ततिसिद्ध्यर्थं कालस्याणुत्वकल्पनम् ।
आशावसानतोकानां दुराशामात्रजृम्भितम् ॥
क्रियासन्ततिवत्काले परिणामपरम्परा ।
किं न स्यात्स्वप्रकर्षाद्यैः परत्वादिप्रसाधिका ॥
एकाश्रयक्रियासंख्याकाल इत्याप्रभाषितम् ।
कालोपाधिविशेषाणां सर्वेषामुपलक्षणम् ॥

अत्र परिणतिपक्षमनूद्य तत्राप्युपाधिव्याप्तिमाह । तदा त्विति । अनुबन्धाः ऋतुलिङ्गादयः आनन्तर्यनियमादुत्तरोत्तरकार्याणामुपाधिमूलत्वं च सिद्धम् । ऋतुलिङ्गादीनां तु न कालकार्यहेतुनियमः । ये तु शैवादयः कालमनित्यमव्यापिनं परिमितकार्यहेतुं च प्राहुः तान्प्रत्याह । नित्य इति । क्षणाद्यंशस्यागन्तुकत्वेऽपि स्वरूपतो नित्यः । नित्यत्वं चात्र प्रध्वंसविरहमात्रं न तु सर्वदा सत्ता कालान्तराभावात् । व्यापित्वं तु क्षणतोऽपि स्यात् सार्वत्रिकाकार्याणामपि केषांचिद्यौगपद्यसिद्धेः नित्यत्वे प्रागेव प्रमाणं दर्शितं

व्याप्तिश्च कालं स पचते तत्र न कालस्तत्र वै प्रभुः इत्यादिभिस्सिद्धा त्रिगुणविभूतिवत्कालप्रतिनियतविकारास्तत्र न सन्तीत्यर्थः। स्वविकाराणामुपादानतयाऽन्येषां निमित्ततया वाऽस्य सर्वहेतुत्वं कालः पचति भूतानीत्यादिभिर्गम्यते तदपि सर्वत्र सन्निहितस्य। ननु "अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः। सर्वव्यापी सर्वभूतान्तरात्मा" इत्यादिषु एकस्य सर्वव्यापकत्वं श्रूयते। अतस्तद्व्याप्यस्य कालस्य कथं विभुत्वम्। इत्थं। न हि न्यूनदेशवर्तित्वमेव व्याप्यत्वं तथा सति समव्याप्तिभङ्गप्रसङ्गात् तर्हि तद्वदन्योन्यव्याप्यत्वमिह स्यादिति चेत् किमत्रानिष्टं परस्परप्रवेश्यत्वाद्यनभ्युपगमात्। द्वयोरपि सर्वसंयोगित्वे विरोधाभावात् अतो यत्र कालस्तत्र सर्वत्र परमात्माऽस्तीति तस्य कालव्यापकत्वम् इदं च तस्य धर्मभूतज्ञानेऽपि द्रष्टव्यं परमात्मस्वरूपैकदेशे विश्वं व्यवस्थितमित्येतदपि तादृशव्यतिरिक्तविषयम् अन्यथा तस्य ज्ञानानन्दत्वादेरपि एकदेशित्वप्रसङ्गात्। न चैवं सति सर्वजीवानां व्यापित्वेऽप्यविरोधः स्यादिति वाच्यम् अणुत्वश्रुत्या तत्प्रतिषेधात् इति। ननु कालतो देशतो व्यतिरेकग्रहणस्याशक्यत्वान्नित्यविभूनां कारणत्वमेव न सिद्ध्यति कुतस्सर्वकारणत्वमित्यनुयोगश्च धर्मिग्राहकेणैव निरस्तः। अस्ति हि लोकेऽप्युपदेशतोऽपि तत्तद्वस्तुषु कारणत्वग्रहणम्। अथ स्यात् नियतपूर्वसत्त्वं कारणत्वं नियमश्चास्मिन्सत्येवेदं भवतीत्येवंरूपः तत्रावधारणसिद्धोऽन्यदा नास्तीत्ययमर्थो नित्येषु च विभुष्वग्रहण इति मैवं प्रसङ्गतोऽपि नियमसिद्धेः। तथा हि, इदं सर्वकारणमिति बोधयतामयमाशयः, यद्येतन्न स्यात् इदं नोत्पद्येत अतस्सर्वोत्पत्तिप्रयोजकमेतदिति न पुनर्यदा यत्रेदं नास्ति तदा तत्र सर्वं नास्तीति अतस्सूक्तं नित्यव्यापिनः कालस्य सर्वकार्यहेतुत्वम् ॥ ६६ ॥

इति कालस्यावच्छेदप्रकारविभुत्वसर्वकार्यहेतुत्वानि ॥

प्रकृतचिन्ता*वर्गस्य परब्रह्मवैभवव्यञ्जकतया सार्थकत्वं प्रथयति । वायुरिति ॥

मू० वायुर्दोधूयते यद्वदयमुडुगणो बम्भ्रमीति
द्रुतं खे तेजो जाज्वल्यते यद्वदपि न जलधि-
र्माधवीं दोधवीति ॥ भूर्यद्वा बोभवीति स्थि-
रचरधृतये तच्च तादृक्च सर्वं स्वायत्ताशे-
षसत्तास्थितियतनपरब्रह्मलीलोर्मिचक्रम् ॥ ७० ॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
तत्त्वमुक्ताकलापे जडद्रव्यसरः प्रथमः ।

माधवीं पृथिवीं मेघोदयस्सागरसन्निवृत्तिरित्यादिसूक्तं स्मारयति तच्च तादृक्चेति । यतनं व्यापारः सुग्रहमन्यत् ॥ ७० ॥ इति सर्वतत्त्वस्थितिप्रवृत्तीनामीश्वरेच्छायत्तत्वम् ॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु सर्वार्थसिद्धौ
जडद्रव्यसरः प्रथमः ।

---

* निरूपितस्यामुष्य सर्वार्थस्य परब्रह्मशरीरतया परब्रह्मनिरूपणरूपताऽस्तीति तु परमतात्पर्यार्थः ।

तत्त्वमुक्ताकलापे द्वितीयो जीवसरः प्रारभ्यते ।

मू० यो मे हस्तादिवर्ष्मेत्यवयवनिवहाद्भाति भि-
न्नस्स एकः प्रत्येकं चेतनत्वे बहुरिह कलहो
वीतरागो न जातः ॥ तत्सङ्घातातिरिक्तोऽ-
प्यवयविनि कथं तेष्वसिद्धा मतिस्स्यात्
सङ्घातत्वादिभिर्वा घट इव तदचित्स्यान्म-
मात्मेत्यगत्या ॥ १ ॥

सर्वार्थसिद्धौ द्वितीयो जीवसरः प्रारभ्यते ।

अथ प्रत्यगर्थो जीवस्तावन्निरूप्यते तत्र चार्वाकेणापि दुरपह्नवं प्रमाणमाह । य इति । हस्तादिवर्ष्म हस्तादिरूपं शरीरमित्यर्थः मम हस्तादि मम वर्ष्मेति वा पृथगुदाहर्तव्यम् । अस्ति तावदयं व्यतिरेकप्रत्ययः तत्र न तावदेकोऽवयवोऽवयवान्तराणि ममेत्यभिमन्यते तथाऽनुपलम्भात् व्यवस्थापकाभावाच्च । सर्वावयवविषयश्चासौ ममकारः । न चावयविनोऽयं स्वावयवाभिमानस्तन्निरासात् । नापि सङ्घातस्सङ्घातिनोऽभिमन्यते संसर्गस्य तदयोगात् । संसर्गिणां तु दत्तोत्तरत्वात् । एवमवयवेषु बहुष्वभिमन्तव्येष्वबाधितैकप्रत्ययविषयोऽभिमन्ता हस्तादिभ्यस्तत्सङ्घाताच्चान्य इत्यभिप्रायेणाह । स एक इति । स्मर्यते च पिण्डः पृथग्यतः पुंसश्शिरःपाण्यादिलक्षण इत्यादि । अवयवोपचयापचयविनाशादिकालेष्वपि स एवाहमिति प्रत्यभिज्ञाविषयः कालभेदेऽप्यभिन्न इति चात्र भाव्यम् । अन्यथा पाण्याद्यवयवच्छेदे हि तदनुभूतस्मरणं न स्यात् अन्यदृष्टस्यान्येन स्मरणायोगात् । न च तदनुभववासनासङ्क्रमादन्योऽपि स्मरति मात्राद्य-

नुभूतस्य गर्भादिभिः स्मरणप्रसङ्गात् । न च संसर्गे वैषम्यं कल्प्यं नियामकाभावात् । वासनासङ्क्रमश्च पटादिषु मृगमदादेर्द्रव्यस्य सङ्क्रमः न चेह तथा त्वयैवानभ्युपगमात् गुणसङ्क्रमो न क्वचिदपि । न चात्र रुमा*चिप्रकाष्ठन्यायः दुःखादेरपि तथोत्पत्तिप्रसङ्गात् । कल्प्येषु च नियामकादृष्टेः ।

सर्वबोधैश्च हृत्कोशे संस्काराधानमित्यपि ।
न दृष्टं न च तत्क्लृप्तौ लिङ्गं किमपि दृश्यते ॥
न च संस्कारकोशस्ते सङ्घातात्मा प्रतिक्षणम् ।
प्रचयापचयाभ्यां स्याद्भिन्नः स्मर्ताऽत्र को भवेत् ॥

प्रत्येकचैतन्यपक्षे दूषणान्तरमाह । प्रत्येकमिति । अयम्भावः बहूनां हि चेतनानां कार्यवशात्संहतानामपि परस्परमीर्ष्यासूयादयो दृश्यन्ते नात्र कदाचिदपि तथा । मिथश्चैते किमर्थमुपकुर्य्युः न तावददृष्टार्थं त्वया तदनभ्युपगमात् । न चैकग्रामवर्तिनामिव कार्यतोऽन्योन्यमुपकारः क्वचिदपि देहे तादृगभिसन्धेरदर्शनात् एक एवाहं सर्वैरवयवैर्यथार्हमधिष्ठितैः स्वात्मन उपकरोमीति सर्वेषां स्वसंवेदनसिद्धमिति । ननु स्वोपकारनिरपेक्षपरोपकर्तारः पराभ्यसूयारहिताः स्वपाण्यादयः स्वहेतुशक्त्या यदृच्छातो वा सिद्धा इत्यत्राह । वीतराग इत्यादि । जातः कश्चिच्चेतनः स च रागद्वेषादिरहितः तदा सर्वप्रवृत्तिनिवृत्तिभङ्ग इति भावः । आवृत्त्याऽन्यो ऽप्यर्थः । जातमात्रो हि जन्तुः स्तन्यादिवाञ्छायुक्तस्तदर्थप्रवृत्त्या निश्चीयते तदवस्थस्य च रागादयो भवान्तरीयसंस्कारोद्बोधमन्तरेण न युज्यन्ते ततश्च देहतदंशव्यतिरिक्त आत्मेति । एवम्मनुष्यादिशरीरप्राप्तिदशायामदृष्टविशेषात्पूर्वजन्मानुभवसंस्कारभेदैरेवमतिरुचि-

* रुमा स्याल्लवणाकरः ।

भेदाश्च युज्यन्ते । अवयविवादमन्वाहृत्याप्याह । तत्सङ्घातेति । अयं भावः अवयवगतविशेषगुणपूर्वका एव ह्यवयविविशेषगुणास्तद्वा-दिभिरिष्यन्ते प्रत्यवयवचैतन्यं च निरस्तमेव। नन्ववयवनिष्ठं चैतन्यं सूक्ष्मवर्तित्वात्सूक्ष्मम् । अवयविनिष्ठन्तु स्थूलवर्तित्वात्स्थूलं तदेव व्यवहारयति मैवम् । त्रसरेणुकल्पानामपि जन्तूनां प्रवृत्तिदर्शनात् अतोऽपि स्थूलतमानाम्मनुष्यमातङ्गाद्यवयवानां पृथक्स्वधीपूर्वप्रवृ-त्तिप्रसङ्गात् । न च मनुष्याद्यवयवेषु चैतन्यमनुद्भूतमिति वाच्यम् । अनुद्भूतेरुद्भूतारम्भायोगात् । यत्तु सूचितं सुरगुरुणा पृथिव्यापस्तेजोवा-युरिति तत्त्वानि तेभ्यश्चैतन्यं किण्वादिभ्योमदशक्तिवदिति । इदमपि प्रत्येकसमुदायादिविकल्पदोषोक्त्या दत्तोत्तरम् । अस्ति हि प्रत्यवयवं किण्वादीनां संसर्गविशेषे मदशक्तिः अम्लकर्पूरादिषु विषशक्तिश्च । एतेन चूर्णहरिद्रासंसर्गजरागादयोऽपि निरूढाः । ननु चैतन्यमिति न कश्चिद् गुणः यस्याधारोऽपेक्ष्यः किन्तु याऽसौ युष्माकं चैत-न्यसामग्री सैव चैतन्यपदार्थः स्यात् । व्याहारव्यवहारयोस्तयै-वोपपत्तौ मध्ये गुणविशेषकल्पने गौरवादिति तन्न । तस्याः प्रत्य-क्षत्वायोगात् प्रत्यक्षाप्रत्यक्षसमुदायो हि सर्वत्र सामग्री प्रत्यक्षश्च जानामीति बोधः । न च तद्धीरानुमानिकी त्वया कथमप्यतीन्द्रिया-नुमानानभ्युपगमात् प्रवृत्तिरहितदशायामपि जानामीति सद्भावाच्च ।

देहधातुविशेषो वा विकारो वाऽस्य कश्चन ।
ज्ञानमित्यपि वक्तुं ते न युक्तं तदर्शनात् ॥

हृदयस्थः पित्तविशेषः प्रकाशक इति वैद्यागमस्त्वन्यपरः ये तु लोकायतमित्यचायतशब्दविवक्षितमनुमानमपि प्रत्यक्षान्तर्भा-वेण तत्फलतया वा गृह्णन्ति तान्प्रत्यनुमानान्यप्याह । सङ्घातत्वा-दिभिरिति । तदिति वर्ष्मपरामर्शः अचित् न चैतन्याश्रय इत्यर्थः

विमतमचेतनं सङ्घातत्वाद् घटवत् आदिशब्देन बाह्येन्द्रियग्राह्यत्वाच्चाक्षुषत्वाद्भूतत्वाद्रूपवत्त्वादित्यादीनां ग्रहणं, तथा विगीता धीः चैत्रव्यतिरिक्तविषया धीत्वात् मैत्रधीवत् इति । न चैषां प्रत्यक्षबाधः शङ्क्यः देहात्मबोधस्यान्यथासिद्धिसंभवात् व्यतिरेकधीप्राबल्याच्च । ननु भेदधीबलादेषां प्रत्यक्षविरोधः परिजिहीर्षितः सा तु न भेदसाधिका ममात्मेत्यभेदेऽपि तद्दृष्टेरित्यत्राह । स्यादिति । अयम्भावः मम हस्तः शरीरमित्यादिप्रत्ययाः मम गृहमित्यादिवद्युक्तव्यतिरेकाः ममात्मेति धीस्तु घटस्य स्वरूपमितिवदभेदेऽपि निर्दिष्टविशिष्टांशनिष्कर्षगोचरतया तन्मात्रभेदस्थापिकाऽगत्या स्वीकृता नान्यत्रापि अतिप्रसङ्गादिति ॥ १ ॥

अथ स्यात् अस्ति तावत् स्थूलोऽहं जानामीत्यादिधीः तत्र स्थौल्यं शरीरस्थं ज्ञानादिकं तदन्यनिष्ठमिति दुर्विवेचं ममेति भेदधीश्च नाभेदधियं बाधितुमर्हति अविशेषात् । अनुमानानि च वह्न्यनुष्णत्वानुमानवत्स्युः तत्र निषेध्यं ह्युष्णत्वं वह्नावेव सिद्धमिति चेत्तत्रापि निषेध्यं चेतनत्वं देह एव ग्राह्यम् । न च प्रत्यक्षप्रतिपन्ने वादिविमतिमात्राद्बाधकानुमानावकाशः, अतिप्रसङ्गात् । विप्रतिपत्त्या सन्देहः सन्देहे न्यायप्रवृत्तिस्स्यादिति चेन्न । दृष्टे कस्मिंश्चिद्विगायति वह्नावनुष्णत्वानुमानप्रसङ्गात् । एतेन शास्त्रतोऽतिरिक्तबोधात्सन्देहः ततश्चानुमानमिति निरस्तम् । तत्प्रामाण्यव्यवसायाव्यवसाययोरत्र सन्देहानुदयात् सन्दिग्धशास्त्राद्दृढप्रत्यक्षं हि बलीयः अन्यथा अग्निरनुष्ण इति कस्यचिद्वाक्येनापि सन्देहेऽनुष्णत्वानुमानस्य निर्बाधत्वप्रसङ्गात् । ऐक्यभेदधीभ्यामेव सन्देह इति चेन्न । अग्नेर्ज्वालेति भेदधियाऽग्नेरुष्णत्वेऽपि केनचिद्धेतुना ज्वालानुष्णत्वानुमानप्रसङ्गात्

सांख्याद्युक्तान्यनुमानानि त्वबाधकतमानि । पठन्ति हि सङ्घातपरार्थत्वादिति अत्राद्ये पत्यादिशरीरार्थैर्भार्यादिशरीरैस्सिद्धसाधनता । न च तावदतिरिक्तं खट्वादिदृष्टान्तेऽपि दृष्टं स्वाभिमतात्मपारार्थ्यसाधने त्वप्रसिद्धविशेषणः पक्षः, दृष्टान्तश्च साध्यविकलः, खट्वादौ च संहतपरार्थत्वनियमदृष्ट्या तत्रापि संहतः परः प्रसज्येत अनवस्थाभयात्तस्यासंहतत्वकल्पनाद्वरं शरीरस्या*नन्यार्थत्वकल्पनम् । एवमधिष्ठेयत्वभोग्यत्वाभ्यामधिष्ठातृभोक्तृकल्पनं चायुक्तम् स्वाभिमतात्माधिष्ठेयत्वभोग्यत्वयोस्सर्वत्रासिद्धेः साध्याविशेषाच्च । अधिष्ठेयत्वादिमात्रे हेतावाकारभेदेन स्वेनैव स्वस्य तदुभयसम्भवात् । अधिष्ठेयत्वं हि कस्य चिद्व्यापारेण व्यापार्यत्वं तच्च स्वस्य परस्य चेति न विशेषः भोग्यत्वमप्यनुकूलबुद्धिविषयत्वं तच्च स्वेनैव स्वस्य देहातिरिक्तत्वेऽप्यनुमतम् । यच्चाहुः नेदमनात्मकं जीवच्छरीरम् अप्राणादिमत्त्वप्रसङ्गादिति तत्र जीवच्छरीरं सात्मकं प्राणादिमत्त्वादिति प्रसङ्गानुग्राह्यः प्रयोगः तस्मिन्नप्रसिद्धविशेषणः पक्षः त्वदिष्टस्यात्मनः क्वचिदप्यसिद्धेः । आत्मशब्दवाच्ययत्किञ्चिद्योगविवक्षायां स्वभावयत्नादियोगात्सिद्धसाधनता । किञ्चानेनैव हेतुना जीवच्छरीरं खपुष्पवदित्यपि साधयन्नपि दुर्वारः स्यात् । अप्रसिद्धसाधनस्याभ्युपगमात् । अस्ति किञ्चित्खपुष्पादि†शब्देनोपस्थाप्यं तदेवात्मेति चेन्न । असत आत्मत्वसाधनायोगात् यत्किञ्चिन्मात्रस्य साधने च सिद्धसाधनता

* प्रत्यक्षतः शरीरस्यान्यार्थत्वेन अनन्यार्थत्वकल्पने बाध इति तु नाभिज्ञाभिधानं शरीरान्यार्थतायाः पति-भार्यादिशरीरस्थले परस्परार्थतयैव अन्यार्थत्वानुमानचारितार्थ्ये तदतिरिक्तान्यकल्पकत्वायोगात्। एवं चान्यन्यार्थतायाः परस्परार्थतापर्यवसन्नायाः संभवे किमधिककल्पनयेति भावः। दृष्टं चान्योन्यार्थत्वेनान्यार्थत्वं लोके स्वामिभृत्यशरीरयोरपि । अनन्यार्थस्त्वन्योऽद्याप्यसिद्धः । स्वाभिमतान्यार्थत्वसाधने त्वप्रसिद्धविशेषणः पक्ष इति स्पष्टमेव ।

† खपुष्पशब्देनेति पु॰ पा॰ ।

विवक्षितविशेषस्य दुस्साधत्वात् । अपि च सर्वेषु वस्तुषु तत्तदसाधारणधर्मेण सात्मकत्वं साध्यं स्यात् विपक्षे तत्तदसाधारणधर्मविरहप्रसङ्ग इत्यनुग्राहकसिद्धेश्च । अनुपलम्भबाधादिकन्तु न मानम् अतोऽनन्याधिष्ठितस्वयंवाहकयन्त्रन्यायाद्विविचभूतपरिणतिविशेषसम्भवोऽयं देहयन्त्र इति ॥ अत्र प्रत्येकसमुदायाविकल्पदौस्थ्यादिप्रागुक्तप्रबलप्रतिक्षिप्तेऽपि पक्षे गाढाभिनिवेशस्य सोपपत्तिकं भेदबुद्धेरनुमानानां च बलीयस्त्वं पुनरनुद्घाटयन्निष्कम्पामैक्यधियमन्वारुह्य मानान्तरेण बिबाधयिषुः परेष्टं तद्मूलमन्वाह । स्यादिति ।

सू० स्याद्वाऽसौ चर्मदृष्टेरयमहमिति धीर्देह एवात्मजुष्टे निष्टप्ते लोहपिण्डे हुतवहमतिवद्भेदकाख्यातिमूला ॥ श्रुत्यर्थापत्तिभिश्च श्रुतिभिरपि च नस्सर्वदोषोज्झिताभिर्देही देहान्तराप्तिक्षम इह विदितस्संविदानन्दरूपः ॥ २ ॥

अन्यथासिद्धिसूचनाय चर्मदृष्टेरिति मौढ्यपरम् । अयमिति गुणक्रियादिविशेषविशिष्टपिण्डावमर्शः संसर्गविशेषादयं भ्रम इति बोधयितुमात्मजुष्टत्वोक्तिः तन्निदर्शनेन शोधयति । निष्टप्त इति । संसर्गजत्वात्सम्भावितान्यथासिद्धिकमैक्यप्रत्यक्षं शास्त्रेण बाधितुं शक्यमित्याशयः । संसृष्टेष्वपि सर्वत्र कथं न भ्रम इत्यत्राह । भेदकेति । यत्र हि सामग्री तत्र कार्यं स्यादिति भावः । नन्वैक्यधीरिह दृष्टा तदन्यथासिद्धिस्तु शङ्किता नैतावता विवक्षितसिद्धिरित्यत्राह । श्रुतीति । श्रुत्या भाविता अर्थापत्तयः श्रुत्यर्थापत्तयः ताभिः । श्रुतार्थापत्तिभिरिति यावत् । सन्ति हि देहान्तरानुभाव्यस्वर्गस्वारा-

न्यादिसाधनविधायिन्यो यमनरकादिप्रापकश्रुतयश्च न च तत्रानाश्वासः श्रुतिप्रामाण्यस्थापनात् अतोऽर्थादापद्यते देहान्तरानुयायी भोक्ताऽस्तीति, पश्वादिदृष्टफलसाधनविधयश्च तत्तत्फलोपायदशानुवृत्तभोक्तृसापेक्षाः। न चात्र सङ्घातस्य भोक्तृत्वम् उपायसाधकसङ्घातस्योपचयादिना भिदुरस्यानुवृत्त्यसम्भवात् अहमुपायानुष्ठाता तत्फलं भुञ्ज इति च स्वरूपतः कालतश्चाभिन्न एकः प्रतिसन्धीयते, मुक्त्युपायविधयश्च सर्वबन्धनिवृत्तिमदात्मस्थित्याक्षेपकाः। देहात्मभेदं कण्ठोक्त्याऽप्याह। श्रुतिभिरपीति। चः श्रुतिवदनन्ताः स्मृतीस्समुच्चिनोति स्वतःप्रामाण्ये प्राप्ते बाधकासम्भवार्थं सर्वदोषोज्झितत्वोक्तिः देही नित्यमवध्योऽयम्। वासांसि जीर्णानि इत्यादिस्मारणाय देहीत्यादिकथनम्। व्यावर्तकधर्मवर्गप्रदर्शनार्थं सम्विदानन्दरूपतोक्तिः। रूपशब्दः स्वरूपपरः निरूपकधर्मपरो वा ॥ २ ॥

इत्यात्मनो देहातिरेकः ॥

ये पुनरेवमाहुः चक्षुराद्यन्वयव्यतिरेकानुविधायिरूपादिज्ञानं तन्निष्ठमेवोचितं व्यपदिशन्ति च चक्षुः पश्यतीत्यादि तथा स्पर्शनसुखो वायुः श्रवणकटुश्शब्द इति इन्द्रियेषु च विकलेषु विकलोऽहमिति धीर्जायते सकलेष्वन्यथा, परस्परानुभूतार्थप्रतिसन्धानमपि संस्कारवैचित्र्यात् तच्चैकशरीरानुप्रवेशायत्तम्। अतो हेत्वादिप्रतिसन्धानमपि सिद्धम् अहं पश्याम्यहं शृणोमीत्याद्यपि सर्वेषामिन्द्रियाणामहमर्थत्वात्सिद्धं पञ्चानामपि व्यवहारहेतुभूतं सुखं प्रवृत्तिकारणं शरीरञ्च साधारणं तेनैक एवायं व्यवहरतीति लौकिकावगमः। अनुमानमपि चक्षूरूपग्रहणाधिकरणं चक्षुष्ट्वात् यन्नैवं तन्नैवं यथाऽन्यदिति एवं श्रोत्रादिष्वपीति तान्प्रत्याचष्टे। बाह्यान्तेभ्य इति ॥

मू० बाह्यान्तेभ्योऽन्य आत्मा तदखिलविषयप्रत्य-
भिज्ञातुरैक्यात् कर्तुः स्मृत्यादिकार्ये करण-
मिति मनोमानसिद्धं ततोऽन्यत् ॥ प्राणा-
स्सङ्घातरूपा वपुरुदितनयान्न ध्रुवं चेतयन्ते
ज्ञानं च ज्ञातृधर्मः क्षणिकमपि च वस्तेन
नास्यात्मभावः ॥ ३ ॥

पाण्यादिषूक्तां प्रतिसन्धानानुपपत्तिमिन्द्रियेष्वपि दर्शयितुमाह। तदखिलेति । तेषां चक्षुरादिनां प्रतिनियता विषयाः रूपादयः अखिलानां तेषां प्रतिसन्धाता त्वेकः, योऽहं द्रष्टा स एव शृणोमीति भ्रान्त्या यत्तच्छब्दाभ्यां द्वयोरेकीकार इति चेन्न । द्वयोरप्येकवदेकत्वमोहायोगात् अन्यस्य मुह्यतोऽनभ्युपगमात् । एकश्चाहं बहुभिरिन्द्रियैरनुभवामीति भेदेन चेति । न च कस्यचिदहं चक्षुरित्यादिधीः स्थूलोऽहमित्यादिदेहात्मबुद्धेश्चेन्द्रियात्मवादेऽपि दुस्त्यजत्वाद्वरमिह देहात्मवादः रूपादिज्ञानस्य चक्षुराद्यन्वयव्यतिरेकानुविधानं तत्करणतयाऽपि स्यात् तथा चाभिमानः चक्षुषा पश्यामि श्रोत्रेण शृणोमीति। अत एव चक्षुः पश्यतीत्यादिकं भाक्तं वैकल्यादिधीश्च चक्षुषा विकलोऽहमित्यादिरूपा न तु चक्षुरहं नास्मीति विरोधात् न हि नष्टमिन्द्रियं स्ववैकल्यमनुसन्धत्ते असत्त्वात् नाप्यन्यत् तस्यावैकल्यात् अन्यथा तत्रापि विरोधात् । यदि परमिन्द्रियान्तरविरहमिन्द्रियान्तराण्यनुसन्दधीरन् तथापि गतस्येन्द्रियस्य नाहमर्थत्वसिद्धिः अन्यथा पाण्यादिविकलोऽहमिति बोधेऽपि पाण्यादीनामात्मत्वप्रसङ्गात् अनुमानतोऽपि बोद्धुस्तस्य रूपाद्यनुपलम्भात् तद्बोधककरणाभाव एव अनुमेयः ततश्चैक एव तत्तत्करणाधीनरूपादिग्रहणोऽहमर्थस्सिद्धः ।

मिथोऽनुभूतप्रतिसन्धानार्थं च संस्कारवैचित्र्यं किमिति चिन्त्यं, यद्यात्मान्तरेषु स्मृत्युत्पादनशक्तिः तन्न सर्वेषु तत्प्रसङ्गात् । तच्छरीरवर्तिष्विति चेन्न । औदरकृम्यादिष्वपि तत्प्रसङ्गात् । शरीरान्तरवर्त्तित्वात्तत्र न प्रसङ्ग इति चेन्न । भिन्नावयवस्थित्यापि प्रतिसन्धानाभावप्रसङ्गात् तन्निधानस्य चाविशेषात् संस्काराणां सर्वेन्द्रियसाधारणहृत्कोशादिवर्त्तितया शरीरैक्याच्च विशेष इति चेन्न त्वदिष्टसंस्कारकोशे मानाभावात् अनेकेषामहमर्थानाम् एकशरीरयोगे च ततश्च वरं यथोपलम्भमेकस्मिन्नहमर्थे सर्वसंस्काराधानम् । न चोपदेशचेष्टाभिर्मिथोबोधनेनान्योन्यसंस्कारार्पणम् अदर्शनात्, अविचारितरमणीयोऽयं पङ्गूनां परस्परसंस्कारादिलाभ इति, तत्त्वादृशेष्वेव वक्तव्यं । यदपि शरीराद्यैक्यादेकत्वावगम इति स किं तत्रत्यानामेवान्येषां वा, नाद्यः परस्परानभिज्ञत्वात् अनुमानतस्तु भिन्नतयैव सिद्धेः चक्षुश्श्रोत्रादिरूपोऽहमिति भ्रमादर्शनाच्च । न द्वितीयः स्वशरीरसिद्धप्रकारेण परशरीरेऽपि बहुत्वानुमानात् केवलव्यतिरेकिभिरिन्द्रियाणां ज्ञातृत्वाद्यनुमानमतिप्रसङ्गाद्यनेकदोषोपहतं ततश्चैकस्यैव सर्वग्रहणाधिकरणत्वे त्वस्मन्मते कः प्रद्वेषः । अन्धबधिराद्यभावश्च स्यात् ज्ञातुर्ज्ञानकरणतयैव चक्षुरादीनां सिद्धेस्तद्विपरीतानुमानानां धर्मिग्राहकबाधश्चेति । अस्तु देहाच्चक्षुरादिभ्यश्चात्माऽन्यः स तु मन एव स्यात् देहादेरन्यत्वात् एकत्वेन प्रतिसन्धानोपपत्तेः असङ्घातरूपत्वेन प्रत्येकादिविकल्पानवकाशाच्च तदतिरिक्तात्मक्लृप्तौ तु गौरवम् अतो मम मन इति भेदोक्तिः क्लिष्टगत्येति तत्राह । कर्तुरिति । अयम्भावः किमत्र स्मृत्यादिकरणस्य मनसस्तत्कर्त्रा तादात्म्यं साध्यते तेन वा कर्तुः, न तावदाद्यः ततोऽन्यतयैवानुमानतश्शास्त्रतो वा तत्सिद्धेर्धर्मिग्राहकबाधात् । अत एव न द्वितीयः स्वस्य स्वयमेव स्मृत्यादिकरणमित्यत्र

सदृशस्यानङ्गत्वात्कथमुपादानमित्याशङ्कते । अशब्दमिति । अविहितमित्यर्थः ॥ २९ ॥

नानङ्गत्वात् ॥ ३० ॥

अविहितत्वं वैकल्पिके ऽपि तुल्यमिति समाधत्ते । नेति । अनङ्गत्वात् । अविहितत्वस्य तुल्यत्वात् । इतरशास्त्रे ऽप्रामाण्यग्रहादिति भावः ॥ ३० ॥

*संस्काराश्च खादिरे कर्तव्याः ॥ ३१ ॥

प्रतिनिधौ संस्काराः कर्तव्या इत्याह । संस्कारा इति । खादिरे खदिरप्रतिनिधौ ॥ ३१ ॥

पूतीकस्य सोमप्रतिनिधित्वम् । अधि० १३ ।

वचनाच्चान्याय्यमभावे तत्सामान्येन प्रतिनिधिरभावादितरस्य ॥ ३२ ॥

सोमाभावे निमित्ते पूतीकविधिरुत नियमः प्रतिनिधेरिति संशये निमित्ते विधिरिति पूर्वपक्षे सिद्धान्तमाह । वचनादिति । अभावे सोमाभावे तत्सामान्येन तत्सादृश्येनेतरस्य पूतीकातिरिक्तस्य प्राप्तौ वचनात् सोमाभावे इति वचनाद् अन्याय्यं सदृशम्, असदृशं पूतीकरूपं द्रव्यं प्रतिनिधिः स्यात् । अभावे ईदृशवचनाभावे इतरस्य सदृशस्य प्राप्तिः ॥ ३२ ॥

प्रतिनिध्यपचारे उपात्तद्रव्यसदृशस्य प्रतिनिधित्वम् । अधि० १४ ।

न प्रतिनिधौ समत्वात् ॥ ३३ ॥

नीवारनाशे नीवारसदृशः प्रतिनिधिरुत व्रीहिसदृश इति संशये नीवारसदृश इति पूर्वपक्षे सिद्धान्तमाह । नेति । प्रतिनिधिनाशे न तत्सदृशं समत्वात् । आगन्तुकत्वस्य तुल्यत्वाद् अतो मुख्यसदृश एव ग्राह्य इति भावः ॥ ३३ ॥

श्रुतस्यापि प्रतिनिधेरभावे मुख्यसदृशस्यैव प्रतिनिधित्वम् । अधि० १५ ।

स्याच्छ्रुतिलक्षणे नियतत्वात् ॥ ३४ ॥

नीवारनाशे तत्सदृशग्रहणं मा भवतु, पूतीकनाशे तत्सदृशमेव ग्राह्यमिति पूर्वपक्षमाह । स्यादिति । श्रुतिलक्षणे वाक्येन नियमितप्रति-

* इदं सूत्रं भाष्ये सूत्रत्वेनोल्लिखितं न दृश्यते ।

निधिनाशे नष्टसदृशग्रहणं स्यात् । तस्मिन्प्रयोगे तस्य पूतीकस्य नियतत्वात् ॥ ३४ ॥

न तदीप्सा हि ॥ ३५ ॥

सिद्धान्तमाह । नेति । न पूतीकसदृशोपादानम् । हि यतः यागे प्रवृत्तस्य तदीप्सा सोमेच्छा प्रथमं, न पूतीकेच्छा, अत आगन्तुकसदृशो नेच्छाविषयो भवितुमर्हतीत्यर्थः ॥ ३५ ॥

मुख्यापचारे पुनस्तत्प्राप्तौ तस्यैवोपादानम् । अधि० १६ ।

मुख्याधिगमे मुख्यमागमो हि तदभावात् ॥ ३६ ॥

मुख्यस्यालाभेन नीवारान् संपाद्य यागार्थं प्रवृत्तः, न निर्वापादि कृतं, दैवाद् व्रीहिलाभे तादृशप्रयोगे लब्धे ऽपि व्रीहयो न ग्राह्या इति पूर्वपक्षे सिद्धान्तमाह । मुख्याधिगमेति । मुख्याधिगमे व्रीहिलाभे उक्तस्थले मुख्यं व्रीहयः ग्राह्याः । हि यतः तदभावाद् मुख्याभावाद् आगमः नीवारागमः । सर्वथा मुख्याभावएव प्रतिनिधिरिति भावः ॥ ३६ ॥

प्रतिनिधिना प्रारब्धे कर्मणि मुख्यलाभे ऽपि प्रतिनिधिनैव समापनम् । अधि० १७ ।

प्रवृत्ते ऽपीति चेत् ॥ ३७ ॥

यत्र नीवारपुरोडाशेन प्रधानयागः संपन्नः । पश्चाद्व्रीहिलाभे पुनरनुष्ठेयं साद्गुण्यायेति पूर्वपक्षमाह । प्रवृत्तइति। प्रवृत्ते प्रधानयागसंपत्त्यनन्तरमपि पुनर्व्रीहिग्रहणमिति पूरणीयम् ॥ ३७ ॥

नानर्थकत्वात् ॥ ३८ ॥

सिद्धान्तमाह । नेति । न व्रीहिग्रहणमनर्थकत्वात् । व्यर्थत्वात् । यागार्थं द्रव्यसंपादनम् । यागस्य जातत्वात्तदर्थं संपादनं, नाङ्गानुसारेण प्रधानावृत्तिर्युक्तेति भावः ॥ ३८ ॥

अमुख्ये संस्कारयोग्ये ऽपि मुख्यस्यैवोपादानम् । अधि० १८ ।

द्रव्यसंस्कारविरोधे द्रव्यं तदर्थत्वात् ॥ ३९ ॥

यूपप्रकृतिभूतः मुख्यः खदिरः पशुनियोजनमात्रसमर्थः अष्टाश्रीकरणादिसंस्कारासमर्थः, तत्सदृशः कदरस्तूभयसमर्थः, तत्र को ग्राह्य इति संशये सिद्धान्तमाह । द्रव्येति । द्रव्यस्य खदिरस्य संस्कारस्य अष्टा

श्रीकरणादेः परस्परं विरोधे उभयोरेकत्रासंभवे द्रव्यं ग्राह्यम् । संस्कारो बाध्यः । संस्कारस्य तदर्थत्वाद् द्रव्यार्थत्वात् । अङ्गप्रधानविरोधे अङ्गस्य लोप इति भावः ॥ ३९ ॥

प्रयोजनायोग्यस्य मुख्यस्य सत्वेऽपि प्रतिनिध्यादानम् । अधि० १६ ।

अर्थद्रव्यविरोधेऽर्थो द्रव्याभावे तदुत्पत्तेर्द्रव्याणामर्थशेषत्वात् ॥ ४० ॥

यत्र खदिरद्रव्यं पशुनियोजनेऽप्यसमर्थमतिसूक्ष्मं कदरस्तु समर्थः, तत्र किं ग्राह्यमिति विचारे सिद्धान्तमाह । अर्थेति । अर्थस्य पशुनियोजनकार्यस्य द्रव्यस्य खदिरस्य विरोधे द्रव्यं त्यक्त्वाऽर्थः संपादनीयः । द्रव्याभावे मुख्यद्रव्याभावे गौणेनापि कार्योत्पत्तेः द्रव्यस्य पशुनियोजनाङ्गत्वात् । प्रधानानुसारेणाङ्गलोपो युक्त इति भावः ॥ ४० ॥

अङ्गनिर्वाहासमर्थस्यापि प्रधाननिर्वाहकस्य मुख्यस्योपादानम् । अधि० १७ ।

विधिरप्येकदेशे स्यात् ॥ ४१ ॥

यत्र व्रीहयो ह्यवदानमात्रे पर्याप्ताः, नीवारास्तु सर्वकार्यपर्याप्ताः, तत्र किं ग्राह्यमिति विचारे पूर्वपक्षमाह । विधिरिति । विधिः विहितद्रव्यं व्रीह्यादि एकदेशे ह्यवदानमात्रे समर्थं तत्र प्रतिनिधिः स्यात् । भूयसामङ्गानामनुग्रहायेति भावः ॥ ४१ ॥

अपि वाऽर्थस्य शक्यत्वादेकदेशेन निर्वर्त्येतार्थानामविभक्तत्वाद्गुणमात्रमितरत्तदर्थत्वात् ॥ ४२ ॥

सिद्धान्तमाह । अपि वेति । एकदेशेन अल्पेनापि प्रधानद्रव्येण निर्वर्त्येत प्रधानं कर्तव्यम् । अत्र हेतुद्वयम्, अर्थस्य प्रधानस्यानुष्ठातुं शक्यत्वाद्, इतरत् स्विष्टकृदादि तदर्थत्वाद् हविःसंस्कारार्थत्वाद्गुणमात्रं हविषः अङ्गम् अतः अर्थानां स्विष्टकृदादिशेषप्रतिपत्तिकार्याणां सर्वेषामर्थानां कार्याणामविभक्तत्वादभेदात् । सर्वाण्यपि शेषकर्माणि हविरङ्गभूतानीति भावः । व्रीहिभिर्यजेतेति श्रुत्या व्रीहयः यागाङ्गं शेषकार्याणि हविरङ्गमिति दुर्बलमिति भावः ॥ ४२ ॥

इति जैमिनिसूत्रवृत्तौ षष्ठस्य तृतीयः पादः ॥ ३ ॥

अवत्तनाशे पुनरवदानार्थं प्रतिनिध्यादानम् । अधि० १ ।

शेषाद् द्व्यवदाननाशे स्यात्तदर्थत्वात् ॥ १ ॥

पुरोडाशात् स्रुचि अवदानानन्तरमवत्तनाशे पुनः पुरोडाशादवदानमुत नेति संशये पूर्वपक्षमाह । शेषादिति । द्व्यवदाननाशे शेषात् पुरोडाशाद्ग्राह्यम् । तदर्थत्वाद् आग्न्यर्थत्वात् । अग्नये जुष्टं निर्वपामीति निर्वापेण निखिलपुरोडाशस्याग्न्यर्थत्वादिति भावः ॥ १ ॥

निर्देशाद्वा ऽन्यदागमयेत् ॥ २ ॥

सिद्धान्तमाह । निर्देशादिति । निर्देशान्मध्यात्पूर्वार्धादवद्यतीति विधानात् । तन्नाशे अन्यत् पुरोडाशं निर्माय तेन यागः मध्यपूर्वार्धयोरेवाग्न्यर्थत्वादिति भावः ॥ २ ॥

स्विष्टकृदर्थावत्तनाशे पुनरवदानाभावः । अधि० २ ।

अपि वा शेषभाजां स्याद्विशिष्टकारणात् ॥ ३ ॥

स्विष्टकृदाद्यर्थमवत्तनाशे पुनः द्रव्यमुत्पादयेन्न वेति संशये सिद्धान्तमाह । अपि वेति । शेषभाजां शेषप्रतिपत्त्यर्थमवत्तानां नाशे स्विष्टकृदादिलोपः विशिष्टकारणत्वात् । प्रधाननिवृत्त्यनन्तरं शिष्टस्य प्रतिपत्तिकारणत्वात् । अयं भावः । शेषहविःसंस्कारार्थाः स्विष्टकृदादयः हविरङ्गभूताः, अङ्गानुसारेण प्रधानावृत्तिर्न युक्तेति भावः ॥ ३ ॥

ऋत्विजामेव शेषभक्षणम् । अधि० ३ ।

निर्देशाच्छेषभक्षो ऽन्यैः प्रधानवत् ॥ ४ ॥

शंयुवाकादिभक्षणम् ऋत्विग्भ्यो ऽन्यैः कार्यमुत तैरेवेति संशये पूर्वपक्षमाह । निर्देशादिति । शेषभक्षः शंयुवाकादिभक्षः अन्यैर्ऋत्विग्भ्यो ऽन्यैः कार्यः निर्देशात् । यजमानपञ्चमाः प्राश्नन्तीति निर्देशात्प्रधानवत् । यथा मध्यादवद्यतीति निर्देशेनान्यः पुरोडाशः प्रधानार्थः तथा ऽत्रान्ये भक्षणार्थम् ॥ ४ ॥

सर्वैर्वा समवायात्स्यात् ॥ ५ ॥

सिद्धान्तमाह । सर्वैरिति । सर्वैः इडादिसर्वभक्षैः ऋत्विजो युज्यन्तइति पूरणीयम् । समवायात् । कर्मकरत्वेन संबन्धात् ॥ ५ ॥

निर्देशस्य गुणार्थत्वम् ॥ ६ ॥

ननु यजमानपञ्चमा इति वाक्यं व्यर्थमत आह । निर्देशेति । निर्देशस्य यजमानपञ्चमा इति वचनस्य गुणार्थत्वं कर्मकरत्वाभावेनाप्राप्तयजमानविध्यर्थत्वम् ॥ ६ ॥

प्रधाने श्रुतिलक्षणम् ॥ ७ ॥

ननु प्रधानदृष्टान्तो विरुध्येत तत्राह । प्रधानइति । प्रधाने श्रुतिलक्षणं वाक्यप्रामाण्यम् । अयं भावः । तत्र विधेयमन्यच्चास्तीति परिसंख्या । अत्र न तथेति ॥ ७ ॥

अश्ववदिति चेत् ॥ ८ ॥

अश्वमेधे यथा ऋत्विजां न सर्वभक्षणं तथा ऽत्रापि किं न स्यादित्याक्षिपति । अश्वेति ॥ ८ ॥

न चोदनाविरोधात् ॥ ९ ॥

समाधत्ते । नेति । चोदनाविरोधात् । अयं भावः । अश्वमेधे बहुलं मांसं सर्वभक्षणे ऋत्विजां मरणे यज्ञो न समाप्येत, अश्वमेधेन यजेतेति श्रुतिर्बाध्येतेति ॥ ९ ॥

कृत्स्नैकदेशभेदे प्रायश्चित्तानुष्ठानम् । अधि० ४ ।

अर्थसमवायात्प्रायश्चित्तमेकदेशे ऽपि ॥ १० ॥

भिन्ने जुहोतीति श्रुतम् । इदं कपालस्यैकदेशभेदने ऽपि उत केवलसर्वभेदनइति संशये सिद्धान्तमाह । अर्थेति । एकदेशे एकदेशभेदने ऽपि, अपिना संपूर्णभेदे । प्रायश्चित्तं होमः, अर्थस्य भेदनरूपनिमित्तस्य समवायात् संपन्नत्वात् ॥ १० ॥

न त्वशेषे वैगुण्यात्तदर्थं हि ॥ ११ ॥

भिन्ने होमो न सर्वभेदने, होमस्य भिन्नवस्तुसंस्काररूपत्वात्सर्वांशेन भिन्नस्याये कार्याक्षमत्वादित्यभिप्रायेण पूर्वपक्षमाह । न त्विति । अशेषे भिन्ने तु न होमः । हि यतः तदर्थं भिन्नस्याङ्गं होमः अशेषभिन्नस्य वैगुण्यात् कार्याक्षमत्वात् ॥ ११ ॥

स्याद्वा प्राप्तनिमित्तत्वादतद्धर्मो नित्यसंयोगान्न हि तस्य गुणार्थत्वेनानित्यत्वात् ॥ १२ ॥

न भिन्नसंस्कारः किं तु भेदने निमित्ते होम इत्याह । स्यादिति । सर्वनाशे ऽपि होमः स्यात् । भेदनरूपप्राप्तनिमित्तत्वात् । अतद्धर्मः । भिन्नकपालादिसंस्कारो न । होमस्य नित्यसंयोगात् । तस्य भेदनस्य गुणार्थत्वेन गुणकार्यत्वेन, निर्देशइति शेषः । भेदनस्य अनित्यत्वात् । कादाचित्कत्वात् । न हि नित्यमनित्यस्योपकारं कर्तुं शक्नोतीति भावः ॥ १२॥

गुणानां च परार्थत्वाद्वचनाद्व्यपाश्रयः स्यात् ॥ १३ ॥

किं च, असति आर्षप्रमाणे अङ्गानां प्रधानसंबन्ध एव युक्तो नाङ्गेन संबन्ध इत्याह । गुणानामिति । गुणानामङ्गानां परार्थत्वात् प्रधानार्थत्वाद् वचनाद् विशेषवचनाद् व्यपाश्रयः अन्यत्र विनियोगः । अयं भावः भिन्ने जुहोतीति वाक्ये विशेषाश्रवणात्प्रधानहोमाधिकरणविधिर्वाच्यः । स च न संभवति । आहवनीयावरुद्धत्वादिति ॥ १३ ॥

***वचनाद्विकल्प इति चेन्न निमित्तार्थेन संभवात् ॥ १४ ॥**

उभयोस्तुल्यबलत्वेन विकल्पो ऽस्त्वित्याह । वचनादिति । निमित्तत्वेनोपपत्तौ दुष्टो विकल्पो न युक्त इत्याह । नेति ॥ १४ ॥

भेदार्थमिति चेत् ॥ १५ ॥

भिन्नस्य पुनःसंधानार्थता मन्त्रलिङ्गेन प्रतीयते सा बाध्येतेत्याह । भेदार्थमिति । गायत्र्या त्वा शताक्षरया संदधामीति संधानलिङ्गं ज्ञेयम् ॥ १५ ॥

नाशेषभूतत्वात् ॥ १६ ॥

होमेन कपालसंधानस्यासंभवाददृष्टार्थमित्याह । नेति । अशेषभूतत्वात् । पुनरुत्पत्त्यजनकत्वात् ॥ १६ ॥

अनर्थकं च सर्वनाशे स्यात् ॥ १७ ॥

किं च, यदि किंचिदेकदेशनाशे उक्तमन्त्रलिङ्गविरोधाददृष्टद्वारा

* इदं भाष्यपुस्तके सूत्रत्वेन नाधारि ।

कपालं संस्कृत्य उपधाने योजयेदिति कल्प्यते तदा ऽयिमवचनं व्यर्थमित्याह । अनर्थकमिति । सर्वनाशे सर्वनाशपरत्वे । अयं भावः । भिन्नं कपालमप्सु प्रहरतीति श्रुतम् । अस्य तव मते सर्वनाशपरत्वं वाच्यं, तथा सति एकदेशनाशे तदुपधानस्यापूर्वाजनकत्वेन कश्चिदज्ञात्वा कुर्यादिति जले प्रक्षेपविधिः सफलः, सर्वनाशे तदसंभवेन प्रक्षेपविधानं व्यर्थमिति ॥ १७ ॥

क्षामे सर्वदाहे प्रायश्चित्तानुष्ठानम् । अधि॰ ५ ।

क्षामे तु सर्वदाहे स्यादेकदेशस्यावर्जनीयत्वात् ॥ १८ ॥

पुरोडाशदाहे प्राश्चित्तं श्रुतम् । तदेकदेशदाहे ऽथ वा संपूर्णदाह इति संशये पूर्वाधिकरणवदेकदेशदाहे ऽपीति पूर्वपक्षे सिद्धान्तमाह । क्षामइति । क्षामे दाहे यत्प्रायश्चित्तं तत् सर्वदाहे स्यात् । एकदेशस्य एकदेशदाहस्यावर्जनीयत्वाद् नित्यत्वात् । नित्यस्य नैमित्तिकत्वासंभवादिति भावः ॥ १८ ॥

दर्शनादेकदेशे स्यात् ॥ १९ ॥

यस्य पुरोडाशौ क्षायतः तं यज्ञं वरुणो गृह्णाति यदा तद्धविः संतिष्ठेताथ तदेव हविर्निर्वपेद्यज्ञो हि यज्ञस्य प्रायश्चित्तिरिति । क्षायतः दग्धौ स्तः । अस्मिन्वाक्ये तद्धविः संतिष्ठेतेति, तेन हविषा यागः समाप्येतेत्यर्थकम् । सर्वदाहे भस्मीभूतस्य यागानर्हत्वाद्वाक्यं विरुध्येत, अत एकदेशदाह एवात्राभिमत इति शङ्कते । दर्शनादिति । दर्शनात्तद्यागसमाप्तिश्रवणाद् एकदेशदाहे स्यात् ॥ १९ ॥

अन्येन वैतच्छास्त्राद्धि कारणप्राप्तिः ॥ २० ॥

इमं दोषं परिहरति । अन्येनेति । अन्येनाज्येन एतत् समापनम् । ननु आज्येन समापने पुनः करणं कुतः तत्राह । शास्त्राद्. दाहे पुनरावृत्तिरिति शास्त्रात् कारणप्राप्तिः, निमित्तप्राप्तिः, अस्तीति शेषः । अन्यद्रव्येण कृते ऽपि, दाहे निमित्तत्वं न गच्छति, निमित्त नैमित्तिकमिति भावः ॥ २० ॥

तद्धविःशब्दान्नेति चेत् ॥ २१ ॥

तद्धविः संतिष्ठेतेत्यनेन वाक्येन तस्यैव दग्धहविषः साधनत्वश्रवणादन्येन हविषा कथं समाप्तिरिति शङ्कते । तदिति । न अन्येनेत्यर्थः ॥ २१ ॥

स्यादिज्यागामी हविःशब्दस्तल्लिङ्गसंयोगात् ॥ २२ ॥

हविःशब्दो यागवाचीति समाधत्ते । स्यादिति । इज्यागामी यागवाची हविःशब्दः तल्लिङ्गसंयोगात् । संतिष्ठेतेतिलिङ्गसंबन्धात् । अतोऽन्येन हविषा स्यात् ॥ २२ ॥

एकहविरार्तावपि पञ्चशरावनिर्वापः । अधि· ६ ।

यथाश्रुतीति चेत् ॥ २३ ॥

यस्योभयं हविरार्तिमार्च्छति ऐन्द्रं पञ्चशरावमोदनं निर्वपेदिति । उभयं हविः सायंप्रातर्हविः । अत्रोभयार्तिर्निमित्तमुतान्यतरार्तिरिति संशये पूर्वपक्षमाह । यथेति । यथा श्रूयते तथा उभयार्तिर्निमित्तमित्यर्थः ॥ २३ ॥

न लक्षणत्वादुपपातो हि कारणम् ॥ २४ ॥

सिद्धान्तमाह । नेति । हि यतः उपपातः नाशः कारणं निमित्तं, केवलक्षणादीनां नाशस्य सार्वकालिकत्वेन नित्यत्वात्केवलनाशस्य निमित्तत्वासंभवात् । लक्षणत्वात् । केवलहविषः प्रतियोगितासंबन्धेन विशेषत्वात् । उभयत्वस्यापि प्रतियोगितावच्छेदककोटिप्रवेशे वाक्यभेदः स्यादिति भावः ॥ २४ ॥

होमाभिषवोभयकर्तुरेव भक्षणम् । अधि· ७ ।

होमाभिषवभक्षणं च तद्वत् ॥ २५ ॥

ज्योतिष्टोमे ग्रावभिरभिषुत्याहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि भक्षयन्तीति । अत्राभिषवहोमौ भक्षणे प्रत्येकं कारणमुत मिलिताविति संशये पूर्वपक्षमाह । होमेति । होमाभिषवभक्षणं तद्वद् हविरार्तिवत् प्रत्येकं कारणमित्यर्थः ॥ २५ ॥

उभाभ्यां वा, न हि तयोर्धर्मशास्त्रम् ॥ २६ ॥

सिद्धान्तमाह । उभाभ्यामिति । हि यतः तयोः होमाभिषवयोः भक्षणस्य धर्मत्वप्रतिपादकमिदं शास्त्रं न, येनावृत्तिः स्याद् भक्षस्य ।

अथ नामप्रत्ययाः धातवः प्रदर्श्यन्ते ॥

'सुप आत्मनः क्यच्' । कर्मण इच्छायां वेति वर्तते, इहात्मशब्दः परव्यावृत्तिवचनः स्वशब्दपर्यायः, न चेतनद्रव्यवचनः, तस्मिन्हि किमयं कर्तृषष्ठ्यन्तः सन् इच्छया सम्बध्यते उत शेषषष्ठ्यन्तः सुबन्तेन, तत्राद्यपक्षे इच्छायाश्चेतनकर्तृत्वाव्यभिचारादानर्थक्यमात्मशब्दस्य । किं च राज्ञः पुत्रमिच्छत्यमात्य इत्यादौ परेच्छायामपि चेतनस्यैव कर्तृत्वात्क्यच् स्यात् । यत्तु भाष्ये इहासामर्थ्यात्प्रत्ययाभाववचनं तत्प्रौढिवादमात्रम्, इष्यमाणं वस्तु स्वत एव नित्यमन्यदपेक्षते इति नैतावतास्य सामर्थ्यम्, अत एव वृत्तावात्मग्रहणस्येदमेव प्रत्युदाहृतं, सुबन्तसम्बन्धपक्षेपीह राजादिना चेतनेनैव पुत्रादेः सम्बधात् क्यच् प्रसज्येतैव, आनर्थक्यं चाविशिष्टमेवात्मग्रहणस्य, अचेतनस्य व्यावर्त्यस्याभावात् । अत्र हरदत्तः । वृक्षस्य फलमिच्छति, खट्वायाः पादमिच्छतीत्यादौ यत्राचेतनार्थं किंचिदिष्यते तद्व्यावर्त्यमिति चेत्, तत्रापि चेतनस्यैव परं शेषितत्वात्, सर्वमेव हि भोग्यं चेतनानामेव शेषभूतं, खट्वायाः पादमिच्छतीत्यत्रापि यस्य तत् खट्वादिकमुपभोग्यं तदर्थमेव तदिष्यते, खट्वादिकं तु द्वारमात्रम्, अतः परव्यावृत्तिवचनमात्र एवात्मशब्द इति, तत्राप्यसौ यदि कर्तृषष्ठ्यन्तः सन्निच्छया संबध्येत तर्ह्येषितारमन्तरेणेच्छाया अभावात् अनर्थकः स्यात्, तस्मात्स्वशब्दपर्यायः शेषषष्ठ्यन्तः सुबन्तेन सम्बध्यते, तेनायमर्थः सूत्रस्य । इषेः सन्निधानात्कर्मण एषितुरेवात्मनः संबन्धिनः सुबन्तादिच्छायामर्थे वा क्यजिति । एवं चात्मनः पुत्रं परस्य दासमिच्छतीत्यादौ वस्तुतः सुबन्तस्यात्मना सबन्धेपि परार्थमिष्यमाणत्वादिषिकर्त्रवच्छेदेनात्मना संबन्धाभावान्न क्यचः प्रसङ्गः । ककारो 'नःक्ये' इति सामान्यग्रहणार्थः । चकारस्तदविघातार्थः । स्वरस्तु प्रत्ययस्वरेण धातुस्वरेण वा सिध्यति ॥

अथोदाहरणानि ॥

पुत्रमात्मन इच्छति पुत्रीयति । अत्र कृतव्यूहाः पाणिनीयाः, कृतमपि शास्त्रं निवर्तयन्तीति वान्तरङ्गानपि विधीन्बहिरङ्गो लुग् बाधतइति

वा सन्धिकार्यरहितायाः द्वितीयस्याः 'सुपो धातुप्रातिपदिकयो'रिति लुकि 'क्यचि चे'त्यवर्णस्येत्वे सनाद्यन्तत्वेन धातुत्वाल्लडादि। अश्वस्यति, वृषस्यति, क्षीरस्यति, लवणस्यति, 'अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यची'-त्यसुगागमः। अत्रात्मप्रीतावित्यपनीया'श्ववृषयोर्मैथुनेच्छायां' 'क्षीरलवणयोर्लालसायामि'त्यर्थान्तरमुक्तं, तेनाद्ययोरुदाहरणयोरश्ववृषौ मैथुनायेच्छत इत्यर्थः। अन्ये तु परित्यक्तप्रकृत्यर्थान्मैथुनेच्छैवार्थ इत्याहुः। तथा च भट्टिः। इति रामो वृषस्यन्तीमिति। निघण्टुश्च वृषस्यन्ती तु कामुकीति। इतरयोरपि तृष्णातिरेको ऽभ्यवजिहीर्षातिरेको लालसा, तेन क्षीरलवणेच्छायां लालसारूपायामित्यर्थलाभात् क्षीरलवणे अतिशयेनाभ्यवहर्तुमिच्छतीत्यर्थो भवति। अत्र क्यच्प्रकृतीनां प्रत्ययलक्षणेन यत्पदत्वं प्राप्तं 'नः क्ये' इति नियमेन नान्तविषयमिति प्रकृत्यसुगकारयोः सवर्णदीर्घत्वं बाधित्वा'ऽतो गुणे'इति पररूपं भवति। अकारोच्चारणफलं तु पूर्वसूत्रोदाहरणे ब्राह्मणास इत्यादौ। तथा 'सर्वप्रातिपदिकेभ्यो लालसायामसुग्वक्तव्यः'। इत्यनकारान्तादसुकि दध्यस्यतीत्यादौ च। अपरे त्वाहुः। सुग्वक्तव्य इति दधिस्यति मधुस्यति, अश्वक्षीरेत्यत्र भाष्ये द्वाविमावागमौ प्रस्तुत्य दध्यस्यति मध्वस्यति दधिस्यति मधुस्यतीत्येवमर्थमभिधानात् दधिमधुशब्दावेवागमिनावित्येके। अन्ये तु सर्वप्रातिपदिकेभ्य इत्येकइति सर्वग्रहणात् बहुवचननिर्देशाच्च सर्वत्र भवतः। भाष्यं तूदाहरणमात्रमित्याहुः। अत्र मते दध्यस्यति मध्वस्यतीत्येवंशब्दः स्वार्थं न पुष्यति। अशनोदकधनेभ्यः क्यच्य'शनायोदन्यधनाया बुभुक्षापिपासागर्धे'ष्विति क्रमेणैतेष्वर्थेषु क्यात्येष्वाद्यन्तयोरीत्वापवाद आत्वम्, उदकस्योदादेशो निपात्यते, तेनाशनायति, उदन्यति, धनायति, बुभुक्षाप्रभृतीनां तदात्वे भोक्तुकामो ऽशनमिच्छति, पातुकाम उदकमिच्छति। सत्यपि धने भूयो धनमिच्छतीति क्रमेणार्थः। यस्त्वोत्तरकालिकमशनं, स्नानार्थमुदकं, दरिद्रः सन् धनमिच्छति तत्राशनीयति, उदकीयति, धनीयतीति भवति। अत्रान्ये ऽशनायतीत्यादीनां प्रकृत्यर्थमनपेक्ष्य केवलं

बुभुक्षादीनेवार्थं मन्यन्ते । अत्र भारविरमुमेव पक्षं प्रतिपेदे, तदाह 'किमुधनं धनायितु'मिति, । निघण्टुश्च उदन्या तु पिपासा तृडिति । गार्ग्यमिच्छति गार्गीयति । अत्र 'क्यच्व्योश्चे'त्यपत्यप्रत्ययकारस्य हलुत्तरस्य लोपे 'क्यचि चे'तीत्वम् । उपार्षभीयति, उपर्षभीयति, उपाल्कारीयति, उपल्कारीयति, अत्र 'वा सुप्यापिशलेरि'ति सुबन्तावयवऋकारादिधातुपरत्वात् पूर्वपरयो-रेका वृद्धिर्वा भवति । ऋकारल्कारयोः सावर्ण्यादियम् ल्कारादावपि भवति, तत्रो'रण् रपर'इति प्रत्याहारग्रहणात् लपरत्वं, वाग्रहणं गुणस्य प्राप्त्यर्थमिति वृद्ध्यभावे स भवति, नन्वेतद्वाग्रहणं यथाप्राप्ताभ्यनुज्ञानार्थं स्यात्, 'ऋत्यक'इति प्रकृतिभावः पक्षे कस्मान्न भवति । उच्यते । अत्राप्यनुवृत्तस्य धातुग्रहणस्योपसर्गादृतीत्यत्रैवा*धिकविधानार्थत्वादिदं च धातुग्रहणस्य प्रकृतिभावबाधनार्थत्वमृतीयतावुपपादितम् । अत्रैव वा सुपीत्यत्र वृत्तौ वाग्रहणस्य प्रयोजनं दर्शितम् । उपगता ऋषभीयका अमुं देशमित्यत्रोपर्षभीयको देश इति गुणप्रकृतिभावौ न भवतः, वृद्धिस्तु पूर्वसू-त्रव'द्वा सुपी'त्यत्रानुवृत्तस्योपसर्गग्रहणस्य प्राद्युपलक्षणार्थत्वाभावान्न भव-ति । उपलक्षकत्वाभावश्च ऋतीयतावुक्तः । ऋषभस्य समीपमुपर्षभं, तदिच्छति उपर्षभीयतीत्यत्र संग्रामयतीतिरूपस्य संग्रामं करोतीति संग्रामशब्दात्तत्करोति णिचा सिद्धावपि चुरादौ संग्रामयुद्धइतिपाठा-त्सम उपसर्गात् पूर्वमडाद्यर्थादन्यत्र सोपसर्गात् संघाताद्धातुसंज्ञानि-मित्ते प्रत्यये चिकीर्षिते उपसर्गाः पृथक् क्रियन्तइति ज्ञापनात् सोपसर्गात् संघातात् धातुसंज्ञानिमित्तः प्रत्ययो यदि भवति संग्रामयतेरेवेति नियमाद्वा पृथक्कृतोपसर्गादेव भवतीतीहाप्यृषभशब्दादेव क्यचा भवितव्यं, सुपस्तूपर्षभशब्दाद्विधानात् प्रत्ययग्रहणपरिभाषया तस्यैव सुबन्तत्वं न तु तदन्तावयवस्य ऋषभशब्दस्यापीत्यृषभीयशब्दः सुबन्तावयवो धातुर्न भवतीति तत्परत्वाभावादनुपसर्गत्वाच्च 'वा सुपी'ति वृद्धेरप्रसङ्गः । अत एवोपसर्गस्य पृथक्करादुपार्षभीयदित्यत्र ऋषभीयस्यैवागङ्गत्वात्तस्यैवा-ड् भवति, तस्मादेव त्वायामुपेन प्रादिसमासेप्युपर्षभीय्येति भवति ।

* अनुवृत्तिबाधनार्थत्वादिति प्रचुरः पाठः ।

तथा तस्यैव धातुत्वात् षशब्दस्य द्विर्वचने उर्पाविषभीयिषतीति। नन्वयं सङ्ग्रामशब्दः उपसर्गसदृशावयवोस्ति, कथमुक्तस्यार्थस्य प्रमाणं स्यादिति। उच्यते। पदान्तस्येतिकृतपरसवर्णं पठ्यते। अत्र हरदत्तः। संग्रामशब्दोनुदात्तेत्त्वार्थः, न च तन्मात्रार्थत्वे ग्रामयुद्ध इति शक्यते पठितु,मध्यैष्टेत्यादौ आट इव मध्ये ऽटः प्रसङ्गादिति ज्ञापकमभाङ्क्षीत्। तदास्यानुदात्तेत्त्वमपाणिनीयमिति नोद्देति। अत एव भृशादौ कैयटे संग्रामयतिरनुदात्तेद्बोद्धव्य इत्युक्तम्। अयं चानुदात्तेत्संग्रामयतिरिष्यत इतिभाष्ये ज्ञापकत्वमेवोक्तम्। ऋकारमिच्छति ऋकारीयति,उपर्कारीयतीत्यत्र 'वा सुपी'ति वृद्धिः ऋतीति तपरकरणाच्च भवति। अत एव शाकलः प्रकृतिभावोपि। मालीयति। अत्राकृतव्यूहाः पाणिनीया इति स्थिते सुब्धात्वन्तरङ्गत्वेन पूर्वमेकादेशे परमपीत्वं पश्चाद्भवति। उक्तं च भाष्ये। असुपैकादेश इत्वोत्वाभ्यां भवति अन्तरङ्गतर इति। ननु पूर्वमपीत्वे यस्येतिलोपेनेष्टसिद्धिरिति चेत् न, तस्मिन्नीत्वस्यासिद्धत्वात्। उस्रामैच्छत् औस्रीयत्। औङ्कारीयत्। औढीयत्। अत्रा'स्यपदान्ता''दोमाङोश्चे'तिपररूप 'माटश्चे'ति पुनर्वृद्धिविधानार्थेन चशब्देन बाध्यते, तथा च वार्तिकं, 'उस्योमाङ्त्वाटः प्रतिषेध' इति, उसि ओमाङोश्च परयोराटः पररूपं नेत्यर्थः। औढीयदित्यत्राङ ओकारेण सहैकादेशे उपसर्गरूपत्वं पृथङ्न प्रतीयतइति सोपसर्गात्संग्रामयतेरित्यस्याप्रवृत्तेरोकारात्पूर्वमाटि तस्यान्तवद्भावेन लब्धाङ्व्यपदेशस्योकारस्याटश्च 'ओमाङोश्चे'तिप्राप्तेन पररूपेण वृद्धेर्बाधः स्यादिति वार्तिके च आङ्ग्रहणमेवम् आ इतः एतः ऐतीयदित्यपि द्रष्टव्यम्। आ इत एतः, एतीयति, प्र एतीयति प्रेतीयतीत्यत्र प्राप्तमवर्णान्तोपसर्गविषयमेङि पररूपं बाधित्वा प्राप्ता'मेत्येधती'ति वृद्धि'मोमाङोश्चे'ति पररूपं परत्वाद्बाधते,आ ऋश्या अर्श्या, आगता ऋश्येति प्रादिसमासः। 'आद्गुण'इत्यनेनाङ्ऋकारयोर्गुणः, तमिच्छति अर्श्यीयति। अद्मर्श्यीयति। अत्र गुणस्यान्तवद्भावेनाङ ओमाङोश्चेतिप्राप्तं पररूपं परत्वाद्बाधित्वा प्राप्तः सवर्णदीर्घरचकारेण पुनः पररूपविधानात् बाध्यते। दधीयति। मधूयति।' 'अकृत्सार्व-

धातुक्रयो'रिति दीर्घः । कुमारीयति, वधूयति । ऋरमिच्छति । रीयति । ऋकारस्य 'रीङ् ऋत'इति रीङादेशः । ऋकारलृकारयोः सावर्ण्येनाल- मिच्छतीत्यत्रापीदमेव रूपम् । अत्र तपरकरणादृकारस्य रीङभावात् ऋतीयतीति भवति । ऋत इत्वम् ऋकारान्तस्य धातोरितीह न प्रसज्जति, हेशब्दमिच्छति हेयति, गामिच्छति गव्यति । गव्यितेत्यादौ अतो लोपे 'क्यस्य विभाषे'ति हल उत्तरस्य क्यप्रत्ययकारस्यार्धधातुके विधीयमानो लोपः सन्निपातपरिभाषया न भवति । अगव्यीदित्यत्र 'वदव्रजे'त्यत्र हल्ग्रहणस्य हल्समुदायस्य प्रत्ययार्थत्वेपि अल्लोपस्य स्थानिवत्त्वेनाङ्गस्य हलन्तत्वाभावात् न वृद्धिः । रैयति । नाव्यति, नाव्यिता, गव्यतिवद्वान्तादेशो यलोपाभावश्च । श्वलिह्यति, श्वलिह्यिता, श्वलिहिता, अल्लोपस्य पूर्वविधौ स्थानिवत्त्वा'न्न धातुलोपे'इति वा लघूपधगुणाभावः । अश्वलिहीत् । अश्वलिहिष्यत् । अत्राल्लोपस्य स्थानिवत्त्वाद्धलन्तलक्षणायाः वृद्धेरभावः । अत्र 'हो ढः' न भवति 'नः क्ये'इति नान्तस्यैव पदत्वाद्धकारस्य पदान्तत्वाभावात् । अत एव गोदुह्यतीत्यत्र 'दादे'रिति घत्वं,मित्रद्रुह्यतीत्यादौ 'वा द्रुहे'ति तद्विकल्पः, उपानह्यतीत्यत्र 'नहो ध'इति धत्वमनुडुह्यतीत्यत्र 'वसुस्रंस्विति' दत्वं न भवति । पुरमिच्छति पुर्यति, दिव्यति, 'हलि चे'ति दीर्घो रेफवकारान्तस्य धातोर्हल्परत्वे इतीह न भवति । चतुर्यति अत्रापि धातुर्न रेफान्त इति दीर्घो न भवति, गिरमिच्छति गीर्यति, अत्र गिर ऋत इत्वे रेफान्तो धातुर्न हल्पर इति गीर्यिता,गिरिता, 'क्यस्य विभाषे'ति यलोपपक्षे हल्परत्वाभावान्न दीर्घः, 'र्वोरुपधाया'इति रेफवकारान्तस्य धातोः पदस्य विधीयमानोपि न भवति, 'नः क्य' इति नियमेन पदत्वाभावात्, स्वरिच्छतीत्यादावव्ययेभ्यः क्यचः मान्ताव्ययेभ्यः प्रतिषेध इति प्रतिषेधाद्वाक्यमेव । यत्तत्र गोसमानाक्षरनान्तादित्येके इति क्यचः प्रकृतिपरिगणनं तद्वाव्यतीत्याद्यसिद्धिप्रसङ्गात् न स्थितः पक्ष इति कैयटादौ स्थितम् । तमिच्छति तम्यति । यद्यति । इदमिच्छतीत्यत्र क्यचि मान्ताव्ययप्रतिषेधाद्वाक्यमेव, इह मान्तग्रहणेन प्रातिपदिकस्य विशेषणादिमाविच्छति काविच्छती-

त्यादावपि वाक्यमेव भण्यते। प्राणितीति प्राण्, प्राण्यति। राजीयति। 'नः क्य' इति पदत्वा न्नलोपः प्रातिपदिके'ति नलोपे 'क्यचि चे'तीत्वं, न च नलोपस्यासिद्धत्वं, 'नलोपः सुप्स्वरसञ्ज्ञातुग्विधिषु कृती'ति नियमात्। अहर्यति। 'रोः सुपी'ति अह्नः रुः, पदस्य सुप्परत्वाभावा'दह-न्वि'ति रुत्वापवादो रेफः, नन्वसौ नलोपे पूर्वत्रासिद्धः स्यात्, अस्ति वचनस्यावकाशः, हे अहरित्यत्र 'स्वमोर्नपुंसकादि'ति सोर्लुका लुप्तत्वे रुस्य नलोपश्च 'न ङिसंबुद्ध्यो'रिति निषेध्यते। नैष दोषः। अहन्नि-त्यत्राह्न इति स्थानेन शब्दे निर्दिष्टे ऽहन्निति प्रथमान्तेन निर्देशादह-न्नित्यावृत्त्या ऽहन्नेव न तु लुप्तनकार इति स्थितं, स एवाहन्शब्द इहापि रेफविधावनुवर्ततइति। उज्झेः क्विबन्तादनुकरणाद्वोज्झ्यति। ककुद्यति। अर्घ्यति। परिव्रढ्य*ति। विलम्ब्यति। अङ्ग्यति। गृह्यति। अर्घादिभ्यस्तत्करोतीति णौ लोपे णेश्चक्वावुदाहरणानि, परिवृढे†र्णाविष्ठ-वदित्यतिदेशादृकारस्य 'र ऋतो हलादे'रिति रभावश्च, अतोऽन्यत्राङ्गादेर्धा-तोरनुकरणात्क्विबन्ताद्वा क्यच् द्रष्टव्यः, युध्यति भिषज्यतिप्रभृतयो गताः, प्रक्रियासाम्याद्दृष्टान्तेन प्रदर्शिताः, त्वामिच्छति, मामिच्छति, त्वद्यति, मद्यति, 'प्रत्ययोत्तरपदयोश्चे'त्येकार्थवृत्तयोर्युष्मदस्मदोर्मपर्यन्तस्य त्व-मावादेशौ भवतः। 'त्वमावेकवचन'इत्यत्र एकस्य वचनमेकवचनं न तु पारिभाषिकमिति स्थिते तत्रापि तस्यैवानुवर्तनादेकार्थानुवृत्त-योरित्युक्तं, तेन युष्मदस्मच्छब्दौ यदा एकार्थे समासस्तु द्विबह्वर्थस्तदापि त्वमौ भवतः, यथा अतित्वामिच्छति अतिमामिच्छति अतित्वद्यति, अतिमद्यति, विग्रहवाक्ये अतित्वामतिमामितिरूपं, युष्मदस्मदोर्द्वितीयाद्विवचने तस्य 'ङेप्रथमयो'रित्यमि युष्मदस्मदोरेकार्थत्वा'त्त्वमावेक-वचने'इति मपर्यन्तस्य त्वमयोर्दकारस्य शेषेलोपापवादे 'द्वितीयायां चे'त्यात्वे एकादेशे च 'युवावौ द्विवचन'इत्यत्रापि द्वयोर्वचनं द्विवचन-मिति स्थिते तत्र च युष्मदस्मदोर्युवावादेशौ न शङ्क्यौ। अतित्वा-

* परिद्रढतीति २ पु॰ पा॰।

† दृढेरिति २ पु॰ पा॰।

नतिमानिति तु ङेप्रथमयोरित्यमादेशापवादे तस्मादित्युत्तरस्येति परिभाषया 'शसो न'ति तदादेर्नकारे पूर्ववत्त्वमात्वैकादेशेषु सकारस्य संयोगान्तलोपे च भवति । नन्वत्र युष्मदस्मदोरेकार्थो विभक्तिः परेति 'त्वमावेकवचन'इत्येव त्वमयोः सिद्धेः किं पुनः प्रत्ययोत्तरपदवचनेन । भवेदेतदेवं विभक्तिपरत्वे सिद्धे, तदेवतु न सिद्ध्यति । विभक्तेर्लुका लुप्तत्वेन तत्प्रत्ययलक्षणाभावात् । नन्वन्तरङ्गत्वाल्लुकः पूर्वं त्वमादेशौ भविष्यतः । न च लुका लुप्तत्वेनानयोर्बाधनमाशङ्क्यम्, अन्तरङ्गत्वादादेशयोर्नित्यान्तरङ्गयोरन्तरङ्गं बलीयः, तथोक्तं, परनित्यान्तरङ्गप्रतिपदविधयो विरोधिसन्निपाते तेषां मिथः प्रसङ्गे परबलीयस्त्वमिति । एवं तर्हीदमेव 'प्रत्ययोत्तरपदयोश्चे'त्यादेशविधानं ज्ञापकम् अन्तरङ्गानपि विधीन्बहिरङ्गो लुग् बाधत इति, नन्वेतत् परमस्त्वं, त्वत्तरः, त्वं प्रधानमस्य त्वत्प्रधानं, तुभ्यं हितं त्वद्धितं, तवेदं त्वदीयं, तव पुत्रस्त्वत्पुत्रः, परमोहं मत्तरः, अहं प्रधानमस्य मत्प्रधानं, मह्यं हितं मद्धितं, ममेदं मदीयं, मम पुत्रो मत्पुत्र इति 'त्वाहासौ' 'तुभ्यमह्यौ ङयि' 'तवममौ ङसी'ति विधीयमानानन्तरङ्गानपि त्वाहादीन् बाधित्वा त्वमादेशविधानेन अर्थवद्वचनमिति कथं ज्ञापकं स्यात्, इदं तर्हि ज्ञापकम् उत्सर्गसमानदेशा अपवादा इति त्वाहाद्यपवादत्वेनैव त्वमयोर्मपर्यन्तावयवत्वे सिद्धे यत्पुनर्मपयन्तस्येत्यनुवृत्त्या विधानम्, अबाधे तु लुकान्तरङ्गाणामपि त्वाहादीनां तदपवादत्वेनैव त्वमयोर्मपर्यन्तविषयत्वस्य सिद्धेः किं तदर्थेनानेन मपर्यन्तस्येत्यनेन । ननु शब्कल्पबाद्यपवादानां बहुजादीनां भिन्नविषयाणामपि दर्शनात् सर्वादेशनिवृत्त्यर्थमेतत् स्यादिति कथं ज्ञापकं भवति । उच्यते । इह त्वाहादयो विषयनिर्देशार्थमनुवर्तन्ते, तेन त्वाहादीनां प्रसङ्गे प्रत्ययोत्तरपदयोस्त्वनयोर्विधानादेव मपर्यन्तविषयत्वे सिद्धे यत्पुनर्मपर्यन्तस्येत्यनुवर्तनेनानयोर्विधानं त्वया कृतं त्वत्कृतं त्वामिच्छति त्वद्यतीत्याद्येवमर्थमिति ज्ञापकमेवोकार्थस्य । एवं च युवामिच्छति युष्मद्यति अतियुवामिच्छति अतियुष्मद्यति, आवामिच्छति अस्मद्यति अत्यावामिच्छति अत्यस्मद्यति इत्यत्र युष्मदस्मदोर्द्विवचनत्वेपि

विभक्तेर्लुप्तत्वेन तत्परत्वाभावात् 'युवावौ द्विवचने'इति युवावौ न भवतः, लुकः पूर्वत्वेनानयोरन्तरङ्गत्वेपि न प्रसङ्गो बहिरङ्गेणापि लुका बाधस्येदानीमेव ज्ञापितत्वात्, 'प्रत्ययोत्तरपदयो'रिति त्वमौ त्वनेकार्थत्वान्न प्रसजतः । वाक्ये ऽतित्वामतियुवामिति रूपं युष्मदस्मद्भ्यां द्वितीयैकवचनद्विवचनयो'ङेप्रथमयो'रित्यमिति प्रकृत्योर्मपर्यन्तस्य युवावयोर्दकारस्य द्वितीयायां चेत्यात्वे सवर्णदीर्घे ऽमि पूर्वत्वे च, अतियुवान् अत्यावानिति रूपं तु शसि तदादेरमादेशापवादे 'शसो ने'ति नकारे प्रकृत्योः पूर्ववत् युवावयोरात्वे सकारस्य संयोगान्तलोपे भवति । अतियुष्मानिच्छति अतियुष्मद्यति अत्यस्मानिच्छति अत्यस्मद्यतीत्यत्रापि 'प्रत्ययोत्तरपदयो'रिति त्वमौ प्रकृत्योरनेकार्थत्वादेव न भवतः । अत्रापि वाक्ये अतियुष्मानित्यादिरूपमतियुवामित्यादिवन्नेयम् । उख्यति, तृप्यति, उच्छ्यति, मव्यति, मथ्यति, अर्घ्यत्यादिवत्प्रक्रियोन्नेया । तत्रोच्छ्रेर्न क्विबन्तः, तत्र हि 'च्छ्वोः शूडनुनासिके'ति शकारेण भवितव्यं, वाच्यति, आट्यति, मरुत्यति, तुरुयति, लुप्यति, दिश्यति, षष्ठ्यति, पयस्यति, अत्र पुत्रादेः कर्मणः जीवत्यादौ प्राणादिवत् क्यजन्तेन्तर्भावादकर्मत्वाल्लादयो भावकर्त्रोर्भवन्ति । उदाहृतं कर्त्तरि । भावे पुत्रीयते इत्यादि द्रष्टव्यम् । पुत्रीयादेः सनि यथेष्टं नामधातूनामिति पर्यायेण सर्वस्यैकाचो द्विर्वचनात् पुपुत्रीयिषति, पुतित्रीयिषति पुत्रीयियिषतीत्यादि भवति । इह कस्मान्न भवति महान्तं पुत्रमिच्छति महापुत्रीयतीति । किमत्रात्वाभावश्चोद्यते, अथ केवलात् प्रत्ययाभावः, समुदायाद्वा, आत्वं न भवति प्रत्ययार्थेन सापेक्षत्वात् समासाभावादनुत्तरपदत्वात्, प्रत्ययाभावो महता सापेक्षत्वेन असामर्थ्यात्, समुदायात्त्वकर्मकत्वात् महत्त्वविशिष्टस्य पुत्रस्येष्यमाणत्वेनाकर्मकत्वेन परस्परं प्रत्ययार्थत्वेन च संबन्धे नास्ति सामर्थ्यम् । सुब्ग्रहणं च पदविधित्वेन समर्थपरिभाषोपस्थानार्थमेव क्रियते, ननु धातुव्यावृत्त्यर्थं स्यात्, संस्तत्र बाधको भविष्यति । प्रातिपदिकादुत्पत्तावपि नान्ते नलोपस्तु सुबन्तादुत्पत्तौ यद्'नःक्ये'इति पदत्वस्य नियामकं तदेवात्र विधायकमिति भविष्यति । नन्वसति सुब्ग्र-

"टाङसिङसामिनात्स्याः" ॥ 'अतिजरसिनेत्यादि'। समासे ह्रस्वत्वे कृते इनादेशः, तत सन्निपातपरिभाषया अनित्यत्वाज्जरसादेशः, एवमतिजरसादित्यत्राप्यादादेशे कृते जरसादेशः। ननु च टाङस्योरेवाजादित्वात्प्रागिनाददेशाभ्यां जरसादेशः प्राप्नोति, स हि नित्यः, परश्च, तत्र कृते ऽनदन्तत्वादेवेनादादेशयोरभावे ऽतिजरसा अतिजरस इति भवितव्यं नैष दोषः। एवं हि इनादेशस्यादादेशस्य च विधानमनर्थकं नादेशोऽदादेशश्च विधेयः स्या,त्का रूपसिद्धिः, इह तावद्वृत्रेणेति एत्वे योगविभागः करिष्यते, बहुवचनेझल्येत्, ओसि च, तत आङि च, आङि च परतोऽत एत्वं भवति, तत्र स्थानिवद्भावान्नशब्दे परत एत्वं वृत्रेण, नैवं शक्यम्, इह ह्यनेनेति, हलि लोप इति इद्रूपलोपे सति एनेति प्राप्नोति, हलि लोप इत्यपनीय झलि लोप इति सूत्रं करिष्यते, तत्र नकारस्याझल्त्वाल्लोपाभावः, न स शक्यो झलि लोपो वक्तुम्, इह हि न स्यात् अयाविष्टाजनयत्, अयेति इदमश्चतुर्थ्येकवचनस्य सुपां सुलुगित्यादिना यादेशः, सुपि चेति दीर्घाभावः छान्दसः, तत्रा याझलादित्वादिद्रूपलोपो न स्यात्, तस्माद्धलि लोप एव कर्त्तव्यः, ततश्चानेनेति न सिद्ध्यति, एवं तर्ह्यनाप्यक इति द्विनकारकोयं निर्द्देशः, तत्रादेशसंबन्धी पदान्तत्वाल्लुप्तः, नश्च आप् च नाप्, तत्र परत इदो ऽनादेश इति सूत्रार्थोश्रयणादिद्रूलोपापवादो नशब्दे परतो नादेश एव भविष्यति यद्येवमादेशेन लोपस्यासिद्धत्वाद्राजेत्यादाविव सूत्रे दीर्घप्रसङ्गः, आनाप्यक इति। नैष दोषः। सुपां सुलुगिति लुकि कृते न लुमताङ्गस्येति प्रतिषेधः वृत्रादित्यत्रापि सवर्णत्वेनैव सिद्धम्, अकारोच्चारणसामर्थ्यादतो गुणे पररूपं न भविष्यति, तदेवमिनादेशस्यादादेशस्य च विधानसामर्थ्यात्पूर्वमिनादादेशौ पश्चाज्जरसादेश इत्येषामभिप्रायः। 'यथा त्त्व यादि'। भाष्ये हि पूर्वोक्तप्रक्रियाश्रयणेन नादेशो ऽदादेशश्च व्यवस्थापितः, यदि चैतद्रूपद्वयमिष्टं स्यात्, तयोरादेशयोः प्रत्याख्यानमनुपपन्नं स्यात्, तत्र सन्निपातपरिभाषया जरसादेशाभावादतिजरेणातिजरादिति भाष्यकारस्याभिप्रेतमिति केचित्, प्रागेव जरसादेशे ऽतिजरसा अतिजरस इत्यभिप्रेतमित्यन्ये ॥

विभक्तेर्लुप्तत्वेन तत्परत्वाभावात् 'युवावौ द्विवचन'इति युवावौ न भवतः, लुकः पूर्वत्वेनानयोरन्तङ्गत्वेपि न प्रसङ्गो बहिरङ्गेणापि लुका बाधस्येदानीमेव ज्ञापितत्वात्, 'प्रत्ययोत्तरपदयो'रिति त्वमौ त्वनेकार्थत्वान्न प्रसजतः। वाक्ये ऽतित्वामतियुवामिति रूपं युष्मदस्मद्भ्यां द्वितीयैकवचनद्विवचनयो'र्ङेप्रथमयो'रित्यमिति प्रकृत्योर्मपर्यन्तस्य युवावयोर्दकारस्य द्वितीयायां चेत्यात्वे सवर्णदीर्घे ऽमि पूर्वत्वे च, अतियुवान् अत्यावानिति रूपं तु शसि तदादेरमादेशापवादे 'शसो ने'ति नकारे प्रकृत्योः पूर्ववत् युवावयोरात्वे सकारस्य संयोगान्तलोपे भवति। अतियुष्मानिच्छति अतियुष्मद्यति अत्यस्मानिच्छति अत्यस्मद्यतीत्यत्रापि 'प्रत्ययोत्तरपदयो'रिति त्वमौ प्रकृत्योरनेकार्थत्वादेव न भवतः। अत्रापि वाक्ये अतियुष्मानित्यादिरूपमतियुवामित्यादिवच्चेयम्। उख्यति, तृप्यति, उरच्छति, मव्यति, मथ्यति, अर्घ्येत्यादिवत्प्रक्रियोच्चेया। तत्रोच्छ्रेर्न क्विबन्तः, तत्र हि 'च्छ्वोः शूडनुनासिके'ति शकारेण भवितव्यं, वाच्यति, आर्त्यति, मरुत्यति, तुत्र्यति, लुप्यति, दिश्यति, षष्ठ्यति, पयस्यति, अत्र पुत्रादेः कर्मणः जीवत्यादौ प्राणादिवत् क्यजन्तेन्तर्भावादकर्मत्वाल्लादयो भावकर्त्रोर्भवन्ति। उदाहृतं कर्तरि। भावे पुत्रीयते इत्यादि द्रष्टव्यम्। पुत्रीयादेः सनि यथेष्टं नामधातूनामिति पर्यायेण सर्वस्यैकाचो द्विर्वचनात् पुपुत्रीयिषति, पुतित्रीयिषति पुत्रीयियिषतीत्यादि भवति। इह कस्मान्न भवति महान्तं पुत्रमिच्छति महापुत्रीयतीति। किमत्रात्वाभावश्चोद्यते, अथ केवलात् प्रत्ययाभावः, समुदायाद्वा, आत्वं न भवति प्रत्ययार्थेन सापेक्षत्वात् समासाभावादनुत्तरपदत्वात्, प्रत्ययाभावो महता सापेक्षत्वेन असामर्थ्यात्, समुदायात्त्वकर्मकत्वात् महत्वविशिष्टस्य पुत्रस्येष्यमाणत्वेनाकर्मकत्वेन परस्परं प्रत्ययार्थत्वेन च संबन्धे नास्ति सामर्थ्यम्। सुब्ग्रहणं च पदविधित्वेन समर्थपरिभाषोपस्थानार्थमेव क्रियते, ननु धातुव्यावृत्त्यर्थं स्यात्, संस्तत्र बाधको भविष्यति। प्रातिपदिकादुत्पत्तावपि नान्ते नलोपस्तु सुबन्तादुत्पत्तौ यद्'नःक्ये'इति पदत्वस्य नियामकं तदेवात्र विधायकमिति भविष्यति। नन्वसति सुब्ग-

"टाङसिङसामिनात्स्याः" ॥ 'अतिजरसिनेत्यादि' । समासे ह्रस्वत्वे कृते इनादेशः, ततः सन्निपातपरिभाषाया अनित्यत्वाज्जरसादेशः, एवमतिजरसादित्यत्राप्यादादेशे कृते जरसादेशः । ननु च टाङस्योरेवाजादित्वात्प्रागिनादादेशाभ्यां जरसादेशः प्राप्नोति, स हि नित्यः, परश्च, तत्र कृते ऽनदन्तत्वादेवेनादादेशयोरभावे ऽतिजरसा अतिजरस इति भवितव्यं. नैष दोषः । एवं हि इनादेशस्यादादेशस्य च विधानमनर्थकं नादेशोऽदादेशश्च विधेयः स्या,त्का रूपसिद्धिः, इह तावद्वृत्रेणेति एत्वे योगविभागः करिष्यते, बहुवचने झल्येत्, ओसि च, तत आङि च, आङि च परतोऽत एत्वं भवति, तत्र स्थानिवद्भावाच्छब्दे परत एत्वं वृत्रेण, नैवं शक्यम्, इह घ्नन्नेनेति, हलि लोप इति इद्रूपलोपे सति एनेति प्राप्नोति, हलि लोप इत्यपनीय झलि लोप इति सूत्रं करिष्यते, तत्र नकारस्याझल्त्वाल्लोपाभावः, न स शक्यो झलि लोपो वक्तुम्, इह हि न स्यात् अयाविष्टाजनयत्, अयेति इदमश्चतुर्थ्येकवचनस्य सुपां सुलुगित्यादिना यादेशः, सुपि चेति दीर्घाभावः छान्दसः, तत्रा याझलादित्वादिद्रूपलोपो न स्यात्, तस्माद्धलि लोप एव कर्त्तव्यः, ततश्चानेनेति न सिद्ध्यति, एवं तर्ह्यनाप्यक इति द्विनकारकोयं निर्द्देशः, तत्रादेशसंबन्धी पदान्तत्वाल्लुप्तः, नश्च आप् च नाप्, तत्र परत इदो ऽनादेश इति सूत्रार्थाश्रयणादिद्रूपलोपापवादो नशब्दे परतो नादेश एव भविष्यति यद्यप्यमादेशेन लोपस्यासिद्धत्वाद्राजेत्यादाविव सूत्रे दीर्घप्रसङ्गः, आनाप्यक इति । नैष दोषः । सुपां सुलुगिति लुकि कृते न लुमताङ्गस्येति प्रतिषेधः वृत्तादित्यत्रापि सवर्णत्वेनैव सिद्धम्, अकारोच्चारणसामर्थ्यादतो गुणे पररूपं न भविष्यति, तदेवमिनादेशस्यादादेशस्य च विधानसामर्थ्यात्पूर्वमिनादादेशौ पश्चाज्जरसादेश इत्येषामभिप्रायः । 'यथा त्त्वि यादि' । भाष्ये हि पूर्वोक्तप्रक्रियाश्रयणेन नादेशो ऽदादेशश्च व्यवस्थापितः, यदि चैतद्रूपद्वयमिष्टं स्यात्, तयोरादेशयोः प्रत्याख्यानमनुपपन्नं स्यात्, तत्र सन्निपातपरिभाषया जरसादेशाभावादतिजरेणातिजरादिति भाष्यकारस्याभिप्रेतमिति केचित्, प्रागेव जरसादेशे ऽतिजरसा अतिजरस इत्यभिप्रेतमित्यन्ये ॥

"ङेर्यः" ॥ 'ङेङिति चतुर्थ्येकवचनस्य ग्रहणमिति'। तस्य हि ङेङिति रूपं प्रतिपदोक्तं सप्तम्येकवचनस्य घेर्ङितीति गुणे लाक्षणिकं, यद्यपि ङेरिति विभक्त्यन्तमुपात्तं तच्चोभयोरपि लाक्षणिकं, तथापि प्रत्ययात्पूर्वस्य भागस्य लाक्षणिकत्वप्रतिपदोक्तत्वापेक्षया परिभाषाप्रवृत्तिः, यद्येवं ङेराम्नद्याम्नीभ्य इत्यत्राप्येवमेव प्रसङ्गः, तस्माद्व्याख्यानमेवात्र शरणं, लिङ्गं च, तस्मै प्रभवति, तदस्मै दीयते, तस्मै हितं, तदस्यां प्रहरणमिति क्रीडायां ण इत्यादि। 'वृक्षायेति'। सुपि चेति दीर्घः, कथं पुनरकारसन्निपातकृतो यशब्दस्तद्विघातनिमित्तं भवत्यत आह। 'सन्निपातलक्षणइति'। अनित्यत्वं तस्याः कष्टाय क्रमणइति निर्द्देशादवसीयते ॥

"सर्वनाम्नः स्मै" ॥ 'भवतइति'। द्विपर्यन्तास्त्यदादय इति वचनादन्यत्र त्यदाद्यत्वाभावादनकारान्तत्वम्। 'अन्वादेशे ऽशादेशे कृतइति'। अनन्वादेशे त्वत्रास्मै इत्यानुपूर्व्यात्सिद्धं, कथं, नात्राकृते स्मैभावे हलादिर्विभक्तिः, हलादौ चेद्रूपलोपः, न चाकृते इद्रूपलोपे एकादेशः प्राप्नोतीति। न चाद्गुणप्रसङ्गः, नित्येनेद्रूपलोपेन बाधितत्वात्। 'एकादेशः प्राप्नोतीति'। नित्यत्वात्, वाक्यसंस्कारपक्षे चैतच्चोद्यं, तद्ध्यर्थप्रतिपादनाय लोके प्रयुज्यते, तदेव च शास्त्रेविभ[1]ज्यान्वाख्यायते। 'अन्तरङ्गत्वादिति'। एकपदाश्रयत्वादन्तरङ्गत्वं, पदद्वयाश्रयत्वादेकादेशो बहिरङ्गः ॥

"पूर्वादिभ्यो नवभ्यो वा" ॥ द्वये पूर्वादयः, 'सूत्रपाठ[2]पठिता गणपाठपठिताश्च, सर्वनाम्न इति चेहानुवर्त्तते, तत्रासति नवग्रहणे ङसिङ्योर्येन सर्वनामसञ्ज्ञा स गणपाठ एव गृह्यतइति नवग्रहणम्, इह जसिङसिङीनां शीस्मात्स्मिनः पूर्वादिभ्यो नवभ्यो वा, औङ आपः, शी नपुंसकाच्चेति सूत्रन्यासः कर्त्तव्यः, एवं जसि विभाषार्थानि त्रीणि सूत्राणि न कर्त्तव्यानि भवन्ति, तथा तु न कृतमित्येव ॥

१ अपीति इं॰ पु॰ पा॰।

२ पाठेति ई॰ पु॰ नास्ति।

"जसः शी" ॥ 'दीर्घोच्चारणमुत्तरार्थमिति'। इह त्वत इत्यधिकाराद्गुणेन भवितव्यमिति, ह्रस्वेपि सिद्धं, न च सर्वे छत्रिण इत्यत्र षत्वतुकोरसिद्ध इत्येकादेशस्यासिद्धत्वाद्ध्रस्वाश्रयस्य नित्यस्य तुकः प्रसङ्गः, तत्र हि पदान्तपदाद्योर्य एकादेशस्तस्यैवासिद्धत्वम् ॥

"ओङ आपः" ॥ ओङ इति निर्द्देशं क्रियमाणमनुवादपूर्वमाक्षिपति। 'ओकारोयमिति'। कोयं प्रकारः, कुत्सितोयं सूत्रप्रणयनप्रकारः, सिद्धस्य ह्यनुवाद उपपद्यते, यथा ङेर्य इति, अयं तु न क्वापि सिद्धइति, परिहरति। 'सामान्यार्थ इति'। ओत इत्युच्यमाने प्रथमाद्विवचनस्यैव स्याद्विरनुबन्धकत्वात्, न सानुबन्धकस्यौटः, यद्यपि टकारः प्रत्याहारार्थत्वात्समुदायानुबन्धस्तथापि प्रत्ययानुबन्धत्वमपि तस्याविरुद्धं, द्व्यर्था अपि हेतवो भवन्ति, तद्यथा 'आम्राश्च सिक्ताः पितरश्च प्रीणिता' इति, औट इत्युच्यमाने प्रथमाद्विवचनस्य न स्यात्, तस्माद्द्वयोरपि सामान्यग्रहणार्थो ङकारानुबन्धनिर्द्देशः। नन्वसतोनुवादोनुपपन्न इत्याक्षेपस्तत्र प्रयोजनाभिधानमसङ्गतं, नैष दोषः औदौटोरौङिति विधिवाक्यमस्मादेवानुवादादनुमास्यते तस्यैव प्रयोजनाभिधानं पुनश्चोदयति। 'तस्य चेति'। तस्य ङकारानुबन्धस्यासज्जने ऽस्मिन्नेवं विज्ञायमाने ङित्कार्यं याडाप इत्येतत्ते एवं वादिनस्तव श्यां,शीशब्दे परतः, प्रसक्तं, प्रसजतु नाम तत्राह। 'स दोष इति'। दोष इत्यनेन सामानाधिकरण्यात्स इति पुल्लिङ्गनिर्द्देशः, परिहरति। 'ङित्त्वइति'। वर्णमात्रनिर्द्देशइति विवक्षितं, वृत्तभङ्गभयात्त्वस्थाने मात्रशब्दःप्रयुक्तः, याडाप इत्यत्र ङितीति यदनुवृत्तं न स बहुव्रीहिः, ङ[१]इद्यस्येति, किं तर्हि कर्मधारयः, ङश्चासाविच्चेति, ततः किमित्यत आह। 'वर्णे यत्स्यादिति'। 'यस्मिन्विधिस्तदादावल्ग्रहणे'। अयं तावन्ङित्त्वमभ्युपेत्य परिहार उक्तः, ङित्त्वमेव तु नास्तीत्याह'। 'वर्णश्चायमिति'। चशब्दो वार्थे पठितः, वर्णो वायमित्येव वा पाठः, औङिति वर्णो वायमुपात्तो न प्रत्ययः, ङकारस्तु मुखसुखार्थो यथा चदोरबित्यत्र दकारः, अङ्गा-

१ ङइद्यस्येति नास्ति ङे॰ पु॰।

त्विप्तस्य प्रत्ययस्य तेन विशेषणादौकारान्तस्य प्रत्ययस्येत्यर्थः । वर्णरूपतया चौकारग्रहणे सति द्वयोरप्यौकारयोर्ग्रहणं भवति प्रत्ययविषयत्वादननुबन्धकपरिभाषायाः । 'ङित्त्वेप्यदोष इति' । ङित्त्वे सति यो दोषः सोपि न भवति, ङित्त्वस्यैवाभावादित्यर्थः, पूर्वेण वा परिहारेणास्यान्वयः, परिहारान्तरमाह । 'निर्देशोयमिति' । पूर्वाचार्याणां हि सूत्रे द्वेश्यपेते द्विवचने औङिति पठ्येते, तदाश्रयेणायं निर्देशः, तेन द्वयोरपि ग्रहणं भवति, न च ङित्कार्यप्रसङ्गः, नहि पूर्वाचार्यानुबन्धैरिह कार्याणि क्रियन्ते॥

"जश्शसोः शिः" ॥ 'कुण्डानीति' । जातिशब्दो ऽप्ययं यदार्थप्रकरणादिना जात्याधारभूतायामेकस्यां व्यक्तौ वर्त्तते, तदा वृत्तिविषय-एकवचनो भवतीति संख्येकवचनादिति शस् भवति, अर्थप्रकरणाद्यभावे तु तत्र प्रत्युदाहृतं घटंघटं ददातीति ।

"अष्टाभ्य औश्" ॥ 'कृताकारोष्टन्शब्दो गृह्यतइति' । कृताकारस्यानुकरणमष्टाशब्दो न तु विभक्तौ लक्षणवशादात्वं कृतमित्यर्थः । 'कृताकारस्य ग्रहणं किमिति' । आत्वकृतानुकरणं किमित्याश्रितमित्यर्थः, यदाऽऽत्वं भवति तदेव यथा स्यादित्युत्तरम् । 'अष्टेति' कथं पुनरत्रात्वाभावः, यावता नहि तद्विधौ विकल्पः संनिहित इत्यत आह । 'एतदेवेति' । इहाष्टन इति वक्तव्यं, यथाष्टन आ विभक्तावित्यत्र, एवं सिद्धे अष्टाभ्य इति निर्देशात्कृतात्वस्यानुकरणमिति तावन्निश्चितं, तस्य चैतत्प्रयोजनं यदात्व भवति तदेव यथास्यादिति । यदि च नित्यमात्वं स्यात्कृतात्वस्यानुकरणमनर्थकं स्यात्, व्यावर्त्याभावादिति भावः । ननु चाष्टनो दीर्घादिति दीर्घग्रहणेनायमर्थो ज्ञापितः, तद्वा ज्ञापकमिदं वा, कोन्वत्र विशेषः, इहेयत्तावद्वक्तव्यं षड्भ्यो लुगित्यस्यायमपवाद इति । अस्यैवेत्यवधारणं द्रष्टव्यम् । कारणमाह । 'नाप्राप्ते हीति' । अयं हि लुग्वाक्ये समासे च सर्वत्र प्राप्नोति । 'तस्मिन्प्राप्ते चेति' । स हि समासएव प्राप्नोति न तु वाक्ये । 'अष्टपुत्रइति' । अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधतइति वचनाद्वाक्यावस्थायामेव प्राप्तोप्यौश् न क्रियते, औश एव वा स्थानिवद्भावाल्लुक् । 'तदन्तग्रहणमत्रेष्यतइति' । अङ्गा-

धिकारे तस्य च तदुत्तरपदस्य चेति वचनात्, यद्येवं यत्राष्टशब्दार्थ उप[1]सर्जनं तत्रापि प्राप्नोत्यत आह । 'प्रियाष्टान इत्यत्रेति' । यथा पुनरत्रात्वं न भवति तथा तद्विधावेव वक्ष्यते ॥

"षड्भ्यो लुक्" ॥ 'षट्प्रधानादिति'। षट्संज्ञकानामर्थः प्रधानं यत्र तस्मादित्यर्थः । 'प्रियषषडिति' । अन्यपदार्थप्रधानोयं बहुव्रीहिः, सर्वनामसंख्ययोरुपसंख्यानमिति षषः पूर्वनिपाते प्राप्ते वा प्रियस्येति प्रियशब्दस्य पूर्वनिपातः ॥

"स्वमोर्नपुंसकात्" ॥ सु इति प्रथमैकवचनस्य ग्रहणं न सप्तमीबहुवचनस्य, अमा एकवचनेन साहचर्यात्, तद्ब्राह्मणकुलमित्यत्र परत्वात्त्यदाद्यत्वे कृते लुङ् प्राप्नोति, अतोमित्यम्भावेन बाधितत्वात्, तस्मात्त्यदादिभ्यश्चेति वक्तव्यमत आह । 'तद्ब्राह्मणकुलमित्यत्रेति' । 'नित्यत्वाद्धेति' । लुका त्यदाद्यत्वं बाध्यतइत्यनुषङ्गः, कथं पुनर्लुको नित्यत्वं, यावता त्यदाद्यत्वे कृते अतोमित्यपवादविधानात्सोप्यनित्य एवात आह । 'लुको हीति' । यदि ह्यतोमित्येतच्च स्यादकारान्तमप्यङ्गं लुको निमित्तं स्यादेव, ततः किमित्यत आह । 'यस्य चेति' । त्यदाद्यत्वं तु लुकि कृते नैव प्राप्नोति, न लुमताङ्गस्येति निषेधात्, यद्येवं तदपि लक्षणान्तरेणैव बाध्यते, नानावत्वस्य प्रतिषेधः । कस्य तर्हि प्रत्ययलक्षणस्य, प्राप्निर्हि प्रत्ययलक्षणेन ॥

"अतोम्" ॥ अत्रामिति पदच्छेदो न तु मिति, तथाहि सति लाघवाय मत इत्येव ब्रूयात्, किमर्थं पुनरम्विधीयते न मकार एवोच्येत, द्वितीयैकवचनेप्यादेः परस्येत्यकारस्य मकारे कृते ऽन्त्यस्य मकारस्य संयोगान्तलोपेनैव सिद्धमिष्टं, दीर्घप्रसंगस्तु, सुपि चेति दीर्घः प्राप्नोति, न च दीर्घविधौ सन्निपातपरिभाषा प्रवर्त्तते, वृत्तायेत्यादावपि प्रसङ्गात्, तस्मादमेव विधेयः, अपर आह । अम्विधानसामर्थ्यादतिजरसमित्यत्र जरसादेशो भवतीति, तच्चिन्त्यं, सन्निपातपरिभाषया जरसादेशस्याप्रसङ्गात्, अम्विधानं तु दीर्घबाधनेन चरितार्थमिति ॥

१ यद्यत्रमष्टशब्दार्थो यत्रोपसर्जनमिति पुस्तकान्तरे पाठः ।

"अद्‌ड् डतरादिभ्यः पञ्चभ्यः" ॥ 'अद्‌डादेशो भवतीति'। विवक्षितादेशरूपप्रति[1]पादनाय ष्टुत्वं न कृतं, कथं पुनर्ज्ञायते डिदयमादेश इति, यदि हि डिन्न स्याड्डतरादिभ्यः पञ्चभ्योऽदित्येव ब्रूयात्, किंपुनः कारणं सावेव दीर्घनिवृत्तिः प्रयोजनमुच्यते न त्वमीत्याह। 'इह त्विति'। 'एवं तर्हीति'। पूर्वसूत्रविहितममनुवर्त्य डतरादिभ्य इति पञ्चम्याः षष्ठीं प्रकल्प्य त[2]स्यैवामो दकारो विधास्यतइति चोद्यार्थः। 'हेकतरदित्यत्र संबुद्धिलोपो माभूदिति'। अयं च दोषः पूर्वस्मिन्नपि पक्षे समानः। ननु च संबुद्धिलोपे हल्ङ्याब्भ्य इत्यतोऽपृक्तग्रहणमनुवर्तयिष्यतइह चादेः परस्येत्यमोऽकारस्य दकारे कृते मकारस्य संयोगान्तलोपः, तस्यासिद्धत्वान्नायमपृक्तः, एवमदादेशो नापृक्तः, यद्यपृक्तग्रहणमनुवर्त्तते हे कतरडित्यमोपि न स्यादिति दोषः। तदिदमुक्तम्। 'अपृक्तश्चेदमो दोष इति'। संबुद्धिलोपे अपृक्तश्चेल्लुप्यते अमो न स्यादिति दोषः, अथ निवृत्तमपृक्तग्रहणं ततो निवृत्ते डतरादिषु दोषः, हेकतरदित्यादौ लोपः स्यादिति, अतो डित्त्वादद्‌डादेशविधानात्तस्य च डित्वान्न संबुद्धिलोपः, नापि पूर्वसवर्णदीर्घत्वमित्यर्थः। य[3]दि पुनः पूर्वसूत्रविहितममनुवर्त्य तस्यैवादादेशोऽविधीयते शक्यं डित्त्वमकर्त्तुम्॥

"नेतराच्छन्दसि" ॥ 'अतोमित्यस्यानन्तरमेवेति'। अमादेशएवाद्‌डादेशस्यापवादो भविष्यति, ततश्च नेति वक्तव्यं न भवतीति भावः॥

"युष्मदस्मद्भ्यां ङसोऽश्" ॥ 'शित्करणं सर्वादेशार्थमिति'। अन्यथाऽऽदेः परस्येत्यादेः स्यात्। ननु चाकारस्याकारवचने प्रयोजनाभावादाद्यनुसंहारे बाधिते ऽलोन्त्यस्येति मकारस्याकारे सति अतो गुणइति पररूपेणैव सिद्धमत आह। 'अन्यथा हीति'। आदेशइति व्यपदेश आदेशव्यपदेशः, यस्यादेशस्य प्रयोजनं नास्तीति मन्यसे तस्यैव स्यादित्येवशब्दार्थः, किं पुनरादेशव्यपदेशेन प्रयोजनं यत आदेरेव स्यात्, तत्राह। 'ततश्चेति'। ह्यर्थे चः पठितः। ततो ह्यादेशव्यपदेशाद्योचीति

१ प्रदर्शनायेति २ पु॰ पा॰। २ तस्यैवेति नास्ति इं॰ पु॰। ३ यदि पुनरित्यादिकं नास्ति इं॰ पु॰।

यत्वं न स्यात्, यत्वाभावः प्रयोजनमादेशव्यपदेशस्य स्यादित्यर्थः, योचीत्यत्र युष्मदस्मदोरनादेशइतिवर्त्तते। ननु चानादेशो या विभक्तिरित्येवं तत्र विज्ञास्यते, नहि तदादिविधिरस्ति यत अनादेशादाविति विज्ञायेत, ततश्च सत्यप्यादेशादित्वे विभक्तेरनादेशत्वात्स्यादेव यत्वमिति व्यर्थमेवाकारस्याकारविधानम्। एवं मन्यते। सर्वे सर्वपदादेशा इति न्यायेनादिविकारद्वारेण विभक्तेरेवादेशो विधीयतइति विभक्तिरेवादेश इति। सर्वे सर्वपदादेशा इत्यत्र न पदशब्देन सुप्तिङन्तमुच्यते, किं तर्हि पद्यते गम्यतेऽनेनार्थ इति पदं, ततश्च पचत्वित्यत्र यथा तिशब्दस्य तु शब्दो भवति तद्वदत्रापि ङसेरेव विधीयतइति भवत्येवादेशत्वं विभक्तेः॥

"ङे प्रथमयोरम्" ॥ 'ङे इत्यविभक्तिकोऽयं निर्देशइति'। प्रथमयोरिति प्रथमाद्वितीययोर्ग्रहणमिति वक्ष्यति, तदत्र समासे सति बहुवचनप्रसङ्ग इति भावः। प्राधान्यलक्षणस्य प्रथमार्थस्येहासंभवात्सन्निवेशविशेषापेक्षया प्रथमस्य ग्रहणमिति तावन्निश्चितं, तिङ्प्रथमयोस्तु युष्मदस्मद्भ्यामसंभव एव, तत्र प्रत्यययोर्ग्रहणं विभक्त्योर्वेति संशयः[1], यदि स्त्रीलिङ्गनिर्द्देशस्ततो विभक्त्योर्ग्रहणं पुंलिङ्गनिर्द्देशे तु प्रत्यययोः, तत्र निर्णयमाह। 'प्रथमयोश्च विभक्त्योरिति'। एतदेव स्पष्टयति। 'प्रथमाद्वितीययोरिति'। कथं पुनः प्रथमाशब्देन द्वितीयोच्यते[2], साहचर्यात्। ननु सकृत्प्रयुक्तः शब्दो मुख्यवृत्तिर्वा भवतु जघन्यवृत्तिर्वा न पुनरुभयवृत्तिः, सत्यम्। प्रथमाद्वितीयासमुदाये जघन्यवृत्तिरेवायमुद्भूतावयवभेदश्च समुदाय इति द्विवचनं, कथं पुनर्ज्ञायते विभक्त्योर्ग्रहणमिति, द्वितीयायां चेत्यात्वविधानात्, तद्ध्यादेशार्थमुच्यते, अनादेशे युष्मदस्मदोरनादेशइत्येव सिद्धत्वात्। यदि वात्र विभक्त्योर्ग्रहणं स्यादेवमस्यादेशार्थतोपपद्यते ननु च योचीति यत्वबाधनार्थं तत्स्यात्, यद्येतावत्प्रयोजनं स्याद्यत्वमेवायं विशिष्य ब्रूयात् योच्यापीति, आबितिप्रत्याहारोऽनाप्यकइतिवत्, यतस्तु द्वितीयायामात्वं शास्ति ततो ज्ञायते विभक्त्योरिह ग्रहणमिति ॥

१ सन्देह इति पुस्तकान्तरे ।
२ कथम्पुनर्द्वितीया प्रथमाशब्देनोच्यतइति पुस्तकान्तरे ।

"शसो न" ॥ नेत्यविभक्तिकोनिर्द्देशः, तथा च पूर्वसूत्रेण प्राप्तस्यायममः प्रतिषेध इति भाष्ये शङ्कितं, कः पुनः, प्रतिषेधे सति दोषः, यावता ऽमि प्रतिषिद्धे योचीति यत्वे प्राप्ते द्वितीयायां चेत्यात्वे कृते प्रथमयोः पूर्वसवर्णदीर्घत्वे कृते तस्माच्छसो नः पुंसीति नत्वे च युष्मानिति सिद्ध्यत्येव । सत्यं पुंसि सिद्ध्यति, स्त्रीनपुंसकयोस्तु न सिद्ध्यति, तदिदं दर्शितं, 'युष्मान् अस्मान् ब्राह्मणीरित्यादि'। 'अलिङ्गे वा युष्मदस्मदी इति'। लिङ्गानुशासने तथापाठात्, उदाहरणे त्वादेः परस्येत्यकारस्य नकारे सकारस्य संयोगान्तलोपः ॥

"भ्यसो भ्यम्" ॥ 'एत्वं प्राप्नोतीति'। सुपि चेति दीर्घस्याप्युपलक्षणमेतत्। 'अङ्गवृत्तइत्यादि'। अस्यार्थः पूर्वमेव व्याख्यातः। 'केचित्पुनरित्यादि'। येषां शेषे लोपोन्त्यस्य लोपस्तेषामतो गुणे पररूपत्वमेकादेश। स्वरश्च। 'एत्वनिवृत्त्यर्थमिति'। अत्रापि दीर्घस्याप्युपलक्षणम्, एत्वनिवृत्त्याचाकारोच्चारणस्यार्थवत्त्वात्सवर्णदीर्घत्वं तेषां न भवति। 'येषां त्विति'। अन्तलोपपक्षे मतभेदो भ्यमादेशो ऽभ्यमादेश इति, टिलोपपक्षे त्ववश्यमभ्यमादेशः, अन्यथा रूपासिद्धेः। नन्वेवं स्वरे दोषः, कथम्, अनुदात्तस्य च यत्रोदात्तलोप इत्यत्र कर्षात्वतो घञोन्त उदात्त इत्यन्तोदात्तग्रहणमनुवर्त्तते, ततश्च भ्यमोन्तोदात्तत्वं प्राप्नोत्यत आह। 'उदात्तनिवृत्तिस्वरश्चेति'। न तत्रान्तग्रहणमनुवर्त्तते, उच्चारणक्रमे प्रत्यासत्त्या चादेरेवोदात्तत्वं भवतीत्यर्थः ॥

"साम आकम्" ॥ 'सामिति षष्ठीबहुवचनमागतसुट्कं गृह्यत इति'। अङ्गसंज्ञानिमित्तस्यान्यस्यासंभवात्। 'अथ किमर्थमागतसुट्को गृह्यतइति'। यद्यपि षष्ठीबहुवचनमागतसुट्कं गृह्यतइति प्रकृतमिह तु प्रत्ययापेक्षया पुल्लिङ्गनिर्द्देशः, नपुंसकलिङ्गमेव वा पठितव्यं, अथेति न प्रयोजनप्रधानःप्रश्नः किं तर्हि युष्मदभ्यां परस्यैवं विधस्यासंभवप्रधानः, अत एवाह। 'नह्यादेशविधानकाले सुड्विद्यतइति'। सुड्विधावाज्जसेरसुगित्यत आदित्यनुवर्त्तते, अकारान्तत्वं च युष्मदस्मदोः शेषे लोप इत्यन्त्यस्य लोपे भवति, कश्च शेष आदेशः। अनादेशे यत्वात्वयोर्विधानात्, आदेशत्वं चाकमादेशे सति, न च त्यदाद्यत्वेनाकारान्तत्वं, त्यदाद्यत्वं

प्रति द्विपर्यन्तास्त्यदादय इति स्मरणात्। तस्मादादेशविधानकाले सुण्न विद्यते, उत्तरत्रादौ त्वादेशविधानकाले ऽसत एव सुट उपादानम् अथापि तस्योपादाने प्रयोजनमस्तीत्याह। 'तस्यैव त्विति'। यद्यसुट्को गृह्येत ततः पूर्वोक्तेन न्यायेन पश्चाद्भवतः सुटः केन निवृत्तिः स्यात्। 'स्थानिन्यन्तर्भूतत्वादिति'। तेन सहस्थानित्वेनोपादानसामर्थ्यादिति भावः। एतच्च पाक्षिकं प्रयोजनं, कतरस्मिन्पक्षे, यदा शेषे लोपोन्त्यलोपस्तदा, यदा तु टिलोपस्तदा पश्चादपि सुटः प्रसंगाभावादेतत्प्रयोजनम्। 'दीर्घोच्चारणमित्यादि'। अन्यथाता गुणे पररूपत्वं स्यात्। न चकारोच्चारणसामर्थ्याच्च भविष्यति, अन्यथा ऽकमेव विदध्यादत आह। 'अकमि त्विति'॥

"आत औ णलः"॥ पपावित्यादौ पाअइति स्थिते युगपत् त्रीणि कार्याणि प्राप्नुवन्ति, द्विर्वचनं सवर्णदीर्घत्वमेकादेश औत्वमिति, तत्र येन क्रमेणैतानि कर्तव्यानि तद्दर्शयति। 'अत्रेति'। लित्स्वरं तु नोपन्यस्यति, सर्वथान्तोदात्तत्वसिद्धेः, उत्क्रमे हेतुमाह। 'एकादेशादिति'। यदि पूर्वमेकादेशः स्यात्सुपवर्गाभावादौत्वं न स्यादित्यनवकाशं तत्। 'परत्वादेकादेश इति'। अत्र वृद्धिरेकादेशस्तस्य स्थानिवद्भावाद्द्विर्वचनं, स्थानिवद्भावस्तु द्विर्वचनेचीति, तत्र ह्यचीति न स्थानिवद्भावस्य निमित्तनिर्देशः किं तर्ह्यजादेशस्य, द्विर्वचननिमित्ते ऽचि योऽजादेश इति, तेन संप्रत्यचुपरत्वाभावेपि स्थानिवद्भावो भवत्येव, औकारौकारयोर्लाघवे विशेषाभावात्प्रयोगसमवाय्यौकार एव विहितः अपर आह आङ्प्रश्लिष्टाकार औकारस्तस्योच्चारणे प्रयत्नलाघवं भवति, विश्लिष्टाकार औकारस्तस्योच्चारणे प्रयत्नगौरवं भवति, तद्विधानं दरिद्रात्यर्थं ददरिद्रौ अत्र दरिद्रातेरार्द्धधातुके लोपो वक्तव्य इत्याकारलोपेप्यौकारस्य श्रवणं भवति, यद्यपि सिद्धश्च प्रत्ययविधाविति वचनाल्लिटि विवक्षित एवाकारलोपे सत्यौत्वस्याप्रसङ्गः यद्यपि च धात्वनेकाज्ग्रहणं चुलुम्पाद्यर्थमित्यामि सति णल एवासंभवस्तथाप्यौत्वविधानसामर्थ्याद्द्वयमप्येतन्न भवति॥

१ प्रश्लिष्टोऽपृथग्भूतोऽकारोयस्मिन्निति प्रश्लिष्टाकारः विश्लिष्टः पृथग्भूतोऽकारोयस्मिन्निति विश्लिष्टाकारः। इति इं० पु० टि०।

"तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्" ॥ 'जीवतात्त्वमिति'। अत्र स्थानिवद्भावेन तातङो हिग्रहणेन ग्रहणादतो हेरिति लुक् प्राप्नोति। नैषदोषः। हुझल्भ्यो हेर्द्धिरित्यनुवर्त्तमाने पुनरतो हेरिति हिग्रहणं हिरेव योहिस्तस्य यथा स्यात्स्थानिवद्भावेन यो हिस्तस्य माभूदित्येवमर्थम्। 'ङित्करणमित्यादि'। यद्यपि सर्वादेशतायाः प्राग्गुणवृद्धिप्रतिषेधार्थत्वमनिश्चितं तथापि सर्वादेशत्वेपि ङित्त्वस्य प्रयोजनं तातङि संभवति अनङादिषु नैव सर्वादेशत्वे प्रयोजनं संभवतीति तेष्वनन्यार्थङित्त्वेषु ङिच्चेत्येतत्सहसा प्रवर्त्तते. तातङि तु प्रयोजनान्तरसंभावनया क्रियानपि विलम्बो भवति, तेनास्मिन्विषये उत्सर्गापवादयोस्तुल्यकाला प्रवृत्तिरित्यपवादमपि ङिच्चेत्येतद्बाधित्वाऽनेकाल्शित्सर्वस्येत्येतदेव परत्वात्प्रवर्त्ततइति भावः। एतच्च ङिच्चेत्यत्र सम्यगुपपादितं, तत्र ब्रूतादित्यादौ गुणप्रतिषेधः मृष्टादित्यत्र वृद्धिप्रतिषेधः। 'ङित्त्वाच्चास्येति'। ननु च ङित्कार्यं भवतु स्थानिवद्भावप्राप्तपित्त्वात्पित्कार्यमपि को विरोधोऽत आह। 'ङिच्च पिन्न भवतीति'। वचनमिदं सार्वधातुकमपिदित्यत्र योगविभागेन कल्पितम्। 'ब्रुव ईडिति'। उपलक्षणमेतत् तृणढाद्भवान् इत्यत्र तृणहइम् भवतीति। तातङि ङित्त्वमित्यादि श्लोकद्वयं क्वचित्पठ्यते, तातङि व्यवस्थितं ङित्त्वं संक्रमकृत्स्यात्, संक्रमो नाम गुणवृद्धिप्रतिषेधः, अर्हार्थे लिङ्, गुणवृद्धिप्रतिषेधकृद्भवितुमर्हति, अन्त्यविधिश्चेत्, अन्त्यविधिहेतुत्वादन्त्यविधिर्ङित्त्वं, करणसाधनो वा विधिशब्दः, अन्त्यस्य यथा स्यादित्येवमर्थं चेत् ङित्त्वमित्यर्थः। निराकरोति। तच्च तथा न, चशब्दोऽवधारणे प्रतिषेधेन संबध्यते, तत् ङित्त्वं तथा सति नैव कर्त्तव्यम्, एरुरित्यस्यानन्तरं तुह्योस्तादाशिषीति वक्तव्यमेरुरित्येव, एवं सिद्धे ङित्करणं गुणवृद्धिप्रतिषेधार्थमिति निश्चीयते, न च सर्वादेशतामन्तरेण तत् तत्प्रतिषेधार्थत्वं ङित्त्वस्योपपद्यतइति सर्वादेशस्तातङ् भवति। ननु चान्त्यविधिश्चास्तु, अवयवे कृतं लिङ्गमितिन्यायेन गुणवृद्धिप्रतिषेधार्थश्चास्तु ङित्करणसामर्थ्यादित्याशङ्क्य परिहारान्तरमाह। 'हेरधिकारइति'। अतो हेरित्यत्र लोपविधौ हुझल्भ्यो हेर्द्धिरित्यतो

हेरित्यधिकारे सत्येव यायं हेरित्यधिकारस्तं ज्ञापकमाह सूत्रकारस्तस्य ह्येतत्प्रयोजनं हिरेव यो हिस्तस्य यथा स्यात्स्यानिवद्भावेन यो हिस्तस्य माभूदिति, तच्च सर्वादेशत्वे सत्युपपद्यते। ननु च हिरेव यो हिस्तस्य यथा स्याद्धिकृतो यो हिस्तस्य माभूदित्यन्त्यादेशत्वेपि तातङो हेरित्यधिकार उपपद्यतइत्याशङ्क्य साक्षात्परिहारमाह। 'तातङो ङित्त्वसामर्थ्यादिति'। ङित्त्वसामर्थ्यात्किलायमन्त्यविधिः स्यात् तच्च सामर्थ्यं नास्ति, सर्वादेशत्वे ऽपि प्रयोजनसंभवात्, ततश्च पूर्वोक्तया रीत्या विप्रतिषेधात्सर्वादेश एव तातङ् भवति, अनङ् सावित्यादावनङादीनां नैवं ङित्त्वसामर्थ्याभावः, तेन तेऽन्त्यविकारदा जाताः॥

"विदेः शतुर्वसुः"॥ 'विद ज्ञानइति'। सत्ताविचारणार्थयोरात्मनेपदित्वेन शतुरसम्भवः, लाभार्थस्य तूभयपदित्वेन शतुः सम्भवेपि तुदादित्वाद्विकरणेन व्यवधानमिति ज्ञानार्थस्यैव लुग्विकरणस्य परस्मैपदिनो ग्रहणमिति भावः। 'क्वसोरपि सामान्यग्रहणार्थमिति'। अन्यथा वसः सम्प्रसारणमित्युच्यमाने निरनुबन्धकत्वादस्यैव ग्रहणं स्यात्। ननु च क्रियमाणेप्युकारानुबन्धे एकानुबन्धकत्वादस्यैव ग्रहणं स्यात्तत्राह। 'एकानुबन्धकग्रहणइति'॥

"समासे ऽनञ्पूर्वे क्त्वो ल्यप्"॥ पूर्वशब्दोवयववचनः, अनञ्पूर्वावयवो यत्र समासे सोनञ्पूर्वः,। 'प्रकृत्येति' समानकर्तृकयोः पूर्वकाल इति क्त्वा, कुगतिप्रादय इति समास, ल्यपि सति ह्रस्वस्य तुक्। 'पार्श्वतः कृत्येति'। आद्यादित्वात्सप्तम्यन्तात्तसिः, स्वाङ्गे तस्प्रत्यये कृभ्वोरिति क्त्वा, तृतीयाप्रभृतीन्यन्यतरस्यां, क्त्वा चेति, समासः। 'नानाकृत्य द्विधाकृत्येति'। नाधार्थप्रत्यये च्व्यर्थे इति क्त्वा, पूर्ववत्समासः। 'कृत्वा हृत्वेति' हृत्वेत्येतत्प्रत्युदाहरणम्, अत्र कृत्वाशब्दो नञ्सदृशः पूर्वोस्ति, समुदायस्तु समासो न भवति। 'परमकृत्वेति'। सन्महदित्यादिना समासः, तुमर्थाधिकाराद्भावे क्त्वा प्रत्ययः, पारम्यमपि क्रियाया एव विशेषणमिति समानाधिकरण्यं, कथं पुनरिदं प्रत्युदाहरणं यावता भवत्येवायमनञ्पूर्वः समास इत्यत आह। 'अनञिति हीति'।

अनञ् इति पर्युदासोऽयं, तत्र नञिवयुक्तन्यायेन नञ्सदृशमव्ययं परिगृह्यते, तेन नञ् अनव्ययं च परमशब्दादिकमनञ् न भवति, अभेदादनव्ययत्वाच्च। 'स्नात्त्वाकालक इत्यादिष्विति'। आदिशब्देन पीत्वास्थिरक इत्येवमादेर्ग्रहणं, यत्रोत्तरपदे क्रिया नोपादीयते तत्राध्याहृतक्रियापेक्षः क्त्वाप्रत्ययः, सापेक्षत्वेपि निपातनात्समासः। 'निपातनाल्ल्यबादेशो न भवतीति'। न प्राकरणिकः समास एव तत्र निपात्यते किं तर्हि यस्य लक्षणं नास्ति तत्सर्वमिति भावः। 'निर्द्धारणे सप्तमीति'। जातावेकवचनं वचनव्यत्ययो वा। 'समास एव निर्द्धार्यतइति'। निर्द्धारणस्य तुल्यजातीयापेक्षत्वात्, कथं पुनः समासः क्त्वान्तो भवति यावता प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणं, न च समासात् क्त्वाविहितः। अथ कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणात्समासस्य क्त्वान्तता[1], एवमपि प्रकृत्य पार्श्वतःकृत्येत्यादावेव स्यात् उच्चैःकृत्येत्येवमादौ तु न स्यात्, अगतित्वादकारकत्वाच्चेत्याशङ्क्याह। 'स चेति'। तत्र निर्द्दिश्यमानस्यादेशा भवन्तीति क्त्वामात्रस्यैव ल्यब् भवति। ननु प्रत्ययविषये पूर्वेण परिभाषाद्वयेन तदन्तविधिव्यवस्था न तु येन विधिस्तदन्तस्येत्यनेन, तत्राह। 'तथा चेति' कथं पुनरेतज्ज्ञापकमित्याह। 'गतिकारकपूर्वस्य त्विति'। कथं नास्ति प्रसङ्ग इत्याह। 'नञ्गतिरिति'। अदो जग्धिर्ल्यप्ति कितीत्यत्र यदुक्तं जग्धौ सिद्धमन्तरङ्गत्वादित्यादि तत्स्मारयति। 'प्रधाय प्रस्थायेत्येवमादिष्विति'। के पुनरन्तरङ्गा विधयः, हित्वदत्वात्वेत्वदीर्घत्वशूडिटः, हित्वं दधातेर्हिः, हित्वा, प्रधाय। दत्वं, दोदद्घोः, दत्वा, प्रदाय। आत्वं जनसनखनां सञ्झलोः, खात्वा प्रखाय प्रखन्य, इत्वं द्यतिस्यतिमास्थामित्ति किति स्थित्वा प्रस्थाय, ईत्वं, घुमास्थागापाजहातिसां हलि पीत्वा प्रपाय, दीर्घत्वम्, अनुनासिकस्य क्विझलोः क्ङिति, शान्त्वा, प्रशम्य, शू, च्छ्वोः शूडनुनासिके च, पृष्ट्वा आपृच्छ्य, ऊठ्,द्यूत्वा, इट्, उदितो वा, देवित्वा, प्रदीव्य, अत्रेटि सति न क्त्वा सेडिति कित्त्वप्रतिषेधाद्गुणः स्यात्। पूर्वग्रहणं किमर्थम्,

१ क्त्वान्तत्त्वमिति इं पु· पाठ। २ एवमिति नास्ति मुद्रितमूलपुस्तके।

अनञीत्येवोच्यमाने बहुव्रीहिः स्यात्, अविद्यमानो नञ् यस्मिन्नप्राप्तन-ञिति, तथा च स्त्रैणीकृत्येत्यत्रापि प्रतिषेधः स्यात्, पूर्वग्रहणे तु सति, तस्य नियतदेशात्वयववचनत्वान्नायं दोषः, लित्करणं प्रचिकीर्ष्येत्यत्र प्रत्ययात्पूर्वस्य स्वरार्थं, प्रकृत्येत्यादौ तु धातुर्वर्णे। सिद्धम्, पित्करणं तुगर्थम् ॥

"क्त्वापि छन्दसि" ॥ 'अपिशब्दाल्ल्यबपीति'। स च समासेऽसमासे च भवति, अप्राप्तिविषये ल्यपः प्रापणार्थत्वादपिशब्दस्य, अन्यथा वा छन्दसीत्येव वाच्यं स्यात्, तथा च छन्दोविधानमनुविदधानः कल्पसूत्रकारा अपि प्रयुञ्जते आत्मना तृणी अज्येत्यादि ॥

"सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः" ॥ सुशब्द आदेश उच्यमाने अन्ये सुपो न प्राप्नुवन्ति, तस्मात् सुग्रहणमपनीय सुड्ग्रहणं कर्त्तव्यमित्याह। 'सुपां सुप इति'। 'तिङां तिङ इति'। एतच्च व्यत्ययो बहुलमिति सिद्धं, सुपां सुप इत्ययमपि तस्यैव प्रपञ्चः। तस्मावन्तीति प्राप्तइति तु युक्तः पाठः। 'आर्द्रे चर्मन्निति'। ननु च पूर्वसवर्णेनाप्येतत्सिद्धं, कथं चर्मन् इ इति स्थिते इकारस्य पूर्वसवर्णो नकारस्तत्र परतःस्वादिष्विति पदसंज्ञायां सत्यां पूर्वस्य नकारस्य लोपः, तत्रायमप्यर्थः, नङि संबुद्ध्योरित्यत्र ङिग्रहणं न कर्त्तव्यं भवति, अप्रातिपदिकत्वादेव विभक्तिनकारस्य लोपाप्रसङ्गात्, पूर्वस्य तु नकारस्येष्ट एव लोपः, नैतदस्ति। अत्र हि पूर्वसवर्णो भवन्नान्तर्यतो निरनुनासिकस्य निरनुनासिको दकार एव स्यात्, अस्तु संयोगान्तलोपो भविष्यति, नात्र संयोगान्तलोपः प्राप्नोति, स्वादिष्विति पदसंज्ञायां सत्यां पूर्वनकारस्य लोपे सति असंयोगान्तत्वात्, नलोपो हि संयोगान्तलोपे सिद्धः, एवं तर्हि न ङिसंबुद्ध्योरित्यत्र ङिग्रहणं करिष्यते, तत्र नलोपाभावे संयोगान्तलोपः,। तदेवमस्यान्यथासिद्धत्वादुदाहरणान्तरमाह। 'हविर्द्धाने[1] यत्सुन्वन्तीति'। यत् इ इति स्थिते अत्र यदि पूर्वसवर्णो दकारः स्यात्त्यदाद्यत्वे सति स्यानिवद्भावात्तस्मिन् भावः प्राप्नोति तस्मादत्र लुगेव कर्त्तव्यः, अनेकाल्सु च भ्यामादिषु अन्त्यस्य पूर्वसवर्णे पूर्वभागस्य श्रवणप्रसङ्गः, तस्मात्तत्रापि लुगेव कर्त्तव्यः ॥

१ हविर्धानयोरिति इं॰ पु॰ पा॰।

'धीतीत्यादि'। धीतिमतिसुष्टुतिशब्देभ्यस्तृतीयैकवचनस्य पूर्वसवर्ण इकारः, सवर्णदीर्घत्वम्। 'न ताद्वाह्मणादिति'। तच्छब्दाद्वाह्मणशब्दाच्च शस्, तस्यादादेशः, न विभक्तौ तुस्मा इति इत्संज्ञाप्रतिषेधः 'या देव विप्रतात्, त्वा महान्तमिति बह्वृचाः। 'यूयं वयमिति प्राप्तइति'। प्रमादपाठोयं, तथाहि। न युष्मे वाजबन्धव इत्यत्र मन्त्रे ऋताश्वमेधनाम्नो राज्ञोदानं स्तूयते, व्यत्ययेन द्वयोर्बहुवचनं, वाजमित्यन्ननाम, अन्नप्रदानेन सर्वेषां बन्धवस्तेषां संबोधनं हे बाजबन्धवः, युष्मे युष्मासु अधीत्यस्यानेन संबन्धः, स च सप्तम्यर्थानुवादी, निनित्सुश्च निन्दनशीलोपि मर्त्यो युष्मासु अवद्यं न धारयति नावधारयति, अवद्याभावादित्यर्थः,। अस्मे इन्द्राबृहस्पती इत्यत्रापि रयिं धत्तमिति क्रिया, दधातिश्च दानार्थः, तस्माद्युष्मासु अस्मभ्यमिति युक्तः पाठः, यूयादेशइत्याद्यपि न पठितव्यम्। 'अनुष्टुभेतिप्राप्तइति'। अधिगुप्रैषे तु ताअनुष्ठ्योच्यावयतादिति अनुपूर्वात्तिष्ठतेरातश्चोपसर्गइत्यङ्, अनुष्ठानमनुष्ठा तयाऽनुष्ठ्या। 'प्रबाहवेति'। घेर्ङितीति गुणः, ननु 'ङित्त्वे विद्यादुर्णनिर्द्देशमात्रं वर्णो यत्स्यात्तच्च विद्यात्तदादा' वित्युक्तं, सत्यं, ङित्करणसामर्थ्यात्तु गुणः। 'प्रबाहुनेतिप्राप्तइति'। बाहुनेति तु युक्तः पाठः, प्रशब्दस्याख्यातेन संबन्धात्, अयाचो ऽकारः सुपि चेति दीर्घनिवृत्त्यर्थः॥

"अमो मश्" ॥ 'अमिति मिबादेशो गृह्यतइति'। द्वितीयैकवचनस्य ग्रहणं न भवति छन्दसि दृष्टानुविधानाद्वक्ष्यमाणेषु बाहुल्येन तिङां निर्द्देशात्,। 'वधीमिति'। हन्तेर्लुङ्, लुङि चेति वधादेशः, च्लेः सिच्, इट्, मिपोम् भावः, तस्य मश् अकार उच्चारणार्थः, अस्तिसिचोपृक्तइतीट्, इट ईटीति सिचो लोपः, सवर्णदीर्घत्वम्। 'शित्करणं सर्वादेशार्थमिति'। अन्यथा ह्यलोन्त्यस्येति मकारस्य मकारवचने प्रयोजनाभावात्सर्वादेशो भविष्यत्यत आह। 'मकारस्यापीति'। यथा मो राजि समः क्वावित्यत्रेति भावः। पञ्चमीनिर्द्देशाभावात्त्वादेः परस्येत्येतन्न भवति, अथोच्यते द्विमकारकोयं निर्द्देशः करिष्यते, तत्रैकस्य संयोगान्तलोपेपि वधीमित्यादि सिद्धमिति, एवमपि लाघवे नास्ति

विशेषः. किं च संयोगान्तलोपस्यासिद्धत्वादपृक्तलक्षणा ईट् एव स्यात् । एवं तर्हि यकारादिः करिष्यते, किं यकारो न श्रूयते, वलि लुप्तनिर्दिष्टो यकारः, नात्र किं चित्प्रमाणमस्ति, तस्माच्छित्करणम् ॥

"लोपस्त आत्मनेपदेषु" ॥ 'अदुह्रेति'। दुहेर्लङ्, आत्मनेपदेष्वनतइति झस्यादादेशः, बहुलं छन्दसीति रुट्, तकारस्य लोपे द्वयोरकारयोरतो गुणे पररूपत्वम् । 'शये इति'। शेतइत्यत्र तलोपे कृते अयादेशः । 'दुहामिति'। लोट् टेरेत्वम्, आमेतः, तलोपः । 'अपीत्यधिकारादिति'। एवं चात्मनेपदेष्वितिवचनं तस्यैव प्रपञ्चः ॥

"यजध्वैनमिति च" ॥ 'वकारस्य च यकार इति'। बह्वृचास्तु वकारमेवाधीयते, तत्र मलोपमात्रं निपात्यते ॥

"तस्य तात्" ॥ 'लोण्मध्यमपुरुषबहुवचनस्येति'। प्रथमपुरुषैकवचनस्य तु ग्रहणं न भवति छन्दसि दृष्टानुविधानात् पूर्वोत्तराभ्यां बहुवचनाभ्यां वा साहचर्यात् । 'कृणुतादिति'। कृवि हिंसाकरणयोः, धिन्विकृण्व्योर चेत्युप्रत्ययः, वकारस्य चाकारः, अतो लोपः ॥

"तप्तनप्तनथनाश्च" ॥ 'शृणोतेति'। श्रुवः शृ चेति श्नुप्रत्ययः शृभावश्च, पित्त्वे सति ङित्त्वाभावाद्गुणः । 'दधातनेति'। अत्रापि पित्त्वाभावादभ्यस्तयोरित्याकारलोपाभावः । 'जुजुष्टनेति'। व्यत्ययेन परस्मैपदं, तुदादित्वाच्छः, तस्य बहुलं छन्दसीति श्लुः, द्विर्वचनं, जुषेरनुदात्तेत्वाज्जुषध्वमिति प्राप्तइति तु युक्तःपाठः । 'यदिच्छतेति प्राप्तइति'। बह्वृचास्तु क्वावस्तो मरुतो यतिष्टनेत्यस्यामृचि यतिष्ठनेति पठन्ति, यतिस्थनेति पदकाले, तत्रास्तेरूपम् ॥

"इदंतो मसि" ॥ मसीत्यविभक्तिको निर्देशः, इकार उच्चारणार्थः, अन्तशब्दोवयववचनः, इत् अन्तो यस्य स इदन्तः, तपरकरणमसंदेहार्थे यन्तइत्युच्यमाने संदेहः स्यात्, किं यकारान्त ईदन्त इदन्तो वेति, तत्र यदि सकारोपमर्द्देन इकारान्तमभिप्रेतं स्यात्मस इदित्येव वाच्यं स्यात्तस्मादवस्थित एव सकार इकार उपसृज्यते, अन्तग्रहणाच्च तद्ग्रहणेन गृह्यते, ततश्च टित्त्वादेरागमलिङ्गस्याभावेपि अर्थादागमोयं

संपद्यते, तदिदमुक्तं, मसः सकारान्तस्य यादि, एवं च मस इगिति वक्तव्यं, प्रत्याहारसंदेहप्रसङ्गात्तथा नोक्तम् ॥

"क्त्वो यक्" ॥ 'दत्वायेति'। दो दद्घोः, सौभाग्यमस्मै दत्वाय, दत्वायास्मभ्यं द्रविणेह भद्रमित्यादिमन्त्रगतमुदाहरणं, दत्वाय सविता धियमिति क्वचित्पठ्यते, तत्र तैत्तिरीयकास्त्वायेति पठन्ति । 'क्त्वापि छन्दसीत्यादि'। एवं हि पुनः क्त्वाग्रहणं न कर्तव्यं भवति ॥

"आज्जसेरसुक्" ॥ जसेरिति पूर्वाचार्यानुरोधेन निर्देशः । 'ब्राह्मणास इति'। असुकि कृते जसः सकारस्य श्रवणम्, असुकः सकारस्य विसर्जनीयः 'ये पूर्वासइत्यादि'। चोद्यं । 'उपरासइति'। अपरशब्दस्यादेरुकारश्छान्दसः यदि पुनरयं पूर्वान्तः क्रियेत अस्य जस्यसुगिति नैवं शक्यम्, अतो गुणे पररूपत्वं हि स्यात् अकारोच्चारणं तूत्तरसूत्रे दध्यस्यतीत्यादौ श्रवणार्थं स्यात्, सङ्घट्टनावित्यादिपरिहारः, यद्यप्येतत्सर्वं नामसंज्ञायाः पूर्वादिषु जसि विकल्पनादेव सिद्धम् उभयासो जातवेदः स्यामेत्यत्र तु शीभावप्रसङ्गः, अत्र हि प्रथमचरमेति विकल्पं बाधित्वा सर्वादिषु पाठान्नित्या संज्ञा भवति सा ह्यन्तरङ्गा ॥

"अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि" ॥ 'अश्वस्यतीति'। असुकोकारः पूर्वत्र ब्राह्मणास इत्यादौ चरितार्थ इत्यतो गुणइति पररूपत्वं भवति, नः क्यइति नियमादपदान्तोकारः । 'मैथुनेच्छायामिति'। अश्वविषयेच्छा यदा मैथुनार्था भवति न त्वारोहणाद्यर्था तदैवासुग्भवति, मैथुनेच्छापरत्वाच्च प्रयोगस्याश्ववृषोग्रादानमतन्त्रमिति मनुष्यादिविषयेपि प्रयुज्यते, इति रामो वृषस्यन्तीमिति । 'तृष्णातिरेकइति'। अभ्यवजिहीर्षातिरेकः, क्षीरलवणविषय इच्छातिरेको यदाभ्यवहारार्थो न तु होमाद्यर्थस्तदेत्यर्थः । 'सर्वप्रातिपदिकेभ्य इति'। तादर्थ्ये एषा चतुर्थी सर्वप्रातिपदिकार्थं सर्वेषां प्रातिपदिकानामित्यर्थः ।

"आमि सर्वनाम्नः सुट्" ॥ इमे बहव आमः ङस्ओस्आम्, ङेराम् नद्याम्नीभ्यः, किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे, कास्प्रत्ययादाममन्त्रे लिटि, तेषु कस्येदमामो ग्रहणमित्याह । 'आमिति षष्ठीबहुवचनं गृह्यत-

(5c) To exemplify the metre discordant with the Sentiment or *Rasa* depicted—

"हा नृप! हा बुध! हा कविबन्धो! विप्रसहस्रसमाश्रय देव!
मुग्धविदग्धसभान्तररत्न! क्वासि गतः क्व वयं च तवैते" ॥

["O King! O learned One! O friend of poets! Oh! the shelter of thousands of Brāhmanas! O Godlike One! The jewel of the assembly of handsome and clever people! Whereto have you departed! And where are we left, your own!"]

[*Page* 381.] This metre, the दोधक, proper for the Comic, is here improperly employed in connection with the Pathetic.

(6) To exemplify *Deficiency in word*—

"तथाभूतां दृष्ट्वा, &c."

(Vide *supra*, Chap. III. *Text*, page 70.)

[*Page* 382.] Here (1) an 'अस्माभिः' in connection with 'स्थितम्' and (2) an 'इत्थम्' before 'खिन्ने,' are necessary.

(7) To exemplify the *Redundant word*—

"स्फटिकाकृतिनिर्मलः प्रकामम् प्रतिसंक्रान्तनिशातशास्त्रतत्त्वः।
अविरुद्धसमन्वितोक्तियुक्तिः प्रतिमल्लास्तमयोदयः स कोऽपि" ॥

["That king is clean (in heart) like the form of crystal, and has, in his heart, reflected all the abstruse principles of science; whose statements and reasonings are well-connected and not contradictory (to Science or Custom), and who brings about the adversity of his enemies."]

[*Page* 383.] Here (*a*) the word आकृति is redundant.

Or again,

"इदमनुचितमक्रमश्च पुंसां यदिह जरास्वपि मान्मथा विकाराः।
यदपि च न कृतं नितम्बिनीनां स्तनपतनावधि जीवितं रतं वा" ॥

(*a*) Since the word स्फटिक by itself alone is enough to connote *clearness*.

["It is improper and against the natural course of events, that even old men should be affected by sexual desire; and also that the life or the enjoyment of women should not be made to end with the fall of their breasts."]

[*Page* 384.] Here कतम् is redundant; and it also breaks the uniformity of construction with the first half. Thus if we read 'यदपि च न कुरङ्गलोचनानां' we shall require nothing else for the completion of the sense.

(8) To exemplify the *Repetition (a) of words*—

"अधिकरतलतल्पं कल्पितस्वापलीला-
परिमिलननिमीलत्पाण्डिमा गण्डपाली ।
सुतनु कथय कस्य व्यञ्जयत्यञ्जसैव
स्मरनरपतिलीलायौवराज्याभिषेकम्" ॥

["Thy cheeks appear with their paleness waning on account of the pressure caused by supporting them on the palms in sleep. O thou beautiful one! let me know soon of which young man does this signify the coronation, as the crown-prince of sportiveness of the king Cupid?"]

[*Page* 385.] Here (*b*) the word लीला, in the fourth foot, is needlessly repeated.

(9) To exemplify the *Receding (c)* or *falling off of Excellence*—

(*a*) Thus defined by the Com.—Repetition of words is that where a word precisely the same as previously used, is used again without any special purpose.

(*b*) As suggested by the Com., the better reading would be स्मरनरपतिलक्ष्मी. The ground of this being a fault is that it implies the poor a vocabulary of the poet and thus makes the feeling of the audience averse to him.

(*c*) In the example given the boar is described as destructive, the elephant the more so; and still more destructive is represented the wild buffalo. Such being the case, the proper method would have been to describe the lion as destroying all these and thus showing the excellence, rising gradually in every foot, to the very end of the Çloka. But this is not done. All the fierce destructiveness of the animals is toned down to the quiescent lyingof the lion, captivated by feminine fascinations.

[*Page* 386.] "कः कः कुत्र न घुर्घुरायितघुरीघोरो घुरेत्सूकरः
कः कः कं कमलाकरं विकमलं कर्तुं करी नोद्यतः ।
के के कानि वनान्यरण्यमहिषा नोन्मूलयेयुर्यतः
सिंहीस्नेहविलासबद्धवसतिः पञ्चाननो वर्तते" ॥

["Where will not the boar, fierce with his peculiar sound, make a terrible noise? Which lotus ponds will not the elephants try to render lotusless? Which forests will not the wild buffalo, uproot off?—(all this will be done),—because the lion lies captivated by the affection of the lioness!]

[*Page* 387.] (10) To exemplify the ***Resumption (a)*** of the ***concluded***—

"झेङ्कारः स्मरकार्मुकस्य सुरतक्रीड़ापिकीनां रवः
झङ्कारो रतिमञ्जरीमधुलिहां लीलाचकोरीध्वनिः ।
तन्व्याः कञ्चुलिकापसारणभुजाक्षेपस्खलत्कङ्कण-
क्वाणः प्रेम तनोतु वो, नववयोलास्याय वेणुस्वनः" ॥

["May the tingling of the bangles fallen on account of the movements of the arms of the slender-bodied one caused by the removal of the bodice,—the tingling which is as it were, the twang of Cupid's bow, the singing of the cuckoo in the shape of dalliance, the humming of black bees in the blossom of love, and the sound of partridges in the shape of graceful sportings,—may all this expand your love! and also resembling the ring of a flute played to the dancing as it were of youth."]

(*a*) Thus explained by the *Laghu-Manjushā*—"The use of a further qualification after the construction (the relation of subject and verb) of the sentence has been fully comprehended;" and cf. the *Pradīpa*—"The direction of the attention, by means of further (qualifications) connected with it, to a subject, whose connection in the sentence has been fully comprehended."

The example given is thus shown by the *Kāvyapradipa* to come under the above category—"Here the sentence finishes at वः; but attention is again directed to it by the following qualification नववयो &c., which latter though a compatible qualification, is yet unnecessary, on account of the construction of the sentence having been completed at वः. Thus the ground of fault, in this, is merely the needlessness of the resumption, (here) in the shape of additional qualifications."

३३१

[*Page* 389.] (11) To exemplify the *Isolation* of an *Expressive word* of the first half, in the second—

"मसृणचरणपातं गम्यतां भूः सदर्भा
विरचय सिचयान्तम् मूर्ध्नि घर्मः कठोरः।
तदिति जनकपुत्री लोचनैरश्रुपूर्णैः
पथि पथिकवधूभिर्वीक्षिता शिक्षिता च" ॥

[*Bālarāmāyaṇa*, Act VI.]

["'Walk slowly, as the ground has grass-sprouts; cover your head with the cloth, as the sun is strong,'—thus was the daughter of Janaka, on her way (to the forest), exhorted and looked upon with tearful eyes by the wives of travellers."]

(Here the word तत् occurring in the third foot, is one required in the first.)

[*Page* 390.] (12) To exemplify the (*a*) *Want* of an *Intended Connection*—

"येषां तास्त्रिदशेभदानसरितः पीताः प्रतापोष्मभिः
लीलापानभुवश्च नन्दनवनच्छायासु यैःकल्पिताः।
येषां हुङ्कृतयः कृतामरपतिक्षोभाः क्षपाचारिणां,
किन्तैस्त्वत्परितोषकारि विहितं किंचित्प्रवादोचितम्" ॥

["What satisfactory deed describable in an assembly, has been done by those Rākshasas,—by the fire of whose glory was drunk off the musk-flow of the celestial elephant, by whom were established in the forest of Nandana sporting and drinking places, and whose slightest sound (*huṅ*) disturbed the king of the Gods.'"]

[*Page* 392.] (*b*) Here we have no knowledge of the noun

(*a*) This is four-fold—(i) Caused by the difference in case-endings; (ii) Due to the deficiency of certain words; (iii) Due to want of an indispensable connection or word; and (iv) Due to the absence of proper connection between the expressed and suggested meanings. These are respectively exemplified.

(*b*) The law here referred is laid down by Jaimini (*Mīmānsāsūtra* Adhyāya III.) It means that the construction of a sentence is only possible on a relation of subserviency; it is not possible either between two subordinates or between two principals, since they are independent of each other. Now in the example, the connection

qualified (referred to) by यैः, since the connection with the meanings of the several यत् is forbidden by the law:—"Terms subordinate, being all equally (subordinate), standing in need of a principal (noun), their mutual connection cannot be."

(*a*) If we read च्पाचारिभिः we could get the necessary connection.

[*Page* 393.] Or again—

"त्वमेवंसौन्दर्या, स च रुचिरतायाः परिचितः,
कलानां सीमानं परमिह युवामेव भजथः ।
अपि द्वन्द्वं दिष्ट्या तदिति सुभगे संवदति वाम्
अतः शेषं यत् स्याज्जितमिह तदानीं गुणितया" ॥

["You are so beautiful; he too is not unfamiliar to handsomeness; both of you have proficiency of the extremest degree in fine arts; thus fortunately your association is quite proper. If the issue were what it should be, then would the qualifications be glorified."]

Here we have no तत् with यत्, nor a यदा with तदानीम् (and as such we cannot have the intended connection). The proper reading would be "चेत्स्यात्."

[*Page* 395.] Or again—

"संग्रामाङ्गणमागतेन भवता चापे समारोपिते
देवाकर्णय येन येन सहसा यद्यत् समासादितम् ।
कोदण्डेन शराः शरैररिशिरस्तेनापि भूमण्डलम्
तेन त्वम्भवता च कीर्तिरतुला कीर्त्या च लोकत्रयम्" ॥

---

of यैः with चपाचारिणां is intended; but this is not possible, as they have different case endings.

(*a*) In this case चपाचारिभिः would be the directly qualified of तैः and this being so, every तत् must have every यत् in whatever case, as its qualification. The construction being somewhat like this:—तैः चपाचारिभिः किं विहितम्, कथम्भूतैः चपाचारिभिः ?—येषाम्···पीताः, यैः···कल्पिताः, येषां···चोभाः &c. the latter, यत् &c. being mere qualifications of the चपाचारी. This is not possible in the original reading, since in that case, there can be no direct connection between तैः and चपाचारिणाम्, owing to the difference of case-terminations.

["O king! listen to what had recourse to what, on your twanging the bow in the battlefield,—the bow had recourse to the arrows; the arrows to the enemy's head, this to the ground, the earth again to you, you to fame, which lastly to the three worlds."]

[*Page* 396.] (*a*) Here, if we make the third and fourth feet the objectives to the verb 'listen,' then the proper form should be कोदण्डं शरान्; if on the other hand we make the meaning of the whole sentence, the objective, then the proper form would be कोदण्डः शराः. And further, neither do कोदण्ड &c. form part and parcel of the denotation of the यत्; nor are they its qualifying terms; nor, lastly, are there questions in the form—'by whom?' 'by whom?.'

(*a*) This is a knotty point and cannot be made very clear without freely drawing upon the Commentators. And from among these one can do nothing better than quote the Kāvyapradipa in full: "Here the connection intended is between the two halves of the Çloka; this is by no means possible: since the connection of meanings with that of sentence can be only in the following six ways:—(1) as a verb; (2) as one of the cases, (3) as a genitive; (4) as a qualifying term, (5) as a cause or reason, and (6) as an amplifying clause. Of these (1), (3), (5) and (6), and the qualifications of these, are not possible with regard to कोदण्ड &c. No cases are possible, save the nominative and the objective. Then since the meanings of words alone can be the objects of the verb 'to listen,' the form, in case of कोदण्ड &c. being objectives, would be कोदण्डं शरान्. If it be asserted that कोदण्ड &c. are objectives, not taken severally, but all conjoined, though themselves unconnected with one another, and hence the second case termination cannot apply to कोदण्ड &c. severally,—it is replied that in that case, the words being crude substantives, would take the form accordingly as कोदण्डः शराः &c. But, says the Purvapakshin, we can construe कोदण्ड as the nominatives and शराः &c. as the objectives, of the verb समासादन. It is replied—This cannot be: since in that case the construction would be शराः समासादितम्, an impossibility. Again continues the objector; but we can construe thus: 'येन यत्समासादितम्, कोदण्डेन शराः, तदाकर्णय &c.,"—it is replied, that in that case there appears a difference between the nominatives (signified by येन and कोदण्ड) and the objectives (यत् and शराः); and further the expectancy is not gratified ['there being no nouns mentioned, for which the यत् and येन would stand'—the Prabhā.] The Pūrvapakshin continues—We can make कोदण्ड &c, part and parcel of the meanings of येन &c., since these latter are capable of signifying the internally intended objects; and as such the connection of the यत् with verb being established, that of कोदण्ड &c. would be so also. To this it is replied—This cannot be: Since in that case the re-mention of कोदण्ड &c. would be a needless repe-

[*Page* 399.] Or again—

"चापाचार्यः &c." [*Text*, p. 363.]

Here the rediculo, intended to be applied to Paraçurāma, is understood as applying to the axe. If we read कृतवतः for कृतवता, then we get the desired connection.

[*Page* 400.] Or again—

"चत्वारो वयमृत्त्विजः स भगवान् कर्मोपदेष्टा हरिः
संग्रामाध्वरदीक्षितो नरपतिः पत्नी गृहीतव्रता ।

---

tition; hence there *is* a certain predicative distinction between यत् and कोदण्ड &c., and the construction must base itself somehow on this distinction. For the same reason is also set aside the view that कोदण्ड &c. are parts of the meaning of तत् which has to be supplied in the second half in accordance with the यत् of the first half. The objector continues—we can make कोदण्ड &c. merely qualifying adjuncts to the nominative and objective (signified by यत्). It is replied—Not so: for in that case the construction will have to be thus explained—कोदण्डेन येन शराः यत्समासादितम् तत् आकर्णय—and in this case the subjective nouns to which यत् and येन refer not being mentioned, the expectancy raised by यत् and येन remains ungratified; and further there would result a plurality of constructions in शराःयत् ['giving rising to different sentences and thus doing away with the very notion of the whole as a sentence'—Udyota.] For similar reasons, the view, that 'कोदण्ड &c. and शराः &c. are respectively the nominatives and objectives and येन and यत् &c. are the attributive adjuncts,' is also set aside, [in both cases the non-gratification of the expectancy raised by येन शरा यत् &c. and the anomalous constructionin शराः यत्, being exactly similar.] The objector continues—all right, granted that येन and यत् of themselves are not capable of construction; but we may make the following sentences कोदण्डेन शराः &c. the replies to the specific questions केन किम्? It is replied—This too is not possible, no such question being seen. If you assert that the question is assumed and thus gives occasion for the Figure 'Rejoinder,'—we reply that this cannot be: the assumption is unnecessary, since the mention of कोदण्ड is quite compatible after the declaration "येन यदासादितं तदाकर्णय &c.," (even without the question.) Now then, springs up the objector—where lies the fault if we construe as "कोदण्डेन शराः समासादिताः," transforming the singular number of the verb आसादितम्? It is replied—in that case we shall have a split of the sentence, giving rise to so many independent sentences, there being no connection between the two halves of the Çloka; and thus would result the Want of Intended Connection. [The Udyota proposes the reading—"सम्प्राप्ते परिपन्थियोधनिवहे साम्मुख्यमासादितम्"]

"कौरव्याः पशवः प्रियापरिभवक्लेशोपशान्तिः फलम्
राजन्योपनिमन्त्रणाय रसति स्फीतं हतो दुन्दुभिः" ॥

[*Vēṇīsanhāra*, Act I.]

[" We four are the sacrificial priests; the revered Krishṇa, the spiritual adviser; the king is initiated for the sacrifice of battle; and the wife is observing a penance; the Kurus are the sacrificial goats; the fruit of the sacrifice is the allayment of the pain caused by the molestation of the beloved; and this bugle is being so loudly sounded in order to invite the Kshatriyas to the sacrifice."]

Here the word अध्वर forming the member of a compound, becomes subservient,—and as such it is not construable with the other members of the sentence (*i. e.* ऋत्विजः &c.) as it should be.

[*Page* 402.] Or again

"जङ्घाकाण्डोरुनालो &c." [*Text*, p. 309.]

(*a*) Here, the निजतनु is understood to belong to the दण्डपाद, instead of, as intended, to Bhavāni.

(13) To exemplify the *Omission* of a *Necessary Statement*:

"अपाकृतस्य चरितातिशयैश्च दृष्टै-
रत्यद्भुतैर्मम हृतस्य तथा ऽपि नास्था ।
को ऽप्येष वीरशिशुकाकृतिरप्रमेय-
सौन्दर्यसारसमुदायमयः पदार्थः" ॥

[*Mahāvīracharita*, Act II.]

["I am captivated by the grand and marvellous deeds seen of this superhuman being (Rāma); yet I cannot believe (that he broke the bow.) (Because) this being (Rāma) appearing as a heroic boy, is made up of an immeasurable essence of beauty."]

Here, the amplifying predicate of अपहृतः must have been mentioned as अपहृतोऽस्मि. Since तथापि of the following sentence

(*a*) This is said in accordance with the law that such words as निज, स्व &c., refer to the principal substantive in the sentence; and in the present instance the principal noun is दण्डपाद, since it is the nominative of the sentence.

गच्छति न कार्य्योपासक इत्यर्थः । उदाहृतश्रुतिवाक्यप्रतिपन्नयोरन्यतरस्य प्रतीकालम्बनत्वादप्रतीकालम्बनान् नयतीति प्रतिज्ञानं व्याहतमित्यत्राह "पञ्चाग्नी"ति, तत्र प्रतिपन्नयोरुभयोरप्यप्रतीकालम्बनत्वं साधयितुं सूत्रकारस्तत्क्रतुश्चेत्युक्तवानित्यर्थः ॥

सू० तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसम्भवन्तीति पञ्चाग्निविदोऽर्चिरादिगणो नयतीति श्रुतिः प्रकुप्येत्, अत उभयस्मिन्नपि पक्षे दोषः स्यात्तस्मादुभयविधान्नयतीति तदेतदाह तत्क्रतुश्चेति, तत्क्रतुः तथोपासीनस्तथैव प्राप्नोतीत्यर्थः, यथा क्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवति तं यथा यथोपासत इति न्यायात् पञ्चाग्निविदोऽप्यर्चिरादिना गतिश्रवणात् अर्चिरादिना गतस्य ब्रह्मप्राप्त्यपुनरावृत्तिश्रवणाच्च, अत एव तत्क्रतुन्यायात् प्रकृतिविनिर्मुक्तब्रह्मात्मकात्मानुसन्धानं सिद्धं नामादिप्राणपर्यन्तप्रतीकालम्बनानां तूभयविधश्रुतिसिद्धोपासनाभावादचिन्मिश्रोपासने तत्क्रतुन्यायाच्चार्चिरादिना गतिर्ब्रह्मप्राप्तिश्च न विद्यते। तमिमं विशेषं श्रुतिरेव दर्शयतीत्याह—

टी० तद्य इत्थं विदुर्य्ये चेमेऽरण्ये श्रद्धा तप इत्युपासत इत्यत्र पञ्चाग्निविद्यानिष्ठस्यार्चिरादिगतिश्रवणात् तया गतस्य ब्रह्मप्राप्त्याऽपुनरावृत्तिश्रवणात् फलस्य च यथोपासनभावित्वात् अर्चिरादिना ब्रह्मप्राप्तिफलोपासननिष्ठः पञ्चाग्निविद्यानिष्ठो ब्रह्मोपासक एव, तत्र तद्य इत्थं विदुर्य्ये चेमेऽरण्ये श्रद्धा तप इत्युपासत इति विभागान्यथानुपपत्त्या स्वात्मविशिष्टब्रह्मोपासन ब्रह्मात्मकस्वात्मोपासनं चेति कल्प्यं ब्रह्मप्राप्त्यानुगुण्यात् पृथङ्निर्देशवैयर्थ्याच्चेत्यर्थः । के पुनरत्र प्रतीकालम्बना इत्य-

चाह "नामादी"ति, । सू० विशेषं च दर्शयति ॥ १५ ॥ यावन्नाम्नोगतं देवादिनाम्नो गोचर इत्यर्थः, ब्रह्मणा सह ते सर्वे इत्यादिवचनं नार्चिरादिगतपुरुषविषयम् अपि तु चतुर्मुखलोकस्थयोगिविषयं "ते ब्रह्मलोके इति ब्रह्मैव लोको ब्रह्मलोकः तत्र वर्त्तमाना ब्रह्मनिष्ठाः परान्तकाले अन्तकाले च मामेवेत्युक्तचरमदेहावसानसमये परामृतात् प्रसवात् ब्रह्मणो हेतोः सर्वे परिमुच्यन्त इत्यर्थः । ब्रह्मलोकशब्दस्य कर्मधारयः स्वतःप्राप्तः वर्तमानशब्दाध्याहारस्तुल्यः अन्तकाल–शब्दस्य चरमदेहावसानपरत्वं स्मृतिप्रसिद्धम् । अतोऽस्मिन्नेव पक्षे स्वारस्यम् । अधिकरणार्थमुपसंहरति "तस्मादि"ति, अत्र परेषां पूर्वपक्षसूत्राण्येव सिद्धान्तसूत्राणि परं जैमिनिरित्यादिसूत्रत्रयं पूर्वपक्षविषयं तत्तु सर्वाधिकरणरीतिविरोधात् सूत्रकाराभिप्रायविरुद्धं सत्यपि सिद्धान्तोपक्रमेऽधिकरणे सिद्धान्तावसानत्वं सर्वत्र दृष्टं न तु पूर्वपक्षावसानत्वं परविद्याप्रकरणे गति-

सू० विशेषं च दर्शयति ॥ १५ ॥

भू० यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवतीत्यादिका श्रुतिर्नामादिप्राणपर्यन्तप्रतीकमुपासीनानाम् ।

कीर्तनं, स्तुत्यर्थमित्यनुपपन्नम् अन्यफलतयाऽवगम्यमाने नान्यस्तुत्यनुपपत्तेः, गतिर्हि सगुणविद्याफलत्वेन मता । यत्तूक्तं प्रजापतेः सभामित्यत्र कार्य्ये प्रत्यभिसन्धिरुपपद्यते ते यदन्तरेति पूर्ववाक्यविच्छेदात् प्रकरणाद्धि श्रुतिवाक्ये बलीयसी इति तदयुक्तं यशोऽहं भवामि ब्राह्मणानामिति सर्वात्मकत्वकीर्त्तनात्सगुणब्रह्मणस्सर्वात्मत्वकीर्त्तनानुपपत्त्या च परप्रकरणाविच्छेद इति, यतः, न च वाच्यं सगुणेऽपि ब्रह्मणि सर्वकामत्वादिवदुपासनार्थं प्रशंसार्थं वा तदिति तत्र पूर्वापरवाक्ययोः परविषयत्वेऽवगम्यमाने मध्यगतवाक्यस्य पदश्रुतेर्बाऽग्निना सिञ्चेदितिवदयोग्यार्थत्वेन दुर्बलत्वात्प्रजापतिशब्दस्य परविषयत्वेऽपि प्रजापतिश्चरति गर्भे अन्तरितिवत् प्रयोगोपपत्तेः, परविषयत्वकार्यविषयत्वयोरेकवाक्यत्वानुपपत्त्या वाक्यभेदकल्पनप्रसङ्गात् एकवाक्यात्मकत्वे सम्भवति वाक्यभेदा-

योगाच्च प्रत्यभिसन्धिरनुपपन्नः, परब्रह्मण एव निरवधिककल्याणगुणकस्य सर्वान्तरात्मत्वात्सर्वात्मत्वकीर्त्तनस्य प्रशंसार्थत्वमप्युक्तम् । यत्तूक्तं विभोर्गन्तव्यत्वानुपपत्तिर्भूगतेन प्रदेशान्तरगमनवत् पयसो दध्याद्यवस्थापत्तिवच्चांशभेदेनावस्थाभेदेन च गन्तव्यभावोऽनुपपन्नः निरंशत्वादवस्थाभेदशून्यत्वाच्च ब्रह्मणः गन्तुश्च जीवस्य ब्रह्मावयवत्वे तद्विकारत्वे च तत्प्रहाणेन स्थित्यभावात् गमनमयुक्तं, मध्यमपरिमाणत्वे अनित्यत्वात् अणुत्वे कृत्स्नशरीरवेदनानुपपत्तेः, व्यापित्वे गत्यनुपपत्तेश्च न मार्गगमनं, संसारात्मनः पारमार्थ्ये बन्धादनिर्मोक्षः, मोक्षे स्वरूपनाश इत्यादि तर्कबलात् परं जैमिनिरित्यादिसूत्राणां पूर्वपक्षविषयतेति तदप्ययुक्तं ग्रामादिगतेरिव ब्रह्मसंयोगार्थत्वाभावादर्चिरादिगतेर्निःशेषप्रतिबन्धनिवृत्त्यर्था हि सा, तस्याश्च कालापेक्षावद्देशापेक्षा युज्यते यावन्न विमोक्ष्य इति कालापेक्षा ह्युपलभ्यते परिप्राणविकल्पेन गमनानुपपत्तिरपरविद्याफलत्वेऽपि प्रसजेदिति स्वव्याघातः,—

सू० गत्यनपेक्षं परिमितफलविशेषं च दर्शयति, तस्मादचिन्मिश्रं केवलं वा चिदस्तु ब्रह्मदृष्ट्या तद्वियोगेन च

टी० न च गतेर्मिथ्यात्वेन तत्रोपपत्तिः, विभुत्वस्य गतिमात्रविरोधित्वात्सत्यगमनमेव विभुत्वविरोधीति चेन्न दृष्टान्ताभावात् व्याप्त्यसिद्धेः, विभुत्वगत्योर्विरोधो नाम नियमेन भिन्नाधारत्वलक्षणः, ततश्च यत्र विभुत्वाभावस्तत्रैव सत्यगतिदर्शनात् विरोधो निश्चीयेत, न च विभुत्वानाश्रयघटादिनिष्ठं गमनं त्वन्मते सत्यं तस्मात् गतिमात्रं विभुत्वविरोधीति स्वव्याघातो दुस्तरः, अणुत्वे कृत्स्नदेहवेदनानुपपत्तावपि तुल्यो व्याघातः, तत्रापि वास्तवकृत्स्नवेदनस्यैवाणुत्वविरोध इति चेत् पूर्ववद् दृष्टान्ताभावात् व्याप्त्यसिद्धेः प्रभाप्रभावन्न्यायेनानुपपत्तिरपि नास्तीति प्रागेवोक्तं, संसारित्वस्य पारमार्थ्येऽपि स्वरूपत्वाभावादनिर्मोक्षस्वरूपनाशौ न स्याताम् । यत्तु संसारस्य कर्मनिमित्तत्वे सूक्ष्मापराधसम्भवात् कर्त्तृत्वशक्तिसद्भावाच्च निःशेषकर्मक्षयाऽनुपपत्त्यादि

जल्पितं तज्ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुत इति शास्त्रबलादीश्वर-प्रसादशक्तिद्वारा निवर्तनीयत्वान्नोपपन्नं, या तु स्वपक्षे मोक्षोपपत्तिः सा च प्रागेव ध्वस्ता, अप्रतीकालम्बनानिति पृथगधिकरणयन्ति सगुणब्रह्मव्यति-रिक्तविकारालम्बनाः प्रतीकालम्बनाः तेषां पितृयाणतृतीयस्थानसम्बन्धा-भावात् प्रतीकविशेषणत्वेन ब्रह्मणोऽप्युपासितत्वाच्चेमेऽरण्य इत्यत्र तेषामप्युपादानात्सर्वान् विकारालम्बनानमानवो ब्रह्मलोकं नयतीति पूर्वपक्षं कृत्वा प्रतीकालम्बनान्वर्जयति तद्व्यतिरिक्तान्विकारालम्बनान् नयतीत्युभयथाऽभ्युपगमेऽपि दोषाभावादिति योजयन्ति, तत्र तावद-धिकरणभेदोऽनुपपन्नः त्रिशिरस्के विचारे जैमिनिपक्षस्य सिद्धान्त्येकदे-शिमतत्वादप्रतीकालम्बनानित्यस्य साक्षात्सिद्धान्तपरत्वाच्चाधिकरणभे-दानुपपत्तिरुभयथा च दोषादिति पठ्यमानत्वाददोषादिति पदमनुप-पन्नम् उभयथा दोषानौचित्यं च स्वपक्षे दोषाभावमात्रादपि परपक्षे दोषोद्घाटनं हि स्वपक्षदार्ढ्यहेतुः । अपरे तु सामीप्यात्तु तद्व्यपदेश इत्यन्तं पूर्वपक्षमुक्त्वा सिद्धान्तं वक्तुमन्तरा चिन्तान्तरपरं कार्य्यात्यय इत्येतद्व्याचक्षते ।

सू० य उपासते न तान्नयति, अपि तु परं ब्रह्मोपासीनाना-त्मानं च प्रकृतिवियुक्तं ब्रह्मात्मकं चोपासीनानातिवाहि-को गणो नयतीति सिद्धम् ॥ कार्याधिकरणं समाप्तम् ॥ इति श्रीभगवद्रामानुजाचार्यविरचिते शारीरकमीमांसा-भाष्ये चतुर्थाध्यायस्य तृतीयः पादः ॥

टी० कार्य्यब्रह्मप्राप्तानां पुनरावृत्तिरस्ति तेषामिह न पुनरावृत्ति-रिति वाजसनेयके इह-शब्दश्रवणात्तस्य कल्पविशेषत्वात् कल्पान्तरे चावृ-त्तिरिति पूर्वपक्षं कृत्वा श्वा भूते निर्वपेदिति श्वोभावस्येव सर्वकल्पा-नामिह-शब्दार्थत्वाविशेषादन्यथा अनावृत्तिः स्यादिह स्यादिति वाक्य-भेदप्रसङ्गात्, एकया यान्त्यनावृत्तिमन्ययाऽऽवर्त्तते पुनरित्युक्तवैषम्याभाव-सद्भावाच्च कार्य्यब्रह्मप्राप्तानामपि नावृत्तिरिति । अतस्तत्सामर्थ्यात्

कार्य्यात्यये तदध्यक्षेण सह परब्रह्मप्राप्तिरिति एवं निर्णीय परं जैमिनिरिति पूर्वोक्तस्य पूर्वपक्षस्य सिद्धान्तमाहुः, तत्र चाप्रतीकालम्बनान् प्रतीकालम्बनव्यतिरिक्तान् कार्य्यब्रह्मोपासकान् परब्रह्मोपासकाँश्च नयतीति हिरण्यगर्भोऽहम्भविष्यामीति प्रवृत्ताः कार्य्यब्रह्मोपासकाः उभयेषामर्च्चिरादिमार्गेण गतिः तयोर्ध्वमायन्नित्यादिश्रुतेः, पर्य्यङ्कविद्यापञ्चाग्निविद्ययोः कार्य्यब्रह्मोपासकस्यार्चिरादिश्रवणात् कार्य्यब्रह्मविदः क्रममुक्तितोऽनावृत्तिः परब्रह्मविदस्तु सद्योमुक्तिः अर्चिरादिना सत्यलोकमतिक्रम्य कारणे ब्रह्मणि सूक्ष्मदेहस्य करणानाञ्च प्रविलय इति परं जैमिनिरित्यनेन न विरोधः, ब्रह्मणो विभुत्वेऽपि कार्य्यमण्डलातिक्रमरूपा गातर्जीवत्वस्योपाधिकत्वाल्लिङ्गगमनमेव गतिरिति सिद्धान्तयन्ति तत्र हिरण्यगर्भं प्राप्तानां सर्वेषां पुरावृत्तिश्चेदयुक्ता ब्रह्मलोकगतानां श्वेतमहाभीषादीनां पुनरावृत्तिस्मरणात् तत्रत्यज्ञानिनामपुनरावृत्तिश्चेदभिमता, यत्तु हिरण्यगर्भो भविष्यामीति कार्य्यब्रह्मोपासीनानामर्चिरादिगत्या तत्प्राप्तिरिति तदयुक्तं हिरण्यगर्भस्य क्षेत्रज्ञतया तदुपासकानाममृतत्वप्राप्त्याभावादेवार्चिरादिगत्यनुपपत्तेः, तस्य च कार्य्यत्वकर्मवश्यत्वानुपास्यत्वादि च मुहुरुपपादितम्, अतस्तदुपासकानामप्रतीकालम्बनत्वमयुक्तं, जापकोपाख्याने ब्रह्मकायं प्रविशतो जापकस्य जिह्वया निष्क्रान्तस्य मूर्द्धन्यनाड्या निष्क्रमणाभावादर्चिरादिगत्यभावः स्फुटतरः। अथवा नेच्छते तत्र ब्रह्मकायनिषेवणम् उत्क्रामति च मार्गस्थः शीतीभूतोनिरामय इति ब्रह्मकायनिषेवणमनिच्छतो मुक्तिमार्गस्थतयोत्क्रमणवचनाच्च हिरण्यगर्भं प्राप्तवतो नार्चिरादिगतिः, अर्चिरादिना प्राप्यत्वं च न चतुर्मुखलोकस्योपपद्यते नारदादीनामादित्यमण्डलमभित्त्वा ब्रह्मलोकगमनदर्शनात्, "अपुनर्भवाय कोशं भिनत्ति कोशं भित्त्वा शीर्षकपालं भिनत्तीत्युपक्रम्य पृथिवीं भिनत्ति अपो भिनत्तीत्यारभ्याव्यक्तम्भिनन्ति अक्षरं भिनत्ति मृत्युं भिनत्तीत्यभिधानात् ब्रह्माण्डतदावरणात् बहिर्भूतत्वादव्यक्ताक्षरतमसां च न शरीरानुप्रविष्टपृथिव्यादीनां भेदनं तत्रोच्यते कोशं भिनत्ति शीर्षकपालं भिनत्तीत्यभिधाय पृथिव्यादिभेदनप्रतिपादनस्य पार्थिवाण्डक-

दाहतत्त्वावरणविषयतया अवर्जनीयत्वात्, जापकोपाख्याने द्वाभ्यां मुक्तं त्रिभिर्मुक्तमिति मुक्तप्राप्यस्य परमस्थानस्य गुणत्रयोत्तीर्णत्वाभिधानात् न कालस्तत्र वै प्रभुरित्यत्राकालकाल्यत्वप्रतिपादनात्, ब्रह्मलोकस्य च प्राकृतत्वेन गुणत्रयोत्तीर्णत्वायोगात् द्विपरार्द्धावसानत्वेन अकालकाल्यत्वायोगादत एवाक्षरे परमे व्योमनित्यक्षरत्वश्रवणविरोधाच्च तमसः परत्वाद्ययोगाच्च न चतुर्मुखलोकोऽर्चिरादिप्राप्यः कार्यब्रह्मोपासकान् परब्रह्मोपासकांश्च नयतीत्युभयथा शब्दव्याख्यानमनुपपन्नम् एवमुभयथाभाव एव दोषान्न स कारणं कारणं तु ध्येय इति कार्य्योपासनं हि प्रतिषिध्यते क्रममुक्त्यभ्युपगमादविरोध इति चेन्न अर्चिरादिगतस्य क्रममुक्तेः श्रुतिविरुद्धत्वात्, स एतान् ब्रह्म नयतीति हि श्रुतिः न तु क्रमेण गमयतीति हिरण्यगर्भादीनां मोक्षप्रदत्वाभावादेव तदुपासकानामर्चिरादिगत्ययोगाच्चैवं व्याख्यातुमयुक्तं कार्य्योपासकस्यार्चिराद्यन्वये पर्यङ्कविद्यादिकं प्रमाणमिति चेत् न कारणत्वबलादाकाशादिशब्दानां प्रसिद्धार्थपरत्वाभाववदर्चिराद्यन्वयबलेन तस्याप्युपास्यसमर्पकशब्दस्य कार्य्यपरत्वासिद्धेः, विग्रहाद्यन्वयात् कार्य्यत्वमिति चेत् विलक्षणविग्रहयोगस्यैव कारणत्वसाधकत्वात् । अन्ये त्वाहुः कार्य्यं ब्रह्म हिरण्यगर्भलोकः परं चापरं चेत्युपक्रम्य स सामभिरुन्नीयते ब्रह्मलोकमिति प्रयोगदर्शनात्सर्वगतस्य परब्रह्मणोगन्तव्यत्वायोगात् पर्य्यङ्कविद्यायां ह्रदनदीवृक्षादिविशेषवत्त्वदर्शनात् हिरण्यगर्भसामीप्येन लोकस्य ब्रह्मशब्दवाच्यत्वोपपत्तेश्च लोकप्राप्तिरिति पूर्वपक्षं कृत्वा ब्रह्मशब्दमुख्यत्वात् लोकस्थस्य हिरण्यगर्भस्य सतः परमात्मनः प्राप्यत्वेऽपि पूर्वपक्षयुक्तीनां सम्भवान्मुक्तानां चतुर्मुखलयावधिब्रह्मलोके भोगाभ्युपगमाद्धिरण्यगर्भाकारं परं ब्रह्मैव नयतीति सिद्धान्तयन्ति । अत्र चतुर्मुखलोकप्राप्तिरेव विद्याफलं तत्राप्रलयात् भोगः तल्लोकनाशे सृज्यताहेतुकर्माभावात् मोक्ष इति वादरिमतं, ब्रह्मलोकप्राप्त्यनन्तरमेव ब्रह्मणि लयः तेन लिङ्गनाशः, ततश्च गुणाष्टकाविर्भावात्समानभोगता ब्रह्मलोके लीने परमाकाशप्राप्तिः तत्र च भोग इति जैमिनेरभिप्राय इति पक्षद्वयवैषम्यं दर्शितं भवति, अप्रतीकालम्बनानिति किं

सर्वेऽप्युपासका देवयानेन ब्रह्मलोकं यान्ति ? उत नेति चिन्ता, तत्र देवयानेन गतान्सर्वानमानवः परं ब्रह्म हिरण्यगर्भाख्यं नयति? उत नेति ? द्वे सृती अशृणवं पितॄणामहं देवानामुत मर्त्यानामिति मार्गद्वित्वं प्रतिज्ञाय अथ ये यज्ञेन दानेन तपसा लोकं जयन्ति ते धूममभिसंविशन्तीतीष्टादिकारिणां धूमादिप्राप्तिश्रवणात् तद्व्यतिरिक्तसर्वोपासकानामुत्तरमार्गस्य प्राप्तत्वादब्रह्मविदां पञ्चाग्निवित्प्रभृतीनामप्यर्चिरादिश्रवणात् एष पन्था ब्रह्मणो भानुवित्तस्तेनैति ब्रह्मवित्पुण्यकृत्तैजसश्चेति तैजसाख्यपञ्चाग्निवित्प्रभृतिपुण्यकृतां ब्रह्मविन्मार्गगमनदर्शनादयं वा य एषोऽग्निश्चित इत्यादि चित्याग्न्युपासनेष्वपि देवयानश्रवणाद्विद्ययैव तदारोहन्ति यत्र कामाः परागता इत्यन्ते ब्रह्मलोकप्राप्तिश्रवणाच्च सर्वोपासकानां देवयानप्राप्तौ सिद्धायां स एनानिति विशेषेणोक्तान् देवयानेन गतान्सर्वानमानवो ब्रह्म गमयतीति पूर्वपक्षं कृत्वा यावन्नाम्नो गतमित्यादि फलप्राप्तौ ब्रह्मलोकस्य देवयानापेक्षायां प्रमाणाभावाच्च सर्वेषां देवयानप्राप्तिरिति सिद्धेः पञ्चाग्निवित् प्रभृतीनामब्रह्मविदाममपि ब्रह्मलोकप्राप्ततया प्रमासिद्धानां लोकवासमात्रमेव, न तत्रत्यचतुर्मुखप्राप्तिः ब्रह्मविदामेव चतुर्मुखप्राप्तिः एवमुभयथाभावे दोषाभावात्सर्वेषां ब्रह्मप्राप्तौ ब्रह्म–शब्दस्य कार्य्यवचनत्वे परवचनत्वे चोभयथाऽपि ब्रह्मविदामितरतुल्यफलत्वमितरेषां ब्रह्मवित्तुल्यफलत्वं चेति दोषप्रसङ्गात्, ततश्च तत्क्रतुन्यायविरोधात्, अतो देवयानेन ब्रह्मलोकगतेषु अब्रह्मविदो न ब्रह्म गमयति ब्रह्मविदस्तु गमयति अब्रह्मविदोऽपि तत्र लब्धज्ञानाश्चेत् क्रमेण मुच्यन्ते यथा पञ्चाग्निविदः यथा च चित्याग्निचिद इति सिद्धान्तयन्ति अत्र ब्रूमः कार्यं ब्रह्म ब्रह्मलोकः चतुर्मुखः परं ब्रह्मेत्ययुक्तं तस्यापि सृज्यत्वश्रवणेनानपोदितेन कार्य्यब्रह्मन्तर्भावावगमात् न च तत्र ब्रह्मगुणानां ज्ञानानन्दैश्वर्य्यादीनां नित्याविर्त्याविर्भूतित्वात् परमात्मत्वं वेदापहारादिषु ज्ञानशक्त्यैश्वर्य्यादीनां परिमितत्वदर्शनात् योगाधीनभगवत्साक्षात्कारत्व–तदाहितसर्गशक्तित्वदर्शनादुभयभावनान्वयेनानुपास्यत्वावगमाच्च ब्रह्माविश्वः कतमः स्वयम्भूः प्रजापतिः संवत्सर इति संवत्सरोऽसावादित्यो य एष आदित्ये

पुरुषः स परमेष्ठी ब्रह्मात्मेत्यादिश्रुतयस्तु ब्रह्माण्डोदरवर्त्तितत्तद्विभूतिविशेषनिर्वाहकत्वाभिप्रायतया न निरङ्कुशैश्वर्य्ये प्रमाणं हिरण्यगर्भः समवर्त्ततेत्याद्यष्टचं त्वाकाशप्राणादिवाक्यतुल्यन्यायत्वादुपपत्त्यन्तरैश्च परमपुरुषपरमिति समर्थितम् अपरेषां प्रतिक्षेपे दर्शितैर्मानन्यायैर्देवयानमार्गस्य चतुर्मुखलोकप्राप्तिहेतुत्वमयुक्तमिति तच्च सिद्धान्तेऽनुमन्तव्यं ह्रदनदीवृक्षसंस्थानादियोगो न चतुर्मुखलोकत्वे प्रमाणं तलवकारसाम्निसप्तमो ब्रह्मलोक इत्युपक्रम्य उत परस्तात् उतापरस्मात्परस्तृतीयादथवा चतुर्थात्सहस्रस्थूणे विधृते दृढ उग्रे यत्र देवानामधिदेव आस्त इति चतुर्मुखलोकात्परतः परब्रसहस्रस्थूणाविशिष्टस्थानशेषावगमात्, अतः सत्यलोकचतुर्मुखयोर्देवयानप्राप्यत्वपरब्रह्मत्वाभावात् चतुर्मुखलोके गुणाष्टकाविर्भाव आप्रलयान्मुक्तानां तत्रावस्थानं ततः परमाकाशप्राप्तिरित्यनुपपन्नम् । अनन्तरं चाब्रह्मविदोऽपि देवयानेन गच्छन्तीति न युक्तं स एनान् ब्रह्म गमयतीति देवयानगतानामविशेषेण ब्रह्मप्राप्तिश्रवणात् न पञ्चाग्निविदां ब्रह्मप्राप्तिश्रवणं स एनानिति वाक्यसंकोचकं तेषामब्रह्मवित्त्वे प्रमाणान्तराभावात् देवयानगतिश्रवणेनैव तत्रापि ब्रह्मवेदनस्य कल्प्यत्वात् चित्याग्निविदां प्रकरणे देवयानश्रवणं प्रासङ्गिकमहीननयात् परविद्याप्रकरणान्वयि स्यात् तेनैति ब्रह्मवित्पुण्यकृत्तैजसश्चेत्यत्र ब्रह्मविद एव पदान्तरविशेष्यत्वसंभवात् तदपि नाब्रह्मविदां देवयानगतौ प्रमाणं द्वे सृती अशृणवमित्यत्र द्वित्वावधारणमपि नास्मिन्नर्थे प्रमाणम् अथ ये यज्ञेन दानेनेति वाक्यस्य परविद्याव्यतिरिक्तश्रेयःप्रदर्शनार्थत्वसंभवात्, एवं सर्वत्र ब्रह्मवेदनकल्पनप्रकरकरणोत्कर्षसामानाधिकरण्यप्रदर्शनार्थत्वादिभिर्निर्वाहसंभवात् न क्वचिदपि श्रुतिरब्रह्मविदां देवयानगमने प्रमाणम्, अत एव देवयानगतान्सर्वान् वा न वेति चिन्ता निरवकाशा हिरण्यगर्भमेव परं ब्रह्म मन्वानस्य नाब्रह्मविदां परब्रह्मप्राप्तिः तत्र गुणाष्टकाविर्भावात् ब्रह्मसमानभोगः तत्र परब्रह्मप्राप्तानामपुनरावृत्तिरिति सर्वमिदमनुपपन्नम् । अब्रह्मविदां श्वेतमहाभीषकरैवतप्रभृतीनां ब्रह्मसभायामासिकाप्रतिपादनात्, क्षुत्पिपासाकामाद्यभिभवपुनर्जन्मप्रतिपा-

मानाभावाच्च, करणमङ्गीकृत्य कर्तृनिरासः क्रियत इति चेन्न । ज्ञातृमात्रापह्नवे मनसोऽपि ज्ञातृत्वाभावप्रसङ्गात् तदन्यज्ञातृनिरासे कल्प्येन क्लृप्तत्यागायोगात् । अथ कर्तारमङ्गीकृत्य करणत्यागः तदा मनस आत्मत्वं न साधितं स्यात् । किन्तु तस्यासत्त्वं तच्च तद्ग्राहकमाने सति न शक्यमिति । अन्यस्त्वाह प्राणाधीना देहेन्द्रियमनसां प्रवृत्तिः आत्मशब्दश्च प्राणे दृष्टः प्राणशब्दश्चात्मनि प्राणस्थितिगमनाभ्यां च जीवति म्रियत इति व्यवहारः सुषुप्तावुच्छ्वासनिश्वासप्रवृत्तौ सत्यामपि सामग्र्यभावाद्बोधाभावः मम प्राणा इत्येतदपि कथं चिन्नेतव्यमिति । अत्र देहात्मवादे निदर्शितान् दोषानतिदिशति । प्राणा इति । अधिकाशङ्का तु प्राणोऽस्मि प्रज्ञात्मा इति श्रुतिस्वारस्यात् । परिहारदार्ढ्याभिप्रायेण ध्रुवशब्दः, देहादिव्यापारहेतुत्वमनैकान्तिकम् । आत्मप्राणशब्दयोर्व्यतिहारोऽनेकार्थतया स्यात् प्राणस्थित्यादौ जीवत्यादिव्यवहार आत्मान्यत्वेऽप्यविरुद्धः प्राणोऽस्मीति तद्वैशिष्ट्यपरम् । एवमन्यपरवाक्यान्तरैरपि वायुस्वरूपत्वमात्मनो न शङ्क्यम्, साङ्ख्ययोगिमतन्तु बहिष्कार्यमेव । अन्ये तु मन्यन्ते न देहेन्द्रियादिकं भोक्तृ न च नित्यः कश्चिदन्यः सुषुप्त्यादौ तेषां भोक्तृत्वादृष्टेः सति ज्ञाने भोक्तृत्वमिति चेत्तर्हि तस्यैव तदस्तु, किमन्तर्गडुभिरन्यैः । तस्य च भोक्तृत्वमनुकूलप्रतिकूलविषयावगाहित्वं तच्च यदृच्छावैचित्र्यादिति नादृष्टाद्यपेक्षा । न च सुषुप्त्यादौ निर्विषयसन्ततिसद्भावे किंचिन्मानं प्रबोधारम्भसामग्रीवैचित्र्याद् यदृच्छयैव वा जागराद्यज्ञानोपपत्तेरिति । बौद्धास्तु ग्राहकाभिमानारूढोऽनादिधीसन्तान एवात्मा अहं जानामीत्यादिबोधस्त्वालयविज्ञानवशादाश्रयकल्पनया वा स्यात्, अतिरिक्तस्तु बाधितत्वादनादेय इत्याहुः तदेतन्मतद्वयं तत्त्वेण निरस्यति । ज्ञानमिति । संविदधीना हि सर्व-

वस्तुव्यवस्था ज्ञानं च ज्ञातृधर्मतयैव वेद्यते, न च ज्ञानस्य भोक्तृत्वम् - अनुकूलप्रतिकूलविषयावगाहेऽपि तस्य भोगात्मकत्वं सिद्ध्येत् मम भोग इति मन्यमानस्तु ज्ञातेव भोक्ता आनुकूल्यादिकं हि तदपेक्षयैव उपलम्भविरुद्धकल्पनायोगात् आलयविज्ञानक्लृप्तिश्च निष्प्रमाणिका उपलब्धस्य च बोद्धुः कुतो बाधः, धर्मधर्मिभावायोगादिति चेन्न । आदावेव तत्साधनात् प्रत्यभिज्ञातुरेकस्यासम्भवादित्यप्ययुक्तम् । क्षणभङ्गादेरपि निरस्तत्वात् । ज्ञानेतरमिथ्यात्वं च निरसिष्यते अनुपलम्भस्तु बाधकः स्वस्य चेदसिद्धः परस्य त्वबाधकः अन्यथा धीसन्ततिभेदादेरप्यसिद्धिप्रसङ्गात् बुद्धेस्त्वात्मत्वानुमानमिन्द्रियादेरिवायुक्तम् । ननु वर्तमानक्षणमात्रविशिष्टतयात्मोपलभ्यते पूर्वापरकालतदुपाध्यादीनामप्रत्यक्षतया तद्विशिष्टवस्तुप्रत्यक्षत्वायोगात्, अन्यथा परभागस्थितवह्निनाऽपि पर्वतस्य विशिष्टोपलम्भप्रसङ्गे ऽनुमानादिप्रमाणभङ्गः स्यादिति । तदप्यसत् । प्रत्यभिज्ञायाः प्राक्कालविशिष्टग्रहणस्य दर्शितत्वात् । नित्यत्वादीनामपि तत्तत्प्रमाणैरुपस्थापनात् । न च नित्योऽहमित्युपलम्भे सर्वकालोपाधिप्रत्यक्षत्वप्रसङ्गः प्रमाणसिद्धिमात्रेण तथा व्यवहारात् दृष्टं चैतदन्यत्रापीति ॥

इत्यात्मन इन्द्रियाद्यतिरेकः ।

मा भूदस्थिरज्ञानानां प्रतिसन्धानाद्यनर्हत्वादात्मत्वं यस्य आत्मत्वं तद्धर्मभूता धीर्नित्या सा प्रसरणभेदैस्तत्तदर्थान्प्रकाशयतीति पक्षः तस्य किं तदाश्रयभूतेन नित्यात्मनेति चोद्यमनूद्य प्रत्याह । धीरिति ॥

मू० धीर्नित्या यस्य पक्षे प्रसरति बहुधाऽर्थेषु सैवेन्द्रियाद्यैस्तेनात्मा ऽजागलस्थस्तन इव किमि-

ह स्वीक्रियेतेति चेन्न ॥ कल्प्यं चेदात्मतत्त्वं कथयितुमुचितं लाघवं तत्र युक्त्या नित्या सा यस्य तद्वानपि निगममितौ गौरवं नास्य भारः ॥ ४ ॥

धीतद्वन्तौ तावत्पृथग् दृष्टौ तत्र न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते तथा हेयगुणध्वंसात् इत्यादिभिर्द्वयोरपि नित्यत्वं यस्य सिद्धं तस्य कल्पनागौरवरूपो भारो नास्तीत्यर्थः ॥ ४ ॥

इति नित्यबुद्ध्यतिरिक्तात्मसिद्धिः ॥

ननु द्रष्टा श्रोता इत्यारभ्य विज्ञानात्मा पुरुषः इत्यादिषु जीवस्य ज्ञानस्वरूपत्वं श्रूयते अतस्तस्य ज्ञानादतिरेको दुस्साध इत्यत्राह । ज्ञानत्वमिति ॥

मू० ज्ञानत्वं वक्ति पुंसः श्रुतिरिह न पुनर्बुद्धिमात्रस्य पुंस्त्वं प्रत्यक्षादेः प्रकोपादनुगतकथने ज्ञानमर्थप्रकाशः ॥ स्वस्यैवात्मा तु सिद्धिं मतिरनुभवति स्वान्ययोस्सिद्धिभावं ज्ञातुर्जाड्यप्रसङ्गव्युदसनविषया ज्ञानमात्रोक्तयोऽपि ॥ ५ ॥

न ह्यत्र स्वधर्मतादात्म्यं विधीयते अशक्यत्वात् किन्तु धर्मवद्धर्मिणोऽपि विज्ञानात्मत्वं नाम धर्मान्तरमुपदिश्यते । ज्ञानानुवादेनात्मत्वस्य विधिः स्यादित्यत्राह । न पुनरिति । अन्यथा बाधकमाह । प्रत्यक्षादेरिति । आदिशब्देनानुमानशास्त्रयोस्सङ्ग्रहः ज्ञानत्वविधानेऽपि तद्विरोधस्स्यादित्यत्राह । अनुगतेति । कस्य-

चिदर्थस्य प्रकाशरूपत्वमुभयत्रानुवृत्तं ज्ञानशब्दनिमित्तं तद्विधौ न विरोध इत्यर्थः । अर्थप्रकाश इत्युक्तं विषयतो विभजते । स्यस्येति । स्वासाधारणेन केनचित्स्वभावेन विशिष्ट इह स्वशब्दार्थः, धर्मभूतज्ञाने तु तावदतिरिक्तग्राहित्वं विशेषमाह । मतिरिति । विज्ञानघन एवेत्यादिभिर्ज्ञानमात्रत्वोक्त्या ज्ञातृत्वनिषेधात्कथमुभयत्रानुवृत्तधर्मक्लृप्तिरित्यत्राह । ज्ञातुरिति । नात्रावधारणमन्ययोगव्यवच्छेदार्थं किन्तु विज्ञानघन इत्यादिपूर्ववाक्यपरामर्शादंशतोऽपि ज्ञानत्वायोगव्यवच्छेदपरमिति भावः ॥ ५ ॥

इत्यात्मनो ज्ञानमात्रत्वोक्तिनिर्वाहः ॥

सिद्धयतु देहादिभ्योऽन्य आत्मा स कथमनन्यसाधनः, स्वानुभवबलादिति चेन्न । धर्मतोऽपि तदुपपत्तेः आत्मत्वादित्यनुमानादिति चेन्न । युष्माभिः केवलव्यतिरेक्यनभ्युपगमात् ज्ञानस्य च सपक्षस्याभ्युपगमात्, स्वयंज्योतिष्ट्वश्रुतेरिति चेन्न । ज्योतिश्शब्दस्यात्र भाक्तत्वात् चक्षुस्सहकारिणि तेजोविशेषे हि तन्मुख्यता स्वेन रूपेणाभिनिष्पद्यते इति त्वौपाधिकरूपनिवृत्तिपरम्, इष्टं च भवतामपि स्वधर्मेणात्मनो भानम् । तावतैवान्यत्रादृष्टेन स्वयम्प्रकाशत्ववादोऽस्त्विति एतत्प्रत्याह । आत्मेति ॥

मू० आत्मा स्वेनैव सिद्ध्यत्यहमिति निगमैर्यत्स्वयंज्योतिरुक्तः स्वापेऽप्यस्य स्वसिद्धावशयिषि सुखमित्यत्रजा प्रत्यभिज्ञा ॥ चेतश्चान्यानपेक्षं मतिषु न हि भवेत्किं च वेदान्तदृष्ट्या ज्ञानत्वादेष धीवत् स्वविषयधिषणानिर्व्यपेक्षस्वसिद्धिः ॥ ६ ॥

एवकारोऽत्र परप्रकाश्यत्वनियमनिवृत्तिपरः । यद्यहन्त्वादिरहितः स्वयं प्रकाशते तदा परमतं स्यादित्यत्राह । अहमिति । अहमर्थं आत्मेति वेत्स्यति अतस्तत्प्रकाशे कथं परेष्टावकाश इति भावः । प्रतिज्ञाते मानमाह । निगमैरिति । बहुवचनेन ज्ञानत्ववादिनोऽपि निगमास्तत्परा इति व्यज्यन्ते । यद्यपि हृद्यन्तर्ज्योतिः पुरुष इत्यत्रापि ज्योतिश्शब्दो भाक्तः तथाऽपि स्वप्रकाशे प्रदीपादिवल्लोकदृष्ट्याऽन्यनिरपेक्षत्वं स्वरसावगतं न बाध्यम् । स्वधर्मेणान्यप्रकाशकत्वमुपचारनिमित्तं स्यादिति चेन्न । बाह्यज्योतिषि स्वधर्मनिरपेक्षप्रकाशस्यापि स्वतः प्रतीतेः, स्वधर्मेण भासमानत्वमेव ज्योतिश्शब्दोपचारनिमित्तमिति चेन्न । बाह्ये तदभावात् स्वधर्मतः प्रकाशकत्वं च योऽयं विज्ञानमयः प्राणेषु इति पदान्तरसिद्धतया पुनरुक्तं स्यात्, उपचारनिमित्तव्यञ्जनमात्रं पदान्तरकृत्यमिति तु मन्दम् । स्वयं प्रकाशत्वे सुषुप्त्यादावपि प्रकाशेतेत्यत्राह । स्वापेऽपीति । अयम्भावः प्रत्यभिज्ञाबलात्सुषुप्तावप्यहमर्थोऽऽस्तीति सिद्धं श्रुतिस्वारस्याच्च प्रकाशमानत्वमपि ग्राह्यं तथा च सुखमहमस्वाप्समिति प्रबुद्धपरामर्शस्वारस्यं च न बाध्यमिति । ननु यदि सुषुप्तावात्मा प्रकाशते तन्मनसैवास्तु कृतं स्वप्रकाशत्वेनेत्यत्राह । चेत इति । अयम्भावः । बाह्यविषयेषु तावच्चक्षुरादीन्यनुमानागमसंस्कारान् वा संगृह्य प्रवर्तन्ते, आत्मनि च तत्तदुपहितं जनितं वा किंचिदुपधायैव, स्वापे तु दृष्टविरुद्धमनोवृत्तिकल्पनाद्वरं श्रुतिस्वारस्यानुरोध इति, अनुमानरुचीनां तदप्यस्तीत्याह । किं चेति । वेदान्तदृष्ट्येति ज्ञानत्वहेतोरसिद्धिपरिहारः । ज्ञानस्य स्वप्रकाशत्वं साधयिष्यत इति तद्दृष्टान्तोक्तिः ॥ ६ ॥

इत्यात्मनः स्वयंप्रकाशत्वम् ॥

कश्चिद्धीरः प्रत्यगात्मानमैक्षत् इत्यादावात्मनः प्रत्यक्त्वं गम्यते तत्किमिति विमर्शे प्रत्येतुः प्रत्येतव्याद्व्यतिरेक इति केश्चिदुक्तं तावदाह । प्रत्यक्त्वमिति ।

मू० प्रत्यक्त्वं पुंसि केचित् स्वविषयधिषणाऽऽधारतामात्रमाहुः स्वस्मै स्वेनैव भानं तदिति समुचितं तत्स्वतस्सिद्धिसिद्धेः ॥ प्रत्यङ् स्वापेक्षया ऽसौ त्वमयमिति मितः स्वेतरैः स्वस्य बुद्ध्या भातं नित्यं परस्मै जडमजडमपि स्यात्परागर्थ एव ॥ ७ ॥

स्वप्रकाशपक्षे तु प्रत्यक्त्वद्वैविध्यमाह । स्वस्मा इति । यदि प्रत्यक्त्वमात्मनः स्वभावः तदा परेणापि गृह्यमाणोऽहमिति गृह्येतेत्यत्राह । प्रत्यङिति । स्वेतरबुद्ध्या गृह्यमाणत्वं न स्वस्मै भासमानत्वम् अतस्तद्बुध्या गृह्यमाण आभिमुख्ये त्वमिति अन्यदाऽयमिति च गृह्येत । स्वापेक्षया तु स्वबुद्ध्या स्वरूपेण वा भासमानतया प्रत्यङ्ङित्युच्यते तेन रूपेणाहमर्थ इति दृशा अहन्त्वं च सर्वात्मानुवृत्तं त्वंभावादिना तु न तस्य बाधः । तर्हि तत्र पराक्शब्दोऽपि किं न प्रवर्तत इत्यत्राह । भातमिति । जडमजडं वा यन्नित्यं परस्मै भासते तत्परागर्थ एव । न तस्य स्वस्मै भासमानत्वप्रसङ्गः व्यपदेशनियमश्च तत एवेति ॥ ७ ॥

इति प्रत्यक्त्वादिप्रकारः । अत्र केचिदाहुः ज्ञातृत्वादिकमन्तःकरणस्यैव आत्मनस्तु साक्षितामात्रम् । यद्वा प्रकृतेः कर्तृत्वम् आत्मनो भोक्तृत्वमात्रं गीतं चैतत् कार्यकारण इत्यादिनेति तान्प्रत्याह । बोद्धेति ॥

मू० बोद्धा कर्ता च भोक्ता दृढमवगमितः प्रत्यगर्थः प्रमाणैः कर्तृत्वाभाववादे स्वयमिह भगवानान्यपर्यं त्वगायत् ॥ कर्ता शास्त्रार्थवत्त्वात्कृतिषु च स पराधीन आभाषि सूत्रैश्चित्रैः कर्मप्रवाहैर्यतनविषमता सर्वतन्त्राविगीता ॥ ८ ॥

त्रिभिरपि प्रमाणैर्ज्ञातृत्वादिप्रकारत्रयवानात्मा निस्संशयं बोधितः अतो न तत्रैकमपि निन्होतुं शक्यं किं पुनस्त्रितयं कुतर्कैस्तु किन्नाम दुरपलपमिति भावः । शास्त्रैरात्मनः कर्तृत्वनिषेधे का गतिरित्यत्राह । कर्तृत्वेति । स्वयमिति कर्तृत्वनिषेधक एव स्ववाक्यतात्पर्यमाहेति भावः । भगवानित्याप्ततमत्वव्यञ्जनम् अगायत् पञ्चैतानीत्यारभ्य न स पश्यति दुर्मतिरित्यन्तेनेति शेषः । शारीरके च कर्तृत्वं प्रसाध्य तस्य पराधीनतामात्रं संस्थापितमित्यत्राह । कर्तेति । यदि कर्तृत्वमात्मधर्मः स चेत्पराधीनः तस्य तर्ह्यात्मत्ववदेकरूपः किन्न स्यादित्यत्राह । चित्रैरिति । नात्र केनापि चोदनीयमिति । भावः ॥ ८ ॥

इत्यात्मनः कर्तृत्वादि ॥

अथ यदभावि न तद्भावि यद्भावि न तदन्यथा इति मन्यमानैरुक्तं यत्ननैष्फल्यं तदिदमनूद्य परिहरति । यद्भव्यमिति ।

मू० यद्भव्यं तन्न न स्याद्यदभवितृ न तद्यत्नकोट्यापि सिद्ध्येद् द्वेधापि व्यर्थयत्नो नर इति यदि नहस्त्वोक्तियत्नादिबाधात् ॥ यद्यत्नेनैव भव्यं भवति यतनतस्तत्स्वहेतूपनीताद्दुस्साधा यत्नलभ्ये प्रति यदि यतते तत्र नैष्फल्यमिष्टम् ॥ ९ ॥

कश्चिद्धीरः प्रत्यगात्मानमैक्षत् इत्यादावात्मनः प्रत्यक्त्वं गम्यते तत्किमिति विमर्शे प्रत्येतुः प्रत्येतव्यादव्यतिरेक इति कैश्चिदुक्तं तावदाह । प्रत्यक्त्वमिति ।

मू० प्रत्यक्त्वं पुंसि केचित् स्वविषयधिषणाऽऽधारतामात्रमाहुः स्वस्मै स्वेनैव भानं तदिति समुचितं तत्स्वतस्सिद्धिसिद्धेः ॥ प्रत्यङ् स्वापेक्षया ऽसौ त्वमयमिति मितः स्वेतरैः स्वस्य बुद्ध्या भातं नित्यं परस्मै जडमजडमपि स्यात्परागर्थ एव ॥ ७ ॥

स्वप्रकाशपक्षे तु प्रत्यक्त्वद्वैविध्यमाह । स्वस्मा इति । यदि प्रत्यक्त्वमात्मनः स्वभावः तदा परेणापि गृह्यमाणोऽहमिति गृह्येतेत्यत्राह । प्रत्यङिति । स्वेतरबुद्ध्या गृह्यमाणत्वं न स्वस्मै भासमानत्वम् अतस्तद्बुद्ध्या गृह्यमाण आभिमुख्ये त्वमिति अन्यदाऽयमिति च गृह्येत । स्वापेक्षया तु स्वबुद्ध्या स्वरूपेण वा भासमानतया प्रत्यङ्ङित्युच्यते तेन रूपेणाहमर्थ इति दृशा अहन्त्वं च सर्वात्मानुवृत्तं त्वंभावादिना तु न तस्य बाधः । तर्हि तत्र पराक्शब्दोऽपि किं न प्रवर्तत इत्यत्राह । भातमिति । जडमजडं वा यन्नित्यं परस्मै भासते तत्परागर्थं एव । न तस्य स्वस्मै भासमानत्वप्रसङ्गः व्यपदेशनियमश्च तत एवेति ॥ ७ ॥

इति प्रत्यक्त्वादिप्रकारः । अत्र केचिदाहुः ज्ञातृत्वादिकमन्तःकरणस्यैव आत्मनस्तु साक्षितामात्रम् । यद्वा प्रकृतेः कर्तृत्वम् आत्मनो भोक्तृत्वमात्रं गीतं चैतत् कार्यकारण इत्यादिनेति तान्प्रत्याह । बोद्धेति ॥

मू० बोद्धा कर्ता च भोक्ता दृढमवगमितः प्रत्यगर्थः प्रमाणैः कर्तृत्वाभाववादे स्वयमिह भगवानान्यपर्यं त्वगायत् ॥ कर्ता शास्त्रार्थवत्त्वात्कृतिषु च स पराधीन आभाषि सूत्रैश्चित्रैः कर्मप्रवाहैर्यतनविषमता सर्वतन्त्राविगीता ॥ ८ ॥

त्रिभिरपि प्रमाणैर्ज्ञातृत्वादिप्रकारत्रयवानात्मा निस्संशयं बोधितः अतो न तत्रैकमपि निन्होतुं शक्यं किं पुनस्त्रितयं कुतर्कैस्तु किन्नाम दुरपलपमिति भावः । शास्त्रैरात्मनः कर्तृत्वनिषेधे का गतिरित्यत्राह । कर्तृत्वेति । स्वयमिति कर्तृत्वनिषेधक एव स्ववाक्यतात्पर्यमाहेति भावः । भगवानित्याप्ततमत्वव्यञ्जनम् अगायत् पञ्चैतानीत्यारभ्य न स पश्यति दुर्मतिरित्यन्तेनेति शेषः । शारीरके च कर्तृत्वं प्रसाध्य तस्य पराधीनतामात्रं संस्थापितमित्यत्राह । कर्तेति । यदि कर्तृत्वमात्मधर्मः स चेत्पराधीनः तस्य तर्ह्यात्मत्ववदेकरूपः किन्न स्यादित्यत्राह । चित्रैरिति । नात्र केनापि चोदनीयमिति । भावः ॥ ८ ॥

इत्यात्मनः कर्तृत्वादि ॥

अथ यदभावि न तद्भावि यद्भावि न तदन्यथा इति मन्यमानैरुक्तं यत्ननैष्फल्यं तदिदमनूद्य परिहरति । यद्भव्यमिति ।

मू० यद्भव्यं तन्न न स्याद्यदभवितृ न तद्यत्नकोट्यापि सिद्ध्येद् द्वेधापि व्यर्थयत्नो नर इति यदि नस्स्वोक्तियत्नादिबाधात् ॥ यद्यत्नेनैव भव्यं भवति यतनतस्तत्स्वहेतूपनीताद्दुस्साधा यत्नलभ्ये प्रति यदि यतते तत्र नैष्फल्यमिष्टम् ॥ ९ ॥

नर इति बहुवचनम् । हेतुमाह । स्वोक्तीति । सर्वयत्ननैष्फल्यं वदन्किमिति साफल्यवादिनं चेप्तुमीहते, नैष्फल्यवाक्यं च किमर्थं प्रयुङ्क्ते किमर्थं च स्वयं भीतो बुभुक्षुर्वा धावति अतोऽन्वयव्यतिरेकाद्यवसितं यत्नफलमप्रणोद्यम् । आदिशब्देन प्रमाणचयसङ्ग्रहः । बाधं सिद्धसाध्यतां च वक्तुं सफलनिष्फलयत्नौ विभजते । यद्यत्नेनेति । यतनमयत्नतस्सिद्धमिति शङ्कां परिहर्तुं स्वहेतूपनीतादित्युक्तं, प्राचीनयत्नजनितादृष्टतो हि तत्सिद्धिरिति भावः । दुस्साधेत्यादिना दुष्कर्षमूलनिष्फलयत्नानुवादः । तत्र नैष्फल्यमिष्टं तस्मिन्नंशे नैष्फल्यं त्वया न साध्यं साध्यमपि तद्विषयमिति भावः ॥ ६ ॥ इति यत्नसाफल्यम् ।

जीवः परस्य ब्रह्मणः औपाधिकांशः घटाकाशमहाकाशवत्तयोर्भेदः जीवानां मिथोभेदस्तु घटकरकाद्याकाशवदिति पक्षं दूषयति । भिन्ना इति ॥

मू० भिन्ना जीवाः स्वतस्स्युः प्रतिनियततया धी-
स्मृतीच्छासुखादेः चेतोभेदाद्व्यवस्था न तु
भवति यथा देहबाह्यान्तभेदात् ॥ नित्यान्
भिन्नांश्च जीवान्कथयति निगमस्तद्धि नो-
पाधितस्स्यात् आत्माद्वैतश्रुतीनामितरहृद-
यता तत्र तत्रैव सिद्धा ॥ १० ॥

स्वतः न तूपाधितः हेतुमाह । प्रतिनियततयेति । ननु कोऽयं प्रतिनियमः न तावद्बुद्ध्यादीनां स्वरूपभेदः एकस्मिन्नप्यात्मनि तदुपगमात्, नापि भिन्नाधारत्वं तस्यैव साध्यत्वात्, अत एव नासाधारण्यं तत्खल्वाश्रयभेदसापेक्षं, नापि परस्परप्रतिसन्धाना-

भावः परस्परभावस्यैवासिद्धेरिति । अत्र ब्रूमः यथैकशरीरावच्छिन्न-बुद्ध्यादीनामेकाश्रयतयैव प्रतिसन्धानं न तथा शरीरान्तरजानाम् अन्यथा गुरुशिष्यभावादयोऽपि न स्युः, तदेवं गम्यते चैत्रात्मा मैत्रतादात्म्यरहितः तदनुभवजन्मस्मृत्यनाधारत्वात् कदाचिदपि तद्गतसुखादिप्रतिसन्धानरहितत्वादित्यादि अत्र परोक्तामन्यथा-सिद्धिं परिहरति । चेतो भेदादिति । तुरवधारणे अस्ति हि कल्पभेदे—चेतोभेदः सन्ति च कल्पादौ जातिस्मराः स्वयमागतविज्ञानाः इत्यादेः तत्र प्रतिबन्द्यभिप्रायेणाह । यथेति । न हि देहभेदेन प्रतिसन्धानाभावः पूर्वजन्माभ्यस्तप्रतिसन्धानदृष्टेः न च बाह्येन्द्रियभेदे सर्वधीविरोधात् तद्वच्चेतोभेदोऽपि न व्यव-स्थाहेतुरिति ईश्वरात् मिथश्च जीवानां निरुपाधिकभेदः पृथगा-त्मानं प्रेरितारं च मत्वा जुष्टं यदा पश्यत्यन्यमीशं नित्यो नित्या-नाम् इत्यादिश्रुतिस्वारस्यसिद्ध इत्याह । नित्यानिति । मुक्तावपि भेदश्रुतिमभिप्रेत्याह । तद्धीति । ननु अयमात्मा ब्रह्म तत्त्वमसि इत्यादिभिर्जीवब्रह्मतादात्म्ये सिद्धे भेदस्यौपाधिकत्वं ग्राह्यमित्य-त्राह । आत्माद्वैतेति । अयं भावः शरीरशरीरिभावेन सामानाधि-करण्यं स्थापयिष्यते आस्तामेतत् यथा यूपादित्यसामानाधिकरण्यं प्रत्यक्षविरोधादन्यपरं तथेहापि स्वरूपैक्यविधानं तावदशक्यमिति तत्रतत्रेति क्वचिद्वीप्सायाः क्वचिद्विशिष्टवृत्तेः क्वचित्तूपचार इत्यादि-तात्पर्यभेदस्सूच्यते ॥ १० ॥ इत्यौपाधिकभेदवादभङ्गः ॥

अथ स्वाभाविकजीवांशभेदाभेदं दूषयति । जीवा इति ॥

मू० जीवाः पृथ्व्यादि भूतेष्वणव इव मिथो भेद-वन्तः स्वतोऽमी सन्मात्रब्रह्मभागास्तदिह नि-

यतयस्तु स्थिता इत्ययुक्तम् ॥ ऐक्यस्याप्यव्यक्तत्वादनवधि च सति ब्रह्मणि स्यादवद्यम् सत्यं तच्चेत्यभिज्ञैर्बहिरगणि मृषावादतोऽप्येष पक्षः ॥ ११ ॥

उक्तं विरोधमेव बाधहेतुमाह । ऐक्यस्यापीति । पक्षद्वयसाधारणं दूषणान्तरमाह । अनवधीति । सति ब्रह्मणि सर्वात्मकसद्रूपे ब्रह्मणीत्यर्थः । अस्मिन्पक्षे निरवद्यत्वादिश्रुतिर्निर्विषया स्यात् ईश्वरस्यापि सर्वतादात्म्यप्रतिसन्धायिनः क्लेशादिनिषेधायोगादिति भावः । एतत्पक्षद्वयादविद्याकृतदुःखादिभेदवादो वरमित्यभिप्रायेण सत्यं तच्चेत्याद्युक्तम् ॥ ११ ॥ इति ब्रह्मस्वरूपस्वाभाविकांशजीवभेदभङ्गः ॥

अन्ये त्वाहुः अविद्याशबलं ब्रह्मैव जीवः स च सर्वशरीरेष्वेकः अप्रतिसन्धानम् अविद्यावैचित्र्यात् प्रतिबुद्धास्तु सोऽहं स च त्वमिति प्रतिसन्दधते प्रमाणं चात्र श्रुतिस्मृतय इति एतदपि पूर्वोक्तनीत्या दत्तोत्तरम् । अविद्यास्वरूपादिकं दूषयिष्यते । अत्र चैको व्रीहिरित्यादिवज्जीवैक्यवादास्साजात्यात्स्युः पण्डितास्समदर्शिन इत्यादिभिस्तथात्वावगमात् मित्रामित्रकथा कुतः इत्यादिकं रागादिपरिहारपरं यद्यन्योऽस्ति इत्यादिकं स्वरूपेऽन्यादृक्त्वनिषेधार्थम् । एको देवस्सर्वभूतेषु गूढ इतीश्वरविषयम् आकाशमेकं हि यथा एक एव हि भूतात्मा इत्यादिनिदर्शनमपि तत्तत्संसर्गशङ्कितवृद्धिह्रासादिनिषेधार्थं घटध्वंसे घटाकाशो न भिन्नो नभसा यथा इत्यादिकमौपाधिकवैषम्यनिवृत्ता वत्यन्तसाम्यं व्यनक्ति, न हि घटध्वंसे घटावच्छिन्नः आकाशांशोऽशान्तरेणैकीभवति, आकाशतामात्रं तु घटस्थि-

तावपि सिद्धमित्येषा दिक् तदिह प्रतिसन्धानादिप्रसङ्गे शास्त्रतात्पर्ये च वक्तव्यशेषाभावात्तदुक्तमनुमानादिकमनूद्य दूषयति । देहत्वाद्यै-रिति ।

मू० देहत्वाद्यैर्विगीतं निखिलमपि मया ह्यात्मवत्किंच पुंस्त्वात्सर्वे जीवा अहं स्युर्न यदि भवति ते गौरवादीत्यसारम् ॥ श्रुत्यध्यक्षादिबाधात्प्रसजति च तदा तत्तदैक्यं घटादेः पक्षादेर्वादिनोश्चेत्यलमिह कलहैस्तज्जिगीषादिमूलैः ॥ १२ ॥

निखिलं सर्वज्ञदेहप्रभृति पिपीलिकादिदेहपर्यन्तं । सर्वे जीवाः ब्रह्मादिस्थावरान्ताः न यदि इत्यादिना विपक्षे बाधकोक्तिः असारत्वे हेतुमाह । श्रुतीति । सर्वैर्हि प्रमाणैर्जीवानाम्मिथस्तादात्म्यप्रसङ्गः प्रतिक्षिप्तः । उक्तानुमानवर्गस्याभाससमानत्वमाह । प्रसजतीति । देशान्तराणि एतद्घटेन घटवन्ति देशत्वात् एतद्देशवत् अन्येऽपि घटा एतद्घटात्मानः घटत्वात् एतद्घटवत् इत्यादौ किं वाच्यम् । अध्यक्षादिविरोध इति चेत् समम् । अविद्ययाऽऽत्मनि भेदधीः, ऐक्यन्तु स्वभावः स्यादिति चेत् घटादावपि तथाऽस्तु । न चायमिष्टप्रसङ्गः विवर्तद्वयस्य तादात्म्यानभ्युपगमात् अन्यथा व्यावहारिकव्यवस्थाविलोपात् प्रयुक्तानुमानावयवेष्वपि वाक्यत्वादिना तादात्म्यसम्भवेऽन्यतमपरिशेषः स्यादित्यभिप्रायेण पक्षादेरित्युक्तम् । वादिनोरिति अनेष्टप्रसङ्गत्वसम्भवेऽपि विवादोच्छेदादौ तात्पर्यान्न वैयर्थ्यं तद्विवृणोति इत्यलमिति ॥ १२ ॥

इति सर्वशरीरैकजीववादभङ्गः ॥

अथैकशरीरैकजीववादमनुभाषते । साविद्यमिति ॥

मू० साविद्यं ब्रह्म जीवस्स च न बहुतनुर्नेतरे सन्ति जीवाः स्वप्नादेकस्य लोके बहुविधपुरुषाध्यासवद्विश्वक्लृप्तिः ॥ नेतः प्राक्कोऽपि युक्तो न परमपि स तु प्राप्स्यति श्रेय एको मायोत्थौ बन्धमोक्षाविति च मतमसत्सर्वमानोपरोधात् ॥ १३ ॥

साविद्यं ब्रह्म जीव इति पूर्वस्यास्य च साधारणं, स चेत्यादिविशेषोक्तिः वक्ष्यमाणपक्षाद्वैषम्यं व्यनक्ति । नेतर इति । विचित्रजीवोपलम्भं निर्वहति । स्वप्नादिति । एकमेव शरीरं जीववत् स्वप्नदृष्टशरीरन्यायादन्यानि निर्जीवानीत्यर्थः । शुको मुक्त इत्यादिवैषम्यं परिहरति । नेतः प्रागिति । पूर्वं मुक्ता न सन्ति चेत्पश्चादप्यद्वैतविदो न मुच्येरन्नित्यचेष्टप्रसङ्गतामाह । न परमपीति । तर्हि मोक्षशास्त्रं व्यर्थं स्यादित्यत्राह । स इति । नित्यमुक्तस्यैकशरीरे बन्धमोक्षभ्रमं साधयति । मायोत्थाविति । उक्तं प्रागुक्तहेतुना दूषयति इति चेति । आत्मभेदो हि सर्वप्रमाणैस्सिद्धः तत्र यदि देहान्तरं निर्जीवम् एकमपि तथैव भ्रान्तिसिद्धजीवत्वस्याविशेषात्, एकत्रात्मास्ति जीवत्वं तु नास्ति अत्र तूभयं नेति चेन्न । तेष्वप्यध्यासाधिष्ठानतया आत्मसत्त्वस्य त्वया दुस्त्यजत्वात् अन्यथा, निरधिष्ठानभ्रमप्रसङ्गात् स्वप्ननीत्या लाघवमिच्छतस्तदेव लभ्यं स्वप्नस्य तद्द्रष्टुश्च सत्यत्वात् । इह तु तन्मिथ्यात्वस्य त्वयैवोक्तेरिति ॥ १३ ॥

एकस्य जीवस्योपदेष्टृत्वासम्भवादनिर्मोक्षप्रसङ्गमाह । स्वस्येति ॥

मू० स्वस्य स्वेनोपदेशो न भवति न परब्रह्मणा निष्कलत्वान्नाविद्या चेतयित्री स्वतनुसमधिकं वर्ष्म निर्जीवमात्थ ॥ कश्चित्तत्त्वं ब्रवीतीत्ययमुपनिपतद्भ्रान्तिरुन्मुच्यते चेत् तादृग् भ्रान्तिः पुरापि ह्यभवदिति न ते किं तदैवैष मुक्तः ॥ १४ ॥

अत्र स्वात्मैव वा स्वस्योपदेष्टा । अशरीरं वा परं ब्रह्म । विश्वाध्यासहेतुरविद्यैव वा । देहान्तरप्रतीतो जीवो वा । इति विकल्पमनुस्मृत्य पूर्वार्धेन क्रमाद् दूषणम् । ननु अनादिमायया सुप्तो यदा जीवः प्रबुध्यते इति वचनादुपदेशनिरपेक्ष एव कदाचिद्बोधोऽस्तु । मैवं नैरपेक्ष्यानुक्तेः, जीव इत्येकत्वोक्त्या जीवान्तरासम्भवान्नैरपेक्ष्यं सिद्धमिति चेन्न । एकवचनस्य जात्यैक्यपरत्वात् नैरपेक्ष्येऽपि निस्तारं शङ्कते । कश्चिदिति । शुकादिषु मुक्तिहेतुतया पूर्वमपि तादृशभ्रमजननात्तदानीमेवास्य मोक्षः स्यादित्याह । तादृगिति । परस्मै ब्रवीतीति तदा भ्रान्तिरिति चेत् तथाऽपि अद्वैतं ब्रवीतीत्यवगतेरर्थतः स्वार्थोपदेशभ्रमफलसिद्धेः तदेवं हेत्वनुपपत्त्या नित्यमनिर्मोक्षः, अहेतुकमोक्षे नित्यमुक्तौ च शास्त्रनैष्फल्यमिति तदभ्युपगमे सिद्धान्तत्यागात्कृतं वादेनेति ॥ १४ ॥

इत्येकशरीरैकजीववादभङ्गः ॥

अथ बहुजीवकॢप्तिपक्षं शङ्कते । तोयेति ॥

मू० तोयाधारेषु दोषाकर इव बहुधोपाधिषु ब्रह्मशुद्धं छायापन्नं विशेषान्भजति तनुभृतस्तत्प्रतिच्छन्दभूताः ॥ इत्यप्यत्यन्तदुःस्थं

प्रसजति च तदा जीवनाशोऽपवर्गश्छाया-छायावदैक्यं न भजति न च तद्दर्शनं ब्रह्म-यास्ते ॥ १५ ॥

नित्यशुद्धस्य ब्रह्मणो न भ्रान्तिः यथा नित्यशुद्धेऽपि चन्द्रमसि तत्प्रतिबिम्बेष्वाधारभेदानुगुणा विशेषाः काल्पनिकाः एवमविद्याविवर्तेषु पृथगभिव्यक्तं ब्रह्म तत्तदनुगुणविचित्रविशेषवदिव भाति ईदृशभेदक्लृप्त्या मुक्तादिसमस्तव्यवस्थोपपत्तिः इमं पक्षं दूषयति । इत्यपीति । अयं भावः यदि ते बद्धमुक्तबद्धमोचकादिव्यवस्था भ्रान्तिसिद्धा सा तर्ह्येकजीववादेऽप्यविशिष्टेति किं बहुजीवबह्वविद्याकल्पनेन । ब्रह्मणो जीवभावानुपपत्त्या पृथग्जीवाः कल्प्या इति चेन्न । मिथ्याभूतजीवत्वस्य विरोधाभावात् अन्यथाऽध्यासाधिष्ठानत्वस्य विरोधप्रसङ्गात् । न च निरधिष्ठानं भ्रममिच्छसि दुर्घटत्वमविद्याया भूषणमिति च पश्यन् ब्रह्माज्ञानं किं नानुमन्यस इति । अस्मिन्पक्षे दूषणान्तरमाह । प्रसजतीति । यथा प्रतिबिम्बाधारनिवृत्तौ तत्रोत्पन्नस्यानिर्वचनीयस्य प्रतिबिम्बस्य नाशः तथा तत्तदविद्यानिवृत्तौ तेते जीवा नश्येयुः, मुक्तौ जीवानां ब्रह्मणैकीभावमात्रं न तु नाश इत्यत्राह । छायेति । छायावत्कल्पिता जीवा इति मन्यसे तत्र हि बाधदशायामाधारनिवृत्तिदशायां वा छायायां छायावता सहैक्यापत्तिर्न दृश्यते तद्वदिहापि । तैमिरिकचन्द्रभेदन्यायेनाप्यत्र न भवति तत्रापि बाधदशायां द्वितीयादिचन्द्राणां प्रथमचन्द्रैक्यापत्तेरनभ्युपगमात् दूषणान्तरमाह । न चेति । बिम्बप्रतिबिम्बयोर्द्वितीयादिचन्द्राणां चन्द्रद्रष्टा कश्चिदन्यसिद्धः इह तु न कश्चित् ब्रह्मणो द्रष्टृत्वरूपवत्त्वाङ्गीकारात् अविद्यायास्तु द्रष्टृत्वप्रसङ्गाभावात् प्रतिबिम्बस्थानीयानां जीवानां स्वाध्यासहेतुत्वायोगात् अनादिर-

ध्यासो हेतुनिरपेक्ष इति चेन्न । स्वरूपानादेरविद्ययाऽपि नैरपेक्ष्यप्रसङ्गात् । प्रवाहानादित्वे जीवानां भङ्गुरत्वप्रसङ्गात्, तथा च धीसन्ततिवादसमत्वम् । अकृताभ्यागमादिप्रसङ्गः श्रुत्यादिविरोधश्च स्यात् ईदृशभ्रमनिरासाय सूचितं च स्वप्नोत्थितं प्रति स एव तु कर्मानुस्मृतिशब्दविधिभ्य इति ॥ १५ ॥ इति ब्रह्मप्रतिच्छन्दजीववादभङ्गः ॥

ब्रह्मदत्तादिभिरुक्तं जीवानां स्वरूपतस्सृष्टिसंहृतिविषयत्वमनूद्य दूषयति । एकमिति ॥

मू० एकं ब्रह्मैव नित्यं तदितरदखिलं तत्र जन्मादिभागित्याम्नातं तेन जीवोऽप्यचिदिव जनिमानित्यनध्येतृचोद्यम् ॥ तन्नित्यत्वं हि साङ्गश्रुतिशतपठितं सृष्टिवादः पुनः स्याद्देहादिद्वारतोऽस्येत्यवहितमनसामाविरन्त्यैकरस्यम् ॥ १६ ॥

जनिमानिति लयोपलक्षणम् अनध्येतृचोद्यं, कतिपयाध्येतुस्तात्पर्यानभिज्ञस्य वा चोद्यं साङ्गशब्दः सोपबृंहणपरः अजो नित्यः शाश्वतोऽयं पुराणः प्रकृतिं पुरुषं चैव इत्यादिश्रुतिस्मृतिशतमिह भाव्यम् । सृष्टिवादः तोयेन जीवान्व्यससर्ज इत्यादिः पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि इत्यादिलयवाद उपलक्ष्यते ब्राह्मणो जायते क्षत्रियो जायते इत्यद्यतनजन्मादौ दृष्टं तद्वत् प्राकृतिकनैमित्तिकसृष्ट्यादावप्यचिदुपष्टम्भेन निर्वाह इहादिशब्दग्राह्यः । अवहितमनसां श्रुतितात्पर्यैकाग्रमनसामित्यर्थः ॥ १६ ॥ इति जीवनित्यत्वम् ॥

आत्मानित्यत्ववादिनश्चतुर्विधाः तेषु ज्ञानात्मवादिनश्शरीरस्थितावप्यात्मनो भिदुरत्वमाहुः प्राणेन्द्रियात्मवादिन आत्मानमाश-

रीरस्थायिनम् । पौराणिकैकदेशिनस्तु प्रलयान्तम् । औपनिषदाभासास्तु मोक्षावधिकम् । एतेषु दूषणवर्गः किंचिदुद्ग्रहणेनोपलक्ष्यते । स्थैर्यमिति ॥

मू० स्थैर्यं चेन्नाभ्युपेतं भवभृति न भवेदैहिकार्थ-
प्रवृत्तिः देहान्तत्वे तु धर्म्ये पथि निरुपधि-
का विश्ववृत्तिर्न सिद्ध्येत् ॥ आकल्पस्थायिपक्षे
कृतमफलतया मुक्तिमार्गोपदेशैरामोक्षस्था-
यितायां श्रुतिरनभिमुखी पूरुषार्थे चतुर्थे ॥ १७ ॥

तत्र स्थैर्यं चेन्नाभ्युपेतमित्याशुतरविनाशित्वानुवादः बाधकमाह । न भवेदिति । आत्मानमुत्तरकालानवस्थायिनं मन्यमानोन किंचिदुद्दिश्य प्रवर्तेत तत्खल्वायत्यां सुखं दुःखनिवृत्तिं वा ऽभिसन्धाय । तत्कथं घटेत फलकाले स्वाभावात् स्वकाले फलाभावात् सन्तानैक्यादिकुसृतयस्तु प्रागेव निरस्ताः । द्वितीयपक्ष दूषणं देहान्तत्व इति । यदि देहावधिरात्मा तदा देहात्मवाद इव प्रेक्षावतो महाजनस्य धर्मादनपेते मार्गेऽनादिस्वावैचिकी दृष्टफलाद्युपाधिरहिता प्रवृत्तिर्न घटेत तदाहुः विफ*लाविश्ववृत्तिर्नो न दुःखैकफलापि च । दृष्टलाभफला नापि विप्रलम्भोऽपि नेदृश इति । तृतीयं दूषयति । आकल्पेति । अयं भावः यदि सर्वदुःखनिवृत्तियुक्त आत्मनाश एव मोक्षः स तर्हि वः कल्पान्ते स्वयमेवैष्यति । न चासौ पूर्वं साध्यः त्वरया मध्ये स्वनाशार्थमुपाययह इति चेन्न । स्वनाशस्य सर्वप्रमाणैरपि पुमर्थत्वासिद्धेः । एवं च भाषितम् । अहमर्थवि†नाशश्चेन्मोक्ष इत्यध्यवस्यति । अपसर्पेदसौ मोक्षकथाप्रस्तावगन्धतः

* कुसुमाञ्जलावुदयनाचार्याः ।

† सिद्धित्रये भगवद्भिर्यामुनाचार्यपादैः ।

भतो नावृत्तिः । तयोरङ्गत्वे भक्षणस्य प्रतिप्रधानमिति न्यायः प्रवर्ततेति भावः ॥ २६ ॥

पुनराधानं प्रति वह्न्यनुगमद्वयस्य निमित्तत्वम् । अधि० ८ ।

पुनराधेयमोदनवत् ॥ २७ ॥

यस्योभाववनी अनुगतावभिनिम्लोचेदभ्युदियाद्वा पुनराधेयमिति । उभौ गार्हपत्याहवनीयौ । अत्रोभयत्वं विवक्षितं न वेति संशये पूर्वपक्षमाह । पुनरिति । पुनराधेयं पुनराधाननिमित्तत्वमोदनवत् । ऐन्द्रपञ्चशरावौदननिमित्तवत् । अन्यतरानुगमनमपि निमित्तमिति भावः ॥ २७ ॥

द्रव्योत्पत्तेश्चोभयोः स्यात् ॥ २८ ॥

सिद्धान्तमाह । द्रव्येति । उभयोरनुगमे पुनराधानं स्यात् । द्रव्योत्पत्तेः अग्निरूपद्रव्योत्पत्तेः, आधानकार्यत्वादिति पूरणीयम् । पुनराधेयमित्यनेन वसन्ते ब्राह्मणोऽग्निमादधीतेत्यनेन विहिताधानादन्यद्विधीयते मासाग्निहोत्रवत् । प्रकृताधाने अग्निद्वयोत्पादकत्वमाधानस्य क्लृप्तम्, एकाग्निनाशे तदुत्पादकत्वस्याक्लृप्तत्वादत्राग्निद्वयनाशो निमित्तमिति वक्तव्यमिति भावः ॥ २८ ॥

पञ्चशरावनिर्वापस्य कर्मान्तरत्वम् । अधि० ६ ।

पञ्चशरावस्तु द्रव्यश्रुतेः प्रतिनिधिः स्यात् ॥ २९ ॥

ऐन्द्रं पञ्चशरावमोदनं निर्वपेदित्यत्र सान्नाय्यप्रतिनिधिद्रव्यं विधीयते अपूर्वयागो वेति संशये पूर्वपक्षमाह । पञ्चशराव इति । सूत्रार्थः स्पष्टः । निर्वापविधौ एकपदश्रुतिरनुगृहीता भवतीति भावः ॥ २९ ॥

चोदना वा द्रव्यदेवताविधिरवाच्ये हि ॥ ३० ॥

सिद्धान्तमाह । चोदनेति । हि यतः द्रव्यदेवताविधिः अतः कर्मविधिः द्रव्यदेवतासंबन्धस्य यागमन्तराऽसंभवादिति भावः । ननु प्राकृतकर्मानुवादेन द्रव्यविधिरिति चेन्न । ऐन्द्रमित्यनर्थकं स्यात् । न च यदैन्द्रं तत्पञ्चशरावनिर्वापेण कुर्यादित्युद्देश्यनिर्देशार्थं तदिति शक्यते वक्तुं, प्रकृते इन्द्रमहेन्द्रयोर्देवतात्वेनेन्द्रशब्दस्य उभयावाचकत्वादित्याह । अवाच्ये । उभे ते अवाच्ये अतः देवताद्रव्यविशिष्टं कर्म विधीयते ॥ ३० ॥

पञ्चशरावयागस्य नैमित्तिकदर्शयागाङ्गत्वम् । अधि० १० ।

स प्रत्याम्नेत्स्थानात् ॥ ३१ ॥

अयं यागः दर्शप्रतिनिधिरूप उत तदङ्गमिति संशये पूर्वपक्षमाह । स इति । सः पञ्चशरावयागः प्रत्याम्नेत् प्रतिनिधिः तत्स्थानात् ॥ ३१ ॥

अङ्गविधिर्वा निमित्तसंयोगात् ॥ ३२ ॥

सिद्धान्तमाह । अङ्गविधिरिति । स्पष्टो ऽर्थः ॥ ३२ ॥

सत्रायागूर्याप्रवृत्तस्य विश्वजिदावश्यकत्वम् । अधि० ११ ।

विश्वजिदप्रवृत्ते भावः कर्मणि स्यात् ॥ ३३ ॥

एतदाम्नायते, यस्सत्रायागुरते स विश्वजिता यजेतेति । अयं यागः सत्रप्रवृत्तस्य सत्रमनुतिष्ठत उत सत्रान्निवृत्तस्येति संशये विशेषाश्रवणात्प्रवृत्तस्यापीति पूर्वपक्षे सिद्धान्तमाह । विश्वजिदिति । आरभ्याप्रवृत्ते विश्वजित्स्यात् । भावः सत्रफलं कर्मणि विश्वजिति यतः ॥ ३३ ॥

निष्क्रयवादाच्च ॥ ३४ ॥

लिङ्गं दर्शयति । निष्क्रयेति । निष्क्रयवादात् । सर्वाभ्यो देवताभ्यः सर्वेभ्यः पृष्ठेभ्यः आत्मानं निष्क्रीणीतइति अर्थवादः, देवतोद्देशेन संकल्प्याकरणे ऋणी सन् अनेन विश्वजिता परिक्रीणीतइति संगत इति भावः ॥ ३४ ॥

बर्हिषेत्यादिश्रुतेः व्रतकालविधानार्थत्वम् । अधि० १२ ।

वत्ससंयोगे व्रतचोदना स्यात् ॥ ३५ ॥

दर्शपूर्णमासयोः श्रुतम् । बर्हिषा पूर्णमासे व्रतमुपैति वत्सैरमावास्यायामिति । अत्र वत्सादिविशिष्टव्रतविधिरुत कालविधिरिति संशये पूर्वपक्षमाह । व्रतेति । व्रतचोदना वत्सविशिष्टव्रतविधिः । वत्ससंयोगाद् वत्सव्रतयोः श्रूयमाणत्वात् ॥ ३५ ॥

कालो वोत्पन्नसंयोगाद्यथोक्तस्य ॥ ३६ ॥

सिद्धान्तमाह । काल इति । कालः वत्सापाकरणकालो विधीयते । यथोक्तप्राप्तस्य सकारणव्रतस्य उत्पन्नस्य संयोगाच्च श्रवणात् । अमा-

चममांसं बहुसर्पिष्कं व्रतयतीति वचनेन प्राप्तत्वादप्राप्तकालमात्रविधिरिति भावः ॥ ३६ ॥

अर्थापरिमाणाच्च ॥ ३७ ॥

इतो ऽपि कालविधिरित्याह। अर्थेति। अत्र वत्सो व्रतयितव्यः किं वत्सेन हस्तस्थानीयेन व्रतयितव्यं किं वत्सं समीपे संस्थाप्य व्रतमुपेयादिति, एतादृशानां मध्ये एकस्य नियामकस्याभावात्काललक्षकत्वमित्यर्थः ॥ ३७ ॥

वत्सस्तु श्रुतिसंयोगात्तदङ्गं स्यात् ॥ ३८ ॥

वत्सस्य विधौ शक्यार्थः संभवति कालपरत्वे लक्षणा स्यादित्याक्षिपति। वत्स इति। श्रुतिसंयोगात्। शक्यार्थसंभवात् ॥ ३८ ॥

कालस्तु स्यादचोदनात् ॥ ३९ ॥

लक्षणैव न्याय्येत्याह। काल इति। अचोदनात् प्रकृतवाक्यस्य अनुवादकत्वात्। अयं भावः। पुरा वत्सानामपाकर्तोर्दंपती अश्नीयातामित्यनेन कालस्यापि प्राप्तत्वादनुवादरूपत्वाल्लक्षणा न दोषायेति ॥ ३९ ॥

अनर्थकश्च कर्मसंयोगे ॥ ४० ॥

इतो ऽपि नेत्याह। अनर्थक इति। कर्मसंयोगे कर्माङ्गत्वे सिद्धे ऽपि अनर्थकः अङ्गत्वं कया ऽपि रीत्या संपादयितुमशक्यः ॥ ४० ॥

अवचनाच्च स्वशब्दस्य ॥ ४१ ॥

ननु वत्सविशसनं कृत्वा मांसेन व्रतसंपादने अङ्गत्वं निर्वहतीत्यत्रोत्तरमाह। अवचनादिति। स्वशब्दस्य वत्सशब्दस्य अवचनाद् मांसे शक्त्यभावाल्लक्षणा ऽपरिहार्येति भावः ॥ ४१ ॥

बर्हिषेत्याद्युक्तकालस्य सन्नयदसन्नयदुभयसाधारणत्वम्। अधि० १२।

कालश्चेत्सन्नयत्पक्षे तल्लिङ्गसंयोगात् ॥ ४२ ॥

अयं कालविधिः सन्नयत उतासन्नयतो ऽपीति संशये पूर्वपक्षमाह। काल इति। सन्नयत्पक्षे सान्नाय्यसहितप्रयोगे कालः स्यात्। सान्नाय्यलिङ्गयुक्तत्वाद्वाक्यस्य ॥ ४२ ॥

कालार्थत्वादुभयोः प्रतीयेत ॥ ४३ ॥

सिद्धान्तमाह । कालेति । कालार्थत्वाद् व्रतस्य सान्नाय्यानङ्गत्वेन केवलकालमात्रापेक्षत्वादुभयोः सन्नयतः असन्नयतश्च स्यात् ॥ ४३ ॥

सह शाखयेत्यस्य कालविधानार्थत्वम् । अधि० १४ ।

प्रस्तरे शाखा अयणवत् ॥ ४४ ॥

सह शाखया प्रस्तरमाहवनीये प्रहरतीत्यत्र प्रस्तरप्रहरणाङ्गं शाखा उत कालविधिरिति संशये पूर्वपक्षमाह । प्रस्तरइति । प्रस्तरे शाखा ऽङ्गं, यथा मैत्रावरुणं पयसा अयतीत्यत्र द्वितीयाश्रुत्या शेषिशेषभावः तद्वदत्रापि श्रुतिद्वयसत्त्वात् ॥ ४४ ॥

कालविधिर्वोभयोर्विद्यमानत्वात् ॥ ४५ ॥

सिद्धान्तमाह । कालविधिरिति । उभयोः प्रस्तरशाखयोः विद्यमानत्वाद् वचनान्तरेण प्राप्तत्वात् ॥ ४५ ॥

अतत्संस्कारार्थत्वाच्च ॥ ४६ ॥

ननु प्रस्तरस्य शाखा दृष्टोपकारं मा जनयतु अदृष्टद्वारोपकारो ऽस्त्वत आह । अतदिति । प्रस्तरसंस्कारार्था ऽपि शाखा न ॥ ४६ ॥

तस्माच्च विप्रयोगे स्यात् ॥ ४७ ॥

उपसंहरति । तस्मादिति । विप्रयोगे शाखाऽभावे ऽपि प्रस्तरप्रहरणं स्यात् ॥ ४७ ॥

उपवेषश्च पक्षे स्यात् ॥ ४८ ॥

उपवेषे विशेषमाह । उपवेषइति । पक्षे अमावास्यायां सन्नयत एव, मूलत उपवेषं करोतीति शाखामूलस्योपवेषत्वात् ॥ ४८ ॥

इति जैमिनिसूत्रवृत्त्यां षष्ठस्याध्यायस्य चतुर्थः पादः ॥ ४ ॥

दर्शे ऽभ्युदयेष्टौ नैमित्तिकदेवताऽपनयः । अधि० १ ।

अभ्युदये कालापराधादिज्याचोदना स्याद्यथा पञ्चशरावे ॥ १ ॥

यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदेति त्रेधा तण्डुलान्विभजेद्ये मध्यमाः स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्याद्ये स्थवि-

ष्टास्तानिन्द्राय प्रदात्रे दधश्चरुं ये ऽणिष्ठास्तान्विष्णवे शिपिविष्टाय शृते चरुमिति । किं कालापराधे प्रायश्चित्तरूपं यागान्तरं किं वा चन्द्रोदये निमित्ते दर्शकर्मण्येव प्राकृतदेवताऽपनयो विधीयतइति संशये पूर्वपक्षमाह । अभ्युदयइति । अभ्युदये चन्द्रोदये कालापराधाद् दर्शभ्रान्त्या चतुर्दश्यां निर्वापे कालापराधात् । इज्याचोदना स्यात् । यागविधिः स्यात् । हविरार्तौ पञ्चशरावबत् ॥ १ ॥

अपनयो वा विद्यमानत्वात् ॥ २ ॥

सिद्धान्तमाह । अपनय इति । अपनयः द्रव्यसंबन्धप्राकृतदेवतायाः विभागः विधीयते । विद्यमानत्वात् प्राकृतदेवतासंबन्धस्य विद्यमानत्वात् । पूर्वदेवतासंबद्धद्रव्ये देवतान्तरविधानासंभवेन यागविध्यसंभवादिति भावः ॥ २ ॥

तद्रूपत्वाच्च शब्दानाम् ॥ ३ ॥

उक्तार्थे साधकान्तरमाह । तद्रूपत्वादिति । शब्दानामुक्तवाक्यघटकशब्दानां तण्डुलान्विभजेदित्यादीनां तद्रूपत्वात् । देवताऽपनयार्थत्वात् । विभजेदित्यनेन देवताऽपनयः साक्षादेव श्रूयते । एवं ये मध्यमा इत्यादयः परम्परया तत्प्रतिपादका इति भावः ॥ ३ ॥

आतञ्चनाभ्यासस्य च दर्शनात् ॥ ४ ॥

साधकान्तरमाह । आतञ्चनेति । आतञ्चनस्य यो ऽभ्यासः आवृत्तिः तस्य दर्शनाच् श्रवणात् । अथं हविरातञ्चनार्थे निदध्याद्यद्यभ्युदियादनेनातञ्च्य प्रचरेदिति । यद्यपूर्वं स्यात्प्रकृतितः आतञ्चनप्राप्तौ पुनर्विधानं व्यर्थं स्यादिति भावः ॥ ४ ॥

अपूर्वत्वाद्विधानं स्यात् ॥ ५ ॥

ननु यः पशुकामः स्यात्सो ऽमावास्यामिष्ट्वा वत्सानपाकुर्यादित्यत्र कथमपूर्वकर्मविधिरित्यत्रोत्तरमाह । अपूर्वत्वादिति । अपूर्वत्वात् । अमावास्यामिष्ट्वेत्यनेन प्रकृतयागस्य समाप्तत्वेनापूर्वत्वात् । शेषं स्पष्टम् ॥ ५ ॥

पयोदोषात्पञ्चशरावे ऽदुष्टं हीतरत् ॥ ६ ॥

पञ्चशरावदृष्टान्तवैषम्यमाह । पय इति । पञ्चशरावे हविर्दो-

याद् हविर्नाशात् । नवीनद्रव्यदेवतायोगात्कर्मान्तरम् । इतरत्प्रकृतं पयःप्रभृति अदुष्टम् अतो नान्यत्कर्म ॥ ६ ॥

सान्नाय्ये ऽपि तथेति चेत् ॥ ७ ॥

पञ्चशरावे पूर्वहविर्यथा दुष्टं तथा अकालनिर्वापेण सान्नाय्यमपि दुष्टमित्यभिप्रायवान् शङ्कते । सान्नाय्यइति । स्पष्टम् ॥ ७ ॥

न तस्यादुष्टत्वादविशिष्टं हि कारणम् ॥ ८ ॥

परिहरति । नेति । तस्य सान्नाय्यस्य अदुष्टत्वाद् दोषत्वेन शिष्टैः परिगृहीतानधिकरणत्वात् कार्यं कालापराधे प्रायश्चित्तं दुष्टे अदुष्टे अविशिष्टं तुल्यम् ॥ ८ ॥

लक्षणार्था शृतश्रुतिः ॥ ९ ॥

ननु शृते चरुमित्यत्र अपणसंस्कारो भूतः प्रतीयते । न हि चन्द्रोदयवेलायां पयसि श्रपणं संपन्नम् । कथं तदनुवादेन देवतासंबन्ध इत्याशङ्कायामाह । लक्षणेति । लक्षणार्था लक्षणारूपवृत्तितात्पर्यिका शृतश्रुतिः । शृतपदस्य श्रपणसहचरितवत्सापाकरणादिविशिष्टे लक्षणा । वत्सापाकरणादीनां पूर्वं संपन्नत्वाद् भूतार्थकक्तप्रत्ययश्रुतिरुपपन्नेति भावः ॥ ९ ॥

उपांशुयागे ऽपि देवताऽपनयः । अधि० २ ।

उपांशुयाजे ऽवचनाद्यथाप्रकृति ॥ १० ॥

तत्रैवोपांशुयागसाधनद्रव्ये प्राकृतदेवताऽपनयः कार्यो न वेति संशये पूर्वपक्षमाह । उपांश्विति । अवचनाद् देवतान्तरसंबन्धाश्रवणात् । यथाप्रकृति प्राकृतदेवताकमेवानुष्ठेयम् ॥ १० ॥

अपनयो वा प्रवृत्त्या यथेतरेषाम् ॥ ११ ॥

अत्र तण्डुलपदस्य हविर्मात्रलक्षकत्वात् तस्याप्यपनयः इति सिद्धान्तमाह । अपनयो वेति । प्रवृत्त्या उक्तदिशा हविष्ट्वावच्छिन्नत्वेन विधिप्रवृत्त्या । शेषं स्पष्टम् ॥ ११ ॥

अनिरुप्ते ऽप्यभ्युदयेष्टिः । अधि० ३ ।

निरुप्ते स्यात्तत्संयोगात् ॥ १२ ॥

अस्यामिष्ट्यां निर्वापो निमित्तमुत संकल्पादिकमपीति संशये पूर्वपक्षमाह । निरुप्तइति । निरुप्ते इयमिष्टिः तत्संयोगात् । वाक्ये निर्वापशब्दसंयोगात् ॥ १२ ॥

प्रवृत्ते प्रापणान्निमित्तस्य ॥ १३ ॥

सिद्धान्तमाह । प्रवृत्तइति । प्रवृत्ते आरब्धे स्यात् । वाक्येन हविर्मात्रस्य निमित्तस्य प्रापणात् । बोधनात् । यस्य हविरभ्युदेतीत्येव विवक्षितं न निरुप्तमित्यपि । निमित्तविशेषणानामविवक्षेति हविरार्त्यधिकरणे सिद्धत्वादिति भावः ॥ १३ ॥

लक्षणमात्रमितरत् ॥ १४ ॥

केवलद्रव्यस्य चन्द्रोदयस्य द्रव्यविशिष्टस्य नित्यत्वेन निमित्तत्वासंभवात्प्रवृत्तत्वमात्रविवक्षा, तल्लक्षकं निरुप्तपदमित्याह । लक्षणेति । इतरत् निरुप्तपदं लक्षणमात्रं प्रवृत्तिलक्षकम् ॥ १४ ॥

तथा चान्यार्थदर्शनम् ॥ १५ ॥

उक्तार्थे साधकान्तरमाह । तथा चेति । अन्यार्थे एतद्विधिशेषेऽर्थवादे दर्शनमुक्तार्थदर्शनम् । स यद्यगृहीतं हविरभ्युदियात्तदैव व्रतचर्येति । अगृहीते अनिरुप्ते हविषि व्रतचर्येति लिङ्गम् ॥ १५ ॥

अनिरुप्ते ऽभ्युदये वैकृतीभ्यो निर्वापः । अधि० ४ ।

अनिरुप्ते ऽभ्युदिते प्राकृतीभ्यो निर्वपेदित्याश्मरथ्यः तण्डुलभूतेष्वपनयात् ॥ १६ ॥

प्रवृत्तिमात्रं निमित्तमिति स्थिते अयं देवताविभागः तण्डुलावस्थे हविषि कार्यः । तण्डुलोत्पत्तिप्राक्कालीननिर्वापस्तु प्राकृतदेवताभ्य एव उत निर्वापो वैकृतीभ्य इति संशये पूर्वपक्षमाह । अनिरुप्तइति । अनिरुप्ते निर्वापात्प्रागभ्युदये प्राकृतीभ्यो निरुप्य पश्चात्तण्डुलावस्थायां प्राकृतदेवताऽपनयः तण्डुलान्विभजेदिति तण्डुलेष्वपनयश्रवणादित्याश्मरथ्यमतम् ॥ १६ ॥

व्यूर्ध्वभाग्भ्यस्त्वा लेखनस्तत्कारित्वाद्देवता-ऽपनयस्य ॥ १७ ॥

सिद्धान्तमाह । व्यूर्ध्वेति । व्यूर्ध्वभाग्भ्यः हविरशनभाग्भ्यः वैकृतीभ्य इत्यर्थः । निर्वापः । कुतः, देवताऽपनयस्य तत्कारित्वाद्वैकृतदेवतासंबन्धलाभार्थत्वात् । प्रथमं संबन्धं कृत्वा पश्चाद्विभागं कृत्वा देवताऽन्तरसंबन्धस्य शिरोवेष्टनपूर्वकनासिकास्पर्शतुल्यत्वादिति भावः । तण्डुलपदस्य हविर्लक्षकत्वमिति प्रागुक्तत्वात् ॥ १७ ॥

किं चिन्निरुप्ते ऽभ्युदये ऽवशिष्टस्य तूष्णीं निर्वापः । अधि० ५ ।

विनिरुप्ते न मुष्टीनामपनयस्तद्गुणत्वात् ॥ १८ ॥

यदा प्राकृतदेवतोद्देशेन मुष्टिद्वयनिर्वापः ततश्चन्द्रोदये शेषमुष्टिद्वयनिर्वापः कथं कार्य इति विचारे पूर्वपक्षमाह । विनिरुप्तइति । विनिरुप्ते अर्धनिरुप्ते, ततश्चन्द्रोदये इति शेषः । न तत्र तदानीं देवताऽपनयः, तद्गुणत्वात् । सा देवता गुणो यस्य निर्वापस्य तत्त्वात् । मुष्टीनां न गुणः, देवताया निर्वापाङ्गत्वात् । मुष्टिचतुष्टयनिर्वापस्यैककर्मत्वात् । तावत्कर्मण्येका देवतेति भावः । ततो ऽपनय इति भावः ॥ १८ ॥

अप्राकृतेनहिसंयोगस्तत्स्थानीयत्वात् ॥ १९ ॥

सिद्धान्तमाह । अप्राकृतेति । शेषनिर्वापे न प्राकृतसंयोगः अप्राकृतेनसंयोगः । नञा साकं समासे मध्ये तृतीयालोपाभावो ह्वियोगादिः आर्षः । शेषमुष्टिद्वये प्राकृतदेवतासंयोगो नेति यावत् । आगन्तुकदेवतानां तत्स्थानीयत्वात् । प्राकृतदेवतास्थानीयत्वात् ॥ १९ ॥

अभावाच्चेतरस्य स्यात् ॥ २० ॥

ननु शेषनिर्वापो वैकृतदेवतासंबन्धी स्यात्तत्राह । अभावेति । इतरस्य वैकृतदेवतासंबन्धस्य मुष्टिद्वये अभावात् । शेषनिर्वापः तूष्णीं स्यात् । मुष्टिचतुष्टयनिर्वापस्यैकविधिना चतुरो मुष्टीन्निर्वपेदित्यनेन विहितत्वेनैकपदार्थत्वात्पदार्थैकदेशे गुणान्तरसंबन्धो न सम्भवतीति तूष्णीमेव शेषनिर्वाप इति ॥ २० ॥

हणे विशेषाभावात् प्रातिपदिकादिव सुबन्तादपि प्रत्ययोत्पत्तेर्ग्राघ्यतीत्यादौ कुत्वं स्यात्, एवं तर्हि नः क्यङ्गतिवचनं सुबन्तादुत्पत्तौ नियमार्थे प्रातिपदिकादुत्पत्तौ विध्यर्थे च भविष्यति । नन्वत्र कर्मग्रहणेनैव सुबन्तत्वं लप्स्यते, पञ्चकपक्षेऽप्यस्य द्योतिकया विभक्त्या भाव्यम्, अतोऽन्तरेणापि सुब्ग्रहणं वस्तुतः पदविधित्वेन समर्थपरिभाषोपस्थास्यत इति किं तद्ग्रहणेन । मैवं, यत्र हि पदस्यैवासाधारणं किञ्चिद्रूपमाश्रीयते स एव पदविधिः, न त्वीदृशमपीति, कर्मग्रहणं तु न पदस्यैवासाधारणं धातोः कर्मणइत्यपि दर्शनात् । नह्यीदानीमिदं भवति महापुत्रीयतीति, भवति, यदेतद्वाक्यं महान्पुत्रः महापुत्रस्तमिच्छतीति ॥

“काम्यच्च” ॥ क्यचो विषयेऽयं भवति, मान्ताव्ययेभ्य इति निषेधाभावात् न सान्येवास्याप्राप्तक्यज्विषयः स्यादिति वाच्यं, पाश्चात्यस्य कातीयवचनस्य सूत्रप्रणयनकाले ऽभावात् । पुत्रमात्मन इच्छति पुत्रकाम्यतीत्यादि, त्वत्काम्यति, मत्काम्यति, युष्मत्काम्यत्यस्मत्काम्यतीत्यत्र ‘प्रत्ययोत्तरपदयो’रिति त्वमौ, तदभावश्च । क्यचि चित्करणं पुत्रकाम्यतीत्यादौ सति शिष्टस्वरं बाधित्वा धातुस्वरो यथा स्यादिति, ककारस्तु नेत्, प्रयोजनाभावात् । अग्निकाम्यतीत्यादावधातुविहितत्वादार्धधातुकत्वाभावाचास्ति गुणप्रसङ्गः । कंसं परिमार्ष्टि कंसपरिमृट्, कंसपरिमृट्काम्यतीत्यत्र मृजेर्वृद्धिः प्रत्ययमात्रे विधीयमानाऽपि धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानान्न प्रसजति । तत्प्रत्ययो धातुसंशब्दनेन विहितः प्रत्ययः, यजे‘र्भजुपेश्छन्दसीति’विच्युपयट्, वचेः क्विपि वाक्, उपयट्काम्यतीति वाक्काम्यतीति । अत्र यजादिभिः कितो विशेषणाद्धातोः स्वरूपेति वा संप्रसारणाप्रसङ्गः । अन्तर्वर्तिन्या विभक्त्या यथायोगं पदकार्याणि द्रष्टव्यानि । पयस्काम्यति । यशस्काम्यति । अन्तर्वर्तिन्या विभक्त्या पदत्वेन सोरुत्वे विसर्जनीये तस्य कुप्वोरपदाद्योः परयोर्विधीयमानं ‘सोपदादावि’ति सत्वं भवति, स्वःकाम्यतीत्यादौ सोपदादावनव्ययस्येति वचनात् सत्वाभावः । अधिकरणशक्तिप्रधानस्याप्यस्य वृत्तिविषये शक्तिमत्प्रधानत्वादिपिणा कर्मत्वेन योगः षष्ठ्या,

दिवाभूता रात्रिः दोषाभूतमहरित्यादावधिकरणशक्तिप्रधानत्वेऽपि शक्तिमत्प्राधान्यादभूततद्भावयोगः । वाःकाम्यतीत्यादौ रोः काम्यइति रोरेव विसर्जनीय इति काम्ये सत्वनियमात्सत्त्वाभावः । सर्पिष्काम्यति धनुष्काम्यतीत्यादौ सत्वं बाधित्वा 'इणः ष'इति षत्वं भवति सत्वस्यापवाद इति यत्र तत्प्रसंगस्तत्रैव भवतीत्युच्चैःकाम्यति गीःकाम्यतीत्यादौ न भवति । पुंस्काम्यतीत्यत्र पुंसः संयोगान्तलोपे 'पुमः खय्यम्परे'इति रुत्वं निवर्त्य संपुंकानां सो वक्तव्य'इति सत्ववचनान्नास्ति विसर्जनीय इति न षत्वप्रसङ्गः ।

"उपमानादाचारे" ॥ कर्मणः सुप इति च वर्त्तते । तत्र प्रत्ययार्थस्याचारक्रियायाः सन्निधानात्तदपेक्षया कर्मण उपमानात् सुबन्तादाचारे क्यजित्ययमर्थो भवति । यद्यपि काम्यजनन्तरस्तथापि पूर्वसूत्रे चकारेणेहाद्य एव क्यजनुकृष्टः स एवात्र विधीयते, पुत्रमिवाचरति छात्रम् । उदाहरणान्यवशिष्टानि प्रक्रिया चेक्काम्यजन्तवद्द्रष्टव्यानि । अत्रोपमानेनोपमेयमाक्षिप्यते, तत्र प्रत्यासत्त्या साधारणधर्मभूताधारक्रियापेक्षया कर्मतैव, उपमानकर्मवत् प्रत्ययान्ते धातावनन्तर्भावादनभिहितमिति तत्र द्वितीया भवति । तथा पुत्रीयतइत्यादौ कर्मणि यगादयोपि भवन्ति । नन्वन्या पुत्रविषयाचारक्रिया ऽन्या छात्रविषयेति आचारक्रियायाः वस्तुतो भेदादेककर्मधर्मसमावेशस्यात्राभावात्कथमौपम्यम् । उच्यते । आचरितुरेकत्वादाचारसमावेशादाचार एकोवसास्यते, अन्यथा सर्वत्रैवोपमानोपमेयगतस्य धर्मस्य वस्तुतो भेदादौपम्यव्यवहारच्छेदः स्यात् । 'अधिकरणाच्चेति वक्तव्य'मित्युक्तत्वात् प्रासादीयति कुट्यामित्यादौ सप्तम्यन्तादपि भवति । त्वयीवाचरति त्वद्यति, मयीवाचरति मद्यति, युष्मदस्मदोरेकार्थत्वा'त्त्वमावेकवचने'इति त्वमौ, युवयोरिवाचरति आवयोरिवाचरति युष्मद्यति, अस्मद्यति, अत्र नास्त्येकार्थत्वमिति त्वमौ न भवतः, द्विवचनत्वेपि विभक्तेर्लुका लुप्तत्वाच्च युवावौ, लुकः पूर्वं तु न भवतोन्तरङ्गानपि विधीन् बहिरङ्गो लुक् बाधतइत्युक्तत्वात् । युष्मास्विव आचरति अस्मास्विवाचरतीत्यत्रापि एकार्थत्वाभावान्न भवतस्त्वमौ,

त्वामतिक्रान्ते अतित्वयि, अतिक्रान्तयोः अतित्वयोः, अतिक्रान्तेषु अतित्वासु, एवमतिमयि, अतिमयोः, अतिमासु, सर्वत्रात्र प्रकृत्योरेकार्थत्वात्त्वमयोरजादावनादेशे विभक्तौ 'योची'ति दकारस्य यकारः, हलादौ तु युष्मदस्मदोरनादेशविभक्तिपरत्वादात्वम्, एभ्योऽपि क्वचि त्वमयोरत्वद्यति मद्यतीति भवतः। युवामतिक्रान्ते, अतियुवयि, अतिक्रान्तयोः, अतियुवयोः, अतिक्रान्तेषु, अतियुवासु, एवमत्यावयि, अत्यावयोः, अत्यावासु, अत्र प्रकृत्योर्द्विवचनत्वे युवावयोर्दकारस्य पूर्ववद्यत्वात्वे, एभ्यस्तु क्वचि प्रकृत्योरेकार्थत्वाभावात् न त्वमौ भवतः, युष्मद्यति अस्मद्यतीति भवतः, द्विवचनत्वेऽपि विभक्तेर्लुका लुप्तत्वेन तत्परत्वाभावात् युवावौ न भवतः, तथा लुकः पूर्वमपि न भवतीति इदानीमेवोक्तं, युष्मानतिक्रान्ते अतियुष्मयि, अतिक्रान्तयोः, अतियुष्मयोः, अतिक्रान्तेषु अतियुष्मासु, एवमत्यस्मयि, अत्यस्मयोः, अत्यस्मासु, पूर्ववद्दकारस्य यत्वात्वे, अत्रापि प्रकृत्योरेकार्थत्वाभावेन त्वमयोरभावादतियुष्मद्यति अत्यस्मद्यति इति भवतः।

"कर्तुः क्यङ् सलोपश्च" ॥ उपमानात् सुपः आचारे वेति वर्तते। अत्रापि पूर्ववत् सन्निहिताचारक्रियापेक्षया कर्तृत्वोपमानत्वे, तेनायमर्थः। उपमानादाचारक्रियायाः कर्तुः सुबन्तादाचारेऽर्थे वा क्यङिति। ककारो 'नः क्ये'इति सामान्यग्रहणार्थः, ङकारस्तदविघातार्थस्तङर्थश्च, लोपश्चेति चशब्दोन्वाचये, सेति लुप्तषष्ठीकं पृथक् पदं, तेन च लोपापेक्षया स्थानषष्ठ्यन्तत्वेन संबन्धिनो जायमानस्य कर्तुर्नित्यं तस्य विशेषणात्तदन्तविधौ सकारान्तेभ्यो क्यङ् तस्य सकारस्य लोप इत्यर्थो भवति। अत्रापि वेत्यस्य संबन्धात्तस्य च व्यवस्थितविभाषात्वादोजोऽप्सरसोर्नित्यं सलोपो भवति अन्यत्र विकल्पेन, उक्तं च। 'ओजसोऽप्सरसोर्नित्यं पयसस्तु विभाषये'ति। पयस इति ओजोऽप्सरोव्यतिरिक्तानां सकारान्तानामुपलक्षणमिति व्याख्यातारः। श्येन इवाचरति श्येनायते, काकायते, ओजायते, अप्सरायते, पयस्यते, पयायते, यशस्यते, यशायते, ओजःशब्दो वृत्तिविषये तद्वति वर्तते, अर्चिष्यते, सर्पिष्यते इत्यादौ प्रत्ययसकारत्वात्षत्वम्, अत्र 'नः क्य'-इति नियमेन सकारस्य पदान्तत्वाभावः, पदान्तत्वे 'ह्रपदान्तस्य

मूर्धन्य'इति वचनात् षत्वं न स्यात् । अन्तस्य सकारस्य लोपवचनात् हंसायते स्वरसायनइत्यादौ अनन्त्यस्य लोपो न भवति । उपमानकर्तु-रिव उपमेयकर्तुः प्रत्ययान्ते धातावन्तर्भावात् तत्र लादयो भवन्ति । अकर्मकत्वात् भावे च श्येनायतइति, त्वामिवाचरति त्वद्यते मद्यते, 'प्रत्ययोत्तरपदयोश्चे'ति युष्मदस्मदोरेकार्थयोस्त्वमौ, युवामिवाचरति युष्मद्यते, अस्मद्यते, अत्रानेकार्थत्वान्न त्वमौ, अन्तर्वर्तिन्या विभक्तेर्लुप्त-त्वात् 'युवावौ द्विवचने' 'यूयवयौ जसी'ति युवावादयो न भवन्ति । लुकः पूर्वं तु बहिरङ्गेणापि तेन बाधस्योक्तत्वान्न भवन्ति, त्वामतिक्रान्तो ऽतित्वम्, अतिक्रान्तौ अतित्वा,मतिक्रान्ता अतियुयं, मामतिक्रान्तः अत्यहम्, अतिक्रातौ अतिमाम्, अतिक्रान्ता अतिवयं, सर्वत्र विभक्तेर्हेः प्रथमयोरमित्यम्भावो द्विवचनादन्यत्र शेषे लोप इति दकारलोपस्तत्र 'प्रथमायाश्च द्विवचन'इत्यात्वं, तत्र सौ 'त्वाहौ सा'विति त्वाहौ, अन्यत्र 'त्वमावेकवचन'इति त्वमौ, आभ्यामपराभ्यामपि त्वाहयोर्न बाध-स्त्वाहादीनां तु पूर्वविप्रतिषेधेन तएवेष्यन्तइति उक्तत्वात् । जसि तु त्वाप्यविप्रतिषेधेन यूयवयाभ्यां त्वमोर्बाध एव, एभ्यः क्यङि अतित्वद्यते ऽतिमद्यतइति भवतः, युवामतिक्रान्तोतित्वाम्, अतिक्रान्तौ, अतियुवाम्, अतिक्रान्ता अतियूयम्, एवं मामतिक्रान्तो ऽन्यहम्, अतिक्रान्तौ अत्यावा-मतिक्रान्ता अतिवयं, सौ जसि च 'त्वाहौ सौ' 'यूयवयौ जसी'त्याभ्यां पराभ्यां युवावौ द्विवचनइत्यस्य बाधः । द्विवचने तु युवावयोः प्रथमायाश्च द्विवचनइति दकारस्यात्त्वम् । इतरयोस्तु शेषे लोपः, एभ्यस्तु क्यङि युष्मदस्मदोरनेकार्थत्वात्त्वमयोरभावादतियुष्मद्यते अत्यस्मद्यते इति भवतः । अन्तर्वर्तिनीं विभक्तिमाश्रित्य तत्तदादेशाभावस्तत्रतत्रोक्तो, युष्मानतिक्रान्तः अतित्वम् अतिक्रान्तौ अतियुवाम्, अतिक्रान्ता अति-यूयम्, एवमस्मानतिक्रान्तो ऽत्यहम्, अतिक्रान्तौ अत्यस्मान्, अति-क्रान्ता अतिवयं, पूर्ववत् प्रथमाया द्विवचने आत्वम्, अन्यत्र शेषे लोपो यथायोगं 'त्वाहौ सौ' 'यूयवयौ जसी'ति त्वाहादयश्च, एभ्योपि क्यङि अतियुष्मद्यते, अत्यस्मद्यते इति भवतः । उदाहरणान्यवशिष्टानि प्रक्रिया

चेच्छाक्यजन्तवदुन्नेयानि । अवर्णस्येत्यादिकं 'क्यचि चे'तिविधीयमानमिह न भवति, कुमारीवाचरति कुमारायते, हरिणीवाचरति हरितायते गौरीवाचरति गौरायते, गुर्वीवाचरति गुरूयते, 'क्यङ्मानिनोश्चे'ति स्त्रीशब्दस्य पुम्शब्दः, अत्र स्त्रियाः पुंवद्भाषितपुंस्कादिति वर्तते, तत्र स्त्रीशब्देन स्त्र्यर्थशब्द उच्यते, पुंवच्छब्देन पुमर्थो, भाषितः पुमान् यस्मिन् अर्थे प्रवृत्तिनिमित्ते स भाषितपुंस्कस्तद्योगाच्छब्दोपि, स चेह स्त्र्यर्थः, ऊङो ऽभावः अनूङ्, षष्ठ्यर्थे प्रथमा, भाषितपुंस्कात् पर ऊङोभावो यस्मिन् स्त्रीशब्दे स भाषितपुंस्कादनूङ्, निपातनात्पञ्चम्या अलुक्, एतदुक्तं भवति, पुंसि यत् प्रवृत्तिनिमित्तं तदुक्तस्वार्थवाचिनः शब्दस्य पुम्शब्द आदेशो भवति ऊङन्तस्य नेति, तेन श्वशुरस्योकाराकारयोर्लोपश्चेति ऊङि श्वश्रूयते इत्यत्र पुंवत्त्वं न भवति। तथा भाषितपुंस्कत्वाभावाद् द्रोणीयतइत्यादौ न भवति। अत्र हरदत्तः। पुंसि द्रोणशब्दस्य परिमाणप्रवृत्तिनिमित्तमाह । स्त्रियां तु द्रोणीनाम जातिः। कैयटकारस्तु द्रोणशब्दस्तु परिमाणवृत्तिर्भाषितपुंस्कः स एव भेदोपचारात्सादृश्यनिबन्धनप्रत्यभिज्ञानवशात् वा स्त्रियां वर्तते इति पुंसि प्रवृत्तिनिवृत्तेनार्थ्यमानत्वेन युक्तः स्त्र्यर्थयोगोस्तीति स्यादेव द्रोण्यादीनां भाषितपुंस्कत्वं, नैतत् । एवं हि व्यावर्त्याभावात् भाषितपुंस्कग्रहणमनर्थकं स्यात् । अतो यः शब्दो भाषितपुंस्को यत्प्रवृत्तिनिमित्तेन युक्तस्तद्युक्तं स्त्र्यर्थं तद्रूपेणाह स चेह भाषितपुंस्क आश्रीयते न तु रूपान्तरेणापि, न च द्रोण्यादिशब्दः स्वार्थमर्थ्यमाणतयाहेति । एवमपि द्यौरिवाचरति दीव्यतीति, दिवशब्दस्य स्वर्गशब्दस्य चैकमेव प्रवृत्तिनिमित्तमस्ति च तद्युक्ततया स्वार्थाभिधानमित्यर्थसाम्यात् पुंल्लिङ्गः स्वर्गशब्दः प्राप्नोति । नैष दोषः, यस्य शब्दस्य पुंवद्भावः स एव शब्दः स्त्रीकृतविकृतिरहितः पुमांसमाहेति प्रत्यासत्त्या लब्धत्वात्, न च दिवशब्दः पुमांसमाह । इदमत्र सूत्रार्थतत्त्वं, यः शब्दो येन प्रवृत्तिनिमित्तेन पुंसि प्रवृत्तस्तेनैव स्त्रियां वर्तते तस्य पुंवद्भाव, ऊङन्तस्य नेति । एवं हंसस्य स्त्री वरटा, सारसस्य लक्ष्मणा, अङ्गारकस्य मालिका, कच्छपस्य डुलीका, ऋषभस्य रोहित्, पुरुषस्य योषिदित्यादौ

नियतस्त्रीवचनानां वरटादीनां पुंवत्त्वेन वरटादयो न भवन्तीति वरटायतइत्यादि भवति, शक्यन्ते च साहचर्यात्पुंशब्दैरपि स्त्रीशब्दार्थाः प्रतिपादयितुं, यद्येवं गर्भिणीवाचरति गर्भीयतइत्यत्र कथं पुंस्त्वं, यतो गर्भी व्रीहिरित्यादौ पुंस्यवयवभूतगर्भसंबन्धः प्रवृत्तिनिमित्तं स्त्रियान्त्वनवयवभूतगर्भसंबन्ध इति प्रवृत्तिनिमित्तं भिद्यते, नैष दोषो यदुभयत्रापि गर्भसंबन्धमात्रमेव प्रवृत्तिनिमित्तम्, एवं प्रसूताप्रजातादिशब्दानामप्यपत्यापत्यवत्संबन्धमात्रं प्रवृत्तिनिमित्तं न तु पुंसि गर्भाधानं स्त्रियां तु गर्भविमोचनमिति समानप्रवृत्तिनिमित्तत्वात् प्रसूतायतइत्यादौ पुंस्त्वं भवति, इदं च प्रसूतभार्या इत्यर्थमवश्यमेवेष्टव्यं, समानः पतिरस्याः सपत्नी, नित्यं सपत्न्यादिष्विति नकारे ङीप् । अत एव निर्देशात्समानस्य सभावः । सपत्नीवाचरतीत्यत्र सपत्नीयतइति भवितव्यमिति न्यासे, यदाह नित्यं सपत्न्यादिष्वित्यत्र समुदायस्योच्चारणान्नियोगत एषां समुदाय ईकारान्त एव यथा स्यादिति । तेन सपत्नीभार्यइति स्त्रियाः पुंवद्भावो न भवतीति । तसिलादिष्वित्यत्र भाष्यकैयटयोस्तु 'भस्याढे तद्धित'इति पुंवत्त्वं प्रस्तुत्य कुण्डिनीशब्दाद्गर्गादियञि पुंवत्त्वेन कुण्डिन्शब्दे 'नस्तद्धित' इति टिलोपे कौण्डिय इति प्राप्नोति । तथा सपत्नीशब्दाच्छिवाद्यणि सपतिशब्दादेशे सापत इति चोदयित्वा ढग्रहणमपनीय तत्रानपत्यइति न्यस्यापत्यप्रत्यये पुंवद्भावाभावाद्यञि ईकारस्य 'यस्येति चे'ति लोपे तस्य 'नस्तद्धित'इति टिलोपस्य स्थानिवत्त्वान्नान्तस्य तद्धितपरत्वाभावात्कौण्डिन्य इति सिध्यति । तथा शिवाद्यणोऽपत्यप्रत्ययत्वात्सपतिशब्दादेशाभाव इति परिहृत्य एवं सति गार्ग्यायण्या अपत्ये कुत्सने, गोत्रस्त्रियाः कुत्सने ण चेति एतस्यापत्यप्रत्ययत्वेन पुंवद्भावाभावाद्गार्ग्यायणइति स्यात्, नन्विष्टङ्गार्ग्यमिति दोषमुद्भाव्य तत्सम्परिहाराय भस्याढे इत्येव संस्थाप्य कौण्डिन्ये आगस्त्यकौण्डिन्ययोरिति निपातनात् परिहृत्य सापत्ने तु नित्यं सपत्नीतिसमुदायनिपातनं परिहारमनभिधाय शत्रुपर्यायात्सपत्नशब्दाच्छार्ङ्गरवादिषु द्रष्टव्य इति शिवाद्यणि परिहृतम्, अत एव शिवादौ समानपतिलक्षणस्य सपत्नीशब्दस्य ग्रहणं नेत्यवसी-

यते, ग्रहणे हि तस्माद्दणि पुंवत्त्वेन सापत इति रूपं दुर्वारमेव स्यात् । अत एव सापत इति प्राप्नोतीति भाष्ये नित्यं सपत्न्यादिष्विति निर्द्देशेन भवत्समानस्य सभावो ङीप्नकारयोगेपि भवतीत्यवसीयते । एवं च न्यासोक्तपुंवत्त्वाभावो भाष्यकृतोऽनभिमत इत्यवसीयते । समुदायनिपातनं तु रूढ्यर्थेऽपि स्यादिति न सूत्रभाष्यविरोधः । एवं सति समानपतिलक्षणात्सपत्नीशब्दाल्लिङ्गविशिष्टपरिभाषया पत्युत्तरपदलक्षणे ण्ये सापत्य इति भाव्यं, तथा भावकर्मणोरपि पत्यन्तलक्षणे यकि सापत्यमिति, युवतिरिवाचरति युवायते । यस्तु घादाम्सूत्रभाष्ये युवतितरेत्युदाहरणे 'घरूपे' ति पुंवत्त्वाभावः स तत एव षष्ठीनिर्देशान्न त्वभाषितपुंस्कत्वान्नापि यौवनस्य जातित्वेन जातिवाचकत्वा'ज्जातेश्चे'ति प्रतिषेधाद्यतः स्थानिवत्सूत्रे युवजानिरिति प्रत्युदाजहार । पट्वी च मृद्वी च पट्वीमृद्व्यौ, ते इवाचरति पट्वीमृदूयते, पूर्वपदस्य क्यङ्परत्वाभावान्न पुंवत्त्वं, पचेर्ण्वुलि पाचिका, मद्रवृज्योः कनिति शैषिके कनि मद्रिका, पाचिकायते, मद्रिकायते, 'न कोपधाया'इति पुंवत्त्वनिषेधः । अत्र तद्धितग्रहणात्तद्धितेन वा 'युवोरनाकौ'वित्यकादेशेन वा यः कोपधस्तस्यैव ग्रहणमिति पाकायतइत्यत्र पुंवत्त्वं भवति । नन्वत्राजादिपाठाट्टापा वयोलक्षणस्य ङीपो बाधात्पुंवत्त्वापुंवत्त्वयोर्न विशेषः । सत्यम् । अत्राविशेषेपि अस्ति पाकभार्य इत्यत्र विशेषः । चतुर्थीयते, 'सञ्ज्ञापूरण्योश्चे'तिपुंवत्त्वनिषेधः । स्रौघ्नीयते 'वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकार'इति पुंवत्त्व निषेधः । वृद्धेर्निमित्तं अकारो णकारो वा यस्मिन्निति बहुव्रीह्याश्रयणात्, यावतीवाचरति यावत्यते इत्यत्र पुंवत्त्वं भवति, अत्रा'सर्वनाम्न'इत्याकारस्य वृद्धेर्वतुरेव निमित्तमिति नासौ वृद्धिनिमित्तवान्, तद्धितस्येतिवचनात्काण्डलावीवाचरति काण्डलावायते इत्यत्र पुंवत्त्वं भवति, तथारक्तविकारइतिवचनात्कषायेण रक्ता शाटी काषायी, तेन रक्तं रागादि'ति अणि ङीप्, खदिरस्य विकार, खादिरी ईषा, 'पलाशादिभ्यो वे'ति विकारेऽणञोरन्यतरस्मिन् ङीप्, काशायायते खादिरायतइति, अत्र पुंवत्त्वं भवति । व्याकरणमधीते वैयाकरणी ।

'तदधीते तद्वेदे'त्यणि ङीप्। सैवाचरति वैयाकरणीयते। 'न य्वाभ्या'-मिति निषेधादयो नास्ति वृद्धिनिमित्तकत्वमिति पुंवद्भावः, निमित्तशब्दः कुर्वद्रूपवचनः, दीर्घाः केशा अस्याः दीर्घकेशी, एवं, मृद्वङ्गी 'स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्' 'अङ्गगात्रकण्ठेभ्यश्चेति वक्तव्यमि'ति पाक्षिको ङीप्। दीर्घकेशीयते मृद्वङ्गीयते। 'स्वाङ्गाच्चेतोमानिनी'ति स्वाङ्गवचनात्परो य ईकारस्तदन्तस्य मानिनोन्यस्मिन्स्वरे पुंवत्त्वं निषिध्यते। करणीयते, इडबिडायते, दरद्यते, कठीयते,'जातेश्चे'तिपुंवत्त्वनिषेधः।'गोत्रञ्चचरणैः सहे'तिगोत्रचरणयोः जातिवाचित्वम्। इहापत्यं गोत्रम्, अपत्याधिकारादन्यत्र लौकिकं गोत्रं गृह्यतइति, चरणशब्दः शाखाध्यायिषु रूढः। अत्र इडविट् नाम जनपदो राजा वेति जनपदसमानशब्दत्वात् 'जनपदसमानशब्दात् क्षत्रियादञि'त्यत्र 'ते तद्राजा'इत्यापादपरिसमाप्तेः प्रत्ययानां तद्राजसञ्ज्ञकत्वात् 'अतश्चे'ति अकारप्रत्ययत्वेन स्त्रियां लुकि इडविट् स्त्री, ऐडविडः पुमान् भवति, दरदोपि जनपदसमानशब्दत्वात् द्व्यञ्मगधेत्यणः पूर्वं लुकि दरद् स्त्री दारदः पुमान्,एते गोत्रवचनाः, कठशब्दात् 'कलापिवैशम्पायनान्तेवासिभ्यश्चे'ति प्रोक्ते छन्दसि णिनेः 'कठचरकाल्लुगि'ति लुकि 'छन्दोब्राह्मणानि च तद्विषयाणी'ति छन्दोब्राह्मणप्रत्ययान्तानामध्येतृवेदितृप्रत्ययविषयत्वाद् 'तदधीते तद्वेदे'त्यणि तस्य 'प्रोक्ताल्लुगि'ति प्रोक्तप्रत्ययान्तात्परत्वेन लुकि शाखाध्ययननिर्वृत्तिः॥

'भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः'॥ अत्राच्वेरित्येकवचनं भृशाद्यवयवापेक्षम्, अयं च पर्युदास इति तत्सदृशप्रतिपत्त्या ऽभूततद्भावविषयेभ्यो भुवि भवत्यर्थे क्यङिति अर्थो भवति; प्रसज्यप्रतिषेधे तु भवतियोगे च्विविधानाद्भवतिनैव स्वार्थस्य भवनस्योक्तत्वाच्च क्यङः प्रसङ्ग इत्यर्थे अच्वेरिति वचनमनर्थकं स्यात्, न च सत्यस्मिन् च्व्यन्तादुत्पद्यमानेन क्यङा भवतेरनुप्रयोगस्य बाधनमाशङ्क्यं, यदिदमच्व्यन्ते सावकाशं भवतेरभावात् च्वेरप्यभावस्तद्योगे तस्य विधानात्, न च क्यषा योगे डाज्वचनप्रामाण्याद्भवतेरभावेपि क्यङो योगे च्वेः कल्पनं युक्तं, यत इदं वचनमच्व्यन्ते सावकाशं, भृशादिभ्य इति पञ्चमी लोपविधौ स्थानषष्ठी

इति'। 'तस्य हि परत्वादिति'। सुटो नुटश्च षष्ठीबहुवचनमवकाशः, आट्प्रभृतीनां चतुर्थ्येकवचनादि, ङेराम उभयप्रसङ्गे परत्वादाडादयो भवन्ति, तेषु कृतेषु सकृद्गतिन्यायाश्रयणात् सुट्नुटौ न भवतः। 'यश्च घादामुरिति'। किमेतिङव्ययघादाम्वित्येषः। चस्त्वर्थे, तुरेव वा पठितव्यः। 'आम् च लिटीति'। लिटि परतो य आम् कास्प्रत्ययादिति विहित इत्यर्थः। 'न तौ सर्वनाम्नः परौ स्त इति'। तेनात्र तावत्तयोरग्रहणं, यस्य चात्र ग्रहणं तस्यैवोत्तरत्राप्यधिकार इति बुद्धिधावपि तयोरग्रहणमिति भावः। आचारक्विबन्तानां सर्वादिनां सर्वार्थत्वाभावात्सर्वनामसंज्ञाभावात्सर्वनाम्नो लिट्यामोसंभवः, यस्तु मन्यते इह सामान्यग्रहणे सति यथासंभवं प्रकरणे कार्यप्रतिपत्तिः, ततश्च तयोरपि नुट्प्रसङ्ग इति तं प्रति परिहारान्तरमाह। 'सानुबन्धकाविति वेति', सामान्यग्रहणे तु सति पचतितरामित्यत्र यस्येति लोपं बाधित्वा परत्वान्नुट् स्यात्, कारयां चिकीर्षामित्यत्र तु नित्यत्वादयामन्तेत्ययादेशे ऽतो लोपे च कृते ह्रस्वाभावान्नास्ति नुटः प्रसङ्गः। 'उत्तरार्थमिति'। त्रेस्त्रय इत्यामि परतो यथा स्यात्। 'इह त्विति'। पञ्चमीनिर्द्देशस्त्वादित्यनुवृत्तेन सामानाधिकरण्यादवसीयते, एवं च कृत्वा हलि सर्वेषामितिनिर्द्देशोपपत्तिः॥

"त्रेस्त्रयः"॥ त्रेरिति षष्ठी, न पञ्चमी, निजां त्रयाणामिति निर्द्देशात्॥

"ह्रस्वनद्यापो नुट्"॥ 'पञ्चमी ह्रस्वनद्याप इति'। नामीति लिङ्गेन, अन्यथाङ्गनिमित्तस्य नामो नह्यस्ति संभवः॥

"षट्चतुर्भ्यश्च"॥ 'पञ्चानामिति'। नुटि कृते नोपधाया इति दीर्घः। न लोपः प्रातिपदिकान्तस्य। 'षण्णामिति'। झलां जशोन्त इति षकारस्य डकारो यरो ऽनुनासिक इति डकारस्य णकारः, ष्टुत्वम्, अथ ष्णान्ता षडिति रेफस्य प्रक्षेपणेन रेफान्ताया अपि संख्याया षट् संज्ञा कस्मान्न विहिता, एवं ह्यत्र चतुर्ग्रहणं न कर्त्तव्यं भवति, तथा षट्चतुर्भ्यो हलादिरित्यत्रापीत्यत आह। 'रेफान्ताया इति'। 'बहुवच-

ननिर्देशादिति’। शब्दप्राधान्ये हीतरेतरयोगे द्विवचनेन भाव्यं समाहारद्वन्द्वे त्वेकवचनेन भाव्यम्, अर्थप्राधान्ये तु षट्संज्ञका एव प्रत्येकं बह्वर्थाश्चतुःशब्दश्चेत्युपपद्यते बहुवचनम्, अत्रामः परत्वं शब्दद्वारकम्। ‘परमषण्णामिति’। अत्रापि षडर्थप्राधान्यात्तत एव पर आम् भवति, बहुव्रीहौ त्वन्यपदार्थस्य प्राधान्याच्च षडर्थापेक्षं परत्वमिति न भवति। ‘प्रियषञ्चामिति’। अल्लोपे कृते चुत्वं ञकारः॥

“श्रीग्रामण्योश्छन्दसि” ॥ ‘नित्यार्थं वचनमिति’। अन्यथा भाषायामिव विकल्पः स्यात्, छन्दसि नुडेव चेद्दृश्यते तस्य च लक्षणमस्ति, कोऽयं विकल्पप्रसङ्ग इति चिन्त्यमेतत्। ‘सूताश्च ते ग्रामण्यश्चेति’। नेदं कर्मधारयस्य वाक्यं किं तर्हि बहुवचनान्तयोर्यदेतरेतरयोगे द्वन्द्वस्तदा नुड्विधेः प्रयोजनं, यदैकवचनान्तयोः समाहारद्वन्द्वं कृत्वा एकशेषः क्रियते तदा ह्रस्वान्तत्वादेव नुट् सिद्ध इति न प्रयोजनमिति दर्शयति। एवं च तेशब्दो न पठितव्यः। अत्रापि नुडेव चेद्दृश्यते तस्य च निर्वाहोऽस्ति, इतरेतरेतरयोगद्वन्द्वो न करिष्यते, तदेवमिदं सूत्रं भाष्ये प्रत्याख्यातम्॥

“गोः पादान्ते” ॥ छन्दसीत्यधिकारादृक्पादस्यैव ग्रहणं न श्लोकपादस्येत्याह। ‘ऋक्पादान्तइति’॥

“इदितो नुम् धातोः” ॥ कुडि दाहे, हुडि संघाते।
अङ्गाधिकारात्तुमयं प्रत्यये परतो भवेत्॥
कुण्डेत्यादौ, ततश्च क्तिन् स्याच्चाकारो गुरोर्हलः॥

इत्याशङ्कयाह। ‘अयमिति’। अत्र प्रमाणमाह। ‘तथाहीति’। कथं पुनरेतज्ज्ञापकं यावता इक्श्तिपौ धातुनिर्देशे वक्तव्याविति इक्प्रत्यये कृते अङ्गसंज्ञायां सत्यां नुमा भवितव्यमिति लक्षणवशादेव नुमनुषक्तयोर्ग्रहणं कर्त्तव्यम्। एवं मन्यते। नायमिका निर्देशः किं तर्ह्यागन्तुकेनेकारेण, तत्राप्राप्तो नुमिति, नात्र किंचित्प्रमाणमस्तीत्याशङ्कयाह। ‘धातुग्रहणं चेति’। धातुत्वमेवापेक्षितं न त्वङ्गत्वमित्येवमर्थं धातुग्रहणं नान्यत्किंचित्प्रयोजनमस्तीति भावः। ननु च भेत्ता अभैत्सीदित्यत्राधात्वोस्तासिसिचोरिदितोर्नुम्निवृत्त्यर्थं धातुग्रहणं स्यादत आह।

'तासिसिचोरिति'। ननु चामंस्तेत्यादौ आत्मनेपदं ङित्त्वमपेक्ष्य सिजन्तस्यानिदितामिति लोपो माभूदित्येतत्सिचीदित्कार्यं स्यादित्यत आह। 'अमं स्तेत्यादाविति'। यथा हनः सिजिति कित्त्वविधानमस्य लिङ्गं तथा तत्रैव प्रतिपादितं, तासेस्तर्हीदित्करणं मन्तेत्यादौ आत्मनेपदैकवचनस्य डादेशे कृते टिलोपे च मनत् आ इति स्थिते नकारस्योपधालोपो माभूदित्येवमर्थं स्यादत आह। 'मन्तेत्यत्रेति'। नकारलोपो न भवतीत्यनुषङ्गः, जयादित्यस्तु आभीयमसिद्धत्वमनित्यमाश्रित्य तासेरिदित्करणमनुनासिकलोपप्रतिषेधार्थमित्यवोचत्, तन्मते धातुग्रहणं तासिनिवृत्त्यर्थं कर्त्तव्यमिति उपदेशे नुम् भवतीत्यत्र यत्नान्तरमास्थेयम्। इह भिदिर्प्रभृतिषु इकारस्योपदेशेऽनुनासिक इदितीत्सञ्ज्ञा रेफस्यापि हलन्त्यमिति, ततश्चेदित्त्वान्नुम् प्राप्नोति तत्राह। 'इरितामिति'। इरितामिर उपसङ्ख्यानमित्योपसङ्ख्यानिकी समुदायस्येत्सञ्ज्ञा न प्रत्येकं सौत्री, ततश्चानिदित्वान्नुम् न भवतीत्यर्थः। नन्वेवमपि स्वरितेत्त्वनिबन्धनमात्मनेपदं न प्राप्नोति भिदिर्प्रभृतिषु, तस्मात्प्रत्येकपक्षे परिहारो वाच्य इति मत्वा प्रत्येकपक्षे परिहारमाह। 'अवयवशोपीति'। अपर आह। इदित इति नायं बहुव्रीहिः किं तर्हि कर्मधारयः, ततश्च वर्णग्रहणमिदं भवति, तत्र तदन्तविधिनेत्सञ्ज्ञकेकारान्तस्य धातोर्नुमिति, अथेदितो धातवो नुमनुषक्ता एव कस्मान्न पठिताः, एवं हीदं न कर्त्तव्यं भवति, नुम् ग्रहणं तावदुत्तरार्थं कर्त्तव्यमिदितां च भूयस्त्वात्प्रत्येकं नकारोच्चारणादिदमेव सूत्रं लघीयः॥

"शे मुचादीनाम्"॥ मुचादयो मुच्लृ मोक्षणइत्यारभ्य तुदादिष्वागणान्ताद्वेदितव्याः। 'के पुनस्तृम्फादय इति'। व्यवस्थावाचिन्यादिशब्दे निरनुषङ्गाणामपि ग्रहणप्रसङ्गादिति प्रश्नः, प्रकारवाच्यादिशब्दः, प्रकारश्च सादृश्यं तच्च नकारानुषक्ततयेत्युत्तरं, यदि सानुषङ्गाणां पुनर्नुम् विधीयते एवं सति परस्य नकारस्यानुस्वारपरसवर्णयोः कृतयोर्नकारमकारयोः श्रवणप्रसङ्ग इत्यत आह। 'तेषामिति'। अथास्य नुमोपि लोपः कस्मान्न भवति तत्राह। 'स चेति'। 'विधानसामर्थ्या-

दिति'। अयं च मुचादिष्वेव लोपाभावस्य हेतुः, तृम्फादिषु तु परन- कारलोपस्य चियो लुङ्न्यायेनासिद्धत्वादेव पूर्वनकारस्य लोपाभावः सिद्धः, अथ मुचादिष्वेव तृम्फादयः कस्माच्च पठिता इत्यत आह। 'ये त्विति'। अयमभिप्रायः। सानुषङ्गाणां निरनुषङ्गाणां च तन्त्रेणार्थनिर्देशः, तत्र यदि सर्वे मुचादिषु पठेरन् निरनुषङ्गाणामपि नुम् प्रसङ्गः, सानुषङ्गाणां निष्कृष्य पाठे द्विरर्थनिर्द्देशेन गौरवप्रसङ्ग इति ॥

"मस्जिनशोर्झलि" ॥ 'मङ्क्तेति'। टुमस्जो शुद्धौ, तृच्, एकाच इतीट् प्रतिषेधः, अन्त्याज्जकारात्पूर्वो नुम्, स्कोः संयोगाद्योरन्ते चेति सलोपः, कुत्वम्, अनुस्वारपरसवर्णौ। 'नंष्टेति'। रधादिभ्यश्चेतीडभाव- पक्षे नुम्। 'मज्जनमिति'। जकारे परतः सकारस्य श्चुत्वे जश्त्वे च प्राप्ते जश्त्वस्यासिद्धत्वात् श्चुत्वं, शकारस्य जश्त्वं जकारः। 'मस्जेरित्यादि'। यद्यन्त्यादचः परः स्यात्तदा नस्जानां समुदायस्यैका संयोग- सञ्ज्ञेति सकारस्यासंयोगादित्वाल्लोपो न स्यात्, अथापि सजयोः पृथक् संयोगसञ्ज्ञामाश्रित्य लोपः स्यादेवमपि तस्य लोपस्यासिद्धत्वान्नकार उपधा न भवतीति तस्य लोपो न स्यात्, तस्मादन्त्याज्जकारात्पूर्वः सजयोर्मध्ये नुमेषितव्यः ॥

"रधिजभोरचि" ॥ रध हिंसासंराध्योः, जभ जृभी गात्रविनामे, इहास्य नुमोवकाशो रन्धनं रन्धत्वित्यादि, अत उपधाया वृद्धेरवकाशः पाचकः पाठकः, रन्धक इत्यादावुभयप्रसङ्गे परत्वाद्वृद्धिः प्राप्नोति, तत्राह। 'परापि सतीति'। वृद्धिस्तु नुमि कृते न प्राप्नोति, अकार- स्यानुपधात्वादित्यनित्या। 'रद्धेति'। रधादिभ्यश्चेति पक्षे इडभावः, झषस्तथोर्धो ध इति तकारस्य धत्वम्, इह जभेरचि, रधेर्लिटि च, नेटीति सूत्रन्यासः कर्त्तव्यः, तथा तु न कृतमित्येव ॥

"नेट्यलिटि रधेः" ॥ 'नुमि कृतइत्यादि'। ननु चेटि सत्यजादि- त्वान्नुमा भवितव्यं, प्रागेव चेटः कित्त्वं प्राप्नोति, न चालिटीत्यस्य वैयर्थ्यं, षष्ठ्यर्थवत्त्वात्, एवं हि धातोरित्यनुवृत्तेरुपदेश एव नुम् भवति। अचीत्येषा तु विषयसप्तमी। 'अयेति'। येषां छान्दसः कसुस्तेषामेव

विचारो नास्ति छन्दसि दृष्टानुविधानात्। 'एत्वाभ्यासलोपयोः कृत-योरिति'। वस्वेकाजाद्धसामित्यत्र कृतद्विर्वचनानामेकाचां ग्रहणादेव-मुक्तम्। 'तत्र कृते नुमागमइति'। अचीतिवचनात्। 'तस्येत्यादि'। यद्यपि ररन्धिवेत्यादिवत् क्त्वावप्यातिदेशिकं कित्त्वं नास्ति तथाप्यौपदे-शिकं क्त्वित्त्वमाश्रित्य नलोपो भवतीत्यर्थः। 'अथेत्यादि'। एवं सति-नेट्यलिटीति द्वावपि प्रतिषेधौ न वक्तव्यौ भवत इति भावः। 'विपरी-तमवधारणं संभाव्येतेति'। एवकारे तु क्रियमाणे न लाघवे विशेषः॥

"रभेरशब्लिटोः"॥ रभ राभस्ये, अनुदात्तेत्॥

"लभेश्च"॥ डुलभष् प्राप्तौ, अनुदात्तेत्,। 'लम्भो वर्त्ततइति'। उपसर्गादेव खल्घञोरिति नियमस्य वक्ष्यमाणत्वादपपाठोयम्। खनो घ चेति चकाराद्गुगः पदमितिवत् घप्रत्यय इत्येके। 'योगविभाग उत्त-रार्थ इति'। उत्तरो विधिर्लभेरेव यथा स्याद्रभेर्माभूत्, किं च शब्लिटोर्यथा-संख्यनिरासार्थश्च॥

"आङो यि"॥ अत्र धातोरित्यनुवृत्तेरुपदेशावस्थायामेव नुमा भवितव्यं, तस्माद् यीति विषयसप्तमीत्याह। 'यकारादौ प्रत्यये विषयइति'। प्रागित्यादिना विषयसप्तम्याश्रयणस्य फलं दर्शयति। 'तत्रेत्यादि'। रूपे तु नास्ति विशेषः, ण्यत्प्रत्ययेपि वृद्ध्या नैव भवि-तव्यं, नित्ये नुमि सति विहितनिमित्तत्वात्,। 'यति पुनरुत्तरपदा-द्युदात्तत्वं स्यादिति'। यतो नाव इत्युत्तरपदाद्युदात्तत्वात्। 'आलभ्य इति'। यक्। 'अनुषङ्गलोपः क्रियतइति'। एतेन यक्ल्यपौ व्याख्यातौ। तेन यीति सामान्योक्तावपि ण्यदेवोदाहृत इति भावः॥

"उपात्प्रशंसायाम्"॥ अत्र प्राप्तिरेव धात्वर्थः, प्रशंसा तु गम्यमानतया विशेषणमतो यस्य प्राप्तिर्यतो वा प्राप्तिः प्रशंसाहेतुर्भ-वति तत्रोदाहरणं, विपर्यये तु प्रत्युदाहरणम्॥

"उपसर्गात् खल्घञोः"॥ 'सिद्धे सतीति'। लभेश्चेत्यनेन। 'उप-सर्गादेवेति'। विपरीतस्तु नियमो न भवति उपसर्गात्खल्घञोरेवेति, ईषत्प्रलम्भः सुप्रलम्भ इति निर्देशात्॥

"न सुदुर्भ्यां केवलाभ्याम्" ॥ केवलश[1]ब्दः शब्दोपात्तादन्यस्य सजातीयस्याभावमाचष्टे, यथा हि ॥

केवलाभ्यामिहैताभ्यां प्रवेष्टव्यमितीरिते ।
अन्यस्य पुरुषस्यैव प्रवेशः प्रतिषिध्यते ॥
न शुक्रादेस्तथेहापि परस्परयुताविमौ ।
एकाकिनौ विजातीयसहितौ चापि केवलौ ॥

सुदुर्लभं सुलभं दुर्लभम् अतिसुलभमित्युदाहरणानि । 'सुलाभो दुर्लभ इति' । भावे घञ्, कर्मणि तु खल् भवति, यद्वा सुः क्षेपे, यथा सुषिक्तं नामेति, दुर्निन्दायां यथा दुर्ब्राह्मण इति, तेन कृच्छ्राकृच्छ्रार्थत्वाभावात्खलभावः । 'तृतीयां मत्वेति' । तृतीयापक्षे त्विदं प्रत्युदाहरणमित्यर्थः । अथ पञ्चमीपक्षेकस्माच्च प्रत्युदाहरणमित्याह । 'पञ्चम्या हीति' । न च तदापि प्रसुलम्भमिति प्रत्युदाहरणम्, उक्तं हि भाष्ये नैषोऽस्ति प्रयोग इति । 'अतिसुलभमित्यत्रेति' । उपसर्गादित्यनुवृत्तेरुपसर्गयोः सुदुरोरिह ग्रहणमितिभावः, अतिरतिक्रमणे चेत्यतः कर्मप्रवचनीयसंज्ञा, तया चोपसर्गसंज्ञा बाध्यते, एकसंज्ञाधिकारात् । 'पञ्चमीनिर्द्देशपक्षेपीति' । एवं च सर्वथा केवलग्रहणस्य कर्त्तव्यत्वात्क्रमव्यतिक्रमे कारणाभावात्पूर्वं तृतीयाश्रयणेन प्रत्युदाहरणं दर्शितम् ॥

"विभाषा चिण्णमुलोः" ॥ 'तेनानुपसृष्टस्य विकल्प इति' । तथा च वार्त्तिकं चिण्णमुलोरनुपसर्गस्येति ॥

"उगिदचां सर्वनामस्थानेऽधातोः" ॥ 'धातुवर्जितानामिति' । नेदमधातोरित्यस्यार्थप्रदर्शनं, तस्यान्यपरत्वात् । तस्मादञ्चतिग्रहणं नियमार्थमिति यदुच्यते तत्सिद्ध एवायमर्थः प्रदर्शितः[2] । अधातोरित्यस्य त्वर्थप्रदर्शनेऽउगितामङ्गानामञ्चतेश्चाधातोश्चोगितो नुम् भवतीति प्रदर्शनीयम् । 'अञ्चतेश्चेति' । अजितिप्रत्याहारग्रहणं तु न भवति नपुंसकस्य

१ शब्दोयमिति ई० पु० पाठः ।
२ प्रकाशित इति पा० ई० पु० ।

झलच इति पुनरज्ग्रहणात्, तत्र हि प्रत्याहारस्यैव ग्रहणं नाञ्चतेः झलन्तत्वात्। 'भवानिति'। अत्वसन्तस्य चेति दीर्घः। 'श्रेयानिति'। सान्तमहत इत्यादिना दीर्घः। अत्रावयवे कृतं लिङ्गं समुदायस्यापि विशेषकं भवतीत्यङ्गस्योगित्त्वम्। 'प्राङिति'। ऋत्विगित्यादिना क्विन्, सुः, हल्ङ्याब्भ्य इति सुलोपः, संयोगान्तलोपो, क्विन्प्रत्ययस्य कुरिति कुत्वं नकारस्य ङकारः। 'अञ्चतिग्रहणं नियमार्थमिति'। नह्यधातोरिति प्रतिषेधादप्राप्ते विध्यर्थमेतद्भवति, एवं ह्यधातोरिति न वक्तव्यं नियमादेव सिद्धेः। 'उखास्त्रदिति'। वसुस्रंस्वित्यादिना दत्वम्। 'अधातोरिति किमिति'। अञ्चतिग्रहणान्नियमादेव धातोर्न भविष्यतीति प्रश्नः। 'अधातुभूतपूर्वस्यापीति'। यस्य कदाचिदधातुत्वं दृष्टं तस्य संप्रति धातुत्वे सत्यपि यथा स्यादित्यर्थः। 'गोमत्यतेरिति'। सुप आत्मनः क्यच्, अविद्यमानः प्रत्ययो ऽप्रत्ययः, स पुनः क्विप्, अतो लोपः, क्यस्य विभाषेति यलोपः, नुम्, गोमान्, कथं पुनरत्र दीर्घत्वं, यावता ऽत्वसन्तस्य चाधातोरित्युच्यते, नैष दोषः। अधातोरिति तत्र विभज्यते, तत्सामर्थ्यादसन्तस्यैव प्रतिषेधः, नात्वन्तस्य, अत एव तत्र वृत्तौ असन्तस्यैव प्रत्युदाहरणमुपन्यस्तम्॥

"युजेरसमासे"॥ 'युङ्, युञ्जौ, युञ्ज इति'। पूर्ववत्क्विबादि। 'अश्वयुगिति'। सत्सूद्विषेत्यादिना क्विप्, एतदेवासमासवचनं ज्ञापकम् अङ्गाधिकारे तस्य च तदुत्तरपदस्य च ग्रहणं भवतीति। 'युजेरितीकारनिर्देशादिति'। नायमिका धातुनिर्देशः, किं तर्हि धातुपाठगतस्येकारस्यानुकरणमिति भावः। 'युजमिति'। संपदादित्वाद्भावे क्विप्॥

"नपुंसकस्य झलचः"। 'त्रपूणीति'। यद्यप्यत्रेकोचि विभक्ताविन्त्येव नुम् सिद्धस्तथाप्यजिति प्रत्याहारग्रहणस्यानन्यार्थत्वादनेनैव नुम् भवति, कः पुनरत्र विशेषस्तेन वा नुमि सत्यनेन वा, न तु[1] कश्चिद्विशेषो न्यायस्तु प्रदर्शितः। यद्येवं माकारि प्रत्याहारग्रहणमकार एव गृह्यतां झलत इति, कः पुनरेवं लाघवे विशेषः, किं चात्र प्रत्याहारग्रहण-

१ न खल्विति पा० ई पु०।

दुगिदचामित्यत्राञ्चतेर्ग्रहणं न प्रत्याहारस्येत्युक्तं तदपि विघटितं स्यात् । 'बहुपुरीति' । बहवः पुरो येषामिति बहुव्रीहावृक्पूरब्धूःपथामानक्ष इत्यकारः समासान्तः प्राप्तः समासान्तविधेरनित्यत्वाच्च भवति । विमला द्यौर्येषु तानि विमलदिवि दिनानि, इह झल्लक्षणस्य नुमो ऽवकाशो यदनुगिन्नपुंसकं सर्पींषि धनूंषि, उगिल्लक्षणस्यावकाशो यदुगिदनपुंसकं गोमान् यवमान्, उगितो झलन्तस्य नपुंसकस्योभयप्रसङ्गे परत्वादनेनैव नुम् भवति, अस्तु कृते पुनः प्रसङ्गविज्ञानादुगिल्लक्षणोपि नुम् प्राप्नोति, कथं पुनरेकमन्त्यमचमपेक्ष्यानेकस्य परत्वं संभवति, मा नाम संभूत्प्रयोगे, विधानकाले तु संभवति, यथा पचतीति लटः शपश्च, तत्र तुदन्ती नुदन्तीत्यत्र परस्य नकारस्यानुस्वारपरसवर्णयोः कृतयोर्द्वयोर्नकारयोः श्रवणं प्राप्नोति, न व्यञ्जनपरस्यैकस्यानेकस्य वा तुल्यजातीयस्य व्यञ्जनस्य श्रवणं प्रति विशेषोस्ति, इह तर्हि कृषन्ति रुषन्तीत्यत्र परस्य नुमोनुस्वारपरसवर्णयोः कृतयोः पूर्वस्याझल्परत्वादनुस्वारपरसवर्णौ न स्त इत्यट्कुप्वाङ्नुम्व्यवायेपीति णत्वं प्राप्नोति, यदा पुनरेको नुम् तदा तस्यानुस्वारश्च प्राप्नोति णत्वं च, तत्र णत्वस्यासिद्धत्वादनुस्वारे कृते परसवर्णः, तस्यासिद्धत्वाण्णत्वाभावः सिद्धः, तस्मादुगिल्लक्षणस्य प्रतिषेधो वक्तव्य इत्याशङ्क्याह । 'उगितो झलन्तस्येति' । सकृद्गतिन्यायो नाश्रीयतइत्येवकारेण दर्शयति । 'अनेनैवेति' । 'अन्त्यात्पूर्वइति' । रेफजकारयोर्मध्यइत्यर्थः ॥

"इकोचि विभक्तौ" ॥ 'इक इति किमिति' । पूर्वत्र यदज्ग्रहणं तदिहैव कर्त्तव्यं नपुंसकस्य झलः, अचोचीति, तेन तु हलन्तस्य न भविष्यति, संध्यक्षरान्तं तु नपुंसकं नास्त्येवेति प्रश्नः, अत एवादन्तं प्रत्युदाहरति न हलन्तम् । 'अचीति किमिति' । त्रपुभ्यामित्यादौ हलादौ सत्यपि नुमि स्वादिष्विति पदसंज्ञायां सत्यां न लोपः प्रातिपदिकान्तस्येति लोपेनैव सिद्धमिष्टमिति प्रश्नः । इतरोपि विदिताभिप्राय आह । 'उत्तरार्थमिति' । अस्थिदधिसक्थ्यक्ष्णामनङचि यथा स्यात् हलादावस्थिभ्यामित्यादौ माभूत्, पुनश्चोदयति । 'यद्येवमिति' ।

परिहरति । 'इह त्विति' । 'हे त्रपो इति' । अत्र प्रागेव गुणान्नुमः प्रसङ्गः, गुणे कृते ऽनिगन्तत्वादप्रसङ्गः । स्यादेतत् । अस्त्वत्र नुम् स्वमोर्नपुंसका- दिति सोर्लुकि सुबन्तं पदमिति पदसंज्ञायां नलोपो भविष्यतीति, तत्राह । 'न ङिसंबुद्ध्योरिति' । 'ननु चेत्यादि' । एवकारो भिन्नक्रमः प्रतिषेधेन संबद्ध्यमान औपचारिकमपि विभक्तेरस्तित्वं प्रतिषेधति, द्विविधं विभक्तेरस्तित्वं, मुख्यमौपचारिकं च, तत्र मुख्यं श्रूयमाणाया इतर- लुप्तायाः प्रत्ययलक्षणेन, तदिह लुप्तत्वान्मुख्यं तावन्नास्ति, प्रत्यय- लक्षणप्रतिषेधेनौपचारिकमपि नास्त्येव, तत्र विभक्तावित्युच्यमानो नुम् कः प्रसंगो यत्सर्वथैवासत्यां विभक्तौ स्यात्, नैव प्राप्नोति नार्थो ऽग्रहणेन । 'एतदेवेत्यादि' । अन्यथा ह्यऽग्रहणं न कुर्यात्, कृतं तु ज्ञापयति अजागन्ते नपुंसके संबुद्धिविषये प्रत्ययलक्षणप्रतिषेधो न भवतीति । तथाचेत्यादिना ज्ञापकस्य प्रयोजनं दर्शयति । संबुद्धौ चेति वर्तमाने[१] ह्रस्वस्य गुण इति विहितो गुणः सम्बुद्धिगुणः । 'तौम्बुरवमिति' । विकारे ओरञ् । 'इकोचीत्यादि' । इकः अचीत्युच्यते व्यञ्जनादौ माभूत् त्रपुभ्यां त्रपुभिः, अस्तु लोपः, अस्त्वत्र नुम् न लोपःप्रातिपदिकान्तस्येति नलोपो भविष्यति, स्वरः कथं, पञ्चत्रपुभ्यां पञ्चत्रपुभिः, इगन्ते उत्तरपदे द्विगौ पूर्वपदं प्रकृत्या भवतीत्येष स्वरो न प्राप्नोति, नुमि सत्यनिगन्तत्वात्, नलोपेपि कृते स्वरविधौ तस्यासिद्धत्वादनिगन्तत्वमेव । 'स्वरो वै श्रूय- माणेपि लुप्ते किंच भविष्यतीति' । वैशब्दः क्षमायां, श्रूयमाणेपि वै नकारे स्वरो भवति पञ्चत्रपुणे पञ्चत्रपुणः, स लुप्ते किं न भविष्यति, यत्र शास्त्रवशेन संभवो न प्रत्यक्षेण तत्र किं न भविष्यति, भविष्यत्येव, किं पुनः कारणं श्रूयमाणेपि नुमि स्वरो भवति, संघातभक्तोसौ नोत्स- हते तदुत्तरपदेगन्ततां विहन्तुं, यदि चान्तरङ्गः स्वरः प्रागेव विभक्त्युत्पत्तेर्भविष्यति, अत्र तर्हि अतिराभ्यामतिराभिरिति, अति- रिभ्यामिति स्थिते नुमि कृते तेन व्यवधानाद्रायो हलीत्याकारो न

१ अधिहत्येति पा० ई० पु० ।

प्राप्नोति, नलोपेपि कृते सुब्विधौ तस्यासिद्धत्वाद्व्यवधानमेव, संघात-भक्तो नुम् तमेव न व्यवदध्यात्, रैशब्दं तु व्यवदधात्येव, अथाप्यङ्गाधिकारे तस्य च तदुत्तरपदस्य चेति रैशब्दान्तस्याङ्गस्यात्वविधानान्नास्ति नुमाङ्गस्य व्यवधानं, तथापि निर्दिश्यमानस्यादेशा भवन्तीति रैशब्दस्य व्यवधानमेव, अथाप्यङ्गस्यात्वमेवमपि नुम एवात्वं प्राप्नोति, तत्र पूर्वस्य यणि सति अतिर्याभ्यामिति स्यात्, तथा प्रियतिसृभ्यां ब्राह्मणकुलाभ्यामित्यत्र प्रियत्रिभ्यामिति स्थिते तिसृभावो न स्यात्, नुमा व्यवधानात्। नलोपेपि कृतइत्यादि पूर्ववत्। नैष दोषः। 'रायात्वं तिसृभावश्च व्यवधानान्नुमा अपि' भवतः। व्यवधानादिति कर्मणि ल्यब्लोपे पञ्चमी, नुमा व्यवधानं प्राप्यापि भवत इत्यर्थः। विभक्तिविधानदशायां यदानन्तर्यं तत्तत्राश्रीयते न त्वादेशविधानदशायामिति भावः। नुमा अपीत्यत्र संहिताया अविवक्षितत्वात्सवर्णदीर्घत्वं न कृतम्, अन्ये मध्ये हि शब्दं पठन्ति, अपिशब्देनैतत्सूचयति, प्रकारान्तरेणाप्यात्वतिसृभावौ सिद्ध्यत इति, तत्कथम् अतिरिभ्यामितिस्थिते नुमात्वयोरुभयोरप्यनित्ययोः परत्वादात्वमेवं तिसृभावः, तत्र सकृद्गतिन्यायाश्रयणेन नुमभावः, सत्यपि वा नुमि न कश्चिद्दोषः, एवं तर्हि नुम्नुटोर्विप्रतिषेधार्थमन्यग्रहणं कृतं, ह्रस्वनद्यापो नुट् इत्यस्यावकाशः, अग्नीनां वायूनां, नुमोवकाशः त्रपुणे जतुने, त्रपूणां जतूनामित्यत्रोभयप्रसंगे पूर्वविप्रतिषेधेन नुडिष्यते। नामीति दीर्घो यथा स्याद् इति। स च विप्रतिषेधोऽन्यग्रहणे सत्युपपद्यते, द्वयोरप्यनित्यत्वेन तुल्यबलत्वात्, असति हि त्वन्यग्रहणे कृताकृतप्रसङ्गित्वान्नित्यत्वान्नुमेव स्यात्, एतदपि प्रयोजनं दूषयति। 'नुड्वाच्य-इति'। क्रियमाणेप्यन्यग्रहणे नुट् तत्र वाच्यः, वचनेनैव साध्यो ऽन्यथा परत्वान्नुमेव स्यात्। ततश्चान्यग्रहणं कर्तव्यं पूर्वविप्रतिषेधश्च वक्तव्य इति यत्नद्वयमाश्रयणीयम्, तत्रान्यग्रहणमकृत्वा एक एव नुडर्थो यत्नः कर्तव्य इत्यर्थः। इदं तर्हि प्रयोजनं तेनैव यत्नेन नुटि तत्रैवानजादौ नुम् माभूत्, अस्तु, लोपो भविष्यति, नलोपस्यासिद्धत्वादनजन्तत्वान्नामीति दीर्घत्वं न स्यात्, माभूदेवं, नोपधाया इत्येवं भविष्यति, इह तर्हि

शुचीनाम्, इन्हन्पूषार्यम्णां शौ, सौ चेति[1] नियमाद्दीर्घत्वं न स्यात्, प्रतिपदोक्तस्येनस्तत्र ग्रहणं, लाक्षणिकश्चायम्, एवं प्रत्याख्याते ऽच्यहणे प्रयोजनमाह । 'उत्तरार्थं त्विति' । तुशब्दस्तर्ह्यर्थे, यद्युत्तरत्रास्य प्रयोजनं तर्हि तत्रैव कर्त्तव्यमत आह । 'इह किंचिदिति' । तुशब्दस्य यण् न कृतः इकोऽसवर्णे शाकल्यस्येति प्रकृतिभावविधानात्, त्रपो इत्यत्र तु संबुद्धौ शाकल्यस्येतावनार्षे इति प्रगृह्यत्वादवादेशाभावः, केचिदत्र हे त्रपो हे त्रपु इति द्वैरूप्यमिच्छन्ति, प्रत्ययलक्षणप्रतिषेधस्यानित्यत्वं ज्ञाप्यते, न त्वस्मिन्विषये सर्वथैवाभाव इति वदन्ति, तथा च भाष्ये हे त्रपु हे त्रपो इति द्वयमप्युदाहृतम्, अन्ये तु हे त्रप्विति प्राप्ते हे त्रपो इति भवतीति भाष्यं व्याचक्षाणा नित्यमेव गुणमिच्छन्ति, तथा च वृत्तौ गुण एवोदाहृतः ।

"तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य" ॥ नपुंसकस्येति यत्षष्ठ्यन्तं प्रकृतं तदिह भाषितपुस्कंमित्यनेन संबन्धात्प्रथमान्तं संपद्यते । 'पुंवदिति' । पुंशब्देन तुल्यमित्यर्थः । केन पुनः प्रकारेण पुंशब्देन तुल्यं वर्त्तत इत्यपेक्षायामाह । 'यथेति' । नुम्ह्रस्वयोरभावः पुंशब्दे दृष्टस्तद्द्वारेण यत्सादृश्यं तदिहातिदिश्यते, अन्यस्य कस्य चित्तृतीयादिषु पुंशब्देन सादृश्यस्यासंभवात्, तेनार्थान्नुम्ह्रस्वयोः प्रतिषेधोयं संपद्यते । नन्वेवमपि प्रकृतत्वान्नुम एवाभावातिदेशो युक्तो न ह्रस्वस्य, ततश्च ह्रस्वस्यावस्थितत्वात्तदाश्रयाणां गुणनाभावनुडौत्वानां प्रतिषेधो वक्तव्यः, गुणः, घेर्ङिति, ग्रामण्ये कुलाय, नाभावः, आङो नास्त्रियां, ग्रामण्या कुलेन, नुट्, ह्रस्वनद्यापो नुट्, ग्रामण्यां कुलानाम्, औत्वम्, औत्, अच्च घेः, ग्रामण्यां ब्राह्मणकुले । नैष दोषः । अतिदेशसामर्थ्याद्ध्रस्वाभावोप्यतिदिश्यते, अन्यथा प्रतिषेधमेव गालवस्य विदध्यात् । 'ग्रामणीर्ब्राह्मण इति' । भाषितपुंस्कप्रदर्शनमेतत् । 'ग्रामणि ब्राह्मणकुलमिति' । नपुंसकह्रस्वत्वं भवति, अतस्तदभावोतिदिश्यत इत्यनेन दर्शितं, परिशिष्टमुदाहरणं शुचि-

१ एतस्माच्चियमादिति ङ॰ पु॰ पाठः ।

ब्राह्मणकुलमिति प्रक्रमाभेदाय दर्शितं, प्रत्युदाहरणेषु यथायोगं नित्यमेव नुम्ह्रस्वौ भवतः। 'पीलु फलमिति'। विकारे श्नोरञः फले लुक्। समानायामाकृतावित्यस्यैव विवरणं 'तुल्येप्रवृत्तिनिमित्तइति'। यद्योगाद् द्रव्ये शब्दनिवेशस्तत्प्रवृत्तिनिमित्तं ग्रामनयनादि। अस्त्वेवं प्रकृते किमायातं तत्राह। 'इह त्विति'। पुंसि शब्दस्य या प्रवृत्तिस्तत्र वृक्षाकृतिः वृक्षावान्तर जातिर्निमितमित्यर्थः। 'फलाकृतिर्नपुंसकइति'। प्रवृत्तिनिमित्तशब्दस्येत्यनुषङ्गः, फलाकृतिः फलावान्तरजातिः, तत्र यद्यपि पीलोः फलमिति व्युत्पत्तौ वृक्षावान्तरजातिरप्यङ्गीकृता तथापि न सा फले प्रवृत्तिनिमित्तं, किं तर्हि फलावान्तरजातिरेवेति। भिद्यते निमित्तं तदेतदेवमित्यादि स्त्रियाः पुंवदित्यत्रैतद्व्याख्यातं तत एवावधार्यम्। 'कीलालपेनेति'। ह्रस्वस्य निवृत्तावातो धातोरिति लोपः स्यात्॥

"अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः"॥ अनङो द्वितीयोकार उच्चारणार्थः,ङकारोन्तादेशार्थः,अस्थ्यादयो नब्विषयस्यानिसन्तस्येत्याद्युदात्ताः, शेषमनुदात्तं, तत्रान्तर्यतोनुदात्तआदेशे प्राप्ते उदात्तवचनमस्येत्यादावल्लोपेन इत्यकारलोपे अनुदात्तस्य च यत्रोदात्तलोप इति विभक्तेरुदात्तत्वार्थं, विभाषा ङिश्योरित्यल्लोपाभावपक्षे त्वकारस्य उदात्तस्य श्रवणं भवति अ स्थनीति, तथा छन्दस्यपि दृश्यतइत्यत्र इन्द्रो दधीचो अस्थभिरिति। 'एतैरस्थ्यादिभिरित्यादि'। अत्राङ्गाधिकारे तस्य च तदुत्तरपदस्य चेति तदन्तस्य तावद्ग्रहणं भवति तथा नपुंसकस्येत्यनुवृत्तं श्रुतत्वादस्थ्यादीनां विशेषणं न प्रकृतस्याङ्गस्य, तेनानपुंसकस्यापि तस्य ग्रहणं, किमर्थं पुनरस्थ्यादयो नपुंसकत्वेन विशेष्यन्ते यदृच्छाशब्दानां पुल्लिङ्गानां माभूत् दधिर्नाम कश्चित्तेन दधिनेति, नैतदस्ति प्रयोजनम्।

अभिव्यक्तपदार्था ये स्वतन्त्रा लोकविश्रुताः।
शास्त्रार्थस्तेषु कर्त्तव्यः शब्देषु न तदुक्तिषु॥

एवं तर्हि नपुंसकस्येत्यनुवृत्तस्यान्वयप्रदर्शनमात्रं कृतम् एतैरस्थ्यादिभिर्नपुंसकैरिति॥

"छन्दस्यपि दृश्यते" ॥ छन्दसीत्येव सिद्धे ऽपि दृश्यतइत्येतत्सर्वोपाधिव्यभिचारार्थम्, अन्यथारम्भसामर्थ्यात्कस्य चिदेव व्यभिचारः शङ्क्येत, तदिदमुक्तम्। 'यत्र विहितस्ततोन्यत्रापि दृश्यतइति'। 'अस्यन्वन्तमिति'। अनङि कृते अतो नुडिति मतुपो नुट् अनङो नकारस्य लोपः ॥

"ई च द्विवचने" ॥ 'अक्षी इति'। अक्षि औ इति स्थिते औङः शी भावः, पूर्वस्य ईकारस्तत्र प्रथमयोः पूर्वसवर्ण इति दीर्घस्य दीर्घाज्जसि चेति नित्ये प्रतिषेधे प्राप्ते वा छन्दसीति पक्षे पूर्वसवर्णदीर्घत्वम्। अकः सवर्णे दीर्घ इति वा दीर्घत्वम्। ननु चासत्यप्यस्मिन्वचने पूर्वसवर्णदीर्घत्वेनैव सिद्धं, नात्र पूर्वसवर्णदीर्घत्वं प्राप्नोति परत्वान्नुमा बाध्यते, एवं तर्हि छन्दसि नपुंसकस्य पुंवद्भावो वक्तव्यः, मधोस्तृप्ता इवासतइत्येवमाद्यर्थं, तेन पुंवद्भावेन नुमि शीभावे चासति पूर्वसवर्णदीर्घत्वेनापि सिद्धमक्षी इति, सत्यं, स्वरस्तु न सिध्यति, अक्षिशब्दस्य नब्विषयस्यानिसन्तस्येत्याद्युदात्तत्वात्, न च पुंवद्भावेन स्वरस्याप्यभावातिदेश इष्यते, तस्मात्स्वरार्थमत्रापीकार एव विधेयः ॥

"नाभ्यस्ताच्छतुः" ॥ 'ददद्दिति'। श्नाभ्यस्तयोरात इत्याकारलोपः, जक्षित्यादौ जक्षित्यादयः षडित्यभ्यस्तसंज्ञा, कथं पुनश्चतुर्भिर्योगैर्व्यवहितस्य नुमः प्रतिषेधः शक्यो विज्ञातुमित्याह। 'शतुरनन्तरो न विहित इति'। अनन्तर ईकारः शत्रन्तस्य न विहितः, एवं तदनन्तरइति यावद्विहितान्वेषणे नुमि पर्यवसानम् ॥

"आच्छीनद्योर्नुम्" ॥ 'अवर्णान्तादङ्गादुत्तरस्य शतुरिति'। सूत्राक्षरैस्तावदयमेवार्थः प्रतीयते इत्येवं व्याख्यातं न पुनरयं व्यवस्थितः सूत्रार्थः, दूषणस्य वक्ष्यमाणत्वात्, तस्माचाप्रदर्शितविषयं दूषणं शक्यं वक्तुमिति विषयप्रदर्शनपरमिदं द्रष्टव्यम्। 'याती कुले इति'। नपुंसकाच्चेत्यौङः शीभावः। 'याती ब्राह्मणीति'। उगितश्चेति ङीप्। 'करिष्यतीति'। लृट्, लृटः सद्वा, ऋद्धनोः स्यइतीट्। 'अत्रेत्यादि'। चोद्यम्, अन्तरङ्गत्वं पुनरेकादेशस्य शतृमात्रापेक्षत्वात्, नुमस्तु बहिरङ्गत्वं शीनद्युत्पत्त्यपेक्षत्वात्। अपवर्गो भेदः, इदमवर्णान्तमङ्गमयं शतृप्रत्यय

इत्येवं रूपः, स एकादेशे कृते नास्ति क्षीरोदकवत्, तद्यथा क्षीरोदके संयुक्ते न ज्ञायेते इदं क्षीरमिदमुदकममुष्मिन्नवकाशे क्षीरममुष्मिन्नवकाशे उदकमिति । 'अवर्णान्तादङ्गादुत्तरस्य शतुरिति न युज्यते वक्तुमिति'। यथा पूर्वमवोचस्तथा न युज्यत इत्यर्थः। तथा हि सर्वत्रैवावर्णस्य निवृत्त्या भवितव्यं क्वचिल्लुका अदती घ्नतीति, क्वचिच्छ्लुना जुह्वतीति, तुदतीत्यादावेकादेशेन, लुनतीत्यादौ श्नाभ्यस्तयोरात इत्याकारलोपेन। स्यादेतत्। एकादेशविषयेऽन्तादिवद्भावेन व्यपवर्गो भविष्यतीति, तत्राह। 'उभयत आश्रय इति'। यत्र च पूर्वं परं चोभयं युगपदाश्रीयते न तत्रान्तादिवद्भावोऽस्तीति, यथा उपसर्गाद्ध्रस्व ऊहतेः, प्रोहते, एतेर्लिङि अभीयादिति । इहाप्यवर्णान्तमङ्गं शता चेत्युभयं युगपदाश्रीयते, इति नास्त्यन्तादिवद्भावः, एतर्ह्युच्यते चेदमवर्णान्तादङ्गादुत्तरस्य शतुरिति,[1] न च सम्प्रत्येवंविधः शता क्वचित्सम्भवति तत्र भूतपूर्वगतिराश्रयिष्यते पूर्वं यः शता अवर्णान्तादङ्गादुत्तर आसीदिति तत्राह । 'भूतपूर्वगत्याश्रयणेवेति'। समाधिः, समाधानं, परिहारः। 'अवर्णान्ताच्छब्दादिति'। अङ्गादिति द्रष्टव्यम्, अन्यथा ददतीत्यादावपि प्रसङ्गात्, भवति ह्यत्रापि शत्रवयवादकारात्परस्तकारः, कथं पुनरवर्णान्तस्याङ्गत्वमेकादेशस्यान्तवद्भावात्, नहीदानीं परम्प्रत्यादिवत्त्वं विवक्षितं, तकारस्य स्वयमेव शत्रवयवत्वात्, एवं तेन तकारेण पुनरङ्गस्य तदन्त विधिः, अङ्गस्येत्येतदत्रावर्त्यते। 'अपरे पुनरिति'। अत्रापि, पक्षे युगपदुभयं नाश्रीयते किं तु क्रमेणेत्यस्त्यन्तादिवद्भावः। ननु च तुदन्तीत्यादावन्तादिवद्भावादवर्णान्तमङ्गं भवतु तथापि न ततः परं शीनद्यौ, तकारेण व्यवधानादित्यत आह। 'तत्रेति'। प्रकृतो नुम् प्रतिषेधेन संबद्ध इति तदनुवृत्ताविहापि प्रतिषेध एव विकल्प्येन, शीनद्योर्वा नुम् न भवति अवर्णान्तादिति, केन पुनः प्रसङ्गः, इदमेव ज्ञापकं स्यात् अस्ति शीनद्योर्नुमिति, ततश्च कुर्वतीत्यादावनवर्णान्ताच्चित्यं नुमः प्रसङ्गः, मैवं विज्ञायीति नुम्ग्रहणम् ॥

[1] न च संप्रत्येवंविधः शता क्वचित्संभवतीति नास्ति· २ पु· ।

"शप्श्यनोर्नित्यम्" ॥ 'इत्येतयोः शतुरिति' । एतयोः संबन्धी यः शता तस्येत्यर्थः, संबन्धश्च निमित्तनिमित्तिभावः, क्वचित्तु संबन्धिन इति पठ्यते । 'नित्यग्रहणमिति' । ननु चारम्भसामर्थ्यादेव नित्यं भविष्यति तत्राह । 'इहेति' ॥

"सावनडुहः" ॥ इह चतुरनडुहोरामुदात्त इत्यामागमः सर्वनामस्थानमात्रे विधीयमानः सोऽन्यत्र सावकाशो निरवकाशेन नुमा बाध्येत, तथा संबुद्धेरन्यत्र सो सावकाशो नुम् संबुद्धौ विशेषविहितेनाम् संबुद्धावित्यनेन बाध्येतेत्याशङ्क्याह । 'अत्र केचिदित्यादि' । कथं पुनरादित्यस्यानुवृत्तौ सत्यामप्याममोः कृतयोर्नुम् भवति, न पुनर्यं एवानडुहि नित्यः संनिहितोऽकारस्तत एव परः स्यात् । उच्यते । एवं सति मिदचोन्त्यात्पर इति परिभाषा बाध्यते, तत्राबाधेनोपपत्तौ सत्यां बाधो न न्याय्यः, तत्र यथापरिभाषा न बाध्यते आदित्यनुवृत्तिश्च सा[१]र्थिका भवति तथा वक्तव्यं, यदि चाममोरकृतयोर्नुम् स्यात्तेदमुभयमनुगृहीतं स्यादिति कृतयोरेव तयोर्नुम् भविष्यति । 'अमामौ च न बाध्येते इति' । न केवलममेव न बाध्यते अपि त्वाममावुभावपि न बाध्येते इत्यर्थः । अमत्र दृष्टान्तत्वेनोपात्तः, यथाम् न बाध्यते तथा आमितिभावः, न पुनरमो नुमा बाधशङ्का, अमो विशेषविहितत्वात् । 'आममूभ्यां च नुमिति' । न बाध्यतइति वचनविपरिणामेनानुषङ्गः, अत्रापि यथा आमा न बाध्यते तथा ऽमापीत्यर्थः, न पुनरामा नुमो बाधशङ्का, तस्य सामान्यत्वात् । 'अपरे त्वित्यादि' । इच्छन्तीति वचनादिष्टिरेवेयमिति केचित् । अन्ये त्वाहुः । भवतु वा सामान्यविशेषयोः संनिधौ बाध्यबाधकभावः, इह त्वनेकेन योगेन व्यवधानम्, असति हि संभवे बाधनं भवति, इह च अस्ति संभवो यदुभयं स्यादित्याममोर्नुमश्च समावेश इति । 'यथेति' । अत्र नाप्राप्ते द्विवचने दीर्घ आरभ्यते, अथ च संभवात्प्रकरणभेदाच्च समावेशः । 'बहूनड्वांहि ब्राह्मकुलानीति' । परत्वादामि कृते पुनः प्रसङ्गविज्ञानाचपुंसकस्य झलच इति नुम् भवति ॥

१ रचितेति ६ पु॰ पाठः ।

"दृक्स्ववस्स्वतवसां छन्दसि" ॥ इदृङित्यादौ त्यदादिषु दृशो-नालोचने कञ्चेति क्विनि नुमि च कृते पूर्ववत्कुत्वम् ॥

"दिव औत्" ॥ धातोः प्रतिषेधो वक्तव्यः, अक्षद्यूरिति, एकदेशविकृतस्यानन्यत्वादूठि कृते दिवशब्द एवायमिति प्रसङ्ग इति, अधात्वधिकारात्सिद्धम्, अधातोरित्यनुवर्त्तते, क्व प्रकृतम्, उगिदचां सर्वनामस्थानेधातोरिति, यदि तदनुवर्तेत नपुंसकस्य झलच इत्यत्रापि संबध्येत, ततश्च काष्टतक्षि ब्राह्मणकुलानीत्यत्र न स्यात्, तस्मादशक्यं तदनुवर्त्तयितुं, ततश्च धातोः प्रतिषेधो वक्तव्य एवेत्याशङ्क्याह । 'दिव् इति प्रातिपदिकमित्यादि ॥

"पथिमथ्यृभुक्षामात्" ॥ 'पन्था इति' । इतोत्सर्वनामस्थानइतीकारस्याकारः, सवर्णदीर्घत्वं, थोन्थः, अनुनासिकस्य नकारस्यान्तर्यतोऽनुनासिक आकारः कस्मान्न भवतीत्याशङ्क्याह । 'स्थानिन्यनुनासिकेपीति' । अत्र कारणमाह । 'भाव्यमानेनेति' । के चिद्भाव्यमानोण् सवर्णान्न गृह्णाति इति पठन्ति, तेषामप्यण्ग्रहणं ग्राहकोपलक्षणार्थं, तेनाकारोपि भाव्यमानो ग्राहको न भवति, तपरस्तत्कालस्येत्यनेन तु ग्रहणशङ्का, उक्तं हि तत्र, अनणि विध्यर्थमेतदिति। स्यादेतत्। माभूत्सवर्णग्रहणम् अनुनासिकस्यैव तु सूत्रउच्चारणात्स एव स्यादित्यत आह । 'शुद्धो ह्ययमिति' । अकारविधाने अतो गुणे पररूपं स्यात्, अकारविधानं तु नकारनिवृत्त्यर्थं स्यात्, लोपविधौ गौरवप्रसङ्गात्तस्मादाकार एव विहितः ॥

"इतोत्सर्वनामस्थाने" ॥ अद्वचनं किमर्थं ह्रस्वस्य श्रवणं यथा स्यात् । नैतदस्ति । सौ तावदकः सवर्णदीर्घत्वं भवति, अन्यत्रापि नोपधायाः सर्वनामस्थाने इति दीर्घेण भाव्यं, तस्मात्प्रकृत आकार एव विधेयोत आह । 'आदिति वर्तमानइति' । यत्रायं विहितोऽकारः सपूर्वो भवति तत्रास्य प्रयोजनमित्यर्थः । तदेव दर्शयति । 'ऋभुक्षणमित्यत्रेति' । अकारविधौ त्वेकमेव रूपं स्याद् दीर्घविकल्पस्तु तक्षणं तक्षाणमित्याद्यर्थं स्यात्, स्थानिन्यादेशे च तपरकरणं मुखसुखार्थम् ॥

does require an independent word (in the nominative case), in order to establish its own signification.

[*Page* 404.] Or again—

"एषो ऽहमद्रितनयामुखपद्मजन्मा
प्राप्तः सुरासुरमनोरथदूरवर्ती ।
स्वप्ने ऽनिरुद्धघटनाधिगताभिरूप-
लक्ष्मीफलामसुरराजसुतां विधाय" ॥ [*Ushāharaṇa.*]

["Here I am come after having made the daughter of the king of Rākshasas such as having the splendour of her beauty rendered fruitful by her connection in a dream, with Aniruddha,—I who am come in accordance with the word of Gaurī, and who am above the desires of Gods and Rākshasas."]

[*Page* 405.] Here what is to be said is that 'I am above *even* the desires, &c.' मनोरथानामपि दूरवर्त्ती (which the words fail to signify).

Or again—

"त्वयि निबद्धरतेः प्रियवादिनः प्रणयभङ्गपराङ्मुखचेतसः ।
कमपराधलवम्मम पश्यसि त्यजसि मानिनि दासजनं यतः" ॥
[*Vikramorvaçiya*, Act IV.]

["O thou self-respectful one! What trace of fault do you find in me that you give me up, your servant?—I who have my love fixed in you, and have spoken softly and affectionately, and whose mind is now tossed away, on account of this breach of love!"]

Here '*even* a trace of fault' अपराधस्य लवमपि—is what ought to have been said.

[*Page* 406.] (14) To exemplify *The Misplacement of Word:*—

"प्रियेण संग्रथ्य विपक्षसंनिधौ उपाहितां वक्षसि पीवरस्तने ।
स्रजं न काचिद्विजहौ जलाविलां वसन्ति हि प्रेम्णि गुणा न वस्तुषु" ॥
[*Kirātārjunīya,* Act VIII.]

["No woman ever gave up the garland—though dirtied with water—that had been knitted and placed on the developed breasts by the lover in presence of her rivals;—the quality lies in the love, and not in its tokens!"

(*a*) Here the proper form would have been काचिन्नविजहौ.

[*Page* 407.] Or again—

"लग्नः केलिकचग्रहश्लथजटालम्बेन निद्रान्तरे
मुद्राङ्कः शितिकन्धरेन्दुशकलेनान्तःकपोलस्थलम् ।
पार्वत्या नखलक्ष्मशङ्कितसखीनर्मस्मितह्रीतया
प्रोन्मृष्टः करपल्लवेन कुटिलाताम्रच्छविः पातु वः" ॥

["May the curved red mark made on Pārvati's cheek, by Çiva's moon-digit, in her sleep, resting on the knotted hair of Çiva caught hold of in dalliance, protect you!—the mark wiped off by Pārvatī, abashed by the smile of her companions, who suspected the mark to be of nails."

(*b*) Here कुटिलाताम्र must have been placed before नखलक्ष्म, &c.

[*Page* 409.] (15) To exemplify the *Misplaced Compound*—

"अद्यापि स्तनशैलदुर्गविषमे सीमन्तिनीनां हृदि
स्थातुं वाञ्छति मान एष धिगिति क्रोधादिवालोहितः ।
प्रोद्यद्दूरतरप्रसारितकरः कर्षत्यसौ तत्क्षणात्
फुल्लत्कैरवकोशनिस्सरदलिश्रेणीकृपाणं शशी" ॥

["'Even yet, this feeling of self-respect, wishes to stay in the hearts of women, fortified by the hill-like breasts, woe is to me!'—having said this and becoming reddened with rage, the moon, that very moment, having spread his hand (rays) far and wide, draws the sword, in the shape of the line of black bees, issuing forth from the blooming white lily."]

Here there are no compounds in the speech of an angry person, the moon, (as is proper); on the contrary, it is found in the assertion of the poet.

(*a*) Remarks the *Pradipa*—Here the position of the negative is not very happy: ...Since the meaning of न काचिद्विजहौ *i. e.* not a few gave it up, implies that all gave it up.

(*b*) Since the fact of the mark being red and curved was the reason of its being mistaken for a nail-mark.

[*Page* 410.] (16) To exemplify the *Confused*,—*i. e.* where the words and phrases of one sentence are mixed up with another sentence—

"किमिति न पश्यसि कोपं पादगतं बहुगुणं गृहाणेमम् ।
ननु मुञ्च हृदयनाथं कण्ठे मनसस्तमोरूपम्" ॥

["What, do you not see the Lord of your heart, the receptacle of many qualities, fallen on your feet? Embrace him in his neck! And give up your anger resembling the Darkness of your heart."]

If it were a single sentence it would be क्लिष्ट (see *Text*, p. 318.), but here there are many sentences, the parts of one running into the others, and thus making the whole a confused mass.

(17) To exemplify the *Parenthetical*—*i. e.* when a whole sentence runs into another—

"परापकारनिरतैर्दुर्जनैस्सह संगतिः ।
'वदामि भवतस्तत्त्वं' न विधेया कदाचन" ॥

["Company of bad men, ever given to doing ill of others—I tell you the truth—is never to be kept."]

Here the third foot has run into the midst of another sentence.

Or again—

"लग्नं रागावृताङ्ग्या सुदृढमिह ययैवासियष्ट्या ऽरिकण्ठे
मातङ्गानामपीहोपरि परपुरुषैर्या च दृष्टा पतन्ती ।
तत्सक्तो ऽयं न किंचिद्गणयति-विदितं ते ऽस्तु-तेनास्मि दत्ता
भृत्येभ्यः श्रीनियोगाद्गदितुमिव गतेत्यम्बुधिं यस्य कीर्तिः" ॥

["Whose fame repaired to the ocean carrying a message under the orders of Lakshmī, (the Goddess of wealth)—the message being in the form that—'O ocean! this sword (woman) corroded with blood (full of love) which fell on the heads of enemies, and which was seen by other people falling on elephants (repairing to Chanḍālas for dalliance),—being attached to this very sword

(woman) this king thinks of nothing else—be this known to you,—and by him am I given away to servants,'"]

Here विदितं तेऽस्तु is unnecessarily inserted; and further, the implication (which is contrary to the praise of the King) that the Goddess of wealth will be disappearing from there is also hinted.

(18) "For the sound of मञ्जीर (anklet) the proper term is said to be रणित and the like (*jingling*, &c.); for that of birds, कूजित *(warbling)* &c.; for those proceeding at the time of dalliance स्तनित, मणित, &c. (Murmur, &c.); and that of clouds, गर्ज्जित, and the like (thundering)."

These are the well-known forms; and the disregard of such accepted rules is *Disregard* of *Usage*—which to exemplify—

"महाप्रलयमारुतक्षुभितपुष्करावर्तक-
प्रचण्डघनगर्जितप्रतिरुतानुकारी मुहुः ।
रवः श्रवणभैरवः स्थगितरोदसीकन्दरः
कुतोऽद्य समरोदधेरयमभूतपूर्वः पुरः" ॥

[*Vēṇīsaṁhāra*, Act III.]

["Whence this unprecedented terrible sound of the ocean of battle, pervading the valley mediating between the earth and the sky (*i. e.* all space)—the sound imitating as it were the echo of the thunder of dense clouds moved to and fro by winds at the time of universal dissolution?"]

Here रव, applicable by usage to the sound of frogs, &c., is transferred to the 'lion-roar' (as the sound of battle is often described).

[*Page* 414.] (19) To exemplify *Violated Uniformity* of *Expression*—

"नाथे निशाया नियतेर्नियोगात्
अस्तं गते हन्त निशाऽपि याता ।
कुलाङ्गनानां हि दशानुरूपं
नातः परं भद्रतरं समस्ति" ॥

["The Lord of Night having gone away in the natural course, Night too is gone! There is no better similarity of the condition of virtuous women of good family."]

(*a*) Here the uniformity of the root गम-is broken by the later use of या (in याता). The proper reading should be 'गता निशाऽपि.'

[*Page* 415.] Here it is objected that it has been laid down before that "one word should not be twice used," and this double use of words has been exemplified as faulty under 'Repetition of Words;' and as such how could one and the same root गम् be properly used twice? It is replied—The double use of a word is forbidden in all places except where precisely what has gone before is rementioned in what follows (that is to say in the present instance the action of *going*, spoken with regard to the night, is meant to be exactly the same as the *going* of the moon, in order to tally with the action of a virtuous woman; and as such the repetition of the root गम् would only add to its excellence). In fact in such cases it would have been faulty, if the same word (or its representative pronoun) were not used:

[*Page* 417.] In the following—

"उदेति सविता ताम्रस्ताम्र एवास्तमेति च ।
सम्पत्तौ च विपत्तौ च महतामेकरूपता" ॥

["The sun rises red and sets red too. So really great men remain unchanged in calamity as well as in prosperity."]—

if it were said "रक्त एवास्तमेति," then the clause, though similar in meaning, would appear as if conveying a different sense, and would thus hide from view the notion of *unchangeableness*.

Or again (to exemplify the *Violation* of *Uniformity* of *Affix*)—

(*a*) According to a law of Bhartrihari, no two words, however similar in meaning, can ever be identical in their signification. So here the root या would not signify the गमन, (following of the Lord), and without this the similarity with a virtuous woman would not be complete.

"यशो ऽधिगन्तुं सुखलिप्सया वा मनुष्यसंख्यामतिवर्तितुं वा ।
निरुत्सुकानामभियोगभाजां समुत्सुकेवाङ्कमुपैति सिद्धिः" ॥

[*Kirātārjunīya*, Canto III.]

["Those who exert themselves without anxiety, to outdo ordinary humanity, through desire for comfort, or in order to get renown,—to such men's laps success comes of its own accord, anxious as it were (of his company)."]

[*Page* 418.] Here we have the violation of the uniformity of affix (in सुखलिप्सया in the midst of others with infinitive affixes). The proper reading would be 'सुखमीहितुम्.'

"ते हिमालयमामन्त्र्य पुनः प्रेक्ष्य च शूलिनम् ।
सिद्धं चास्मै निवेद्यार्थं तद्विसृष्टाः खमुद्ययुः" ॥

[*Kumārasambhava*, Canto VI.]

["They having consulted with Himālaya, went to Çiva and told him of the success of his purpose, and then having got his leave, they went to the ethereal regions."]

Here we have the violation of the uniformity of Pronouns. The proper form should have been 'अनेन विसृष्टाः.'

"महीभृतः पुत्रवतो ऽपि दृष्टिस्तस्मिन्नपत्ये न जगाम तृप्तिम् ।
अनन्तपुष्पस्य मधोर्हि चूते द्विरेफमाला सविशेषसङ्गा" ॥

[*Kumārasambhava*, Canto I.]

["Though having sons, the mountain was never tired of looking at that child: Though the spring has quite an endless variety of flowers, yet the line of black bees is specially attached to the mango-blossom."]

(*a*) Here we have the violation of the uniformity of synonym. The proper reading would be महीभृतोऽपत्यवतो°.

Some however defend the Çloka by explaining the line thus—'though he had sons, his love for the daughter was great.'

(*a*) In the example of the flower cited in the Çloka, what is mentioned is the preference of one specific flower, the Manjari, among the flowers used generically; but in the first half पुत्र does not stand in the same relation of genus to अपत्य as does the 'flower' to 'Manjari.'

[*Page* 421.] "विपदोऽभिभवन्त्यविक्रमम् रहयत्यापदुपेतमायतिः ।
नियता लघुता निरायतेरगरीयान्न पदं नृपश्रियः" ॥

[*Kirātārjunīya*, Canto II.]

["Calamities always press upon the non-heroic; all futurity is barred for those fallen in calamity; disrespect is a certain lot of one devoid of future prospects; and the disrespected is not the proper receptable of kingly splendour."]

Here we have the violation of the uniformity of prefix (in विपत् and आपत्), as well as that of Synonymn (in लघु and अगरीयान्). The proper form should have been 'तदभिभवः कुरुते निरायतिम् । लघुतां भजते निरायतिः, लघुतावान्नपदं नृपश्रियः ।

[*Page* 422.] "काचित्कीर्णा रजोभिर्दिवमनुविदधौ मन्दवक्त्रेन्दुलक्ष्मीः
अश्रीकाः काश्चिदन्तर्दिश इव दधिरे दाहमुद्भ्रान्तसत्त्वाः ।
भ्रेमुर्वात्या इवान्याः प्रतिपदमपरा भूमिवत्कम्पमानाः
प्रस्थाने पार्थिवानामशिवमिति पुरो भावि नार्यः शशंसुः" ॥

["At the time of the king's departure, the town-women gave indications as it were of future calamity—some being in her courses, and having the beauty of her moonlike face dulled, appeared like the day (with a dusted atmosphere and a moon not very bright, an inauspicious sign); some appeared like the quarters, being devoid of all splendour, and having their minds unsettled owing to the fire of the pangs of separation (and the quarters looking dull and amazing all animals by their burning redness—another inauspicious mark); some again wandered like the winds, and others lastly, trembled like the earth (earthquake being another presage of calamity)."]

Here we have the violation of the uniformity of Number (in काचित् and काश्चित्). The proper reading would be 'काश्चित्कीर्णारजोभिर्दिवमनुविदधुर्मन्दवक्त्रेन्दुशोभाः निःश्रीकाः' and कम्पमाना should also be changed into कम्पमापुः (in order to keep the uniformity of the tense, all other verbs being in the Past Perfect).

[*Page* 423.] "गाहन्तामम्हिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितम्
छायाबद्धकदम्बकम् मृगकुलं रोमन्थमभ्यस्यताम् ।
विश्रब्धैः क्रियतां वराहपतिभिर्मुस्ताक्षतिः पल्वले
विश्रांतिं लभतामिदं च शिथिलज्याबन्धमस्मद्धनुः" ॥

[*Çakuntalā*, Act II.]

["Now let the wild buffaloes dangle in the small reservoirs of water frequently struck with their horns; let the deer too having collected under shade, practise ruminating; and let the boars fearlessly destroy the grass in the pools; and let this my bow with string slackened, rest!"]

Here we have the violation of the uniformity of Case-ending (in वराहपतिभिः when all other nouns have the nominative endings). The faultless reading would be "विश्रब्धा रचयन्तु शूकरवरा मुस्ताक्षतिम्."

[*Page* 424.] "अकलिततपस्तेजोवीर्यप्रथिम्नि यशोनिधा-
ववितथमदाध्माते रोषान्मुनावभिगच्छति ।
अभिनवधनुर्विद्यादर्पक्षमाय च कर्मणे
स्फुरति रभसात् पाणिः पादोपसंग्रहणाय च" ॥

[*Mahāvīracharita*, Act II.]

["On the arrival of this sage full of true and unpretended wrath, and great through his immense penance and heroism,—my arms suddenly throb for action becoming the fresh instructions in archery I have got, as well as for catching hold of his feet (in reverence)."]

Here we have violation of the uniformity of sequence. "For catching hold of the feet" must precede the (archery—action) [in order to be in orderly relation with the greatness of *penance* which is mentioned in the first foot, prior to *heroism*].

Similarly may other forms of *violation* of *uniformity* be followed.

[*Page* 425.] (20) To exemplify the *Absence of Order or Regularity* (*i. e.* Syntactic Irregularity)—

दनात् च, श्वेतादीनामब्रह्मवित्त्वं च पुनरावृत्त्यैव सिद्धम् । नन्वब्रह्मविदां देवयानेन परब्रह्मप्राप्तिरेव निवार्य्यते न तु परब्रह्मप्राप्तिमात्रम् अमानवेन नयनं देवयानगतब्रह्मविदामेव नान्येषाममानवनीतानानामेव, अपुनरावृत्तिर्नान्येषां ब्रह्मप्राप्तानाम्, अतः सर्वमुपपन्नमिति नैवं नान्यः पन्था अयनाय विद्यत इति ब्रह्मविद्व्यतिरिक्तानां ब्रह्मप्राप्तिनिषेधात्, तत्राप्यब्रह्मविदां देवयानेन ब्रह्मप्राप्तिर्निषिध्यते न ब्रह्ममात्रमिति चेत् तर्ह्यब्रह्मवित्तयाऽभिमतानां पञ्चाग्निविदां देवयानगतिर्न स्यात् यद्युच्येत विशिष्टमिह निषेध्यमब्रह्मविदां देवयानविशिष्टब्रह्मप्राप्तिर्नास्ति तस्मादब्रह्मविदां ब्रह्मप्राप्तिविधुरदेवयानगतिर्देवयानगतिविधुरब्रह्मप्राप्तिश्चोपपद्यते इति तदयुक्तम् अयनायेत्येतावन्मात्रस्य श्रुतत्वात् देवयानेन ब्रह्मणा इत्यध्याहारप्रसङ्गाच्च । ननु नाध्याहारापेक्षा अयनं चेद्देवयानपूर्वकं ब्रह्मकर्मकं च विदितमिति चेन्न त्वया देवयानविधुरब्रह्मप्राप्तेर्ब्रह्मप्राप्तिविधुरदेवयानगतेश्चाभ्युपगतत्वात् । किञ्च अयन—शब्दस्य कस्सङ्कोचः येन विशिष्टायनविवक्षाऽऽश्रीयेत । अब्रह्मविदां देवयानगमनशास्त्रं ब्रह्मप्राप्तानां केषांचित्पुनरावृत्तिशास्त्रं चेति चेन्न तयोस्तद्विषयत्वेऽयन—शब्दसङ्कोचः तत् सङ्कोचे तयोस्तद्विषयत्वमित्यन्योन्याश्रयप्रसङ्गात्तस्मादस्मिन्मते श्रुत्यसङ्कोचः शास्त्रद्वयार्थवत्त्वं च तदेवोपपन्नमिति तावकः पक्षोऽनुपपन्नः । किञ्च सर्वैरितरैरधिकरणभेदो वर्णितः तदयुक्तं सूत्रकारशैलीविरोधात् अस्मिन्शास्त्रे सर्वत्र बादरायणकीर्त्तनस्य ऋष्यन्तरमतव्यावृत्तिविवक्षामूलत्वं तावत् दृश्यते, तदुपर्यपि बादरायणः सम्भवादित्यत्र कर्मकाण्डदेवताधिकरणप्रसिद्धजैमिनिमतात् वैषम्यविवक्षया बादरायणकीर्तनं दृष्टं मध्वादिष्वसम्भवादनधिकारं जैमिनिः, भावं तु बादरायणोऽस्ति हि, धर्मं जैमिनिः पूर्वं तु बादरायणः, शेषत्वात् पुरुषार्थवादोयथाऽन्येष्विति जैमिनिः, अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् परामर्शं जैमिनिः, अनुष्ठेयं बादरायणः साम्यश्रुतेरित्यधिकरणेषु पूर्वसूत्रोपन्यस्तऋष्यन्तरमतव्यावृत्त्यर्थत्वं बादरायणकीर्त्तनस्य दृष्टं यत्र ऋष्यन्तरमतमङ्गीकृतं तत्र न बादरायणकीर्त्तनं दृष्टं यथा अनुस्मृते-

वादरिः सम्पत्तेरिति जैमिनिः सुकृतदुष्कृते एवेति तु बादरिः सुकृतदुष्कृते एवेति तु दावरिः, अवस्थितेरिति काशकृत्स्नः, तद्भूतस्य तु नातद्भावो जैमिनेरपि, आर्त्विज्यमित्यौडुलोमिरित्यादिषु ऋष्यन्तराणां मिथोविरुद्धेषु मतेषु चरमस्याङ्गीकारात् वादरायणमतस्य पृथक्कीर्तनाभावश्च दृष्टः प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः अवस्थितेरिति काशकृत्स्नः, तदुपलक्षणार्थेति तु कार्ष्णाजिनिः, सुकृतदुष्कृते एवेति तु बादरिः, स्वामिनः फलश्रुतेरित्यात्रेयः, आर्तज्यमित्यौडलोमिरित्यादिषु, सूत्रेषु, अतो वादरायणकीर्त्तनम् ऋष्यन्तरमतवैषम्यप्रदर्शनार्थम् उभय-शब्दश्चोपन्यस्ताकारद्वयपरो दृष्टः, उपपूर्वमपीत्येके, बहिस्तूभयथाऽपि, अभावं बादरिः, भावं जैमिनिद्वादशाहवदुभयविधमिति च, एवमुभयशब्दकीर्तितमतद्वतयव्यावृत्त्यर्थत्वदर्शनात् वादरायणकीर्त्तनस्य ऋष्यन्तरमतवैषम्यप्रदर्शनार्थत्वात्, अत एव दोषशब्दस्य नञ्पूर्वकत्वायोगाच्च त्रिशिरस्कविचारास्पदैकार्थविषयत्वं कार्य्यं वादरिरित्यादिसूत्रसमुदायस्य स्वरसतः प्रतिपन्नमिति युक्तमैकाधिकरण्यम्, दर्शनाच्चेति सूत्रे तयोर्द्धमायन् तस्य तावदेवेति वाक्यमितरैरुदाहृतं ततोऽपि परं ज्योतिरुपसम्पद्येति वाक्योदाहरणं सफलम् अस्य वाक्यस्य साक्षान्मोक्षपरत्वसंप्रतिपत्त्या क्रमयुक्तिविषयत्वेन निर्वाहस्यानुपपन्नत्वादत्र च शरीरादुत्थानश्रवणेनार्चिरादिगतविषयत्वस्य दुरपन्हवत्वाच्च ॥ कार्याधिकरणं समाप्तम् ॥

इति श्रीहरितकुलतिलकवाग्विजयिसूनुना श्रीरङ्गराजदिव्याज्ञालब्धवेदव्यासापरनामधेयेन श्रीमद्वरदाचार्य्यपादसेवासमधिगतभगवद्रामानुजविरचितशारीरकमीमांसाभाष्यहृदयेन श्रीसुदर्शनसूरिणा विलिखितायां श्रुतप्रकाशिकायां चतुर्थाध्यायस्य तृतीयः पादः ॥ ३ ॥

श्रीमते रामानुजाय नमः ।

अथ चतुर्थेऽध्याये चतुर्थः पाद आरभ्यते ।

संपद्याविर्भावाधिकरणम् ।

सू० संपद्याविर्भावः स्वेन शब्दात् ॥ १ ॥

भा० परं ब्रह्मोपासीनानामात्मानञ्च प्रकृतिवियुक्तं ब्रह्मात्मकमुपासीनानामर्चिरादिना मार्गेणापुनरावृत्तिलक्षणा गतिरुक्ता, इदानीं मुक्तानामैश्वर्यप्रकारं चिन्तयितुमारभते—इदमाम्नायते "एवमेवैष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत" इति, किमस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपन्नस्य देवादिरूपवत्साध्येन रूपेण सम्बन्धोऽनेन वाक्येन प्रतिपाद्यते ?

टी० सू० सम्पद्याविर्भावः । स्वेन शब्दात् ॥ १ ॥ पादसङ्गतिमाह परं ब्रह्मेत्यादिना, विषयवाक्ये न च पुनरावर्त्तत इति श्रवणादपुनरावृत्तिलक्षणेत्युक्तं, किमस्माच्छरीरादित्यादिवाक्ये मुक्तस्य साध्येन रूपेण संबन्ध प्रतिपाद्यते ? उत स्वाभाविकस्वरूपाविर्भावः ? किंच स्वरूपाविर्भावपरत्वे मोक्षशास्त्रस्य पुरुषार्थावबोधित्वं सम्भवति ? नेति किं स्वरूपस्य स्वतोऽपरिच्छिन्नानन्दत्वं सम्भवति ने? ति किमानन्दस्वरूपस्य तिरोधानं संभवति नेति, किमाविर्भावपरत्वेऽभिनिष्पत्तिशब्दवैयर्थ्यमस्ति नेति च यदा वैयर्थ्यं यदा च तिरोधानासम्भवेन स्वतोऽपरिच्छिन्नानन्दयोगात् शास्त्रस्य न पुरुषार्थपर्यवसानं तदा साध्येन रूपेण सम्बन्धः प्रतिपाद्यः स्यात्, यदा नाभिनिष्पत्तिव्यपदेशवैयर्थ्यं यदा च तिरोधानसम्भवेन स्वतोऽपरिच्छिन्नानन्दत्वोपपत्तेः मोक्षशास्त्रस्य पुरुषार्थपर्यवसानं तदा स्वाभाविकस्वरूपाविर्भावः प्रतिपाद्यः स्यात्, रूपेण—आकारेण, न च दुःखनि-

वृत्तिमात्रं परं ज्योतिरुपसम्पन्नस्य पुरुषार्थ इति, अत्रायं भावः दुःखनिवृत्तिमात्रं मोक्षश्चेत्संसारनिर्विशेषः स्यात्पुरुषार्थापुरुषार्थमिश्रत्वात् दुःखनि-

मू० उत स्वाभाविकस्य स्वरूपस्य विर्भाव? इति संशये साध्येन रूपेण संबन्ध इति युक्तम्, अन्यथा ह्यपुरुषार्थावबोधित्वं मोक्षशास्त्रस्य स्यात्स्वरूपस्य स्वतोऽपुरुषार्थत्वदर्शनात्, न हि सुषुप्तौ देहेन्द्रियव्यापारेषु उपरतेषु केवलस्यात्मस्वरूपस्य पुरुषार्थसंबन्धो दृश्यते, न च दुःखनिवृत्तिमात्रं परं ज्योतिरुपसम्पन्नस्य पुरुषार्थ, येन स्वरूपाविर्भाव एव मोक्ष इत्युच्येत स एको ब्रह्मण आनन्दः श्रोत्रियस्य चाकामहतस्य रसं ह्येवायं लब्ध्वाऽऽनन्दी भवतीत्यादिभ्योमुक्तस्य सुखानन्त्यश्रवणात्, न चापरिच्छिन्नानन्दरूपचैतन्यमेवास्य स्वरूपं, तच्च संसारदशायामविद्यातिरोहितं परं ज्योतिरुपसम्पन्नस्याविर्भवतीति शक्यं वक्तुं, ज्ञानस्वरूपस्य तिरोधानासम्भवात् प्रकाशपर्यायस्य ज्ञानस्य तिरोधानं तद्विनाश एवेति हि पूर्वमेवोक्तम् ॥

टी० वृत्तिः सुखप्राप्तिश्चेष्टे दृष्टे सुखानिवृत्तिर्दुःखप्राप्तिश्चानिष्टे दृष्टे, तत्र दुःखनिवृत्तेरिष्टत्वात्सुखनिवृत्तेरनिष्टत्वादिष्टानिष्टमिश्रो मोक्षः, संसारतुल्य इति तस्मात्पुरुषार्थापुरुषार्थमिश्रो न मोक्ष एवेति स्वरूपभूतस्यैवापरिच्छिन्नस्यानन्दस्य तिरोधाननिवृत्तौ तथात्वं प्रकाश इति श्रुत्यर्थ इत्यत्राह—

मू० न च प्रकाशमात्रस्यानन्दता सम्भवति सुखस्वरूपता ह्यानन्दस्वरूपता, सुखस्वरूपत्वं चात्मनोऽनुकूलत्वं

प्रकाशमात्रात्मवादिनः कस्य प्रकाशोऽनुकूलवेदनीयो भवेदिति प्रकाशमात्रात्मवादिनः कथञ्चिदप्यानन्दस्वरूपता दुरुपपादा, स्वरूपापत्तिमात्रे च साध्ये स्वरूपस्य नित्यनिष्पन्नत्वादुपसम्पन्नस्य स्वेन रूपेणाभिनिष्पद्यत इति वचनमनर्थकं स्यात्, अतोऽपूर्वेण साध्येन रूपेण संबध्यते, एवं चाभिनिष्पद्यत इति वचनं मुख्यार्थमेव भवति स्वेन रूपेणेत्यप्यानन्दैकान्तेन स्वासाधारणेनाभिनिष्पद्यत इति सङ्गच्छते इत्येवं प्राप्तेऽभिधीयते सम्पद्याविर्भाव इति, अयं प्रत्यगात्मार्चिरादिना परं ज्योतिरुपसम्पद्य यं दशाविशेषमापद्यते स स्वरूपाविर्भावरूपः, नापूर्वाकारोत्पत्तिरूपः, कुतः स्वेन शब्दात्स्वेन रूपेणेति विशेषणोपादानादित्यर्थः । आगन्तुक[1]देहपरिग्रहे हि स्वेन रूपेणेति विशेषणमनर्थकं स्यात् ॥

टी० "न चे"ति, तदुपपादयति "ज्ञानस्वरूपस्ये"ति, तिरोधाननिवृत्त्योः सम्भवेऽपि पुरुषार्थरूपत्वं स्वरूपस्य प्रतिक्षिपति "न च प्रकाशे"ति, कस्येति अनुकूलत्व नाम सप्रतियोगिको धर्मविशेषः प्रकाशवदित्यर्थः अन्यथाऽनुकूलत्वमेव न स्यादिति भावः । न केवलं तर्कविरोधः श्रुतिविरोधश्चेत्याह "स्वरूपापत्ती"ति, अनर्थकं स्यात् अभिनिष्पत्तिशब्दानर्थक्यामित्यर्थः । स्वेन-शब्दः कथमित्यत्राह "स्वेने"ति, स्व-शब्दोऽसाधारण्यपरः, न त्वसाध्यत्वपरः अभिनिष्पत्तिवचनात्स्वरूपेणाभिनिष्पद्यते रूपविशिष्टतया साध्यत इति रूपं साध्यमित्यर्थः एवं चेति स्व-शब्दाभिनिष्पत्तिशब्दावुभावपि मुख्यावित्यर्थः । राद्धान्तं वक्तुं सूत्रमुपादत्ते "सम्पद्य"दि, यं दशाविशेषमिति दशावस्था ज्ञानविकासस्य काल-

१ आगन्तुकविशेषपरिग्रहे हीति पा० ।

विशेषाऽभावादवस्थात्वं ज्ञानस्य विकासार्हत्वात्स्वाभाविकत्वं स्वेन रूपेणेति विशेषणमनर्थकं स्यादिति कथमानर्थक्यं स्वासाधारण्य ह्युक्त-मित्यत्राह–

श्रु० अविशेषणेऽपि तस्य स्वकीयरूपत्वसिद्धेः । यत्तूक्तं स्वरूपस्य नित्यप्राप्तत्वादुपसंपद्याभिनिष्पद्यत इति वचनमनर्थकमिति तत्रोत्तरम्–

सू० मुक्तः प्रतिज्ञानात् ॥ २ ॥

कर्मसम्बन्धतत्कृतदेहादिविनिर्मुक्तः स्वाभाविकेन रूपेणावस्थितोऽत्र स्वेन रूपेणाभिनिष्पद्यत इत्युच्यते अतो नित्यप्राप्तस्यापि स्वरूपस्य कर्मरूपाविद्यातिरोहितस्य तिरोधाननिवृत्तिरत्राभिनिष्पत्तिरुच्यते, कुतः प्रतिज्ञानात्सा हि प्रतिपाद्यतया प्रतिज्ञाता, कुत इदमवगम्यते, य आत्मेति प्रकृतं प्रत्यगात्मानं जागरिताद्यवस्थात्रितयविनिर्मुक्तं प्रियाप्रियहेतुभूतकर्मारब्धशरीरविनिर्मुक्तं च प्रतिपादयितुम् ॥

टी० "अविशेषणेऽपी"ति, परं ज्योतिरुपसम्पद्याभिनिष्पद्यत इत्येतत्सम्बन्धादेव तदसाधारणत्वं सिद्धं न ह्यन्यस्य रूपेणान्यो निष्पद्यते अतस्तत्सम्बन्धादेव तदसाधारण्यं सिद्धमिति स्वेन पदमनर्थकं स्यादित्यर्थः । उत्तरसूत्रशङ्कामाह "यत्तूक्त"मिति, सू० मुक्तः प्रतिज्ञानात् ॥ २ ॥ मुक्त इति प्रतिज्ञाखण्ड व्याचष्टे कर्मे"ति, ततः किमित्यत्राह "अत"-इति, पूर्वमसिद्धायास्तिरोधाननिवृत्तेर्वाचकत्वादभिनिष्पत्ति–शब्दो नानर्थक इत्यर्थः । प्रतिज्ञानादिति हेतुं व्याचष्टे "सा ही"ति, सा तिरोधाननिवृत्तिः, निवृत्ततिरोधानं स्वरूपं प्रतिज्ञातमिति भावः तथा प्रतिज्ञातमिति कथमवगतम् इत्यत्राह "कुत इद"मिति, य आत्मेत्यादि

जाग्रदाद्यवस्थासूच्यमानासु प्रत्यवस्यम् एतं त्वेव ते भूयोऽनुव्याख्यास्यामीत्युक्तं, तत्र एतं त्वेव तेऽनुव्याख्यास्यामीति प्रतिपर्यायमुक्तैतच्छब्दस्य प्रकृतपरामर्शित्वाद्य आत्मेत्यादिना प्रकृतस्यापहतपाप्मत्वादिगुणकत्वादपहतपाप्मत्वादीनां च जाग्रदाद्यवस्थस्यासम्भवात् गुणाष्टकयुक्तं स्वाभाविकरूपकथनमेव प्रतिज्ञातुं श्रोतुराशयपरीक्षार्थं जाग्रदादिकथनन्तस्माद्

मू० एतं त्वेव ते भूयोऽनुव्याख्यास्यामीति पुनः पुनरुक्त्वा एवमेवैष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इत्यभिधानात्, अतः कर्मणा संबद्धस्य परं ज्योतिरुपसंपद्य बन्धनिवृत्तिरूपा विनिर्मुक्तिः स्वेन रूपेणाभिनिष्पद्यत इत्युच्यते, स्वरूपाविर्भावेऽप्यभिनिष्पत्ति-शब्दो दृश्यते युक्त्याऽयमर्थो निष्पद्यत इत्यादिषु, यच्चोक्तम् आत्मस्वरूपस्य सुषुप्तावपुरुषार्थत्वदर्शनात् स्वरूपाविर्भावे मोक्षशास्त्रस्यापुरुषार्थावबोधित्वं स्यादिति कृत्वा देवाद्यवस्थावत्सुखसम्बन्ध्यवस्थान्तरप्राप्तिरभिनिष्पत्तिरिति, तत्रोत्तरम्—

टी० व्याख्यास्यामीत्युक्तं व्याख्यातव्यरूपं स्वाभाविकमेवेत्यर्थः ततः किमित्यत्राह "अतः कर्मणे"ति, अभिनिष्पत्ति-शब्दः कथं वाचक इत्यत्राह "स्वरूपाविर्भावेपी"ति, निष्पद्यत इत्यादिष्विति आदि-शब्देन विचार्य्य च पुनःपुनः इदमेकं सुनिष्पन्नमित्यादिप्रयोगो विवक्षितः एवमयमर्थः साध्यत इति सिद्धिपर्यायत्वेन प्रयुज्यमानोऽभिनिष्पत्ति-शब्द आविर्भावस्यापि वाचक इत्यर्थः । उत्तरसूत्रशङ्कामाह 'यच्चोक्त'मिति,

सू० आत्मा प्रकरणात् ॥ ३ ॥

मू० स्वरूपेणैवायमात्माऽपहतपाप्मत्वादिसत्यसङ्कल्पत्वपर्यन्त-

गुणक इति प्रकरणादवगम्यते य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्प इति हि प्रजापतिवाक्यप्रक्रमः, इदं च प्रकरणं प्रत्यगात्मविषयमित्युत्तराच्चेदाविर्भूतस्वरूपस्त्वित्यत्र च प्रतिपादितम्, अतोऽपहतपाप्मत्वादिस्वरूप एवायमात्मा संसारदशायां कर्माख्ययाऽविद्यया तिरोहितस्वरूपः परं ज्योतिरुपसंपद्याविर्भूतस्वरूपो भवति, अतः प्रत्यगात्मनोऽपहतपाप्मत्वा यः स्वाभाविका गुणाः परं ज्योतिरुपसम्पन्नस्याविर्भवन्ति नोत्पद्यन्ते, यथोक्तं भगवता शौनकेनापि—

टी० सू० आत्मा प्रकरणात् ॥ ३ ॥ परमात्मविषयं हीदं वाक्यमित्यत्राह "इदं चे"ति, स्वाभाविकत्वे सर्वदोपलब्धेरचिमे गुणा इत्यत्राह "अत"इति, आनन्दश्चेदौपाधिकाकारसम्बन्धनिबन्धनो न भवति संसारदशायां स्वाभाविकानन्दस्य तिरोहितत्वादौपाधिकरूपसम्बन्धसापेक्ष आनन्दयोगो भवति, अत एव सुषुप्तौ चानन्दायोगो न त्वानन्दस्यौपाधिकाकारहेतुत्वस्वाभाव्यात् तिरोधाननिवृत्तौ स्वाभाविक एवानन्द आविर्भवतीति स्वरूपाविर्भावपरत्वे मोक्षशास्त्रस्य नापुरुषार्थावबोधित्वमित्यर्थः । परे चापरे च परं ज्योतिरिति ज्योतिःशब्दस्य भौतिकपरत्वशङ्कायामात्मविषयत्वप्रतिपादकमात्मा प्रकरणादिति सूत्रं व्याचक्षते तदयुक्तम् अस्माभिर्दहराधिकरणे निर्णीतत्वात्तैश्च ज्योतिर्दर्शनादित्यत्र समर्थितत्वाच्च भौतिकविषयत्वशङ्काऽनुदयाद्धिकशङ्काहेत्वभावाच्च अतोऽपुरुषार्थत्वपरिहारपरत्वं युक्तम् । अनध्याहारे सूत्रवैयर्थ्यात् तत्परिहारार्थे ऽध्याहारो न दोषाय अपि तु गुणायैव तस्मिँश्च न्याये सत्यात्मसम्बन्धितया श्रुतगुणवाचिपदाध्याहारो न्याय्य कः पुनर्विशेषः पूर्वावस्थात इति शङ्कायां द्वितीयसूत्रमवतारयन्ति, तत्र परे प्रष्टव्याः किं

इति । चतुर्थं बाधकमाह । आमोक्षेति । अनभिमुखीति स्वनाश-रूपं चतुर्थपुरुषार्थं न वक्ति स्वेन रूपेणाभिनिष्पन्नस्य भोगादीन-प्याह । ननु विज्ञानघन एवैतेभ्यो भूतेभ्यस्समुत्थाय तान्येवानुवि-नश्यतीति जीवविनाशः श्रूयते मैवम् । लोकधीरूढानुवादमात्रत्वाद-दर्शनमात्रपरत्वाद्वा । स्मर्यते च । अदर्शनादिहायातः पुनश्चादर्शनं गत इति । अन्यथा कथम् अविनाशी वा अरेऽयमात्माऽनुच्छित्ति-धर्मा इति तन्नित्यत्वसाधनम् । ननु न प्रेत्य संज्ञाऽस्तीति मुक्तस्य निस्सम्बोधत्वश्रुत्या नाशस्सिद्ध्येत्, न । देहादिभिरेकीकृत्य बुद्धेः तन्निबन्धनाख्याभेदस्य वा निवृत्तौ तात्पर्यात्, ब्रह्मण्यात्यन्तिकलयः कथम् अनात्यन्तिकवत्, स्वविशिष्टे ब्रह्मण्यौपाधिकरूपेण विशेषत्या-गेन श्लेषस्य विवक्षितत्वात्, अन्यथा मुक्तिदशायां भेदोक्तिभिर्विरो-धात्, यथा नद्यस्स्यन्दमानास्समुद्रे अस्तं गच्छन्ति नामरूपे विहाय इति निदर्शनान्मुक्तोऽप्यस्तमेष्यतीति चेन्न । प्रविष्टजलस्य स्वरूपना-शाभावात्, अन्यथा पयःप्रस्थद्वयसम्भेदे प्रस्थशेषत्वप्रसङ्गात् यथो-दकम् इत्यारभ्य तादृगेव भवतीति श्रुत्यन्तरविरोधाच्च, घटध्वंसे घटाकाशोऽपि न नश्यत्येव घटसंयोगमात्रात् नश्यतीत्युपचरन्ति मुक्तिदशायां भेदनिवृत्तिवादाश्च कर्मकृतवैषम्यनिवृत्तिपराः साधर्म्य-वादिभिरप्येतदेव व्यवस्थाप्यते, ब्रह्मैव भवतीत्यवधारणाज्जीवनिवृ-त्तिर्गम्यत इति चेन्न । अत्यन्तसाम्ये तात्पर्यात्; यथा वैष्णवं वाम-नमालभेत स्पर्धमानो विष्णुरेव भूत्वेमांल्लोकाञ्जय*तीति तदेतत् नात्मा श्रुतेर्नित्यत्वाच्च ताभ्य इति सूत्राभिप्रेतमिति ॥ १७ ॥ इत्या-त्मानित्यत्वादिवादानामध्यक्षादिविरोधः ॥

* लोकानभिजयतीति पु॰ पा॰ ।

नित्यस्सर्वगत इति श्रुत्या आत्मनां नित्यत्वे तत्सह चरितं सर्वगतत्वमपि स्यादिति शङ्कते । व्याप्ता इति ॥

**मू० व्याप्तास्सर्वत्र जीवास्सुखतदितरयोस्तत्रतत्रो-
पलम्भान्निर्वाह्ये देहगत्यागतिरिह वितथा
तद्वतोऽपीति चेन्न ॥ वक्ती पञ्चाग्निविद्या-
प्रभृतिषु भविनां स्वस्वरूपेण सिद्धं याता-
यातप्रकारं श्रुतिरगतिरिमां लाघवोक्तिं शृ-
णोतु ॥ १८ ॥**

आगमस्यानुग्राहकमाह । सुखेति । तदितरशब्दोऽत्र दुःखवत् धीच्छादीनामपि सङ्ग्राहकः । अविभुत्वे सर्वत्र दुःखाद्युपलम्भो न स्यादित्यर्थः । आत्मगत्या सर्वत्र सुखादीति शङ्कां गौरवप्रसक्त्या वारयति । निर्वाह्य इति । अत्र श्रुतेरन्यपरत्वाभिप्रायेण प्रतिवक्ति । नेति । सर्वगतत्वोक्तिस्तावत् "अग्निर्यथैको भुवनं प्रविष्टः "वायुस्सर्वगतो महान्" इत्यादिवदेकजातीयानां सर्वत्रानुप्रवेशान्नेतुं शक्या । गतेश्च श्रुतत्वान्न कल्पनागौरवमित्याह । वक्तीति । प्रभृतिशब्देन "तेन प्रद्योतेनैष आत्मा निष्क्रामति तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति" इत्यादयस्सङ्गृह्यन्ते, न च तासां श्रुतीनां प्राणानूत्क्रमणादिभिरन्यथासिद्धिरास्थेया इत्यगतिशब्दाभिप्रायः ॥ १८ ॥

अविभुत्वे सिद्धैश्वर्याणां युगपदनेकशरीराधिष्ठातृत्वं न स्यादित्यत आह । अव्यापित्वेऽपीति ।

**मू० अव्यापित्वेऽपि पुंसोऽभिमतबहुवपुःप्रेरणे
यौगपद्यं ज्ञानव्याप्त्योपपन्नं बहुषु च वपुषां-**

ऽशेषु निर्वाह एषः ॥ यच्चादृष्टं क्रियां स्वाश्रययुजि तनुतेऽन्यत्र तत्कृद्गुणत्वादित्येतत्सिद्धसाध्यं विभुन इह हि तद् ब्रह्मणः प्रीतिकोपौ ॥ १९ ॥

बहुवपुःप्रेरणं किं द्रव्यान्तरद्वारकम् उत कर्मनिमित्तम्, आद्ये यथा पाणिपादादिद्वारनियतं युगपत्खड्गपादुकाद्यधिष्ठानं न तथाऽत्रेति भावः । द्वितीये स्वकर्मनियतमनेकशरीराधिष्ठानं कर्मिणः स्वसन्निधिविरहे कथं स्यादिति । ज्ञानव्याप्त्या स्वरूपसन्निधानाभावेऽपि ज्ञानस्य युगपदनेकदेहाधिष्ठानानुगुणवृत्त्येति भावः । स्वरूपव्याप्तिर्ज्ञानतोऽधिष्ठानाभावेऽनर्थिका तर्हि तत एव कुड्यादीनामप्यधिष्ठानं स्यात् । न स्यात्, तदधिष्ठानानुगुणकर्मातिशयविशेषाभावात् ये तु तादृशातिशयवन्तः ते कुड्यादीन्यप्यधितिष्ठेयुः यथा परकायादीन्, देहैकदेशवर्तिन आत्मनो युगपदनेकावयवाधिष्ठानं कथमित्यत्रापि प्रत्येतव्यमेतदेवेत्याह । बहुष्विति । धर्माधर्मौ स्वाश्रयसंयुक्त एवाश्रयान्तरे क्रियां जनयतः क्रियाहेतुगुणत्वात् गुरुत्ववत् इति परोक्तमनुवदति । यच्चेति । तत्र सिद्धसाधनतामाह । इत्येतदिति । तद् व्यनक्ति । विभुन इति । इह हि धर्माधर्मशब्दः कर्मनिमित्तेश्वरप्रीतिकोपरूपबुद्धिद्योतकः । अस्ति हि शुभे त्वसौ तुष्यति दुष्कृते तु न तुष्यतेऽसौ परमशरीरी इति ॥

न च प्रीतेरपूर्णत्वं न च कोपात्सदुःखता ।
फलप्रदित्सारूपत्वादुभयोरपि कर्मणोः ॥ अतो न दोषः ॥ १६ ॥

उक्तानुमानस्य दूषणान्तरमाह । इष्टमिति ॥

मू० इष्टं प्रादेशिकत्वं विभुषु जनिमतां बुद्धिश-

ब्दादिकानां तेनादृष्टं च तादृक् न यदि तव सुखाद्याश्रयव्यापकं स्यात् ॥ तस्मात्तत्स्वप्रदेशान्वयवति जनयेत् स्वं फलं यन्नीत्या भ्रातृव्यादौ च पीडां न घटयितुमलं किं विभुत्वेन भोक्तुः ॥ २० ॥

विभुष्वात्माकाशादिषु जायमानानां बुद्धिशब्दादिकानां स्वाश्रयैकदेशवर्तित्वं युष्माभिरिष्यते सार्वत्रिकत्वे प्रत्यक्षादिबहुप्रमाणविरोधात्, अदृष्टं च तादृशमिष्टं तच्च स्वाश्रयसंयोगिनि क्रियां जनयत् स्वावच्छिन्नप्रदेशसंयुक्त एव जनयेत् अन्यथा प्रयत्नेनापि दूरस्थप्रेरणप्रसङ्गात्, न चादृष्टं तत्र तत्र गच्छति अमूर्तत्वात् अतोऽदृष्टकारिदूरस्थकार्याणामनुत्पत्तिप्रसङ्गः । ननु प्रत्यात्मनियतान्यनन्तान्यदृष्टानि विप्रकीर्णवृत्तीनि विद्यन्ते अतस्सर्वक्रियोपपत्तिरित्यत्राह । भ्रातृव्यादाविति । अयं भावः, अद्यतनाभिचारक्रियानिष्पद्यमानमदृष्टं कर्तुरात्ममनस्संयोगावच्छिन्ने प्रदेशे स्यात् तच्च भ्रातृव्यदेहभेदादीन्करोति एवं देशान्तरानुभाव्यस्वर्गादिफलसाधनेऽपि भाव्यम् । न च दूरएवेदमदृष्टमुत्पद्यते, असमवायिदेशावच्छेदेन तदुत्पत्तेः स्थापनात् । अतः कथं देशान्तरस्थे भ्रातृव्यशरीरादौ पीडां जनयेत् तस्मादात्मनस्सर्वत्रावस्थानं निरर्थकमिति निगमयति । किं विभुत्वेनेति ॥ २० ॥ इति जीवविभुत्वभङ्गः ।

यदि सर्वे जीवास्सर्वशरीरव्यापिनः सर्वे देहास्सर्वेषां भोगायतनानि स्युः इति प्रसङ्गे परोक्तं परिहारमनुवदति । स्वादृष्टेति ।

मू० स्वादृष्टोपार्जितत्वाद्विभुषु यदवदन्विग्रहादेर्व्यवस्थां तच्चैवं निर्निमित्तं तत इह न कथं

सर्वतस्सर्वभोगः ॥ आराध्ये विश्वसाक्षिण्यनुगुणफलदे त्वस्ति राजादिनीतिस्तत्साम्ये भोगसाम्यं न हि भवति यथाकर्मभोगप्रदानात् ॥ २१ ॥

दूषयति । तच्चेति । अयं भावः यद्यदृष्टं स्वावच्छिन्नप्रदेशे देहादिस्पृष्ट्या फलं जनयेत् तदा यष्टुः स्वर्गादिकमिहैव स्यात् प्रदेशान्तरे तु प्रयत्ननीत्या जनयितुं नालमिति । अतस्त्वत्पक्षे प्रतिनियतादृष्टजन्यत्वस्यैवासम्भवाद्व्यवस्थाभङ्गो दुर्वार इत्याह । तत इति । नन्वणुपक्षेऽपि फलानां जीवगतादृष्टाजन्यत्वात् परगतस्य व्यवस्थापकत्वानभ्युपगमादनियमस्तदवस्थ इत्यत्राह । आराध्य इति । परगतत्वेऽपि राजादिषु दृष्टेन न्यायेन तत्तदाराधकादिप्रतिनियतानुग्रहादिवैचित्र्यात्तत्तदुचितफलसमर्पणे यथाप्रमाणं व्यवस्था सिद्ध्येदिति भावः । सर्वफलप्रदानानुगुण्यार्थे विश्वसाक्षितोक्तिः सहाधीते च कर्माध्यक्षत्वसाक्षित्वे । ननु समोऽहं सर्वभूतेषु इति वदतः कथं विषमफलप्रदत्वमित्यत्राह । तत्साम्य इति । भोगसाम्यं चेच्चाज्ञानामन्योन्यमिति शेषः । सूत्रादिसिद्धं हेतुमाह । यथाकर्मेति ॥ २१ ॥ अथाऽप्यणुत्वे किम्प्रमाणमित्यत्राह । देहान्तरिति ।

सू० देहान्तर्मात्रदृष्टेः पृथगिह विषयिप्राणजीवोत्क्रमोक्ते र्भूयोवाक्यानुसारादणुरिति वचने तादृशोपाध्यनुक्तेः ॥ ईशादाराग्रमात्रो ह्यवर इति भिदावर्णनात्स्पन्दवाक्याद्व्याप्त्युक्तिर्जातिधर्मप्रतिहतिविनिवृत्त्यादिमात्रेण जीवे ॥ २२ ॥

अयं भावः यद्यात्मा विभुः स्वयं प्रकाशश्च किमिति सर्वत्र सर्वदा न प्रकाशते, अहमिति सार्वत्रिकः प्रकाशत एवेति चेन्न अस्मिन्देहेऽहं वर्त इतिवत्सर्वत्र प्रतीतिप्रसङ्गात् सार्वत्रिकस्याविशदप्रकाशोऽस्तीति च न प्रमाणं, व्यञ्जकान्तरसापेक्षत्वाद्व्यञ्जकदेशे व्यक्तिरिति नियमहेतुरिति चेन्न। स्वप्रकाशत्वविरोधात्। अथ मानसप्रत्यक्षः तथाऽपि कथं क्वाचित्कोपलब्धिः। यद्यपि सामग्रीदेशानुविधानेन ज्ञानोत्पत्तिः तथाऽपि विषयत्वं न तन्निम्नं* तथा अदृष्टेः, अगृहीतपरिमाणस्य स्वरूपतोग्रहणे देहात्मभ्रमात् क्वाचित्कत्वोपलम्भ इति चेन्न। भ्रमव्यतिरिक्तमानसप्रत्यक्षेष्वपि तदृष्टेः विवेकतस्समाहितानामपि परिच्छिन्नतया तदुपलब्धेः "हृदि ह्ययमात्मा" इत्यादिदृष्टेश्च। हेत्वन्तरमाह। पृथगिति। इन्द्रियादीनां पृथगुत्क्रमणोक्तेरात्मोत्क्रमणं न भाक्तमिति भावः। सर्वगतत्वोक्तिसद्भावेऽप्यणुत्वोक्तीनां बलीयस्त्वं व्यनक्ति। भूय इति। सन्तिहि "एषोऽणुरात्मा चेतसा वेदितव्यः" "वालाग्रशतभागस्य शतधा कल्पितस्य च भागो जीवस्स विज्ञेय" इत्यादिका बह्व्यः। ननु विभोरपि परमात्मनोऽणुत्वं श्रूयते तथेह स्यात् तन्न। तत्र हि "एष आत्मान्तर्हृदयेऽणीयान् व्रीहेर्वा" इत्यादिष्वौपाधिकाणुत्वव्यक्तेः, जीवाणुत्वश्रुतौ तादृशोपाध्यनुक्तेः प्रत्युत स्वरूपनिर्देशेनैव बालाग्रसूक्ष्मभागसमत्वं ख्याप्यते। यद्यौपाधिकं जीवस्याणुत्वं तस्य जीवेश्वरसाधारणत्वात् "आराग्रमात्रो ह्यवरोऽपि दृष्टः" इति परव्यावर्तकपरिमाणोक्तिर्विहन्येतेत्यभिप्रायेणाह। इत्याद्रिति। स्वप्नसुषुप्त्यादिवाक्येषु "आसु तदा नाडीषु सृप्तो भवति ताभिः प्रत्यपसृप्य पुरीतति शेते" इत्यादिभिर्जीवस्य तत्र तत्र स्वरूपेण संचरणं श्रूयत इत्याह। स्पन्दवाक्यादिति। एतैर्बलीयो-

* तन्निघ्नमिति पु॰ पा॰।

भिर्जीवव्याप्तिवचनानामन्यपरत्वमाह । व्याप्त्युक्तिरिति । "तस्यात्मपरदेहेषु सतः" इत्यादौ जातितः "स चानन्त्याय कल्पते" इत्यत्र धर्मतः, तथा च सूत्रं "प्रदीपवदावेशस्तथा हि दर्शयति" इति । सर्वगत इत्यत्र क्रमेण सर्वविधाचेतने प्रवेशाद्वा शिलादिष्वपि प्रतिहत्यनर्हतया वा तथा च भाषितम् "अतिसूक्ष्मतया सर्वाचेतनान्तःप्रवेशस्वभावः" इति । आत्मनोऽणुत्वे पृथिव्याद्यणुवत्प्रत्यक्षत्वं न स्यादिति चेन्न, विभुत्वेऽपि ते विभ्वन्तरवदप्रत्यक्षत्वप्रसङ्गात् । यथादृष्टि व्यावृत्तिरस्तीति चेत् अणुत्वेऽपि समम् । न चास्माकं पृथिव्याद्यणूनामप्रत्यक्षत्वनियमः एवमणुत्वे मानसप्रत्यक्षत्वं न स्यादिति प्रसङ्गोऽपि श्रुतिविरोधादिभिः प्रत्याख्येयः ॥ २२ ॥ इति जीवाणुत्वम् ॥

जैनास्त्वाहुः सर्वाणि द्रव्याणि पर्यायवन्ति आत्माऽपि द्रव्यम् अतस्सोऽपि तत्तद्भोगायतनानुगुणाणुत्वमहत्त्वादिपर्यायवानिति तान्प्रतिक्षिपति । नात्मेति ॥

मू० नात्मा देहानुरूपं विविधपरिणतिर्निर्विकारोक्तिबाधात्स्थूलोऽहं मूर्ध्नि जातं सुखमिति च मतिस्तस्य देहात्ममोहात् ॥ नानादेहश्च योगी प्रसजति भिदुरः पुंसि देहप्रमाणे मुक्तौ देहात्ययात्स्यात्परिमितिविरहस्तत्प्रयुक्तोऽस्य माने ॥ २३ ॥

यो यद्भोगायतनवर्ती स तत्समपरिमाण इति नियमस्तावन्न दृष्टः न च कल्प्यः कल्पकासिद्धेरिति भावः । नैगमिकाभीष्टं हेतुमाह । निर्विकारेति । वृद्धिह्रासौ देहस्यावेवोच्येते आत्मनि तु न क्वचित् प्रत्युतान्यथा । ननु स्थूलोऽहं कृशोऽहमिति सामानाधिक-

रण्यात् मूर्ध्नि मे सुखमित्यादिना सर्वावयवेष्वहमर्थवृत्तिदर्शनाच्च परिमितिभेदः कल्प्यः इत्यत्राह । स्थूल इति । सामानाधिकरण्यं तावद्गौरोऽहमित्यादिष्वप्यस्तीत्यनेकान्तं देहद्वारैव आत्मनि गौरत्वादिवादः, भ्रमाद्वा तथेहापि, देहावयवेषु सुखाद्युत्पत्तिधियश्च देहात्मभ्रमेण, सर्वत्र सन्निधानारोपात् सत्सन्निधानेऽपि भ्रमाङ्गीकारः । ननु "एकां शाखां जीवो जहाती"त्यादिना छान्दोग्ये जीवस्य वृद्धिसङ्कोचौ श्रूयेते तन्न । चेत्रादिष्विवाभिमानत्यागेनापि तदुपपत्तेः तत्र तत्र अभिमानसदसद्भावौ च कर्मनियतौ । खण्डितारोपितशाखाप्ररोहस्तु तादात्विकजीवान्तराभिमानात् छिन्नजन्त्ववयवविकम्पः प्राणांशचोभमात्रात् न हि तत्र वेदनायां प्रमाणमस्ति, बाधान्तरमाह । नानादेह इति । एकस्मिन्नेव काले योगिनां विरुद्धधर्माध्यासेन स्वरूपभेदः प्रसज्येत । प्रसङ्गान्तरमाह । मुक्ताविति । देहप्रयुक्ते पुंसः परिमाणे मुक्तिदशायां देहाभावादात्मनः परिमाणविरहः स्यात् तथा च गुणवद्द्रव्यत्वमेव हीयेत अपरिमितस्यापि द्रव्यत्वं केचिदिच्छन्तीति चेन्न । विभुत्वप्रसङ्गादिति ॥ २३ ॥

भवतु विभुर्मुक्तः को दोष इत्यत्राह । निर्मुक्त इति ।

सू० निर्मुक्तस्त्वन्मते स्यात्कथमपरिमितो नित्यमूर्ध्वं प्रधावन् देहः कश्चित्तदानीमपि यदि नियतस्स्यात्तु तन्निघ्नताऽस्य ॥ इच्छातो देहमेकं विशति स परिमित्यर्थमेवेति हास्यं तस्मादास्माकनीत्या परिमितिरिह सा स्थायिनी या विमुक्तौ ॥ २४ ॥

मुक्तस्य हि पृथिव्या नित्यपतनवन्नित्योर्ध्वगमनं युष्माभिरु-

च्यते आलोकाकाशावधि वा उभयथाऽप्यपरिमितस्य गमनं न सिद्ध्येत् । देहविशेषपरिमित एवोत्पततीति शङ्कते । देह इति । नियत: अवश्यम्भावी स्वकर्मनियत इति वा । तत्र बाधकमाह । स्यादिति । कर्मनियतदेहत्वे परतन्त्रस्य कथं मुक्तत्वमिति भाव: । अस्तु घातिकर्मचतुष्टयरहितस्याघातिकर्मचतुष्टयप्रभावात् गत्यर्थो देह: तत्परित्यागक्षणे झटिति परिमाणसिद्ध्यर्थं सकललोकमस्तकस्थायिनं कञ्चिद्दिगम्बरं देहं सर्वे मुक्ता: प्रविशन्ति पृथग्वा शरीराणि परिगृह्णत इति वदन्तमुपालभते । इच्छात इति । न हि मुक्तस्येच्छाभोगौ युष्माभिरिष्येते । न च स्वच्छन्दव्यापारा: अत: परिमाणमात्रसिद्ध्यर्थं देहं परिगृह्णातीति निर्मूलकल्पनं निपुणैर्हास्यम् । तर्हि का गतिरित्यत्राह । तस्मादिति । मुक्तौ काचित्स्वाभाविकी स्वीकार्या सैव बद्धदशायामपि स्थिरेति नित्याऽणुर्जीव: तथा च सूत्रम् अन्त्यावस्थितेश्चोभयनित्यत्वादविशेष: इति । उभयमिह जीवस्वरूपं परिमाणं च ॥ २४ ॥

इत्यात्मनो देहपरिमाणत्वभङ्गः ॥

यदि यथा कर्मफलप्रद ईश्वर: कर्माणि चानन्तान्यपरिमितकालभोग्यानि तदा प्रागिव पश्चादपि कथं मोक्षोपायादिसिद्धिरित्यत्राह । कर्मेति ॥

मू० कर्माविद्यादिचक्रे प्रतिपुरुषमिहानादिचित्रप्रवाहे तत्तत्काले विपक्ति*र्भवति हि वि-

---

* यद्यपि डुपचष् पाके इति पचेः पाकार्थस्य षित्त्वेन षिद्भिदादिभ्योऽङ् इति पाणिनीयेन वा सरूपोऽस्त्रियामिति निषेधाद् विपचेत्येव न तु विपक्तिरिति नापि इक्श्तिपौ धातुनिर्देशे इति श्तिपा निर्वाहस्तथा सति शित्त्वेन शपि विपचतिरिति स्याच्च त्विष्टम् । तथाऽपि स्थागापापचोभावे । ३ । ३ । ९५ । इति पाणिनीयेन विशेषविधानात्साधु । षित्करणसामर्थ्याच्च विपचेत्यपि । अवस्थाव्यवस्थादिकं तु व्यवस्थायामसंज्ञायामिति ज्ञापकात्साधु ।

विधा सर्वसिद्धान्तसिद्धा ॥ तल्लब्धस्वावकाशप्रथमगुरुकृपागृह्यमाणः कदाचित् मुक्त्यैश्वर्यान्तसम्पन्निधिरपि भविता कश्चिचदित्थं विपश्चित् ॥ २५ ॥

चित्रप्रवाहत्वानूक्तिः परिहारकाकुगर्भा । तत्तदित्यादिना कस्यचित्कर्मिणः प्रागलब्धप्रजापतिप्रभृतिपदनिर्दशनं । विपक्तिः कर्मणां सहकारिलाभः फलविशेषोद्गतिर्वा तथा च पातञ्जलम् "जात्यायुर्भोगा विपाकाः" इति, चार्वाकव्यतिरिक्तास्सर्वे सामग्रीप्रवाहवैचित्र्यात्संसरतां मुक्तिहेतूपनिपातमिच्छन्ति अतो नाचानादिसंसारवादिना केनापि विमन्तव्यमित्यभिप्रायेण सर्वसिद्धान्तसिद्धत्वोक्तिः तच्छब्देनानुकूलविपक्तिविशेषः परामृश्यते, स्वशब्दः कृपाविषयः, सम्पदिह विवेकवैराग्यादिरूपा । अपिस्सम्भावनार्थस्समुच्चयार्थो वा । इत्थमिति । प्रकृतिपुरुषादितत्त्वचिन्ताप्रकारेण । यद्वा हिरण्यगर्भादिविपाकवदित्यर्थः । ननु हिरण्यगर्भादिपदविपक्तिः स्वस्य प्रागसिद्धाऽपि पुरुषान्तरसिद्धजातीयेति चेत् तत्त्वज्ञानवैराग्यादिसम्पदपि तथैव । दृष्टं चेतद् गुरुशिष्यक्रमे । आद्यमुक्तस्य ततः पूर्वमदृष्टजातीयेति चेन्न । आद्यमुक्ता निरुक्तेः यद्यसौ पूर्वमुक्त एव उक्तोत्तरमेतत् । अथ मुक्तेष्वादिः स कथं त्वया विदितः, ततः पूर्वं मुक्ताभावादिति चेत् तमपि कथं वेत्थ । अनादिमुक्तौ व्याघातादिति चेत् न । मुक्तप्रवाहे व्याघातः स्यात् न ह्यनादिमुक्तः कश्चिद्बध्यते । साध्यमोक्षो वा भवेत् येन व्याघातस्स्यात् किन्त्वनादिबद्धास्सर्वेऽपि लब्धोपायाः क्रमेण मुच्यन्ते तत एव मोक्षशास्त्रप्रामाण्यं निर्बाधमिति ॥ २५ ॥ इति संसरतां प्रत्यापत्तिहेतुविशेषः ॥

निर्वेदं सन्धुक्षयन् मुमुक्षोत्पत्तिप्रकारमाह । कृच्छ्रादिति ।

मू० कृच्छ्रात्संवर्तकष्टाद्यपगमजनितस्थूलदेहस्य जन्तोर्जाग्रत्स्वप्नसुषुप्तिर्मरणमथ मृतेरर्धसम्पद्दशास्स्युः ॥ सर्वं दुःखान्धकारस्थगितमिह सुखं त्वत्र खद्योतकल्पं त्यक्त्वा शुद्धाशयास्तन्निरवधिकसुखां निर्विविक्षन्ति मुक्तिम् ॥ २६ ॥

मृतेरर्धसम्पत् मूर्छा । तथा च सूत्रं मुग्धेऽर्धसम्पत्तिः परिशेषादिति । सर्वम् अनुकूलतया भाव्यमानमपि । ननु स्वर्गस्वाराज्यादिप्रभूतसुखमप्यस्तीत्यत्राह । सुखं त्विति । अल्पास्थिरत्वव्यक्त्यै खद्योतदृष्टान्तः तद्विषमधुकल्पं वैषयिकसुखं, निरवधिकत्वोक्त्या निर्दुःखत्वमपि लक्ष्यते । निर्विविक्षन्तिभोक्तुमिच्छन्तीति ॥ २६ ॥ इति मुमुक्षोत्पत्तिप्रकारः ॥

इह सयूथ्याः परे च केचिदाहुः इतः पूर्वमिव कारणाभावात् केचित्पश्चादपि न मोक्ष्यन्ते "एकं पादं नोद्धरति स्वलीलाद्यर्थे समुद्धरंस्तं चेत्" "सततञ्च मृत्युजन्मनाभृतं भवेत्"- "क्षिपाम्यजस्रमशुभान्" मामप्राप्यैव" इत्यादि भरेतत्सिद्धं तस्मिन्पक्षे बाधकं शङ्कते । कश्चिदिति ।

मू० कश्चिच्चेन्नित्यबद्धः किमयमहमिति स्यान्मुमुक्षोरुपेक्षा मैवं युक्तस्य मुक्तिर्भवति दृढमिति प्रत्ययात्तत्प्रवृत्तेः ॥ नोचेत्स्यामन्त्यमुक्तः किमहमिति न केऽप्यद्य मुक्तौ यते-

रन् सर्गस्थित्यादिसन्तत्यविरतिरत इत्येव-
मेकेऽन्यथाऽन्ये ॥ २७ ॥

सन्देहेऽपि प्रवृत्तिस्सम्भवतीत्यभिप्रायेण प्रतिवक्ति । मैवमिति । अयं भावः ।

स्वरूपे योग्यभावेऽपि सहकार्यव्यवस्थितेः ।
विमुक्तिर्मम सिद्धेद्वा न वेति विचिकित्सते ॥
अनिर्धार्यापि यः कश्चित्तथ्यमात्ममनोरथः ।
पान्तिके फलभूयस्त्वे सांयात्रिकवदीहते ॥
यथाकथञ्चिदारब्धेऽप्यापवर्गिकवर्त्मनि ।
प्रसीदन्नीश्वरो बुद्धिं प्रयच्छेन्निश्चलामिति ॥

उपायविधानशास्त्रार्थनिश्चयात्स्वस्य च तदानुगुण्यदर्शना-न्निस्संशयोऽपि कश्चित्प्रवर्ततेत्याह । युक्तस्येति । अन्यथा कथञ्चि-न्निष्फलप्रयत्नोऽप्यस्तीति निश्चयात्स किमहमिति कृष्यादावपि न प्रव र्ततेति भावः । नोचेदित्यादिनापि प्रतिबन्द्यन्तरोक्तिः, स्वात्मन्य-मुक्तत्वशङ्कायामपि कृतांशः फलिष्यत्येवेति शास्त्रतोऽवगमात्प्रव-र्ततेति चेत् एवं नित्यबद्धसद्भावनिश्चयेऽपि स्वयं निवृत्तिधर्मयो-ग्यतया दृष्टः कृतमपि फलिष्यतीति किं न प्रवर्तेत एवं नित्यबद्धे सम्भवति "अव्युच्छिन्नास्ततस्त्वेते सर्गस्थित्यन्तसंयमा" इत्यादि-शास्त्रस्यार्थवत्त्वसिद्धिरित्याह । सर्गेति । अयमेव सिद्धान्त इति निश्चयव्युदासायाह । इत्येवमेक इति । पक्षान्तरमाह । अन्यथा-ऽन्य इति । स्वरूपयोग्यानां शुकादिवत्कदाचित्सहकार्यागमान्मुक्ति स्स्यादेव तदा संसारपान्थस्य याति मोहश्रमः श्रममित्यादेस्सङ्को-चकाभावादिति भावः ॥ २७ ॥

इति नित्यसंसारिसदसद्भावपक्षौ ॥

द्वयोरपि पक्षयोर्दोषमाशङ्क्य प्रत्याह । निश्शेषेति ॥

मू० निःशेषात्मापवर्गे विरतविहरणो विश्वकर्ता तदा स्यात् नित्यं चेत्कोऽपि दुःख्येन्निरुपधिकदयाहानिरस्येति चेन्न ॥ पक्षः पूर्वो यदि स्याद्विहरणविरतिः स्वेच्छया नैव दोषश्शिष्टे पक्षे निरुद्धा निरुपधिकदया कुत्रचिन्नित्यमस्तु ॥ २८ ॥

उत्तरार्धे पक्षद्वयदोषपरिहारार्थं, पुरुषान्तरप्रतिरोधादिना लीलाविरतौ हि दोषः न तु स्वेच्छया, प्रवृत्तिवन्निवृत्तेरप्येच्छत्वात्क्वचिन्नित्यं दयारोधोऽपि तत्तज्जीवकर्मवशात् । अतः प्रतिबन्धरहितेषु सावकाशा कृपा, अल्पव्याजेनानन्तापराधसहनाच्च ॥ २८ ॥ इतिपक्षद्वयोक्तप्रसङ्गपरिहारः ॥

धर्मस्य तत्त्वं निहितं गुहायां किम्पुनर्निवृत्तिधर्मस्य, अतः कथं कश्चिदपि मोक्ष्यत इत्यत्र मोक्षोपायस्वरूपं निष्कर्षति भक्तिरिति ।

मू० भक्तिर्मुक्तेरुपायः श्रुतिशतविहितस्सा च धीः प्रीतिरूपा तन्निष्पत्त्यै फलेच्छाद्युपधिविरहितं कर्म वर्णाश्रमादेः ॥ ज्ञानध्यानादिवाचां समफलविषया सैव युक्ता प्रतिष्ठा सामान्योक्तिस्समानप्रकरणपठिता पर्यवस्येद्विशेषे ॥ २९ ॥

श्रुतिशतविहितो मुक्तेरुपायो भक्तिरित्यन्वयः । ननु ब्रह्मविद्ययैव मुक्तिरिति सिद्धान्तः भक्तिशब्दस्त्वष्टविधत्वादिवचनैरन्यार्थः भज सेवायामिति च सामान्यतः पठ्यते क्वचित्तु रूढिक्लृप्तौ गौरवमित्यत्राह । सा चेति । धीरित्यनेन ब्रह्मविद्यात्वाविरोधस्थापनं, प्रीतिरूपेति रूढिनिमित्तसूचनं महनीयविषये प्रीतिर्भक्तिः प्रीत्यादयश्च ज्ञानविशेषा इति वक्ष्यते। "स्नेहपूर्वमनुध्यानं भक्तिः इति चोपायोविशेष्यते । अपाम सोमममृता अभूम इत्यादि दर्शनात्कर्मभिरेव मुक्तिः किं न स्यादित्यत्राह । तदिति । केवलधर्माणां क्षयिफलत्वनिश्चयात्तत्रामृतत्वादिवचनमन्यपरं विद्याङ्गेषु तु मुक्तिसाधनत्वश्रुतिः स्तुत्यर्था अतः "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति" इत्यादिभिरभिप्रेतं सन्निपत्योपकारकत्वमिह युक्तमिति भावः फलशब्दोऽत्र स्वर्गादिविषयः, फलसङ्गकर्तृत्वाभिमानत्यागे हि स्वरूपानुरूपफलसाधनाङ्गत्वमित्यभिप्रायेणोपाधिरहितत्वोक्तिः उत्तरेणादिशब्देन गुणनिमित्तादिसङ्ग्रहः । ननु वेदनध्यानोपासनादिशब्दैर्मुक्त्युपायोक्तौ यथार्हं विकल्पः स्यादित्यत्राह । ज्ञानेति । समफलविषयेति एकत्र विश्रमौचित्यप्रदर्शनं सम्भवति गत्यन्तरे ऽष्टदोषविकल्पो न न्याय्यः न चैकस्मिन्नधिकारिणि गुरुलघुविधिः स्यात् नापि ज्योतिष्टोमाग्निहोत्रादिवदिह फलतारतम्यसम्भवइति भावः । प्रतिष्ठा तत्तत्सामान्याकारैः प्रतिपाद्येत्यर्थः । ननु "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनःइति" कठवल्लीवाक्यात् भक्तेर्ज्ञानहेतुताऽवगम्यते गीयते च "भक्त्या मामभि जानाति" इत्यादि, संजयश्चाह "शुद्धभावं गतो भक्त्या शास्त्राद्वेद्मि जनार्दनम्" इति अतो भक्तिसाध्यज्ञानविशेषान्मुक्तिः स्यादित्यत्राह । सामान्येति । अयं भावः भक्तेर्ज्ञानसाधनत्वश्रुतिः पर्वभेदनानेकफलतया स्यात्

अतएव हि "भक्त्या त्वनन्यया शक्यः" इत्यादिना ज्ञानदर्शनप्राप्तिसाधनत्वोक्तिः "भक्त्या लभ्यस्त्वनन्यया" इति च नियम्यते भक्तिसाध्यं प्रापकज्ञानमपि भक्तिलक्षणोपेतम् अतोवेदनादिसामान्यशब्दानामिह पश्वादिन्यायात् सन्निहितविशेषपर्यवसानं सिद्धम् ॥ २६ ॥

ये नु मन्यन्ते "तमेवं विद्वान् "ब्रह्मविदाप्नोतिपरं" इत्यादिषु यथा श्रुति वित्तिमात्रस्य मुक्तिसाधनत्वविधिः कल्प्यः सकृत्कृतश्च शास्त्रार्थः अतो न विशेषपर्यवसानं युक्तमिति तान्प्रति सफलत्वाद्युक्त्या सूचितं व्यनक्ति । ध्यानादीति ॥

मू० ध्यानाद्युक्त्या ध्रुवानुस्मृतिरिह विहिता ग्रन्थिमोक्षाय सैव स्पष्टा दृष्टिस्तथैव श्रुतफलविषया सेवनत्वादुपास्तिः ॥ क्वाप्यैक्यं विद्युपास्त्योर्व्यतिकरितगिरा भक्तिमेवाह गीता सर्वं तद्वित्तिमात्रे फलवति विफलं तेन सैवं विशिष्टा ॥ ३० ॥

अत्र हि मुक्तिसाधनवित्तेः प्रत्ययावृत्तिरूपचिन्तावाचिध्यानशब्दशक्त्या नावृत्तिरूपत्वं निरस्तं । न्यायस्तु न वचनविरोधे । आदिशब्देन ज्ञानवेदनादिशब्दसङ्ग्रहः ध्रुवानुस्मृतिशब्दस्तु चिन्ताया निरन्तरस्मृतिरूपत्वमाह । ग्रन्थिमोक्षायेति फलैक्यव्यञ्जनम् । तत्फलार्थे वाक्ये दृष्टिशब्दस्तु स्मृतिमेव वैशद्येन विशिनष्टि । ननु चाक्षुषज्ञानं प्रत्यक्षमात्रं वा ब्रूयादित्यत्राह । तथैवेति । विशदध्रुवानुस्मृतौ उपास्तिशब्दनिमित्तमाह सेवनत्वादिति । यस्तद्वेद इत्यादिषु केषु चिद्वाक्येषु एकस्मिन्नेव विषये वेदनोपासनशब्दयोर्व्यतिकरेणोपक्रमोपसंहारदर्शनाच्च वेदनमेवोपासनतया विशेष्यत-

इत्याह । क्वापीति । एतेषु क्वचिदपि वाक्ये भक्तिशब्दो न मोक्षोपायविषयः श्रूयत इत्यत्र "यमेवैष वृणुते तेन लभ्य" इति श्रुत्यभिप्रेतं गीयत इत्याह । भक्तिमेवेति । फलितमनिष्टप्रसङ्गमाह । सर्वे तदिति । निगमयति । तेनेति । सा मुक्तिसाधनतयोक्ता हि वित्तिः भक्तिरूपत्वपर्यन्तविशेषणविशिष्टेत्यर्थः ॥ ३० ॥ इति भक्तिस्वरूपमोक्षोपायत्वे ॥

यदि भक्तिरेका मुक्त्युपायः कथं परविद्याभेदक्लृप्तिरित्यत्राह । विद्या इति ॥

विद्याः पञ्चाग्निवैश्वानरदहरमधुन्याससत्पूर्वसंज्ञा नानाशब्दादिभेदात्तुलितफलतया तद्विकल्पश्च शिष्टः ॥ कर्मज्ञानाख्ययोगौ त्विह परभजनाधिक्रियार्थौ स्वदृष्ट्या धर्मैर्वर्णाश्रमाणां त्रयमिदमवदन् सेतिकर्तव्यताकम् ॥ ३१ ॥

नाना मिथोभिन्ना इत्यर्थः शब्दादिभेदात् द्वितीयाद्वैदकवगात् । किमेतासां ज्योतिष्टोमाग्निहोत्रादिवत्फलभूयस्त्वार्थमेकस्मिन्नधिकारिणि समुच्चयः सम्भवेदित्यत्राह । तुलितेति । परिच्छिन्नेषु स्वर्गादिफलेषु तारतम्यवत्सु तद्भूयस्त्वापेक्षयोपायसमुच्चयसम्भवः । इह तु न तथा अविशिष्टफलत्वात् स्वात्मप्राप्तौ सालोक्यादिमात्रे च मुक्तिशब्दोभाक्तः मुक्तितारतम्यं वदद्भिस्तु मुक्तिरेव शिक्षणीया । सर्वकर्मनिवृत्तौ स्वतःप्राप्तब्रह्मानुभवतारतम्यायोगात्, कतिपयकर्मनिवृत्तेः स्वर्गादावपि समत्वात् शिष्टः, "विकल्पोऽविशिष्टफलत्वात्" इति सूत्रे। ननु कर्मज्ञानयोगयोरपि मुक्तिसाधनत्वं शिष्यते गरिष्ठस्य च भक्तियोगस्य अतोमुक्तितारतम्यं युज्यत इत्यत्राह । कर्मेति । स्वदृष्ट्या

सन्नयदसन्नयदुभयस्यैवाभ्युदये प्रायश्चित्तम् । अधि० ६ ।

साान्नाय्यसंयोगात्सन्नयतः स्यात् ॥ २१ ॥

इयमिष्टिः केवलं सन्नयत उतासन्नयतो ऽपीति संशये पूर्वपक्षमाह । सानाय्येति । सान्नाय्यसंयोगाद्दधिक्षीरवाचकशब्दसंयोगात् ॥ २१ ॥

ओषधिसंयोगाद्वोभयोः ॥ २२ ॥

सिद्धान्तमाह । ओषधीति । ये मध्यमा ये स्थविष्ठा इत्योषधिसंयोगाद् उभयोः स्यात् । सन्नयतो ऽसन्नयतश्च ॥ २२ ॥

वैगुण्यान्नेति चेत् ॥ २३ ॥

ननु दध्यधिकरणत्वाभावेन चरोः वैगुण्यं स्यादित्याह । वैगुण्येति ॥ २३ ॥

नातत्संस्कारत्वात् ॥ २४ ॥

परिहरति । नेति । अतत्संस्कारात् । दधिसंयोगेनौषधिसंस्काराविधानाद् न वैगुण्यं, तण्डुलवद्दध्नो ऽपि वैकृतदेवतासंबन्धार्थमनुवादादिति भावः ॥ २४ ॥

सत्राय प्रवृत्तमात्रस्य विश्वजित् । अधि० ७ ।

साम्युत्थाने विश्वजित्क्रीते विभागसंयोगात् ॥ २५ ॥

सत्राय दीक्षिताः साम्युत्तिष्ठेरन् सोमं विभज्य विश्वजिता यजेतेति । सामि अपरिसमाप्य । अयं विश्वजिद्यागः सोमक्रयोत्तरं विरामेच्छायामुत प्रवृत्तमात्रे विरामेच्छायामिति संशये पूर्वपक्षमाह । सामिति । सामि असमाप्य व्युत्थाने विश्वजिद्यागः क्रीते सोमएव । विभागसंयोगात् । वाक्ये इति शेषः ॥ २५ ॥

प्रवृत्ते वा प्रापणान्निमित्तस्य ॥ २६ ॥

सिद्धान्तमाह । प्रवृत्तइति । प्रवृत्ते संकल्पमात्रे विश्वजिद् निमित्तस्य विश्वजिद्यागनिमित्तस्य प्रापणात् प्राप्तत्वात् । संकल्पोत्तरत्यागस्य विश्वजिन्निमित्तत्वादिति भावः ॥ २६ ॥

आदेशार्थेतरा श्रुतिः ॥ २७ ॥

ननु सोमविभागस्याङ्गत्वश्रवणादक्रीते विभागाभावाद्विगुणं स्या-

दत आह । आदेशेति । इतरा श्रुतिः सोमं विभज्येति श्रुतिः आदेशार्था सर्वद्रव्यविभागार्था । सत्रयागार्थं स्वीयद्रव्यस्य संपृक्तत्वेन स्वस्य उपरतौ स्वीयांशविभागस्य लोकप्रसिद्धस्यानुवादकं न त्वङ्गत्वविधायकमिति भावः ॥ २७ ॥

दीक्षापरिमाणस्य द्वादशाहत्वनियमः । अधि० ८ ।

*दीक्षापरिमाणे याथाकाम्यविशेषात् ॥ २८ ॥

एका दीक्षा द्वादश दीक्षा इति वाक्यद्वयं, तयोः इच्छया ऽनुष्ठानमुत व्यवस्थितमिति संशये पूर्वपक्षमाह । दीक्षेति । दीक्षापरिमाणे दीक्षादिवसपरिमाणे याथाकामी कर्तुरिच्छा नियामिकेति सारम् ॥ २८ ॥

द्वादशाहस्तु लिङ्गात्स्यात् ॥ २९ ॥

एका दीक्षा प्रकृतौ । द्वादशदीक्षापक्षस्तु द्वादशाहे । दीक्षितो द्वादश रात्रीः भृतिं वन्वीतेत्यत्र द्वादशरात्रपर्यन्तं यज्ञसाधनद्रव्यभिक्षाविधानलिङ्गादित्यभिप्रायेण सिद्धान्तमाह । द्वादशेति । द्वादशाहक्रतुः द्वादशदीक्षः स्यात् । उक्तलिङ्गात् ॥ २९ ॥

गवामयने माघपौर्णमास्याः पुरस्ताद् दीक्षा । अधि० ९ ।

पौर्णमास्यामनियमो ऽविशेषात् ॥ ३० ॥

गवामयने श्रुतम् । चतुरहे पुरस्तात्पौर्णमास्यै दीक्षेरन्निति । अत्र या का चित्पौर्णमासी उत नियतेति संशये पूर्वपक्षमाह । पौर्णमास्यामिति । स्पष्टो ऽर्थः ॥ ३० ॥

आनन्तर्यात्तु चैत्री स्यात् ॥ ३१ ॥

पक्षान्तरमाह । आनन्तर्यादिति । आनन्तर्यात् । चित्रापूर्णमासे दीक्षेरन्नित्यस्य उदाहृतवाक्यसमीपवृत्तित्वाच्च चैत्री स्यात् ॥ ३१ ॥

---

* अत्र भाष्यकारो, द्वादशदीक्षापक्षः प्रकृतौ, एकादिदीक्षापक्षास्तु विकृतौ इति प्रतिपादितवान् । तदनुसारेण अधिकरणविषयोल्लेखः कृतः । वार्त्तिककारस्तु भाष्यस्यायुक्तत्वं वर्णयित्वा याथाकाम्यपक्षस्यैव सिद्धान्तत्वमङ्गीकृत्य द्वादशाहस्तु लिङ्गात् स्याद् इति सूत्रेण उत्सूत्रपूर्वपक्षान्तरसमाधानं चकार ॥

माघी वैकाष्टकाश्रुतेः ॥ ३२ ॥

सिद्धान्तमाह । माघीति । तेषामेकाष्टकायां क्रयः संपद्यतइति माघबहुलाष्टम्यां सोमक्रयविधानात् । तदनुरोधेन माघपूर्णिमा नियता । तथा च द्वादशदीक्षानन्तरं त्रयोदशदिवसे ऽष्टम्यां क्रय इति भावः ॥ ३२ ॥

अन्या अपीति चेत् ॥ ३३ ॥

सर्वा अपि कृष्णाष्टम्यः एकाष्टकापदवाच्या इति शङ्कते । अन्या अपीति । अन्याः द्वादशाप्यष्टम्यः ॥ ३३ ॥

न भक्तत्वादेषां हि लोके ॥ ३४ ॥

परिहरति । नेति । भक्तत्वाद् लक्षणया लोके व्यवहारात् ॥ ३४ ॥

दीक्षापराधे चानुग्रहात् ॥ ३५ ॥

माघ्या एवैकाष्टकापदवाच्यत्वे लिङ्गमाह । दीक्षेति । दीक्षाया अपराधे अयोगे अनुग्रहात् क्रयेण तदनुग्रहश्रवणात् । अयं भावः । एषा वै संवत्सरस्य पत्नी यदेकाष्टकेत्युक्त्वा तस्यामेकाष्टकायां क्रयः संपद्यते तेनैकाष्टकां न छम्बट्कुर्वन्तीति । न छम्बट् कुर्वन्ति अनादरं न कुर्वन्ति । दीक्षाया अयोगेन यो ऽनादरः स क्रययोगेन परिहृत इति भावः । एकाष्टकाया, एषा वै संवत्सरस्य पत्नीत्यत्रैकवचनश्रवणं सर्वाष्टमीषु तत्पदवाच्यत्वाभावे लिङ्गम् ॥ ३५ ॥

उत्थाने चानुप्ररोहात् ॥ ३६ ॥

एकवचनश्रवणाद्भवत्वेका सा माघ्येव कथमत्राह । उत्थानइति । उत्थाने एकाष्टकायाः प्राप्तौ अनुप्ररोहाद् ओषधिवनस्पतीनां पल्लवितत्वश्रवणात् , तानुत्तिष्ठत ओषधयो वनस्पतयो ऽनूत्तिष्ठन्तीति । तान् सत्रिणः उत्तिष्ठतः यागार्थमुत्तिष्ठतः ओषधिवनस्पतयो ऽनूत्तिष्ठन्तीति वसन्तसामीप्यं ज्ञापयति । इदं लिङ्गं नान्यत्रेति भावः ॥ ३६ ॥

अस्यां च सर्वलिङ्गानि ॥ ३७ ॥

अस्यां माघकृष्णाष्टम्यामेकाष्टकापदवाच्यायामन्यानि बहूनि

लिङ्गानि सन्तीत्याह । अस्यामिति । तानि लिङ्गानि भाष्याज्ज्ञेयानि ॥ ३७ ॥

दीक्षोत्कर्षे तन्नियमानामप्युत्कर्षः । अधि॰ १० ।

दीक्षाकालस्य शिष्टत्वादतिक्रमे नियतानामनुत्कर्षः प्राप्तकालत्वात् ॥ ३८ ॥

दीक्षितो न ददाति, न जुहोतीत्यादिनियमा अवभृथपर्यन्तं श्रुताः। तत्र दैवादवभृथोत्कर्षे नियमविमोकस्याप्युत्कर्षो न वेति संशये पूर्वपक्षमाह । दीक्षेति । दीक्षाकालस्य, न जुहोतीत्यादिनिषेधाङ्गत्वेन शिष्टत्वाद् अतिक्रमे अवभृथोत्कर्षे नियतानामग्निहोत्रादिनिषेधानामनुत्कर्षः । दीक्षाविमोकस्य दैवादुत्कर्षेऽपि विमोककालस्य प्राप्तत्वात् । अग्निहोत्रादिकमवभृथात्प्रागप्यनुष्ठेयमिति भावः ॥ ३८ ॥

उत्कर्षो वा दीक्षितत्वादविशिष्टं हि कारणम् ॥ ३९ ॥

दीक्षितो न जुहोतीत्यत्र कालस्य निषेधाङ्गत्वे दीक्षितशब्दस्य लक्षणापत्त्या दीक्षाविशिष्टत्वमेव निषेधप्रवृत्तिकारणं, तस्यावभृथोत्कर्षे सत्त्वान्निषेधस्याप्युत्कर्ष इति सिद्धान्तमाह । उत्कर्ष इति । निषेधस्याप्युत्कर्षः । दीक्षितत्वात् तदानीं दीक्षाविशिष्टत्वात् । निषेधपालनकारणमविशिष्टमस्त्येव ॥ ३९ ॥

ज्योतिष्टोमोत्कर्षे प्रतिहोमाननुष्ठानम् । अधि॰ ११ ।

तत्र प्रतिहोमो न विद्यते यथा पूर्वेषाम् ॥ ४० ॥

दैवादवभृथोत्कर्षे उत्कर्षस्य पुरुषापराधप्रयुक्तत्वात् तत्र होमलोपो दोषजनकः । अतः दीक्षाविमोकानन्तरं गणनं कृत्वा तावद्धोमा अनुष्ठेया इति बहिः पूर्वपक्षे सिद्धान्तमाह । तत्रेति । प्रतिहोमः परिसंख्याय होमो न, यथा पूर्वेषां प्रवर्ग्यानुदिनसंबन्धिनां तथा ॥ ४० ॥

कालप्राधान्याच्च ॥ ४१ ॥

कालस्यानुपादेयत्वेन विधानासंभवात्स प्रधानं, स च यो गतः स गत एवेति अभिप्रायवानाह । कालेति ॥ ४१ ॥

उदवसानीयोत्कर्षे ऽपि प्रतिहोमाननुष्ठानम् । अधि० १२ ।

प्रतिषिद्धश्चोर्ध्वमवभृथादिष्टेः ॥ ४२ ॥

दैवादुदवसानीयायाः अवभृथोत्तरवर्तिन्या उत्कर्षे दीक्षाग्रहणस्यावभृथान्तत्वाद् दीक्षाऽभावेन तत्र प्रतिहोमा आवश्यका इति पूर्वपक्षे सिद्धान्तमाह । प्रतीति । ऊर्ध्वमवभृथादुदवसानीयेष्ट्याः प्राग् लुप्तानां न प्रतिहोमः । यतः वचनेन प्रतिषिद्धः । एतया पुनराधेयसंमितयेष्ट्वाऽग्निहोत्रं होतव्यमिति । एतयोदवसानीयया ॥ ४२ ॥

प्रतिहोमे सायमग्निहोत्रप्रभृत्यारम्भः । अधि० १३ ।

प्रतिहोमश्चेत्सायंप्रभृतीनि हूयेरन् ॥ ४३ ॥

प्रतिहोमो ऽस्तीति कृत्वा चिन्त्यते । प्रतिहोमे सिद्धान्तमाह । प्रतीति । सायंहोममारभ्य होम इति सूत्रार्थः । चेदित्यनेन कृत्वाचिन्ता सूचिता ॥ ४३ ॥

षोडशिसंस्थे प्रातरग्निहोत्रप्रभृत्यनुष्ठानम् । अधि० १४ ।

प्रातस्तु षोडशिनि ॥ ४४ ॥

षोडशिकृतौ प्रातरारभ्य लुप्तत्वात्प्रतिहोमे स एव क्रम इत्याह । प्रातरिति ॥ ४४ ॥

भेदनादिनिमित्तकहोमस्य दर्शपूर्णमासाङ्गत्वम् । अधि० १५ ।

प्रायश्चित्तमधिकारे सर्वत्र दोषसामान्यात् ॥ ४५ ॥

दर्शपूर्णमाससमीपे पठितं, 'भिन्ने जुहोतीति प्रायश्चित्तं सर्वत्र तन्निमित्ते उत तत्रैवेति संशये पूर्वपक्षमाह । प्रायश्चित्तमिति । अधिकारे किं चित्प्रकरणे श्रुतं प्रायश्चित्तं सर्वत्र दोषस्य निमित्तस्य भेदनादेः साम्यात् ॥ ४५ ॥

प्रकरणे वा शब्दहेतुत्वात् ॥ ४६ ॥

सिद्धान्तमाह । प्रकरणइति । प्रकरणएव विश्रामः शब्दस्य यजेतेतिशब्दप्रतिपाद्यप्रधानयागस्य हेतुत्वात् । उपकारकत्वात् । तत्रैव विश्रामे प्रकरणपठितानां प्रधानोपकारकत्वं क्लृप्तं, प्रकरणविभेदे फलं कल्पनीयमिति गौरवमिति भावः ॥ ४६ ॥

अतद्विकाराच्च ॥ ४७ ॥

ननु दर्शपूर्णमासे विश्रान्तमपि भिन्ने जुहोतीत्यादि प्रायश्चित्तम निर्देशेनाग्निहोत्रादौ सिध्यतामत आह । अतदिति । अग्निहोत्रस्य दर्शपूर्णमासप्रकृतिकत्वाभावादिति तदर्थः ॥ ४७ ॥

व्यापन्नशब्दार्थनिर्णयः । अधि० १६ ।

व्यापन्नस्याप्सु गतौ यदभोज्यमार्याणां तत्प्रतीयेत ॥ ४८ ॥

व्यापन्नमप्सु प्रक्षिपेदित्यत्र व्यापन्नपदार्थः क इति प्रश्ने उत्तरमाह । व्यापन्नस्येति । गतौ इत्यन्तम् उक्तवाक्यानुवादकम् । आर्याणां यदभोज्यं केशकृमिमलादिदूषितं तद्व्यापन्नं प्रतीयेत ॥ ४८ ॥

अपच्छेदयौगपद्ये ऽपि प्रायश्चित्तम् । अधि० १७ ।

विभागश्रुतेः प्रायश्चित्तं यौगपद्ये न विद्यते ॥ ४९ ॥

बहिष्पवमानस्तोत्रार्थं बहिः प्रसर्पतामृत्विजामन्वारम्भः श्रूयते । अध्वर्युं प्रस्तोता ऽन्वारभते प्रस्तोतारं प्रतिहर्ता प्रतिहर्तारमुद्गाता उद्गातारं ब्रह्मेति । एवमन्वारम्भेण गच्छतां प्रमादाद्विभागे प्रायश्चित्तं श्रुतम् । यदि प्रतिहर्ता ऽपच्छिन्द्यात्तस्मिन्नेव सर्ववेदसं दद्याद् यद्युद्गाता ऽपच्छिन्द्याददक्षिणं तं यज्ञमिष्ट्वा तेन पुनर्यजेतेति तत्र तद्दद्यात्पूर्वस्मिन् दास्यन्स्यादिति। अपच्छेदो विभागः । सर्ववेदसं सर्वस्वम् । अत्रोद्गातृप्रतिहर्तृसंयोगनाशिकायामन्यतरक्रियायां प्रायश्चित्तद्वयमुक्तम् । उभयक्रियया यत्र विभागः तत्र प्रायश्चित्तं प्रवर्तते उत नेति संशये पूर्वपक्षमाह । विभागेति । यद् अन्यतरविभागे श्रुतं प्रायश्चित्तं तद् यौगपद्ये उभयक्रियाजन्यविभागे सति न विद्यते । अन्यतरक्रियाजन्यविभागरूपनिमित्ताभावादिति शेषः ॥ ४९ ॥

स्याद्वा प्राप्तनिमित्तत्वात्कालमात्रमेकम् ॥ ५० ॥

सिद्धान्तमाह । स्याद्वेति । प्रायश्चित्तं स्यात् प्राप्तनिमित्तत्वात् । अयं भावः । यत्क्रियाजन्यो विभागः स तत्कर्तेति व्यवहारः । उभयक्रि-

याजन्यविभागे तद्विभागानुकूलकृतिमत्त्वं कर्तृत्वं प्रत्येकमस्त्येव । दैवात्कालैक्यम् । तथा च निमित्तसत्त्वात्प्रायश्चित्तमस्त्येवेति ॥ ५० ॥

अपच्छेदयोगपद्ये अदक्षिणत्वसर्वस्वदक्षिणत्वयोः विकल्पः । अधि० १८ ।

*तत्र विप्रतिषेधाद्विकल्पः स्यात् ॥ ५१ ॥

एवं निमित्तद्वयसिद्धौ प्रायश्चित्तयोः समुच्चयो विकल्पो वेति संदेहे समुच्चय इति पूर्वपक्षे सिद्धान्तमाह । तत्रेति । तत्र उक्तनिमित्तककर्मणोः अनुष्ठाने विप्रतिषेधाद् विरोधाद् विकल्पः स्यात् । अयं भावः । उद्गात्रपच्छेदे प्रक्रान्तस्यादक्षिणत्वमन्यस्य द्वादशशतदक्षिणत्वम्, एवं प्रतिहर्त्रपच्छेदे तस्मिन्नेव सर्वस्वदक्षिणा एवं प्रयोगद्वयम् । तत्र प्रथमप्रयोगे सर्वस्वदाने अपरनिमित्तकः अदक्षिणत्वव्याघातः । द्वितीये सर्वस्वदाने तस्य द्वादशशतदक्षिणत्वव्याघातः सर्वस्वदक्षिणायाः प्रथमप्रयोगसंबन्धव्याघातश्चेति ॥ ५१ ॥

प्रयोगान्तरे वोभयानुग्रहः स्यात् ॥ ५२ ॥

प्रथमप्रयोगं सर्वस्वदक्षिणं समाप्य पुनर्द्रव्यसंपादनं कृत्वा एकमदक्षिणं समाप्य द्वितीयप्रयोगं विहितदक्षिणं कुर्यात् । तथा च समुच्चयः संभवतीत्याशङ्कते । प्रयोगेति । व्याख्यातकल्पम् ॥ ५२ ॥

न चैकसंयोगात् ॥ ५३ ॥

इमं पक्षं दूषयति । न चेति । प्रक्रान्तप्रयोगएव सर्वस्वदक्षिणाया अदक्षिणत्वस्य च श्रवणे प्रयोगभेदेनानुष्ठाने अशास्त्रीयमेव स्यादिति भावः ॥ ५३ ॥

अनुक्रमेणापच्छेदे उत्तरापच्छेदनिमित्तकप्रायश्चित्तम् । अधि १९ ।

पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत् ॥ ५४ ॥

प्रथमं प्रतिहर्तृकर्तृक उद्गातृतो विभागः, पश्चादुद्गातृकर्तृको ब्रह्मणो विभागः, तत्र क्रमिकत्वात्कस्य केन बाध इति विचारे सिद्धान्तमाह । पौर्वापर्यइति । पूर्वदौर्बल्यं पूर्वनिमित्तककर्मबाधः । प्रकृतिवत् । यथा प्रकृ-

* प्रतिषेधादिति भाष्ये पाठः ।

ततः पञ्चप्रयाजानां प्रथमं प्राप्तौ नव प्रयाजा इज्यन्तइत्यनेन वैकृतेन पूर्वस्य पञ्चत्वस्य बाधस्तथा ॥ ५४ ॥

उद्गातुरुत्तरापच्छेदे ऽपि सर्वस्वदक्षिणादानम् । अधि० २० ।

यद्युद्गाता जघन्यः स्यात्पुनर्यज्ञे सर्ववेदसं दद्याद्यथेतरस्मिन् ॥ ५५ ॥

तत्र प्रथमं प्रतिहर्तुरपच्छेदः तन्निमित्तक्रतुः स एव सर्वस्वदक्षिणः प्राप्तः । तत उद्गात्रपच्छेदे अदक्षिणं समाप्य द्वितीयस्य प्रयोग आरब्धः तस्मिन्प्रयोगे पूर्वप्रयोगारम्भवेलायां द्वादशशतदक्षिणा स्थिता तत्रैव प्रतिहर्त्रपच्छेदेन द्वादशशतदक्षिणां बाधित्वा सर्वस्वदक्षिणा प्राप्ता । एवं सति उत्तरप्रयोगे पूर्वप्रयोगे देयत्वेन यत् क्लृप्तं तद्दक्षिणेति विहितम् । पूर्वकृतौ द्वादशशतं प्रथमं क्लृप्तं पश्चात्सर्वस्वं क्लृप्तम् । उत्तरप्रयोगे कतमद् ग्राह्यमिति संशये प्रथमक्लृप्तं द्वादशशतमेवेति पूर्वपक्षे सिद्धान्तमाह । यदीति । उद्गाता उद्गात्रपच्छेदः जघन्यः पश्चात् पुनर्यज्ञं सर्ववेदसं दद्यात् । प्रतिहर्तृमात्रापच्छेदे यथेतरस्मिन् यथा प्रतिहर्त्रपच्छेदे पूर्वदिने सर्वस्वदक्षिणा तथैव । पूर्वस्मिन् दास्यन्स्यादित्यत्र पूर्वशब्देनाव्यवहितनैमित्तिकी, न व्यवहितं द्वादशशतमिति भावः ॥ ५५ ॥

अहर्गणे ऽपच्छेदे न सर्वेषामावर्तनम् । अधि० २१ ।

अहर्गणे यस्मिन्नपच्छेदस्तदावर्तेत कर्मपृथक्त्वात् ॥ ५६ ॥

अहर्गणे द्वादशरात्रादौ मध्ये यस्यां चित्सुत्यायामुद्गातुरपच्छेदे निखिलसुत्यानाम् एकफलजनकत्वेनैककर्मत्वात्तं द्वादशरात्रात्मकं निखिलक्रतुमदक्षिणं समाप्य निखिलः क्रतुरावर्त्य इति बहिः पूर्वपक्षे सिद्धान्तमाह । अहरिति । अहर्गणे द्वादशाहादौ यस्मिन्नहनि अपच्छेदः तत् तदहर्मात्रमावर्तते । कर्मणां द्वादशसुत्यानां पृथक्त्वात् । द्वादशाह इति संख्यया कर्मभेदादिति भावः ॥ ५६ ॥

इति श्रीमज्जैमिनिसूत्रवृत्तौ षष्ठस्याध्यायस्य पञ्चमः पादः समाप्तः ॥ ५ ॥

सम्पद्यते, तत्र विशेषणेन हला तदन्तविधौ भृशादिषु हलन्तानामन्त्यस्य लोप इति अर्थो भवति, एवं च चशब्दोन्वाचये भवति, अभृशो भृशो भवति, भृशायते, शीघ्रायते, चपलायते, मन्दायते, पण्डितायते, रेहायते, रेहः-शब्दो रहसि निर्घृणत्वे भिक्षाभिलाषस्य च निवृत्तौ वर्ततइति गणवृत्तौ, वृषायते, वृषश्चन्द्रः समुद्रश्च, वेहायते, वेहद्गर्भोपघातिनी, अन्धरायते, अन्धरो मूर्खो पुष्करश्चेति गणवृत्तौ, अण्डार इत्यन्ये इति च, ओजायते, वर्चायते, ओजोवर्चसी वृत्तिविषये तद्वति वर्तते, रेहायते, रेहस् रोष इति गणवृत्तौ, दुर्मनायते, सुमनायते, उत्सुकायते, उन्मनायते, शस्वायते, बृहायते, तान्तावेतौ, अतिमनायते, अत्र सूद्दुरभिभ्यो मनःशब्दः पठ्यते, तत्र सोपसर्गात्संग्रामयतेरेव धातुसंज्ञानिमित्तः प्रत्यय इति ज्ञापनान्मनस एव प्रत्यय इति स्वमनायत इत्यादि भवति, सुबामन्त्रित इत्यत्र मनस्युपसर्गे इति मनसि परे उपसर्गस्य पराङ्गवद्भाववचनात्सुमनायतइत्यादौ 'तिङ्ङतिङ'इति निघातो न भवति, देवदत्तः सुमनायतइत्यादौ सोपसर्गस्य निघातो भवति, अत्रामी भृशादयो ऽस्माभिः श्लोकगणपाठानुरोधेन पठिताः । गणवृत्तौ तु बृहच्छब्दो न दृश्यते, भद्रशब्दस्तु पठ्यते, तथा च कन्धरशब्दश्च त्वचोभ्यन्तरे स्थूलतत्त्वाभा असंयुक्ता स्नायुः कन्धरा तद्वान्कन्धरः, मत्वर्थे 'अर्शआदिभ्योऽच्'इति व्याख्यातं च ॥

"लोहितादिडाज्भ्यः क्यष्" ॥ अत्र भुवीति वर्तते, अच्वेरिति च । तत्रैतद्वाचो न विशेषणमसंभवात्, 'अव्यक्तानुकरणाद् द्व्यजवरार्धादनितौ डा'ज्विधीयते, यत्र ध्वनौ वर्णविशेषा न व्यज्यन्ते सोव्यक्तस्तस्यानुकरणमव्यक्तानुकरणं, तस्मात् 'डाचि बहुलं द्वे भवत' इति डाचि विषयभूते द्विरुक्ताद् द्व्यजवरार्धात् अनितिपरात् कृभ्वस्तियोगे डाज् भवतीति सूत्रार्थः। यस्य द्विरुक्तस्य समुदायस्य प्रविभज्यमान[1]मर्द्धं द्व्यजन्यूनाच्कं द्व्यज् वा भवति तद् द्व्यजवरार्धम्, अवरशब्दोपकर्षे, अत एव वचनात् कृभ्वस्तिभिरिव क्यषापि योगे डाज् भवतीत्यवसीयते, न च भवतियोगे डाचि कृते क्यषः प्रसङ्गो भुवो भवतिनैवोक्तत्वात् । अलोहितो लोहितायति, लोहि-

[1] अवरमिति पाठः पु·

तायते, 'वा क्यष'इति पक्षे तङ्, लिङ्गविशिष्टपरिभाषया लोहिनीशब्दात्क्यषि लोहिनीयति लोहिनीयतइति भवति, पटपटायति पटपटायते, अत्र डाचि बहुलमिति द्विरुक्ते 'नित्यमाम्रेडिते डाची'ति अव्यक्तानुकरणस्यान्त्यस्य टेश्च पररूपे टेरिति टिलोपः, इदमेव पररूपवचनं ज्ञापकं डाचि बहुलं द्वे इत्यस्य विषयसप्तमीत्वे, अत्र लोहितानां तेषां नीलहरितमन्द्रफेनमुण्डानां भृशादौ पाठः कर्त्तव्यः । अत्र वार्तिकं 'लोहितादिडाज्भ्यः क्यष्वचनं भृशादिष्वितराणी'ति । अत्र वृत्तौ नहि पठितेषु लोहितादिषु नान्तोस्तीति 'नःक्य'इति पदत्वसामान्यग्रहणार्थेन क्यषः ककारेणास्याकृतिगणत्वज्ञापनादन्यानि संगृह्यन्ते, तेषां भृशादौ अनुप्रवेश इति स्थितं, यदाह यानि पठ्यन्ते तेभ्यः क्यजेव भवति, अपठितेभ्यस्तु क्यषेवेति, तेन निद्रायति, निद्रायते, करुणायति, करुणायते, वर्मायति, वर्मायतइत्यादि भवति, निद्राकरुणाशब्दौ वृत्तिविषये तद्वति वर्तेते, यद्वा निद्रायतेरातश्चोपसर्गेइति कर्तरि कप्रत्ययान्तो निद्राशब्दो भवति। अत्र गणवृत्तौ ॥

लोहितश्यामदुःखानि हर्षगर्वसुखानि च ।
मूर्छा निद्रा कृपा धूमा करुणा नित्यवर्मणी ॥

इत्याकृतिगणसिद्धानि पठ्यन्ते ।

'कष्टाय क्रमणे' । क्रमणमनार्जवः । अत एव निर्देशाच्चतुर्थ्यन्तात्कष्टशब्दादनार्जवे क्यङ् भवति, कष्टं कृच्छ्रं दुःखमिह तु तत्कारणं कर्म, कष्टाय कर्मणे क्रामति, कष्टायते, कष्टं कर्तुं कुटिलमाचरतीत्यर्थः । अत्र वार्तिकं 'सत्रकष्टकक्षकृच्छ्रगहनेभ्यःकण्वचिकीर्षाया'मिति, कण्वस्य पापस्य चिकीर्षा कण्वचिकीर्षा सा चेह वृत्तिविषये, सत्रादयः कण्ववचनाश्चिकीर्षायां प्रत्यय इति समुदायार्थो भवति, एवं च पापवचनेभ्यो विषयान्तेभ्यः सत्रादिभ्यः चिकीर्षायां प्रत्यय इति वार्तिकार्थः सम्पद्यते । सत्रायतइत्यादि ॥

"कर्मणो रोमन्थतपोभ्यां वर्तिचरोः" ॥ कर्मण इत्यवयवापेक्षमेकवचनं, तेन रोमन्थतपोभ्यां कर्मभ्यां यथासंख्यं वर्तिचरोर्धात्वर्थयोः क्यङ्

प्रत्ययो भवतीत्यर्थो भवति । कर्मत्वं च रोमन्थतपोभ्यां श्रुतवर्तिचरि-क्रियापेक्षं, वर्तिरित्यत एव निर्देशाण्ण्यन्तादपि क्तिन्, चरिति चरतेः सम्प-दादित्वाद्भावे क्विप् । रोमन्थं वर्तयति रोमन्थायते, तपश्चरति तपस्यति, 'तपसः परस्मैपदं चे'ति परस्मैपदम्, अत्र हनुचलनइति वक्तव्यमित्युक्तत्वात् कीटो रोमन्थं वर्तयतीत्यत्र क्यङ् न भवति । अत्र न्यासपदमञ्जर्योरपान-प्रदेशाच्चिसृतं द्रव्यं कीटो वर्तुलं करोतीत्यर्थोऽभिमतः, कीटस्त्वपानप्रदेशा-च्चिसृतमश्नातीति, 'वाष्पोष्मफेनाच्चेति वक्तव्यं,' कर्मग्रहणमनुवर्तते, तच्च श्रुतोद्वमनक्रियापेक्षं वाष्पादिभिःसम्बध्यते, वाष्पमुद्वमति वाष्पायते ॥

"शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे" ॥ कण्वशब्दः पापवचनः, करणं क्रिया करोत्यर्थः, न पारिभाषिकं तस्मिन्हि कर्मणा इत्यनेन संबधेः शब्दादिभिः संबधे न स्यात्, शब्दादिभ्यः कर्मभ्यः करणे क्यङ् भवति, शब्दं करोति शब्दायते, एवं वैरायते, कलहायते, अभ्रायते, कण्वायते, मेघायते, अत्र न्यासे यद्यप्ययं तत्करोतीति णिचि प्राप्ते आरभ्यते तथापि न बाधत-इति शब्दयतीत्याद्यपि भवतीत्युक्तम् । अत्र वार्तिकं 'सुदिनदुर्दिनाभ्यां च' 'नीहाराच्च' । अटाट्टाशीकाकोटापोटासोटाप्रुष्टाप्लुष्टाग्रहणमिति, पोटा, स्त्रीपुंसलक्षणा । अतोन्ये अट्टादयः क्रियावचनाः, सुदिनं करोति इति सुदिनायते इत्याद्युदाहार्यम् ॥

"सुखादिभ्यः कर्तृवेदनायाम्" ॥ कर्तृ इति पृथक्पदं लुप्तष-ष्ठीकं, वेदनाज्ञानकर्तृत्वं च श्रुतवेदनक्रियापेक्षं, तेन वेदनक्रियायाः कर्तुराधेयभावेन सम्बन्धिभ्यः सुखादिभ्यो वेदनायामर्थे क्यङ् भवतीत्यर्थो भवति, सुखं वेदयते सुखायते, सुखमनुभवतीत्यर्थः । वेदयित्रा सुखादीनां विशेषणात्सुखं वेदयते प्रसाधको देवदत्तस्येत्यत्र क्यङ् न भवति, अत्र प्रसाध्यगतं सुखं प्रसाधको ऽक्षिनिमीलनादिना जानातीत्यर्थे इति सुखं वेदयितृगतं न भवति, अत्र श्लोकगणकारः ॥

सुखदुःखगहनकृच्छ्राद्यु[1]पक्रप्रतीपकरुणाश्च ।
कृपणः सोढ इतीमे सुखादयो दश गणे पठिताः ॥

१ युपकेति, २ पु॰ पा॰ ।

इति । अत्र गणरत्नमहोदधौ आस्यशब्दोपि पठ्यते, यदाह, आस्यमेवास्यमिति, तृप्रं दुःखं, सोढं सहनम्, अभिभवो वा ॥

"नमोवरिवश्चित्रङः क्यच्" ॥ अत्रानुवृत्तं करणग्रहणम् अभिधानशक्तिस्वाभाव्यात् क्रियाविशेषणं, यदाह वृत्तिकारः, नमसः पूजायां, वरिवसः परिचर्यायां, चित्रङ आश्चर्ये, नमस्यति देवान् । वरिवस्यति गुरून्, चित्रीयते आश्चर्यवान् भवतीत्यर्थः । अन्ये तु परस्याश्चर्यङ्करोतीत्यर्थं इति । यदाह भट्टिः । ततश्चित्रीयमाणोसाविति । अत्रावयवे कृतं समुदायस्येति न्यायेन चित्रङो ङकारस्य समुदायार्थत्वादात्मनेपदं, नमस्यति देवान् इत्यत्र उपपदविभक्तेः कारकविभक्तिरिति 'नमः-स्वस्ती'ति चतुर्थीम्बाधित्वा कर्मणि द्वितीया भवति ।

"पुच्छभाण्डचीवराण्णिङ्" ॥ ङकारस्तङर्थो णिग्रहणेषु सामान्याविघातार्थश्च, णकारो णिग्रहणेषु सामान्यग्रहणायैव, वृद्धिभाजः प्रकृतेरभावात्, इहाप्यनुवृत्तं करणग्रहणं पूर्ववदभिधानस्वाभाव्यात् क्रियाविशेषपरं, तदुक्तं वृत्तौ, पुच्छादुदसने पर्यसने वा, भाण्डात्समाचयने, चीवरादर्जने परिधाने वेति, उदसनमुत्क्षेपणं, पर्यसनं परितः क्षेपणं, समाचयनं राशीकरणम्, अर्जनमार्जवनं, परिदानमाच्छादनम्, उत्पुच्छयते, सम्भाण्डयते, सञ्चीवरयते, अत्रोदादीनां प्रयोग उदसनाभिव्यक्त्यै, पुच्छादेः कर्मणो धातावन्तर्भावादकर्मका एते, यक्चिणोः प्रतिषेधे णिश्रन्थीत्यत्र णिग्रहणेनाप्यस्य ग्रहणात्कर्मकर्तरि पक्षे यक्चिणोरभावादुत्पुच्छयते गौः स्वयमेव, उदपुपुच्छत गौः स्वयमेवेति शप्चङौ भवतः । यदोत्पुच्छयति गामिति गौः कर्म भवतीति कर्मकर्तृत्वलाभः, उत्पुच्छयतेः क्वौ णेर्लोपे सोर्हल्ङ्यादिलोपे संयोगान्तलोपे उत्पुदिति भवति । व्रश्चादिषत्वं संयोगान्तलोपे न भवति । ननु 'छ्वोःशूडि'ति शत्वे तस्य व्रश्चादिषत्वे तस्य च जश्त्वेउत्पुडितिभाव्यं, यतः शत्वविधौ सतुक्कच्छो गृह्यते, इह तु गुदं छादयतीति पुच्छशब्दव्युत्पत्तेस्तकारस्तुकः सम्बधी न भवति । ननु यत्र सतुक् छकारो न सम्भवति तत्र केवलो गृह्यते इत्यपि स्थितं,वाञ्छेः क्वौ वान्, वांशौ इतिवदत्रापि भवितव्यं, भवतु कामं

तस्यापि संयोगान्तलोपउत्पुदिति भविष्यति, द्विवचनादौ स्तोश्चुरिति दकारस्य चुत्वे 'शः छोटी'ति शकारस्य छत्वे उत्पुच्छौवित्यादि सिध्यति॥

"मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच्" ॥ एभ्यः करणे णिच् भवति। मुण्डं करोति मुण्डयति माणवकं, मिश्रयत्यन्नं, श्लक्ष्णयति वस्त्रं, लवणयति व्यञ्जनं, व्रताद्भोजने तन्निवृत्तौ वा, पयो व्रतयति, पयो भुङ्क्ते इत्यर्थः। वृषलान्नं व्रतयति, परिहरतीत्यर्थः। अत्र भोजनतन्निवृत्ती व्रतशब्दार्थाविति पूर्ववत्करणे प्रत्ययः। श्रूयते भोजने व्रतशब्दः। यदस्य पयोव्रतं भवत्यात्मानमेव तद्वर्धयति, निवृत्तौ मुनिरासीत्, द्विव्रतासुरा, एकव्रता देवा इति, पस्पशायां च शस्तं वानेन श्वमांसादीन्यपि व्रतयितुमिति, अयमेव व्रतशब्दो दर्शादिवद्विपरीतलक्षणया तन्निवृत्तौ वर्तते। वस्त्रात्समाच्छादने। संवस्त्रयति प्रावरणम्, अत्रापि पूर्ववत्समाच्छादनं प्रकृत्यर्थ इति करणं, प्रत्ययार्थे हि प्रकृत्यर्थेन वस्त्रेणैकार्थीभूतस्य प्रावरणान्वये सामर्थ्याभावान्न स्यात्। अथ मुण्डयति नापित इत्यादौ व्यपेक्षाभावे साकाङ्क्षं मुण्डादिभ्यो णिज्वचनं, तत्करोतीत्येव सिद्धे णिच्यारब्धमाणत्वाद्यथा माणवकं मुण्डयतीत्यादौ सापेक्षत्वेपि भवति तथेहापि स्यात्, नैतदस्ति, तत्र हि मुण्डादयो धर्मिवचना धर्ममपेक्षन्ते न तद्वदिह वस्त्रमपेक्षते, अथैवं स्यात् मुण्डादौ प्रकृतेरन्यापेक्षावदत्र प्रत्ययार्थस्यान्यापेक्षास्तीति, एवं ह्यर्थो न सङ्गच्छते, यतः संवस्त्रयति प्रावारमित्यत्र प्रावारवस्त्रं छादयतीत्यर्थः स्यात् न चैवमिष्यते, यतः प्रावारमाच्छादयतीत्येवेष्यते। अथोच्यते उभयमपीष्यतामिति, एवं हि वस्त्रसामान्ये प्रावारस्यान्तर्भावात्तत्र प्रयोगो व्यर्थः स्यात्, न च ब्राह्मणा आयाता वसिष्ठोऽप्यायात इति विशेषस्य प्रावारस्य प्राधान्यख्यापनाय प्रयोगः स्यात्, अत एकस्मिन्वाक्ये एकस्य प्राधान्यं प्रतिपादयितुं न शक्यते। अत्र सुधाकरः। समाच्छादनं प्रत्ययार्थमेवाह, सामान्यकर्मणोऽन्तर्भावेपि विशेषकर्मणोऽनभिहितत्वात् तद्विशेषप्रयोगो यथा भवति माणवकमितीति। एवं सति वस्त्रसामान्यस्य प्रावारो विशेषको भवति, हलादीनां

त्रयाणां ग्रहणे प्रत्ययाः, हलं गृह्णाति हलयति, एवं कलयतीत्यादि। अत्र वार्तिकं, हलिकल्योरदन्तत्वनिपातनं सन्वद्भावप्रतिषेधार्थमिति, ततो ऽजहलत्, अचकलत्, इत्यत्राग्लोपित्वात्सन्वल्लघुनीतीत्वं न भवति, अक्रियमाणे पुनरत्वनिपातने इकारस्य णाविष्ठवदिति टिलोपात्परत्वाद्वृद्धावैकारे तस्यादेशात्पूर्वं परत्वाल्लोपे अग्लोपित्वं न स्यात्, नन्वैकारस्य लोपस्य पूर्वविधावित्वे ऽचः परस्मिन्पूर्वविधाविति स्थानिवत्त्वेनाङ्गस्य चङ्परणिपरत्वं विघानिष्यतइति किमनेनाग्लोपित्वार्थेनात्वनिपातनेन। नैतदस्ति। अभ्यासस्यादिष्टादचः पूर्वत्वेन तस्येत्वे स्थानिवत्त्वाप्रसङ्गात्। एवमपि कृताकृतप्रसङ्गित्वेन नित्यत्वाद्वृद्धेः पूर्वमेवैकारो लोप्स्यतइति अग्लोपित्वसिद्धेर्नार्थोऽत्वनिपातनेनेति चेत्। न, यस्माद्वृद्धौ शब्दान्तरप्राप्त्या भवत्यनित्यो लोपः। तूस्ताद्विहनने, तूस्तं केश इति श्रीभद्रः। जटीभूताः केशा इति बोधिन्यासे, पापमिति वैजयन्त्यां, तूस्तानि विहन्ति वितूस्तयति, विहननद्योतनाय वेः प्रयोगः॥

"सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच्" ॥ अत्राप्यनुवृत्तं करणग्रहणं क्रियाविशेषोपलक्षणम्, अत्र सत्यापेति निर्देशेन णिचः संनियोगेन सत्यस्यापुक्, टिलोपाभावश्च भवति। अत्र वार्तिकम्। अर्थवेदसत्यानामापुग्वक्तव्यइति। अत्र भाष्यं, सत्यस्य कृञो योगइति। वृत्तौ तु सत्यमाचष्टे सत्यापयतीत्युक्तम्, अत्र हरदत्तः। भाष्ये कृत्यर्थनिर्देशः प्रयोगदर्शनवशादिहाख्यानार्थ इति, एवमर्थापयति, वेदापयति, पाशं विमुञ्चति, विपाशयतीत्यपि चोपपद्यते, रूपं पश्यति रूपयति, वीणया उपगायति उपवीणयति, तूलैरनुकुष्णाति अनुतूलयति, श्लोकैरुपस्तौति उपश्लोकयति, सेनयाऽभियाति अभिषेणयति, 'उपसर्गात्सुनोती'त्यादिना षत्वम्, अभ्यषेणयत्, 'प्राक्सितादड्व्यवायेपि'इति षत्वम्, अभिषिषेणयिषति। 'स्थादिष्वभ्यासेने'ति साभ्यासस्य षत्वं, लोमान्यनुमार्ष्टि अनुलोमयति, णाविष्ठवदिति टिलोपः। त्वचं गृह्णाति त्वचयति अचप्रत्ययान्तोयमकारान्तः, तेनाल्लोपस्य स्थानिवत्त्वा'दत उपधाया'इति वृद्धिर्न भवति,

हलन्तस्य तु तत्करोतीति णौ त्वाचयतीति भवति, टिलोपस्तु 'प्रकृत्यै-काजि'तिप्रकृतिवद्भावान्न भवति, वर्मणा सन्नह्यति संवर्मयति वर्णं गृह्णाति वर्णयति, चूर्णैरवध्वंसयति अवचूर्णयति, अत्रावध्वंसनमेव करणमितीन्दुश्रीभद्रौ, चुरादयो माधवीयायां धातुवृत्तौ व्याख्याताः । अत्रार्थ-विशेषास्तदनुरूपाः समर्थविभक्तयश्च लोकप्रसिद्धानुसारेण वृत्तिकारेण दर्शिता इत्यस्माभिरपि तथैव प्रदर्शिताः ॥

अथान्येभ्योऽपि णिच् प्रदर्श्यते ॥

"प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च" ॥ प्रातिपदिकाद्धात्वर्थे णिज् भवति, इष्ठनीव चास्मिन्बहुलं कार्यं भवति, अस्यैव धातु सूत्रस्य प्रपञ्चः । 'तत्करोतितदाचष्टे' । 'तेनातिक्रामति' । 'कर्तृ-करणाद्धात्वर्थे' । इति सूत्राणि । अत्र कर्तृग्रहणं करणस्य विशेषणं करणत्वेन लोके प्रसिद्धानां चक्षुरादीनामेव ग्रहणं माभूदिति । अन्यथा चक्षुषा पश्यति चक्षयति, श्रोत्रेण शृणोति श्रोत्रयतीत्यादावेव स्यात् न तु करिभिरवबध्नाति अवकरयति, परशुना छिनत्ति, परशयति इत्यादावपि । एवं च तेनातिक्रामतीत्येतत्कर्तृकरणादित्यस्यैव प्रपञ्चो भवति । अतस्तत्करोतीत्यादौ तदादि प्रकृतौ कर्मत्वादिमात्रप्रतिपादनार्थं न तु द्वितीयाद्यर्थमपीति कर्मत्वादिविशिष्टात्प्रातिपदिकादेव णेर्विधा-नात् पटुमाचष्टे इति णेर्विवक्षायां पटोः प्रातिपदिकाण्णाविष्ठव-दिति टिलोपे तस्यात उपधाया इति वृद्धौ'वचः परस्मिन्नि'ति स्थानिव-त्वात्तदभावे पटयतीति भवति । सुबन्तादुत्पत्तौ 'सुपो धातुप्राति-पदिकयो'रिति सुपो लुकि टेश्च लोपे ऽवशिष्टस्य प्रत्ययलक्षणेन सुबन्त-त्वात् पदत्वे पडयतीति जश्त्वं स्यात्, न च टिलोपस्य स्थानिवत्त्वेन टकारस्य पदान्तत्वाभावाज्जश्त्वाप्रसङ्गो यतो न पदान्तेत्यादिना जश्त्वे स्थानिवत्त्वं निषिध्यते, न च णौ कृतया भसञ्ज्ञया पटोः पदसञ्ज्ञाबाधो, यदस्यां टिलोपः स्थानिवद्भवति । अयं च प्रातिपदिकाद्विधीयमानो णिः यथाकथञ्चित्प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भव-तीति सिद्धान्तितत्वान् ङ्याबन्तादपि भवति, अत एव णाविष्ठवदित्यत्र

भाष्ये इष्ठवदित्यतिदेशस्य पुंवद्भावटिलोपयणादिपरविन्मतोर्लुगर्थमिति पुंवद्भावादिप्रयोजनकथनं न परिगणनं किन्तूदाहरणमात्रमेव, तदुक्तं वृत्तौ । प्रादयोपीष्यन्तइति, तत्र पुंवद्भावो यथा, एनीमाचष्टे एतयति, हरिणीमाचष्टे हरितयति, लोहिनीमाचष्टे लोहितयति, कुमारीमाचष्टे कुमारयति इत्यादौ भस्याढे तद्धितइतीष्ठनि विहितः पुंवद्भावो णाविष्ठवदित्यतिदेशादत्रापि भवतीत्येन्यादीनामेतादयः पुंशब्दाः भवन्ति । वसिष्ठवदत्र वर्तितव्यमित्यादौ विशेषातिदेशे ब्राह्मणत्वसामान्यनिबन्धनस्याप्यतिदेशादिष्ठवदित्यतिदेशाच्चात्र केवलमिष्ठनोऽसाधारणरूपं तुरिष्ठेमेयःस्वित्यादिकमेव कार्यमतिदिश्यते किं तु भसञ्ज्ञानिमित्ततद्धितत्वादिनिबन्धनमपीति पुंवद्भावातिदेशस्य प्रयोजनमुक्तम्, अनेन चेष्ठवद्भावेन नेष्ठनि दृष्टमेवातिदिश्यते किं तर्हि सम्भावितमात्रमपीति कुमारयतीत्याद्युदाहृतम्, अवश्यं चैतदेवं विज्ञेयम्, अन्यथा राजयतीत्यादाविष्ठनोऽनुत्पादाट्टिलोपो न स्यात्, 'टे'रित्यत्र कैयटे एतयतीत्यादौ टिलोपेन ङीपि निवृत्ते तत्सन्नियोगशिष्टत्वान्नकारनिवृत्तौ सिद्धायामपि इष्ठवद्भावात् पुंवत्त्वेन रूपसिद्धेर्भाष्ये उक्तत्वात्सन्नियोगशिष्टपरिभाषाया अनित्यत्वज्ञापनात् एनेयः श्यैनेय इत्यत्र 'यस्येति' लोपेनेकारनिवृत्तावपि नकारो न निवर्ततइति उक्तम्, पदमञ्जर्यां त्वेवमुक्त्वोक्तम् अपर आह इडविडमाचष्टे ऐडविडयति, दरदमाचष्टे दारदयतीत्यादौ पुंशब्दातिदेशार्थं पुंवद्वचनमिति । ननु इडविडादीनामिष्ठनि पुंवद्भावो न दृष्ट एव, इष्टनि तस्यासम्भवात् । नेष्ठनि दृष्टस्यातिदेशः किं तर्हि इष्ठनि सम्भावितस्य, अन्यथा अतिराजयतीत्यादौ टिलोपो न स्यात्, आदिशब्देन पृथुमाचष्टे प्रथयति उशिजमाचष्टे उशिजयतीत्यादि गृह्यते, अत्रेडविडपृथू जनपदशब्दौ क्षत्रियजाती चेति 'जनपदशब्दात् क्षत्रियादञ्'त्येतस्य 'ते तद्राजा' इत्यञादीनामापादपरिसमाप्तेः प्रत्ययानां तद्राजत्वादतश्चेत्यकारप्रत्ययस्य स्त्रियां लुकीडविड् स्त्री, ऐडविडः पुमान्, दरदुशिजोरपि द्व्यञ्मगधेत्यणः पूर्ववल्लुकि दरत् स्त्री दारदः पुमान्, एवमुशिक् स्त्री औशिजः पुमान् भवति, नन्वत्रैडविडादीनां गोत्रस्य ग्रहणात् गोत्रं

"थो न्थः" ॥ 'पथिमथोरिति'। त्रयाणां प्रकृतत्वेप्येतयोरेव थकारसम्भवात्सम्बन्धः, आदेशे ऽकार उच्चारणार्थः। स्यादेतत्। थेर-न्थ इति सूत्रमस्तु, अकारोपि विवक्षितोस्तु, थिशब्दस्यान्थ आदेशः, एवं च कृत्वा इतोदिति न वक्तव्यमिति, तदपि वक्तव्यम्, ऋभुक्षिन्शब्दार्थम् ॥

"भस्य टेर्लोपः" ॥ 'पथ्यादीति'। प्रत्येकमभिसंबन्धाद्भस्येत्येक-वचनम्। 'विरोधादिति'। सर्वनामस्थाने भसंज्ञाया अभावो विरोधः। 'इह न संबध्यतइति'। उत्तरार्थं त्वनुवर्त्ततएवेति भावः ॥

"पुंसो ऽसुङ्" ॥ असुङो ङकारो ऽन्तादेशार्थः, उकार उच्चार-णार्थः। 'पुमानिति'। पुंस्शब्दस्योगित्त्वाच्नुम्, स हि पूञो डुमसुन्निति व्युत्पाद्यते, डकारष्टिलोपार्थः, उकार उगित्कार्यार्थः, बहुपुंसीति ङीबु उगिल्लक्षणो भवति। नकारः स्वरार्थः, मकारे ऽकार उच्चारणार्थः। 'इहेत्यादि'। चोद्यम्। 'प्रागेव च प्रत्यय[1]योत्पत्तेरिति'। प्रत्ययः, सर्वना-मस्थानम्। 'समासान्तोदात्तत्वमिति'। पुम्शब्दोकारस्य। 'अनिष्टः स्वर इति'। स्रंसनधर्म्मणः सकारस्य हलः स्थाने तद्धर्मा ऽनुदात्त आदेशः स्यादित्यर्थः। ननु चोकारस्य कृतमपि समासान्तोदात्तत्वमसुङि कृते ऽनन्त्यत्वान्निवर्त्तिष्यते, असुङश्चान्त्यत्वात्प्रवर्त्तिष्यते। नैतदस्ति। अन्तरङ्गे स्वरे कर्त्तव्ये बहिरङ्गस्यासुङो ऽसिद्धत्वात्प्रवृत्तस्य निवर्त्तनायोगाच्च। 'तदर्थ-मित्यादि'। परिहारः। अर्थशब्दो निवृत्तिवचनः, तस्यानिष्टस्वरस्य निवृत्त्यर्थमित्यर्थः। 'उपदेशिवद्वचनमिति'। उपदेशोस्यास्तीत्युपदेशी, सकारः, स यथोपदेशावस्थायां संनिहितस्तथा ऽसुङ्गीयर्थः। सर्व-नामस्थानइति विषयसप्तम्याश्रयणीयेत्युक्तं भवति, तत्र समासान-न्तरमेव परत्वादसुङि कृते पश्चादुदात्तत्वं भवदसुङ एवाकारस्य भव-तीति सिद्धमिष्टम्, यद्येवं पुमानित्यादावसमासेपि उपदेशावस्थायामसुङि कृते प्रातिपदिकस्वरो भवन्नसुङ एव स्यादित्यत आह। 'पुमानित्ययं पुनरिति'। पुम्शब्दे प्रत्ययो निदित्युक्तं, तत्सामर्थ्यादाद्युदात्तत्वम् ॥

[1] विभक्त्युत्पत्तेरिति पाठो मुद्रितमूलपुस्तके।

"गोतो णित्" ॥ गाङ्कुटादिसूत्रे यावन्तः पक्षा इहापि तावन्त एव, तएव गुणा दोषाश्च, तद्वदेव चातिदेशपक्ष आश्रीयते, यदाह । 'णिद्वतीति'। यत्र परशब्दः प्रयुक्तोन्तरेणापि वतिं वत्यर्थं गमयति यथा सिंहो माणवक इति, णिदित्यनेन सामानाधिकरण्यात्सर्वनामस्थानइति सप्तम्यन्तं प्रथमया विपरिणम्यते, तत्र सर्वनामस्थानस्य णित्कार्यं विधेयं न संभवतीति णिति यत्कार्यं तत्सर्वनामस्थाने पूर्वस्यातिदिश्यते, तदाह । 'णित्कार्याणि तत्र भवन्तीत्यर्थ इति'। 'चित्रगुरिति'। बहुव्रीहौ गोस्त्रियोरुपसर्जनस्येति ह्रस्वत्वम्, अत्रासति तपरकरणे ऽङ्गाधिकारे तदन्तविधेरभ्युपगमात्सर्वे सर्वपदादेशा इति न्यायेन स्थानिवद्भावेन गोशब्दान्तत्वात् णिद्वद्भावः प्राप्नोति, तपरकरणे तु तत्कालार्थे सति न भवति भिन्नकालत्वात्, तपरस्तत्कालस्येत्यत्राणित्य[1]स्य निवृत्तत्वादनणोपि तत्कालनियमो भवतीति मन्यते। 'कथमिति'। ह्रस्वस्य गुणः, जसि चेति गुणे कृते सत्यपि तकारे स्थानिवत्त्वात् तत्कालत्वाणित्त्वं प्राप्नोत्येवेति प्रश्नः। न च स्थानिवद्भावविषये लक्षणप्रतिपदोक्तपरिभाषा, तस्य वैयर्थ्यप्रसङ्गात्, अङ्गवृत्ते इत्यादिपरिहारः। 'णित्त्वं न भवतीति'। णित्कार्यं न भवतीत्यर्थः। भवतु सुंबुद्धाविष परिहारः, जसित्ववादेशमन्तरेणानिष्टितत्वादङ्गस्य नायं परिहार इत्याशङ्क्याह। 'अथ वेति'। यच्चेत्यादिनार्थद्वारकं विशेषसम्बन्धमाह। आनन्तर्यलक्षणे तु संबन्धे चित्रगुशब्दादपि प्रसङ्गः, यदि तर्ह्यर्थद्वारकसंबन्धाश्रयणादेव चित्रगुशब्दे ऽप्रसङ्गः, किमर्थं तपरकरणमित्याह। 'तपरकरणं तु निर्द्देशार्थमेवेति'। स्पष्टनिर्द्देशार्थमेवेत्यर्थः। इतरथा गोरित्युच्यमाने गुशब्दस्यापि निर्द्देशः संभाव्येत। 'केचिदित्यादि'। एवं पाठे प्रयोजनमाह। 'द्योशब्दादपीति'। ये तर्ह्येवं न पठन्ति तेषां कथं द्योशब्दे णिद्वद्भाव इत्यत आह। 'गोत इत्येतदेवेति'। कथं पुनरेतदोकारान्तोपलक्षणं द्रष्टुं शक्यमित्यत आह। 'वर्णनिर्द्देशेषु हीति'। वृद्धिरादैच्, अतो लोप इत्यादौ वर्णनिर्द्देशएव तपरत्वं दृष्टं, तस्मात्तपरकरणादिह ओकारान्तोपलक्षणं विज्ञायते ॥

१ अणग्रहणस्येति पाठः ई॰ पु॰।

"णलुत्तमो वा" ॥ 'णित्कार्यं वा तत्र भवतीत्यर्थ इति'। एतेन पक्षे णित्कार्यस्याभावाद्वा णिद्वद्भवतीत्युच्यते न तु पक्षे णकारस्य संज्ञाप्रतिषेधादिति दर्शयति। एतच्च पूर्वत्र कार्यातिदेशाल्लभ्यते । 'चकारेति'। णित्त्वपक्षे वृद्धिरन्यदा तदभावः ॥

"सख्युरसंबुद्धौ" ॥ अत्रापि णिदित्यनेन सामानाधिकरण्यात्सर्वनामस्थानइति प्रथमान्तं, तत्रोत्तरार्थमसंबुद्धाविति सप्तम्यन्तस्योपात्तस्य यथेहान्वयस्तथा दर्शयति । 'असंबुद्धौ यः सखिशब्द इति' ॥

"अनङ् सौ" ॥ सर्वनामस्थानप्रकरणात्संबुद्धिपर्युदासाच्च साविति प्रथमैकवचनस्य ग्रहणं न सप्तमीबहुवचनस्य, आकारविधाने सोर्हल्ङ्यादिलोपो न स्यात्, एवं तर्हि सोडादेशो विधीयताम्। एवं सिद्धे यदनङं शास्ति तज्ज्ञापयति अनङ एव क्वचिच्छ्रवणमस्तीति, तेन यद्वक्ष्यति संबुद्धावपि पक्षे ऽनङिष्यतइति तदुपपन्नं भवति ॥

"ऋदुशनस्पुरुदंसोनेहसां च" ॥ संबुद्धावपि पक्षेनङिष्यतइति यदुक्तं तदाप्तागमेन द्रढयति। 'तथा चोक्तमिति'। संबोधने, संबुद्धौ, त्रयाणां रूपाणां समाहारस्त्रिरूपं, पात्रादिः । कानि पुनस्तानि रूपाणीत्यत आह । 'सान्तमित्यादि' । सान्तमनङोभावपक्षे, नान्तं नलोपाभावपक्षे, अदन्तं नलोपपक्षे, मध्यन्दिनस्यापत्यं माध्यन्दिनिराचार्यः, वष्टि, इच्छति, भाषायामस्य साधुत्वं चिन्त्यमिति जल्पित्यादयः पडित्यत्रावोचाम, तथा व्याघ्रपादपत्यानां मध्ये वरिष्ठो वैयाघ्रपद्य आचार्यो, नपुंसके नपुंसकसंबन्धिनि इगन्ते,हे त्रपो इत्यादौ गुणं वष्टीति श्लोकस्यार्थः ॥

"तृज्वत् क्रोष्टुः" ॥ 'क्रोष्टुशब्दस्तुन्प्रत्ययान्त इति'। क्रुश आह्वाने, सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन् । 'संज्ञाशब्द इति'। तुन्प्रत्ययस्य संज्ञार्थे[1] विधानात्, जम्बुकस्य चेयं संज्ञा, वस्तुस्वरूपकथनमेतत्। अत्रानन्तरं तस्येति पठितव्यम् । क्रोष्टुरिति सूत्रे षष्ठीनिर्देशात् ।

१ संज्ञायामिति॰ इं॰ पु॰ पा॰।

'तृज्वद्भवतीति'। तृच इव तृज्वत्। 'तत्र तस्येवेति षष्ठीसमर्थाद्वतिस्तदेतत्सर्वमुत्तरग्रन्थे स्पष्टीकृतम्। 'तृजन्तस्य यद्रूपं तदस्य भवतीति'। प्रत्ययग्रहणपरिभाषया तृजन्तस्येति लभ्यते। अतिदेशो ऽनेकप्रकारः, निमित्तव्यपदेशतादात्म्यशास्त्रकार्यस्वरूपविषयः, तत्रेहादितस्त्रयाणामसंभवादनतिदेशः, शास्त्रकार्यातिदेशयोश्चायं विशेषः, शास्त्रातिदेशे तेनतेन शास्त्रेण कार्याणि भवन्ति, कार्यातिदेशे त्वतिदेशवाक्येनैवेति, तत्र विप्रतिषेधे फलविशेषः, तद्यथा कर्मवत्कर्मणेत्यत्र शास्त्रातिदेशे कर्मकर्तरि भावकर्मणोरित्येतद्बाधित्वा स्वाश्रयं कर्तृत्वमाश्रित्य शेषात्कर्तरि परस्मैपदप्रसङ्गः। कार्यातिदेशे त्वात्मनेपदमेव परत्वाद्भवतीति, इह तु नैवं विशेषः संभवतीति तयोरभेदमाश्रित्य विचारः प्रवर्तितो महाभाष्ये किं पुनरयं शास्त्रातिदेश आहोस्विद्रूपातिदेश इति, तत्र शास्त्रस्य शास्त्रं प्रत्यासन्नमिति शास्त्रातिदेशः प्राप्नोति, प्राधान्यात्तु रूपातिदेशप्रसङ्गस्तदर्थत्वादतिदेशान्तराणां, तत्राद्ये पक्षे आहत्य तृचि यच्छास्त्रं तद्वातिदिश्यते, अनाहत्य वा, यदि तृच्छब्दवच्छास्त्रमतिदिश्यते तत आहत्येति पक्षः, अथ तृच्छब्दे ऋकार एव विवक्षितः, चकारः स्वरार्थः, तकारस्त्वप्रसिद्धाशङ्कानिवृत्त्यर्थः, ऋज्वदित्युच्यमाने अप्रसिद्धाश्रयोऽतिदेशः शङ्क्येत, ऋक्पूरित्यृक्शब्दनिबन्धनस्य वा समासान्तस्यातिदेशः शङ्क्येत, तस्मात्तृजन्ते यदृकारप्रयुक्तं शास्त्रं कार्यं वा तदतिदेशेनाहत्येति पक्षस्तत्राहत्येतिपक्षे अप्तृन्तृजिति दीर्घत्वमेकमतिदिष्टं स्यादनङ्गुणरपरत्वान्यनतिदिष्टानि, अनङ्, ऋदुशनस्पुरुदंसोनेहसां च, ऋतो ङिसर्वनामस्थानयोः, उरण् रपर इति, नह्येतानि तृच्संशब्दनेन विधीयन्ते। ननु च दीर्घत्वे तिदिष्टे ऽनङादीन्यप्यतिदिष्टान्येव भवन्ति, कथं, दीर्घविधौ उपधाया इति वर्तते, अचश्चेति चोपतिष्ठते, ततश्च तृजन्तस्येव तुन्नन्तस्यापि दीर्घो भवतीत्युक्ते उपधाया अचो दीर्घो भवतीत्युक्तं भवति, न चाकृतेष्वनङादिषु तुन्नन्तस्योपधा दीर्घभाविनी संभवति, जसि गुणादेशयोः संभवतीति चेत् नह्येकमुदाहरणं योगारम्भं प्रयोजयति, यद्येतावत्प्रयोजनं स्याद्प्तृन्तृजित्यत्रैव क्रोष्टुग्रहणं कुर्यात्। नन्वेवं स्त्रियां च, विभाषा तृती-

यादिष्वचीत्येवमर्थं पुनस्तृज्वत्क्रोष्टुरिति वक्तव्यं स्यादिति गौरवं स्यात्, स्यादेतत् । अचि र ऋत इत्यस्यानन्तरं क्रोष्टुः स्त्रियां, विभाषा तृतीयादिष्वचीति रादेशार्थं वक्ष्या[1]मीति नास्ति गौरवमिति । एवमपि क्रोष्टुः क्रोष्टरि पञ्चक्रोष्टृभी रथैरिति न सिध्यति, नाप्युदात्तयणो हल्पूर्वादिति स्वरः, तुजन्तस्याद्युदात्तत्वात्तदेवं जसि दाघीतिदेशेपि नातिदेशाश्रयणं व्यर्थमिति न तत्सामर्थ्यादनङादीनामाक्षेपतः सिद्धिरित्याहत्यपक्षो दुष्ट एव, अथानाहत्य पक्षः, अनङादीन्यतिदिष्टानि दीर्घत्वमनतिदिष्टं, नहि तद्दृत इत्येवं विधीयते, अथ तृजितिसमुदाय एव विवक्षितः, न त्वृकारः, न चाहत्यपक्ष आश्रीयते किं तर्हि तृचि यद्दृष्टं यत्किंचननिबन्धनं तस्य सर्वस्यातिदेशः, एवमप्यङ्गप्रकरणादङ्गाधिकार एव विहितं यत् शास्त्रं कार्यं तदेवातिदिश्येत न विप्रकृष्टमनाङ्गं यथाचि रवद्भावेन वृद्ध्यादीन्येव भवन्ति, न हनि णिङादेशः, ततश्च रपरत्वमनतिदिष्टं स्यात्, रपरत्वमप्याङ्गं कार्यकाले संज्ञापरिभाषम्, ऋतो ङि सर्वनामस्थानयोर्गुणो भवति, उपस्थितमिदं भवत्युरण् रपर इति, स्त्रियां चेत्यत्र तर्हि क्रोष्ट्रीत्यत्रानाङ्गयोरीकारयणोरतिदेशो न स्यात्, वचनाद्भविष्यति, न तृजन्तस्य स्त्रियामाङ्गं किं चिदस्ति, स्त्रियामप्याङ्गं किंचिदस्ति, पञ्चभिः कर्तृभिः क्रीतो रथः पञ्चकर्त्ता रथः, हे पञ्चकर्त्तः पञ्चकर्तरीति स्त्रीलिङ्गे कर्त्तृशब्दे ङिसंबुद्ध्योर्दृष्टस्य गुणस्यातिदेशः स्त्रियां चेत्यत्र संभवति, नहि संबुद्धौ तृज्वत्क्रोष्टुरित्यनेन सिद्धिः, असंबुद्धावित्यधिकारात्, ङौ विभाषा तृतीयादिष्वचीति विकल्पः स्यात्, स्यादेतत्, स्त्रियां चेत्यत्र न किंचिन्निमित्तमुपादीयते, ततश्च प्रागेव विभक्त्युत्पत्तेः स्त्रियां वर्त्तत इत्येवं तृजन्ते दृष्टस्यातिदेशः, न च तदाङ्गं संभवतीति अनाङ्गस्याप्यतिदेश इति, एवमपि पञ्चभिः क्रोष्टृभिः क्रीतैरथैः पञ्चक्रोष्टृभी रथैरित्यत्र न कथं चन तृजन्तरूपप्रादुर्भावः संभवति, तथा विभाषा तृतीयादिष्वचीत्यत्रापि क्रोष्टरीति आङ्गस्य गुणस्यातिदेशसंभवात् क्रोष्ट्रा क्रोष्टुरिति यणशास्त्रमुत्वशास्त्रं चानाङ्गं नातिदिश्यते, नापि स्वरः, ननु तत्रापि तृतीयादिग्रहणसामर्थ्यादनाङ्ग-

१ वक्तव्यमिति इ· पु· पा· ।

मप्यतिदिश्येत, अन्यथा विभाषा ङावित्येव ब्रूयात्। नैतदस्ति। अभावातिदेशार्थं तृतीयादिग्रहणं स्यात्, वतिनिर्द्देशेष्वभावातिदेशस्यापि दृष्टत्वात्, यथा मरुभूमिवदस्मिन्ग्रामे जलमिति, शास्त्रेपि तृतीयादिषु भाषितपुंस्कमित्यत्र नुम्ह्रस्वयोरभावोतिदिश्यते, यदा हि प्रत्यासत्तेराङ्गमेवातिदेश्यमिति स्थितं तदा न सर्वासु तृतीयादिषु भावातिदेशः संभवतीति यस्य शास्त्रस्य भावस्तृजन्ते दृष्टः तुजन्तेपि तस्य भावोतिदिश्यते, यस्य त्वभावस्तृजन्तेपि तस्याभावोतिदेश्यः स्यात्, ततश्च क्रोष्ट्रे क्रोष्ट्रा इत्यत्रापि घिलक्षणयोर्गुणनाभावयोरभावोतिदिष्टः स्यात्, तदेवं शास्त्रातिदेशस्य बहुच्छिद्रत्वाद्रूपातिदेश एवायमाश्रयणीयः, तदाह। 'रूपातिदेशोयमिति'। यद्येवं यस्य कस्य चित्तृजन्तस्य रूपमतिदिश्येत पक्षा वक्तीति तत्राह। 'प्रत्यासत्तेरिति'। अथैतस्मिन् रूपातिदेशे प्रयोगसमवायि यद्रूपं क्रोष्टा क्रोष्टारौ पञ्चक्रोष्टृभी रथैः क्रोष्ट्रो क्रोष्ट्रा क्रोष्टुः क्रोष्टरीत्येवं, सावाकारान्तं द्विवचनादावारन्तं स्त्रियां क्वचिद्रेफान्तं क्वचिदकारान्तं, तृतीयादौ रेफान्तं ङसिङसोरुकारान्तं ङावरन्तमिति, तदतिदिश्यते, आहोस्विच्छास्त्रीयं यद्रूपं ण्वुल्तृचौ तृज्वत्क्रोष्टुरित्युपदेशवाक्ये ऽतिदेशवाक्ये च श्रुतं तदतिदिश्यते, तत्राद्ये पक्षे उदात्तयणो हल्पूर्वादिति स्वरो न सिद्ध्यति, नहि क्रोष्ट्रीत्यादावृकारावस्था कदा चिद्दृष्टा यतोयमुदात्तयणः स्यात्, तस्माद् द्वितीयः पक्ष आश्रयणीयस्तदाह। 'तच्च क्रोष्टृ इत्येतदिति'। नन्वत्रापि पक्षे उपदेशवाक्येऽतिदेशवाक्ये च तृशब्दस्योदात्तस्योच्चारणाभावादुच्चारितस्य वा गुणानामभेदकत्वेनाकिंचित्करत्वात्स्वरस्यातिदेशो न स्यात्, सत्यं, चकारग्रहणसामर्थ्यात्तस्याप्यतिदेशो भविष्यति तदाह। 'अन्तोदात्तमिति'। यद्वा माभूत्स्वरस्यातिदेशस्तृजन्तरूपेऽतिदिष्टे तृज्बुध्या यथा दीर्घादीनि स्वेनस्वेन शास्त्रेण भवन्ति स्वरोप्येवमेव भविष्यति वतिनिर्द्देशाच्चायमतिदेश आश्रितः, यदि वतिनिर्देशमकृत्वा स्थान्यादेशभाव एवाश्रीयेत न किंचिदनिष्टं, तथा तु न कृतमित्येव॥

"स्त्रियां च"॥ क्रोष्टुशब्दस्तृज्वद्भवतीत्येतत्त्वर्थकथनं, षष्ठ्यन्तं तु युक्तं पठितुम्, अन्ये त्वेतद्ग्रन्थपर्यालोचनया पूर्वसूत्रेपि क्रोष्टुरिति प्रथमान्तं

मन्यन्ते, अनुक्रियमाणरूपविनाशप्रसङ्गात्तु तृज्वद्भावो न कृतः, वतिरपि तृतीयासमर्थादेव, तृजन्तेन तुल्यं वर्त्ततइति तद्रूपभाक्त्वेन तुल्यत्वमिति रूपातिदेशत्वम्, एवं च पूर्वसूत्रेप्याद्यमन्ये तस्येति न पठितव्यम्। 'तृजन्तस्य यद्रूपं तदस्य भवतीति'। एतच्चार्थकथनम्, अत्र विभक्तावित्यनुवर्त्तते चेत् क्रोष्ट्री भक्तिरस्येति बहुव्रीहौ भक्तिशब्दस्य प्रियादिषु पाठात्पुंवद्भावाभावे क्रोष्ट्रीभक्तिरिति न सिद्ध्यति, समासार्थाया विभक्तेर्लुमता लुप्तत्वात्, अथ वाक्यावस्थायामेव तृज्वद्भावो भविष्यति, अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधते, तस्मान्नात्र विभक्तिर्निमित्तत्वेन शक्या आश्रयितुम्, किं तर्हि निमित्तमित्याह। 'ङी चिदित्यादि'। कथं पुनर्गौरादिषु पाठे ङीष्प्रत्ययो निमित्तं भवति, स्त्रियामिति नैवं विज्ञायते स्त्रियामर्थेइति, कथं तर्हि स्त्रिया ई स्त्री स्त्रियामिति, स्त्रीत्वस्य द्योतको य ईकारस्तत्रेत्यर्थः, अर्थगतं च स्त्रीत्वमीकारे आरोप्य स्त्रियामिति नदीसंज्ञानिमित्तावामाटौ क्रियेते, एवं वदतामनिष्टमाह। 'तेषामिति'। 'पञ्चक्रोष्टृभिरिति'। तद्धितार्थे समासः, आर्हीयस्य ठको ऽध्यर्द्धपूर्वेति लुक्, लुक्तद्धितलुकीति स्त्रीप्रत्ययस्यापि लुक्, तत्र न लुमताङ्गस्येति प्रतिषेधादीकारनिमित्तस्तृज्वद्भावो न सिद्ध्यति, अन्तरङ्गाणां च विधीनां लुका बाधनात् न पूर्वमेव तृज्वद्भावो लभ्यते, तत्र सर्वनामस्थाने पूर्वेणैव सिद्धस्तृज्वद्भाव इति तृतीयादावसिद्धिरुक्ता, सर्वनामस्थानेपि संबुद्धौ पूर्वेणासिद्धिरेव हे पञ्चक्रोष्टरिति, तथा शसि पञ्चक्रोष्टॄन्, तथा तृतीयादिष्वजादिष्वप्युत्तरसूत्रेण विकल्पः प्राप्नोति, पञ्चक्रोष्ट्रा पञ्चक्रोष्ट्रे, नन्वारब्धेप्यस्मिन्परत्वाद्विकल्प एव प्राप्नोति, अन्तरङ्गत्वादयमेव नित्यो विधिर्भवति। तत्र प्रतिविधेयमिति वचनमेवात्र शरणं, ये तर्हि गौरादिषु न पठन्ति तेषां किं निमित्तं, न किंचिदित्याह। 'ये त्वित्यादि'। 'स्त्रियां च वर्त्तमानइति'। सूत्राक्षरानुरोधेन चशब्दः पठितः। ननु च यद्यपि न शब्देन किंचिन्निमित्तमाश्रीयते, अङ्गस्येति त्वाश्रीयते, अङ्गे चाश्रिते प्रत्ययोप्याश्रित एव, यथोक्तमङ्गस्येत्यत्र वव्रश्चेत्यस्य सिद्धये, सत्यं, कार्यकालं संज्ञापरिभाषं, तदुक्तं तत्र हि पक्षे

उरदित्यत्राङ्गसंज्ञासूत्रमुपतिष्ठते, ततश्च प्रत्ययइत्यस्याङ्गसंज्ञायामुरदत्वं च प्रति निमित्तभावः सन्निधेरविशिष्टत्वात्, इह तु यथोद्देशपक्ष आश्रीयते, ततश्च वस्तुतोऽङ्गस्य स्त्रियां वर्तमानस्य क्रोष्टुशब्दस्य तृज्वद्भावो विधीयते न तु परनिमित्तमाश्रीयते, अङ्गसंज्ञा च प्रत्ययलक्षणेन भविष्यति, अङ्गस्येति वचनाल्लब्धाङ्गसंज्ञस्य यत्कार्यं प्रत्ययलक्षणं तदेव प्रतिषिद्ध्यते, न चाङ्गसंज्ञाङ्गस्य कार्यम्। 'अन्तोदात्त एव क्रोष्ट्रीशब्दो भवतीति'। गौरादिषु पाठे ङीष्प्रत्ययस्वरेणान्तोदात्तः, अत्रापि पक्षे उदात्तयणो हल्पूर्वादित्यन्तोदात्त एवेति एवशब्दस्यार्थः। केचित्तु ङीषेण्युदात्तयण इत्येवोदात्तत्वम्, अन्यथा[1] ङीषि परतस्तृज्वद्भावे चित्स्वरस्य सति शिष्टत्वेन ङीषोऽनुदात्तत्वप्रसंग इत्याहुः॥

"विभाषा तृतीयादिष्वचि"॥ अप्राप्तविभाषेयम्। स्त्रियामिति नानुवर्तते, पञ्चक्रोष्ट्रीत्यादावन्तरङ्गत्वात्पूर्वेण नित्यस्तृज्वद्भाव इत्यवोचाम, तेनोभयत्र विभाषापि न भवति। 'पूर्वविप्रतिषेधेनेति'। तृज्वद्भावस्यावकाशः क्रोष्ट्रि, पुंसि, नुम्नुटोरवकाशः त्रपुणे जतुने, अग्नीनां वायूनां, प्रियक्रोष्टुन इत्यादावुभयप्रसङ्गे पूर्वविप्रतिषेधः, अथ किमर्थं तृज्वद्भावो विधीयते, यावता क्रुशेरेव तृचि क्रोष्ट्रित्यादि सिद्ध्यति, तुनन्तस्यासंबुद्धौ सर्वनामस्थाने स्त्रियां च प्रयोगो माभूत् तृजन्तस्यैव यथा स्यात्, विभाषा तृतीयादिष्वचीत्येतत्तर्हि किमर्थं, तृजन्तस्यैव क्रोष्ट्रित्यादि सिद्धं, तुनन्तस्य क्रोष्टुनेत्यादि, यथैव तर्ह्यजादावुभयं भवति तथा हलादावपि स्यात्, एवं शस्यपि तुनन्तस्यैव च तत्र प्रयोग इष्यते, तेनैतदपि नियमार्थं तृतीयादावेवोभयं तत्राप्यजादावेवेति। यस्तु मन्यते अभिधानस्वभावादेव तुंस्तृचोर्व्यवस्थितविषयः प्रयोग इति तं प्रति सूत्रत्रयमपि शक्यमकर्तुम्॥

"चतुरनडुहोरामुदात्तः"॥ अत्र सर्वनामस्थानइति स्वर्यते, न तृतीयादिष्विति। आगमानुदात्तत्वबाधनार्थमुदात्तवचनम्। 'तदन्तविधिरत्रेष्यतइति। अङ्गाधिकारे तस्य च तदुत्तरपदस्य चेति वचनात्। 'प्रिय-

१ इतरथेति· ई· पु· पा·।

चत्वा इति'। 'बहुव्रीहौ सर्वनामसंख्ययोरुपसंख्यानमिति' चतुर्शब्दस्य पूर्वनिपाते प्राप्ते वा प्रियस्येति प्रियशब्दस्य पूर्वनिपातः ॥

"अम् संबुद्धौ"॥ चतुःशब्दस्य केवलस्य संबुद्ध्यभावादुपसमस्तस्योदाहरणम्, अनडुहस्तु प्रक्रमाभेदाय तदन्तविधिरत्रेष्यतइति प्रदर्शनाय च तदन्तस्योदाहरणम् ॥

"ऋत इद्धातोः"॥ 'किरतीति'। कॄ विक्षेपे, गॄ निगरणे तुदादौ। 'आस्तीर्णं विशीर्णमिति'। स्तॄञ् आच्छादने, शॄ हिंसायां, हलि चेति दीर्घः, रदाभ्यामिति निष्ठानत्वम्। 'मातॄणामिति'। दीर्घत्वे कृतेपि लाक्षणिकत्वादेवात्र न भविष्यतीत्यत आह। 'लाक्षणिकस्यापीति'। किं प्रयोजनमित्याह। 'चिकीर्षतीत्यादि'। अतस्तदर्थं धातुग्रहणमिति भावः। क्व चित्तु वृत्तावेवैतत्पठ्यते ॥

"उपधायाश्च"॥ पूर्वेण ऋकारान्तस्य धातोरित्वमुक्तम्, उपधायामपि यथा स्यादित्ययमारम्भः। ननु पूर्वयोगे धातुना ऋकारं विशेषयिष्यामः, धातोर्य ऋकारो यत्र तत्र स्थित इति, इहापि तर्हि प्राप्नोति ऋकारमिच्छति ऋकारीयतीति, एवमपि कृतस्येतीयता सिद्धम्, ऋत इत्यनुवृत्तेरन्त्यस्य न भविष्यति, तथा तु न कृतमित्येव। 'कीर्त्तयतीति'। कृत संशब्दने चुरादिः ॥

"उदोष्ठ्यपूर्वस्य"॥ 'पूर्त्ता इति'। पॄ पालनपूरणयोः, न ध्याख्यापृमुर्च्छिमदामिति निष्ठानत्वप्रतिषेधः। 'मुमूर्षतीति'। मृङ् प्राणत्यागे। 'सुस्मूर्षतीति'। स्मृ चिन्तायां, सुस्वूर्षतीति पाठे स्वृ शब्दोपतापयोः, सनीवन्तर्द्धेत्यादिनेडभावपक्षे रूपं, पूर्व एव तु युक्तः पाठः, पृथगुदाहरणस्य वक्ष्यमाणत्वात्। 'दन्त्योष्ठ्यपूर्वापीत्यादि'। ओष्ठ्यत्वमात्रं विवक्षितं नेतरव्यावृत्तिरिति भावः। 'ओष्ठ्योत्रेत्यादि'। यथा हल इत्यत्राङ्गेन हल् विशेष्यते तेन संप्रसारणं तेन च पुनरङ्गं तथेहाप्यङ्गस्यावयव ओष्ठ्यः पूर्वो यस्मात्तदन्तस्याङ्गस्येति। 'इत्वोत्वाभ्यामित्यादि'। इत्वोत्वयोर्दर्शितान्युदाहरणान्यवकाशः, गुणवृद्ध्योरवकाशः, चयनं चायकः, उभयप्रसङ्गे

विप्रतिषेधः । 'आस्तरणमिति' । नात्र गुणस्य नित्यत्वं लक्षणभेदात् । पूर्वं हीगन्तलक्षणो गुणः प्राप्नोति, इत्वोत्वयोः कृतयोर्लघूपधलक्षणः ॥

"बहुलं छन्दसि" ॥ ततुरिर्जगुरिरिति' । तृगृभ्यामादृगमहेनेति क्विन् प्रत्ययः, उत्त्वं, तस्य द्विर्वचनेचीति स्थानिवद्भावात्तृगृइत्येतस्य द्विर्वचनम्, उरदत्वम् । 'पप्रितममिति । पृ इत्येतस्मात्पूर्ववत्क्विन्, इत्वोत्वयोरभावे यण्, तस्य स्थानिवद्भावाद् द्विर्वचनम्, अतिशायने तमप् ॥

इति श्रीहरदत्तमिश्रविरचितायां पदमञ्जर्यां

सप्तमस्याध्यायस्य प्रथमः पादः ॥

"सिचि वृद्धिः परस्मैपदेषु" ॥ अत्र सिचि परस्मैपदेष्विति द्वे अपि परसप्तम्यौ, तत्र सिचोऽङ्गापेक्षं परत्वं, परस्मैपदानां सिजपेक्षम्, इको गुणवृद्धी इति वचनादिक इत्युपतिष्ठते, तत्रेकाङ्गस्य विशेषणात्तदन्तविधिर्भवतीत्याह । 'इगन्तस्याङ्गस्येति' । उदाहरणेष्वस्तिसिचोपृक्तइतीट्, सेटः सिच इट ईटीति लोपः, ननु चान्तर्भूतसिज्मात्रापेक्षत्वाद्गुणोऽन्तरङ्गः, बहिर्भूतं परस्मैपदं सिचं चापेक्षतइति वृद्धिर्बहिरङ्गा, ततश्च पूर्वं गुणे कृते इगन्तस्याङ्गस्येति नोपपद्यतइत्यत आह । 'अन्तरङ्गमपीति' । यथैव तर्हि गुणं बाधते तथैवङमपि बाधेत, तत्राह । 'न्यनुवीच्यधुवीदित्यत्रेति' । णू स्तुतौ, धूञ् विधूनने कुटादि, यत्र हि वृद्धिः प्रवर्त्तते तत्रान्तरङ्गं बाधेत इह तु प्रतिषेधादप्रवृत्ता सती नोत्सहते बाधितुं, ननु च यथा गुणो बाध्यते एवं प्रतिषेधोऽपि न बाधनीयः, येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति, गुणे च नाप्राप्ते वृद्धिरारभ्यते प्रतिषेधे च प्राप्ते चाप्राप्ते चेति । अथैवं कस्मान्न कल्प्यते अन्तरङ्गत्वाद्गुणे कृते वचनादनिकोऽपि वृद्धिर्भवति, यथाचैषीदित्यादावेकारस्य, अहौषीदित्यादावोकारस्येति, तत्रायमर्थः, ह्म्यन्तक्षणेत्यत्र णिश्विग्रहणं न कर्त्तव्यं भवति, कथम्, अनैषीत् अश्वयीदित्यादौ अन्तरङ्गत्वाद्गुणायादेशयोः कृतयोर्यान्तानां ह्म्यन्तेत्येव प्रतिषेधः सिद्धः, नैवं शक्यं कल्पयितुम्, एवं हि कल्प्यमाने अभैत्सीदित्यादौ व्यञ्जनस्यापि वृद्धिप्रसङ्गः, वदव्रजहलन्तस्याच इत्येषा व्यञ्जनवृद्धिं बाधिष्यते, नाप्राप्तायां तस्यामारम्भात्, यत्र तर्हि सा

प्रतिषिध्यते अनन्दीददेवीदित्यादौ, तत्र व्यञ्जनस्य सिचि वृद्धिः प्राप्नोति। नैष दोषः। नेटीत्यनेन हलन्तस्य या च यावती च वृद्धिः प्राप्नोति वदव्रजेति वा सिचि वृद्धिरिति वा सा सर्वा प्रतिषिध्यते, इह तर्हि अगवीदिति गोशब्दस्याचारक्विबन्तस्य सिचि वृद्धिः प्राप्नोति, अत्राप्यन्तरङ्गत्वादवादेशे कृते हलन्तलक्षणाया वृद्धेर्नेटीति प्रतिषेधः, अतो हलादेर्लघोरिति विकल्पस्तु सत्यपि सिचि वृद्धिरिग्लक्षणत्वे भवति, इह तर्हि न्यनुवीत् न्यधुवीदिति, क्ङिति चेति प्रतिषेधो न प्राप्नोति, अनिग्लक्षणत्वात्, माभूत्प्रतिषेधः, अन्तरङ्गत्वादुवङादेशो भविष्यति, इह च अकार्षीदिति, गुणे रपरत्वे च कृते हलन्तलक्षणा वृद्धिः, यत्रापि सा प्रतिषिध्यते अतारीदस्तारीदिति तत्राप्यतोल्रान्तस्येति वृद्धिः सिद्धा, इह तर्ह्यलावीदयावीदन्तरङ्गत्वाद्गुणावादेशयोः कृतयोर्हलन्तलक्षणाया नेटीति प्रतिषेधे अतो हलादेर्लघोरिति विकल्पः प्राप्नोति, अतो ल्रान्तस्येत्यत्र वकारोपि प्रश्लिष्यते, किं वकारो न श्रूयते, लुप्तनिर्दिष्टो वकारः, इहापि तर्हि प्राप्नोति माभवानवीद् अमवीदिति, णिश्विग्रहणमिह पक्षे न कर्त्तव्यमित्युक्तं, तयोः स्थाने अविमवी प्रक्षे[१]प्स्यामि, यत्तर्हि लाघवमस्मिन्पक्षे प्रदर्शितं णिश्विग्रहणं न कर्त्तव्यं भवतीति तदेवं सति हीयते, किं चागवीदित्यत्राप्यतो हलादेर्लघोरिति विकल्पं बाधित्वा वकारप्रश्लेषाचित्या वृद्धिः प्राप्नोति, तथा चिप्रभृतिभ्यो यङ्लुगन्तेभ्यो लुङि अचेचायीदित्यादौ गुणायादेशयोः कृतयोर्यान्तानां नेति प्रतिषेधः प्राप्नोति, तथा चिरिणोति जिरिणोत्योरचिरायीदजिरायीद्, तस्मादन्तरङ्गमपि गुणमेषा वृद्धिर्वचनाद्बाधत इत्येतदेव सांप्रतं, न पुनरन्तरङ्गस्य प्रवृत्तिमभ्युपेत्य वचनादनिकोपि भवतीति, किं पुनः कारणमियमेव कल्पना भवति, णिश्विग्रहणात्, अन्यथा णिश्विग्रहणं न कर्त्तव्यं भवतीत्यनन्तरमेवोक्तम् ॥

"अतो ल्रान्तस्य" ॥ अन्तशब्दोयमस्त्यवयववचनः, वस्त्रान्तो वसनान्त इति, अस्ति समीपवचनः, उदकान्तं गत इति, तत्राद्ये पक्षे ल्रान्त-

१ प्रक्षेप्तव्याविति इं० पु० पा० ।

स्येति बहुव्रीहिः, अङ्गमन्यपदार्थः, अन्यस्यार्थस्यासम्भवात्, तत्र वर्णग्रहणे सर्वत्र तदन्तविधिरित्येव सिद्धत्वादन्तग्रहणमतिरिच्यते,तस्मात्समीपवचनोन्तशब्दस्तत्रापि यदि षष्ठीसमासः स्याद्रेफलकारयोः समीपभूतस्यातो वृद्धिर्भवतीति, ततो लपिरणिप्रभृतिष्वेव स्यात्, यदि परसमीपवचनोन्तशब्दः, अथ तु समीपमात्रवचनस्तदा इष्टविषये तावत्सिध्यति, अनिष्टेपि तु विषये प्राप्नोति, तथा अखल्लीदित्यत्रापि प्रसङ्गः, तस्मात्कर्मधारयः, निपातनाच्च विशेषणस्य परनिपातः, समीपभूतौ रेफलकारौ लान्तशब्देन विवक्षितौ, कस्य समीपभूतावित्यपेक्षायामत इत्यनेन संबन्धः, एवं विशेषिताभ्यां रेफलकाराभ्यामङ्गस्य विशेषणात्तदन्तविधिः, अतः समीपभूतौ यौ रेफलकारौ तदन्तस्याङ्गस्येति, यद्येवमेकत्वादत इत्यस्य तस्य च रेफलकारयोः विशेषणे एव उपक्षीणत्वाच वृद्धिभाङ् निर्दिष्टः स्यात्, विशेषणत्वेनापि तावदकारस्य श्रुतत्वात्तस्यैव वृद्धिर्भवतीत्यदोषः, तदिदमुक्तं, रेफलकारौ यावतः समीपभूतावित्यादि, वयं तु ब्रूमः। समीपभूतरेफलकारान्तस्याङ्गस्यातः स्थाने वृद्धिर्भवतीत्येवात्तरव्यापारः, तत्र कस्य समीपभूतावित्यपेक्षायां संनिधानादतः समीपभूताविति गम्यतइति, अपर आह रश्च लश्च लम्, आगन्तुकोकारः, षष्ठ्या लुका निर्देशः, अत्र लेणाङ्गस्य विशेषणात्तदन्तविधौ लान्तस्याङ्गस्य योकारस्तत्र वृद्धिर्भवति, कीदृशस्यातः, समीपभूतस्य, सन्निधानाच्च लं प्रति समीपभूतस्येति, अन्तशब्दश्च समीपमात्रवचनो न तु परसमीपवचन इति। उदाहरणेषु क्षर संचलने, त्सर छद्म गतौ, ज्वल दीप्तौ, ह्वल चलने। 'न्यखोरीन्यमीलीदिति'। खुर छेदने, मील निमेषणे। 'मा भवानित्यादि'। अट गतौ, अश भोजने, माङः प्रयोग अडागमनिवृत्त्यर्थः। 'अवभ्रीदखल्लीदिति'। वभ्रिर्गत्यर्थः, खल्लिराशुगमने। अथान्तग्रहणं किमर्थं, न ल इत्येवोच्येत, इहापि तर्हि प्राप्नोति अवभ्रीदखल्लीदिति, अकारमेव सिच्परत्वेन विशेषयिष्यामः, लान्तस्याङ्गस्य योकारस्तस्य सिच्यनन्तरे वृद्धिर्भवतीति, न च रेफलकारान्तस्याङ्गस्य योकारस्तस्य सिजव्यवहितः संभवतीति सामर्थ्यात् येन नाव्यवधानं तेन व्यवहितेपि वचनप्रामाण्यादित्येकेन वर्णेन व्यवधानमा-

अयिष्यते, अथ वा अतो हलादेर्लघोरित्यस्यानन्तरमिदं कर्त्तव्यं, तत्रायमप्यर्थः, अत इत्यपि न वक्तव्यं भवति, तत्र लघोरित्यनुवृत्तेरखल्लीदित्यादौ न भविष्यति, एवमपि चतुश्शब्दादाचारक्किपि लुङि सिचि चकारस्यापि प्राप्नोति, तत्रापि सिचा ऽऽनन्तर्यं विशेषयिष्यामः, तत्र यथा अचकासीदित्यत्रातो हलादेर्लघोरिति चकाराकारस्य वृद्धिर्न भवति तत्कस्य हेतोः, सिचा आनन्तर्यं विशेष्यतइति, एवं चतुश्शब्देपि न भविष्यति, एवं च कृत्वा लघोरित्यपि न वक्तव्यं भवति, तथा तु न कृतमित्येव ॥

"वदव्रजहलन्तस्याचः" ॥ 'विकल्पबाधनार्थमिति' । अतो हलादेर्लघोरिति विकल्पो वक्ष्यते, नेटीति प्रतिषेधे प्राप्तइति तु नोक्तं, विकल्पस्यैव वस्तुतः प्राप्तत्वात् । 'अत्रेत्यादि' । वदव्रज्योरित्येको योगः, अच इति द्वितीयः, तत्राङ्गेनाज्विशेष्यतइति, अङ्गस्य योच् यत्र तत्र स्थितस्तस्येति, तेन हलन्तस्य सिद्धा वृद्धिरिति भावः । किं पुनः कारणमङ्गेनाज्विशेष्यते न पुनरचा ऽङ्गमजन्तस्याङ्गस्येति, असंभवात्, अचिकीर्षीदित्यादौ अदन्तस्य तावन्नेटीति प्रतिषेधः, आकारान्तं तु सिचि न संभवति यमरमनमातां सक्चेति सन्निधानात्, संभवे वा नास्ति विशेषः सत्यां वा वृद्धावसत्यां वा, इगन्तस्य तु सिचि वृद्धिरित्येव सिद्धा वृद्धिः, एजन्तमप्यात्वविधानान्नैव संभवति, [1]अगवीदित्यत्र तु नेटीति प्रतिषेधः, तदेवमङ्गेनाज्विशेष्यतइति सहृदयमभिधानम्, एवं प्रत्याख्याते हल्ग्रहणे प्रयोजनमाह । 'तदेतदिति' । किं पुनः कारणमन्तरेण हल्ग्रहणं हल्समुदायस्य परिग्रहो न सिद्ध्यत्यत आह । 'अन्यथा हीति' । एतच्च यदा वृद्धिभागजेव सिच्परत्वेन विशेष्यते तदा वेदितव्यम्, अङ्गे तु विशेष्यमाणे सर्वत्र सिध्यति, न चैवमचकासीदित्यादिष्वनेकाच्सु पूर्वस्याप्यचो वृद्धिप्रसङ्गः, नेटीति प्रतिषेधात्, न चानेकाजनिडस्ति, न चापाक्षीदित्यादावटः प्रसङ्गः, किं कारणं, लुङि यदङ्गं सिजन्तं तद्भक्तोडागमस्तद्ग्रहणेनैव गृह्यते न तु सिचि यदङ्गं तद्ग्रहणेन, यत्रापि सिचो लुक् क्रियते, अदात् अधात् इति, तत्र सिच्परत्वाभावाद्वृद्धेरप्रसङ्गः । 'उदवोढामिति' । वहेर्लुङ् तस-

[1] अगवीदित्यादि इ॰ पु॰ नास्ति ।

स्ताम्, सिच् वह् स्तामिति स्थिते वृद्धिश्च प्राप्नोति ढत्वादीनि च, आदिपदेन झलो झलीति सिचो लोपः, झषस्तथोर्धो ध इति धत्वं ष्टुत्वं ढलोप इत्येतेषां ग्रहणं, तत्र ढत्वादीनामसिद्धत्वात्पूर्वं वृद्धिः क्रियते पश्चात् ढलोपनिमित्तमोत्वम्, अथ तस्य पुनर्वृद्धिः कस्माच्च भवति तत्राह । 'तत्र कृतइति' । 'कृतत्वादिति' । यद्यप्योकारस्य न कृता वृद्धिस्तथापि प्रयोगेस्मिन् कृतेति भावः । 'यत्र त्विति' । नह्योकारत्वनिबन्धनो वृद्ध्यभावः किं तु कृतत्वनिबन्धन इति भावः । सोढा अभिभूता अमित्रा येन स सोढामित्रः ॥

"नेटि" ॥ उदाहरणेषु दिवु क्रीडादौ, सिवु तन्तुसन्ताने, कुष निष्कर्षे, मुष स्तेयइति धातवः । ननु चेत्यादि चोद्यं, नैतदेवमित्यादि परिहारः, उभयमप्येतत्सिचिवृद्धिसूत्रे व्याख्यातम् ॥

"ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम्" ॥ उदाहरणेषु ग्रह उपादाने, स्यमु स्वन ध्वन शब्दे, टुवम् उद्गिरणे, व्यय वित्तसमुत्सर्गे, क्षणु हिंसायां, श्वस प्राणने, जागृ निद्राक्षये, ऊन परिहाणे ईल प्रेरणे चुरादौ, टुओश्वि गतिवृद्ध्योः, रगे लगे सगे संवरणे, कखे खगे कगे हसनइति धातवः, ऊनयत्येलयत्योर्नौनयतिध्वनयतीति चङः प्रतिषेधः । 'यदि च पूर्वं गुणः स्यादित्यादि' । एतदपि सिचि वृद्धिसूत्रएव व्याख्यातम् । अथ जागृग्रहणं किमर्थमिति येन पृष्टं स एव यथैतच्च कर्त्तव्यं तथा दर्शयति । 'जागोविचिण्णल्ङित्स्विति' । 'कृते गुणे इत्यादि' । अङ्गवृत्ते पुनर्वृत्तावविधिरित्येतत् नाश्रितं निष्ठितत्वस्य दुर्ज्ञानत्वात् । 'अथ त्विति' । अन्यथा वृद्धिविषये गुणविधानमनर्थकं स्यादिति भावः । 'तथा चेति' । चिण्णलोः प्रतिषेधेन उत्तरकालभाविवृद्धिमात्रं न भवतीति सामान्येन ज्ञाप्यते न तूपधालक्षणवृद्धिर्न भवतीत्येवं विशेषेणेति भावः । जागृग्रहणे सति चायं सू[१]त्राणां प्राप्तिक्रमः, जागृइस्ईत् इति स्थिते पूर्वं यण् प्राप्तः, तमपवादत्वात्सार्वधातुकार्द्धधातुकयोरिति गुणो बाधते, तमपि सिचि वृद्धिः, तामपि जागर्तिगुणः, तत्र कृते हलन्तलक्षणा वृद्धिः, तस्या

१ सूत्रकार्याणां प्रवृत्तीति ई· पु· पा· ।

नेटीति प्रतिषेधः, ततो ऽतो हलादेर्लघोरिति विकल्पः, ततो ऽतो ल्रान्तस्येतिनित्या वृद्धिः, ततोयं प्रतिषेध इति, आह च ।

गुणो वृद्धिर्गुणो वृद्धिः प्रतिषेधो विकल्पनम् ।

पुनर्वृद्धिर्निषेधो ऽतो यण्पूर्वाः प्राप्तयो नव ॥

"अतो हलादेर्लघोः" ॥ 'न्यकुटीत् न्यपुटीदिति'। कुट कौटिल्ये, पुट संश्लेषणे, नन्वत्र कुटादित्वाङ्ङित्त्वे सति क्ङिति चेति प्रतिषेधादेव वृद्धिर्न भविष्यति किमन्नात इत्यनेन तत्राह। 'अत इत्येतस्मिन्नसतीति'। 'अतक्षीदरक्षीदिति' तक्ष त्वक्ष तनूकरणे, रक्ष पालने, सिच्परत्वेनाङ्गस्य विशेषणादत्र प्रसङ्गः। 'अथेह कस्मान्न भवतीति'। यदि सिच्परत्वेनाङ्गं विशेष्यते ततोत्रापि प्रसङ्ग इति प्रश्नः, सिच्परत्वेनाकारो विशेष्यतइत्याश्रित्योत्तरम् । 'येन नाव्यवधानमिति वचनप्रामाण्यादिति'। अपिपठिषीदित्यादावनन्तरस्याकारस्यातो लोपेन भवितव्यं, ननु चोभयोरप्यनित्ययोः परत्वाद्वृद्धिः प्राप्नोति, अस्तु वृद्धिः, आतो लोप इटि चेत्याकारलोपो भविष्यति, न भविष्यति, परत्वात्सगिटौ स्याताम्, एवं तर्हि णयल्लोपावियङुवङ्यण्गुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषिद्धावित्यतो लोपो भविष्यति, यथा चिकीर्षक इत्यत्र, युक्तं तत्राचोञ्णितीति वृद्धिरन्यत्र चरितार्था, इयं तु सिच्यनन्तरस्यातो विधीयमाना निरवकाशा, एवं तर्हि हलन्तस्येत्यनुवृत्तेरनन्तरोकारो न संभवतीत्येतत्सामर्थ्यम् । 'अथ त्विति'। व्यवधानेन भवितव्यमिति स्थिते हला व्यवधानमिति कल्पनायां लघुग्रहणं कर्त्तव्यम्, एकेन वर्णेनेति तु कल्पनायां न कर्तव्यमित्यर्थः ॥

"नेड्वशि कृति" ॥ 'वशि कृतीति'। सप्तमीनिर्द्दिष्टस्तदादिविध्यर्थः । तस्य च वयं पुरस्तात्करणस्य प्रयोजनं क्रादिसूत्रे वक्ष्यामः, ईशितेत्यादेरुपन्यासः प्रकृत्याश्रयः प्रतिषेधो न सिध्यतीति प्रदर्शनार्थः । 'ईश्वरइति'। स्थेशभासेत्यादिना वरच् । 'दीप्रमिति'। नमिकम्पीत्यादिना रः । 'भस्मेति'। अन्येभ्योपि दृश्यन्तइति मनिन् । औणादिके त्वव्युत्पत्तिपक्षाश्रयणेनापि सिद्धम् । 'याच्ञेति'। यजयाचेत्यादिना नङ् । 'संभवोदाहरणप्रदर्शनमिति'। एतावन्त्युदाहरणानि संभव-

न्तीति प्रदर्शनार्थमित्यर्थः । 'रुदिव रुदिम इति' । असति क्रादिग्रहणे रुदादिभ्यः सार्वधातुकइत्यस्यापि इटोऽत्र प्रतिषेधः स्यात्, तस्य त्ववशादिरवकाशः । 'रोदितीति' । क्वचिद्रुरुदिव रुरुदिमेति लिटि पठ्यते, तदयुक्तं, क्रादिनियमादेवेटः सिद्धत्वात् ॥

"तितुत्रतथसिसुसरकसेषु च" ॥ 'क्तिन्क्तिचोः सामान्येन ग्रहणमिति'। रोदितीत्यस्य तिप एकानुबन्धकस्याप्यग्रहणं कृतात्यनुवृत्तेः । 'दीप्तिरिति' । क्तिन्नावादिभ्य इति क्तिन् । 'औणादिकस्यैवेति' । एतच्च भूयोभिरौणादिकैः साहचर्याल्लभ्यते । 'तितुत्रेष्विति' । अस्मिन् सूत्रइत्यर्थः । 'अग्रहादीनामिति' । ग्रहादिव्यतिरिक्तानां धातूनां सबन्धिषु तितुत्रादिषु प्रतिषेध इत्यर्थः । आदिशब्दः प्रकारइत्याह । 'ग्रहप्रकारा इति' । कः पुनः प्रकार इत्याह । 'येषामिति' । 'निक्रुचितिरिति' । कुञ्चेः पूर्ववत् क्तिन्, उपधालोपः, कुच शब्दकरणे इत्येतस्माद्वा क्तिन् ॥

"एकाच उपदेशे ऽनुदात्तात्" ॥ अनुदात्तादिति बहुव्रीहिः, न विद्यते उदात्तो यस्मिन्सोयमनुदात्तः, पारिभाषिके त्वनुदात्ते ऽज्मात्राणामिणादीनामेव ग्रहणं स्यात्, नाऽज्हल्समुदायरूपाणाम्पचिप्रभृतीनां, ततश्च तेषामनुदात्तोपदेशोनर्थकः स्यात्, अथ वा ऽनुदात्ताच्कत्वात्समुदाय एवानुदात्त इत्युच्यते, यथाऽनुदात्तं पदमिति । उपदेशः प्रकृतिपाठः । 'अनुदात्तश्चेति' । उपदेशइत्यपेक्षते, उभयविशेषणं चैतदिष्यते, अन्यतरविशेषणं तु यदि विज्ञायेत उपदेशएकाचः सम्प्रत्यनुदात्तादिति, इहापि च प्रसज्येत लविष्यति पविष्यतीति, भवति ह्येतत् प्रत्ययस्योदात्तत्वे शेषनिघातेन सम्प्रत्यनुदात्तम्, इह च न स्यात् कर्त्ता कर्त्तुम्, नित्स्वरेण संप्रत्युदात्तत्वात्, प्रकृतिपाठे चैषामनुदात्तोपदेशोनर्थकः स्यात् । अथ विज्ञायेत उपदेशेनुदात्तादेकाचः श्रूयमाणादिति, क्रादिसूत्रे नियमो नोपपद्येत, चकृव चकृमेत्यादौ श्रूयमाणरूपस्यानेकाच्त्वाद्विधिरेव स्यात्, तत्र को दोषः, बिभिदिव बिभिदिम अत्रेडागमो न स्यात् । ननु च संप्रत्यनेकाच्त्वादत्र प्रतिषेधस्याप्रसङ्गादेवेड् भविष्यति, इह तर्हि पेचिव पेचिम, एत्वाभ्यासलोपयोः कृतयोरेकाचः श्रूयमाणादिट्प्रतिषेधः प्राप्नोति, परत्वादिटि कृते एत्वा-

"द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः ।
कला च सा चान्द्रमसी कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी" ॥

[*Vide* Text, p. 262.]

Here च should have directly followed after त्वम्.

[*Page* 426] Or again—

"शक्तिर्निस्त्रिंशजेयं तव भुजयुगले नाथ! दोषाकरश्री-
र्वक्त्रे, पार्श्वे तथैषा प्रतिवसति महाकुट्टनी खड्गयष्टिः ।
आज्ञेयं सर्वगा ते विलसति च पुरः, किम्मया वृद्धया ते,
प्रोच्येवेत्थं प्रकोपाच्छशिकरसितया तस्य कीर्त्या प्रयातम्" ॥

[" 'O Lord! you have in your arms (between your arms, in your embrace) this the strength of your sword (a prostitute); in your face you have the moon (a receptacle of blemishes); in your side also hangs this the sword, a mighty killer (a great go-between); this thy command all-pervading (going everywhere) appears before you;—so what need have you of me fully developed (grown old) that I am?'—having said this, as it were, his fame, clear as the moon-rays, went away, as if with rage."]

[*Page* 427.] Here इत्थम् ought to have preceded प्रोच्य. And similarly, in the Çloka लग्नं रागावृताङ्ग्या (*Text*, p. 411) there must be an इति before श्रीनियोगात्.

(21) To exemplify the *Undesirable or Distasteful*,—contradictory to the context—*second intention.*

"राममन्मथशरेण ताड़िता दुस्सहेन हृदये निशाचरी ।
गन्धवद्रुधिरचन्दनोक्षिता जीवितेशवसतिं जगाम सा" ॥

[*Raghuvaṁça*, Canto XI.]

["The Rākshasī, being struck in her heart by the unbearable arrow of cupidlike Rāma, smeared all over, with sandal, as it were, by her stinking blood, repaired to the abode of the Lord of Life."]

[*Page* 428.] Here the second implication, that of a woman repairing to her lover—the Erotic *Rasa*—is not compatible with the predominating Abhorrent *Rasa*.

The author next mentions the Defects of Meaning, or the Ideal Defects.

Ideal Defects or Defects in Sense.

55—57.—A (faulty) sense is—(1) Irrelevant, (2) Obscure, (3) Contradictory or Inconsistent; (4) Tautophonous or Tautological, (5) Irregular in Order, (6) Vulgar, (7) Dubious, (8) Inconsectary or Inconsequential; (9) Opposed to Popular or otherwise Prevalent Ideas; (10) Opposed to Science, (11) Monotonous or Wanting in Variety, (12) Specified (where no specification is necessary), (13) Unspecified (where specification is needed), (14) Unrestricted (where restriction or limitation is necessary), (15) Limited or Restricted (where no limitation is necessary), (16) Incomplete, (17) Introduced in a Wrong Place, (18) of Heterogenous or Mismatched Associates, (19) of Disagreeable or Distasteful Implication, (20) of Improper Predicate (21) of Improper Attribute or Adjunct, (22) Resuming the Concluded, and (23) Indecorous.

[*Page* 429.] These are exemplified in order—

(1) The Irrelevant. "अतिविततगगनसरणिप्रसरणपरिमुक्तविश्रमानन्दः।
मरुदुल्लासितसौरभकमलाकरहासकृद्रविर्जयति"॥

["Glorious is the sun, making to smile the lotus having its fragrance wafted by the breeze—the sun who has given up all pleasure of rest, on account of his travelling along the limitless ethereal path."]

Here the words अतिवितत, &c., even if left out, would not mar the sense of the Çloka, and hence are irrelevant, not inconsistent or repeated.

[*Page* 431.] "सदा मध्ये यासामियममृतनिस्यन्दमधुरा
(2) The Obscure. सरस्वत्युद्दामा वहति बहुमार्गा परिमलम्।

प्रसादं ता एता घनपरिचिताः केन महताम् ।
महाकाव्यव्योम्नि स्फुरितमधुरा यान्तु रुचयः ” ॥

["How can the works of a poet (the brightness of the sun), shining in the atmosphere of poetry (shining in the sky expanded like a great poem), manifesting variform sweetness (lovely on account of brightness), being acquainted with difficult poetry, (covered with clouds), how can such poetry be clear—the poetry (or the brightness of the sun) where in the mature (great) Goddess of Speech (River) of manifold ways and sweet owing to the flow of nectar, produces a splendid charm (bears clear water)?"]

[*Page* 432.] The sense in brief of the above is—The works of the poet wherein the Goddess of Speech traversing three ways—the soft, fanciful and medium—produces a charm, how can such poetry accustomed to hard poems, be appreciated like other minor poems? and again, how can the sunshine, wherein flows the three-wayed River Gangā, be lovely when covered with clouds?

(Here the double entendre of the Çloka is not easily comprehensible.)

(3) The Contradictory or Inconsistent.

“ जगति जयिनस्ते ते भावा नवेन्दुकलादयः
प्रकृतिमधुराः सन्त्येवान्ये मनो मदयन्ति ये ।
मम तु यदियं याता लोके विलोचनचन्द्रिका
नयनविषयं, जन्मन्येकः स एव महोत्सवः ” ॥

[*Mālatīmādhava*, Act I.]

["There are in the world many glorious entities, such as the sheen of the new moon, &c., which are naturally lovely and ravish the heart. Yet to myself the fact of her becoming the moonshine of my eyes, was the one jubilant event in my life."]

[*Page* 433.] Here the very "moonshine" which is depreciatingly mentioned in the first half is mentioned as an exalting attribute in the latter portion,—in which fact lies the inconsistency.

(4) Tautology.

In "कृतमनुमतम् &c.," [*Text*, pp. 111—12] when he had already called "O Arjuna! &c.," the repetition of the name in सभीमकिरीटिना &c., is tautological.

Or again—

"अस्त्रज्वालावलीढप्रतिबलजलधेरन्तरौर्वायमाणे
सेनानाथे स्थितेऽस्मिन् मम पितरि गुरौ सर्वधन्वीश्वराणाम् ।
कर्णालं सम्भ्रमेण व्रज कृप समरं मुञ्च हार्दिक्य शङ्काम्
ताते चापद्वितीये वहति रणधुरं को भयस्यावकाशः" ॥

[*Vēṇīsaṁhāra*, Act III.]

["My father, the preceptor of all the foremost of all archers, and acting like the submarine fire in the midst of the ocean of enemies pervaded by the flame of weapons,—this my father being the leader of the army, have done with this flurry. Karṇa! go to the affray! O Kripa and Kritavarman! give up hesitation. When my father helped by his bow enters the fray, whence the cause of fear?"]

[*Page* 435.] Here the fourth foot is an useless repetition.

(5) The Irregular. "भूपालरत्न निर्दैन्यप्रदानप्रथितोत्सव ।
विश्राणय तुरङ्गं मे मातङ्गं वा मदालसम्" ॥

["O gem of kings! who are jubilant over the gift of non-poverty, *i. e.* wealth! give me a horse, or an intoxicated elephant."]

Here the proper order should have been to mention 'elephant' first.

[*Page* 436.] "स्वपिति यावदयं निकटे जनः
(6) The Vulgar. स्वपिमि तावदहं किमपैति ते ।
तदयि साम्प्रतमाहर कूर्परं
त्वरितमूरुमुदञ्चय कुञ्चितम्" ॥

["As long as this person is sleeping here, I sleep, what harm accrues to you? So remove your hand and expand your thighs."]

The speaker, here, is vulgar (or inexpert).

[*Page* 437.] In "मात्सर्यमुत्सार्य, &c." [*Text*, p. 265] the sense is doubtful when the occasion of the speech is unknown. When, however, it is known, as spoken by either the Questistic or the Erotic man, then of course, the sense is ascertained.

(7) Dubious.

(8) Inconsequential. "गृहीतं येनासीः परिभवभयान्नोचितमपि
प्रभावाद्यस्याभून्न खलु तव कश्चिन्न विषयः ।
परित्यक्तं तेन त्वमसि सुतशोकान्न तु भयात्
विमोक्ष्ये शस्त्र त्वामहमपि यतः स्वस्ति भवते ॥
[*Veṇīsaṁhāra*, Act III.]

["Oh! weapons, rest, now that I here lay you aside—you who, though inconsistent with his caste, were taken up by my father, fearing trouble; and through whose valour, nothing was left to be your mark, and now by whom you have been given up, not through fear, but through grief for his son!"]

[*Page* 438.] Here the reason for his own laying aside of weapons is not mentioned.

[*Page* 439.] "इदन्ते केनोक्तं कथय कमलातङ्कवदने
(9) Opposed to Popular Notions. यदेतस्मिन् हेम्नः कटकमिति धत्से खलु धियम् ।
इदं तद्दुःसाधाक्रमणपरमास्त्रं स्मृतिभुवा
तव प्रीत्या चक्रं करकमलमूले विनिहितम्" ॥

["O thou whose face abashes the lotus! who told you that this thy bangle is golden, which you believe? This is the disc of the God of Love placed, through his love for you, on your wrist,—the disc being the great weapon capable of captivating even the incaptivable."]

The disc of Cupid is not popularly known.

Or again—

"उपपरिसरं गोदवर्याः परित्यजताध्वगाः
सरणिमपरो मार्गस्तावद्भवद्भिरिहेष्यताम् ।
इह हि विहितो रक्ताशोकः कया ऽपि हताशया
चरणनलिनन्यासोदञ्चवाङ्कुरकञ्चुकः" ॥

["O travellers! give up the road that goes by the Godāvarī, look out for another road. For there the red Açoka has his fresh sprouts shooting forth, being operated upon by the lotus feet of some mischievous woman."]

It is a fact known to Poets that the Açoka blossoms—and not sprouts—by being touched by the woman's foot.

[*Page* 441.] In the following example—

"सुसितवसनालङ्कारायां कदाचन कौमुदी
महसि सुदृशि स्वैरं यान्त्यां गतो ऽस्तमभूद्विधुः ।
तदनु भवतः कीर्तिः केना ऽप्यगीयत येन सा
प्रियगृहमगान्मुक्ताशङ्का, क्वनासि शुभप्रदः" ॥

["On the occasion of a certain woman going slowly, dressed in white garments and ornaments, the moon disappeared; after that your fame was sung by some one, by means of which she fearlessly went to her lover's house—so, is there a place where you are not a source of comfort?"]—

Though the mention of the bright form of the shapeless Fame is against popular ideas, yet being quite conformable to the ideas of poets, it is not faulty.

(10) The Unscientific. "सदा स्नात्वा निशीथिन्यां सकलं वासरं बुधः ।
नानाविधानि शास्त्राणि व्याचष्टे च शृणोति च" ॥

["The learned man having bathed in the night explains and listens to various sciences throughout the day."]

Here, *bathing at night*, except on special occasions, such as the lunar eclipse, &c., is, against the Code of Duty.

"अनन्यसदृशं यस्य बलं बाह्वोः समीक्ष्यते ।
षाड्गुण्यानुसृतिस्तस्य सत्यं सा निष्प्रयोजना" ॥

["The force of whose arms is unmatched, to such a king the following of the sixfold policy, is truly superfluous."]

This is against the Code of Polity.

[*Page* 442.] "विधाय दूरे केयूरमनङ्गाङ्गणमङ्गना ।
बभार कान्तेन कृतां करजोल्लेखमालिकाम्" ॥

["The woman, the altar, as it were of Love, having removed her bracelet, bore the line of nail marks made by her lover."]

[*Page* 443.] The arm is not the proper place for nail marks, and hence this is opposed to the Erotic Science or Science of Love.

"अष्टाङ्गयोगपरिशीलनकीलनेन
दुःसाधसिद्धिसविधं विदधद्विदूरे ।
आसादयन्नभिमतामधुना विवेक-
ख्यातिं समाधिधनमौलिमणिर्विमुक्तः" ॥

["Having set aside the hard following of the eightfold Yoga, the crowngem of Yogis, got final emancipation, after having got at discriminative knowledge."]

The proper course, in accordance with the Yoga System, is (1) discriminative knowledge, then (2) the Samprajnyāta Yoga accompanied by a process of reasoning; (3) the Asamprajnyāta Yoga based on the Purusha alone, and then (4) Final Emancipation; and the mention of such emancipation as following directly after mere discriminative knowledge is against Yoga doctrines.

Similarly, opposition to other sciences may be exemplified.

(11) The Monotonous and Wanting in Variety.

[*Page* 444.] "प्राप्ताः श्रियः सकलकामदुघास्ततः किम्
दत्तम्पदं शिरसि विद्विषतां ततः किम् ।
सन्तर्पिताः प्रणयिनो विभवैस्ततः किम्
कल्पं स्थितं तनुभृतां तनुभिस्ततः किम्" ॥

["All-affording wealth has been attained—what then? The foot was placed on the enemy's head—what then? Friends were satisfied with wealth—what then? The body of men lasted for a Kalpa—what then?"]

Here the frequent repetition of 'what then?' is Monotonous. A similar monotony is avoided in the following:—

"यदि दहत्यनलोऽत्र किमद्भुतम्
यदि च गौरवमद्रिषु किन्ततः ।
लवणमम्बु सदैव महोदधेः
प्रकृतिरेव सतामविषादिता" ॥

["What is the wonder if fire burns? If mountains are proud (heavy)—what then? The water of the sea is always salty. To great ones contentment naturally belongs."]

(12) The Unspecified Specifiable. "यत्रानुल्लिखितार्थमेव निखिलं निर्माणमेतद्विधेः
उत्कर्षप्रतियोगिकल्पनमपि न्यक्कारकोटिः परा।
याताः प्राणभृतां मनोरथगतीरुल्लंघ्य यत्सम्पदः
तस्याभासमणीकृताश्मसु मणेरश्मत्वमेवोचितम्"॥

["Owing to which the whole creation of Brahmā becomes purposeless; to whom the mention of excellences would only be an extreme degree of insult—and whose plentiful richness exceeds all bound of men's desires; this Chintāmani when among the stones, made gemlike by itself, must be called a stone only."]

(*a*) Here, the last foot must have been specified and the reading should have been छायामात्र, &c.

[*Page* 447.] "वक्त्राम्भोजं सरस्वत्यधिवसति सदा
(13) The Specified Unspecifiable. शोण एवाधरस्ते" &c.

["The river Saraswatī (Goddess of learning) resides permanently in your lotus-like mouth; your lips are Çona itself (red); your right arm reminding one of the valour of Kākutstha is the ocean itself; these rivers (thy arms) never leave your side; and your inside being the Mānasa lake (your heart being clean), wherefore your thirst?"]

(*b*) Here the specification in शोण एव is not proper.

(14) The Unrestricted Restrictible. "श्यामां श्यामलिमानमानयत भोः सान्द्रैर्मसीकूर्चकैः &c.
येन द्रष्टुमहं क्षमे दशदिशस्तद्वक्त्रमुद्राङ्किताः" ॥

[*Biddhaçālabhanjikā*, Act III.]

(*a*) See *Pradīpa*—"Specification would imply the lowness of the other gems, as being caused by none else but the Chintāmani, which implication is not possible without the specification,—nay, unspecification lowers the Chintāmani itself and brings it down to the level of the common gems."

(*b*) Since the use of एव excludes the existence of all other water-reservoirs.

काल्पनिकाकारनिवृत्तिः स्वरूपं वा तदतिरिक्तं वेति, आद्ये मोक्षोपायवैयर्थ्यं, द्वितीये निवृत्तिर्बाध्या वा न बाध्या चेत् अपुनरावृत्तिश्रुतिविरोधः, अबाध्या चेत् परमार्थविशेषवत्त्वं निवृत्तिर्जडा वा न वा जडा चेदजडस्य

भू० "यथा न क्रियते ज्योत्स्ना मलप्रक्षालनान्मणेः ॥ दोषप्रहाणान्न ज्ञानमात्मनः क्रियते तथा ॥ यथोदपानकरणात् क्रियते न जलाम्बरम् । सदेव नीयते व्यक्तिमसतः सम्भवः कुतः ॥ तथा हेयगुणध्वंसादवबोधादयो गुणाः । प्रकाश्यन्ते न जन्यन्ते नित्या एवात्मनो हि ते" इति, अतोऽज्ञानानन्दादिगुणानां कर्मणाऽऽत्मनि संकुचितानां परं ज्योतिरुपसंपद्य कर्मरूपबन्धक्षये विकासरूपाविर्भावो नानुपपन्न इति सुष्ठूक्तं संपद्याविर्भाव इति ॥ संपद्याविर्भावाधिकरणं समाप्तम् ॥

टी० जडधर्मत्वं स्यात् ततश्च भवद्भिरुक्ता एव दोषाः स्युः विजातीयनानात्वञ्च स्यात् अजडा चेत्सजातीयनानात्वं स्यात्सा च निवृत्तिः कस्मै प्रकाशते, यदि ब्रह्मणः तदयुक्तं स्वानुभवस्वभावस्याविद्यया विनाऽप्यन्यानुभवरूपत्वविरोधात् । यदि स्वस्मै तदा प्रत्यगर्थद्वयप्रसङ्गः । अन्ये तु परं ज्योतिरुपसम्पन्नस्य जक्षणादिश्रवणात् विलक्षणसंसारिकफलप्राप्तोऽयं मुक्त इति पूर्वपक्षं कृत्वा मुक्तात्मप्रतिपादनप्रतिज्ञानात् जक्षणादेः साङ्कल्पिकत्वोपगतेश्च सिद्धान्तपरमधिकरणान्तरं द्वितीयसूत्रं व्याचक्षते तदयुक्तं सङ्कल्पादेव तच्छ्रुतेरित्यत्र पितृलोकादिसृष्टेः सत्यसङ्कल्पमूलतया उपपादयिष्यमाणत्वात् । अत्र वक्तव्याभावादश्लिष्टविनष्टोत्तरपूर्वाघत्वात्सांपराये विधूतकर्मत्वाच्च परं ज्योतिरुपसंपन्नस्य संसारित्वशङ्काऽनुदयात्, अभिनिष्पन्नरूपं किमपहतपाप्मत्वादिविशिष्टस्वरूपम्? उत जक्षणादिनिष्पादनशक्ति? रिति विचारे पूर्वकर्मसंबन्धभाजः पाप्मप्रागभावप्रध्वंसात्यन्ताभावरूपापहतपाप्मत्वा-

द्वयोगात्तदाविर्भावानुपपत्तेः, जक्षणादिशक्तिरिति पूर्वपक्षं कृत्वा पुण्यपापहेतुभूतव्यापारचिरधृतदेहेन्द्रियशोकादिहेतुषु सत्स्वपि पापजराद्युत्पत्तिप्रतिबन्धशक्तेर्नित्यायाः प्राकृतिरोभूताया आविर्भावोपपत्तेर्जक्षणादिशक्तेरपि सत्यसंकल्पस्वान्तर्भावाच्चापहतपाप्मत्वादिलक्षणं स्वरूपमिति सिद्धान्तपरमधिकरणान्तरं तृतीयं सूत्रं व्याचक्षते तदयुक्तम्—अपहतपाप्मत्वादिलक्षणं स्वरूपमिति व्यवस्थापिते सति ब्राह्मेण जैमिनिरित्यधिकरणस्यानुत्थानप्रसङ्गात्, अतोऽपुरुषार्थाभिनिष्पत्तिवचनवैयर्थ्यशङ्कापरिहारपरत्वमेव सूत्रद्वयस्य न्याय्यम् । संपद्याविर्भावाधिकरणं समाप्तम् ॥

अविभागेन दृष्टत्वाधिकरणम् ।

सू० अविभागेन दृष्टत्वात् ॥ ४ ॥

भा० किमयं परं ज्योतिरुपसंपन्नः सर्वबन्धविनिर्मुक्तः प्रत्यगात्मा स्वात्मानं परमात्मनः पृथग्भूतमनुभवति? उत तत्प्रकारतया तदविभक्त? मिति विशये सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिता यदा पश्यः पश्यते रुक्मवर्णं कर्त्तारमीशं पुरुषं ब्रह्मयोनिं तदा विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः । सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति चेत्यादिश्रुतिस्मृतिभ्यो मुक्तस्य परेण साहित्यसाम्यसाधर्म्यावगमात् पृथग्भूतमनुभवतीति प्राप्ते उच्यते ।

टी० सू० अविभागेन दृष्टत्वात् ॥ ४ ॥ अवान्तरसङ्गतिः स्पष्टा मुक्तः किमात्मानं परमात्मनः पृथग्भूतमनुभवति? उत तत्प्रकारतया तदविभक्तं? किं साहित्यसाम्यसाधर्म्यवचनान्यविभागेनानुभवे विरुध्यन्ते ने? ति किं प्रकारभूतस्यैव साहित्यादिकमुपपन्नं ने? ति न चेत्तद्वचनविरोधात्पृथग्भावेनानुभवः, उपपन्नं चेत्तद्वचनाविरोधादविभागेनानुभवः, यथाऽवस्थितस्योपास्यत्वे यथोपासनभावित्वे च फलस्य स्थिते कथं पूर्वपक्षोत्थानमिति

शङ्कायां सह श्रुतिसाम्यश्रुतिसाधर्म्यस्मृतीनां बलात्तत्क्रतुन्यायोऽपोदित इत्यभिप्रायेण पूर्वपक्षमाह "सह ब्रह्मणे"ति श्रुतेर्भोक्तृसाहित्यपरत्वं पूर्वपक्षिणोमतं साम्यसाधर्म्यशब्दौ नार्थभेदविवक्षया प्रयुक्तौ अपि तूदाहृतश्रुतिस्मृतिवचनस्थत्वात् प्रयुक्तौ साम्यस्य पारम्ये सति प्रकारप्रकारिभावादिलक्षणवैषम्यं बद्धावस्थायामेवेति पूर्वपक्षिणोऽभिप्रायः ॥

सू० "अविभागेने"ति, परस्माद् ब्रह्मणः स्वात्मानमविभागेनानुभवति मुक्तः, कुतः दृष्टत्वात् परं ब्रह्मोपसम्पद्य निवृत्ताविद्यातिरोधानस्य याथातथ्येन स्वात्मनो दृष्टत्वात् स्वात्मनः स्वरूपं हि तत्त्वमस्ययमात्मा ब्रह्म ऐतदात्म्यमिदं सर्वं सर्वं खल्विदं ब्रह्मेत्यादिसामानाधिकरण्यनिर्देशैर्य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरोयमयति स त आत्माऽन्तर्याम्यमृतः। अन्तः प्रविष्टः शास्ता जनानां स त आत्मा इत्यादिभिश्च परमात्मात्मकं तच्छरीरतया तत्प्रकारभूतमिति प्रतिपादितम् ॥

टी० अविभागेनेतीति याथातथ्येन स्वरूपं दृष्टमस्तु ततः किमित्यत्राह "स्वात्मनः स्वरूपं ही"ति, स्वरूपैक्यव्यावृत्त्यर्थमाह "य आत्मनी"ति, अहं ब्रह्मास्मीत्येवानुभवतीति अहमर्थस्य तत्पर्यन्तत्वेन तद्बुद्धिशब्दयोश्च तत्पर्यन्तात्वात्तथात्वेनानुभवतीत्यर्थः । न कश्चिद्विरोधः सहश्रुतेर्भोग्यसाहित्यपरत्वात् भोग्यसाहित्यस्य ब्रह्मपर्यन्तत्वेऽपि सम्भवात्तत्पर्यन्तत्वेनानुभवनेन विरोध इत्यर्थः । उक्तप्रकार एवाविभागः न तु स्वरूपैक्यमविभागः । तथा सति पूर्वापरवैघट्यादित्याह—

सू० अवस्थितेरिति काशकृत्स्न इत्यत्र, अतो ऽविभागेनाहं ब्रह्मास्मीत्येवानुभवति, साम्यसाधर्म्यव्यपदेशो ब्रह्मप्रका-

रभूतस्यैव प्रत्यगात्मनः स्वरूपं तत्सममिति देवादिप्राकृतरूपप्रहाणेन ब्रह्मसमानशुद्धिं प्रतिपादयति सह श्रुतिस्त्वेवं भूतस्य प्रत्यगात्मनः प्रकारिणा ब्रह्मणा सह तद्गुणानुभवं प्रतिपादयतीति न कश्चिद्विरोधः । ब्रह्मप्रकारतया तदविभागोक्तेर्हि सङ्कल्पादेव तच्छ्रुतेरित्यादि न विरुध्यते ।

टी० "ब्रह्मप्रकारतये"ति, परं त्वत्र स तत्र पर्येतीत्यधिकरणाधिकर्त्तव्यभावेनोपसम्पत्तौ कर्मकर्त्तृभावेन च भेदं पूर्वपक्षं कृत्वा तत्त्वमसीत्यादिवाक्यैः परमात्मनो दृष्टत्वाद्ययादर्शनं फलत्वान्नदीसमुद्रनिदर्शनादिभिश्चाविभागं सिद्धान्तयन्ति स्वे महिम्नि प्रतिष्ठित इतिवत्स तत्र पर्येति इत्यादीनामर्थः अस्मिन्पक्षे परविद्याप्रकरणस्थानां मुक्तौ भेदश्रुतीनां गुणानुभवश्रुतीनां चामुख्यार्थत्वमिति तासामभेदश्रुतीनाञ्च मुख्यार्थत्वागुणः एव प्रबलः । भेदश्रुत्यमुख्यार्थत्वदोषोऽपरेषामपि समानः । औपाधिकनामरूपप्रहाणेन संश्लेषे दृष्टान्तोनदीसमुद्रघटकरकाकाशादिरिति सर्वमुपपन्नम् । अन्ये तु सह ब्रह्मणा यथोदकं शुद्धे शुद्धमासिक्तं तादृगेवेत्यत्र तादृक्त्वमुक्तं न तु तद्भावः, सर्वेष्वात्मस्वत्रमत्तीत्यादिभेदव्यपदेशात् मुक्तस्य स्वपरविज्ञानवत्तया स्वापप्रलययोरिव विभागशक्तिमत्तया निर्वाहयोगात् शुकस्सर्वगतो भूत्वा सर्वात्मा सर्वतो मुखः । प्रत्यभाषत धर्मात्मा

सू० अधिकं तु भेदनिर्देशादधिकोपदेशादित्यादि च ॥ अविभागेन दृष्टत्वाधिकरणं समाप्तम् ॥

भोःशब्देनानुनादयन्निति सर्वात्मभूतस्यापि सम्भाषणादिदर्शनात् वेदान्तेषु य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवतीत्याम्नातोमुक्तस्य सर्वात्मभावः संश्लेषमात्रमिति पूर्वपक्षं कृत्वा भोक्तृभोग्येश्वरैर्जले जलवत्क्षीरे नीरवदविभागं गच्छति नामरूपविलयप्रतिपादनसामानाकरण्याभ्यां परे व्यये सर्वे एकं भवन्तीत्यादिश्रुतेश्च शक्तिभेदस्य

विद्यमानत्वाद्भेदवादा अविरुद्धाः, अविभागापत्तावपि स्वपरसम्बोध उपपन्नः सुषुप्ताविव करणाधीनज्ञानत्वे सत्युपरतकरणत्वाभावात्, अतः स्थित एव सर्वात्मभावे शरीरभेदेन विहर्तुमिच्छति चेद्विहरतीति सिद्धान्तयन्ति अस्मिन्पूर्वपक्षात्सिद्धान्तस्य शब्दमात्रेण भेदः । न त्वर्थतः स्वपरसम्बोधविभागत्त्यनपगमात्तत्कार्य्यसम्बोधस्य पृथग्व्यवहाराणां च विद्यमानत्वात्कदाचिदसम्बोधेनापि तिष्ठतीति चेत्तदयुक्तं करणानपेक्षज्ञानस्य सङ्कोचकाभावात्, यद्यप्यसम्बोधः तथाऽपि सुषुप्तात्मनां परस्परैक्याभावात्तद्वचाविभागः देहाद्युपाधिसम्बन्धाच परस्परैक्यमिति चेत्तर्हि सूक्ष्माचित्तत्त्वादिव भेदो दुपह्नवः, अचितः शक्तिमात्रशेषत्वाभावान्नानावस्थत्वात् तस्माद्भेद इति चेत्तर्हि निःसम्बोधेऽपि तस्मिन्नीश्वरात्सर्वज्ञाद्भेदः स्यादेव अन्यतरशिरसि भेदकधर्मस्य विद्यमानत्वात् । किञ्च यद्ययुतसिद्धिरविभागः अस्मात्सिद्धान्ताभ्युपगमः स्यात् न ह्यध्यस्तभेदनिवृत्तिः,ब्रह्माज्ञानपक्षप्रसङ्गात्, नाप्यौपाधिकभेदनिवृत्तिः भास्करमतादविशेषापातात् नाप्येकसमुदायान्तर्भावः, देवदत्तस्य परिषत्सामानाधिकरण्यवत् स इदं सर्वमिति सामानाधिकरण्यस्य मुख्यत्वायोगात्, नापि सर्वथा भेदनिवृत्तिः शक्तितो भेदस्याभ्युपगमात्, विभागशक्तिव्यतिरिक्तभेदाभाव इति चेत् किं तदा विभागो नास्ति किंतु विभागशक्तिरेवेति मतं तच अणुत्वस्य स्थितत्वात् अणुत्वं त्यक्तन्न वा त्यक्तं चेत्सर्षपघटमहीधरादीनामिव स्वरूपगतपरिमाणविरहेण लयाभ्युपगमे स्वरूपानित्यत्वमेव स्यात् । न चेत्तद्विभागशक्तिव्यतिरेकभेदस्य स्थितो नाविभागः । किञ्च विभागशक्तिव्यतिरिक्तनित्यभेदानभ्युपगमे विभागशक्त्या कदाचिदात्मानं विभज्य विहरन्मुक्तः किं पूर्वमुक्त एवात्मा वा रामकृष्णादिवत्परमात्मैकदेशो वेति विशये सतीदानीमुद्धृतशीकरस्य पूर्वप्रलीनशीकरांशानन्यत्वनिश्चयस्येव देवदत्तात्मानन्यत्वनिश्चयस्य दुष्करत्वान्मुक्तेश्वरांशसंकरः स्यात् ततश्च कदाचिन्मुक्तस्यापि जगद्व्यापारसम्भवः स्यात्, ईश्वरः सर्वज्ञत्वच्छक्तिमात्रावशेषमपि मुक्तमसङ्कीर्णं जानातीति न जगद्व्यापारप्रसङ्ग इति चेत् तर्ह्यसङ्कीर्णतया ज्ञानं भेदककारणं विना स्वरूपभेदेन वा विनाऽनुपपन्नमिति विभागशक्तिव्यति-

रिक्तभेदाऽभावरूपाविभागोऽनुपपन्नः । भोक्तृभोग्येश्वराणां विरुद्धस्वभावत्वाच्च मुक्तस्य तैरविभागोऽप्यनुपपन्नः । अतः पूर्वपक्षाद्विशेषसिद्धिर्दुरुपपादा । अविभागेन दृष्टत्वाधिकरणं समाप्तम् ॥

ब्राह्माधिकरणम् ।

सू० ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॥ ५ ॥

भा० प्रत्यगात्मनः परं ज्योतिरुपसंपद्य निवृत्ततिरोधानस्य स्वरूपाविर्भाव एवेत्युक्तं, तच्च येन स्वरूपेणायमात्माऽऽविर्भवति तत्स्वरूपं श्रुतिवैविध्याद्विचार्यते—किमपहतपाप्मत्वादिकमेवास्य स्वरूपमिति तेन रूपेणायमाविर्भवति? उत विज्ञानमात्रमेवे? ति तेन रूपेण? अथोभयोरविरोधइत्युभयस्वरूपेणेति? किं तावत्प्राप्तं ब्राह्मेणेति जैमिनिराचार्यों मन्यते, ब्राह्मेणापहतपाप्मत्वादिनेत्यर्थः । अपहतपाप्मत्वादयो हि दहरवाक्ये ब्रह्मसम्बन्धितया श्रुता. ब्राह्मेणेति कुतोऽवगम्यते उपन्यासादिभ्यः, उपन्यस्यन्ते हि ब्रह्मगुणाः अपहतपाप्मत्वादयः प्रत्यगात्मनोऽपि प्रजापतिवाक्ये "य आत्माऽपहतपाप्मेत्यादिना सत्यसङ्कल्पइत्यन्तेन, आदि—शब्देन सत्यसङ्कल्पत्वादिगुणायत्ता जक्षणादयः, जक्षत्क्रीडन् रममाण इत्यादिवाक्यावगता व्यवहारा गृह्यन्ते, अत एभ्य उपन्यासादिभ्यः प्रत्यगात्मनो विज्ञानमात्रस्वरूपत्वं न सम्भवतीति जैमिनेर्मतम् ॥

टी० सूत्र ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॥ ५ ॥ अवान्तरसङ्गतिमाह "प्रत्यगात्मन" इति प्रथमाधिकरणेन सङ्गतिरित्यर्थः अपहतपाप्मत्वादिकमेवेत्येवकारेण स्वप्रकाशत्वव्यावृत्तिः, विज्ञानमात्रमेवेति

मात्र–शब्देनांशतो जाड्यव्युदासः एवकारेण गुणाष्टकव्युदासः, किं गुणाष्टकविशिष्टमेवास्य स्वरूपम् ? उत विज्ञानमात्रमेव उतोभयं स्वरूपं किं गुणाष्टकवैशिष्ट्यज्ञानमात्रस्वरूपत्वविषयश्रुत्योः प्राबल्यदौर्बल्यविभागो युज्यते नेति ? तयोः किमविरोधः सम्भवति नेति विज्ञानघन एवेत्यवधारणं किं गुणान्तरं व्यावर्त्तयितुं शक्नोति नेति ? यदाऽवधारणं गुणान्तरव्यावर्त्तनक्षमन्तदानीमविरोधासम्भवेन प्राबल्यदौर्बल्यविभागाश्रयणस्य न्याय्यत्वाद्द्रष्टविवुपपत्त्यपेक्षयाऽन्यतरस्वरूपत्वसिद्धिः, यदा न व्यावर्त्तनक्षमं तदा विरोधाभावेन प्राबल्यदौर्बल्यविभागाश्रयणस्यायुक्तत्वादुभयस्वरूपत्वम् अपहतपाप्मत्वादेः कथं ब्राह्मत्वमित्यत्राह "अपहतपाप्मत्वादयो ही"ति, व्यवहाराः–प्रवृत्तयः न सम्भवतीति, स्वरूपं जडं ज्ञानत्वे ज्ञानाद्याश्रयत्वायोगादिति भावः ॥

सू० चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमिः ॥ ६ ॥

भा० चैतन्यमात्रमेवास्यात्मनः स्वरूपमिति तेन रूपेणाविर्भवतीत्यौडुलोमिराचार्यो मन्यते, कुतः, तदात्मकत्वात्तावन्मात्रात्मकत्वादस्य प्रत्यगात्मनः, "स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एव एवं वा अरेऽयमात्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव विज्ञानघन एवेत्यवधारणाद्विज्ञानमात्रमेवास्य स्वरूपमित्यवगम्यते, अतोऽस्य गुणान्तराभावादपहतपाप्मेत्यादयः शब्दाः विकारसुखदुःखाद्यविद्यात्मकधर्मव्यावृत्तिपरा इति चितितन्मात्ररूपेणाविर्भाव इत्यौडुलोमेर्मतं, । सम्प्रति भगवान्बादरायणः स्वमतेन सिद्धान्तमाह–

टी० सू० चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमिः ॥ ६ ॥ तेनेति सूत्रे भाष्ये च तृतीयान्तनिर्देशः औपचारिकः, विकारसुखदुःखादीति आदि–शब्दादुपेक्षाग्रहणं विजर इत्यादिपदानि निर्विकारत्वपराणि विशोकोनिर्दुःखः सत्यकामः सत्यमकादाचित्कं सुखमस्येति सत्यकामपदं कादाचित्सुखराहित्यपरं न तु नित्यसुखत्वपरं सत्यसंकल्पः उपेक्षारहितः न ह्युपेक्षकः सत्यसंकल्पः मोघेन संकल्पेन रहित इति वा पूर्वपक्षार्थः ॥

सू० एवमप्युपन्यासात्पूर्वभावादविरोधं वादरायणः ॥ ७ ॥

भा० एवमपि विज्ञानमात्रस्वरूपत्वप्रतिपादने सत्यपि सत्यकामत्वादीनां पूर्वोक्तानां गुणानामविरोधं वादरायण आचार्यो मन्यते, कुतः, उपन्यासात् पूर्वभावादौपनिषदाद्य आत्माऽपहतपाप्मेत्याद्युपन्यासात्प्रमाणात्पूर्वेषामपहतपाप्मत्वसत्यसंकल्पत्वादीनामपि भावाद्विद्यमानत्वात्तुल्यप्रमाणकानामितरेतरबाधो न युज्यते इत्यर्थः । न च वस्तुविरोधादपहतपाप्मत्वादीनामविद्यापरिकल्पितत्वं न्याय्यं विशेषाभावाद्विपरीतं कस्मान्न भवतीति न्यायात् । तुल्यबलत्वे ह्यशक्यस्यावधारणस्यान्यपरत्वमेव न्याय्यम् ॥

टी० सू० एवमप्युपन्यासात्पूर्वभावादविरोधं वादरायणः ॥ ७ ॥ विज्ञानमात्रप्रतिपादनपरत्वापायप्रतीतिं विज्ञानघन एवेत्यादिवाक्यस्याभ्युपगम्य परिहरति एवमपीत्यादिना, अपहतपाप्मेत्यादिके वाक्ये सत्यपि तत्पूर्वपक्षीकृत्य ह्यौडुलोमिमतमुदीरितमिति शङ्कायां सूत्रतात्पर्य्यमाह "तुल्यप्रमाणकाना"मिति, एवकारः, कस्यचिद्वाक्यस्य शेषभूततया न स्वतन्त्रार्थप्रतिपादकः अवधारणीयसापेक्षत्वादवधारणस्य, अतः शेषभूतैवकारस्वारस्याय न शेषिभूतपदजातभङ्गः कार्य्यः । अपि तु शेषिणमभ-

स्वात्मावलोकनद्वारेणेत्यर्थः, तदुक्तमात्म*सिद्धौ उभयपरिकर्मितस्वान्तस्यैकान्तिकात्यन्तिकभक्तियोगलभ्यः । इति, । यदि कर्मयोगोऽधिकारार्थः तर्हि लब्धाधिकारस्य कर्मनैरपेक्ष्यं स्यादित्यत्राह । धर्मैरिति । अयं भावः कर्मयोगोनाम नियमयुक्तः कर्मविशेषः तन्निवृत्तिदशायामपि न वर्णाश्रमधर्मनिवृत्तिः कर्मनिषेधोऽप्यन्यविषयः अतस्त्रयोऽपि योगा वर्णाश्रमधर्माङ्गका इति । तथा च सङ्गृहीतम् ॥

त्रयाणामपि योगानाम्मात्रयाऽन्योन्यसङ्गमः ॥

नित्यनैमित्तिकानां च पराराधनरूपिणाम् ॥ इति ॥ ३१ ॥

इति विद्याभेदतद्विकल्पादिः ॥

ननु मुमुक्षुमधिकृत्योपनिषदामुत्थानमतस्तत्रत्यानां सर्वासां विद्यानां विकल्पः स्यादित्यत्र मुक्तिसाधिकास्तदन्याश्च विषयतोऽधिकारतश्च विभजते । विश्वेति ॥

मू० विश्वान्तर्यामितत्त्वं स्वयमिह चिदचिद्विग्र-
हैर्वा विशिष्टं यस्यामालम्बनं सा भवभय-
शमनी वीतरागस्य विद्या । यस्तूपास्ते
यथोक्तं तदितरदखिलं ब्रह्मदृष्ट्या स्वतोवा
नैतस्य ब्रह्मनाड्योद्गतिरपि न पदव्यर्चिरा-
दिर्न मोक्षः ॥ ३२ ॥

स्वयं स्वरूपनिरूपकैर्निरूपितस्वरूपविशेषकैश्च धर्मैर्विशिष्टं स्वासाधारणदिव्यविग्रहैर्वा चिदचिद्विग्रहैः इन्द्रप्राणादिचिदचिद्रूपैः शरीरैः, वीतरागस्येति विशेषणात् परभजनमपि रागिणः परिमितफलसाधनमिति सूच्यते । संजगृहे च—भक्तियोगस्तदर्थो चेत्समग्रै-

* परमगुरुभिर्भगवद्भिर्यामुनाचार्यपादैः सिद्धित्रयान्तर्गतायामात्मसिद्धौ ।

श्वर्यसाधनम् इति। यथोक्तं चिदचिद्रूपेण विभक्तं यद्वा तत्तद्विद्याविहितप्रकारेणेत्यर्थः। स्वतः ब्रह्मपर्यन्ततां ब्रह्मदृष्टिं च विहाय। नैतस्येत्यादि। नाडीभेदोहि तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्तीति विभज्यते। स्मर्यते च ऊर्ध्वमेकः स्थितस्तेषाम् इत्यादिना। अर्चिरादिगतिश्च ब्रह्मविद एवाधिकृत्य तत्रतत्र श्रूयते तथा च सूत्रम् अप्रतीकालम्बनान्नयति इत्यादि। मोक्षश्च तमेव विदित्वाऽतिमृत्युमेति इत्यवधारितः ॥ ३२ ॥

इति त्रिवर्गापवर्गार्थविद्याविभागः ॥

अथ कर्मणां सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् इति सूत्रसिद्धं विद्यार्थत्वं द्वारप्रदर्शनेन प्रापयन् समुच्चयवादं च निरस्यति। स्वान्तेति ॥

मू० स्वान्तध्वान्तप्रसूतं दुरितमपनुदन् योगिनस्सत्त्वशुद्धौ सर्वावर्णादिधर्मश्शमदममुखवत्सन्निपत्योपकारी ॥ विद्यां चेत्यादिवाक्येऽप्यनुकथितमिदं नैकवाक्यानुरोधात्कर्मापेक्षाभिसन्धिं क्वच न विवृणुते तत्समुच्चित्य वादः ॥ ३३ ॥

ध्वान्तशब्द इह तमोगुणे भाक्तः सत्त्वस्य शुद्धिः गुणान्तरसम्भेदाभावः, शमदमादीनां चित्तैकाग्र्यहेतुत्वस्य दुरपन्हवत्वात्तन्निदर्शनम्। सन्निपत्योपकारी—करणशरीरनिष्पादक इत्यर्थः। वाद्यन्तरयोजनाव्यावृत्त्यै श्रुत्यन्तरस्याप्युक्तार्थपरत्वमाह। विद्यां चेति। अविद्यया मृत्युं तीर्त्वा इति सत्कर्मणा विद्योत्पत्तिविरोधिकर्मतरणं विवक्षितम्। धर्मेण पापमपनुदति। कषायपक्तिः कर्माणि। इत्याद्यने-

कवाक्यानुरोधात् मृत्युं प्राप्य स्थित इति तु क्लिष्टगतिः, मृत्युतरणम॰ मृतप्राप्तिरिति साध्यद्वित्वाभावादच साधनद्वित्वादिश्चायुक्तः ब्रह्म- विद्यामधिष्ठाय तर्तुम्मृत्युमविद्यया इत्युपबृंहणेन चैतत्सर्वं व्यक्तम् । हतं ज्ञानं क्रियाहीनं हता चाज्ञानिनां क्रिया इत्यादिषु द्वयोस्समु- च्चितवद्वादः कुदृष्टिमतनिवृत्त्यै । कर्मसापेक्षत्वाभिसन्धिं व्यनक्ति ।

निषिद्धकाम्यत्यागेन नित्यनैमित्तिकग्रहः ।
अधिकाराङ्गताज्ञासु यथार्हमवतिष्ठते ॥ ३३ ॥

इति कर्मणां विद्योपकारकत्वप्रकारः ।

एवं केचिदूचुः कर्मानुष्ठाता जीवः स्वाध्यायसाध्येन स्वविष- यज्ञानेन सँस्क्रियते ते एव ज्ञानज्ञेये वेदान्तेषु प्रशस्येते इति तन्नि- रस्यति । संस्कार इति ।

मू॰ संस्कारः कर्मकर्तुर्न भवति विहितं मुक्तये ज्ञानमन्यन्नाप्येतत्कर्मणोऽङ्गं न च सकृदस- कृत्त्वाप्रयाणानुवृत्तम् ॥ अङ्गं तस्यासनाद्यं प्रणिधिसमुचितौ देशकालप्रभेदावित्याद्यं साङ्ख्ययोगप्रकरणविततं सूत्रभाष्यादिषू- क्तम् ॥ ३४ ॥

विहितं मुक्तये ऽन्यदिति हेतुत्रयपरं न हि वाक्यजन्यं ज्ञानं विधीयते तस्य विधानमन्तरेण रागप्राप्तविचारसिद्धत्वात् । न च वाक्यजन्यज्ञानान्मोक्षः निरसिष्यमाणत्वात् । अन्यदेव हि वाक्या- र्थज्ञानाद्विहितमुपासनाद्यात्मकं ज्ञानं जीवातिरिक्तविषयतया चान्यत्वं भाव्यमिति तथाऽपि तत्प्राप्तिहेतुर्ज्ञानं च कर्म च इति सहपाठाविशेषे कर्म चेत् ज्ञानाङ्गं विपरीतं किं न स्या दित्यत्राह । नापीति । न

हि सहोक्तिमात्रात्तादर्थ्ये शिष्मः किन्तु अनन्यथासिद्धेर्विनियोजकैरिति भावः । कर्तृसंस्कारत्वविरोधव्यक्त्यर्थमन्यविध्यर्थं च पूर्वोक्तमेवाह । न च सकृदिति । असकृदावृत्तमपि ध्यानमेकदिने ऽशक्यमित्यत्राह । असकृदिति । प्रयाणान्तमोङ्कारमभिध्यायीत स खल्वेवं वर्तयन् यावदायुषम् इत्यादिश्रुतिसिद्धमाप्रयाणत्वम् । सदा चिन्तनविधानाद्गमनादावपि स्यादित्यत्राह । अङ्गमिति । निरन्तरस्मृतिरासीनस्यैव स्यात् गमनादौ तु तद्विधिस्सान्तरविषयः आदिशब्देन समकायशिरोग्रीवत्वादिसङ्ग्रहः । प्रणिधिः—चित्तैकाग्र्यम् आद्यशब्देन प्रशान्तात्मकत्वविगतभीतित्वादि गृह्यते सूत्राण्यत्र आवृत्तिरसकृदुपदेशादित्यादीनि ॥ ३४ ॥ इति विद्यायाः कर्मकर्तृसंस्कारत्वभङ्गः ।

वर्णाश्रमधर्माणामङ्गित्वाभिमतविद्याविरुद्धत्वमाशङ्क्य परिहरति ।

मू० ब्रह्मण्यैकान्त्यभाजां मुहुरनुकथितोमोक्षधर्मेऽपवर्गस्तस्माज्ज्ञानाऽमरेज्या न भवति परभक्त्यङ्गमित्यप्ययुक्तम् ॥ ऐन्द्रीप्रातर्दनादिप्रथितनयविदामन्तरात्मैकलक्ष्येष्वग्नीन्द्रादिप्रयोगेष्वखिलमपि विभुः कर्म भुङ्क्ते स एकः ॥ ३५ ॥

ब्रह्मणीति ।

ऐकान्त्यभाजामनन्यदेवताकानामित्यर्थः तेषामेकान्तिनः श्रेष्ठास्ते चैवानन्यदेवताः । इति स्थापनात् तत्रैव च प्रतिबुद्धस्तु मोक्षभाक् इति नियम्यते ब्रह्माणम् इत्यारभ्य प्रतिबुद्धा न सेवन्ते

इत्यन्तेन चैतत्सिद्धम् । यागादयस्त्वग्नीन्द्रादिनानादेवताकाः अङ्गाङ्गिविरोधे च न्याय्योऽङ्गत्याग इत्येतदपि न युक्तं कुत इत्यत्राग्न्यादिशब्दानां ब्रह्मणि वृत्तिद्वयेन विरोधं परिहरति । ऐन्द्रीति । यथा ऐन्द्र्या गार्हपत्यमुपतिष्ठते इति विनियोगादिन्द्रशब्दः कयाचिद्वृत्त्या गार्हपत्यार्थः एवं । स्वकर्मणा तमभ्यर्च्य इत्यादिभिस्तत्तद्देवताशब्दानां क्वचिदवयशक्त्या ब्रह्मणि वृत्तिः, क्वचित्तु प्रतर्दनविद्योक्तन्यायेन प्रसिद्धचिदचिल्लिङ्गानन्यथासिद्धेः तत्तद्विशिष्टविश्रान्तिरिति अग्न्यादिशब्दानामन्तरात्मविषयतया प्रतिबुद्धेः प्रयोगादेक एव सर्वकर्मसमाराध्यः । ऐकान्त्यं च तेषामद्यतम् । अव्यवहितार्चने लभ्ये किं व्यवहितेनेति चेन्न । अधिकारव्यवस्थितेरद्योभ्यत्वादिति ॥ ३५ ॥ इति वर्णाश्रमधर्माणामैकान्त्यविरोधपरिहारः ।

परेष्टभङ्गाय त्यागविशेषं निष्कर्षति । त्यागत्रैविध्यमिति ॥

मू० त्यागत्रैविध्यमुक्त्वा स्वमतमिह जगौ सात्त्विकत्यागमीशस्तस्माद्वर्णाश्रमादित्यजनमपदृशां तामसं मोहमूलम् ॥ योगारूढस्य कर्मच्यवनमपि तदा सह्यमङ्गार्थवाक्यैर्योगं त्वन्त्याश्रमिभ्यः परममिति वचो वक्ति मोक्षाश्रमेण ॥ ३६ ॥

स्वमतम्—एतान्यपि च कर्माणि इति श्लोकोक्तं कार्यमेव इति श्लोकोऽपि तदर्थः । तत्फलितमाह । तस्मादिति । मोहात्तस्य परित्यागस्तामस इत्यस्यार्थोऽपदृशामित्यादिना दर्शितः । ननु योगदशायां कालादिकमजानतः कर्तव्यलोपः स्यादेव, अतः कर्मत्यागोऽत्र न तामस इति तत्राह । योगारूढस्येति । योगदशायां बहिर-

प्रवृत्तमनसो न धीपूर्वकर्मत्यागः अबुद्धिपूर्वकं तूत्थानकालेऽपि न लिम्पतीति नियमितं किमुत समाधौ अङ्गार्थवाक्यैः कर्मणां समाधिरूपाङ्गिशेषत्ववाक्यैरित्यर्थः । ततश्चाङ्गप्रधानविरोधेऽङ्गिना अङ्गोपमर्दो न दोषाय । अन्त्याश्रमिभ्यः परमं पवित्रं प्रोवाच इत्यत्रातिशयिताश्रमयोगो विवक्षित इत्याह । योगं त्विति । अन्यथा मत्वर्थीयवैयर्थ्यादिति भावः ॥ ३६ ॥

इति वर्णाश्रमादिधर्मस्वरूपत्यागभङ्गः ॥

प्रव्राजिनामेव मुक्तिस्तत्साधनी विद्या चेति पक्षमनूद्य प्रतिक्षिपति ॥ तुर्य इति ॥

मू० तुर्यो निष्कृष्य मोक्षाश्रम इति कथितस्तेन नान्येषु विद्या शान्त्यादिव्याहतेश्चेत्यसदिह गुणिनां सर्वतोमुक्त्यधीतेः ॥ यावज्जीवं द्वितीयाश्रमवति पुनरावृत्त्यभावोऽप्यधीतः स्मृत्याद्यैश्चैवमुक्तं भवति तु चरमे योग्यताधिक्यमात्रम् ॥ ३७ ॥

विशेषविधौ परिसङ्ख्यया शेषनिषेधः सिद्ध्येदिति भावः । अतस्तदन्येषु त्रिषु तत्साधनी विद्या नेत्याह । तेनेति । अधिकारिविरोधादप्याह । शान्त्यादीति । प्रवृत्तिरूपा वेदानुवचनयज्ञादयः । शमादयस्तु निवृत्तिरूपाः ते कथमेकत्र स्यु रिति भावः । अत्र बाधकमाह । गुणिनामिति । दया सर्वभूतेषु क्षान्तिः इत्याद्युक्तगुणवतामित्यर्थः । त्रयो धर्मस्कन्धाः इत्यत्र बह्वाश्रमप्रस्तावे ब्रह्मसंस्थोऽमृतत्वमेति इत्युच्यते सम्भवति चाधीतवेदेषु सर्वेषु ब्रह्मनिष्ठा सा च गृहस्थानामेवोषस्ति—याज्ञवल्क्यप्रभृतीनामुपनिषत्सु प्रचुर्येण दृश्यते

न च प्रवृत्तिनिवृत्त्योर्विरोधः भिन्नविषयत्वात्, नित्यनैमित्तिकेषु प्रवृत्तिः निषिद्धकाम्यनिरर्थकेषु निवृत्तिरिति । अन्यथा प्रव्राजिनां स्वाश्रमधर्मेणापि विरोधः स्यात् । अपि च छान्दोग्यान्ते कुटुम्बे शुचौ देशे इत्यादिना गृहस्थं प्रक्रम्य स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसम्पद्यत इत्युक्त्वा न च पुनरावर्तते इति चोक्तं तदाह । यावज्जीवमिति । अत्रोपबृंहणभूयस्त्वमाह । स्मृत्याद्यैरिति । गृहस्थोऽपि हि मुच्यते इति स्मर्यते । जनकदिलीपादयश्च गृहस्था एव मुक्ता इतीतिहासादिषूक्ताः । अत एव न सोपानवत्क्रमनिबन्धः, कस्यचिन्मोक्षाश्रमत्वोक्तिः किन्निमित्तेत्यत्राह । भवतीति ॥ ३७ ॥

इति सर्वाश्रमिणां ब्रह्मविद्याधिकारः ॥

कथं नित्यकर्मणां विद्याङ्गत्वं नित्यत्वे ह्यकरणेदोषः काम्यत्वे ऽसौ न स्यात् अतोनित्यकाम्ययोरभेदायोगात्प्रकृतं विरुद्धमित्येतदनूद्य परिहरति । यन्नित्यमिति ॥

मू० यन्नित्यं तन्न काम्यं तदपि न तदिति स्थापिते कर्मभेदेऽप्येकं विद्याश्रमाङ्गं भवति हि विनियुक्त्यन्तरेणोपपत्तेः॥ तत्रानुष्ठानतन्त्रं विदुषि तु घटते कर्तृकालाद्यभेदात्प्राजापत्यादिलोकार्थिनि च तदितरोऽनर्थरोधाय तद्वान्॥ ३८॥

हि—शब्दः सम्भवप्रसिद्धिपरः ।

ज्योतिष्टोमाग्निहोत्रादौ विनियोगपृथक्त्वतः ।
नित्यकाम्यस्वरूपत्वं दृष्टं तद्वदिहास्तु नः ॥
विध्यैक्येऽपि क्वचिद्दृष्टा काम्यनैमित्तिकात्मता ।
विधिभेदे तु किं न स्यादत्र कैमुतिकी गतिः ॥

एवं चिद्रूपत्वमपि क्वचिद्ग्राह्यम् । तर्हि विद्यार्थमाश्रमार्थे च द्विरनुष्ठानं प्रसज्यत इत्यत्राह । तत्रेति । तन्त्रम्—उभयार्थे सकृत्करणं, तच्चैकादशे स्थापितम् । नित्यस्य विद्याङ्गतयाऽपि काम्यत्वे तन्त्रमुदाहरति । प्राजापत्यादीति । उक्तव्यतिरिक्तेषु निष्फलतया नित्यकर्मनिवृत्तिप्रसङ्ग इत्यत्राह । तदितर इति ॥ ३८ ॥

इति नित्यकर्मणां विद्याङ्गत्वाश्रमाङ्गत्वादिः ॥

सर्वचेतनप्रवृत्तीनां यत्किंचित्प्रयोजनानन्वयान्नित्यादिविभागो न स्यादित्याशङ्क्य परिहरति । मन्दस्येति ।

मू० मन्दस्यापि प्रवृत्तिः किमपि फलमनुद्दिश्य कस्यापि न स्यात् नित्येऽनर्थापरोधप्रभृति फलमतः काम्यतैवेति चेन्न ॥ नित्येष्टोनर्थरोधस्तदितरदतथा किंच शिष्टो विधीनामाज्ञानुज्ञाविभागस्सुगम इह निरुक्त्यैव नैमित्तिकांशः ॥ ३९ ॥

प्रभृतिशब्देन पापेभ्योरक्षन्ताम् इत्यादिप्राप्तदुरितक्षयसङ्ग्रहः । अतः—कर्त्रभीष्टफलवत्त्वादित्यर्थः । काम्यतैव—नित्यनैमित्तिकयोरिति शेषः । सफलत्वाविशेषेऽपि नित्ये तावत्फलविशेषापेक्षया त्रिभागाभिप्रायमाह । नित्येष्ट इति । अनर्थपरिहारस्य सर्वेषां सर्वदाऽभीष्टत्वात्तदर्थे कर्मणि अकरणानर्हतया नित्यत्वेन विभागः । तदितरत् सुखम् अतथा सर्वदाऽभीष्टं न भवति सुखरहितायास्सुषुप्तेराकाङ्क्षणात्, अतस्सुखार्थे काम्यतोक्तिः । उक्तमेव विभागं मुखभेदेन द्रढयति । किं चेति । राजादिनयादीश्वराज्ञानुज्ञारूपविधिभेदाद्विधेयविभागस्सिद्ध इत्यर्थः ॥ ननु द्विविधं नैमित्तिकं, तत्र प्राय

श्चित्तमुपात्तानर्थहेतुनिरासार्थम् अन्यदप्यकरणनिमित्तानर्थपरिहाराय अतस्तयोरपि नित्यराशिप्रवेशप्रसङ्ग इत्यत्राह । सुगम इति ॥ ३९ ॥

इति नित्यकाम्यादिविभागः ॥

काऽत्र निरुक्तिः कीदृशश्च नैमित्तिकांश इत्यत्राह । कर्तव्यमिति ।

मू० कर्तव्यं यन्निमित्ते सति तदुभयधा पापशान्त्यर्थमेकं तत्स्यात्काम्येन तुल्यं परमकरणतो दोषकृन्नित्यतुल्यम् ॥ सत्यां कामश्रुतौ संवलितमपि भवेत्तद्बलादेतदेव त्यागे च प्रत्यवायस्त्वनधिकृतिमुखस्तत्रतत्रावसेयः ॥ ४० ॥

एकं प्रायश्चित्तरूपं तस्याकरणनिमित्तप्रत्यवायाभावात्काम्यतुल्यत्वम् । परं केवलनैमित्तिकं तस्याकरणे दोषान्नित्यतुल्यत्वं जातेष्टेर्नैमित्तिकत्वेऽपि पुत्रगतपूतत्वादिसाधनतया संवलिताधिकारत्वमुक्तं तदाह । सत्यामिति । नित्ये केवलनैमित्तिके चाकरणे दोषोऽधिकारभ्रंशादिरूपस्तत्तत्प्रकरणेषु ग्राह्य इत्याह । त्यागे चेति ॥ ४० ॥

इति नैमित्तिकावान्तरविभागः ॥

यस्तु मन्वादिभिरुक्तो विभागः इह वाऽमुत्र वा काम्यं प्रवृत्तं निष्कामस्य ज्ञानपूर्वं तु निवृत्तमिति स कथं घटते सर्वेषामपि धर्माणां यत्किञ्चित्फलकाममधिकृत्यैव विधेः । यद्यपि निराशीःकर्मकारिणां परमात्मप्रीतिरेवोद्देश्या तथाऽपि तत्कामत्वं सिद्धं, परप्रीतेरुद्देश्यत्वं च तस्याः स्वप्रीतिपर्यन्तत्वमभिसन्धायानृणामेव । अतस्तेषामपि स्वप्रीतिकामत्वं दुस्त्यजमित्याक्षेपमनूद्य प्रत्याचष्टे । निष्काममिति ।

मू० निष्कामं चेन्निवृत्तं तदिह न घटते मुक्ति-
कामाधिकारात्स्वप्रीतिस्पर्शहीना न च भव-
ति परप्रीतिरिष्टेति चेन्न। युक्ता यस्मान्निवृ-
त्तिर्बहुभयशबलात्तन्निवृत्तं निवृत्तं सूते यत्र
प्रवृत्तिस्त्वभिमतमहितं तत्प्रवृत्तं प्रवृत्त-
म् ॥ ४१ ॥

नात्र निष्कामशब्दः इच्छामात्रनिवृत्त्यर्थ इति निषेधाभिप्रायः। कुतस्तर्हि विभाग इत्यत्राह। युक्तेति। अनर्थाविनाभूतसुखकामनातोनिवृत्तं कर्म निष्कामं निवृत्तमिति चाहुः। अनेवंविधं तु काम्यं प्रवृत्तमिति च इति भावः ॥ ४१ ॥

इति प्रवृत्तिनिवृत्तिविभागः ॥

यदि यज्ञादिभिरेव विद्योपकारः तर्ह्याश्रमान्तराणां सा न स्यात्। अथ यथार्हं स्ववर्णादिधर्मैः तदा शूद्रस्यापि स्यात् ततश्च काण्डद्वयोक्तापशूद्रनयविरोधः। तत एवानधिकारे मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः। स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम्। इति शर*ण्योक्तिविरोध इत्यत्राह। पुम्भिरिति॥

मू० पुम्भिः सिद्धाधिकारैः क्रतव इव निराकाङ्क्ष-
भावं भजन्त्यः प्रोक्तास्त्रैवर्णिकार्हाश्श्रुतिन-
यवशतो यद्यपि ब्रह्मविद्याः ॥ अस्तेयाद्यैः
प्रपत्त्या परिचरणमुखैरप्यधीतैः स्वजाते-
स्सर्वेऽपि प्रापुयुस्तां परगतिमिति तु ब्राह्म-
गीतादिसिद्धम् ॥ ४२ ॥

* शरण्यो भगवान्कृष्णः

सिद्धाधिकारैः अधीतवेदतयाऽनुष्ठानोपयुक्तज्ञानवद्भिरपेक्षितमन्त्रविद्भिश्चेत्यर्थः । श्रुतिनयवशतः—अध्ययनविधिसिद्धन्यायसामर्थ्यात्, तथा हि अग्निविद्यासापेक्षाः क्रतुविधयो यथाधीतवेदैरग्न्याधानार्हैर्निराकाङ्क्षाः स्वसिद्धौ नान्येष्वन्यतोऽधिकारं प्रयुञ्जते एवं विद्याविधयोऽपि शुगस्य इत्यधिकरणे यद्यपि प्रोक्ताः तथाऽपि शरणं त्वां प्रपन्ना ये ध्यानयोगविवर्जिताः । तेऽपि मृत्युमतिक्रम्य यान्ति तद्वैष्णवं पदम् । इति ब्राह्मवचनात् । स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः । इति चातुर्वर्ण्यविषयभगवदुक्त्या च शूद्रस्यापि शास्त्रसिद्धैः फलसङ्गत्यागवद्भिर्निवृत्तिधर्मैर्योगो न विरुद्धः । स च मुक्तिपर्यन्त एव स्यादिति भावः ॥ ४२ ॥

इति त्रैवर्णिकाधिकारसर्वाधिकारविभागः ॥

अद्वैतिनः केचिदाहुः तत्त्वमस्याद्युपदेशलब्धब्रह्मात्मभावावबोधस्य तदेकध्यानसाध्यादृष्टजन्यसाक्षात्कारेण विश्वभ्रमबाध इति तदनूद्य दूषयति । ध्यानेति ॥

सू॰ ध्यानादृष्टेन साक्षात्कृतिरुपजनिता बाधते चेत्प्रपञ्चं तत्तुल्यार्थैव शाब्दी प्रमितिरपि न किं बाधते पूर्वमेव ॥ ज्वालैक्यादौ परोक्षादपि हि निजगदुर्बाधमध्यक्षबुद्धेर्नाप्यत्राादृष्टरूपामहितविमथनीं भक्तिमङ्गीकरोषि ॥ ४३ ॥

अयं भावः—ध्यानजनकं वाक्यजन्यं ज्ञानं ध्यानादृष्टजन्यं च समानविषयकं न वा आद्ये किमन्येन वाक्यजन्यज्ञानादेव मुक्तिस्स्यात्, उत्तरत्र ब्रह्मणि सविशेषत्वं स्यात् वेद्याकारवैषम्यात् । आका-

रभेदः कल्पित इति चेन्न । तयोर्भ्रान्तित्वप्रसङ्गात् तत्त्वज्ञानान्मोक्ष इति चाङ्गीकारात्, अन्यथा चरम्यन्तवैयर्थ्यात् । अस्तु प्रागेव बाधः बाधितानुवृत्तिपरिहाराय तु साक्षात्कार इति चेन्न । साक्षात्क्रियमाणेऽपि तत्त्वे दोषानुवृत्तौ बाधितानुवृत्तेर्लोके बहुलमुपलम्भात् । दोषनिवृत्तौ तु बाधितानुवृत्तेरेवाभावात् सदेहानां च यावज्जीवं सा दुर्वारा देहनिवृत्तौ चक्रभ्रमन्यायात्स्वयमेव निवर्त्स्यतीति किं तद्बाधकेन । ननु प्रत्यक्षभ्रमस्य परोक्षं कथं बाधकमित्यत्राह । ज्वालैक्यादाविति । अनुमानतोऽप्यत्र ज्वालैक्यप्रत्यक्षं बाध्यते देहात्मभ्रमस्त्वानुमानतश्शास्त्रतो वा तथेहापि स्यात्, अन्यथा कथमद्वैतवाक्यार्थविस्रम्भपूर्वकध्यानादिसिद्धिः, ध्याननियोगजन्यज्ञानस्य गरुडादिदृष्टिन्यायादनिष्टनिवर्तकत्वमिति चेत् तत्राह । नापीति । विरुद्धविषयावगाहनशक्त्या बाधितस्य हि मिथ्यात्वसिद्धिः विषहरणधीन्याये तु विषादिवदेव निवर्त्यसत्यत्वप्रसङ्गादिति भावः ॥ ४२ ॥

इति ध्याननियोगवादभङ्गः ॥

अन्ये तु वर्णयन्ति नित्यशुद्धमप्यद्वितीयं ब्रह्म गगनमिव गन्धर्वनगरवत्तया सप्रपञ्चतया प्रतीयमानं निष्प्रपञ्चीकुर्यादिति विधिविषयानुष्ठानजनितनियोगविशेषेण विश्वाविद्यानिवृत्तिरिति तान्प्रत्याचष्टे । निर्दिष्ट इति ॥

मू० निर्दिष्टो निष्प्रपञ्चीकरणविधिरसौ गौ*डमीमांसकाद्यैर्दृष्टो न क्वापि दुर्निर्वहमपि करणाद्यत्र साध्याविशेषात् ॥ मुक्तिर्नैयोगिकी चेज्जगदपि न मृषा नश्वरी सापि ते स्यात्

* गौडमीमांसकाः—मैथिलाः ।

ध्वंसात्मत्वेऽपि तस्या न च वदसि भिदां ब्रह्मणस्तच्च नित्यम् ॥ ४४ ॥

अनधीतमधीतविरुद्धं च कल्पयन्तीति व्यक्त्यै गौडमीमांसकाप्तत्वोक्तिः क्वापि श्रुतिषु स्मृतिषु चेत्यर्थः, । न क्वापि दृष्ट इत्ययुक्तं न दृष्टेर्द्रष्टारं पश्येः इत्यादिदर्शनादिति चेत् न ह्यत्र वाक्ये द्रष्ट्रादिप्रध्वंसं कुर्वीतेति विधीयते किन्तु जीवस्यौपाधिकं रूपं नानुसन्धत्स्वेति वा करणायत्तज्ञानं जीवं परत्वेनापश्यन् स्वतस्सर्वज्ञं पश्येरिति वा प्रकारान्तरेण वा नेतुं शक्यत्वात्, निषेधश्रुतयश्चान्यपराः न च विधिप्रसङ्गस्तत्य: । दूषणान्तरमाह । दुर्निर्वहमिति । नियोगस्य हि करणेतिकर्तव्यतादि वक्तव्यं यदि प्रपञ्चध्वंसेन नियोगं भावयेदिति करणक्लृप्तिः तदा नियोगसाध्यसाधनयोरविशेष इत्यन्योन्याश्रयः । अथ नियोगमजागलस्तनीकृत्य निष्प्रपञ्चभावनयैव निष्प्रपञ्चीकरणं तदा आत्माश्रयः । इतिकर्तव्यता च करणानुपपत्त्यैव निरस्ता प्रयोक्ता चासौ द्रष्टा न स्वावसानाय नियोगकृत्यामुत्पादयेत् तदा च शास्त्रफलं प्रयोक्तरीति न स्यात् । अथ शुद्धस्य ब्रह्मणः फलं तन्न तस्य भ्रमाध्यासशून्यत्वाङ्गीकारात् तदर्थित्वाभावाच्छास्त्रार्थप्रयोक्तृत्वायोगाच्च ; अस्मिन्पक्षेऽपसिद्धान्तापत्तिमाह । मुक्तिरिति । यस्याद्दृष्टसाध्यो नाशस्तस्य ज्ञानबाध्यत्वाभावात् । प्रपञ्चमृषात्वं न स्यात् नियोगसाध्यं च सर्वं काल्पनिकत्वादनित्यमिति मन्यसे अतो मुक्तिरपि नश्वरीति बन्धोन्मज्जनप्रसङ्गः अभावाभावस्य भावत्वात् । ध्वंसस्य च ध्वंसप्रवाहापत्तिः । न च ते तत्क्लृप्तौ हेतुरस्ति । ननु ध्वंसो ह्युत्तरावधिरहितः प्रायश्चित्तनियोगात्पापध्वंसवत् मुक्तेरनश्वरत्वं स्यादित्यत्राह । ध्वंसात्मत्वेऽपीति । ध्वंसरूपा मुक्तिर्ब्रह्मणोऽन्याऽनन्या वा नाद्यः कार्यस्य सर्वस्य घटतद्ध्वंसादेः

स्वप्नप्रपञ्चतद्ध्वंसादेरिव बाध्यत्वाभ्युपगमात् । अबाधे च मुक्तावपि भेदसिद्धिप्रसङ्गात् भावाद्वैतपक्षश्च न युक्तः क्वचिन्निर्बाधितभेदसद्भावेऽन्यत्रापि तदविरोधात् तत्र चोक्तानां बाधकानां त्वदिष्टेऽपि संचारयितुं शक्यत्वात्, न द्वितीयः ध्वंसस्य साध्यत्वात् ब्रह्मणस्तु नित्यत्वात् तयोस्तादात्म्यायोगात् तदिदमभिप्रेत्याह । तच्च नित्यमिति ॥ ४४ ॥ इति निष्प्रपञ्चीकरणनियोगवादभङ्गः ॥

यस्त्वाह किं ध्याननियोगेन नियोगान्तरेण वा तत्त्वावेदकवाक्यजन्यज्ञानादेव कल्पितबाधोपपत्तिः दृष्टश्च दृढप्रतीतस्यापि वाक्यतो बाधः । ज्ञानमात्रादेव च मुक्तिश्श्रूयते भवति वाक्यादद्वैतधीः अतस्सैव द्वैतनिवर्तिकेति सोऽयमनुयोक्तव्यः किं श्रवणजन्यज्ञानमात्रात्प्रतिष्ठापितान्मुक्तिः उताद्वैतज्ञानजनितविकल्पवैमुख्यस्य तेनैव वाक्येन जनिताद्विशदज्ञानादिति तत्राद्यं निरस्यति । वाक्यार्थेति ॥

मू० वाक्यार्थज्ञानमात्रादमृतमिति वदन्मुच्यते किं श्रुतेऽस्मिन् बाढं चेन्मानबाधस्स यदनुभवति प्रागिवाद्यापि दुःखम् । ध्यानादीनां विधानं भवति च वितथं तन्न युक्तं न चेष्टं ध्यानाद्यङ्गाढ्यशब्दोदितचरममतेर्नाधिकं वः प्रकाश्यम् ॥ ४५ ॥

बाधकज्ञाने सति बाधः कथं न स्यादिति शङ्कते । बाढं चेदिति । अत्र प्रमाणत्रयविरोधमाह । मानबाध इति । स्वात्मनि प्रत्यक्षेण स्वस्मिन् परत्र अनुमानागमाभ्यां ब्रह्मविदोऽप्यमुक्ताश्चिरजीविनः श्रुतिस्मृतिसिद्धाः बुद्धे क्षेमप्रापणं तच्छास्त्रैर्विप्रतिषिद्धं बुद्धे

चेत् क्षेमप्रापणमिहैव न दुःखमुपलभेत इत्यापस्तम्बोक्तं प्रसङ्गमभिप्रेत्याह । स इति । प्रसङ्गान्तरमाह । ध्यानादीनामिति । बहुवचनम् । उपासनात्मकत्वदर्शनरूपत्वादिविशेषणभेदात् । अत्र वेदोदितत्वान्न वैतथ्यं मोक्षार्थविद्यानां नान्यार्थत्वमित्यभिप्रायेणाह । तन्न युक्तमिति । अपसिद्धान्तत्वमप्याह । न चेष्टमिति । ध्यानस्य हि भेदवासनानिरासार्थत्वं हि ब्रूथ । द्वितीयं दूषयति । ध्यानेति । अयं भावः पश्चात्तनं वाक्यार्थज्ञानं पूर्वाविशिष्टविषयम् । अधिकविषयं वा उभयत्र प्रागेव दूषणमुक्तमिति ॥ ४५ ॥

इति वाक्यार्थज्ञानस्य मोक्षोपायत्वभङ्गः ॥

प्रत्यक्षभ्रमस्य प्रत्यक्ष एव बाधक इति निर्बन्धो नेत्युक्तं तत्सद्भावेऽपि शब्दः प्रत्यक्षरूपबाधकधीजनक इति न शक्यं कल्पयितुम् अन्यथा क्वचिदनुमानेऽपि तत्क्लृप्तिः । न च कोद्रवबीजस्य स्वाभीष्टफलमाङ्कुरजनकत्वक्लृप्त्या तत्सिद्धिः । ननु दग्धवेत्रबीजस्य रम्भाङ्कुरारम्भकत्वं दृश्यते यदि दृश्यते कस्तन्निषेधेत् अथ नेदं निदर्शनं वाक्येष्वपि दशमस्त्वमसि संवित् स्वप्रकाशा इत्यादिषु प्रत्यक्षधीजनकत्वं दृष्टमिति चेत् कथमेतत् । दशमोऽहमस्मि मम संवित् स्वप्रकाशा इति श्रोतुरपरोक्षा धीरिति चेन्न सेयं वाक्यश्रवणानन्तरजन्या तन्मूलस्वयंपरीक्षणजन्या वा आद्ये धर्मिप्रत्यक्षत्वेऽपि दशमत्वविशिष्टवेषो न प्रत्यक्षः अन्यथा धर्मवांस्त्वमसीति केनचिद्दैवज्ञेनोक्ते तादृशोऽहमिति बुद्धेरप्यापरोक्ष्यं स्यात् धर्मस्यातीन्द्रियत्वान्न तथेति चेन्न अयं पर्वतः परभागे वह्निमानित्याद्युपदेशे प्रसङ्गात् । स्वतोऽपरोक्षार्थविषयतयाऽत्र तादृशो विशेष इति चेन्न । नियामकाभावात् दशमत्वादिविशिष्टाकारेण स्वतोऽपरोक्षत्वासिद्धेश्च । तदिह वाक्यतो दशमत्वादिबोधे त्वमर्थस्य स्फुट-

प्रत्यक्षगृह्यमाणतया केषांचिद्दशमत्वादिविशिष्टाकारग्रहेऽपि प्रत्यक्षत्वभ्रान्तिमात्रमित्याह । उद्देश्यांशमिति ।

मू० उद्देश्यांशं त्वमाद्यं स्फुटमनुभवतां सम्यगध्यक्षवित्त्या प्रत्यक्षत्वभ्रमोऽयं त्वमसि दशम इत्यादिवाक्यार्थबोधे ॥ शब्दात्प्रत्यक्षबोधे प्रसजति शिथिला तद्व्यवस्था ततोऽर्थे साक्षात्कारं न शब्दो जनयति विमतस्तिध्यवच्छब्दभावात् ॥ ४६ ॥

एतेन विगीतं वाक्यं स्वार्थपरोक्षधीजनकं स्वतोऽपरोक्षार्थविषयत्वात् दशमस्त्वमसीत्यादिवाक्यवदित्यनुमानमपि निरस्तं दृष्टान्ताद्ययोगात् । ननु घटं पश्यतोऽयं घट इति वाक्यप्रयोगेऽपि प्रत्यक्षधीर्जायत इति चेन्न । युगपत्प्रमाणद्वयेन प्रमितिद्वयोत्पत्त्ययोगात् सम्भूयैकप्रमाणीभावस्यातिप्रसङ्गित्वादनभ्युपगमाच्च । क्रमे तु प्रत्यक्षज्ञानसमनन्तरभाविनि शाब्दज्ञाने प्रत्यक्षशिरस्के माषराशिप्रविष्टमषी[१]न्यायेन तज्जातीयताभ्रमः दशमस्त्वमित्यादावपि कदाचिदेवमेव । प्रतिकूलतर्कमप्याह । शब्दादिति । ज्ञानकरणानां हि परोक्षधीजनकत्वव्यवस्था शब्दप्रमाणस्याप्यन्यत्र व्याप्राङ्गीकृता तस्याः शैथिल्यं स्यात् । इष्टप्रसङ्गोऽयमिति चेन्न । तुल्यन्यायतयाऽन्यत्रापि तत्तन्नियतिविरुद्धकार्यानुमानप्रसङ्गस्यानिष्टत्वात् । विपक्षे बाधकाद्विशेष इति चेन्न शब्दजन्यप्रत्यक्षाभावेऽपि विरोधप्रसङ्गाभावात् तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान्सनत्कुमारः इति उपदेशादपरोक्षधीः श्रूयत इति चेन्न । दृशेः प्रत्यक्षविशेषरूढत्वात् अनु-

१ मसीन्यायेनेति गौडपाठः ।

सत्रे समानकल्पानां सहाधिकारः । अधि० १ ।

सन्निपाते वैगुण्यात्प्रकृतिवत्तुल्यकल्पा यजेरन् ॥ १ ॥

वासिष्ठराजन्यानां नराशंसो द्वितीयः अन्येषां तनूनपाद् द्वितीयः प्रकृतौ विहितं सत्रे दीक्षणीयादौ अतिदेशेनाधिकारिभेदेनोभयं प्राप्तं सत्रे भिन्नकल्पानां मिलित्वा ऽधिकारे कल्पद्वयानुष्ठानासंभवात् तुल्यकल्पानामेवाधिकार इति सिद्धान्तेनोपक्रमते । सन्निपातइति । सन्निपाते वासिष्ठकाश्यपानामेककृतौ मेलने यथा प्रकृतौ वासिष्ठेन तनूनपादनुष्ठाने वैगुण्यं तथा ऽत्रापि स्यात् । अतः तुल्यकल्पानामेव सत्रे ऽधिकारः ॥ १ ॥

वचनाद्वा शिरोवत्स्यात् ॥ २ ॥

पूर्वपक्षमाह । वचनादिति । ऋद्धिकामाः सत्रमासीरन्निति वचनमविशेषाद् भिन्नकल्पानामधिकारसिद्धौ शिरोवत् । यथा चयनातिरिक्ते शवस्पर्शस्य दोषजनकत्वे ऽपि पुरुषशीर्षमुपदधातीति वचनात्तदपवादः, तथा प्रकृतौ वासिष्ठानां तनूनपाद्वैगुण्यजनकश्चेदपि सत्रे नेति भावः ॥ २ ॥

न वा ऽनारभ्य वादत्वात् ॥ ३ ॥

इदं दूषणं परिहरति । नेति । अनारभ्य अनधिकृत्य वादत्वात् पठितत्वात् । अयं भावः । यथा चयनमधिकृत्य शिर उपधानं विहितमेवं भिन्नकल्पानधिकृत्य सत्रमासीरन्निति स्याद्, अधिकारबलेन प्रकृतिवद् द्व्यङ्गता बाध्येत । अत्र त्वनारभ्य सत्रमासीरन्निति विहितं समानकल्पेषु चरितार्थमिति ॥ ३ ॥

स्याद्वा परार्थत्वादौदुम्बरीवत् ॥ ४ ॥

नराशंसतनूनपातोरुभयोरपि क्रत्वर्थत्वेन एकानुष्ठाने ऽपि क्रतुः सिद्धो भवति । यथौदुम्बरीमानमेकस्यापि क्रतूपकारं जनयति तथेत्यभिप्रायवाञ् शङ्कते । स्यादिति । स्याद्, भिन्नकल्पानां सत्रं स्यात् । परार्थत्वात् । क्रत्वर्थत्वात् । औदुम्बरीवत् । व्याख्यातम् ॥ ४ ॥

न तत्प्रधानत्वात् ॥ ५ ॥

वासिष्ठानां नराशंस इति वाक्ये षष्ठ्या वासिष्ठानां प्राधान्यश्रवणात् । सप्तदशारत्निर्वाजपेयस्य यूप इतिवद्, इत्यभिप्रायेण समाधत्ते । नेति । तस्य वासिष्ठादेः प्रधानत्वात् ॥ ५ ॥

औदुम्बर्याः परार्थत्वात्कपालवत् ॥ ६ ॥

औदुम्बरीदृष्टान्तं वारयति । औदुम्बर्या इति । परार्थत्वात् । क्रत्वर्थत्वात् । कपालवत् । यथा पुरोडाशार्थमपि कपालं तृतीयाश्रुत्या तुषोपवपनाङ्गम् । एवं यजमानस्य फलेनान्वितस्यापि तृतीयाश्रुत्या मानाङ्गत्वमिति येन केनापि कृतं चरितार्थमिति भावः ॥ ६ ॥

अन्येनापीति चेत् ॥ ७ ॥

एवं सति क्रत्वन्तरसंयुक्तयजमानेनापि मानं किं न स्यादित्याशङ्कते । अन्येनेति । अन्येन क्रत्वन्तरसंयुक्तेनापि ॥ ७ ॥

नैकत्वात्तस्य चानधिकाराच्छब्दस्य चाविभक्तत्वात् ॥ ८ ॥

परिहरति । नेति । नान्ययजमानेन मानमेकत्वात् । यजेतेत्याख्यातार्थान्वितयजमानस्यैकत्वात् । अन्ययजमानस्य अनधिकारात् । एतत्प्रयोगजन्यफलभोक्तृत्वाभावात् । शब्दस्य यजमानेन संमितौदुम्बरीति वाक्यगतयजमानशब्दस्य अविभक्तत्वात् । एतत्फलभोक्तृभिन्नप्रतिपादकत्वात् ॥ ८ ॥

सन्निपातात्तु निमित्तविघातादू बृहद्रथंतरवद्विभक्तशिष्टत्वाद्वसिष्ठनिर्वर्त्ये ॥ ९ ॥

भिन्नकल्पे प्रयोगे द्वयोः इच्छैव नियामिकेति युक्त्यन्तरेण कश्चिदाशङ्कते । सन्निपातादिति । भिन्नकल्पयोः सन्निपातात् । निमित्तस्य वसिष्टकर्तृकत्वनिमित्तनराशंसस्य काश्यपकर्तृकत्वनिमित्ततनूनपातश्च प्रत्येकं यो नियमः तस्य विघातः अभावः स्यात् । वसिष्ठनिर्वर्त्ये इदमुपलक्षणं काश्यपनिर्वर्त्ये च प्रयोगे ऽपि विभक्तशिष्टत्वात् । प्रत्येककर्तृ-

कत्वे निमित्ते एव विधानात् । यथा पृष्ठस्तोत्रे बृहत्सामनि शुक्रायता, रथंतरसाम्नि ऐन्द्रवायवायता, विकृतिविशेषे उभयं यत्र, तत्र निमित्तद्वयबाधः, इच्छैव नियामिका, तथा ऽत्रापि इच्छैव नियामिकेति भावः ॥ ९ ॥

अपि वा कृत्स्नसंयोगादविभागः प्रतीयेत स्वामित्वेनाभिसंबन्धस्तस्मात्तत्र विघातः स्यात् ॥ १० ॥

परिहरति । अपि वेति । कृत्स्नसंयोगात् । संपूर्णतनूनपाता संपूर्णनराशंसेन च संबन्धाद्वसिष्ठादीनामविभागः प्रतीयेत । निमित्तविभागो न प्रतीयेत । कुतः, स्वामित्वेनाभिसंबन्धात् । वसिष्ठमुद्दिश्य नराशंसविशिष्टं निखिलं कर्म फलसाधनत्वेन विधीयते । एवं काश्यपानुद्दिश्येति । भिन्नकल्पानामधिकारे उभयानुष्ठानं प्रसज्येत । तथा च प्रयाजे पञ्चत्वबाधः अतो भिन्नकल्पानां सत्रे नाधिकारः इति भावः ॥ १० ॥

साम्नोः कर्मवदेकदेशेन संयोगो गुणत्वेनाभिसंबन्धस्तस्मात्तत्र विघातः स्यात् ॥ ११ ॥

बृहद्रथंतरदृष्टान्तवैषम्यं परिहरति । साम्नोरिति । कर्मवद्या बृहद्रथंतरोभयसामकैकपृष्ठस्तोत्रविधानेन स्तोत्रात्मककर्मवद्या साम्नोः बृहद्रथंतरयोः एकदेशेन स्तोत्रैकदेशेन संयोगः एकं वैषम्यम् । बृहद्रथंतरयोः स्तोत्रं प्रति गुणत्वेनाङ्गत्वेनाभिसंबन्ध इति अपरं वैषम्यम् । तस्मात्तत्र तन्निमित्तविघातो युक्तः, इह तथा न ॥ ११ ॥

भिन्नकल्पयोरपि राज्ञः पुरोहितस्य च कुलालयज्ञे ऽधिकारः । अधि० ३ ।

वचनात्तु द्विसंयोगः तस्मादेकस्य पाणिवत् ॥ १२ ॥

एतेन राजपुरोहितौ सायुज्यकामौ यजेयातामित्यत्र राज्ञः पुरोहितौ इति समासेनैकराजपुरोहितद्वयस्यात्राधिकार इति तात्पर्यवानाह । वचनादिति । वचनात् । उक्तवचनादेव द्विसंयोगः । एकस्य राज्ञः पुरोहितद्वयसंयोगः । एतेन वचनेनैव एकस्य राज्ञः पुरोहितद्वयस्वीकारो ऽपि सिध्यतीति भावः । अन्यथा एतेनेत्युदाहृतवाक्यस्य गत्यन्तरविरहेणाप्रामा-

द्ययापत्तेरित्यभिमानः । एकस्य पाणिद्वयवद्, यथा वामहस्तस्य कर्मानर्हत्वे ऽपि अञ्जलिना जुहोतीति वचनात्कर्मयोग्यत्वं तथेति भावः ॥ १२ ॥

अर्थाभावात्तु नैवं स्यात् ॥ १३ ॥

इमं पक्षं दूषयति । अर्थेति । अर्थाभावात्तु नैवं, पुरोहितस्य प्रवरेण राजा प्रवृणीतइति प्रवरार्थं पुरोहित एकः अपेक्षितः द्वितीयस्य प्रयोजनाभावादिति भावः ॥ १३ ॥

अर्थानां च विभक्तत्वान्न तच्छ्रुतेन संबन्धः ॥ १४ ॥

उक्तमर्थं द्रढयति । अर्थानामिति । एतद्यागाधिकारिणोः ब्रह्मक्षत्रयोः संबन्धस्तवे अर्थानां संबन्धिद्वयवृत्तिगुणानां विभक्तत्वात् । श्रुतेन पुरोहितद्वयेन यागस्य न संबन्धः । राजपुरोहितौ सायुज्यकामौ यजेयातामित्युक्त्वा ब्राह्मणस्य तेजसा स्तुतिः क्षत्रियस्य वीर्येण स्तुतिः कृता । पुरोहितयोरधिकारे वीर्येण स्तुतिर्व्यर्था स्यादिति भावः ॥ १४ ॥

पाणेः प्रत्यङ्गभावादसंबन्धः प्रतीयेत ॥ १५ ॥

पाणिदृष्टान्तं परिहरति । पाणेरिति । पाणेः वामपाणेः स्वदक्षिणहस्तेनाञ्जलिकरणे प्रत्यङ्गभावात् । सहकारित्वात् । असंबन्धः अन्यदक्षिणहस्तासंबन्धः प्रतीयेत । अन्यदक्षहस्तेन स्वदक्षहस्तसंयोगे संहताञ्जलिर्न भवत्यतो ऽगत्या वामहस्तयोजनमिति भावः ॥ १५ ॥

सत्रे ब्राह्मणमात्रस्याधिकारः । अधि० ३ ।

सत्राणि सर्ववर्णानामविशेषात् ॥ १६ ॥

यएवं विद्वांसः सत्रमुपयन्तीति वाक्ये विशेषाश्रवणाज् ज्योतिष्टोमवत्सर्ववर्णानामधिकार इति पूर्वपक्षमाह । सत्राणीति । स्पष्टो ऽर्थः ॥ १६ ॥

लिङ्गदर्शनाच्च ॥ १७ ॥

सर्ववर्णानामधिकार इत्यत्र लिङ्गमस्तीत्याह । लिङ्गेति । द्वादशाहे ब्रह्मसामन्येवं श्रूयते । बार्हद्गिरं ब्राह्मणस्य पार्थुरश्मं राजन्यस्य रायोवाजीयं वैश्यस्येति गुणभेदश्रवणात्त्रयाणामधिकारः ॥ १७ ॥

ब्राह्मणानां वेतरयोरार्त्विज्याभावात् ॥ १८ ॥

सिद्धान्तमाह । ब्राह्मणानामिति । आर्त्विज्याभावात् । ऋत्विजां यजमानत्वश्रवणादिति भावः ॥ १८ ॥

वचनादिति चेत् ॥ १९ ॥

ये यजमानास्त ऋत्विज इति क्षत्रियादिषु यजमानेषु आर्त्विज्यं वचनात्प्राप्तमित्याशङ्कते । वचनादिति ॥ १९ ॥

न, स्वामित्वं हि विधीयते ॥ २० ॥

ये यजमानास्त ऋत्विज इति नान्वयः, किं तु य ऋत्विजः ते यजमाना इति । पूर्वयजमाने आर्त्विज्यस्याङ्गत्वे अदृष्टकल्पनापत्तेरित्यभिप्रायवान् सिद्धान्तमाह । नेति ॥ २० ॥

गार्हपते वा स्यातामविप्रतिषेधात् ॥ २१ ॥

सत्रे गृहपतिरिति व्यवह्रियमाणो यः स सर्ववर्णो स्तु, तत्रर्त्विक्कार्याभावादित्यभिप्रायेण शङ्कते । गार्हपतइति । गृहपतिसंबन्धिकर्मणि त्रैवर्णिकाधिकारः स्यात् । अविप्रतिषेधात् । अविरोधात् ॥ २१ ॥

न वा कल्पविरोधात् ॥ २२ ॥

राजन्यस्य गृहपतित्वे तस्य चमसो न्यग्रोधरसस्य अन्येषां सोमचमस इति वैरूप्यापत्तेर्नेति समाधत्ते । नेति । कल्पः उक्तचमसवैरूप्यं तेन विरोधात् ॥ २२ ॥

स्वामित्वादितरेषामहीने लिङ्गदर्शनम् ॥ २३ ॥

द्वादशाहः अहीनात्मकः सत्ररूपश्च । पूर्वोक्तलिङ्गस्य आर्त्विज्यविरोधादहीने चारितार्थ्यं तत्र यजमाने ऋत्विक्त्वविध्यभावादित्याह । स्वामित्वादिति । सत्रे ऋत्विजां स्वामित्वात् ॥ २३ ॥

सत्रे विश्वामित्रतत्समानकल्पानामधिकारः । अधि० ४ ।

वासिष्ठानां वा ब्रह्मत्वनियमात् ॥ २४ ॥

ब्राह्मणानां सत्रे अधिकारे ऽपि न सर्वेषां, वासिष्ठो ब्रह्मा भव-

तीति वासिष्ठस्य ब्रह्मत्वे समानकल्पत्वोपपत्तये वासिष्ठानामधिकार इति पूर्वपक्षमाह । वासिष्ठानामिति । व्याख्यातकल्पम् ॥ २४ ॥

सर्वेषां वा प्रतिप्रसवात् ॥ २५ ॥

यः स्तोमभागानधीते स वासिष्ठ इति शब्दार्थविवरणात्सर्वेषां तदध्ययनसत्त्वात् सर्वेषामधिकार इति पक्षान्तरमाह । सर्वेषामिति । प्रतिप्रसवात् । वासिष्ठशब्दविवरणात् ॥ २५ ॥

वैश्वामित्रस्य हौत्रनियमाद् भृगुशुनकवसिष्ठानामनधिकारः ॥ २६ ॥

विश्वामित्रो होता भवतीति वचनाद् विश्वामित्रो नियतः स एव ऋत्विक्स्तोमभागान्पठति । तेन वसिष्ठादीनां भिन्नकल्पत्वात्तेषां नाधिकार इति सिद्धान्तमाह । वैश्वामित्रस्येति । व्याख्यातम् ॥ २६ ॥

सत्रे आहिताग्नेरेवाधिकारः । अधि० ५ ।

विहारस्य प्रभुत्वादनग्नीनामपि स्यात् ॥ २७ ॥

सत्रे साग्निकानामनग्निकानां मिलित्वा ऽधिकारो ऽस्ति न वेति संदेहे पूर्वपक्षमाह । विहारस्येति । विहारस्य एकाहवनीयस्य प्रभुत्वादनग्निकक्रतूपकारसमर्थत्वात् । शेषं स्पष्टम् ॥ २७ ॥

सारस्वते च दर्शनात् ॥ २८ ॥

सारस्वते तन्नामकसत्रे दर्शनात् स्पष्टं श्रवणात् । परार्थैर्वा एते स्वर्गं लोकं यन्ति ये ऽनाहिताग्नयः सत्रमासतइति ॥ २८ ॥

प्रायश्चित्तविधानाच्च ॥ २९ ॥

यस्याहिताग्नेरन्यैरग्निभिरग्नयः संसृज्यन्ते अग्नये विविचये ऽष्टाकपालं निर्वपेदित्यन्याग्निसंसर्गे प्रायश्चित्तश्रवणादेक एवाहवनीय इत्याह । प्रायश्चित्तेति ॥ २९ ॥

साग्नीनां वेष्टिपूर्वत्वात् ॥ ३० ॥

सिद्धान्तमाह । साग्नीति । साग्नीनामधिकारः । दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेति इष्टिपूर्वत्वनियमात् । सोमस्येष्टिपूर्वत्वे नियते तद्विकृतेरप्यावश्यकत्वादनाहिताग्नेः तदसंभवादिति भावः ॥ ३० ॥

स्वार्थेन च प्रयुक्तत्वात् ॥ ३१ ॥

आग्नीनादधीतेत्यात्मनेपदेनात्मार्थत्वज्ञापनादित्याह । स्वार्थेति । स्वार्थेन च स्वफलेन संबद्धत्वात्स्वाहवनीयस्य ॥ ३१ ॥

सन्निवापं च दर्शयति ॥ ३२ ॥

सन्निवापं सर्वेषामग्नीनां मेलनं दर्शयति साग्निकानामेव सत्रमिति सावित्राणि होष्यन्तः सन्निवपेरन्निति वाक्यम् ॥ ३२ ॥

सत्रे जुह्वादीनां सर्वसाधारणयम् । अधि॰ ६ ।

जुह्वादीनामप्रयुक्तत्वात्संदेहे याथाकामी प्रतीयते ॥ ३३ ॥

सत्रे जुह्वादिपात्राणि सप्तदशानां मध्ये यस्य कस्य चिद्गृह्याणि उत नवीनानीति संशये पूर्वपक्षमाह । जुह्वादीति । संदेहे उक्तरीत्या संदेहे जुह्वादीनामप्रयुक्तत्वात् पात्रग्रहणवेलायां स्वप्रयोगस्यैवेत्यनिर्दिष्टत्वात् । याथाकामी इच्छैव नियामिकेति भावः ॥ ३३ ॥

अपि वा ऽन्यानि पात्राणि साधारणानि कुर्वीरन्विप्रतिषेधाच्छास्त्रकृतत्वात् ॥ ३४ ॥

सिद्धान्तमाह । अपि वेति । अन्यानि नवीनानि साधारणानि सर्वसाधारणानि कार्याणि। कस्य चिद्गृहणे तस्य मध्ये मरणे तच्छरीरेण सह तदीयपात्रदाहे अन्यपात्राभावेन विप्रतिषेधाद् अनुष्ठानप्रतिबन्धाच्चवीनस्य करणस्य शास्त्रकृतत्वाच् शास्त्रतात्पर्यविषयत्वात् ॥ ३४ ॥

प्रायश्चित्तमापदि स्यात् ॥ ३५ ॥

पूर्वाधिकरणे प्रायश्चित्तमग्निसंसर्गे श्रुतम् । तल्लिङ्गमुक्तम् । तस्य चारितार्थ्यमाह । प्रायश्चित्तमापदीति । प्राणसंकटे संसर्गो ऽग्न्योरुक्तः । आपन्निवृत्तौ अग्नीन्विभज्य प्रायश्चित्तं कुर्युरिति भावः ॥ ३५ ॥

विकृतिसप्तदशसामिधेनीषु वर्णत्रयाधिकारः । अधि॰ ७ ।

पुरुषकल्पेन विकृतौ कर्तृनियमः स्याद्यज्ञस्य तद्गुणत्वादभावादितरान्प्रत्येकस्मिन्नधिकारः स्यात् ॥ ३६ ॥

विकृतिषु अध्वरकल्पायणादिषु वैश्य एवाधिकार्युत त्रैवर्णिक इति संशये पूर्वपक्षमाह । पुरुषेति । सप्तदशानुब्रूयाद्वैश्यस्येति वाक्येन साप्तदश्यसामान्यमुद्दिश्य वैश्यकर्तृकत्वनियमविधानात् । विकृतौ अध्वरकल्पादौ पुरुषकल्पेन पुरुषविशेषकर्तृकत्वेनाम्नातसाप्तदश्यकत्वेन कर्तृनियमः वैश्यरूपकर्तृनियमः स्यात् । यज्ञस्याध्वरकल्पादेः तद्गुणत्वात् । तत्साप्तदश्यं गुणो यस्य तत्त्वात् । इतरान्प्रति ब्राह्मणादीन्प्रति अभावात् साप्तदश्याभावात् । एकस्मिन्वैश्ये अधिकारः स्यात् । अयं भावः । सप्तदशानुब्रूयाद्वैश्यस्येति साप्तदश्यसामान्यमनूद्य वैश्यकर्तृकत्वं नियम्यते । अध्वरकल्यादिसमीपपठितेन सप्तदशानुब्रूयादिति वाक्येन साप्तदश्येन प्राप्तेन सह वैश्यकर्तृकत्वमपि प्राप्तमेवेति ॥ ३६ ॥

लिङ्गाच्चेज्याविशेषवत् ॥ ३७ ॥

सप्तदशो वै वैश्य इतीत्यर्थवादोऽपि साप्तदश्यं ब्राह्मणक्षत्रियासंबद्धमित्यर्थं द्रढयतीत्याह । लिङ्गेति । लिङ्गात् । उक्तार्थवादात् । साप्तदश्यं वैश्यकर्तृकत्वमात्रसंबन्धि यथेज्याविशेषो वैश्यस्तोमो वैश्यमात्रकर्तृकस्तथा । यस्मिन्क्रतौ साप्तदश्यं स वैश्यकर्तृक इति व्याप्तिः सिध्यतीति भावः ॥ ३७ ॥

न वा संयोगपृथक्त्वाद्गुणस्येज्याप्रधानत्वादसंयुक्ता हि चोदना ॥ ३८ ॥

सिद्धान्तमाह । न वेति । न अध्वरकल्पादौ वैश्यकर्तृकत्वनियमः । संयोगयोः वाक्यद्वयसंयोगयोः पृथक्त्वात् । विजातीयत्वात् । वैजात्यमुपपादयति । अध्वरकल्पादिसन्निधौ पठितेन सप्तदशानुब्रूयाद्वैश्यस्येति वाक्येन विहितस्य गुणस्य साप्तदश्यस्येज्याप्रधानत्वाद् यागप्रधानत्वात् । यत्र प्रधानभूतो यागः तत्र गुणस्यावश्यकत्वात् । इज्याप्रधानत्वं कथम् अत आह । असंयुक्तेति । हि यतः वैश्यपदेन असंयुक्ता रहिता चोदना विधिवाक्यम् । अयं भावः । सप्तदशानुब्रूयाद्वैश्यस्येति वाक्ये साप्तदश्यस्यानुवादः वाक्यान्तरेण प्राप्तत्वात् । प्रकरणहान्यापत्तेश्च । अतः नित्यत्वेन प्रकृतावेव पाञ्चदश्यप्राप्तौ वैश्यकर्तृकत्वे निमित्ते साप्तदश्यं नैमित्तिकम् ।

च चरणैः सहेति जातिवाचित्वाज्जातेश्चेति पुंवद्भावनिषेधः कस्माच्च भवति, उच्यते। औपसङ्ख्यानिकस्यायं न भवत्यनित्यत्वात्, अत एव हस्तिनीनां समूहो हास्तिकमित्यत्र लिङ्गविशिष्टपरिभाषया ऽचित्तहस्तीति ठकि जातित्वे ऽपि पुंवत्त्वं भवति, अनित्यत्वे च ज्ञापकं प्रवाहणस्य ढे इति प्रवाहणशब्दे पूर्वपदवृद्धिं विकल्प्योत्तरस्य स्वतःसवृद्धिकस्यापि नित्यं तद्वचनं, तद्धि प्रवाहणेयीभार्य इत्यत्र पूर्वपदस्य वृद्ध्यभावेऽपि तस्योत्तरपदे वृद्धिनिमित्तत्वेन वृद्धिनिमित्तस्येति पुंवत्त्वनिषेधार्थं, नित्ये च जातिलक्षणे निषेधे प्रवाहणेयीशब्दस्य गोत्रवाचित्वेन जातित्वादनेनैव पुंवत्त्वनिषेधसिद्धेः किं तदर्थेनोत्तरपदवृद्धिविधानेन, एवं तर्हि पुंवद्भावस्येडविडाद्यर्थत्वात्संनियोगशिष्टपरिभाषाया अनित्यत्वे प्रमाणाभावात् कथमैनेयः श्यैनेय इति सिद्धान्तः, तत्रैवं वक्तव्यम्, भाष्यकारेणान्यथा सिद्धमैडविडयतीत्यनुदाहृत्यैतयति श्येतयतीत्यादेरुदाहरणादनित्यत्वमेव साध्यतइति पुंवद्भावाभावः । विन्मतोर्लुगिति हलादेर्लघोरित्यस्य लोपः, ऋकारस्येष्ठेमेयस्सु विधीयमानो रभावो णावपि भवति, अत्र परिगण्यते

'पृथुं मृदुं भृशं चैव कृशं च दृढमेव च ।
परिपूर्वं वृढं चैव षडेतान् रविधौ स्मरेत्' ॥

इति । पृथुमाचष्टे प्रथयति । अत्र केचिदाहुः । चङि पृथु इ अत् इति स्थिते टिलोपश्च प्राप्नोति वृद्धिश्च, तत्र पूर्वं टिलोपे वृद्धिर्न प्राप्नोतीत्यनित्या, वृद्धौ तु टिलोपः शब्दान्तरप्राप्त्याऽनित्यः, उभयोरनित्ययोः परत्वात् वृद्धावावादेशात्पूर्वं टिलोपे ऽङ्गस्यानग्लोपित्वात्सन्वल्लघुनीत्वे अपिप्रथदिति भवति, अत एव हलिकल्योरदन्तत्वनिपातनं सन्वद्भावप्रतिषेधार्थमित्युक्तं, यदि वृद्धेः पूर्वं टिलोपः स्यात्तर्हि हलिकल्योरिकारलोपेनैवाग्लोपित्वसिद्धेः किमत्वनिपातनेनेति णौ चङीत्यत्र, कथादौ ननु नाग्लोपीत्यत्राल्लोपइति वक्तव्ये अग्लोपिनामित्यु[१]दाहरणसामर्थ्यात्पृथादेर्णौ वृद्धौ पूर्वं टिलोपेन भवितव्यमित्यग्लोपित्वेन सन्वदित्वाभावा-

१ अग्लोपीति प्रत्याहारग्रहणसामर्थ्यादिति तु युक्तः पाठः ।

दपपटदित्यादि भवतीत्युक्तं, तन्मतेऽत्राप्यपप्रथदिति भवितव्यम्, तथा ह्यवर्णान्तेष्ववर्णोपधेषु च वृद्धावप्यवर्णो लुप्यते, अग्लोपिग्रहणवदल्लोपिग्रहणमपि यत्र केवलस्यावर्णस्य लोपस्तत्र तस्य स्थानिवत्त्वेनोपधात्वविघातादेव ह्रस्वाप्रसङ्गादवर्णानवर्णसमुदाये लोपार्थं विज्ञास्यते, इवर्णोवर्णान्तयोस्तु पूर्वं वृद्धावग्लोपित्वासंभवः। ननु स्वामिनमाख्यत् असस्वामत्, गोमन्तमाख्यत् अजुगोमत्, प्रादुराख्यत् अपप्रादत्, यादृशमाख्यत् अययादत्, तादृशमाख्यत् अततादत्, इत्यादौ यत्र वृद्धेरप्रसङ्गादवर्णस्यैको लोपस्तत्रेत्वनिवृत्त्यर्थमनग्लोपइति वक्तव्यम्। नैतदस्ति। यदीदृशाणिणजेव नोत्पद्यते, अत्र च प्रमाणं णौ चङीत्यत्र भाष्ये नाग्लोपीत्यत्र प्रत्याहारग्रहणेन वृद्धेः पूर्वं वा टिलोपज्ञापनस्यावस्थापनं, स्वामिन्नादेर्णौ तत्कथं सङ्गच्छेत। ननु स्रग्विणमाख्यत् असस्रजदित्यत्र विनो लुक्युपधाया वृद्धौ तस्य ह्रस्वनिवृत्त्यर्थमग्लोपिग्रहणं स्यात्, इष्यते च विन्नन्तादिष्ठवद्भावश्च, विनो लुकः प्रयोजनत्वेनोक्तत्वात्, नैतदस्ति, यतष्टेरित्यत्र भाष्यकारेण स्रजयतीत्यादीनामुदाहृतत्वादङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्येति वा वृद्धेरप्रसङ्गात् ह्रस्वभाविन्युपधैव नास्ति, कस्मिँश्चिदङ्गकार्ये वृत्ते पुनरप्याङ्गकार्यवृत्तौ प्राप्तावविधिस्तस्य कार्यस्य तच्चेदङ्गं प्रयोगार्हं परिनिष्ठितप्रयोगार्हं भवतीति परिभाषार्थः, अस्ति चात्र विन्मतोर्लुकाऽङ्गकार्यस्य वृद्धेः पूर्वं प्रवृत्तिः, तस्मात् ज्ञापकमेव प्रत्याहारग्रहणं वृद्धेः पूर्वं टिलोपप्रवृत्तेः, अत एव वादितवन्तं प्रयोजितवानवीवदत् वीणां परिवादकेनेत्यत्र योऽसौ णौ णेर्लोपस्तस्य स्थानिवत्त्वेनाङ्गस्याग्लोपित्वादुपधाह्रस्वत्वनिषेधे प्राप्ते णेर्णिच्युपसंख्यानं कर्त्तव्यमिति वार्त्तिकं चारब्धम्, न च णेः पूर्वं वृद्धौ पश्चाल्लोपेऽङ्गस्यानग्लोपित्वात्तस्य स्थानिवत्त्वेनोकारस्योपधात्वविघातात् ह्रस्वो न प्राप्नोतीति वार्त्तिकारम्भः स्यादिति वाच्यम्, यतश्चङ्परणिह्रासकृत्त्वेष्विति स्थानिवत्त्वं न्यषेधीत्। किं च यथल्लोपेत्यादिना वृद्धेः पूर्वं णिलोपस्योक्तत्वादनग्लोपित्वशङ्कैव न भवति, अत एव भाष्यकारेणोपधाह्रस्वत्वे णेर्णिचीति वार्त्तिकमग्लोपित्वाद् ध्रस्वत्वं न प्राप्नोतीत्यारब्धमिति व्याख्यातम्, वृत्तिकारोऽपि वृद्धेः पूर्वं टिलोपमनुमेने, यदाह वादितवन्तं प्रयो-

जितवानश्वीवदद्वीणां परिवादकेन योऽसौ णौ णिलोपस्तस्य स्थानिवद्भावाद्ग्लोपित्वाद्वा ऽङ्गस्य ह्रस्वो न प्राप्नोतीति, गतमदः । अपरे हलिकल्योरत्वनिपातनस्य भाष्यवार्त्तिकयोरित्वाभावप्रयोजनत्वेन कथनादगिति प्रत्याहारग्रहणाद्वृद्धेः पूर्वं टिलोप इति भाष्ये व्यवस्थितत्वाच्च वृद्धेरुत्तरकालं पूर्वं वा कामचारेण टिलोप इत्यपपटत् अपीपटदित्युभयमपीति प्रतिपन्नाः । अत्र मते ऽपप्रथदपिप्रथदित्युभयं भवति, एवं म्रदयतीत्यत्रापि, भ्रशयति, क्रशयति, द्रढयति, एषां चङि सर्वथा ऽग्लोपित्वात् अबभ्रशत् अचक्रशत् अदद्रढदिति भवति, परिव्रढयतीत्यत्र सोपसर्गात्संग्रामयतेरेव धातुसञ्ज्ञानिमित्तप्रत्ययो नान्यस्मादिति पृथक्कृतोपसर्गाद्दृढादेरेव प्रत्यय इति तिङ्ङतिङ इति निघातो भवति, पर्यव्रढयदित्यत्र परेः परो ऽड् भवति, परिव्रढय्येत्यत्र परेर्ण्यन्तेन 'कुगतिप्रादय'इति समासे 'समासे नञ्पूर्वे क्त्वो ल्यबि'ति ल्यब् भवति, णे'र्ल्यपि लघुपूर्वा'दित्ययादेशः, परिविव्रढयिषति, पर्यविव्रढदित्यत्र संश्चङोर्व्रढेरेव द्विर्वचनं भवति, 'सन्यत'इति सनीत्वं, सन्वदित्वं चाग्लोपित्वान्न भवति । पटमाचष्टे पटयति, टेरिति विहितष्टिलोपो णावपि भवति, तस्य स्थानिवत्त्वादुपधावृद्धिर्न भवति, पटमाख्यदपपटत्, अग्लोपित्वात् सन्वदित्वं न भवति, न चात्रेष्ठवद्भावेनाङ्गस्य भत्वाद्यस्येति लोपेनापि पटयतीत्यादिसिद्धेः किं लोपवचनेन, सत्यमत्रैवं सिध्यति, पटुदृषद्राजादिभ्यो णौ पटयति दृषयति राजयतीत्याद्यर्थमवश्यं टिलोपो वाच्यः, सन्वल्लघुनीत्यत्र हरदत्तः । यत्र केवलस्यातो लोपस्तत्र स्थानिवत्त्वेनाङ्गस्य चङ्परणिपरत्वाभावादेवेत्वाभावसिद्धेरनग्लोपवचनमनग्भलोपार्थमपि इत्यत्र दृषद्राजादावपीत्वाद्यभाव इत्याह, तन्न । अनादिष्टादचः पूर्वस्य कस्मिंश्चित्कार्ये विधातव्ये स्थानिवद्भावो न त्वादिष्टादचः पूर्वस्यापीत्यभ्यासेत्वे स्थानिवत्त्वाप्रसङ्गात्, अङ्गस्य चङ्परणिपरत्वं त्वनूद्यते न विधीयतइति तस्य स्थानिवत्त्वाप्रसक्तेरङ्गं चङ्परं न स्यादित्याशङ्का नोदेति, सत्यपि वा स्थानिवत्त्वे तत्सहितमेवाङ्गं भविष्यति, चङ्परणिपरं चेति न स्थानिवद्भावेनाङ्गस्य चङ्परणिपरत्वभङ्गः । ननु कथन्त-

द्युक्तमभ्यासो ऽनादिष्टादचः पूर्वो न भवतीति, यतः पटादेर्णौ चङि यष्टिलोपात् पूर्वमनादिष्टादचः पूर्वत्वेन दृष्टः यद्वा ऽऽदिः स एव द्विः प्रयुज्यत इति स्यादेवाभ्यासस्यानादिष्टादचः पूर्वत्वं, सत्यमेवं किं तु यत्कार्यत्वेनाश्रीयते ऽभ्यासावस्थं न तदनादिष्टादचः पूर्वं भवति, एवं हलिकल्योरादन्तत्वनिपातनं संगच्छते, अन्यथा यस्य कस्यापि अचष्टिलोपे तस्य स्थानिवद्भावेनाङ्गं चङ्परं न स्यादिति किमत्वनिपातनेन, सत्यपि वा स्थानिवत्त्वे तत्सहितमेव चङ्परणिपरमङ्गं भविष्यति, अभ्यासश्च तस्यैवेति सर्वथा नाग्लोप इत्येवेत्वाद्यभावो वाच्यः; अदद्रुषत्, अरराजदित्यादावनग्लोपे ऽभ्यासस्येत्वाभावस्त्वनग्लोपइत्याश्रीयमाणस्याको लोपाभावस्याविद्यमानत्वात्, पटुमाख्यदित्यत्र वृद्धेः पूर्वं टिलोपेङ्गस्याग्लोपित्वादपपटदित्येके, कृतायां वृद्धौ टिलोपादपीपटदित्येके । कृतायामकृतायां वा वृद्धौ कामचारेण टिलोपादुभयमपीत्यपरे । एतद्द्वयमिदं पुंवद्भावे प्रदर्शितं, पटोरयं मतभेदो ऽन्येषामुवर्णान्तानां कर्त्र्यादिनामिवर्णान्तानां च द्रष्टव्यः । कुमार्यादीनां तु पुंवद्भावेन कुमाराद्यादेशविधानात् वृद्धात्रप्यगेव लुयतइत्यचकुमारदित्याद्येव भवति, इदं चाग्लोपित्वेनेत्वाभाववचनं सन्वत्सूत्रस्य चङ्परे णौ यदङ्गं तस्य योभ्यासो लघुपर इत्यर्थवादिनां हरदत्तादीनामनुसारेण न तु चङ्परे णौ यल्लघु तस्मिन्परतो ऽभ्यासस्येति वादिनां कैयटकारादीनां, तेषां यदत्राभ्यासात्परं लघु न तच्चङ्परणिपरं, यच्चङ्परं न तल्लघु, अभ्यासस्य वर्णान्तरेण व्यवधानाच्च तत्पर इति नास्त्यत्रेत्वप्रसंगः । तथाहि तत्र भाष्ये अजजागरदित्यत्राभ्यासलघुपरत्वाभावादित्वं न भवतीति उक्तम्, यदा व्यवहितं चात्र लघु चङ्परमिति । यद्येवमचीकृतदजीहरदित्यादावपि व्यवधानं प्राप्नोति । नैतदस्ति । येन नाव्यवधानं तेन व्यवहितेपि वचनप्रामाण्यादित्येकेन वर्णेन व्यवधानमाश्रीयते न पुनरनेकेनापि । एवमप्यचिचणदित्यत्र न प्राप्नोति । एवं तर्हि आचार्यप्रवृत्तिर्ज्ञापयति भवति संयोगेन व्यवधानेपीति, यदय'मत्स्मृद्दृत्वरे'ति असस्मरदित्यादीनामित्वाभावार्थमत्वं शास्ति । अवश्यं चैतदेवं चङ्परे

णौ यल्लघु तल्लोपस्य स्थानिवत्त्वेन चङ्परणिपरत्वस्याभावादित्वं न भवतीति वाच्यं, तदेतत्स्थानिवत्त्वं न भवत्यभ्यासस्यादिष्टादचः पूर्वत्वा-त्सत्यपि वा स्थानिवत्त्वे तत्सहितमेव चङ्परणिपरमङ्गं भवति, अभ्या-सस्य च तस्यैवेतीत्वं दुर्वारमिदानीमेवोक्तम् । अथ कथमत्रेत्वादि भवति वादितवन्तं प्रयोजितवान् अवीवदद्वीणां परिवादकेनेति, यावता योऽसौ णौ णिलोपस्तस्य स्थानिवत्त्वेनाभ्यासात्परस्य लघोश्चङ्परत्वं विहन्यते, अत्र वृत्तिकारः परिहरति । णयाकृतिनिर्देशात्सिद्धमिति । अत एव णिजाते-र्निमित्तत्वेनाश्रयणात् गोबलीवर्दन्यायेन णिचोऽन्यस्याको लोप इहाग्लोप इत्यग्लोपित्वादित्वं न प्राप्नोतीत्येतदपि परिहृतं, यत्तु सन्वल्लघुनीत्यत्र भाष्ये णेः परत्वाद्वृद्धौ कृतायां लोप इति अग्लोपित्वाभावादित्वं न भव-तीतिवचनं तत् प्रौढिवादमात्रं, यस्त्वयमेव णौ चङीत्यत्र नाग्लोपीत्यगि-तिप्रत्याहारग्रहणसामर्थ्यात् णयल्लोपेत्यादिवचनात् वृद्धेः पूर्वं णिलोप-माह । एवमन्यत्रापि णौ णौ द्रष्टव्यं, वहेः क्ते यजादित्वात् संप्रसारणे परपूर्व-त्वे हो ढ 'झषस्तथो'रिति तकारस्य धकारे तस्य ष्टुत्वेन ढकारे ढो ढे लोपे दीर्घः, ऊढः, तमाचष्टे ऊढयति, चङि अजादित्वात् द्वितीयस्यैकाचश्चङीति द्विर्वचने कर्तव्ये पूर्वत्रासिद्धत्वेन ढत्वादीनामसिद्धत्वे णौ कृतं स्थानिव-दिति णिलोपस्य च स्थानिवत्त्वे हशब्दस्य द्विरुक्तौ उत्तरखण्डस्य पूर्ववद्ध-त्वादादावभ्यासस्य हलादिशेषे 'कुहोश्चु'रिति कुत्वेन हकारस्य झकारे तस्य चाभ्यासे चर्चेति जश्त्वे जकारः, आटि वृद्धावौजढदिति भवति । अग्लो-पित्वात्सन्वदित्वाभाव औजढदिति, क्तिनि पूर्ववत् संप्रसारणादूढि-शब्दाण्णिचि चङि हति शब्दस्य द्विरुक्तौ । ननु कथमिह ढत्वादीनाम-सिद्धत्वं, यतः पूर्वत्रासिद्धीयमद्विर्वचनइत्युच्यते, सत्यमु'भौ साभ्यासस्ये'ति उपसर्गादुत्तरस्यानितेर्नकारस्य णत्वविधानादनित्यत्वज्ञापनादिह तन्न प्रव-र्तते, नित्ये चास्मिन् प्राणितीतिवत् प्राणिणिषतीत्यत्रापि अनितेर्नकार-स्योपसर्गस्थान्निमित्तात् परत्वेना'निते'रिति णत्वे कृते तत्सहितस्यैव द्विर्व-चनसिद्धेः किमनेन साभ्यासस्य णत्वविधानेन, कर्तृशब्दाद्वा णावि-ष्ठवदतिदेशात् छन्दसीति विधीयमाने तृशब्दलोपे करयतीत्येके, एवं

भर्त्रादीनामपि भरयतीत्यादि द्रष्टव्यं, दोग्ध्रादेस्तु णौ घत्वादीनां पूर्वत्रासिद्धत्वेन तृशब्दलोपे दोहीयसीत्यादिवद् दोहयतीत्यादि भवति। अन्ये त्वयं तृशब्दलोपश्छन्दस्युपदिष्टः कथं भाषायां स्यादिति कर्तयतीत्यादि प्रतिपन्नाः। पितृयतीत्यादावत्रयं तृशब्दलोपो नाशङ्क्यः, उणादयोऽव्युत्पन्नानीति पित्रादिषु व्युत्पत्तिकार्यानाश्रयणादवयवप्रविभागो न भवति। अत्र च ज्ञापकम्। अप्तृन्नित्यत्र नप्त्रादीनां ग्रहणमव्युत्पत्तौ तृजन्तत्वादेव दीर्घसिद्धेः किं तेषां ग्रहणेन। त्वामाचष्टे त्वादयति, 'प्रत्ययोत्तरपदयोश्चे'ति एकार्थयोर्युष्मदस्मदोर्मपर्यन्तस्य त्वमयोर्वृद्धिः, अत्रान्येङ्गवृत्तइति वृद्धिमकृत्वा त्वदयति मदयतीति मन्यन्ते। अपरे पुनस्त्वमयोः परपूर्वत्वात् पूर्वं नित्यत्वाट्टिलोपे वृद्धौ पुकि त्वापयति मापयतीति भवति, त्वादयतीतिवादिनामन्तरङ्गपरपूर्वत्वमित्यभिप्रायः। युवामाचष्टे युष्मयति, आवामाचष्टे ऽस्मयति, 'युवावि'त्यत्र द्विवचने द्व्यर्थवृत्तिताया अभिधानेपि णिजुत्पत्तिः प्रातिपदिकादिति विभक्तेरनुत्पादे विभक्तिपरत्वाभावान्न युवावयोः प्रसंग, इह सुबन्तादुत्पत्तावपि विभक्तेर्लुप्तत्वेन विभक्तिपरत्वाभावाद्युवावयोरप्रसङ्ग एव, न च मन्तव्यमन्तरङ्गत्वाल्लुकः पूर्वं युवावयोर्द्वितीयायां चेति शेषे लोपापवादे आत्वे पुकि युवापयति आवापयतीति स्यातामिति, यतोन्तरङ्गानपि विधीन्बहिरङ्गो लुग् बाधते, उपपादितं चैतत् क्यज्विधौ, प्रत्ययोत्तरपदयोश्चेति त्वमौ युष्मदस्मदोरनेकार्थत्वान्न प्रसजतो ऽत एव युष्मानाचष्टे अस्मानाचष्टे युष्मयत्यस्मयतीत्यत्रापि न भवतस्त्वामतिक्रान्तः अतिक्रान्तौ अतिक्रान्तान् अतित्वामेवमतिमाम् अतित्वान् अतिमान्, अत्र च युष्मदस्मदोरेकार्थत्वाद्विभक्तिपरत्वाच्च त्वमावेकवचनइति त्वमयोःशेषे लोपापवादे 'द्वितीयायां' चेति पूर्ववदात्वे शसोन्यत्र विभक्तेर्ङेः प्रथमयोरित्यमादेशः। शसि तु शसो नेति युष्मदस्मद्भ्यां परस्य शस आदेर्नकारे सकारस्य संयोगान्तलोपः, युवावौ द्विवचनइत्यत्र द्वयोर्वचनं द्विवचनं, तच्च युष्मदस्मदोर्विशेषणमिति स्थितत्वादेकार्थयोर्युवावयोरप्रसङ्गः, अत्रार्थे णौ युष्मदस्मदोरेकार्थत्वेन प्रत्ययोत्तरपदयोश्चेति

त्वमयोरन्तरङ्गत्वात्परपूर्वत्वे ततष्टिलोपे वाऽतित्वयति अतिमयतीति भवतः, अत्रापि परपूर्वत्वात्पूर्वं नित्यत्वाट्टिलोप इतिवादिनामतित्वापयति, अतिमापयतीति स्यात्, युवामतिक्रान्तमतिक्रान्तावतियुवामतिक्रान्तान् अतियुवान्, एवमत्यावामत्यावान्, युष्मदस्मदोर्द्व्यर्थत्वात् विभक्तिपरत्वाच्च युवावौ द्विवचनइति युवावयोः पूर्वत्वाद् 'द्वितीयायां चे'त्यात्त्वं 'ङेः प्रथमयोरमि'त्यम्भावः, शसो नादि च भवति, युष्मानतिक्रान्तो ऽतिक्रान्तौ अतियुष्मानतिक्रातानतियुष्मानेवमत्यस्मान्, पूर्ववदात्वविभक्तिकार्ये, सर्वत्रार्थे णौ युष्मदस्मदोरनेकार्थत्वात्त्वमयोरभावादतियुष्मयति अत्यस्मयतीति भाव्यं, श्वानमाचष्टे शावयति, अत्र श्वन्णिति स्थिते णाविष्ठवद्वतिदेशाद् द्वौ टिलोपौ प्राप्नुतः, टेरित्येको 'नस्तद्धित'इति अपरस्तत्र प्रकृत्येकाज्झिति प्रकृतिभावष्टेरित्यस्यैवेति तस्मिन्निवृत्तेपि 'नस्तद्धित'इति भवति. तत्र कृते इष्ठनोजादित्वेन तत्र परे पूर्वस्य भत्वं दृष्टमिति णावप्यतिदेशेन तस्य संभवादुकारसंप्रसारणे वृद्धावावादेशः । नन्विष्ठवदतिदेशवाक्ये णावित्युपमेये सप्तमीश्रवणादिष्ठवदित्युपमाने वतिः सप्तम्यन्तात् इति तत्र परे पूर्वस्य यत्कार्यं दृष्टं तदेवातिदेष्टव्यं, णावपि परे न पुनर्णेरिष्ठनः तद्धितत्वमपि इति, तत्र प्रातिपदिकस्येति वचनस्य प्रत्ययकार्याणामतिदेशनिवृत्त्यर्थत्वाद्वा णेस्तद्धितत्वस्याभावात्कथं 'नस्तद्धित' इति टिलोपोऽत्र स्यात्, अतद्धितत्वादेव त्वयाप्योर्गुणो न कृतः । उच्यते । असत्यपि तद्धितत्वे ब्रह्मवत्तरो ब्रह्मिष्ठ इत्यादौ विन्मतोर्लुकि इष्ठनि परे प्रकृतौ नान्तलक्षणष्टिलोपो दृष्ट इत्यत्रेष्ठनोभावेपि संभावनया स्यादेव, यथा पट्विमा पटिष्ठेत्यादौ 'भस्याढे तद्धित'इति पुंवद्भावात्कुमारीमाचष्टे कुमारयतीत्यादौ इष्ठनः संभावनया भवति, एवं तर्हि दविष्ठ इत्यादाविष्ठन्योर्गुणः पूर्वस्य दृष्ट इत्यत्राप्यतिदेशः प्राप्नोति । नैष दोषः । यदस्मिन्संप्रसारणटिलोपौ असिद्धवदत्रे'त्यसिद्धौ भविष्यतः । अन्ये तु ब्रह्मिष्ठ इत्यादौ नान्तलक्षणाट्टिलोपात् परत्वाट्टेरित्यनेनैव भवितव्यमिति तस्याप्रवृत्तेरिष्ठनि परे पूर्वत्वादर्शनादिहातिदेशो न युक्त इति तदभावात् केवलं संप्रसारण-

पूर्वत्वयोः शुनयतीति भवतीति मन्यन्ते। नन्वनयोराभीययोष्टिलोपयो-'रसिद्धवदत्रे'त्यन्योन्यस्यासिद्धत्वात्कथं विप्रतिषेधः, 'घुमास्थे'त्यत्र हल्ग्रहणेन विप्रतिषेधइदमसिद्धत्वं नेति ज्ञापनात्, तद्धल्ग्रहणं गोद इत्यादावजादौ क्ङित्यार्धधातुके ईत्वं माभूदिति। यदि च विप्रतिषेधे इदमसिद्धत्वं स्यात् कृतेपीत्वे तस्यासिद्धत्वादातो लोपे सिद्धं गोद इत्यादीति किं हल्ग्रहणेन, नन्वेतदीत्वेपि 'अचि श्नुधात्वि'तीयङ् स्यादिति तन्निवृत्त्यर्थमीत्वमेव माभूदिति अर्थवदेव। नैतदस्ति प्रयोजनं, यदि यङो-प्याभीयत्वेन तस्मिन्नपि तस्यासिद्धत्वात्, मैवं, युटो यणीवेयङीत्यस्यासिद्धत्वस्याभावो वाच्यः, अन्यथा धियौ पियाविति न सिध्यति। यद्वधातिपिबत्योः क्तौ कृतं 'घुमास्थे'तीत्वमियङ्यसिद्धं स्यात्, नैतदस्ति, ध्यायतेः संप्रसारणं चेति ध्यायतेः प्यायतेश्च क्वौ संप्रसारणदीर्घत्वयोर्धीपीशब्दयोर्व्युत्पादनादवश्यं चैतदेवं वाक्यकारस्य मते विज्ञेयमन्यथा तेन वकारे प्रतिषेध इति क्वावपीत्वाभावस्योक्तत्वाद्धापाशब्दावेव स्यातां, तथा च तत्र भाष्ये यदि तर्हि वकारे प्रतिषेध उच्यते कथं धीरिति नोदयित्वा धीरिति चोक्तं, किमुक्तं नैतदीत्वं किं तर्हि ध्याप्योः संप्रसारणमित्युक्तं, यदपि मतमीत्वे वकारस्य निषेध इत्यस्य भाष्ये ऽनवस्थानात् क्वावप्येतौ शब्दौ भवत इति तदपि क्वावीत्वं, विभक्तावियङिति व्याश्रयत्वान्नास्त्यसिद्धत्वप्रसंगः। एवमपि व्यवस्थार्थं हल्ग्रहणं कर्तव्यमेव, अन्यथाभीयानामन्योन्यस्मिन्नान्योन्यस्यासिद्धत्वादीत्वमाल्लोपे सिद्धमाल्लोपश्चेत्वइति व्यवस्था न प्रकल्पेत, एवं तर्हि 'आतो लोप इटि चे'त्यजादौ क्ङित्यार्धधातुके ऽकारस्य लोपो भवति, ततो घुमास्थागापाजहातिसां धा॰रपि आकारस्य लोपो भवति, पूर्वोक्तइकादौ परे, इदं चेत्वबाधनार्थम्, इदं वाजादावाल्लोपस्योक्तत्वाद्धलादौ क्ङित्यार्धधातुके भवति, तत 'एर्लिङि' 'वान्यस्यसंयोगादेः' 'न ल्यपि' 'मयतेरिदन्यतरस्यां'ततो यति, आत इत्येव, यति चात ईद्भवत्येवं लघीयसा न्यासेन सिद्धावपि यद्गरीयसा यत्नमास्थाय हल्ग्रहणं करोति तस्यैतत्प्रयोजनं विप्रतिषेधे नेदमसिद्धत्वमिति, एवमप्ययुक्तो विप्रतिषेधः,

इष्ठवदतिदेशेनैव द्वावपि टिलोपौ प्राप्येते इत्येकयोगलक्षणत्वेन पौर्वापर्याभावात्, तथा 'प्रत्ययलोप' इत्यत्र वार्तिकं तुग्दीर्घयोश्च विप्रतिषेधानुपपत्तिरेकयोगलक्षणत्वात् परिवीरिति, न युक्तो विप्रतिषेधः । किमनेनातिदिश्यते, यत्प्रकृताववस्थितं तत्र च परत्वात्तस्तद्धितइत्येतं बाधित्वा टेरित्येव व्यवस्थितमिति, 'प्रकृत्यैकाजि'त्यत्र भाष्यादौ ब्रह्मिष्ठ इत्यत्र 'नस्तद्धित'इति टिलोपो विहितः । विद्वांसमाचष्टे-इति णौ टिलोपे विद्वयतीति दौर्गाः । अत्रात्रेयः । प्रसारणाभावश्चिन्त्यइति, तत्रेष्ठवद्भावेन भत्वा'द्वसोःसंप्रसारण'मिति संप्रसारणे वृद्धावावादेशे विदावयतीति भवति, भवितव्यमित्येके । अपरे तु ब्रुवते । कृतेपि टिलोपे प्रसारणं प्राप्नोतीति नित्यत्वात् कृते तस्मिन्नन्तरङ्गत्वात्परपूर्वत्वे पश्चाट्टिलोप इति विदयतीति । ननु टिलोपोपि कृते संप्रसारणे प्राप्नोतीति नित्यः, नैतदस्ति, कृते संप्रसारणे ऽन्तरङ्गत्वात् परपूर्वत्वे शब्दान्तरप्राप्त्या नित्योयमनित्यो भवति । स्यादेतदेवं यदि प्रसारणमात्रेण शब्दान्तरप्राप्तिः स्यान्नेह तथा किं तु परपूर्वत्वेन, यस्य च लक्षणान्तरेण निमित्तं विहन्यते नैतदनित्यं भवति । नैष दोषः । यस्य निमित्तमिति परिभाषा न सार्वत्रिकी, उक्तं चैवमाडज्ञादीनामित्यत्र हरदत्तादिभिः । अमुमेव पक्षमाश्रित्य अस्माभिर्माधवीयायां धातु्वृत्तौ विदयतीति प्रदर्शितम् । उदञ्चमाचष्टे उदीचयति । अत्र सोपसर्गात्संग्रामयतेरिति ज्ञापकाद्धातुसंज्ञानिमित्ते प्रत्यये उपसर्गाणां पृथक्करणात् क्विन्नन्ताल्लुप्तनकारान्तादञ्चतेरेव णौ 'प्रकृत्यैकाजि'ति प्रकृतिभावाट्टिलोपाभावो, णाविष्ठवदतिदेशेन भत्वे 'अच'इति तु लुप्तनकारस्याञ्चतेः प्राप्ताकारलोपापवाद 'उद ईदि'तीत्वं भवति । चङि णिलोपस्य 'द्विर्वचनेची'ति स्थानिवत्त्वा'दजादेर्द्वितीयस्येति' चिशब्दस्य द्विर्वचने अङ्गस्याटि वृद्धौ उदैचिचदिति भवति, ल्यपि लघुपूर्वत्वाभावेनायादेशाभावाण्णिलोप, उदीच्येति भवति, प्रत्यञ्चमाचष्टे प्रतीचयति, अत्रापि पूर्ववदञ्चतेर्भत्वा'दच'इत्यकारलोपे 'चा'विति लुप्तनकारेऽञ्चतौ पूर्वपदस्य दीर्घः । चङि चिशब्दात् पूर्वमाटि यणादेशे

प्रत्यचिचत्, 'इकोसवर्णे शाकल्यस्य ह्रस्वश्चे'ति यदेकोऽसवर्णेचि प्रकृतिभावो दीर्घस्य च ह्रस्वस्तदा प्रतिअचिचदिति भवति। ल्यपि तु पूर्ववत् प्रतीच्येति भवति। संम्यञ्चमाचष्टे समीचयति। 'समःसमी'त्यञ्चतौ सम्यादेशे 'ऽव'इत्यकारलोपे 'चा'विति दीर्घः। अत्रापि चङ्ल्यपोः पूर्ववत् सम्यचिचत् समीच्येति भवति, तिरोऽञ्चतीति तिर्यङ्, 'तिरसस्तिर्यलोप'इति तिर्यादेशः, तमाचष्टे तिराययति, इष्ठवद्भावेनाञ्चतेष्टिलोपे वृद्धायौ, तिरस इत्यत्रालोप इति अलोपे तिर्यादेशाभावो ऽ'व'इत्यञ्चतेर्विधीयमानाकारलोपविषयः, स ह्यनन्तरः, अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा, अत्र पुनरिष्ठवद्भावप्रवृत्त्या 'टे'रिति तिरेरकारस्य वृध्याययोः कृतयोर्वा लोपो न भवति, अङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्येति। यद्वा 'असिद्धवदत्रे'ति प्राथमिकस्याञ्चतिटिलोपस्य चारमिकेऽस्मिन्नसिद्धत्वा,द्यथाकारितरामित्यत्र तशब्दे पूर्वप्रवृत्तश्चिणो लुक् पुनस्तरपि स्वप्रवृत्तावसिद्धो भवति, अत एव तिरेः स्थानिवत्त्वेनाव्ययत्वादव्ययानां भमात्रइति प्राप्तोपि टिलोपो न भवति, एवमपीकारस्य यस्येति लोपेन भवितव्यमिति चेन्न। टिलोपस्यासिद्धत्वा परया वृद्धा बाधाद्वा। यत्तु कस्येदित्यत्र भाष्ये कायमित्यत्रेकारवचनसामर्थ्याद्'यस्येति चे'ति लोपाभाववचनं तदुपायान्तरपरतया कथं चित्रेयम्। अस्याग्लोपित्वेनोपधाह्रस्वत्वाभावाददतितिरायदिति, सहाञ्चतीति सध्र्यङ्, 'सहस्य सध्रि'रिति सध्र्यादेशः, सध्रिमाचष्टे सध्राययति, पूर्ववत् ध्रेरिकारलोपाभावः, चङि असससध्र्यत्, अग्लोपित्वादुपधाह्रस्वत्वाभावः, अभ्यासस्येत्वं तु लघुपरत्वाभावादपि न भवति, यदीष्ठवद्भावेन प्राप्तस्याञ्चतेष्टिलोपस्य तिर्यादेरिकारे पुनः प्रवृत्तावसिद्धत्वं तर्हि कुमारयतीत्यादाविष्ठवद्भावेन प्रवृत्तं पुंवत्त्वं तेनैव कुमारादेरकारलोपे ऽसिद्धं, नैष दोषः, इष्ठवद्भावेनातिदिश्यमानानां कार्याणामुत्पत्तिदेश एव देश इत्याश्रयणात्पुंवत्त्वोत्तपत्तिश्च 'भस्याढे तद्धित'इति विधीयमाना आभीया न भवति, अत एव भाष्यकारेण लोहिनीमाचष्टे लोहितयतीत्यादिषु इष्ठवद्भावेन लोहितादेशेन पुनष्टिलोपः कृतः, एवमपि सध्र्यतीत्यादावङ्गवृत्तिपरि-

भाषया वृद्धिर्न प्राप्नोतीति नाशङ्क्यं, यस्मादेषा भाष्यकारादिभिर्यत्राश्रिता तत्रैव प्रवर्तते, अत एवात्र परिभाषावाक्ये निष्ठितस्येत्युक्तं, निष्ठितत्वं च प्रयोगार्हत्वं, तच्चाप्तभाषितमन्तरेणावगन्तुं न शक्यते। विषु अञ्चति गच्छतीति विश्वक्, तमञ्चतीति विष्वद्र्यङ्। देवान् अञ्चतीति देवद्र्यङ् 'विश्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये' इत्याद्र्यादेशः। विष्वद्र्यञ्चमाचष्टे वष्वद्र्याययति, एवं देवद्र्याययति, पूर्ववदञ्चतेर्लोपे यस्येति लोपात्पर त्वादद्रीकारस्य वृद्धावायादेशः। विष्वक्शब्दोयं धर्मवचनोपि दृश्यते। यथा घोरस्य सतो विषुणाचाद्दरित्यत्र, विष्वगित्युत्तरपदलोपश्चाकृतसन्धेरिति लोमादिलक्षणे मत्वर्थीये नकारे उत्तरपदस्याकृत-सन्धेर्लोपः। अत्र भट्टभास्करः। विषुणस्य, नानाविधा या गतिस्तद्वतः, 'विष्वग्देवयोश्चे'ति चशब्दात्सर्वनाम्नो ऽद्र्यादेशे सर्वद्र्याययतीत्यादि। अदसोद्र्यादेशे पक्षत्रयम्। 'अदसोसेर्दादु दोम'इति उत्वमुभ्यामपि दकाराभ्यां परयोः, मत्वं च द्वयोरपि दकारयोरित्येकः पक्षः। उत्वमत्वे परयोरेवेति द्वितीयः, नेति तृतीयः, तथा चोक्तम्।

'अदसोद्रेः पृथङ् मुत्वं केचिदिच्छन्ति लत्ववत्।
केचिदन्त्यसदेशस्य नेत्येके ऽसेर्हि दृश्यते॥

इति। तत्रोत्वमत्वयोरमुमुय्याययति, अदमुय्याययतीति भवतः, उकारस्य तु यणादेशः पूर्वत्रासिद्धमित्यसिद्धत्वान्न भवति। उत्वमत्वयोरभावे त्वदद्र्याययतीति। चङि अजादित्वेन द्वितीयस्यैकाचो द्विर्वचने ऽग्लोपित्वादुपधाह्रस्वत्वाभावादमुमुय्यायदिति, उत्वमत्वयोरभावे सन्वदितीत्वमग्लोपित्वादभ्यासस्य चङ्परलघुपरत्वाभावाद्वा न भवति। उत्वमत्वयोः पूर्वत्रासिद्धीयमद्विर्वचनइति असिद्धत्वाभावः, त्वामञ्चति त्वद्र्यङ्,मामञ्चति मद्र्यङ्, उत्तरपदत्वा'त्प्रत्ययोत्तरपदयोश्चे'ति एकार्थवृत्तयोर्युष्मदस्मदोर्मपर्यन्तस्य त्वमादेशौ, पूर्ववदद्र्यादेशः, णौ त्वद्र्याययति, मद्र्याययति, युवामञ्चति आवामञ्चति युष्मद्र्यङ्, अस्मद्र्यङ्, अत्र युष्मदस्मदोरुत्तरपदपरत्वेप्यनेकार्थत्वान्न त्वमौ, 'युवावौ द्विवचन'इत्यत्र द्विवचनेन द्व्यर्थवृत्तिताया अभिधानेपि विभक्तेर्लुका लुप्तत्वेन तत्परत्वाभावाच्च

युवावादेशौ, न लुकः पूर्वमन्तरङ्गत्वेन भवतीन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधतइत्युक्तत्वात् । युष्मानञ्चति युष्मद्र्यङ्, अस्मानञ्चति अस्मद्र्यङ्, सर्वत्रात्र णौ युष्मद्र्याययति अस्मद्र्याययतीति भवतः । एवं त्वामतिक्रान्तमतिक्रान्तौ अतित्वामतिक्रान्तान् अतित्वान् एवमतिमामतिमान् । एषु कर्मसूपपदेषु अञ्चेः क्विपि अतित्वदङ्, अतिमदङ् । अत्र टिलोपे जाते अतित्वादयति, अतिमादयतीति भवतः, युवामतिक्रान्तमतिक्रान्तौ वा अतियुवामतिक्रान्तानतियुवान्, एवमत्यावामत्यावान्, एषु कर्मसूपपदेषु क्वावतियुष्मदङ् अत्यस्मदङ्, युस्मदस्मदोद्वयार्थत्वेप्यन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधतइति पूर्वमेव विभक्तेर्लुका लुप्तत्वात् विभक्तिपरत्वाभावाच्च युवावौ नाप्युत्तरपदनिबन्धनौ त्वमौ, एकार्थत्वाभावादत एव युष्मानतिक्रान्तमतियुष्माम्, अतिक्रान्तानतियुष्मान्, एवमत्यस्मामत्यस्मानित्यनयोरपि कर्मणोः अञ्चतावप्रत्यये उत्तरपदे त्वमयोरभावादतियुष्मदङ् अत्यस्मदङ् इति भवतः, सर्वत्रात्र णावञ्चतेष्टिलोपे एकार्थत्वाभावादेव प्रत्ययनिबन्धनावपि त्वमौ न भवत इत्यतियुष्मादयति अत्यस्मादयतीति भवतः, सर्वत्रातित्वादयतीत्यादौ युष्मदस्मदोरुपसर्जनत्वात्संज्ञोपसर्जनप्रतिषेध इति सर्वनामत्वाभावादद्र्यादेशो न प्रदर्शितः । क्रमाचष्टे क्रापयति, अचीक्रपत्, 'प्रकृत्यैकाजि'ति प्रकृतिभावाट्टिलोपाभावे वृद्धौ पुगागमः, अमाचष्टे आपयति, चङि तु माभवानोणिणदित्यत्र नित्यत्वाद् द्वितीयस्यैकाचो द्विर्वचने ओकारस्यानुपधात्वादेव णौ चङि ह्रस्वाभावसिद्धे ऋदित्करणेन नाग्लोपीत्यादिना ह्रस्वत्वनिषेधाद् द्वितीयद्विर्वचनात् पूर्वमुपधाह्रस्वत्वस्य ज्ञापनात्, कृते च तस्मिन्'द्विर्वचनेची'ति णिलोपस्य स्थानिवत्त्वेनाजादित्वात् पिशब्दस्य द्विर्वचने माभवानपिपदिति भवति, इमाचष्टे आययति, उमाचष्टे आवयति, अरमाचष्टे आरयति, अलमाचष्टे आलयति, ऋकारल्कारयोः सावर्ण्यात् तयोरुरण् रपर इति रप्रत्याहारपरा वृद्धिः । एषां णौ चङ्युपधाह्रस्वे ततो द्वितीयस्यैकाचो द्विर्वचने माभवानयियत्, माभवानविवत् माभवानरिरत्, माभवानलिलत् इति तत्र भवति । अत्र णौ कृतं स्थानि-

वदिति वृध्यादेर्द्विर्वचने न स्थानिवत्त्वं, यदयं स्थानिवद्भावः स्थानिरूपस्य द्विर्वचने कर्त्तव्ये भवति, इह तु स्थानिवद्भावाभावेऽेव द्विर्वचनं, पुनातीति पूः, भवतीति भूः, लुनातीति लूः, जवतीति जूः, एभ्यो णौ पावयति, भावयति, लावयति. जावयति, लुङि णौ चङि ह्रस्वत्वे णौ कृतं स्थानिवदिति पुप्रभृतीनां द्विर्वचने पुनरुत्तरखण्डस्य वृद्ध्यावयोर्ह्रस्वत्वे वा ऽभ्यासस्य च ह्रस्वत्वे तस्यावर्णपराः पुयण्जः परा इति सन्वद्भावे 'ओः पुयणजी'ति सनि विधीयमानइत्वे दीर्घे चापीपवत्, अलीलवत, अजीजवत् इति भवति। नन्वत्र पूप्रभृतीनां द्विर्वचने पुनरुत्तरखण्डस्य वृद्ध्यादेशह्रस्ववानिति घादेरभ्यासस्यानादिष्टादचः पूर्वत्वात्सन्वद्भावेन पुयणजिलक्षणे सन्वदित्वे प्राप्ते णौ चङीति ह्रस्वस्या'चः परस्मिन्निति'स्थानिवत्त्वेनालघुपरत्वात् कथमित्वं, नैष दोषः । ओःपुयणजीति इत्वस्य सन्वद्भावे सन्वदतिदेशस्यानर्थक्यप्रसङ्गात् स्थानिवद्भावस्यात्राप्रवृत्तेः, इदमेव ओः पुयणजीति वचनं ज्ञापकं णौ कृतस्य स्थानिवत्त्वे, अन्यथा न क्वचिदपि पुयणजिपरोवर्णात्परोभ्यासः संभवति, नन्वत्रास्ति संभवः, पिपवितेः पिपविषतीति, यवतेर्यौतेश्च 'स्मिपूङ्रञ्ज्वशां सनि' 'सनीवन्तर्द्ध'ीटि गुणावादेशयोर्द्विर्वचनेचीति स्थानिवद्भावेन पूयूशब्दो द्विरुच्यते, एवमपि पुद्रत्युदिद्रुहणं जग्रहणं च णौ कृतस्य स्थानिवत्त्वाभावे ऽनर्थकमेव स्यादिति ज्ञापकमेव । यद्येवमचिकीर्तदित्यु'पधायां चे'त्यृकारस्येत्वं णौ कृतमिति स्थानिवद्भावादृकारवदेकाचो द्विर्वचने ऽभ्यासस्योरदत्वादचिकर्तदिति प्राप्नोति, नैतदस्ति । यत इदं ज्ञापकं यथा जातीयकाः पुयणजस्तथा जातीयकानामेवेति इह न प्रवर्तते, कथं जातीयकाः, पुयणजः, अवर्णवदुत्तरखण्डाः, स्पष्टं चैतदेवमुरदित्यत्र रक्षितपदमञ्जर्यादिषु, 'द्विर्वचनेची'ति सूत्रे भाष्येप्येवमेव स्थितम् । यत्तु स्तौतिण्योरेवेत्यत्र न्यासे सिषेवयिषतीत्यत्र सेवेर्हेतुमण्णौ गुणे सनीड्गुणायादेशयोरुत्तरखण्डस्यावर्णपरत्वाभावेप्यस्याः परिभाषायाः सामान्याश्रयेण सिव्शब्दस्य द्विर्वचनकथनं तदेवमप्यत्र रूपाभेद इत्येतावन्मात्रतया न तु सिद्धान्तस्थित्या । अन्यथा पूर्वोक्तन्यासेन भाष्यादिना विरोधः स्यात्, एवं च सीरदेवेनास्याः परिभाषायाः विशेष-

विषयतामुक्त्वा पूर्वोक्तन्यासप्रामाण्यात् पूर्वत्रासिद्धमित्यत्र वृत्तौ उत्तरखण्ड-स्याचोऽभावेपि स्थानिवत्त्वात्प्रायेणोजढदिति, द्विर्वचनोक्ते'र्लोपः पिबते-रीच्चाभ्यासस्ये'त्यत्र चापीप्यद् इत्युदाहरणे णौ कृतस्योपधालोपस्य स्था-निवत्त्वेन पाप्शब्दस्य द्विर्वचनाच्च यत्सामान्यविषयत्वकथनं तदपि प्रत्युक्तं, कथं तर्हि औजढत् अपीप्यत् इति, यद् द्विर्वचनोत्तरकालमपि टिलो-पेन 'लोपः पिबते'रित्यनेन वोत्तरखण्डे ऽवर्णापहारस्यावश्यंभावित्वात् प्रयो-गगतमवर्णं न पश्याम इति णौ कृतपरिभाषानुपस्थानात्, अनचकृत्वाद् द्विर्व-चनमेव न स्यात्। उच्यते। यद्यपि प्रयोगे ऽवर्णवन्तमुत्तरखण्डं न पश्यामः प्रक्रियायां तु पश्याम एवेति द्विर्वचनेनोत्तरकालं प्रवर्तमानेनावर्णापहारेण न कश्चिद्दोषः। एवं चैतदर्थमवर्णोत्तरखण्डे परिभाषेयं नित्या अन्यत्र क्वचि-त्प्रवर्त्ततइति व्यवस्थाशून्यं सीरदेववचनं नाश्रयणीयं भवति, कथं तर्हि सिषेवयिषतीति, यदिह द्विर्वचने उत्तरखण्डमवर्णान्त भवतीति णौ कृतस्य गुणस्य स्थानिवत्त्वं न स्यात्, मास्तु गुणस्य द्विर्वचने ऽभ्यासह्रस्वत्वेनैवं रूपं सिध्यति। भ्रूवमाख्यत् अबुभ्रवदित्यत्र यो ऽवर्णपरो यण् नासौ ओः पर इती-त्वाभावः। अशिश्रयदित्यत्राभ्यासस्येत्वं णौ कृतस्य स्थानिवत्त्वेन श्रीशब्द-स्य द्विर्वचनात्। हेशब्दमाख्यत् अजीहयत्, गावमाख्यत् अजूगवत्, रायमा-ख्यदरीरयत्, नावमाख्यत् अनूनवत्, अत्रापि णौ कृतपरिभाषया सन्यत-रस्य द्विर्वचने ऽभ्यासस्य ह्रस्वत्वे लघु भवति। अत्रोपसर्गग्रहणं प्राद्युप-लक्षणम्, अन्यथा स्वश्वमाख्यत्स्वाशश्वयदित्यादि न सिध्यति। स्वराचष्टे स्वरयति, अव्ययानां भमात्रे इति टिलोपः, 'प्रकृत्यैकाजि'ति प्रकृतिभा-वस्तु येन नाप्राप्तिन्यायेनानन्तर्याच्च टेरित्यस्यैव, टिलोपस्य स्थानिवत्त्वा-भावात्स्वशब्दस्य द्विर्वचने असिस्वयदित्येके। अन्ये तु णौ कृतत्वेन टि-लोपस्य स्थानिवत्त्वात्स्वर्शब्दस्यैव हि द्विर्वचनं युक्तमित्यसस्वरदित्याहुः। अत्राभ्यासस्येत्वमुत्तरखण्डस्य पुनष्टिलोपेन लघुपरत्वाभावान्न भवति। न च टिलोपात्पूर्वमेवास्ति लघुपरत्वमिति स्यात्, नित्यत्वात्तस्य, न च णिचा लघुपरत्वं, तस्य निमित्तत्वेन ततोन्यस्य लघोस्तत्राश्रयणस्य स्थित त्वात्, बहु च बहुत्वं वाचष्टे भावयति, अत्रे'ष्ठस्य यिट् चे'तीष्ठनि

विहितत्वात् बहोर्भूभावः, यिडागमस्तु णावित्युपमेये सप्तमीश्रवणादिष्ठव-दित्युपमानादपि सप्तम्यन्ताद्वृत्तिरितीष्ठनि परे पूर्वस्य यत्कार्यं तदेवाति-दिश्यते, न तु इष्ठनोपीति प्रातिपदिकस्येतिवचनस्याप्रत्ययकार्यातिदेशा-र्थत्वाद्वा न भवति, 'टे'रित्यत्र कैयटे भावयतीत्युदाहृत्य यिट्सन्नियोगशि-ष्टत्वाद्भभावस्य यिडभावे भूभावस्याप्यभावात् बहयतीत्येकीयमतेनोपन्य-स्तं, पदमञ्जर्यां तु बहतीति स्वपक्षमुक्त्वा भावयतीत्येकीयमतेनोक्तम्। अत्र शास्त्राणां कार्यस्य च प्राधान्यात्तदेवातिदेष्टुं युक्तमितीष्ठवद्वचनमेवेष्ठनि परतः प्रकृतौ दृष्टं कार्यं णावपि विधत्तइति भूभावस्य सन्नियोगशिष्टत्वाभा-वाद् भावयतीत्येव युक्तमिति वयमुत्पश्यामः। एवं च यदुक्तं पुरुषकारे बह-यतीत्युदाहृत्येष्ठनि यत् दृष्टं कार्यं तदप्यतिदिश्यते, न चेष्ठनि युड् नापि इष्ठवद्भावश्च, यिड्सन्नियोगशिष्टत्वात्तदभावे तु भावयतीति चिन्त्यमाप्ते-रिति। तदेव चिन्त्यं भवति। चान्द्रकौमारशाकटायनेषु पुनरिष्ठनि युक् चेति बहोरेव युक् विधीयते तत्र मते ऽत्रापि भूयतीति भाव्यम्।

सूत्रवार्तिकभाष्येषु नायं पक्षः प्रदर्शितः।
विरुद्धश्चेति तैरेव न वयं बहु मन्महे॥
अस्त्येव हि विरोधोत्र पक्षे युक् प्रकृतेर्भवेत्॥
तेन णावपि तस्य स्यादतिदेशो युटः पुनः।
प्रत्ययस्यैव शेषत्वाच्चातिदेशो भवेन्नतः॥

टिलोपः। यणादिपरलोपः। 'स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः, स्थूलादिभ्यः इष्ठेमेयःसु परं यणादि लुप्यते, तत्र पूर्वस्य च गुणो भवतीत्येतस्मादपि भवति, यणादीत्येतावत्युच्यमाने पुनः सर्वस्य लोपादियतीतिवत् प्रत्ययस्यैव श्रवणं स्यादिति परवचनमत्र, पूर्वस्य गुणवचनं स्थविष्ठ इत्यादावोर्गुणो यणादिपरलोपस्या'सिद्धवदत्रे'-त्यसिद्धत्वादवर्णान्तस्य भस्याभावान्न स्यात् प्रसङ्गः, क्षेपिष्ठ इत्यादावु-वर्णान्तस्य भस्यैवाभावाच्च, अत्रेक्परिभाषोपस्थानादन्त्यस्य गुणो न भवति, ह्रसिष्ठ इत्यादौ त्विको ऽभावाच्चैव भवति, अत एवोक्तं वृत्तौ पूर्व-ग्रहणं विस्पष्टार्थमिति। नन्वेतदिक्परिभाषाबाधेनानिकोप्यन्त्यस्य गुणार्थं

स्यात्, नैतत्, इको गुणवृद्धी इत्यत्र भाष्यवार्तिकयोर्दृशिग्रहणप्रचुरैष्टिग्रहणमिति इक एव गुणस्योक्तत्वात्, स्थवयति, दवयति, क्षेपयति, क्षोदयतीति, अत्र यवयतीत्यादौ गुणस्या'चोञ्णिती'ति वृद्धिरङ्गवृत्तइति वा प्रातिपदिकाद्धात्वर्थे बहुलमिति बहुलग्रहणाद्वा न भवति, अत्र युवतिशब्दादपि इष्ठेयसुनोर्ल्लिङ्गविशिष्टपरिभाषया यणादिपरलोपादेर्भावाण्णावपि यणादिपरलोपादौ यवयतीत्येव रूपं, यद्वात्रेष्ठवद्भावात् पुंवत्त्वेन युवशब्दआदेशे तस्य यणादिपरलोपे भविष्यति तदेव रूपम्, अत्र प्रक्रियारवे बहुना दूरयतीत्यपि कौमारश्चिन्त्यः। दवयतीत्येव भाष्ये उदाहृतत्वेन तेषां यत्किञ्चित् प्रयोगमात्रमूलत्वादस्यापि सम्भवाच्चेति सुधाकरकारोपि शीकरव्यतिकरमरीचिभिर्दूरपत्यवनते विवस्वतीति प्रयोगमुपादायेष्ठवद्भावाद्दवयतीति भवितव्यमिति, यणादिपरलोपे। विन्मतोर्लुक्। स्रगस्यास्तीति स्रग्वी, 'अस्मायामेधास्रजो विनिः'। तथा गावोस्येति मतुपि गोमान्, तत्र स्रजिष्ठो गविष्ठ इत्यादौ भवन्विन्मतोर्लुक् स्रजयति गावयतीत्यादावपि भवति। तत्र कृते टेरिति प्रकृतेर्यष्टिलोपः प्राप्तः स 'प्रकृत्यैकाजि'ति प्रकृतिभावान्न भवति, तत्राजन्तेषु 'अचो ञ्णितीति वृद्धिः, स्रगादिष्व'त उपधाया'इति अङ्गवृत्ते पुनर्वृत्तावविधिरिति न भवतीति भाष्ये स्थितम्। सन्यग्लोपित्वात्सन्वदित्वदीर्घत्वयोरभावादसस्रजदजुगवदित्यादि भवति, मायाविनमाचष्टे मेधाविनमाचष्टे वसुमन्तमाचष्टे दृषद्वन्तमाचष्टे इत्यादौ विन्मतोर्लुकि प्रकृतेरनेकाच्त्वाट्टिलोपे भावयति, मेधयति, वसयती, दृषयतीत्यादि भवति, सकारान्तानामपि पयस्विनमाचष्टे तेजस्विनमाचष्टे आयुष्मन्तमाचष्टइत्यादौ णौ विन्मतोर्लुगिति लोपे पयसयति, तेजसयति, आयुषयतीत्यादि भवतीति प्रकृत्यैकाजित्यत्र पदमञ्जर्यां स्थितं, कैयटे तु तत्र भाष्यकारेणेष्ठेयसुनोर्विधीयमानोयं प्रकृत्यैकाजिति प्रकृतिभावः क्व भवतीति विचार्य विन्मतोर्लुगर्थमिति विन्मत्वन्तादिष्ठेयसुनोर्विन्मतोश्च लुकि स्रगिष्ठादौ स्रगादेष्टिलोपाभावार्थमित्यभिधाय विन्मतोर्लुगयं ना प्राप्ते टिलोपे आरभ्यमाणस्तं बाधिष्यते, स एव हि लोपः कृतेपि विन्मतोर्लुकि स्रगादौ प्रवर्त्ततइत्य-

भ्यासलोपौ भविष्यतः, नित्यावेत्वाभ्यासलोपौ, कृतेपीटि प्राप्नुतो ऽकृतेपि, इट् पुनरनित्यः, कृतयोस्तयोरेकाचः श्रूयमाणादिति प्रतिषेधात् । एवं तर्हि थलि च सेटीत्यत्र सेड्ग्रहणं कालावधारणार्थं भविष्यति, कथं, तत्र थल्ग्रहणं न कर्त्तव्यं, सेटीत्येतावता सिद्धम्, अत एकहल्मध्यइत्यादिसर्वमनुवर्त्तते, क्डिद्ग्रहणमेकं निवृत्तं, न च थलोन्यः सेड् क्लिल्टि संभवति, सोयमेवं सिद्धे यत्थल्ग्रहणं करोति तस्यैतत्प्रयोजनं क्लिता सह समुच्चयार्थं, थलि च क्लिति च सेटि एत्वाभ्यासलोपौ भवत इति, तत्र क्लिति पूर्वेणैव सिद्धे कालावधारणार्थमिदं वचनमिटि कृते एत्वाभ्यासलोपौ यथा स्यातामकृते माभूतामिति, यथा निष्ठायां सेटीत्यत्र, एवमपि विधित्सति चिच्छित्सतीत्यत्र नित्यत्त्वाद् द्विर्वचने कृते एकाचः श्रूयमाणादिति प्रतिषेधो न स्यात् । तस्मादुभयविशेषणमुपदेशग्रहणम्, अत एवेदं मध्ये पठितं, यद्युभयविशेषणं बेभिदिता, चेच्छिदिता, अत्रापि प्राप्नोति, अल्लोपस्य पूर्वस्मादपि विधौ स्थानिवद्भावान्न भविष्यति, यङ्लुगन्ते तर्हि प्राप्नोति बेभेदिता चेच्छिदिता, यत्रैकाज्ग्रहणं किंचित्पश्चैतानि न यङ्लुकीति वचनान्न भविष्यत्ति । 'के पुनरिति' । पाठे संकरसंभवात्प्रश्नः, असंकरेण पठितव्या इत्युत्तरम् । 'प्रविभक्ता इति' । स्वरान्तहलन्तककारादिवर्णभेदेनेत्यर्थः । श्लोकेष्वनिड्ग्रहणमनुदात्तोपलक्षणं, षष्ठीसप्तम्यश्च धातुविषयनिर्धारणे द्रष्टव्याः । 'श्विडीङिति'। समाहारद्वन्द्वे द्वितीयान्तम् । 'गणस्थमिति' । श्लोकपूरणार्थं, स्वभावकथनमेतत्, म'त्,मत्तः । निबोधत, अवगच्छत । 'द्वयेत्यादिश्लोकयोर्द्वयोर्विवरणम्, इति स्वरान्ता इत्यस्य पुनः पाठो निगदव्याख्यानतां दर्शयितुं द्रष्टव्यः । अन्ये तु पूर्वं न पठन्ति । 'यमिर्यमन्तेष्विति' । 'श्यनि पठ्यते इति' । दिवादौ पठ्यते इत्यर्थः । 'प्रतिषेधवाचिनामिति' । इट्प्रतिषेधं कुर्वतामाचार्याणां मतेनेत्यर्थः । 'दहिर्दुहिरिति'। यद्विषयः संशयः पुरुषाणां नास्ति ते मुक्तसंशयाः, तन्त्रान्तरं, व्याकरणान्तरम्, आपिशलादि । 'सहेर्विकल्प इति' । तीषसहेत्या-

१ सन्निबोधतेति मुद्रितमूलपुस्तके पाठः पदमञ्जर्यसंमतः ।

दिना । 'सविकल्पाविति' । विकल्पस्तद्विषयः संशय इत्यर्थः । 'स्वरूपेणैव ससंशयाविति' । तौ स्तो न इत्यपि संशयस्तत्रेत्यर्थः । 'दिशिं दृशिमिति' । पुराणं चिरन्तनं व्याकरणं ये ऽधीयते ते पुराणगाः । पाठेषु, धात्वादिषु । ऋदुपधानामित्यादिना तेष्वनुदात्तोपदेशस्य प्रयोजनान्तरं समुच्चिनोति । एवं च श्लोकेष्वनिट इत्यस्यानुदात्तोपलक्षणत्वं निश्चितम् । 'रुधिः सराधिरिति' । 'न्याय्यविकरणयोरिति'। न्याय्य उत्सर्गः, शब्विकरणयोरित्यर्थः । क्वचित्तु तथैव पाठः, केचिद्भौवादिकं सिधिमुदितं पठन्ति षिधु गत्यामिति, तेन तस्य क्त्वायां विकल्पितेट्त्वान्निष्ठायां यस्य विभाषेति प्रतिषेधेन भवितव्यं, तथा दैवादिकस्य भौवादिकस्य च बुधेरर्थे रूपे वा विशेषो नास्ति ततश्चैक एवायं बुधिर्विकरणद्वयार्थं तु द्वयोर्गणयोः पाठः, तस्य चार्द्धधातुकलक्षण इडप्युक्तः, प्रतिषेधोपीत्येकविषयत्वाद्विभाषितेट्त्वं, ततश्च तस्यापि निष्ठायां प्रतिषेधेन भवितव्यमिति मन्यमानं प्रत्याह । 'निष्ठायामपीति' । सिधेरुदित्त्वं तावदनन्यार्थं, न च यथाकथं चिदिटो भावाभावौ निष्ठायां निषेधस्य निमित्तं किं तर्हि विकल्पवाचिना विभाषादिशब्देन विकल्पितेट्त्वमिति भावः । 'तपिं तिपिमिति' । तिपिचपी इति पाठः, नीचेन स्वरेणानुदात्तेन पठितान्प्रतीहि निबोधतेति, प्रस्तावात्प्रतीतेति पाठः, प्रतीहीति पाठे उत्तरानुरोधः । 'विद्ध्यनिट्स्वरानिति'। 'तेप्तेति' । तिपृ तेपृ ष्टिपृ ष्टेपृ क्षरणे । 'छोप्तेति' । छुप स्पर्शने । 'पचिं वचिमिति' । 'सृजिमृजीति' । समाहारद्वन्द्वः, अनिट्त्वस्य हेतुः स्वरो येषां ते ऽनिट्स्वराः, ततोस्य विकल्पेन भवितव्यमिति, तेनानिट्स्वरार्थोनुदात्तपाठो न भवति । 'अमागमोपीति' । तेन तदर्थोप्यनुदात्तपाठो न भवति । तत्कस्मादिहानिट्कारिकासु पठ्यतइत्यत आह । 'केचिदित्यादि' । युक्तं चैतदित्याह । 'निजादिषु हीति' । निजां त्रयाणां गुणः श्लाविल्यत्र पठिता निजादयः, अत्रैव व्याकरणान्तरानुमतिं दर्शयति । 'तथा चेति'। 'अवधीदिति' । किं पुनरयमुपदेशेनुद्रात्तः, ओमित्याह । क्व पुनरस्योपदेशः, हनो वध लिङीति, किमेकाज्ग्रहणं न निवर्त्तयिष्या-

मीत्यनुदात्त उपदिश्यते, नह्यस्यान्यदनुदात्तत्वे प्रयोजनं, न ब्रूमोस्मिन्नुपदेशेयमनुदात्त इति, हन्तिरनुदात्तस्तस्य स्थाने भवन्स्थानिवद्भावेनानुदात्तः, क्रियमाणेपि तर्ह्येकाज्ग्रहणे यावता स्थानिवद्भावः कस्मादस्य प्रतिषेधो न स्यात्, एकाज्व्यपदेशस्य स्थान्यलाश्रयत्वादनल्विधाविति प्रतिषेधादिति चेद्धन्त्वेवमनुदात्तव्यपदेशोपि स्थान्यलाश्रयत्वात्कथमिवास्य स्यात् । स्यादेतत् । नात्र स्थानिवद्भावेन प्रसङ्गः, किं तर्ह्युपदेशग्रहणेन, यथा कर्त्ता कर्तुमित्यादौ रूपभेदे स्वरभेदे च भवति तत्कस्य हेतोर्यः स उपदेशेनुदात्तः स एवेमामवस्थामापन्न इति कृत्वा, न तु स्थानिवद्भावादेवमिहापि य उपदेशेनुदात्तो हन्तिः स एवायमिति उपदेशग्रहणात्प्रसङ्ग इति, क्रियमाणेपि तर्ह्येकाज्ग्रहणे कथमिवास्य व्यावृत्तिः, यावता उपदेशग्रहणस्योभाभ्यां संबन्धः, य उपदेशे एकाच् स एवायमिति स्यादेव प्रसङ्गः, तस्माद्वधेराद्युदात्तनिपातनं कर्त्तव्यं तत्सामर्थ्याद्धन्त्युपदेशविषयानुदात्तत्वाश्रयोपि प्रतिषेधो न भवति, नह्येतदाद्युदात्तत्वं प्रयोगसमवायि, प्रत्ययस्वरेण बाधितत्वादित्येवमत्र परिहारो वाच्यः, एकाज्ग्रहणमु[१]त्तरार्थम् ॥

"श्र्युकः किति" ॥ येषां प्रकृत्याश्रयः प्रतिषेधो नास्ति तदर्थमिदं श्रितः श्रितवान्, युतः युतवान् इति, सनीवन्तर्द्धेति विकल्पितेट्त्वाद्वास्य विभाषेति प्रतिषेधः सिद्धः । 'केचिदित्यादि' । यथा ग्लाजिस्थश्च क्स्नुरित्यत्रोक्तं क्स्नोर्गित्त्वाच स्थ ईकार इत्यादि । यदि गकारः प्रश्लिष्यते श्र्युकः कितीति निर्द्देशो नोपपद्यते गकारे परतो हशि चेत्युत्वं प्राप्नोति, चर्त्वे च कृते कुप्वोः ꣵकꣶपौ चेत्येष विधिर्भवति, चर्त्वस्यासिद्धत्वादुत्वमेव प्राप्नोति, तत्राह । 'सौत्रत्वादिति' । अत्रापि ग्रन्थे वर्णयन्तीत्यस्य संबन्धः, तदेतद्दूषयति । 'ग्लाजिस्थश्च ग्स्नुरित्यत्रेति' । आकारप्रश्लेषे सति तिष्ठतेराकारान्तादित्यर्थो भवति, तिष्ठतिश्चाकारान्त एव, तत्र विशेषणमुत्तरकालभावीकारनिवृत्त्यर्थं विज्ञायते, ततश्च ।

> कथं प्रकृतिनिर्द्देशे पञ्चम्यां परतः श्रुतः ।
> आकारोयं विधेयः स्यादिति चोद्यमपाकृतम् ॥

१ एकाज्ग्रहणन्त्विति पाठः ई॰ पु॰ ।

'स्थास्नोः'। स्थास्नुशब्दस्य। 'न किंचिदेतदिति'। एतद्गकारप्रश्लेषवर्णनमशोभनमित्यर्थः। ग्स्नुप्रत्ययस्य गित्त्वे हि गप्रश्लेषोऽत्र युज्यते, कित्त्वेपि तिष्ठतेरीत्वमुक्ताद्धेतोर्निवर्त्तते। 'तीर्णं इत्यत्रापि यथा स्यादिति'। इह तु तीर्त्वा पूर्त्वेति आनुपूर्व्यात्सिद्धं, कथं, तृत्वा पृत्वा इति स्थिते यावदिट्प्रतिषेधो न प्रवर्तते तावदित्वोत्वे न प्राप्नुतः, किं कारणं, क्ङितीत्युच्यते, न चाकृतइट्प्रतिषेधे क्त्वा किद्भवति, न क्त्वा सेडिति प्रतिषेधात्, किं च भो इत्वोत्वे किति विधीयेते, न किति विधीयेते, किति तु विज्ञायेते, कथमित्वोत्वाभ्यां गुणवृद्धी भवतो विप्रतिषेधेन, तस्मात्प्रागेव संनिहितं कित्त्वमाश्रित्येट्प्रतिषेधे प्रवृत्ते इत्वोत्वे भवतः, कृतयोस्तर्हि तयोः प्रतिषेधनिमित्तस्योगन्तत्वस्यापगमात्पुनरिट् प्रसङ्गः, तस्मिंश्च सति न क्त्वा सेडिति कित्त्वप्रतिषेधाद्गुणे सति तरित्वा परित्वेति प्राप्नोति, नैतदस्ति, प्रसङ्गावस्थायामेव प्रतिषेधेन बाधितस्य भ्रष्टावसरस्य पुनः प्रवृत्त्ययोगात्, इह च तितीर्षति मुमूर्षतीति नाकृतइटः प्रतिषेधे सनः कित्त्वमझलादित्वादसति च कित्त्वे गुणस्यायं विषय इति इत्वोत्वयोरप्रसङ्ग इति, आनुपूर्व्यात्सिद्धमित्येव, यदि वा तृस इति स्थिते ऽनवकाशत्वादिट् सनि वेति ऋकारान्तनिमित्त इड्विकल्पः प्रवर्त्तते, तत्रेडभावपक्षे कित्त्वाद्गुणे निषिद्धे इत्वोत्वयोः कृतयोरपि विकल्पेन बाधितस्येड्लक्षणस्य भ्रष्टावसरत्वेन पुनः प्रवृत्त्ययोगात्सिद्धमिष्टं, तस्मात्तीर्णं इत्यत्र चोपदेशाधिकारस्योपयोगः। कस्मात्पुनरसत्युपदेशाधिकारेऽत्र न स्यादित्यत आह। 'इत्वे हि कृतइति'। किं पुनः कारणमित्वमेव तावद्भवति, नित्यत्वात्, माभूदित्यादि चोदकः, कस्य पुनरित्यादीतरः। ऋत इत्यादि चोदकः, यद्येवमित्यादीतरः। 'स्थानिवद्भावादिति' चोदकः, अनल्विधावित्यादीतरः, अल्विधित्वं पुनरर्गिति प्रत्याहारग्रहणात्, ननु चेत्वोत्वयोः कृतयोः संप्रत्यृकाराभावेप्येकदेशविकृतस्यानन्यत्वात्स एव धातुर्यस्य सनि विभाषा विहितेतीट्प्रतिषेधो भविष्यति। नैतदस्ति, आदितश्चेति योगविभागेन ज्ञापयिष्यते, यदुपाधेर्विभाषा तदुपाधेः प्रतिषेध इति, ततश्च ऋकारान्तत्वमुपाधिरिड्विकल्पे स चेत्वे कृते नास्तीति कथं प्रतिषेधः स्यात्। 'तस्मा-

दित्यादि ’। यस्मादेवमसत्युपदेशग्रहणे तीर्ण इत्यत्र प्रतिषेधो न सेत्स्यति[1] तस्मादुपदेश इत्यनुवर्तनीयम् । ‘तथा च सतीति’। उपदेशइत्यनुवर्त्तमाने सतीत्यर्थः । ‘अत्रापि प्राप्नोतीति’। जागर्तेरुपदेशावस्थायामुगन्तत्वात् । ‘तदर्थमिति’। जागरित इत्यादिसिद्ध्यर्थं, जागरित इत्यादाविट्प्रतिषेधनिवृत्त्यर्थमिति वा, तथा च वार्त्तिकम् । एकाज्ग्रहणं जागर्त्यर्थमिति । पूर्वसूत्रेनुपयोगादिहार्थमेकाज्ग्रहणमित्यर्थः । भाष्यकारस्त्वाह, यस्य क्वचिदिड्विकल्पो दृष्टः स धातुराश्रीयते, यस्य विभाषेति, न तु तद्गतं विकल्पकारणमूकारादि, भवति चेत्वोत्वयोः कृतयोरयमपि स एव धातुरिति तीर्ण इत्यादौ सिद्धः प्रतिषेध इति, यद्येवं विभाषा गमहनविदविशामिति विशिना साहचर्यात्तौदादिकस्य विदेः क्वसाविटि विकल्पिते दैवा[2]दिकस्यापि विदेर्निष्ठायां प्रतिषेधः प्राप्नोति, विदितः विदितवानिति, न, धातुभेदात्, कथं धातुभेदः, अर्थभेदादनुबन्धभेदाद्विकरणभेदाच्च। तदेवं नार्थ उपदेशाधिकारेण नापि एकाज्ग्रहणानुवृत्त्या, किमर्थं तर्हि पूर्वसूत्रे एकाज्ग्रहणं यङ्लुगन्तनिवृत्त्यर्थम् । ननु च क्रियमाणेप्येकाज्ग्रहणे यङ्लुगन्तस्य प्रतिषेधः प्राप्नोति, उपदेशग्रहणस्योभयविशेषणत्वात् । यथा बिभित्सतीति । तत्रैतत्स्यात् क्रियमाणे एकाज्ग्रहणे यत्रैकाज्ग्रहणं किं चिदिति वचनाद्यङ्लुगन्तस्य न भवतीति तच्च वार्त्तमक्रियमाणेपि चैकाज्ग्रहणे वचनान्तराश्रयणेन यङ्लुगन्ते[3]पि परिहारः, तदेव वचनमेवं पठतां यत्रोपदेशग्रहणमिति, अनुदात्तोपदेशलक्षणोनुनासिकलोपोपि तर्हि यङ्लुगन्तानां तसादिषु न स्यात्, तथा इवन्तानां दिविप्रभृतीनां यङ्लुगन्तानामपि सनीड्विकल्पः प्राप्नोति, क्रियमाणे पुनरेकाज्ग्रहणे न भवति, एकाच इति तत्रानुवृत्तेः, यदि नेष्यते एवं वक्ष्यामि उपदेशेनुदात्तात्च यङ्लुक इति, अधिकारोयं, यत्रैकाज्ग्रहणेन यङ्लुगन्तस्य व्यावृत्तिरिष्यते, तत्रोपतिष्ठते एवमपि वावृतु वरणइति दिवादावनेका-

१ भविष्यतीति पा॰ इं॰ पु॰ ।
२ आदादिकस्येति इं॰ पु॰ पाठः ।
३ यङ्लुगन्तस्येति इं॰ पु॰ पा॰ ।

जुदिदनुदात्तेत्पठ्यते, तथा च भट्टिकाव्ये प्रयोगः, ततो वावृत्यमानो ऽसौ रामः शालां न्यविशतेति, तस्योदितो विकल्पितेटो निष्ठायां यस्य विभाषेति प्रतिषेधः प्राप्नोति, एकाज्ग्रहणे तु क्रियमाणे न भवति, एकाच इति तत्रानुवृत्तेः, तथा च निष्ठायां सेटीत्यत्रापि वृत्तिकारेणोक्तम्, अथ पुनरेकाच इति तत्रानुवर्त्ततइत्यादि, अन्ये पुनर्भाष्यकारेणैकाज्ग्रहणस्य प्रत्याख्यातत्वाच्चैतदिष्यतइत्याहुः। तथा च वृत्तिकारेणापि पाक्षिकत्वेनैवोक्तं अथ पुनरेकाच इति तत्रानुवर्त्ततइति कृतमतिविस्तरेण॥

"सनि ग्रहगुहोश्च"॥ चकार उगनुकर्षणार्थः। न चेको झलिति सनः कित्वात् उगन्तानां पूर्वेणैव सिद्धिः, किं कारणं, झलादौ सनः कित्वं, न चान्तरेणेट्प्रतिषेधं सन् झलादिर्भवति, तेन येषु प्रकृत्याश्रयः प्रतिषेधो नास्ति तेष्वनेनैवेटि प्रतिषिद्धे झलादित्वे सनः कित्वमित्येष क्रमः। 'जिघृक्षतीति'। रुदविदेत्यादिना सनः कित्वं, ग्रहिज्यादिसूत्रेण संप्रसारणं, हो ढः, षढोः कस्सि, एकाचो बशो भष्। 'जुघुक्षतीति'। गुहू संवरणे, स्वरितेत्, हलन्ताच्चेति सनः कित्वम्, अथ चकारेणोगिदिव श्रयतिरपि कस्मान्नानुकृष्यते ऽत आह। 'श्रिस्वृयूर्ण्वित्यादि'॥

"कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि"॥ 'क्रादय एव लिट्यनिटइति'। लिट्येव क्रादयो ऽनिट इत्येष तु विपरीतोऽत्र नियमो न भवति, क्रादीनामनुदात्तोपदेशसामर्थ्यात्। 'कृतलब्धक्रीतकुशलाः'। 'तमधीष्टो भृतः'। 'परिवृतो रथः' 'स्तुतस्तोमयो' रित्यादिनिर्देशाच्च। केन पुनरेषामिट्प्रतिषेधः सिद्धः, यतो नियमार्थो यमारम्भ इत्यत आह। 'अनुदात्तोपदेशानामित्यादि'। वृङ्वृञ्भ्यामन्ये ऽनुदात्तोपदेशास्तेषां प्रकृत्याश्रय एकाच उपदेशइतीट्प्रतिषेधः सिद्धः। वृङ्वृञोस्तु प्रत्ययाश्रयः श्र्युकः क्कितीत्येषः। तस्मादुभयस्यापि प्रकृत्याश्रयस्य प्रत्ययाश्रयस्य च। कथं पुनरयं प्रत्ययाश्रयस्य नियमः, यावता वृग्रहणं वृञस्थलि विध्यर्थं संभवति, नहि तत्र प्रकृत्याश्रयः प्रतिषेधः, वृञ उदात्तत्वात्, नापि प्रत्ययाश्रयः, थलः कित्वाभावात्, असति प्रत्ययाश्रयस्य नियमे वुवुविथेत्यादावपि न स्यादित्यत आह। 'वृञो हीति'। व्यवस्था, नियमः, इह तुष्टोथेत्यादौ, ऋतो भारद्वाजस्येत्येतस्माद्वि-

यमादिट् प्राप्नोति, ययियेत्यादिवत् । यथा हि ययिथ, पपियेत्यादावार्द्ध-धातुकस्येतीट् प्राप्त एकाच इति निषिद्धः पुनः क्रादिनियमात् प्राप्नोव-स्तास्वत्थलीति प्रतिषिद्धस्तत अतो भारद्वाजस्य थलि प्रतिषेधो नान्येभ्य इति नियमात्पत्ते इड्भवति तथात्रापि स्यात्, कथं खलु क्रादिनियमस्य बा-धकम् अचस्तास्वदिति प्रतिषेधं बाधमानो भारद्वाजनियमः क्रादिप्रतिषेधं न बाधेत । क्सभृञ्वित्येतेषु पुनर्नायं दोषस्तेषामृकारान्तत्वेन भारद्वाजपत्ते-पीटः प्रतिषेधात्, एवं तर्हि स्तुद्रुस्रुश्रुवां ग्रहणं विध्यर्थं भविष्यति, असति हि विधेये नियमो भवति, इह चास्ति विधेयं, किं, थलि भारद्वाजनियमादिटः प्राप्तस्य प्रतिषेधः, इतरेषान्तु क्रादीनां ग्रहणं नियमार्थं भविष्यतीति । बिभि-दिव लुलुविवेत्यादावपि न दोषः, कथं पुनस्तुष्टुमः, अत्र हि क्रादिनियमादिट् प्राप्नोति, नैष दोषः । स्तुद्रुस्रुश्रुवां ग्रहणमुभयोरपि प्रतिषेधार्थं, यश्च क्रा-दिनियमादिट् प्राप्तः यश्च भारद्वाजनियमात्तयोरुभयोरपीत्यर्थः । यद्येवं येन नाप्राप्तिन्यायेन क्रादिनियममेव स्तुद्रुस्रुश्रुवां प्रतिषेधो बाधेत न तु विकल्पेन प्राप्तं भारद्वाजनियमं, ततश्चासौ स्य देवेत्याशङ्क्याह । 'स्तुद्रु-स्रुश्रुवां त्विति' । एतच्च पुरस्तात्प्रतिषेधकाण्डकरणाल्लभ्यते । तथाहि । प्राप्तिपूर्वकत्वात्प्रतिषेधस्य पूर्वं विधिप्रकरणं पठितव्यमार्द्धधातुकस्येत्या-रभ्य ईडजनोर्ध्वे चेत्येवमन्तं,पश्चात्प्रतिषेधप्रकरणं, तद्यथान्यत्रापि कर्त्तरि कर्मव्यतिहारे, न गतिहिंसार्थेभ्य इति, तत्रायमर्थो ग्रिरिड्ग्रहणं न कर्त्तव्यं भवति प्रकृतमनुवर्त्तते, नन्वेवं रुदादिभ्यः सार्वधातुक इति सार्वधातुकग्र-हणं लिङः सलोपोनन्त्यस्येत्यत्र विच्छिद्येत, एवं तर्हि न वृद्भ्यश्चतुर्भ्य इत्यत्रैव पठितव्यमेवं हि विध्युत्तरकालश्च प्रतिषेधः कृतो भवति, ग्रिश्चे-ड्ग्रहणं न कर्त्तव्यम्भवति, सार्वधातुकग्रहणं च सलोपेन विच्छिद्यते, अपि च ग्रिःप्रतिषेधो न कर्त्तव्यो भवति, सोयमेवं सिद्धे यत्पुरस्तात्प्रतिषेधकाण्डं करोति तस्यैतत्प्रयोजनमनाश्रितविधानविशेषमिण्मात्रमनारभ्याधीतेन प्रतिषेधेन यथा बाध्येतेति, यदि तु भारद्वाजनियमात्परमिदं काण्डं क्रियेत ततो मध्येपवादन्यायेन भारद्वाजनियमोचस्तास्वदिति प्रतिषेधमेव बाधेत न तु क्रादिनिषेधमिति पुरस्तात्प्रतिषेधकरणे न कश्चिद्दोषः । अपर आह ।

यत्र तत्र वा प्रतिषेधकरणमस्तु, सर्वथा तु भारद्वाजनियमोचस्तास्वदि- ति योगद्वयेन थलि यः प्रतिषेधः प्राप्तस्तस्यैव नियामकः, अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति, ततश्च स्तुद्रुस्रुश्रवामपि भारद्वाजनियमे- नाचस्तास्वदिति प्रतिषेध एव निवर्त्तते न तु क्रादिप्रतिषेध इति तन्मते पुरस्तात्प्रतिषेधकरणस्य प्रयोजनमुत्तरत्र दर्शयिष्यामः । 'क्रओसुट इति वक्तव्यमिति' । कृतेपि सुटि करोतिर्भवत्येवेति प्रतिषेधप्रसङ्गः ॥

"श्वीदितो निष्ठायाम्" ॥ श्विग्रहणं किमर्थं न संप्रसारणे कृते परस्य पूर्वत्वे चोगन्तत्वे सति श्र्युकः कितीत्येव सिद्धं, न सिध्यति, श्वित इति स्थिते परत्वादिट् प्राप्नोति, अथापि पूर्वं संप्रसारणमेवमपि श्र्युकः किती- त्यत्रोपदेशइत्यनुवृत्तेरस्य चोपदेशे इदन्तत्वाच्च सिध्यति । 'डीङ इत्या- दि' । डीङयं स्वादीनां मध्ये पठ्यते, ते च ओदितः, स्वादय ओदित इति वचनात्कथमेतज्ज्ञापकमित्यत आह । 'स हीति' । निष्ठातः निष्ठातका- रस्य अनन्तरस्य विधीयतइति इटि सत्यानन्तर्य्यं विहन्येत, एवञ्च सति श्वयतेरप्यत्र ग्रहणं शक्यमकर्त्तुम्, तथा ओलस्जीप्रभृतीनामपि उक्तेनैव न्या- येनेडभावस्य सिद्धत्वात् ॥

"यस्य विभाषा" ॥ यस्य विभाषेत्यनुवादवाक्यम्, अत्र चेड्विहित इति वाक्यशेषः, यत्तदोर्नित्यसंबन्धात्तस्य निष्ठायामिण्न भवतीति प्रतिषे- धवाक्यं संपद्यते। 'निपातनादिडागम इति'। अपर आह। अनित्योयं प्रति- षेधः, कृती छेदनइत्यस्य ईदित्करणसामर्थ्यात्, यदि ह्ययं विधिर्नित्यः स्यात्से सिचीत्यनेन विभाषितेट्त्वादनेनैव प्रतिषेधस्य सिद्धत्वादीदित्क- रणमनर्थकं स्यादिति ॥

"आदितश्च"॥ 'आश्वस्तो वान्त इति'। भाष्यवार्तिकयोरनुक्त- मपि प्रयोगबाहुल्यादुक्तम् । 'योगविभागकरणं किमिति' । योगविभाग- एव तावद्दोषः । अपि च एकयोगत्वे चकारो न कर्त्तव्यो भवतीति प्रश्नः । एवं चोत्तरग्रन्थे चकारो न पठितव्यः, पठ्यमानस्तु अनुक्तसमुच्च- यार्थो व्याख्येयः, कथं पुनरेकयोगत्वे भावादिकर्मभ्यामन्यत्र प्रतिषेधः सि- द्धस्तत्राह । 'अन्यत्रेति' । 'यदुपाधिरिति' । उपाधिरभिधेयादिर्भेदकः,

["Oh; make the night black with ink dust! apply or use some incantations or other means to take away the splendour of the white lotus! Smash the moon to pieces on a piece of stone! So that I might be able to see the ten sides stamped with her face."]

(*a*) Here the 'night' must have been particularised as the 'moonlit nights.'

(15) The Limited Unrestrictible. "कल्लोलवेल्लितदृषत्परुषप्रहारैः
रत्नान्यमूनि मकरालय माऽवमंस्थाः ।
किं कौस्तुभेन विहितो भवतो न नाम
याच्ञा प्रसारितकरः पुरुषोत्तमोऽपि" ॥

["O thou receptacle of crocodiles, do not disrespect these gems by hitting them with stones moved to and fro by the waves. For, was not even Nārāyaṇa made your beggar, owing to Kaustubha."]

[*Page* 450.] Here the proper reading (*b*) should have been "एकेन किं न, &c.," thus referring to 'gems' *in general*.

(16) Incomplete. "अर्थित्वे प्रकटीकृते ऽपि न फलप्राप्तिः प्रभोः प्रत्युत
द्रुह्यन् दाशरथिर्विरुद्धचरितो युक्तस्तया कन्यया ।
उत्कर्षं च परस्य मानयशसो विस्रंसनं चात्मनः
स्त्रीरत्नं च जगत्पतिर्दशमुखो देवः कथम्मृष्यते" ॥

[*Mahāvīracharita*, Act II.]

["O Lord, even on exhibiting beggarliness, the desired object has not been obtained,—nay to her has been joined the son of Daçaratha, your enemy, who hates you. How can you, the ten-faced Lord of the world, bear this, and the excess of an enemy's pride and fame and the derogation of your own? and this the gem of women!"]

(*a*) *Pradipa*.—"Since the other kind of nights – the dark ones—being naturally dark, do not need any further darkening."

(*b*) *Pradipa*.—For as the passage stands, the impropriety of disrespect towards gems in general, is not shown by mentioning merely Kaustubha a particular gem, as having done the ocean an important service.

Here the sentence requires (*a*)—'the giving up of the gem of woman'—to complete its sense. Nor is it proper to construe स्त्रीरत्न, &c. with परस्य.

[*Page* 452.] "आज्ञा शक्रशिखामणिप्रणयिनी शास्त्राणि चक्षुर्नवम्
(17) Introduction in a wrong place.
भक्तिर्भूतपतौ पिनाकिनि पदं लङ्केति दिव्या पुरी ।
उत्पत्तिर्द्रुहिणान्वये च तदहो नेदृग्वरो लभ्यते
स्याच्चेदेष न रावणः, क्व नु पुनः सर्वत्र सर्वे गुणाः" ॥

[*Bālarāmāyana*, Act I.]

["His commands borne by Indra on his head! the sciences his fresh eyes! His devotion to Çiva! Laṅkā his beautiful residence! His birth too in the family of Brahmā! Oh a similar bridegroom could not be found! Had he not been Rāvaṇa (the terrifying)! But where do all excellences reside?"]

[*Page* 453.] (*b*) Here the sentence must have been completed at रावणः

(18) Heterogenous or Mismatched Associates.
"श्रुतेन बुद्धिर्व्यसनेन मूर्खता
मदेन नारी सलिलेन निम्नगा ।
निशा शशाङ्केन धृतिः समाधिना
नयेन चालङ्क्रियते नरेन्द्रता" ॥

["The intellect is ornamented by science; foolishness by frivolity; woman by lasciviousness (or pride); river by water; the night by the moon; equanimity by meditation; and kingliness by policy."]

[*Page* 454.] Here the associating of such excellent subjects as 'science,' &c., with the degrading ones 'foolishness,' &c., is an extremely improper and heterogenous match.

(*a*) *Pradipa.*—Since there cannot be anger on the 'gem of women,' but on the 'relinquishing' of her......It cannot construed with परस्य, since this term has its sense completed in the third foot and requires nothing more for its completion.

(*b*) *Pradīpa.*—Since the meaning desired to be conveyed in the abandoning of the idea of marrying Sītā to Rāvaṇa on the ground of his being a source of terror to the world. And this sense is fully completed at रावण; in fact the following sentence perverts the desired meaning.

(19) Of Disagreeable second Entendre.

In "लग्नंरागावृताङ्ग्या" [*Text*, p. 411] a sense—that the Goddess of wealth will disappear thence—is implied by विदितं तेऽस्तु.

(20) The Improper Predication.

"प्रयत्नपरिबोधितः स्तुतिभिरद्य शेषे निशा-
मकेशवमपाण्डवम् भुवनमद्य निःसोमकम् ।
इयम्परिसमाप्यते रणकथा ऽद्य दोःशालिनाम्
अपैतु रिपुकाननातिगुरुरद्य भारो भुवः" ॥

[*Vēṇīsaṁhāra*, Act III.]

["To-night you will sleep so soundly, as to be awakened with eulogistic songs with some effort. The world will be without Krishṇa, Pāṇḍavas and the Panchālās; thus to-day will be finished the talk of battle of Kshatriyas; be the earth to-day rid of the weight of the forest of our enemies."]

Here the proper predicate (necessary for the gratification of the expectancy raised) should be 'प्रयत्नेन बोध्यसे.'

[*Page* 456]. Or again—

"वाताहारतया जगद्विषधरैराश्वास्य निःशेषितम्
ते ग्रस्ताः पुनरभ्रतोयकणिकातीव्रव्रतैर्बर्हिभिः ।
ते ऽपि क्रूरचमूरुचर्मवसनैर्नीताः क्षयं लुब्धकैः
दम्भस्य स्फुरितं विदन्नपि जनो जाल्मो गुणानीहते" ॥

["The earth was emptied by the snakes, having won confidence by means of their show of living on pure air; these snakes too were devoured by the peacocks undergoing the penance of drinking only of a drop of rain; these peacocks again in their turn were killed by the fowlers wearing deer-skins; even knowing all these results of religious hypocrisy and roguery, men accept these as excellences."]

(*a*) Here the order of the 'living on air' &c., must be changed.

(*a*) In order to have them in gradually rising order of the hardness of the penance each was undergoing.

[*Page* 457]. "अरे रामाहस्ताभरण भसलश्रेणिशरण
(21) Improper Attribute or Adjunct.
स्मरक्रीडाव्रीडाशमन विरहिप्राणदमन ।
सरोहंसोत्तंस प्रचलदल नीलोत्पल सखे
सखेदोऽहम् मोहं श्लयय कथय क्वेन्दुवदना" ॥

["O thou, the ornament of woman's hands! shelter of black bees! destroyer of shame in dalliance of love! O suppressor of lives of (persons) separated (from their beloved)! ornament of the chief of lakes! thou whose leaves are moving! O blue lotus! My friend! I am dejected! remove my delusion! and say where is the moon-faced one!"]

(*a*) Here the adjunct 'suppressor of the lives of separated persons' should not have been said.

[*Page* 458]. In "लग्नं रागावृताङ्ग्या &c." [*Text*, p. 411] the sense having been once concluded with विदितं ते ऽस्तु is again resumed.

(22) Resuming the Concluded.

(23) The Indecorous. "हन्तुमेव प्रवृत्तस्य स्तब्धस्य विवरैषिणः ।
यथा ऽस्य जायते पातो न तथा पुनरुन्नतिः" ॥

[The fall of an evil person, always vain, and trying to kill others and always giving to finding faults, is such that he can never rise again.]"

In this, the implication to the male organ is hinted.

[*Page* 459]. In the above examples where only one fault has been shown, there exist other faults also, but these were not mentioned as not being germane to the occasion.

58 (*contd.*) In such words as 'कर्णावतंस (ear-ring on the ear'), the mention of the word 'कर्ण' (ear) is for denoting *proximity*, &c.

Exceptions to the aforesaid.

The word अवतंस itself signifies an 'ear-ring'; and then the addition of a further 'ear' simply denotes the position of the ear-ring on the ear (worn on the ear). *e. g.*

(*a*) *Pradīpa.*—Since an object which was the destroyer of the lives of separated lovers, could not possibly tell of the whereabouts of his beloved and thus save his life?

[*Page* 460]. "अस्याः कर्णावतंसेन जितं सर्वं विभूषणम् ।
तथैव शोभतेऽत्यर्थमस्याः श्रवणकुण्डलम् ॥
अपूर्वमधुरामोदप्रमोदितदिशस्ततः ।
आययुर्भृङ्गमुखराः शिरःशेखरशालिनः" ॥

["By the *ear-ring on her ear*, all other ornaments have been subjugated; and similarly does shine the *kundala in her ear*."]

[The men rendering all the sides fragrant with perfumes and (as such) having the black-bee humming about them, came, with *head-ornaments on their head*."]

Here the words कर्ण, श्रवण and शिरः denote the position of the ornaments when worn.

[*Page* 461]. "विदीर्णाभिमुखारातिकराले संगरान्तरे ।
धनुर्ज्याकिणचिह्नेन दोष्णा विस्फुरितं तव" ॥

["Throbbing was thy arm, toughened by the marks made by the *bowstring on the bow* and terrible through rending the opponents, in the intervals of battle."]

Here the word 'धनुः' connotes the bowstring as applied to the bow. Elsewhere, as in the following:—

"ज्याबन्धनिष्पन्दभुजेन यस्य विनिश्वसद्वक्त्रपरम्परेण ।
कारागृहे निर्जितवासवेन लङ्केश्वरेणोषितमाप्रसादात्" ॥

["In whose (Kārtavīrya's) prison lived till his propitiation—the Lord of Lankā, the subduer of Indra, having his arms rendered motionless on being bound with the bowstring, with his series of mouths panting."]

Here we have the word ज्या by itself (since here the string without the bow is meant.)

"प्राणेश्वरपरिष्वङ्गविभ्रमप्रतिपत्तिभिः ।
मुक्ताहारेण लसता हसतीव स्तनद्वयम्" ॥

["The pearl-necklace accompanied with the consciousness of the gracefulness of the woman on the embrace of the Lord of her life, appears as if it were the smile of the breasts."]

[*Page* 462]. Here the word 'pearl' is mentioned, in order to denote the fact of the necklace being unmixed with other gems (*i. e.* made exclusively of pearls).

"सौन्दर्यसम्पत् तारुण्यं यस्यास्ते ते च विभ्रमाः ।
षट्पदान् पुष्पमालेव कान् नाकर्षति सा सखे" ॥

["That richness of beauty, youth, and those elegant graces! whom does she not attract, like a flower garland attracting the black-bees"?]

Here the word 'flower' connotes 'beautiful and fragrant flowers; since mere 'garland' (माला) without any prefix, is enough for denoting a 'flower-garland.'

58 (*concld.*) These (the above) are defended *on the ground* of usage.

Reason for the above Exception.

We could not use जघनकाञ्ची, as we do कर्णावतंस.

[*Page* 463]. In such instances as :—

"जगाद मधुरां वाचं विशदाक्षरशालिनीम्"

["Uttered sweet and clear words."],—

Inasmuch as we could get exactly the same qualificatory meaning by making मधुर &c. adverbial adjuncts,—it would not be proper to assert with regard to the above *that* "sometimes words are to be used in order to admit of qualifications to meanings, though these might have been fully comprehended beforehand."—(*Vāmana.*) (*a*)

The rule just quoted, however, applies to the following ;—

"चरणत्रपरित्राणरहिताभ्यामपि द्रुतम् ।
पादाभ्यां दूरमध्वानं व्रजन्नेष न खिद्यते" ॥

["Though walking swiftly with feet without shoes, over a great distance, he is not tired."]

(Where the adjective compound 'चरण, &c.' is not capable of being made an adverbial adjunct.)

(*a*) Vāmana has said that in the example quoted, though the meaning of 'Vāk' is already implied in "Jagāda," yet the use of "Vāk" becomes necessary for the purpose of enabling the use of such adjuncts as "Madhurām, &c. This is not proper, because "Madhuram &c., could as reasonably have been used as adverbial adjuncts to the verb "Jagāda."

59. (*contd.*) [*Page* 465]. In cases where the meaning is well-known, Inconsequentiality [vide *Text*, pp. 437-38] is not a fault.

The second Exception.

As for example :—

" चन्द्रं गता पद्मगुणान्न भुंक्ते पद्माश्रिता चान्द्रमसीमभिख्याम् ।
उमामुखं तु प्रतिपद्य लोला द्विसंश्रयाम्प्रीतिमवाप लक्ष्मीः " ॥

["Located in the moon the fickle one (Lakshmi) (grace, beauty) enjoys not the qualities of the lotus; and she enjoys not the splendour of the moon, when located in the lotus. Having got at Pārvati's face, however, she obtained the loveliness of both."]

Here the nocturnal contraction of the lotus and the diurnal dimness of the moon,—both being too well-known, the statement 'enjoys not' requires no statement of reasons.

59 (*contd.*) All (cease to be so) when they occur in imitation.

Third Exception.

Of '*all*' *i. e.* of all the faults, *unmelodiousness*, &c.

To exemplify—

[*Page* 466.] (*a*) " मृगचक्षुषमद्राक्षमित्यादि कथयत्यम् ।
पश्यैष च गवित्याह सुत्रामाणं यजेति च " ॥

["He says 'I saw a fawn-eyed one;' he said 'see the cow' and 'offer sacrifice to Indra."]

59 (*concld.*) In accordance with the speciality of the speaker, &c., sometimes even faults become excellences; and sometimes they are neither.

Fourth Exception.

Sometimes faults also become excellences through the speciality of the speaker, the described, the suggested, the expressed or denoted, and occasion, &c.; and sometimes the fault is neither a fault nor an excellence, *e. g.* when a grammarian is either the speaker or the described, and when the Furious, &c., are the *Rasas* to be suggested, *Harshness* becomes an excellence.

(*a*) °मद्राक्षम् is *unmelodious* in the Erotic; mere गो without any termination is a *grammatical anomaly*; 'sutrama' in the sense of Indra is *non-usage*.

Examples in order—

"दीधीङ्वेवीङ्समः कश्चिद्गुणवृद्ध्योरभाजनम् ।
क्विप्प्रत्ययनिभः कश्चिद्यत्र संनिहिते न ते" ॥

["Some men are non-receptacles of excellence and progress (the grammatical *guṇa* and *vriddhi*) like the root दीधीङ् and वेवीङ्; some again are like the affix क्विप् never admitting of excellence (गुण) even near them."]

(Here the speaker is a grammarian.)

and "यदा त्वामहमद्राक्षम् पदविद्याविशारदम् ।
उपाध्यायं तदाऽस्मार्षं समस्प्राक्षं च सम्मदम्" ॥

["When I saw you, well-versed in grammatical knowledge, I remembered my teacher and became elated with joy."]

(Here the grammarian is described.)

[*Page* 468]. "अन्त्रप्रोतबृहत्कपालनलकक्रूरक्वणत्कङ्कण-
प्रायप्रेङ्खितभूरिभूषणरवैराघोषयन्त्यम्बरम् ।
पीतच्छर्दितरक्तकर्दमघनप्राग्भारघोरोल्लसद्-
व्यालोलस्तनभारभैरववपुर्दर्पोद्धतं धावति" ॥

["See how proudly she advances, filling the atmosphere with the jingling of her dangling ornaments consisting of scales and thigh-bones knitted together in the entrails,—and her body looking terrible owing to be moving breasts appearing in her front covered with the mudlike blood which she had first drunk and then vomitted."]

(Here we have the Abhorrent *Rasa* depicted and as such long and harsh-sounding compounds are not out of place.)

[*Page* 469]. To exemplify non-faultiness arising from the speciality of the *described*,—

"मातङ्गाः किमु वल्गितैः किमफलैराडम्बरैर्जम्बुकाः
सारङ्गा महिषा मदं व्रजत किं, शून्येषु शूरा न के ।
कोपाटोपसमुद्भटोत्कटसटाकोटेरिभारेः पुरः
सिन्धुध्वानिनि हुङ्कृते स्फुरति यत् तद्गर्जितं गर्जितम्" ॥

इत्त्वा शेषभूतभङ्ग एव कार्यः, तस्मादेवकारस्वारस्यार्थं वाक्यान्तरगता गुणा न भञ्जनीया इति विज्ञानरूपत्वमपहतपाप्मत्वादिकत्वं च तुल्यप्रमाणकत्वादेवकारभङ्गेनापि स्वीकर्त्तव्यमित्यर्थः । न च वस्तुविरोधादिति वस्तुविरोधो ज्ञानस्य ज्ञानान्तराश्रयत्वासंभवः स किं व्याप्त्याऽभिधीयते ? उत श्रुतिबलात् ? व्याप्त्या चेत् ज्ञानं कस्यचित् गुणभूतं दृष्टमिति ब्रह्म च तथा-स्यात् श्रुतिप्रतिपन्नत्वाच्च गुणभूतमिति चेत्तत एव श्रुतिबलात् गुणाश्रय-त्वमप्यङ्गीक्रियताम् । यत्तु न ज्ञानं ज्ञानान्तराश्रयमिति तच्च ज्ञानत्वप्रयुक्तमपि तु गुणभूतज्ञानत्वप्रयुक्तम्, आत्मनस्तु गुणत्वाभावात् ज्ञानस्वरूपस्यापि ज्ञानाश्रयत्वे व्याप्तिविरोधोऽपि नास्तीत्यनुसंधेयं, विशेषाभावादिति, उभयमपि श्रुतिसिद्धत्वाविशेषाचान्योन्यबाधकं, बाधकं चेद्वीपर्य्ययेण स्यादित्यर्थः । अशक्यस्य गुणान्तराबाधेन निर्वोढुमशक्यस्य अन्यपरत्वमविरुद्धार्थान्तरपरत्वमभ्युपगम्य वदतस्तात्पर्यमाह—

भू० एवमप्यविरोध इत्यभ्युपगम्य वदन् ज्ञानमात्रमेवास्य स्वरूपं नान्यत्किञ्चिदस्तीत्ययमर्थो विज्ञानघन एवेत्यादिभिर्न प्रतिपाद्यत इति मन्यते कस्तर्हि विज्ञानघन एवेत्यवधारणस्यार्थः कृत्स्नोऽप्यात्मा जडव्यावृत्तः स्वप्रकाशो नान्यायत्तप्रकाशः स्वल्पोऽपि प्रदेशोऽस्तीत्ययमर्थो वाक्यादेव सुव्यक्तः, स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नोरसघन एव एवं वा अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवेति, न चैवं प्रत्यगात्मनो धर्मिस्वरूपस्य कृत्स्नस्य विज्ञानघनत्वेऽप्यपहतपाप्मत्वसत्यसङ्कल्पत्वादिधर्मसम्बन्धोवाक्यान्तरावगतो विरुद्ध्यते यथा सैन्धवघनस्य कृत्स्नस्य रस—

टी० "एवमपी"ति, अपहतपाप्मत्वादिविरुद्धार्थप्रतीत्यभावं मन्यत इत्यर्थः। तमेव चोद्यपूर्वकमुपपादयति "कस्तर्हीत्यादिना, वाक्यादेव सुव्यक्तत्वं वाक्यैकदेशभूतदृष्टान्तवाक्येनोपपादयति "स यथे"ति, आत्मनः सर्वत्र विज्ञानघनत्वं स्यात् ततः किं गुणाश्रयत्वस्येत्यत आह "न चैव"मिति, "स यथेति दृष्टान्तवाक्येऽप्यविरोधः कथमवगत इत्यत आह "यथे"ति, दृष्टान्तवाक्यगतावधारणस्य कोऽर्थः तत्रोपजीव्यांशश्च क इत्यत्राह "इदमत्र वाक्यतात्पर्य्य"मिति, प्रदेशभेदे जडत्वं व्यावर्त्यमित्यर्थः। विज्ञानस्वरूपत्वमित्येतद्व्याचष्टे "स्वप्रकाशस्वरूपत्व"मिति, परे तु तृतीयं सूत्रमेवं वर्णयन्ति ज्ञानमात्रस्वरूपत्वेऽपि सत्यसङ्कल्पत्वादीनां व्यावहारिकत्वादविरोधं बादरायणो मन्यत इति, तदयुक्तं व्यावहारिकत्वाश्रयणस्य विरोधफलत्वेनाविरोधसूत्रप्रणयनस्य निष्प्रयोजनत्वात्सम्भवत्यविरोधादुभयपारमार्थ्ये विरोधफलभूतव्यावहारिकत्वाश्रयणायोगात्सत्यकामत्वादीनां दुःखाद्यभावपरत्वेन निर्वाहेऽभिमते तेषां पदानामुख्यत्वाच्च अपरैरविरोधः। अन्येषां पक्षे सन्मात्ररूपेण सर्वात्मभावेन स्थित एवान्येन विभक्तेन रूपेण नानाशरीरवर्त्तिना विहरतीति यदुक्तं तन्निरूप्यम्।

श्रु० घनत्वे रसनेन्द्रियावगते चक्षुराद्यवगताः रूपकाठिन्यादयो न विरुध्यन्ते, इदमत्र वाक्यतात्पर्य्यं—यथा रसवत्त्वाम्रफलादिषु त्वगादिप्रदेशभेदेन रसभेदे सत्यपि सैन्धवघनस्य सर्वत्रैकरसत्वं तथाऽऽत्मनोऽपि सर्वत्र विज्ञानस्वरूपत्वं स्वप्रकाशस्वरूपत्वमित्यर्थः। ब्राह्माधिकरणं समाप्तम्॥

टी० किं स्वरूपं सर्वात्मभावेन तिष्ठति विसर्पता ज्ञानेनाधिष्ठितशरीरो विहरतीत्यभिप्रायः, तत्र स्वरूपस्य सर्वात्मभावोऽनुपपन्नः अणुत्वात्, तत्प्रहाणेन सन्मात्रब्रह्मतापत्तिर्जलबिन्दोर्बिन्दुत्वप्रहाणेन समुद्रतापत्तितुल्या, ततश्च जृम्भमाणस्य तरङ्गस्य पूर्वप्रलीनबिन्दुविशेषा-

श्रयत्वनिर्धारणवत् विसर्पतो ज्ञानस्य मुक्तात्मविशेषाश्रयत्वनिर्द्धारणायोगात् न मुक्तोविरहतीति वक्तुं युक्तम् । ननु मुक्तस्यात्मभावो नाम जलबिन्दोः समुद्र इव न भेदकाकारप्रहाणेन लयः किन्तु क्षीरे नीरस्येव भेदकाकाराप्रहाणेन संसर्गः, तस्य च स्वरूपस्य विसर्पणसङ्कोचनविभागाविभागविषयाः शक्तयः सन्ति, अतो विभागशक्त्या विभक्त एकदेशो विहरतीति चेत् विभक्तांशः किमिदन्तया भाति? उताह? मिति, आद्ये च सोंऽशोऽनादिश्चेद्धर्मभूतनित्यज्ञानविज्ञानविकासाद्यभ्युपगमादस्मदीय एव पक्षः स्यात्सादिश्चेत् प्रत्यगर्थैकदेशस्य पराक्तया परिणामार्चिर्विकारत्वश्रुतिभङ्गः । अहमिति भातीति चेत्तस्याहमिति भासमानस्य विभक्तस्यांशस्यांशान्तरं किमिदन्तया भाति? उताहन्तया? आद्ये तयोरात्मान्तरत्वं विभक्तस्यांशस्यादिमत्त्वं ध्रुवस्यैकस्य परिणामित्वं च स्यात्, द्वितीये च परस्परापेक्षयाऽहमिति भासमानावंशौ किमहं चाहं चेति समुच्चयार्हौ भवतः किमहमेवेति, आद्ये मिथोभेदकधर्मग्रहणेन विना समुच्चयावभासायोगात् व्यावर्तकधर्मग्रहणं स्याज्जीवान्तरव्यवच्छेदायैक्यग्रहणं च स्यात्, तत्रेदन्तया व्यावृत्तिरहन्तयैकत्वञ्च वक्तव्यम् । अत एकं प्रत्येकस्याहन्तयाऽदन्तया च भानं विरुद्ध्येत समुच्चयानर्हमहमेवेति भातीति चेत्तर्हि भेदकधर्माभावात् विभक्तत्ववादोऽर्थशून्यः स्यात् । अधिष्ठेयदेहभेदसम्बन्ध एव भेदकाकार इति चेन्न धर्मभूतज्ञानसम्बन्धेनापि करचरणादीनामिवाधिष्ठेयत्वोपपत्तेः, अतः सन्मात्ररूपेण सर्वात्मभावेनावस्थानमन्येन विभक्तरूपेण नानाशरीरवर्त्तिना विहरणं चानुपपन्नम् ॥ ब्राह्माधिकरणं समाप्तम् ॥

संकल्पाधिकरणम् । **सू० सङ्कल्पादेव तच्छ्रुतेः ॥ ८ ॥**

स्रू० मुक्तः परं ब्रह्मोपसम्पद्य ज्ञानस्वरूपोऽपहतपाप्मत्वादिसत्यसङ्कल्पत्वपर्यन्तगुणक आविर्भवतीत्युक्तं, तमधिकृत्य तस्य सङ्कल्पत्वप्रयुक्ता व्यवहाराश्च श्रूयन्ते "स तत्र पर्य्येति

जक्षत् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वे"ति किमस्य ज्ञात्यादिप्राप्तिः प्रयत्नान्तरसापेक्षा ? उत परमपुरुषस्येव सङ्कल्पमात्रादेव भवती ? ति विषये लोके राजादीनां सत्यसङ्कल्पत्वेन व्यवह्रियमाणानां कार्य्यनिष्पादने प्रयत्नान्तरसापेक्षत्वदर्शनादस्यापि तत्सापेक्षेति प्राप्ते उच्यते सङ्कल्पादेवेति, कुतः तच्छ्रुतेः, स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्तीति हि सङ्कल्पादेवास्य पित्रादीनां समुत्थानं श्रूयते, न च प्रयत्नान्तरसव्यपेक्षत्वाभिधायिश्रुत्यन्तरं दृश्यते। येनास्य सङ्कल्पादेवेत्यवधारणस्य विज्ञानघन एवेतिवद् व्यवस्थापनं क्रियते॥

टी० सू० संकल्पादेव तच्छ्रुतेः ॥ ८ ॥ अवान्तरसंगतिमाह "मुक्त"-इति, विज्ञानघन एवेतिवत्संकल्पादेवेत्यवधारणस्य सङ्कोचशङ्कया च सङ्गतिरभिप्रेता। प्रयत्नान्तरेति प्रयत्न—शब्दः सङ्कल्पव्यतिरिक्तव्यापारपरः, सत्यसङ्कल्पत्वं किं प्रयत्नान्तरसापेक्षम् ? उत ने ? ति विशय इत्यर्थः । मुक्तस्य किं ज्ञात्यादिप्राप्तिः प्रयत्नान्तरसापेक्षा ? उत सङ्कल्पमात्रमूला ? किमस्य सत्यसङ्कल्पत्वं राजादीनामिव भवति? उत परमपुरुषस्येव, किं सङ्कल्पादेवेत्यवधारणं राजादितुल्यतां निवर्त्तयितुं प्रभवति ने ? ति किमीश्वरसङ्कल्पवन्मुक्तात्मसङ्कल्पस्यामोघत्वं सम्भवति नेति? किमस्यजक्षणादयो व्यापाराः पुण्यपापरूपतया बन्धका भवन्ति नेति? बन्धकाश्चेतत्सङ्कल्पस्य कर्माधीनप्रतिघातसम्भवेनेश्वरवत्तत्सङ्कल्पस्यामोघत्वाभावेनावधारणस्य राजादितुल्यतानिवर्त्तनाक्षमत्वान्मुक्तस्य ज्ञात्यादिप्राप्तिः प्रयत्नान्तरसापेक्षा स्यात्, यदा बन्धका न भवन्ति तदा मुक्तात्मनः कर्माधीनप्रतिघातासम्भवेनेश्वरवदमोघसङ्कल्पत्वसम्भवेनावधारणस्य राजतुल्यत्वनिवर्त्तनक्षमत्वात् मुक्तस्य ज्ञात्यादिप्राप्तिः सङ्कल्पमात्रमूला स्यात् । अस्यापि तत्सापेक्षेति ज्ञात्यादिप्राप्तिः प्रयत्नान्तरसापेक्षेत्यर्थः, सङ्कल्पादेवेत्येवकारस्तु विज्ञानघन एवेति

वदयोगव्यवच्छेदपरः न त्वन्ययोगव्यवच्छेदपर इत्यभिप्रायः । राद्धान्ते विज्ञानघन एवैतिवदित्यनेन सङ्गतिविशेषोऽप्यभिप्रेतः ॥

सू० अत एव चानन्याधिपतिः ॥ ९ ॥

यतो मुक्तः सत्यसङ्कल्पः अत एवानन्याधिपतिश्च, अन्याधिपतित्वं हि विधिनिषेधयोग्यत्वं वधिनिषेधयोग्यत्वे हि प्रतिहतसङ्कल्पत्वं भवेत्, अतः सत्यसङ्कल्पत्वश्रुत्यैवानन्याधिपतित्वं च सिद्धम् । अत एव स स्वराड् भवतीत्युच्यते । संकल्पाधिकरणं समाप्तम् ॥

सू० अत एव चानन्याधिपतिः ॥ ९ ॥ सत्यसङ्कल्पत्वोपपादकमिदं सूत्रं जक्षणादिव्यापाराणां पुण्यपापरूपत्वेन सङ्कल्पप्रतिघातसम्भवान्मोघसङ्कल्पत्वशङ्काव्युदासेनावधारणस्य सङ्कोचनिरासकं हीदम् । अक्षरार्थमाह "यत" इति, अन्याधिपतित्वं विवृणोति "विधिनिषेधे"ति, अनन्याधिपतित्वसत्यसङ्कल्पत्वयोरुपपाद्योपपादकभावं व्यतिरेकेण दर्शयति "विधिनिषेधयोग्यत्वे ही"ति, ननु सत्यसङ्कल्पत्वात् विधिनिषेधायोग्यत्वं तदयोग्यत्वात्सत्यसङ्कल्पत्वमित्यन्योन्याश्रय इत्यत्राह "अतः सत्यसंकल्पत्वश्रुत्यैवे"ति, सङ्कल्पादेवेत्यवधारणासङ्कोचः स्वतः प्राप्तः मुक्तस्य जक्षणादिव्यापाराणां पुण्यपापरूपत्वमश्रुतं न च तत्कल्प्यं स्वर्गिणां कर्मफलभूतेषु तिरश्चां व्यापारेषु च व्यभिचारात्, अतः सङ्कोचकाभावादसङ्कुचितेनावधारणेन सत्यसंकल्पत्वं सिद्धमिति तयैव श्रुत्या विधिनिषेधागोचरत्वं च ज्ञापितमित्यर्थः । उक्ततर्कानुगृहीतं श्रुत्यन्तरं च विधिनिषेधायोग्यत्वे प्रमाणमित्याह—"अत एवे"ति, अनेन सूत्रस्य च-शब्दार्थौ व्याख्यातौ भवति, एवमनेन सूत्रेण मुक्तानामीश्वरवद् ब्राह्मगुणान्वयः प्रतिष्ठापितो भवति अपहतपाप्मत्वं नाम न पापप्रध्वंसवैशिष्ट्यमपि तु पुण्यपापसजातीयव्यापारेषु सत्स्वपि तत्फलसंबन्धानर्हत्वमित्यत्रैव हि स्पष्टं दर्शितम् । अत्रानधिपतिरिति नोक्तं किन्त्वनन्याधिपतिरिति, अत्रायमभि-

प्राय: स्वाभाविकशेषिणः परमपुरुषादनन्योनाधिपतिर्मुक्तस्येति अन्यथा ह्यनधिपतिरित्येव ब्रूयात्, अन्य–शब्दो बहुव्रीहिसूचनार्थ इति चेन्न अनन्याधिपतिरित्युक्तेऽप्यन्येषामिति समाससद्भावात्, अतोऽन्यशब्दस्योक्त एवार्थ इति संप्रदायः । परे तु संकल्पादेव पित्रादि सृजन्नपि मुक्तोऽनन्याधिपतिः न स्वामिनं संकल्पयतीत्येतदर्थपरमनन्याधिपतिशब्दमाहुः तत्र को हेतुः स्वामिपारतन्त्र्यस्यापुरुषार्थत्वादिति चेत्पित्रादिपारतन्त्र्येऽपि तुल्यं पित्रादयः प्रियङ्कराश्च स्युरतस्तत्संकल्प इति चेत्तत्स्वामिनोऽपि तुल्यम्, अतो नायमर्थ उपपन्नः । अपरेषामपि तुल्येयमनुपपत्तिः । अन्ये तु अत एवेति सूत्रमधिकरणान्तरमाहुः सर्वेश्वरत्वपरवाक्यैर्मुक्तस्यापीश्वरोऽधिपतिरिति पूर्वपक्षं कृत्वा मुक्तस्य सत्यसङ्कल्पत्वादेव नास्याधिपतिरित्याहुः कथं दुःखहेतुःविरहेण मुक्ते तदापादनायोगात् दुःखासद्भावादेव तन्निवर्तनायोगात्स्वतःसिद्धानन्दतया तदापादनतन्निवर्त्तनायोगात्प्रवृत्तस्य विघाते निवृत्तस्य प्रवर्तने च प्रवृत्तिनिवृत्तिविषयसङ्कल्पयोर्मोघत्वप्रसङ्गाच्च । अथ येऽन्यथा विदुरन्यराजानस्ते क्षय्यलोका भवन्तीत्यन्यराजवतः क्षय्यलोकतां दर्शयन्नात्मविदोऽनन्यराजत्वं दर्शयति स स्वराड् भवतीत्यादिश्चायमेवार्थ इति। अत्र ब्रूमः—अधिपति–शब्दस्य शेषित्वमभिमतं चेत्तदप्रतिषेध्यं शेषलक्षणस्य मुक्तात्मनि विरोधासम्भवात् । यदि नियन्तृत्वं विवक्षितं तच्च मुक्तं प्रति सम्भवत्येव । तथा हि नियमनशब्देन यदि नियमनसामान्यं विवक्षितं तदा धारणमपि तदन्तर्गतत्वेन विवक्षितं स्यात् तत्तावदप्रतिषेध्यं सगुणान्समतीत्यैतान् ब्रह्मभूयाय कल्पते ब्रह्मणो हि प्रतिष्ठाहमिति वचनात्स्वेच्छया परप्रवृत्तिनिवृत्त्योरुत्पादनरूपनियमनरूपविशेषो यदि विवक्षितः तत्प्रतिषेधस्तावत्स्वपक्षव्याघातकः, जगद्व्यापारवर्जमित्यत्रेश्वराधीनं मुक्तस्य सङ्कल्पादि प्रवर्त्तते अस्य जगद्व्यापारवर्जितेषु स्वभोगार्थेषु नित्यं सङ्कल्पोभूयात् माभूतत्सङ्कल्पविरुद्धेषु जगद्व्यापारेष्वित्यपवर्गप्रदानसमय एवेश्वरः सङ्कल्पयतीत्यभ्युपगमात्, अपवर्गप्रदानोत्तरकाले तु न तादधीन्यमिति चेन्न जगद्व्यापारविषयसङ्कल्पोत्पत्तिप्रतिबन्धे तत्प्रतिबन्धकेश्वरसङ्कल्पस्य नित्यस्य वा तदा

सञ्जातस्य वा विद्यमानत्वस्यापेक्षितत्वात् । न हि प्रतिबन्धकासन्निधौ कार्य्यप्रतिबन्धसम्भवः । अथ मतं—प्राथमिकसङ्कल्पजन्यः कश्चिदतिशयो मुक्तात्मगतः सर्वदा जगद्व्यापारं प्रतिबध्नाति न तदेश्वरनियाम्यत्वं न ह्यतिशयाधायकानां नियन्तृत्वम् आधायकविनाशेप्याहितातिशयस्य कार्य्याकरत्वदर्शनादिति चेत्तच्च कल्पनागौरवप्रसङ्गात्, ईश्वरसङ्कल्पजन्यातिशयस्य स्थायित्वाभ्युपगमादपि वरं हीश्वरसङ्कल्पस्यैव स्थायित्वोपगमः । अतः स्वचनव्याघातः सर्वेश्वरत्ववाचिश्रुतिस्वारस्यभङ्गश्च स्यात्, यस्यात्मा शरीरमिति श्रुतिविरोधश्च । काष्ठाप्राप्तं नियाम्यं हि शरीरं, न चात्मशब्दो बद्धमात्रपरः सर्वदेवसर्वभूतानां बद्धानां तन्नियाम्यत्वस्योक्तत्वात्, नाप्यन्तःकरणविषयः अमुख्यत्वादात्मशब्दस्य, यो मनसि तिष्ठन्नित्यनेन पुनरुक्तत्वाच्च, येन येन धाता गच्छति तेन सह गच्छतीति मुक्तस्य परमात्मानुविधानश्रुतिविरोधश्च नित्यस्य परसापेक्षत्वमीश्वरप्रमितिनित्यपदार्थगतपरिमाणादिषु सर्वसंप्रतिपन्नत्वात्सम्भवति ॥ सङ्कल्पाधिकरणं समाप्तम् ॥

अभावाधिकरणम् ।

सू० अभावं वादरिराह ह्येवम् ॥ १० ॥

अनु० किं मुक्तस्य देहेन्द्रियाणि न सन्ति? उत सन्ति? अथवा यथासङ्कल्पं सन्ति? न सन्ति चे? ति विषये शरीरेन्द्रियाणामभावं वादरिराचार्यो मन्यते कुत आह ह्येवम् "न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत" इति शरीरसम्बन्धे सुखदुःखस्यावर्जनीयत्वमभिधायास्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत इति मुक्तस्याशरीरत्वं ह्याह श्रुतिः ।

सू०अभावं वादरिराह ह्येवम् ॥ १० ॥ यथा सङ्कल्पमित्यनेन सङ्गतिर्दर्शिता, किं मुक्तस्य देहेन्द्रियाणि न सन्ति ? उत सन्ति ? उत यथासङ्कल्पं सन्ति न सन्ति चेति ? तदर्थं स एकधा भवतीत्यादिश्रुतिरशरीरत्वश्रुतिं सङ्कोचयितुं शक्नोति नेति? किं स एकधा भवतीत्यादिश्रुतिर्मुक्तस्य सशरीरत्वं प्रतिपादयितुं प्रभवति ? उत न? प्रतिपादनेऽपि किं सशरीरत्वमात्रं प्रतिपादयति ? उततस्यैच्छत्वमप्यवगमयति ? तदर्थमेकधाभवनत्रिधाभवनादिकं मुक्तस्य शरीरेण विना सम्भवति ? उत न ? असम्भवे च मुक्तस्य ब्रह्मानुभवैकभोगस्य तद्व्यतिरिक्तदेहसर्गादाविच्छादिकं सम्भवति ने ? ति अणोर्जीवस्यानेकशरीरपरिग्रहः सम्भवति नेति च, यदा ऽनेकशरीरपरिग्रहो न सम्भवति यदा-च शरीरेण विनापि त्रिधाभवनादिकमुपपद्यते, तदा स एकधेत्यादिवाक्यस्य शरीरप्रतिपादकत्वाभावेनाशरीरत्वश्रुतिसङ्कोचनासामर्थ्यान्मुक्तो ऽशरीर एव स्यात्, यदा ऽणोरप्यनेकशरीरयोगः सम्भवति, यदा च शरीरेण विना त्रिधाभवनादिकमनुपपन्नं ब्रह्मानुभवैकभोगस्य देहसर्गादीच्छा च नस्या तदा शरीरस्यावश्यापेक्षितत्वादिच्छाधीनान्वयव्यतिरेकत्वाभावाच्च तत्प्रतिपादकवाक्येनाशरीरत्वश्रुतिसङ्कोचे सति मुक्तः सशरीर एव स्यात्, यदा-ऽनेकशरीरपरिग्रहोपपत्तिः अनेकधाभवनञ्च शरीरसापेक्षं ब्रह्मानुभवैकभोगस्य देहसर्गादाविच्छा च सम्भवति तदानीमैच्छशरीरप्रतिपादनक्षमेण स एकधा भवतीत्यादिवाक्येनाशरीरत्वश्रुतेः सङ्कोचे सति मुक्तो यथेच्छं सशरीरोऽशरीरश्च स्यादिति; शरीरेन्द्रियाणामभावमिति । अभावप्रतिसम्बन्धि किमित्यपेक्षायां तन्वभाव इति सूत्रस्यतनु–शब्देन प्रतियोगिविशेषावगम इति भावः । शरीरसम्बन्ध इति, शरीरत्वप्रयुक्तं दुःखहेतुत्वमिति भावः । एवमशरीर एवेत्येकः पक्षः ॥

सू० भावं जैमिनिर्विकल्पामननात् ॥ ११ ॥

मू० मुक्तस्य शरीरेन्द्रियभावं जैमिनराचार्यो मन्यते, कुतः विकल्पामननात् विविधः कल्पो विकल्पः वैविध्यमित्यर्थः, "स एकधा भवति त्रिधा भवति पञ्चधा भवति

पपत्त्या साक्षात्कारसामान्यपरत्वं कल्प्यमिति चेत् तर्हि विरुद्धकॢप्तित्यागेन वैशद्यार्थत्वकॢप्तिर्युक्ता । प्रतिप्रयोगमप्याह । तत इति । व्याप्तिबलादित्यर्थः । अर्थे—स्वप्रतिपाद्ये । एतेन स्वविषयसाक्षात्कारजनकतया बाधप्रसङ्गोऽपास्तः । अत्र तु विपक्षे बाधकः प्रदर्शित एवातिप्रसङ्गः ।

प्रत्यक्षज्ञानहेतुत्वं यत्त्वयाऽत्र प्रसाध्यते ।
निषेध्यमिदमस्माकं न नस्तच्छोधनं भरः ॥ ४६ ॥

इति शाब्दप्रत्यक्षभङ्गः ॥

उपदेशो न प्रत्यक्षधीजनक इत्युक्तं स एव परस्य न घटत इति वक्तुं विकल्पयति । शिष्य इति ॥

सू० शिष्योजीवस्त्वसिद्धः किमु तव यदि वा भ्रान्तिसिद्धोमितो वा नासिद्धायोपदेशो भ्रमविषयमितौ नोपदेशार्हताऽस्य ॥ भेदेनैक्येन वाऽन्यः कथमुपदिशतु ज्ञातभेदोऽप्यभेदं तादात्म्ये जागरूके सति किमुपदिशेत्स्वात्मने तद्विदे सः ॥ ४७ ॥

त्वन्मते वक्तुः श्रोता किमप्रतीतः प्रतीतो वा भ्रान्तिसिद्धः प्रमितिसिद्धो वेति विकल्पः । अत्राद्यं निरस्यति । नासिद्धायेति । अप्रतीत्य शिष्यं कस्मै उपदिशेत् । द्वितीयं दूषयति । भ्रमेति । यदि शिष्यं भ्रान्तिसिद्धत्वेन न जानाति स्वयमतत्त्ववित्कथं तत्त्वोपदेष्टा । अथ तथा प्रमिणोति तथाऽपि तस्मै कथमुपदिशेत् न ह्यसावुपदेशग्रहणार्हः स्वयमपि नोपदेष्टृत्वार्हः अस्येत्युभयार्थम् । एतेन प्रतिबिम्बवद्बाधितानुवृत्त्या प्रतीयमानेभ्य उपदेश इत्यपि निरस्तं तद्वदे-

वोपदेशानर्हत्वात् । न चानुन्मत्तः प्रतिबिम्बाय प्रब्रूते । तृतीयं विकल्पयति । भेदेनेति । आद्ये विरोधमाह । कथमिति । भेदप्रमितावभेदमुपदिशन् कुहकः स्यात् । द्वितीयेऽपि प्राग्वदसम्भवमाह । तादात्म्य इति । अद्वैतप्रमितिदशायां स्वभ्रान्तिसिद्धशिष्यो हि बाधितः स्वतादात्म्येन वा भातः तस्मै चेदुपदिशेत् स्वात्मानं प्रति नित्यमुपदिशेत् शिष्यस्य हि स्वतादात्म्यं पश्यन् तस्यापि तत्त्ववित्त्वं पश्यति तथा च तस्य किमुपदिशेदिति भावः ॥ ४७ ॥

इत्यात्माद्वैतिन उपदेशानुपपत्तिः ॥

यदपि वर्ण्यते । अद्वैतवाक्यजन्यधीरेवाविद्यातत्कार्यकृत्स्नाध्यासबाधिका प्रत्यक्षादेर्भेदवासनामूलतया भेदस्वरूपमात्रबोधकत्वात् तत्त्वमस्यादीनां तु तत्त्वावेदकत्वात् पूर्वा च भेदबुद्धिः परा त्वद्वैतबुद्धिः, अतः अपच्छेदनयात्पूर्वबाधः स्यात् । आहुश्च पूर्वाबाधेन नोत्पत्तिरुत्तरस्य हि सेत्स्यति इति । एवं तत्त्वज्ञानादज्ञानबाध एव मुक्तिरिति तन्निरस्यति । नैवेति ॥

मू० नैवालं भ्रान्तिबाधे परमपि तदिदं तत्त्वमस्यादिवाक्यं भ्रान्तोक्तिर्यद्वदादौ श्रुतिकृतनिखिलभ्रान्तिमूलत्वबोधात् । रज्जौ सर्पभ्रमे किं जनयति विदितभ्रान्तवाक्सर्पबाधं स्वप्नेऽहिः स्वप्नबुद्ध्या किमु गलति यदा तत्र च स्वाप्नताधीः ॥ ४८ ॥

तदिदमित्यविद्यामूलत्वाभिप्रायं, न हि भवति पौर्वापर्यमात्राद् बाध्यबाधकभावः अतिप्रसङ्गात् उपक्रमनये च वैपरीत्यात् अद्वैतवाक्यानामपि माध्यमिकवाक्येन बाधप्रसङ्गात् । करणदोषतद-

भावाभ्यां विशेष इति चेन्न प्रत्यक्षादिष्वपि तदभावात् प्राचुर्य्येण दोषमूलत्वदर्शनादन्येष्वप्यनाश्वास इति चेन्न । वाक्येऽपि समत्वात् अविद्याभेदवासनामूलत्वस्य चाविशेषात् समानदोषेष्वपि भ्रमेषु परं बाधकं दृष्टमिति चेन्न । तथात्ववेदने तदयोगात् तत्र सन्देह एव स्यात् नित्ये वेदवाक्ये कारणदोष एव नेति चेन्न । वक्तृदोषाभावेऽप्यविद्यादोषमूलत्वस्य त्वयैवोक्तेः । अत्र प्रसङ्गे दृष्टान्तमाह । भ्रान्तेति भ्रान्तोक्तेरबाधकत्वं भ्रान्तिमूलत्वेन ज्ञातत्वादिति चेन्न । अविशेषात् । तदाह । आदाविति । प्रथममेव प्रयोजकशिष्यया ब्रह्मव्यतिरिक्तं कृत्स्नं मिथ्येति श्रवणात्ततश्च प्रत्यक्षधीजननार्थः प्रयासः तज्जनने कुहकशक्तिजनितप्रत्यक्षबुद्धाविव विश्वासश्च न स्यात् भ्रान्तिसिद्धवाक्यादपि पूर्वभ्रान्तिनिवृत्तिस्तत्फलनिवृत्तिश्च दृष्टेत्यत्र तदुभयमिह न सम्भवतीत्याह । रज्जावित्यादिना पादद्वयेन । भ्रान्तोऽयमिति विदितेन नायं सर्प इत्युक्तेऽपि न विस्रम्भः स्वप्नसर्पभ्रमजनितं साध्वसं नायं सर्प इति स्वप्नभ्रमेण न शाम्यति यदा स्वप्नसर्पनिषेधेऽपि स्वाप्नबुद्धिर्जायेत, अतो न वाक्याद् भ्रमनिवृत्तिः तत्फलनिवृत्तिश्चात्र वक्तुं न शक्यत इति ।

भ्रान्तिसि*द्धं च धूमादिस्वरूपासिद्धि दोषतः ॥
यदृच्छ†याऽर्थसद्भावेऽप्यमानमनुमन्यसे ॥ ४८ ॥

इति तत्त्वमस्यादेः प्रपञ्चबाधभङ्गः ॥

ननु व्यावहारिकमर्यादातिक्रमाल्लिङ्गविभ्रमे प्रामाण्यानादरः इह तु न तथा प्रागद्वैतबोधाच्छास्त्रे सत्यत्वाध्यवसायात् असत्याच्च

* बाष्पे धूमभ्रमेण यत्र वन्हिमति वन्ह्यनुमितिस्तत्रापि विद्यत एव स्वरूपासिद्धिदोष इति भावः ।

† मम पाणौ कति वराटिका इति कस्यचित्प्रश्ने यत्र वस्तुत एव पञ्चवराटिकासत्त्वे पाणौ ते पञ्च वराटिका इति यादृच्छिकोत्तरं तत्रेत्यर्थः ।

सत्यधीर्दृष्टा यथा दर्पणादिस्थया छायया मुखादेस्सिद्धिः भूतलस्थय च गृध्रादेः । सन्ति चैवं बहून्युदाहरणानि असत्यादपि भयविस्मयादि सत्यं कार्यं दृश्यते । अतो मिथ्याभूतादपि तत्त्वमस्यादिवाक्यात्तत्त्वप्रमितिर्मुक्तिश्च युज्यत इति तत्राह । छायादिरिति ॥

मू० छायादिर्न त्वसत्यस्सदवगतिकरस्तत्र हेतुर्हि
तद्धीस्साध्यन्नप्यादिवत्सा स्वयमिह न मृषा
नास्ति धीरित्यबाधात् ॥ सत्येनैव प्रसूता
घट इव विमता शेमुषीकार्यभावाद्धेतुत्वा-
लीकभावौ कथमिव विहतावेकमेवाश्रये-
ताम् ॥ ४९ ॥

न हि मिथ्याभूतं प्रतिबिम्बादि मुखादिधीजनकं दर्पणे मुखप्रतीतेर्दोषमूलत्वात् परमार्थमुखप्रतीतेस्तु मुकुरविहितमिहिरकिरणन्यायेन प्रतिफलितनायनकिरणजन्यत्वात् स्वरूपच्छायया गृध्राद्यनुमानेऽपि नासत्यात्सत्यधीः छायास्वरूपस्य सादृश्यस्य च निर्बाधत्वात् मिथ्याभूतस्य च छायागृध्रस्य कार्यकरत्वे शुक्तिरूप्यादेरपि रजतादिकार्यं किं न स्यात् । युष्मद्दृष्ट्या च विमृशामः किं प्रतिबिम्बादिस्वरूपमेव सत्यधीहेतुः उत तद्धीः नाद्यः प्रातिभासिकसतोऽर्थक्रियाहेतुत्वानभ्युपगमात् । न द्वितीयः तद्बुद्धेस्सत्यत्वेन सत्यादेव सत्यसिद्धेः । तदिदमभिप्रेत्याह । तत्रेति । एतेनासत्यात्सत्योत्पत्तिरपि निरस्ता । कस्तर्हि भयादिहेतुरिति तत्राप्येतदेवोत्तरम् । तत्रेति । यत्रासत्यात्सत्योत्पत्तिं वदसि तत्रेत्यर्थः । ननु यदि धीः स्वरूपमात्रेण कार्यविशेषहेतुस्स्यात् बुद्ध्यन्तरेऽपि तत्प्रसङ्गः अविशेषात् अथ विषयविशिष्टोहेतुस्तदा विषयस्यापि हेतुत्वं दुस्त्यजं तत्राह ।

साध्येति । यथा साध्यघटादिबुद्ध्या तन्निर्माणे बुद्धेरेव कारणत्वं न तद्विषयस्य सिद्धत्वे साध्यत्वस्य असिद्धत्वे हेतुत्वस्यायोगात् अन्यथाऽऽत्माश्रयोच्छेदप्रसङ्गात् । तद्वदिहापि विषयस्यासिद्धत्वान्न हेतुत्वम् । आदिशब्देनातीतज्ञप्तिः कामना च गृह्यते । नष्टधीरपि यथार्हं तत्तत्कारणं न तु नष्टं पूर्वत्वेऽप्यनन्तरपूर्वत्वाभावात् स्वर्गादिकामनाऽपि तदुपायनिष्पत्तिहेतुः न तु काम्यं चक्रकापत्तेः, तद्वदिह भ्रान्तिसिद्धस्याहेतुत्वेऽपि तद्विषयस्तदुत्पत्तिः । अथ स्यात् सविषया हि बुद्धिरध्यस्यते अतः कथं विषयस्य मिथ्यात्वे विषयिणस्सत्यत्वमिति तदेतत्स्वाभीष्टं विश्वसाक्षिणं पृच्छ । अथ सोऽपि मिथ्याभूतः तन्न स्वतस्सिद्धौ तदयोगात् अन्यथा तत्साक्ष्यन्तराऽपेक्षणेऽनवस्थादिप्रसङ्गात् विषयमिथ्यात्वे च व्यवहारसत्यत्ववद्धीसत्यत्वं चाविरुद्धम् एतदभिप्रेत्याह । सेति । इह अन्यस्मिन्नन्यथा बुद्ध्यमाने । सा धीः स्वयं न मृषा विषयतस्तु कदाचित्तथात्वोपचारः । तदेतद्बाधकवृत्तान्तेन व्यनक्ति । नास्तीति । धीर्नास्तीत्येवंरूपस्य बाधस्याभावादित्यर्थः आरोपितं हि नञाऽन्वेति । न त्वारोपः नास्ति धीर्विषयत्वाभावे ह्यसद्व्यवच्छित्तिस्स्यात् न त्वनिर्वचनीयत्वहानिरिति चेन्न । ब्रह्मण्येवं प्रसङ्गात् । अथास्ति धिया तत्सत्त्वं प्रकृतेऽपि समं माभूदसत्यात्सत्यसिद्धेः साधनं त्वदिष्टस्य किं साधकमित्यत्राह । सत्येनेति । अन्तःकरणादिभिस्सिद्धसाधनत्वमवधारणेन व्युदस्यते । अथ व्यवच्छेद्यसिद्ध्यसिद्ध्योर्विरोध इति चेन्न । स्वोत्पादकतयाऽवधृतसामर्थ्यसम्प्रतिपन्नसत्यवर्गातिरिक्तजन्यत्वनिषेधे प्रतियोगिसिद्धेः तथाऽप्यस्मदिष्टं शृङ्गग्राहिकया न निषिद्धमिति चेत्त्वयाऽपि वा किं तथा विहितं तथा हि असत्यात्सत्यसिद्धिं वदद्भिरप्यसत्यमिथ्यालीकादिशब्दाः किं क्वचिद्व्युत्पन्नाः प्रयुज्यन्ते । अव्युत्पन्ना वा ।

पूर्वत्र स्वदेशादिषु सतामेवान्यत्रारोप्यमाणतया बाध्यनतया चासत्यादिशब्दवाच्यत्वमिति नासत्यात्सत्यसिद्धिः उत्तरत्र परानभीष्टं न किंचित्कारणमुक्तं स्यात् । यद्वा प्रतीतप्रतियोगिकनिषेधस्य त्वदिष्टत्वात् त्वद्वाक्यप्रतीतं व्यवच्छेद्यं त्वया चैवमनुमातुं शक्यमिति प्रसङ्गे तात्पर्यं यत्रानुरूपो बलिः पिशाचानां पिशाचभाषयैवोत्तरं देयमिति न्यायाच्च । प्रातिभासिकसतश्च हेतुत्वाभ्युपगमे कथमसतोऽपि न हेतुत्वं तदपि हि कुतश्चित्प्रतिभासते न ह्यस्ति खपुष्पं दर्पणमुखमित्यनयोर्विशेषः अत्र व्याघातं च विपक्षे बाधकमाह । हेतुत्वेति । अनर्थक्रियाकारित्वात् प्रातिभासिकानामसत्यत्वम् । तानि चेद्धीरूपामर्थक्रियां कुर्युः कथं तेषामलीकत्वम् ननु सर्वस्यापि सत्यानृतमिथुनादुत्पत्तौ साध्यविकलो दृष्टान्तः मैवं घटाद्युत्पादकमृदादेर्व्यावहारिकसत्यत्वाभ्युपगमात् तदपेक्षया च मृत्तिकेत्येव सत्यम् इत्यादिश्रुतिनिर्वाहाच्च । अनुमानमप्यत्र तावता निष्प्रतिघमिति ।

सत्यधीर्मम सत्येन तवासत्यादसत्यधीः ।
सत्यादसत्यधीर्वेति क्वासत्यात्सत्यधीर्भवेत् ॥ ४६ ॥

इत्यसत्यात्सत्यसिद्धिभङ्गः ।

विश्वबाधकमद्वैतज्ञानं कारणानुपपत्त्या दूषितम् । अथ स्वप्रध्वंसकारणाभावाच्च दूष्यते । यत्तदविद्याध्वंसकमन्तिमज्ञानं तत्केन विनाश्यं न तावत्तद्विषयेण ब्रह्मणा शुद्धस्य तस्य किंचित्प्रति हेतुत्वानभ्युपगमात् अशुद्धेश्च निश्शेषध्वंसात् अत एव नानिर्वचनीयान्तरेण एवं तत्प्रध्वंसेनेत्यपि दुःस्थं तस्य सदन्यत्वानन्यत्वसत्यमिथ्यात्वादिविकल्पक्षोभात् ज्ञानध्वंसस्याहेतुकत्वे च कादाचित्कत्वव्याघातः अनादित्वापाताच्च कथं प्रतियोगिसंभवः परिशेषात्स्वेनैव

स्वस्य नाश इत्यायातं तच्चायुक्तं न हि प्रतियोगिमात्रात्प्रध्वंसः क्वचिदपि दृष्टः एतत्सर्वमभिप्रेत्याह । ज्ञानस्येति ॥

सू० ज्ञानस्याशेषभेदोदयविहतिकृतो न स्वनाश्यत्वयुक्तिर्वाताद्यैरेव सद्मश्रममधिकुरुते दग्धदाह्योऽपि वह्निः ॥ तस्मात्तस्यान्यदेव प्रशमकमपरं तस्य चेत्यव्यवस्था तच्चेच्छान्तिं न गच्छेत्कथमिव भविता सर्वभेदोपमर्दः ॥ ५० ॥

वन्हेर्दाह्यं विनाश्यानुविनाशवत्तद्विनाश इति चेन्न । तत्रापि हेत्वन्तरादेव विनाशदृष्टेः निर्वाप्यते हि कदाचिद्वातेन दीपः कदाचिच्छलभादिभिः यदाऽस्य स्वयं विनाश इति मन्यसे तदाऽप्यदृष्टप्रेरितवेगवदवयवकर्मणां मिथोविभागात्सङ्घातशैथिल्यमात्रं न तु क्वचिदपि द्रव्यनाशः अवस्थान्तरापत्त्या चादर्शनं कतकरजोनिदर्शनं च बालप्रलोभनं न हि पयसि पङ्कः कतकरजसा शा*म्यते विश्लेषमात्रदृष्टेः न च स्वयं तत्र नश्यति असंश्लेषमात्रसिद्धेः अस्तु तर्हि ज्ञानान्तरेण तन्निवृत्तिरित्यत्राह । तस्मादिति । ज्ञाननिवर्तकस्यापि ज्ञानस्य तुल्यतया ज्ञानान्तरेण निवृत्तावप्युपर्युपरि तथेत्यनवस्था उक्तदोषपरिहाराय निवर्तकज्ञानस्य स्वतोऽन्यतश्च नाश्यत्वं नेति शङ्कते । तच्चेदिति । परिहरति । कथमिवेति । ज्ञानं तावत्तिष्ठति तदनुबन्धादहङ्कारदेहानुबन्धश्च दुर्वार इति भावः ॥ ५० ॥

इति निवर्तकज्ञाननिवर्तकानुपपत्तिः ॥

---

* अत्र शम्धातोर्णिचि मितां ह्रस्वस्यावश्यंभावेन कर्मणि शम्यते इत्येव प्रयोगोयुक्तः । नापि कर्तरि शाम्यते इति प्रयोगस्तस्य परस्मैपदित्वेन तथा प्रयोगायोगादर्थासंगतेश्च । ततश्चं शाम्यते इति प्रयोगस्य सर्वथाऽसाधुत्वम् ॥

अथ निवर्तकज्ञानं सविषयं निर्विषयं वा सविषयत्वे ब्रह्मविषयं तदन्यविषयं वा ब्रह्मविषयत्वेऽपि शुद्धब्रह्मविषयं वा मायान्वितब्रह्मविषयं वा । अन्यविषयत्वे प्रपञ्चविषयं तन्मिथ्यात्वविषयं वेति विकल्पयति । बोधस्येति ॥

मू० बोधस्यान्त्यस्य वेद्यं किमु तव विशदं ब्रह्म
मायान्वितं वा किं वा भेदप्रपञ्चः किमु तद-
नृतता किन्तु वेद्यं न किञ्चित् ॥ आद्ये
स्याद्ब्रह्म दृश्यं तदुपरि युगले मोहसत्ताथ
तुर्ये सूते द्वैतं सती सा स्वविहतिमनृता
पञ्चमे स्यान्न धीत्वम् ॥ ५१ ॥

आद्यं दूषयति । आद्य इति । ब्रह्म दृश्यं स्यात् । शुद्धस्य दृग्विषयत्वेऽपसिद्धान्तः त्वदुक्तौ च दृग्दृश्यसम्बन्धानुपपत्तिः दृश्यत्वानुमानस्यानैकान्त्यं ब्रह्मणोऽपि वा मिथ्यात्वाभ्युपगमप्रसङ्गश्चेति भावः । द्वितीयतृतीयौ दूषयति । तदुपरीति । मायान्वितब्रह्मप्रतिभासः प्रपञ्चप्रतिभासश्च मोह एवेति भावः । चतुर्थे प्रपञ्चस्यानृतता सत्याऽसत्या वेति विकल्पे पूर्वत्राद्वैतभङ्गप्रसङ्गमाह । सूत इति । उत्तरत्र स्वव्याघातमाह । स्वविहतिमिति ।

मिथ्यात्वस्य हि मिथ्यात्वे मिथ्यात्वं बाधितं भवेत् ।
सत्यत्वस्य तु सत्यत्वे सत्यत्वं साधितं भवेत् ॥

निर्विषयत्वे दोषमाह । पञ्चम इति । वृत्तिज्ञानं सर्वं सविषयमित्यभ्युपगच्छतां कथमस्य निर्विषयत्वं तथात्वे वा कथं वृत्तिधीत्वमिति भावः ॥ ५१ ॥

इति निवर्तकज्ञानवेद्यानुपपत्तिः ॥

बाधकज्ञानसाध्यं विकल्पयति । साध्येति ।

मू० साध्या वस्सर्वमायाविरतिरपि परं ब्रह्म तस्मात्परा वा पूर्वत्र प्रागपि स्यात्परमपि न भवेदुत्तरत्राभ्युपेते ॥ साऽपि स्याच्चेन्निवर्त्या पुनरपि विलगेत्पूर्व एव प्रपञ्चो नो चेत्सत्यैव सा स्यात्प्रसजति च ततो ब्रह्मतत्सद्वितीयम् ॥ ५२ ॥

ब्रह्मस्वरूपत्वेऽनादित्वान्न साध्यत्वमित्याह । पूर्वत्रेति । स्वरूपादन्यत्वे सर्वभेदनिवृत्त्यसम्भवमाह । परमपीति । निवृत्तिरपि निवर्त्यैत्यविरोधं शङ्कते । साऽपीति । परिहरति । पुनरिति । लब्धस्वरूपस्य भावस्य ध्वंसो यदि न स्यात् स्वरूपं तदवस्थमेव स्यात् । प्रागभावस्य तु प्रध्वंसः भावश्च तत्प्रध्वंसश्च उत्तरत्वे सति विरोधित्वाविशेषात् । प्रध्वंसस्य च प्रागभावः भावश्च तत्प्रागभावश्च पूर्वत्वे सति विरोधित्वाविशेषात् इहापि प्रध्वंसस्तन्निवृत्तिश्च भावस्य प्रध्वंसः स्यातामिति चेत् तर्ह्यनवस्थितप्रध्वंसपरम्पराक्लृप्तिप्रसङ्गः तत्प्रध्वंसकज्ञानक्लृप्तिश्च । अस्मन्मते त्ववस्थापरम्परा प्रमाणसिद्धाऽङ्गीक्रियत इति न विरोधः । निवृत्तेरनिवृत्तौ सत्यत्वप्रसङ्गस्ततश्चाद्वैतभङ्गमाह । नो चेदिति । सत्याभावसाहित्यमदोष इत्येतच्च दूषितमेव ॥ ५२ ॥

इति प्रपञ्चनिवृत्त्यनुपपत्तिः ॥

विश्वबाधकबुद्धेराधारं विकल्पयति । अन्त्यज्ञानस्येति ।

मू० अन्त्यज्ञानस्य जीवः स्थितिपदमथवा केवलं ब्रह्म ते स्यादाद्ये तेनैव बाध्यो न तदुपजनयेद्धीः स्थितौ किं ततोऽस्य ॥ अन्त्ये-

सत्यानृता वा तदधिकरणता नाद्य इष्टः परस्मिंस्तत्क्लृप्त्यादेरयोगस्तदिह विमृशतां किं न दुष्टं त्वदिष्टम् ॥ ५३ ॥

न हि बाह्यवद्देहेन्द्रियमनसां ज्ञातृत्वं युष्माभिरिष्यते तुल्यन्यायतयाऽहङ्कारस्य महतो वा ज्ञातृत्वं निरस्तमेव परिशेषादहङ्कारोपहितोजीव एव ज्ञातेति कोटिः प्रथममिहोद्घाटिता केवलं सर्वोपाधिरहितमित्यर्थः। बाधकज्ञानस्य बाध्यजीवाधिकरणत्वे बाधकमाह। आद्य इति। अयं भावः बाधकेन जीवो नश्यति न वा आद्ये स्वनाशकधीसिद्धौ भेदवासनानिरासादौ न प्रयस्येदिति। न ह्यात्मनाशः परमः पुमर्थ इत्यौपनिषद्पक्षः उत्तरत्राहमर्थविनाशे कथं जीवस्थितिः स्थापितं चाहमर्थस्यैवात्मत्वं जीवत्वे नष्टेऽपि ह्यात्मा तिष्ठेदित्यत्राह। धीरिति। न हि अहं विनङ्क्ष्यामि मदन्या धीर्मद्विधुरा तिष्ठत्विति मत्वा मुमुक्षुः प्रवर्तते। तथा च भाषितं मयि नष्टे-*ऽपि मत्तोऽन्या काचिज्ज्ञप्तिरवस्थिता। इति तत्प्राप्तये यत्नः कस्यापि न भविष्यतीति। शुद्धस्य निवर्तकज्ञानाधारता सत्याऽसत्या वेति विकल्पयति। अन्त्य इति। सत्यत्वे ऽपसिद्धान्तमाह। नाद्य इति मिथ्यात्वेऽनुपपत्तिमाह। परस्मिन्निति। असत्यस्य ज्ञानाधिकरणत्वस्य क्लृप्तिर्हि कल्पकाविद्याहङ्कारादिसापेक्षा अतो निवर्तकज्ञानतदाधारत्वतत्प्रतिभासा यावत्स्युः तावदविद्याऽनुवृत्तेति न ततस्तन्निवृत्तिः अविद्यायाः तत्कल्पितस्य ज्ञानस्य च सुन्दोपसुन्दविषनाशकविषन्यायेन युगपद्ध्वंसादविरोध इति चेत् तदिदमन्योन्यध्वंसकत्वं दृष्टं कल्प्यं वा। नाद्यः असिद्धेः। न द्वितीयः कल्पकाभावात्।

* आत्मसिद्धौ भगवद्भिर्यमुनाचार्यपादैः।

गतिशून्यत्वं कल्पकमिति चेत् अस्ति सतां गतिः तामेवानुवर्तस्व । एवं परपक्षे दूष्यान्तराणि च सूचयन्निगमयति । तदिति । बहुश्लोकोक्तबहुविधदोषप्रस्थानादित्यर्थः ॥ ५३ ॥

इति निवर्तकज्ञानाधारानुपपत्तिः ॥

यथा मृषावादिमते न बोधान्मुक्तिसम्भवः ॥ त्वन्मतेऽपि तथेत्येवमपन्यायेन शङ्कते । नाभुक्तमिति ।

मू० नाभुक्तं कल्पकोट्याप्युपशमनमियात्कर्म निष्कृत्यभावे विद्यातस्तद्विनाशश्रुतिरिह तदसौ तत्प्रशंसेति चेन्न ॥ तादृग्विद्यैव तन्निष्कृतिरिति हि विदां चक्रुराम्नायवृद्धा नान्यद्ब्रह्मानुभूतिप्रतिभटदुरितध्वंसतस्साध्यमत्र ॥ ५४ ॥

स्मर्यते हि अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् । नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ॥ इति । तर्हि प्रायश्चित्तशास्त्रवैयर्थ्यं स्यादित्यत्रोक्तम् । निष्कृत्यभाव इति । ननु तद्यथैषीकतूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते इति श्रूयते तदा विद्वान्पुण्यपापे विधूय तत्सुकृतदुष्कृते धुनुते इत्यादि च ।

न कर्मणां क्षयो भूप जन्मनामयुतैरपि ।
ऋते योगात्कर्मकक्षं योगाग्निः क्षपयेत्परम् ॥

यथाऽग्निरुद्धतशिखः इत्यादि च स्मर्यते अतः फलभोगाभावेऽपि ज्ञानात्कर्मनिवृत्तिः स्यादित्यत्राह । विद्यात इति । न च तत्त्वज्ञानान्निश्श्रेयसाधिगम इत्याद्यसूत्रविरोधः दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायात् इति द्वितीयसूत्रे

ज्ञानस्य मिथ्याज्ञाननिवृत्तिद्वारा कर्मानारम्भार्थत्वस्य स्थापितत्वात् कृतन्तु कर्म स्वफलत एव नश्यतीत्यविरोधः अत्र कर्मणामवश्यभोक्तव्यत्ववचनमकृतप्रायश्चित्तविषयमित्यभिप्रायेण प्रत्याह । नेति । अत्रापि तर्ह्यकृतप्रायश्चित्तत्वाद्भोक्तव्यत्वमित्यत्राह । तादृगिति । तप्यन्तविहितपरब्रह्मध्यानरूपेत्यर्थः । आम्नायवृद्धाः स्मर्तारः ते चेश्वरदर्शनं सर्वप्रायश्चित्तमित्याहुः इज्याचारदमाहिंसाः प्रायश्चित्तान्यशेषाणि प्रायश्चित्तं तुतस्यैकम् इत्यादि च । ब्रह्मप्राप्तिहेतुतया विहितस्य योगस्य कथं नैमित्तिकत्वमित्यत्राह । नान्यदिति । स्वतःप्राप्ता हि संसरतामपि ब्रह्मानुभूतिस्सूरिवत् तत्प्रतिबन्धकनिवृत्त्यै योग इति निष्कृतिरूपत्वं तस्य युज्यत इति । भावः । अत्र दुरितशब्देन बन्धकं पुण्यमपि सङ्गृहीतं प्रतिबुद्धं प्रत्यनिष्टफलप्रदत्वाविशेषात् । एते वै निरयास्तात स्थानस्य परमात्मन इति स्वर्गादीनां निरयत्वस्मृत्या तत्साधनस्य पापत्वोपपत्तेः । न सुकृतम् इत्यारभ्य सर्वे पाप्मानोऽतो निवर्तन्ते इति सुकृतस्यापि पापत्वेन सङ्कलप्याम्नानाच्च । तदेवं धीसङ्कोचककर्मध्वंसे धीविकास एव ब्रह्मानुभूतिरिति तत्कामनाव्यपदेशोऽपि न विरुद्धः अन्यत्र च प्रतिबन्धकनिरासवृत्तान्ते एवं प्रतिसन्धेयम् ॥ ५४ ॥

इति विद्यायाः पापनाशकत्वोपपत्तिः ।

ननु पुण्यस्य दुरितशब्देन सङ्ग्रहो न युक्तः विरुद्धत्वात् क्वचित्प्रयोगश्छत्रिन्यायात् इत्यभिप्रायेण शङ्कते । प्रायश्चित्तमिति ॥

सू० प्रायश्चित्तं न पुण्येन च सुकृतमनुश्रूयते
धर्मबाध्यं नाधर्मत्वं विधानान्न यदि सुचरितं त्वङ्गमस्याश्च न स्यात् ॥ मैवं धर्मा-

ऽप्यधर्मो भवति हि बहुधाऽधिक्रियादेर्विशेषाद्धर्मं त्रैवर्गिकन्तु स्वयमिह निगमः पाप्मकोटौ पपाठ ॥ ५५ ॥

न हि पुण्योद्देशेन क्वचिन्निष्कृतिविधिः धर्मेण पापमपनुदति इति च श्रूयते न तु धर्ममिति काम्यमपि अधर्मत्वाद्धर्मेणापनुद्यत इति चेन्न । फलोद्देशेन विहितत्वात् न चात्र श्येनादिनयः स्वरूपतः फलतो वा निषेधानाघ्रातत्वात् धर्मेष्वपि च यद्यधर्मत्वं तदा तदङ्गत्वं विद्याया न घटते एषां चतुर्णां हेतूनामन्यथासिद्धिमभिप्रेत्य प्रत्याचष्टे । मैवमिति । अधिकारिभेदेन पापत्वापत्तौ तं प्रति निष्कृतिविधिर्युक्तः धर्मेण पापम् इत्यत्र च यथार्हं पापशब्द उभयग्राही विहितत्वं च कंचित्प्रति धर्मत्वं साधयेन्नान्यं प्रत्यधर्मत्वं निरुन्ध्यात् तेषामेव च कर्मणां फलसङ्गादित्यागवतां निवृत्तिधर्मतापत्त्या विद्याङ्गत्वोपपत्तिः । एतत्सर्वं व्यनक्ति । धर्मोऽपीति । स्मर्यते हि ।

स एव धर्मस्सोऽधर्मस्तंतं प्रति नरं भवेत् ।
पात्रकर्मविशेषेण देशकालावपेक्ष्य च । इति ॥

एवं सति न सुकृतम् इत्यादौ सुकृते पाप्मशब्दो न भाक्त इत्यभिप्रायेणाह । धर्ममिति । अत एव हि त्रैवर्गिकांस्त्यजेद्धर्मानिति मुमुक्षुं प्रत्यनुशिष्यते ॥ ५५ ॥

इति त्रैवर्गिकसुकृतस्यापि विद्यानाश्यत्वम् ॥

अस्तु विद्याऽपि प्रायश्चित्तान्तरवदुपात्तदुरितनाशिका उत्पत्स्यमाननिष्कृतिर्न स्यात् निमित्तानुदयेऽपि नैमित्तिकप्रवृत्तावतिप्रसङ्गात् उदितत्वशङ्कयाऽपि क्वचिन्निष्कृतिः पाक्षिकोऽपि दोषः परिहार्य

इति न्यायात् न तूत्पत्स्यमानत्वशङ्कया तदवस्थस्य निमित्तत्वेन प्रायश्चित्तशास्त्रैरनुद्देशात्। एवं विदि पापं कर्म न श्लिष्यते तस्यैवात्मापदवित्तं विदित्वा न कर्मणा लिप्यते पापकेन इत्यादयस्तु विद्यां प्रशंसन्ति अर्थायोगात्। ब्रह्मविदां बाल्येन तिष्ठासेत् इति विधौ कृत्स्नबालकृत्योपादाने कामचारप्रसङ्गाच्च। अस्त्विति धाष्ट्ये नाविरतो दुश्चरितात् इति श्रुतिरुपरुन्धे। सर्वान्नानुमतिश्च प्राणात्यये हि तद्दर्शनात् इति च सूत्रं जडवद्भावयतामपि योगिनां सतां वर्त्म न दूषयन् इति प्रवृत्तिनियम उक्त इति एतत्सर्वमभिसन्धायाह। अश्लेष इति ॥

मू० अश्लेषः पाप्मभिश्चेत्प्रसजति वितथा दुश्चरित्रान्निवृत्तिस्तेषु प्रामादिकेष्वप्यमतिकनिपतद्बीजवत्स्यात्प्ररोहः ॥ मैवं शास्त्रैकवेद्ये फलफलिविषये युक्तयो ह्यस्वतन्त्राश्शास्त्राद्बाधस्तु तिष्ठेन्मतिकृतविषये शब्दशक्त्यादिभिर्नः ॥ ५६ ॥

प्रामादिकैरश्लेषे श्रुत्यादिविरोधो नेत्यत्राह। तेष्विति। प्ररोहः यथार्हकार्यारम्भः अन्यथा कथमकामकृतेषु प्रायश्चित्तविधिरिति अत्र श्रुतस्याश्लेषस्य किं न्यायतो बाधः उत वचनत इति विकल्पमभिप्रयन्प्रत्याह। मैवमिति। आद्यं दूषयति। शास्त्रैकवेद्य इति। फलफलिविषये साध्यसाधनभावेन मिथस्सम्बध्यमानेऽर्थे इति यावत्। अस्वतन्त्रा न हि वचनविरोधे न्यायः प्रभवति तथा सत्यतिप्रसङ्गादिति भावः। द्वितीये विषयभेदाद्विरोधं परिहरति। शास्त्रादिति। शब्दशक्त्यादिभिः नाविरतो दुश्चरितात् इत्यत्र ह्यविरतिः बुद्धिपूर्वचर्यानुवर्तनं तत्प्रसक्तस्य प्रतिषेधः उषस्तिश्च

५१८

प्राणधारणार्थमि*भ्योच्छिष्टं चखाद अनुपानप्रतिग्रहमिभ्येनार्थितस्स तत्राह । न वा अजीविष्यमिमानखादन् कामो म उदपानम् । इति ब्रह्मविदोऽपि मे कामतो निषिद्धकरणं परिहार्यमित्यर्थः ॥

अपि चेत्पातकं किंचिद्योगी कुर्यात्प्रमादतः ।

योगमेव निषेवेत नान्यं यत्नं समाचरेत् ॥ इति च स्मर्यते ।

अश्लिष्टस्य पातकस्य किं योगरूपेणापि प्रायश्चित्तेनेति चेन्न । तत्र तद्विधौ तात्पर्याभावात् अन्यप्रायश्चित्तप्रसक्त्या योगं न विच्छिन्द्यात् इत्येव हि तात्पर्यम् । यद्यपि जीवितात्ययमापन्नः प्राणसंशयमापन्नः इत्यादिवचनानि विद्वदविद्वत्साधारणानि तथाऽप्यत्रानापद्दशायां प्रामादिकेष्वपि विद्यामाहात्म्यादश्लेष उच्यत इति सार्थत्वम् अतः पापानां वा विनाशवदश्लेषोऽपि विद्यासाध्यं फलमिति ॥ ५६ ॥

इति प्रामादिकोत्तराघाश्लेषोपपत्तिः ॥

यद्यपि पापस्याश्लेषः तथाऽपि कथमितरस्याप्येवमसंश्लेषः पाते तु इति सूत्रोक्तः पुण्याश्लेष इति विकल्पानुपपत्त्या शङ्कते श्लिष्टमिति ॥

मू० श्लिष्टं विद्याङ्गपुण्यं स्वफलवितरणान्नेतरार्थं विरागे रागादारभ्यमाणं फलवदमतिकं सम्भवेन्नैव पुण्यम् ॥ पुण्याश्लेषस्ततोऽस्मिन्न घटत इति चेन्नापयुक्तातिरिक्तैर्विद्याङ्गैस्तस्य योगादमतिकृतमपि ह्यामनन्त्येव पुण्यम् ॥५७॥

अत्र हि पुण्यस्याश्लेषः किं बुद्धिपूर्वस्य तदन्यस्य वा । आद्ये

* इभो हस्ती तत्पालक इभ्यः ।

विद्याऽङ्गस्य तदनङ्गस्य वा । अङ्गत्वे विरक्तकृतस्य अन्यकृतस्य वेति विकल्पः तत्र विद्याङ्गस्याश्लेषो न सम्भवति स्वफलभूतविद्याप्रदानात् । वीतरागस्य न फलान्तरार्थप्रवृत्तिः यतस्तदश्लेषोक्तिः स्यात् सरागकृतं तु स्वफलं दद्यादेव धीपूर्वस्याश्लेषायोगात् अधीपूर्वं तु सुकृतं न सम्भवत्येव चोदितानुष्ठानरूपत्वात् निषिद्धे त्वधीपूर्वत्वसम्भवः चोदनानपेक्षानुष्ठानत्वात् अतो ब्रह्मविदि पुण्याश्लेष उक्तो न सम्भवतीत्याक्षेपः । एवमाक्षेपेषु कंदिदंशं विशेषयिष्यन्नाह । नेति । हेतुमाह । उपयुक्तेति । उपायविरोधिशमनेषु कर्मसु कानिचिदधिकानि सम्भवन्ति अन्यैर्विद्यापूर्तैः, न च निष्फलत्वं युक्तम् । अतस्स्वानुगुणं फलान्तरं दातुमर्हन्तीति शङ्कायामश्लेषस्सूच्यते निष्कामानुष्ठितानां ह्येतेषां न फलान्तरसम्भव इति यच्चाधीपूर्वकाम्यं न सम्भवतीति तदपि न विषयवायतनदीपाद्युपाख्याने तद्दृष्टेः स्वप्ने च विद्वानपि वासनाविशेषान्निषिद्धमिव काम्यमप्यनुतिष्ठेत् पित्रादयश्च निरपेक्षं प्रति हितबुद्ध्या काम्यमाचरेयुः तच्च प्रामादिकप्रायं सर्वं विदि न संश्लिष्यत इत्यभिप्रायेणाह । अमतिकृतमिति ॥ ५७ ॥

इति पुण्याश्लेषः ॥

अत्र कश्चिच्चोदयति । कर्मेति ।

मू० कर्माश्लेषप्रणाशौ तदुपधिभगवन्निग्रहादेर्निवृत्तिर्नष्टा श्लिष्टातिरिक्तं न च किमपि ततः सङ्क्रमः कस्य मैवम् ॥ तत्तत्कर्मप्रसूतौ स्वभजनशमितौ निग्रहानुग्रहौ यौ तत्तुल्याविव देवः प्र*यति विदुषि तच्छत्रुमित्रेषु धत्ते ॥ ५८ ॥

* मुक्तिमुपगच्छति ।

तच्च प्रकरणएव विश्रान्तम् । वैकृतवाक्ये क्रतुसामान्यमुद्दिश्य विहित-पाञ्चदश्यस्य प्राप्तौ क्रतुत्वव्यापकत्वेन पाञ्चदश्यं विधीयते । तद्व्याप-कत्वं सर्वेषामधिकारएव घटतइति ॥ ३८ ॥

इज्यायां तद्गुणत्वाद्विशेषेण नियम्येत ॥ ३९ ॥

वैश्यस्तोमदृष्टान्तं परिहरति । इज्यायामिति । इज्यायां वैश्य-स्तोमे तद्गुणत्वात् । तस्य वैश्यकर्तृकत्वस्य गुणत्वात् । वैश्यो वैश्यस्तो-मेन यजेतेत्यनेन गुणत्वेन विधानात् । विशेषेण तत्क्रतुमुद्दिश्य वैश्यक-र्तृकत्वं नियम्येत । यत्र वैश्यस्तोमत्वं तत्र वैश्यकर्तृकत्वं, स्वप्रधाने सति स्वस्यावश्यकत्वात्, तथा ऽन्याभावादिति भावः ॥ ३९ ॥

इति जैमिनिसूत्रवृत्तौ षष्ठाध्यायस्य षष्ठः पादः ॥ ६ ॥

विश्वजिति पित्रादीनामदेयत्वम् । अधि॰ १ ।

स्वदाने सर्वमविशेषात् ॥ १ ॥

विश्वजिति सर्वस्वं देयमिति श्रुतत्वात्पित्रादीनां दानमस्ति न वेति संशये पूर्वपक्षमाह । स्वेति । स्वदाने सर्वस्वदाने सर्वं पित्रादिक-मपि देयम् । अविशेषात् ॥ १ ॥

यस्य वा प्रभुः स्यादितरस्याशक्यत्वात् ॥ २ ॥

सिद्धान्तमाह । यस्येति । यस्य स्वस्य त्यागे प्रभुः तद्देयम् इतरस्य पित्रादेः स्वत्वस्य त्यक्तुमशक्यत्वात् । न हि पितुर्दाने पितृत्वमपैतीति भावः ॥ २ ॥

विश्वजिति पृथिव्या अदेयत्वम् । अधि॰ २ ।

न भूमिः स्यात्सर्वान्प्रत्यविशिष्टत्वात् ॥ ३ ॥

तत्रैव महाभूमिर्देया न वेति संशये सार्वभौमस्य विद्यमानस्वत्व-त्यागसम्भवाद्देयेति बहिः पूर्वपक्षे सिद्धान्तमाह । नेति । स्पष्टो ऽर्थः ॥ ३ ॥

विश्वजिति अश्वादीनामदेयत्वम् । अधि॰ ३ ।

अकार्यत्वाच्च ततः पुनर्विशेषः स्यात् ॥ ४ ॥

तत्रैव अश्वा देया न वेति संशये सिद्धान्तमाह । अकार्येति । अकार्यत्वात् । न केसरिणो ददाति, केसरिणो ऽश्वाः, इति निषेधाददेयत्वात् । ततः सुवर्णादिभ्यः विशेषः दानकर्मत्वाभावः स्यात् ॥ ४ ॥

विश्वजिति विद्यमानानामेव सर्वस्वानां दानम् । अधि॰ ४ ।

नित्यत्वाच्चानित्यैर्नास्ति सम्बन्धः ॥ ५ ॥

अग्रे संपाद्यमानं द्रव्यमपि देयं न वेति संशये सिद्धान्तमाह । नित्येति । सर्वस्वदानस्य नित्यत्वाद् अग्रिमद्रव्यलाभस्यानिश्चयादनित्यैः न संबन्धः न दानकर्मत्वम् ॥ ५ ॥

विश्वजिति धर्मार्थसेवकशूद्रस्यादेयत्वम् । अधि॰ ५ ।

शूद्रश्च धर्मशास्त्रत्वात् ॥ ६ ॥

स्वकीयधर्मसंरक्षणार्थं यः शूद्रः द्विजं सेवते सो ऽप्यदेय इत्याह । शूद्र इति । धर्मशास्त्रत्वाद्धर्मरक्षणार्थं शुश्रूषमाणत्वात् । तस्मिन्स्वत्वाभावादिति भावः ॥ ६ ॥

विश्वजिति दक्षिणाकाले विद्यमानानामेव सर्वस्वानां देयत्वम् । अधि॰ ६ ।

दक्षिणाकाले यत्स्वं प्रतीयेत तद्दानसंयोगात् ॥ ७ ॥

सिद्धान्तसूत्रमाह । दक्षिणाकालइति । दक्षिणाकाले यत्स्वं यावद्वस्तुषु स्वत्वं तावद्देयं प्रतीयेत । दानसंयोगात् । स्वत्वाश्रयस्यैव दानार्हत्वादिति भावः ॥ ७ ॥

विश्वजिति दक्षिणादानोत्तराङ्गानामप्यनुष्ठानम् । अधि॰ ७ ।

अशेषत्वात्तदंतः स्यात्कर्मणो द्रव्यसिद्धित्वात् ॥ ८ ॥

विश्वजिद्यागो दक्षिणान्तः उत प्रकृतिवदवभृथान्त इति संशये पूर्वपक्षमाह । अशेषत्वादिति । अशेषत्वात् क्रतोरशेषदक्षिणत्वाच्च शेषकर्मणः द्रव्यसिद्धित्वाद् द्रव्यसाध्यत्वात् सर्वस्वदाने तत्काले द्रव्याभावेन तदन्तः दक्षिणान्तः स्यात् । सर्वस्वदानस्य प्रत्यक्षवचनप्राप्तत्वादातिदेशिकं कर्मशेषं बाधतइति भावः ॥ ८ ॥

अपि वाऽशेषकर्म स्यात्क्रतोः प्रत्यक्षशिष्टत्वात् ॥ ९ ॥

सिद्धान्तमाह । अपि वेति । क्रतोः विश्वजिता यजेतेत्यनेन समाप्तिपर्यन्तस्य विश्वजित्क्रतोः प्रत्यक्षशिष्टत्वाद्विहितत्वादशेषकर्म समाप्तिपर्यन्तः स्यात् ॥ ९ ॥

तथा चान्यार्थदर्शनम् ॥ १० ॥

उक्तार्थं द्रढयति । तथेति । तथा च समाप्तिपर्यन्तत्वादेव अन्यार्थस्य, अवभृथादुदेत्य वत्सत्वचमाच्छादयत,इत्यनेन विहितस्य दर्शनं श्रवणं संगच्छते । दक्षिणान्तत्वे नोपपद्यतइति भावः ॥ १० ॥

अशेषं तु *समञ्जसमादाने शेषकर्म स्यात् ॥ ११ ॥

संपादनेन शेषकर्मेत्याशङ्कते । अशेषमिति । यतः अशेषं देयमिति समञ्जसमतः आदाने नवीनसंपादने शेषकर्म स्यात् ॥ ११ ॥

नादानस्यानित्यत्वात् ॥ १२ ॥

परिहरति । नेति । आदानस्य लाभस्यानित्यत्वाद् अनिश्चितत्वात् ॥ १२ ॥

दीक्षासु विनिर्देशादक्रत्वर्थेन संयोगस्तस्मादविरोधः स्यात् ॥ १३ ॥

ज्योतिष्टोमे इदं क्रत्वर्थमिदं दक्षिणार्थमिति विभागो विहितः सोऽतिदेशेन प्राप्तः इत्थं च क्रत्वर्थत्वेन कल्पितस्वत्वमस्येत्यपि समाधत्ते । दीक्षेति । अक्रत्वर्थेन क्रत्वर्थत्वेन क्लृप्तभिन्नेन संयोगः दानसंबन्धः तस्मात्सर्वस्वं ददातीत्यपि अविरुद्धम् ॥ १३ ॥

अहर्गणस्थे ऽपि विश्वजिति सर्वस्वदानम् । अधि० ८ ।

अहर्गणे च तद्धर्मः स्यात्सर्वेषामविशेषात् ॥ १४ ॥

अस्त्यष्टरात्रनामको ऽहर्गणः । तत्र विश्वजित्सर्वपृष्ठो ऽतिरात्रो भवतीति विश्वजिद्विहितः । तत्र सर्वस्वदक्षिणात नियतसंख्यातेति संदेहे सिद्धान्तमाह । अहर्गणइति । अहर्गणे अष्टरात्रे तद्धर्मः प्रकृतिभूतविश्वजि-

* समञ्जसा ऽऽदानेनेति शा० भा० पु० पाठः ।

द्वर्मः सर्वस्वदक्षिणादिः स्यात् । सर्वेषां प्रकृतिविकृतिरूपाणामविशेषात् ॥ १४ ॥

द्वादशशतं वा प्रकृतिवत् ॥ १५ ॥

अहर्गणस्य ज्योतिष्टोमप्रकृतिकत्वेन तदन्तःपातिविश्वजितोऽपि तथेति पूर्वपक्षमाह । द्वादशशतं वेति ॥ १५ ॥

अतद्गुणत्वात्तु नैवं स्यात् ॥ १६ ॥

दूषयति । अतदिति । अतद्गुणत्वात् ज्योतिष्टोमधर्मत्वाभावात् । नैवं, ज्योतिष्टोमदक्षिणा न स्यात् । आनुमानिकातिदेशाद् नामातिदेशस्य प्रबलत्वादिति भावः ॥ १६ ॥

लिङ्गदर्शनाच्च ॥ १७ ॥

हीयते वा एष पशुभिर्यो विश्वजिति सर्वस्वं न ददातीति-लिङ्गविरोधमाह । लिङ्गेति* ॥ १७ ॥

विश्वजिति द्वादशशतन्यूनधनस्यानधिकारः । अधि. ६ ।

विकारः सन्नुभयतोऽविशेषात् ॥ १८ ॥

सर्वस्वपदं द्वादशशताधिकपरमेकगोपरमपीति विचारे पूर्वपक्षमाह । विकार इति । विकारः विश्वजिद्रूपविकारधर्मः उभयतः द्वादशशतन्यूनदानेऽधिकदानेऽपि उपपद्यते । सर्वस्वं दद्यादिति अविशेषाद् न्यूनमधिकमितिविशेषाभावात् । एकगोस्वामिना सहस्रगोस्वामिना च कर्तव्यो विश्वजिदिति फलितम् ॥ १८ ॥

अधिकं वा प्रतिप्रसवात् ॥ १९ ॥

सिद्धान्तमाह । अधिकमिति । अधिकं द्वादशशताधिकं प्रतिप्रसवात् । एवं वावर्त्विज आनेया अपि वा सर्वस्वदानेनेति, अपि वेति द्वादशशतेन ऋत्विगलाभे सर्वस्वं सूचयति, न तन्न्यूने संभवतीति भावः ॥ १९ ॥

---

* इदं च प्राप्तिमात्रपरमधिकरणम् । प्राप्तं विश्वजिति सर्वस्वं बाधित्वा इतरेषां सप्तानामह्नां द्वादशशतदक्षिणानां भूयसां साधर्म्याद् द्वादशशतमेव देयम्, एकैव च तन्त्रेण सर्वेषामेकप्रयोगवर्तिनां दक्षिणा, न पृथक् पृथक् प्रदातव्या. तस्माद् भूयोऽनुग्रहाय द्वादशशतमेव देयम्. इति वार्त्तिकमतं शास्त्रदीपिकायां प्रतिपादितम् ॥

अनुग्रहाच्च पादवत् ॥ २० ॥

साधकान्तरमाह । अनुग्रहेति । अनुग्रहात्प्राकृतद्वादशशतानुग्रहात् । एकमुद्रादाने तदन्तपादमुद्रा ऽपि दत्ता भवति तथा अधिके दत्ते तदप्यनुगृहीतमिति भावः ॥ २० ॥

आधाने अपरिमितं देयमित्यनेन संख्यान्तरविधानम् । अधि० १० ।

अपरिमिते संख्याप्रतिषेधस्तच्छ्रुतित्वात् ॥ २१ ॥

आधाने श्रूयते, एका देया शतं देयं सहस्रं देयमपरिमितं देयमिति । अपरिमितमित्यनेन एकादिपरिमितसंख्याप्रतिषेधः क्रियते उत अतिरिक्तः कल्पो विधीयतइति विचारे पूर्वपक्षमाह । अपरिमिते इति । अपरिमितशब्दश्रवणे सति पूर्वसंख्याप्रतिषेधः तस्य अपरिमितशब्दस्य श्रुतित्वाच् शक्यार्थोपपत्तेः । अयं भावः । परिमितं न भवतीति व्युत्पत्तौ परिमाणशून्यद्रव्यस्यासिद्धत्वेनाप्रामाण्यापत्त्या असूर्यंपश्या राजदारा इतिवदसमर्थसमासे नञ आख्यातार्थान्वये परिमितदानं न कर्तव्यमिति सिद्धमिति ॥ २१ ॥

कल्पान्तरं वा तुल्यवत्प्रसंख्यानात् ॥ २२ ॥

सिद्धान्तमाह । कल्पेति । कल्पान्तरमपरो दानकल्पः तुल्यवत्प्रसंख्यानात् । एका देयेत्यादितुल्यतया पाठात् ॥ २२ ॥

अपरिमितशब्देन सहस्राधिकस्य ग्रहणम् । अधि० ११ ।

अनियमो ऽविशेषात् ॥ २३ ॥

अपरिमितशब्देन सहस्रशब्देन सह पठितेन न्यूनं ग्राह्यं ततो ऽधिकमिति संशये पूर्वपक्षमाह । अनियम इति । न्यूनाधिकयोरनियमः विशेषाश्रवणात् ॥ २३ ॥

अधिकं वा स्याद्बह्वर्थत्वादितरैः सन्निधानात् ॥ २४ ॥

सिद्धान्तमाह । अधिकमिति । अधिकं श्रूयमाणसंख्याया अधिकम् । इतरैः शतसहस्रादिशब्दैः सन्निधानं यस्य तादृशबह्वर्थत्वात् । यत्र इतर-

संख्यावाचकशब्दसमभिव्याहृतबहुत्ववाचकः शब्दः तत्र बहुत्ववाचकशब्दे इतरश्रूयमाणसंख्याधिकसंख्यावाचकत्वमिति व्याप्तिः सर्वानुभवसिद्धेति भावः ॥ २४ ॥

अर्थवादश्च तदर्थवत् ॥ २५ ॥

अपरिमितमित्यस्य सन्निधौ उत्कृष्टं वै तदपरिमितमित्यर्थवादो ऽपीममेवार्थं द्रढयतीत्याह । अर्थवाद इति । अर्थवाद उक्तो यः स तदर्थवद् अधिकसंख्यार्थकम् ॥ २५ ॥

इति ह स्मेत्यादिपरकृतिपुराकल्पानामर्थवादत्वम् । अधि० १२ ।

परकृतिपुराकल्पं च मनुष्यधर्मः स्यादर्थाय ह्यनुकीर्तनम् ॥ २६ ॥

इति ह स्माह बहुर्वार्ष्णिर्माषान्मे पचतेति, बहुनामा वार्ष्णिः वृष्णिगोत्रोत्पन्नः माषान्मे पचतेत्याह इति । अनेन वाक्येन विहितो यो माषपाकः स मनुष्यमात्रस्य वृष्णिगोत्राणाम् अथ वा ऽर्थवाद इति संशये प्रथमपक्षमाह । परेति । एककर्तृकः परकृतिवाच्यः । बहुकर्तृकः पुराकल्पः । एतादृशोदाहृतो विधिः मनुष्यधर्मः मनुष्यमात्राधिकारः अर्थाय फलाय हि वाक्यस्य अनुकीर्तनम् । अतः उक्ताधिकारप्रदर्शनमेव वाक्यप्रयोजनमिति भावः ॥ २६ ॥

तद्युक्ते च प्रतिषेधात् ॥ २७ ॥

इतो ऽपि विधिः सफल इत्याह । तदिति । तद्युक्ते अमेध्या वै माषा इति निन्दायुक्ते अनेन निन्दाप्रतिषेधात् सफलम् ॥ २७ ॥

निर्देशाद्वा तद्धर्मः स्यात्पञ्चावत्तवत् ॥ २८ ॥

एतादृशं सफलत्वं वृष्णिगोत्रमात्राधिकारे ऽपि संभवतीति पक्षान्तरमाह । निर्देशादिति । वाक्ये वृष्णिनिर्देशात् तद्धर्मः वृष्णिधर्मः स्यात् । जमदग्नीनां पञ्चावत्तमिति निर्देशेन पञ्चावत्तं तस्यैव, तथा ॥ २८ ॥

विधौ तु वेदसंयोगादुपदेशः स्यात् ॥ २९ ॥

पक्षान्तरमाह । विधाविति । वेदे अर्थवादे वार्ष्णिसंयोगाद्विधौ तदनुमितविधौ वृष्णिशब्दस्योपदेशः स्यात् । पूर्वकल्पे अयमर्थवादो न भवतीति, अस्मिन्कल्पे उदाहृतवाक्येऽर्थवादत्वाङ्गीकार इति भेदः ॥ २९ ॥

अर्थवादो वा विधिशेषत्वात्तस्मान्नित्यानुवादः स्यात् ॥ ३० ॥

सिद्धान्तमाह । अर्थवाद इति । विधिशेषः क्लृप्तविधेः आरण्यस्याश्नीयादित्यस्य शेषत्वात् स्तावकत्वादयमर्थवादः । शेषं स्पष्टम् ॥ ३० ॥

सहस्रसंवत्सरशब्दस्य सहस्रदिनपरत्वम् । अधि· १३ ।

सहस्रसंवत्सरं तदायुषामसंभवान्मनुष्येषु ॥ ३१ ॥

सहस्रसंवत्सरसाध्यत्वेन श्रूयमाणे विश्वसृजामयनं सहस्रसंवत्सरसाध्यमिति श्रूयमाणे कस्याधिकार इति विचारे प्रथमपक्षमाह। सहस्रेति। सहस्रसंवत्सरसाध्यं सत्रं तदायुषां सहस्रायुषां देवादीनां, मनुष्येष्वसंभवात् ॥ ३१ ॥

उपचारोऽन्यार्थदर्शनम् ॥ ३२ ॥

उपचारस्तदर्थवादः, अन्यार्थदर्शनं देवानामधिकारं दर्शयति । प्रजापतिं वै प्रजाः सृजमानं पाप्मा मृत्युरभिजघान सहस्रसंवत्सरेण पाप्मानं मृत्युं जहाविति प्रजापतिकर्तृकत्वश्रवणादिति भावः ॥ ३२ ॥

अपि वा तदधिकारान्मनुष्यधर्मः स्यात् ॥ ३३ ॥

पक्षान्तरमाह । अपि वेति । मनुष्याधिकारः स्यात् । निखिलशास्त्रस्य तदधिकारात् ॥ ३३ ॥

नासामर्थ्यात् ॥ ३४ ॥

इमं पक्षं दूषयति । नेति । असामर्थ्यात् तावदायुरभावात् ॥ ३४

संबन्धादर्शनात् ॥ ३५ ॥

ननु रसायनादि साधयित्वा मनुष्येणापि आयुर्वृद्धिः संपादयि

शक्यते इत्याशङ्कायामाह । संबन्धेति । आयुर्वृद्धिः रसायनस्य जन्यजनकभावरूपसंबन्धस्य अदर्शनादननुभवात् ॥ ३५ ॥

सकुल्यः स्यादिति कार्ष्णाजिनिरेकस्मिन्नसंभवात् ॥ ३६ ॥

पक्षान्तरमाह । सकुल्य इति । सकुल्यः एकेन कर्तुमशक्यत्वात्पुत्रादिः अधिकारी एकस्मिन्नसंभवादिति कार्ष्णाजिनिमतम् ॥ ३६ ॥

अपि वा कृत्स्नसंयोगादेकस्यैव प्रयोगः स्यात् ॥ ३७ ॥

एक एव प्रयोक्तेत्यभिप्रायेण आह । अपि वेति । कृत्स्नसंयोगात् कृत्स्नप्रयोगस्य फलजनकत्वाद् एकस्यैव प्रयोगः कृत्स्नः ॥ ३७ ॥

विप्रतिषेधात्तु गुण्यन्यतरः स्यादिति लावुकायनः ॥ ३८ ॥

विश्वसृजामयनसन्निधावेवं श्रुतं, पञ्चपञ्चाशतस्त्रिवृतः संवत्सराः । एवमेव पञ्चदशाधिकमिति विश्वसृजां सहस्रसंवत्सरमिति । अत्र उक्तपक्षो ऽपि न संभवति । एकदेशानुष्ठातरि फलाश्रवणादतः पञ्चपञ्चाशत इति संख्यां मुख्यसंवत्सरे संबन्ध्य वाक्यप्रामाण्यनिर्वाहः न संभवतीत्यन्यतरस्य गौणार्थत्वमवश्यमुपेत्य प्रामाण्यं निर्वाह्यमित्याह । विप्रतिषेधादिति । विप्रतिषेधाद् विरोधाद् अन्यतरो गौण इति लावुकायनमतम् ॥ ३८ ॥

संवत्सरो वा विचालितत्वात् ॥ ३९ ॥

संवत्सरशब्द एव गौणः । विचालितत्वात् । चान्द्रसावनसौरादिषु दृष्टत्वेन तदर्थस्य व्यभिचरितत्वात् । पञ्चपञ्चाशच्छब्दो हि संख्याविशेषे नियतः अतः गौणो नेति भावः ॥ ३९ ॥

स प्रकृतिः स्यादधिकारात् ॥ ४० ॥

संवत्सरशब्दस्य गौणत्वमङ्गीकृत्य पक्षान्तरमाह । स इति । सः संवत्सरशब्दः प्रकृतिः प्रकृतिवत् । स्वप्रकृतिभूतगवामयनवत् । गवामयने यो मासः स संवत्सर इति व्यवहारेणात्रापि तथा स्यात् ॥ ४० ॥

अहानि वा ऽभिसंख्यत्वात् ॥ ४१ ॥

भयोः प्रकृतिप्रत्ययविषययोष्टिलोपयोरेकत्वमङ्गीकृत्य विन्मतोर्लुकि च स्रगादिप्रकृतेष्टिलोपोपि बाधतइति कृत्वा प्रकृतिभावस्यानर्थक्यं प्रतिपाद्य तत्प्रतिपत्तत्वे पयस्विञ्छब्दादिषु विनश्च लुक्यनेन स्रगादाविव पयसष्टिलोपस्य बाधे पयिष्ठ इति न प्राप्नोतीति आक्षिप्य यथालक्षणमप्रयुक्ते इत्यभिधानाच्च भवति टिलोपः, रजस्विनमाचष्टे रजसयति आयुष्मन्तमाचष्टे आयुषयतीति भवितव्यमित्युक्तं, नन्वत्र मतेन्यपामप्यनेन न्यायेन लोपो न स्यादिति कथं वृत्तावेकाज्ग्रहणस्य वसयतीति प्रत्युदाहरणम्, उच्यते। भाष्ये प्रकृत्यैकाच इदं प्रत्याख्यानमन्तरेणापि सूत्रं भिन्नविषयस्यापि टिलोपस्य शास्त्रद्वारैक्यमभ्युपेत्याभावः शक्यते वक्तुमित्येवं परं न त्वर्थसत्तत्वमित्यवश्यं विन्मतोभिन्नविषयस्य प्रकृते टिलोपस्य बाधासंभवादेकाच्तु तद्बाधनार्थमारम्भणीयमेतत्सूत्रमित्यनेकाच्तु टिलोपो भवत्येव, यत्तु पयिष्ठ इति न प्राप्नोति यथालक्षणमप्रयुक्तइतिभाष्यमुपादाय न भवति टिलोप इति कैयटकारवचनं तद् भाष्ये पयस्विञ्छब्दं प्रस्तुत्यानभिधानात्कृतविन्मतुलुगन्तसान्तमात्रविषयं न त्वन्यविषयमपि, अत एव तत्रैव कैयटे ततश्च रजस्विनमाचष्टे रजसयति आयुष्मन्तमाचष्टे आयुषयतीति भवितव्यमिति कृतविन्मतुलुगन्तसान्तमेवोदाहृतं, यत्तु माययतीत्यादाविष्ठवद्भावेन विनो लुकि पुनस्तेनैव टिलोपे चिणोलुङ्न्यायेन विनो लुकोऽ 'सिद्धवदत्रे'त्यसिद्धत्वाट्टिलोपाप्रसङ्ग इति चोद्यं तट्टिलोपप्रकरणे तिरयतीत्यत्र परिहृतम्। कुमुदान्यत्र सन्ति कुमुद्वान् देशः, एवं नड्वान् वेतस्वान्, 'कुमुदनडवेतसेभ्यो ड्मतुप्' इत्यत्र चातुरर्थिको ड्मतुप्। अस्यानजादित्वेन भत्वाभावेऽपि डित्करणसामर्थ्याट्टिलोपे झय इति मकारस्य वकारः। अत्र टिलोपस्य पूर्वस्मादपि विधाविति स्थानिवत्त्वं पूर्वत्रासिद्धे न स्थानिवदिति न भवति। अत्र सुधाकरः। कुमुदादिभ्यो णौ विन्मतोर्लुगित्यत्र न केवलं मतुबेव गृह्यते किन्तु ड्मतुबिति तस्य लुकि कुमुदयति, नडयति, वेतसयतीत्याह। अन्ये त्वेकानुबन्धग्रहणे न द्व्यनुबन्धकस्येति न्यायेन विन्मतोरित्यत्र द्व्यनुबन्धकस्य मतुप एव ग्रहणं युक्तं न त्र्यनुबन्धकस्य ड्मतुपोपीति लुगभावाट्टिलोपे कुमुद्वयति नड्वयति वेतस्वयतीत्येवं भवित-

व्यमित्याहुः । ननु इमतुपो लुकि कथं कुमुदयतीत्युदाहृतं, यावता विन्मतोर्लुकि वसुमत्तरो वसिष्ठ इत्यादिवत् प्रकृतेष्टिलोपेन भाव्यं, नेष्ठवद्भावेन प्राप्तत्वाद्विन्मतोर्लुक आभीयत्वेनैव पुनष्टिलोपे कर्त्तव्ये चिणो लुङ्न्यायेनासिद्धत्वं, यस्मादिष्ठवद्भावप्राप्तानां कार्याणामुत्पत्तिदेश एव देशः, तदपेक्षयैव सिद्धासिद्धी इति टिलोपप्रकरणे तिरायतीत्यत्रोपपादितं, न च ड्मतुपि कृतस्य टिलोपस्य अस्मिँष्टिलोपे ऽसिद्धत्वं, व्याश्रयत्वादेवं तर्हि ड्मतुपि कृतस्य टिलोपस्याचः परस्मिन्निति स्थानिवत्त्वात् पुनर्व्याश्रयेऽपि टिलोपो न भविष्यति । विन्मतोर्लुक् । 'युवाल्पयोः कनन्यतरस्या'मितीष्ठेयसुनोर्विधीयमानः कनादेशो णावपि भवतीति युवानमल्पं वाचष्टे कनयतीति भवति । अन्यतरस्यांग्रहणात् कनभावे युवयत्यल्पयतीति भवतः । यूनोऽत्र यणादिगुणौ, युवतीमल्पां वाचष्टे लिङ्गविशिष्टपरिभाषया कनादेशे कनयतीति भवति, अङ्गवृत्तपरिभाषया बहुलग्रहणाद्वोपधावृद्ध्यभावः, कन इष्ठवद्भावस्य पुंवद्भावाभावेत्यादिना यत् प्रयोजनकथनं तदुपलक्षणमिति यथासंभवमन्यान्यपि प्रयोजनानि प्रदर्श्यन्ते । अन्तिकमाचष्टे नेदयति, बाढमाचष्टे साधयति । 'अन्तिकबाढयोर्नेदसाधा'वितीष्ठनि विहितौ नेदसाधावपि भवतः, प्रशस्यमाचष्टे प्रशस्ययति, 'प्रशस्यस्य श्रः' 'ज्य चे'तीष्ठेयसुनोर्विधीयमानौ श्रज्यादेशावत्र न भवतः, सोपसर्गात्संग्रामयतेरेवेति ज्ञापकात् शस्यशब्दादेव णिच् न तु प्रशस्यशब्दादिति णिच्परत्वाभावाद्यस्मादिष्ठनि परे संभाविते वा यत्कार्यं संभाव्यते तस्माण्णावपि तद्भवतीत्यवश्यमतिदेशार्थोऽभ्युपगन्तव्यः, अन्यथा ऽनवस्थानप्रसङ्गात् । सुधाकरस्तु श्रापयति ज्यापयतीति श्रज्यावुदाजहार, एवं प्रक्रियारत्नकारोऽपि । तच्च मृग्यम् । शाकटायनस्तु श्रयति ज्ययतीत्युदाजहार । स हि ज्यादात्परस्याच इति धातोरुपान्त्यस्यैवाकारस्याकारमाह न पुनरन्त्यस्यापीत्यत्राकारस्यैवाभावाद्दूरे पुकः प्रसङ्गः । अत्र मते स्रजयतीत्यादौ वृद्धेरभावोऽङ्गवृत्तपरिभाषया बहुलग्रहणाद्वेत्येवं नाभिधानीयो भवति, प्रस्यस्फानां च भावं व्यधादिति प्रापयतीत्यादिसिद्धिः । सर्वमिदमनार्षत्वादप्रमाणमिति प्रक्रियारत्ने दूषितम् । अस्माभिस्तु श्रज्यादेशावेवात्र नाभ्युपगतौ, वृद्धमाचष्टे ज्यापयति, 'वृद्धस्य चे'-

तीष्ठेयसुनोर्विधीयमानो ज्यादेशो णावपि भवति । अकारोच्चारणसामर्थ्यात्, 'प्रकृत्यैकाजि'ति लोपाभावे वृद्धौ पुक्, अयं च ज्यादेशः प्रियस्थिरेत्यादिना वर्षादेशस्यापि विधानाद्विकल्पेन भवति, प्रिय स्थिर स्फिरोरु बहुल गुरु वृद्ध तृप्र दीर्घ वृन्दारक इत्येतेभ्यस्तदाचष्टइति णौ प्रस्थस्फवर्बंहिगर्वर्षित्रप्द्राघिवृन्दा इतीष्ठनीयसुनोः प्रियादीनां यथासंख्यं विधीयमानाः प्रादयो णावपि भवन्तीति प्रियस्य प्रापयति, स्थिरस्य स्थापयति, उरोर्वरयति, बहुलस्य बंहयति, गुरोर्गरयति, वृद्धस्य वर्षयति, तृप्रस्य तृपयति, तृप्रं दुःखमित्युक्तं, दीर्घस्य द्राघयति, वृन्दारकस्य वृन्दयति, प्रादीनामदन्तानां वृद्धौ पुक् । लोपस्तु 'प्रकृत्यैकाजि'ति प्रकृतिभावान्न भवति। ननु प्रादीनां प्रकृतिभावे 'असिद्धवदत्रे'त्यसिद्धत्वादेकाजेव नास्तीति प्रकृतिभावाप्रसङ्गात् स्यादेव टिलोपः, एवन्तर्हि प्रादीनामसिद्धत्वादेवायमपि न भविष्यति। ननु मा भूदेवमयं प्राद्याश्रयष्टिलोपःस्थानिवद्भावेन, प्रियाद्याश्रयस्तु प्राप्नोत्येव, नैतत्। प्रियादीनामिष्ठवद्भावेन प्राप्ताट्टिलोपात् परत्वादकृतएव तस्मिन् प्राद्यादेश इति स्थानिनि स एव नास्ति टिलोप आदेशे योतिदिश्येत, परयतीत्यादौ बहुलग्रहणात् अङ्गवृत्तइति वात उपधाया वृद्धिर्न भवति। अत्र क्षीरस्वामी । बहुलग्रहणात् प्रादेशाभावात् प्रिययतीत्यपीति, मैत्रेयस्तु स्थिरस्य स्थादेशे बहुलग्रहणाद् वृद्धिपुकोरभावात् गुणायादेशयोः स्थयतीति, बहुलादेव स्थिरयतीत्यपीति कौमाराः । भाष्ये तु प्रापयति स्थापयतीत्येवोदाहृतत्वात उद्भाष्यमेतत् सर्वमित्यनादरणीयम् । व्याकरणस्य सूत्रं करोति व्याकरणं सूत्रयति, तत्करोतीत्युपसंख्यानं सूत्रयत्याद्यर्थमिति णिच्, प्रातिपदिकाद्धात्वर्थइत्येव सिद्धे वचनमिदं माणवकं मुण्डयतीत्यादौ माणवकादिसापेक्षान्मुण्डादेर्णिजर्थं मुण्डमिश्रेत्र व्याकरणादिसापेक्षात् सूत्रादेर्णिजर्थमारभ्यते, तत्र लक्ष्यलक्षणसमुदायस्य व्याकरणशब्दार्थत्वात्सूत्रस्यैतदंशत्वेन व्यतिरेकाद्वाक्ये षष्ठी, यद्यपि सूत्रमेव व्याकरणशब्दार्थस्तथापि व्याकृतिक्रियाकारणत्वविशिष्ट व्याकरणं शब्दार्थः, सूत्रशब्दार्थस्तु केवलमिति राहोः शिर इत्यादिवत् काल्पनिकान्वयव्यतिरेकस्य संभवः । यदा त्वयं व्यतिरेको न विवक्ष्यते तदा व्याकणं सूत्रं करो-

तीति विग्रहीतव्यम्, अत्र वृत्तौ वर्त्तिपदार्थानामेकार्थ्येन विविक्तानामभावादन्यान्वयायोगात् सूत्रस्य व्याकरणेन संबन्धानुपपादाद्व्यतिरेकाभावाद्व्याकरणात् षष्ठ्यभावः, अस्य च विशेषकर्मणः सामान्यकर्मणः सूत्रस्य प्रत्ययार्थान्तरभावादनन्तर्भावात् करोतिना संबन्धाच्च भवति द्वितीया । उक्तं चैवं भाष्ये । वाक्ये षष्ठी, उत्पन्ने प्रत्यये द्वितीया, केनैतदेवं भवति, योऽसौ सूत्रव्याकरणयोरभिसंबन्ध उत्पन्ने प्रत्यये निवर्त्तते, अस्ति च व्याकरोतेर्व्याकरणेन सामर्थ्यमिति द्वितीयेति । अत्र कैयटे वाक्ये द्रव्यरूपं सूत्रं सूत्रशब्देनोच्यते, णिचि तूत्पन्ने सत्त्वभावनिवर्त्तनात्करोत्यर्थाभिधायी सूत्रशब्दः संपद्यते । तदुक्तं परार्थाभिधानं वृत्तिरिति । एतच्च प्रक्रियागतविभागाश्रयेणोक्तं, परमार्थतस्तु धात्वन्तरं सूत्रविशिष्टक्रियावचनमिति ।

यथान्योऽपि णिच् प्रदर्श्यते ॥ कंसस्य वधः कंसवधः, 'हनश्च वध' इति वधादेशः, 'कर्तृकर्मणोः कृती'ति कंसात् कर्मणः षष्ठी, कृद्योगा च षष्ठी समस्यते इति समासः । यद्वा सर्पिषो जानीते, मातुः स्मरतीत्यादौ न माषाणामश्नीयादित्यादावपि कारकस्य शेषत्वविवक्षायां षष्ठीसिद्धावपि 'ज्ञोऽविदर्थस्य करणे' 'अधीगर्थदयेशां कर्मणी'त्यादिना कारकस्य शेषत्वविवक्षायामेव पुनः षष्ठी विधानं षष्ठी श्रूयतएव न लुप्यतइत्यर्थात् समासनिषेधार्थममुमेवार्थं प्रतिपदविधाना च षष्ठी न समस्यतइत्याहेति तस्य कर्तृकर्मणोः कृतीत्यत्र शेषाधिकाराभावादशेषत्वविवक्षायामेव कर्मणः षष्ठीविधावनुपस्थानात् कृद्योगा चेति वचनं तदपवादो न भवति किं तु 'षष्ठी'ति समासवचनस्यानुवाद इति राजपुरुषादिवत् षष्ठीत्येव समासः । उक्तञ्च ।

साधने व्यपदिष्टे च श्रूयमाणक्रिये पुनः ।
प्रोक्ता प्रतिपदं षष्ठी समासस्य निवृत्तये ॥

इति । न चैवं मन्तव्यं प्रतिपदविधाना चेति वचनं कर्तृकर्मणोः कृतीति षष्ठ्याः समासनिषेधार्थं स्यादिति, यतः कृद्योगा च षष्ठी समस्यतइति त्वयैव समासोऽभिहितः, कंसवधमाचष्टे कंसं घातयति, आख्यानात् कृतस्तदाचष्टइति णिच्, आख्यायतइत्याख्यानं 'कृत्यल्युटो बहुल'मिति

कर्मणि ल्युट्, तद्योगाच्छब्दोप्याख्यानम्, इहाख्यानमात्रमाख्यानशब्देनोच्यते न तु संज्ञाभूतं कंसवधबलिबन्धसुभद्राहरणादि कर्मेवेति राजागमनादेरपि णिच् भवति, अत्र कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति कंसवधादेराख्यानस्य कृदन्तत्वम्, अत्र कंसवध इतिस्थिते कृत्प्रत्ययस्य लुक् भवति, प्रकृतिप्रत्यापत्तिरिति, कृत्प्रकृतेर्धातोः प्रत्यापत्तिर्भवति, प्रत्यापत्तिश्चाविकारस्वरूपेणावस्थानमिति वधादेशनिवृत्तौ हनिरेवावतिष्ठते, ननु प्रत्ययस्य सन्नियोगेन शिष्टोयं वधादेशः तस्य लुका निवृत्तौ स्वयमपि संनियोगशिष्टपरिभाषया निवर्तिष्यतएव किं प्रत्यापत्तिवचनेनेति चेत् । सत्यमत्रैवं सिद्ध्यति तत्फलं त्वग्रे दर्शयिष्यते । तत्र कंसहनिति स्थिते प्रकृतिवच्च कारकं, चकारो भिन्नक्रमः कारकमित्यस्यानन्तरं द्रष्टव्यः, कार्यशब्दोऽध्याहार्यः, षष्ठ्यर्थे वतिः, प्रकृतिशब्देन हेतुमण्णिच्प्रकृतिरुच्यते। तदयमर्थो भवति। वधादेः कृदन्तस्य यत्कारकं कंसादिकं तस्य कृत्प्रकृतेर्हन्यादेर्हेतुमण्णौ धातावनन्तर्भूतमकृतनलोपादिकं द्वितीयान्तं यद्रूपं तादृशं भवति । 'हनस्तो चिण्णलोः' होहन्तेर्ञ्णिन्नेष्वित्यादिकं कार्यं हेतुमण्णिचः प्रकृतेरिवात्रापि णौ भवतीति, ततश्च कंसात् द्वितीयायां हनश्च तत्वघत्वयोः कंसं घातयतीति सिद्धं भवति, अनेन चातिदेशेन कारकस्य धातावन्तर्भावस्यापि प्रतिपादनादर्थोत्तद्व्यतिरिक्ताद्वधादेवायं णिजिति तदादेरेव धातुत्वात्तत एव तिङि तदाद्येव तिङन्तं पदं भवति, तथा कंसं घातयतीत्यादौ वधादेरेवाङ्गत्वादडागमस्तस्मादेव पूर्वो भवति, एवं कंसमजीघतदित्यत्र हन एव चङ्परणिपरे द्विर्वचनं भवति। नन्वत्रान्तरेणापि कार्यातिदेशं वृद्धिरिवास्यैव णेर्णित्त्वमाश्रित्य 'हो हन्ते'रिति घत्वं 'हनस्त'इति तत्वं च भविष्यति किमनेनातिदेशेनेति चेन्न । धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानमिति यत्र धातोः स्वरूपोपादानेन किंचित्कार्यं विधीयते तत्र धातुनिबन्धनप्रत्यये तत्कार्यमिति विज्ञानात्, अस्य च णेर्धातुनिमित्तत्वाभावात्कंसपरिमृड्काम्यतीत्यत्र मृजेर्वृद्धिरिवात्रापि तत्वघत्वयोरप्रसङ्गात् । न चैवं मन्तव्यं, कंसपरिमृड्काम्यतीत्यत्र यदङ्गं कंसपरिमृडिति न तन्मृजिर्यश्च मृजिर्नासावङ्गं, मृजेर्वृद्धिश्च मृजेरङ्गस्य विधीयते इत्यन्तरेणापि धातुस्वरूप-

परिभाषां नास्त्येव वृद्धेः प्रसङ्ग इति, यतोऽङ्गाधिकारे तस्य च तदन्तस्यापि इति
मृज्यन्तस्यापि प्राप्नोत्येव, एवं बलिबन्धमाचष्टे बलिं बन्धयतीत्यादि, नन्वत्र
कृल्लुगिति कृतो लुका लुप्तत्वात् प्रत्ययलक्षणाभावात् कृद्योगाभावाच्च षष्ठी
प्राप्नोति, प्रत्ययस्य लक्षणं च लुका लुप्तत्वान्न भवितव्यं, स्थितं च हन्त्या-
द्यपेक्षया कर्मत्वमिति द्वितीया सिद्धेः किं प्रकृतिवत्कारकातिदेशेनेति
चेत्, असत्यस्मिन्नतिदेशे कंसादेः पृथक्करणमेव न स्यादिति विभक्तेरेवा-
प्रसङ्गात्कुतः स्याद् द्वितीया, किं च कंसवधशब्दादेव णिच् न तु विनिष्कृ-
ष्टकारकांशाद्वधादिति सकारकस्यैव तिङन्तत्वं स्यात्। तथाऽडागमोऽपि
कारकात् पूर्वमेव स्यात्। न तु कंसं घातयतीति हन्तेः, एवं चङीति
द्विर्वचनमपि कंसादेरेव स्यात् न तु कंसमजीघतदित्यादौ हन्त्यादेः, नैतानि
सन्ति प्रयोजनानि। यथा प्रकृतिवत् कारकमित्यनेन कंसप्रकृतेर्हन्त्यादेर्णौ
दृष्टः कारकाणामन्तर्भावोऽत्रापि णौ प्रतिपद्यते, तथा प्रकृतिवत् कार्य-
मित्यनेनापि कृत्प्रकृतेर्णौ हन्त्यादेः शुद्धे णौ दृष्टस्यानिष्कृष्टकारकप्रकृतित्व-
स्यात्राप्यतिदेष्टुं शक्यत्वान्निष्कृष्टकारको हन्त्यादिरेव स्यात्। प्रत्ययस्य
प्रकृतिरिति यतस्तदाद्येव तिङन्तं भविष्यत्यड्द्विर्वचने च तस्यैव
भविष्यतः, सत्यमत्रैव न दोषो भविष्यति, राज्ञ आगमनं राजागमनं,
'कर्तृकर्मणोः कृती'ति कर्तरि षष्ठी, पूर्ववत् कृद्योगा च षष्ठी समस्य-
तइति समासः। राजागमनमाचष्टे राजानमागमयतीत्यादौ राजादेर्द्वि-
तीया न स्यात् किं तु कर्तृलक्षणा तृतीयैव स्यात्, यतः प्रकृतिवत् कार-
कमित्येतत् प्रकृतेः शुद्धे णौ दृष्टकार्यमेवातिदेशेन पुनरन्यदपि किंचित्,
प्रकृतिवत् कार्यमित्युच्यमाने तु गमने कर्तृभूतस्य राज्ञः कृत्प्रकृते-
र्गमः शुद्धे णौ 'गतिबुद्धी'त्यादिना ऽस्ति कर्मत्वमित्यत्रापि णौ कर्मरू-
पातिदेशाद्राजानमागमयतीति सिद्धं भवति। अत एव शुद्धे णौ दृष्टस्य
कर्मरूपस्यात्रापि णावतिदेशाद्राज्ञो नलोपो भवति, न चैवं मन्तव्यं
'सुप्तिङन्तं पद'मिति द्वितीयान्तस्यैव राज्ञः पदत्वादत्र नकारान्तस्य
प्रातिपदिकान्तत्वेऽपि पदान्तत्वाभावान्नलोपो न भवतीति यल्लुप्तयान्त-
र्वर्तिन्या षष्ठ्या प्रत्ययलक्षणेन तदन्तत्वेन नान्तं भवत्येव पदं, न चास्ति

'न लुमते'ति प्रत्ययलक्षणाभावः, यदयं लुमता लुप्ते प्रत्यये यदङ्गं तस्य यत् कार्यं लुप्तप्रत्ययमाश्रित्य प्राप्नोति तन्नैवेतीह नावतरति । एवं च प्रकृतिव-त्कारकवचनं कंसादेर्द्वितीयार्थं च भवति । यतः 'कर्तृकर्मणोः कृती'ति षष्ठी प्राप्नोति, तदेवं कंसादीनां कारकाणां णिजुत्पत्तौ पृथक्कारस्य सिद्धत्वादा-ख्यानात् कृदित्याख्यानशब्दो ऽर्थात्स्वावयवकृदन्तपरो भवति । मृगाणां रमणं मृगरमणं, कर्तरि षष्ठ्याः पूर्ववत् समासः । मृगरमणमाचष्टे मृगान् रम-यति, दृश्यर्थायां च प्रवृत्ताविति णिजन्ताख्यानात्कृत इत्यादि सर्वं संबध्यते, तदस्यायमर्थः । मृगरमणस्य या समाख्यानरूपा प्रवृत्तिः सा यदि दृश्यर्था भवति तदा णिज्भवतीति, एवं च मृगान् रमयतीत्यस्यायमर्थो भवति, स्वयं मृगरमणमनुभवन् अन्यस्मै तद्दर्शयितुमाचष्टइति । इदं दृश्यर्थायां चेति वचनमाख्यानात्कृतस्तदाचष्ट इत्येवाख्यानप्रवृत्तेर्दृश्यर्थत्वेपि सिद्धे णिच्चा-रभ्यमाणमदृश्यर्थत्वं माभूदित्येवमर्थं, तेन यदारण्ये दृष्टं मृगरमणं ग्रामस्थो-न्यस्मात्राचष्टे एवं मृगास्तत्र रमन्ते तदा मृगरमणमाचष्टइति वाक्यमेव भवति । अत्र कैयटे दृश्यर्थायामित्येतच्च मृगरमणादिविषयमेव द्रष्टव्यं, राजागमनादौ तु दृश्यर्थप्रवृत्त्यभावेपि णिज्भवति, अत्र रमणक्रियायां कर्तृ-भूतानां मृगाणां रमेरकर्मकत्वेपि शुद्धे णौ गतिबुद्धीत्यादिना कर्मत्वाद-त्रापि णौ कर्मत्वं, रात्रेर्विवासो रात्रिविवासः, विवासोतिक्रमणं, कर्त-रि षष्ठ्याः पूर्ववत्समासः, ततः आङ् मर्यादाभिविध्योरित्याङोव्ययीभावः, आरात्रिविवासमाचष्टे रात्रिं विवासयति, आलोपश्च, कालाध्वनोरत्यन्त-संयोगे, मर्यादायां णिचि मर्यादावचनस्याङो लोपः, इहाख्यानादिति न संबध्यतइति पदमञ्जर्यां, कृल्लुगादि पूर्ववत् । इह कालस्यात्यन्तसंयोगः सन्निहिताख्यानक्रिययानवयवेन संबन्धः, ततश्च रात्रिं विवासयतीत्य-स्यायमर्थः । यावद्रात्रेरतिक्रमणं तावत्कथाः कथयतीति, इहाख्यानमा-ख्येयमपेक्षतइति कथा इति, प्रदर्शितवसिक्रियायां कर्तृभूतायां रात्रेर्वसेर-कर्मत्वेन शुद्धे णौ 'गतिबुद्धी'त्यादिना कर्मत्वादत्रापि णौ कर्मत्वं, सूर्य-स्योद्गमनं सूर्योद्गमनम्, अत्रापि पूर्ववत् कर्तरि षष्ठी, समासश्च, विक्रम-सिंहपुर्याः प्रस्थितः काञ्चीपुर्यां सूर्योद्गमनं प्राप्नोतीत्यर्थः । भू प्राप्तावा-

त्मनेपदीति चुरादौ, सूर्यमुद्गमयतीति। 'चित्रीकरणे प्रापि', कृदन्ताच्चित्री-करणे गम्यमाने प्राप्नोत्यर्थाण्णिच्, कृल्लुगादि पूर्ववत्। अत्राप्यागमने कर्त्तुः सूर्यस्य पूर्ववद्गमेः शुद्धे णौ 'गतिबुद्धी'त्यादिना कर्मत्वाद् द्रुशेरपि णौ कर्मत्वं, विक्रमसिंहपुर्याः काञ्चीपुरी विदेशस्येत्युदयात् पूर्वं तावतो देशस्य गमनमिहाश्चर्यकरणम्, इहाप्यसंभवादाख्यानादिति न संबद्ध्यते। तत्र प्रकृतिवत्कारकातिदेशात्सूर्यस्य णौ पृथग्भावः, सोपसर्गात् संग्रामय-तेरेवेति ज्ञापकादुदीपीति सूर्यमुद्गमयतीत्यादि भवति, पुष्येण योगः पुष्ययोगः, अत्र यथान्तर्द्धौ येनादर्शनमिच्छतीत्यात्मनः कर्मणो नियमेन गम्यत्वाद्येनेति कर्त्तुः षष्ठ्युभयप्राप्ताविति नियमाच्च भवति, एवमत्रापि युजिक्रियाकर्मणश्चन्द्रमसो नियमेन गम्यत्वात्तद्योगे कर्त्तुः पुष्यात् षष्ठी भवति, पुष्यश्चात्र कर्त्ता, चन्द्रमाः कर्म, स हि तं युनक्ति, पुष्ययोगं जानाति पुष्येण योजयति। 'नक्षत्रयोगे ज्ञी'ति नक्षत्रयोगवाचिनः कृदन्तादस्माज्जाना-त्यर्थे णिचि कृल्लुगादि पूर्ववत्। अत्र प्रकृतिप्रत्यापत्तिवचनेन घञि चजोः कुघिण्ण्यतोरिति कुत्वं निवर्ततइति कैयटपदमञ्जर्यादिषूक्तम्। प्रकृति-वत्कारकमित्यनेन कृतप्रकृतेः शुद्धे णौ यदयं कारकमेतद्रूपमत्रापि णावि-त्युक्तत्वाद्योगे कर्त्तुः पुष्यस्य गत्यादिष्वनन्तर्भावेन कर्मत्वाभावादत्रापि णौ न भवति कर्मत्वमित्यात्मनः कर्त्तृत्वाश्रयेण तृतीया भवति। अत्र न्यासे पुष्येण करणभूतेन चन्द्रमसो योग इति करणे तृतीयामुक्त्वा कृतप्रकृतेर्युजेः शुद्धे णौ पुष्यस्य करणताविपर्यासाभावात्तत्र दृष्टामेवात्रापि णावतिदि-श्यतइति तृतीयामुक्त्वा यदा पुष्येण सह योग इत्यर्थो विवक्ष्यते तदा कारकातिदेशस्यायं विषयो न भवति। पुष्यस्य करणत्वात्सहार्थएव तृती-या वेदितव्येत्युक्तम्, अनयोः पक्षयोः पुष्येण करणभूतेन सह वा तेन चन्द्रमस्यन्ययोगे इत्यर्थः स्यात्। अत्र कैयटे प्रकृतिवत्कारकमित्यनेन तेन तुल्यं क्रिया चेद्वति'रिति तृतीयार्थे वतिमङ्गीकृत्य णिचो या प्रकृतिः कंसवधादिराख्यानक्रियापेक्षया प्रतिपन्नकर्मैव तया तुल्यं भवत्यप्रतिपन्न-भावं कंसादिकं घातयति राजानमागमयतीत्यादौ सर्वत्र कंसादेर्द्वितीया-सामर्थ्यं, एदनेनैव न्यायेन पुष्येण योजयतीत्यत्रापि पुष्यस्य कर्मत्वाद् द्वि-

तीया स्यादित्याशङ्क्य वत्करणात् स्वाश्रयस्य कर्तृत्वस्यानिवर्त्तनात्तृतीयासिद्धिमुक्त्वैवमुक्तम्, अथ वा प्रकृत्या तुल्यं वर्तते इति प्रकृतिवत्प्रकृतेरिव प्रकृतिवण्यन्तस्य कारकमित्युभयथातिदेशाश्रयणात्कचित्कश्चित्परिगृह्यतइति ॥

अथान्योऽपि प्रातिपदिकाश्रयः प्रदर्श्यते ॥ आचारेवगल्भक्लीबहोडिभ्यः क्विब्वा ॥ कर्त्तुः क्यङ् सलोपश्चेत्यत्र यङ् पठ्यतइति उपमानात्सचिहिताचारक्रियायाः कर्तुः प्रातिपदिकादाचारेर्थेयं क्विब् भवति, अत्र वा, ग्रहणं तन्त्रकौण्डिन्यन्यायेन कौटिल्ययङः क्रियासमभिहारे यङ इवावगल्भादिप्रातिपदिकविषयेणानेन क्रियासुबन्तविषयस्यापि क्यङो बाधो माविज्ञायीति । नन्विदं गल्भाद्यनुक्रमणं 'कर्त्तुःक्यङि'त्यत्र सुबन्ताधिकारे क्रियते । क्यङपवादश्चायं क्विप् । उत्सर्गसमानदेशत्वं चापवादानां प्राचुर्येण दृष्टमिति सुबन्तादेवानेन क्विपा भवितव्यं, न चैतदस्ति, यद्गल्भादीननुक्रम्य सर्वप्रातिपदिकेभ्य इत्येकइत्याह । न चेदं प्रातिपदिकग्रहणं सुबन्तोपलक्षणार्थं स्यात् । तर्हि सर्वेभ्य इत्येकइत्येवोक्तत्वात् प्रातिपादिकग्रहणमनर्थकं स्यात्, यत्तु तदुक्तं गल्भादौ वाग्रहणं तदिदानीं न वक्तव्यं भवति, यतः सर्वेभ्यः क्विब् विधीयते क्यङन्तरेणापि वाग्रहणं वचनद्वयप्रामाण्याद्विकल्पो भविष्यति । अथैवङ्गल्भादयोऽपि नानुक्रमितव्या भवन्तीति न वक्तव्यं भवतीति न मन्तव्यं, यदेषामनुदात्तत्वप्रतिज्ञानार्थमेवानुकरणम्, इदं चानुदात्तत्वप्रतिज्ञानं क्विप्संनियोगएवेत्यत्रावगल्भ इवाचरति अवगल्भायतइत्यादौ वाक्ये क्यङि चाकारस्य श्रवणं भवति । अवगल्भइवाचरति, अवगल्भते । अवगल्भाञ्चक्रे । अवगल्भिता । अवगल्भिष्यते । अवगल्भताम् । अवागल्भत । अवगल्भेत । अवगल्भिषीष्ट । अवागल्भिष्ट । अवागल्भिष्यत । अनुदात्तेत्त्वात्तङ्, सोपसर्गात्संग्रामयतेरेवेतिज्ञापकाच्चिक्रुष्टोपसर्गाद्गल्भादेव प्रत्यय इति गल्भस्यैवा[1]डागमो भवति । तथावागल्भ्येत्यत्रावशब्दस्य 'कुगतिप्रादय'इति समासे तल्लक्षणो ल्यब् भवति । क्लीबते । क्लीबाञ्चक्रे । होडते । होडाञ्चक्रइत्यादौ 'कास्प्रत्यया-

१ तस्यैवाडागमइति २ पु॰ पाठः

दाम्' इत्याम्। 'आम'इति लेर्लुक्, ननु तत्र प्रत्ययग्रहणमपनीय कास्यनेकाच इति कर्तव्यं चुलुम्पाद्यर्थमिति न्यस्यते, एते ऽवगल्भादय एकाच इति कथमाम्, नैष दोषः। यद्यपि क्विप्सन्नियोगेनैकाचो भवन्ति तथाप्युपदेशेऽनेकाचो भवन्ति। कास्यनेकाच इत्यत्र च भूतपूर्वगतिराश्रयिष्यते। इदमेव क्विब्विधानं भूतपूर्वगत्याश्रयणे प्रमाणम्। अन्यथा गल्भ धार्ष्ट्ये, क्लीबृ अधार्ष्ट्ये, होडृ अनादरे, इत्येतेभ्यो ऽनुदात्तेभ्यः अवगल्भतइत्यादि सिद्धौ किमनेन, तत्र च धातूनामनेकार्थत्वात् आचारार्थश्च भविष्यति। अश्व इवाचरति अश्वति। प्रातिपदिकात् प्रत्ययविधानात् णप्रकृत्यकारयोरपदान्ताश्रय'मतो गुणे'इतिपररूपत्वं भवति। अन्यथान्तर्वर्त्तिन्या विभक्त्या पदत्वात्पररूपत्वं न स्यात्। अश्वाञ्चकार। अश्विता। अश्विष्यति। अश्वतु, आश्वत्। अश्वेत्। अश्व्यात्। आश्वीत्। आश्विष्यत्। 'अतो लोप आर्धधातुके। क इवाचरति। कति। चक। चकतुरित्यादि, अतो लोपः सर्वत्र, अयं णल्लोपेत्यादिना वृद्धिं बाधते, अ इवाचरति अति, इत्यादि। औ। औतुः। उः। इत्यादि। सर्वत्रात्र द्विर्वचनेऽतो लोपादन्तरङ्गत्वा'दतो गुणे' पररूपत्वे तस्याङ्गग्रहणेन प्राप्तावतो लोपात् परत्वादभ्यासग्रहणेन ग्रहणा'दत आदे'रिति दीर्घः। 'आतो लोप इटि चे'त्याल्लोपः क्किति, णलि 'त्वात औ णल'इत्यौ वृद्धिः। यथाकथञ्चित् प्रातिपदिकग्रहणे लिङ्गविशिष्टं गृह्यतइति स्थितत्वान्मालेवाचरति मालाति। मालाञ्चकार। मालिता। मालिष्यति। मालातु। अमालात्। मालायात्। मालायास्ताम्। अमालासीत्। यमरमनमातां सगिटौ। इडजादावार्धधातुके 'आतो लाप इटि चे'त्याकारलोपः, ज्ञेवाचरति ज्ञति, जज्ञावित्यादि पूर्ववत्, प्रत्ययान्तत्वेप्येकाच्त्वादामभावः। आ इवाचरति आतीत्यादि। कविरिवाचरति कवयति, कवयाञ्चकार, कवयितेत्यादि, आशीर्लिङि'अकृत्सार्वधातुकयोर्दीर्घ'इति दीर्घे कवीयात्। लुङ्यतरङ्गमपि गुणं सिचि वृद्धिरपवादत्वात् बाधतइति वृद्धावायादेशे चाकवायीत्। विरिवाचरति वयतीत्यादि पूर्ववल्लिटि प्रत्ययान्तत्वेप्येकाच्त्वादामभावे, विवाय, विव्यतुः, विव्युः। विवयिथ, विव्यथुः। विव्य। विवाय। विवय।

विव्यिव । विव्यिम । णिति वृद्धिः, पिति गुणः, क्नित्येरनेकाचइति यणादेशः ॥ इरिवाचरति श्रयतीत्यादि, लिट्येकाच्त्वादामभावः । इयाय । ईयतुः । ईयुः । इययिथ । ईयथुः । ईय । इयाय । इयय । ईयिव । ईयिम, अत्र क्निति सवर्णदीर्घे 'अचि श्नुधात्वि'तीयङ् । यद्वा सवर्णदीर्घत्वात् परत्वेनोत्तरखण्डस्य 'एरनेकाच'इति यण्यपि नास्त्यत्र रूपभेदः, गुणवृद्धिविषये अयायो'र्द्विर्वचनेची'ति स्थानिवत्त्वादिकारस्यैकारस्य च द्विर्वचनेऽभ्यासह्रस्वत्वे 'अभ्यासस्यासवर्णे'इतीयङ्, यदापि गुणवृद्ध्योरपि स्थानिवद्भावादिकारस्य द्विर्वचनं तदापि सवर्णदीर्घात् परत्वात्पुनरुत्तरखण्डस्य गुणादावस्त्येवाभ्यासस्यावर्णपरत्वमिति इयङ्सिद्धिः । न च पुनः प्रवर्त्तमानाभ्यां गुणवृद्धिभ्यामन्तरङ्गत्वात्सवर्णदीर्घेन भाव्यमिति मन्तव्यम् । एवं ह्यभ्यासस्यासवर्णे'इतीयङ्वचनमनर्थकं स्यात्, नन्वयमस्त्यवकाशः, अर्तेर्लिटि द्विर्वचनेऽभ्यासस्या'र्त्तिपिपर्त्योश्चेतीत्त्वे, इयर्ति, इयृतः, इत्यादि, नैतदस्ति, नह्येकमुदाहरणं योगारम्भं प्रयोजयति, इयर्ति हि प्रयोजनेऽभ्यासस्यार्त्तावित्येव ब्रूयात् । एषेरियेष, ओणेरुवोणेत्यादि तु न प्रयोजनं, यतोऽयं छान्दसः, भाषायान्त्वामा भवितव्यं, छन्दसि च तन्वादीनां छन्दस्युपसंख्यानमिति त्रियम्बकं सुवर्ग इत्यादिवदियङुवङौ सेत्स्यतः । लक्ष्मीरिवाचरति लक्ष्मीयति । लक्ष्मयाञ्चकार लक्ष्मयितेत्यादि । श्रीरिवाचरति श्रयति, शिश्राय । शिश्रियतुः, शिश्रियुः 'एरनेकाच'इति यणादेशः संयोगपूर्वत्वान्न भवति, 'अचि श्नुधात्वि'तीयङेव भवति । ईरिवाचरति, अयतीत्यादि, लिटि पुन'रिजादेश्च गुरुमतोऽनृच्छ'इत्याम्ययांचकारेति भवति । तत्र व्यपदेशिवद्भावेनेजादित्वगुरुमत्त्वे समाश्रिते । विधुरिवाचरति विधवति, विधवांचकार, विधविता, विधविष्यति, विधवतु, अविधवत्, विधवेत् । आशिष्य'कृत्सार्वधातुकयो'रिति दीर्घे, विधूयात्, अविधावीत् । गुणं सिचि वृद्धिरपवादत्वाद् बाधते । कुरिवाचरति कवति । चुकावेत्यादि । एकाच्त्वादामभावः । उरिवाचरति अवतीत्यादि । पूर्ववल्लिटि गुणवृद्धिविषये अवावो स्थानिवत्त्वादोकारस्य च द्विर्वचने ऽभ्यासह्रस्वत्वे । अभ्यासस्यासवर्णे'इत्युवङि उवाव,

उवविथ । उवावेति भवति, यदापि गुणवृध्योरपि स्थानिवद्भावादुकारस्य द्विर्वचनं तदाप्य'भ्यासस्यासवर्णे'इत्युवङ्विधानसामर्थ्यात् सवर्णदीर्घात् पूर्वमुत्तरखण्डस्य गुणादावभ्यासस्यासवर्णपरत्वादुवङ्, क्विति तु ऊवतुः । उवथुः । उव । उविव । उविमेति भवति, अत्रान्तरङ्गत्वात्सवर्णदीर्घे सत्युवङ् । अत्र वार्णादाङ्गं बलीय इति पूर्वमुत्तरखण्डस्योवङि पश्चात्कृते तस्मिन्नूवतुरित्यादि स्यादिति न मन्तव्यं, यत इयं परिभाषाऽऽङ्गवार्णयोः समानाश्रयत्वे प्रवर्त्तते । यथा कारक इति, अत्र हि प्रत्ययमेवाश्रित्य गुणवृद्धी प्राप्नुतः, उवतुरित्यत्र उकारमाश्रित्य सवर्णदीर्घः प्राप्नोति । उवङ् तु प्रत्ययमाश्रित्येति नास्ति समानाश्रयत्वं, वधूरिवाचरति वधवति । वधवांचकार, वधवितेत्यादि । भ्रूरिवाचरति भ्रवति, बुभ्राव । बुभ्रुवतुरित्यादि, 'अचि श्नुधातुभ्रुवामि'त्युवङादेशः । अयं च वृद्धिगुणयोर्विषये ताभ्यां परत्वात् बाध्यते । उरिवाचति अवतीत्यादि, लिटि ईजादेश्चेत्याम्यवांचकारेति भवति, पितेवाचरति पितरति । पितरांचकार । पितरिता । पितरिष्यति । पितरतु । अपितरत् । पितरेत् । पित्रियात् । 'रिङ् शयग्लिङ्क्ष्वि'ति रिङादेशः । अपितारीत् । अन्तरङ्गमपि गुणं सिचि वृद्धिवचनाद्बाधत इत्युक्तं, यद्वात्र गुणेपि न दोषः । यत्कृते ऽस्मिन्नतो ल्रान्तस्येति पुनर्वृद्धिर्भविष्यति । नेवाचरति नरति । ननारेतीत्यादि पूर्ववत् । आ इवाचरति अरति 'पाघ्रे'त्यादावर्त्तिग्रहणेन

अभिव्यक्तपदार्था ये स्वतन्त्रा लोकविश्रुताः ।
शास्त्रार्थस्तेषु कर्त्तव्यः शब्देषु न तदुक्तिषु ॥

इति दृश्यादिसाहचर्याच्च धातुपाठस्थ एवार्तिर्गृह्यते, न पुनरयमपीति चच्छादेशाभावः । अत एव तत्र पदमञ्जर्यामृ गतिप्रापणयोरिति भौवादिकः, ऋ गताविति क्रैयादिकः, ऋ सृ गताविति जौहोत्यादिक इति त्रीनेवोपादायान्त्ययोरग्रहणे कारणं शिदसंभवः साहचर्यं चोक्तं, तथा 'समो गम्यृच्छी'त्यत्र वृत्तौ अर्तीत्यत्र पठ्यते, सृ गतिप्रापणयोरिति भूवादौ । ऋ सृ गताविति जुहोत्यादौ । विशेषाभावादुभयोरपि ग्रहणमिति । यदि च नामधातोरिह ग्रहणमिष्येत् कथमेवमुच्येत । एवम-

न्यत्रापि तत्रतत्र प्रतिपदधातुग्रहणेष्वभिव्यक्तपदार्थानां धातुपाठपठितानामेवोपादानं क्रियते। 'बाह्वादिभ्यश्चे'त्यत्र भाष्यकैयटयोरप्यनभिव्यक्तपदार्थानां तत्तत्कार्यं न भवतीति, अद्यत्वे बाहो।बाह्वादिभ्यश्चेतीञोभावात्सामान्येऽपि वाहव इति भवति। तथा संज्ञाश्वशुरस्य राजश्वशुराद्यदिति यतो ऽभावादल्लक्षणे इञि श्वाशुरिरित्येव, 'मातृपितृभ्यां स्वसे'त्याभ्यां परस्य स्वसुर्विधायमानं षत्वं क्रियाशब्दात् परस्य नेति तत्र मातृस्वसेति भवतीति प्रतिपादितम्। एवं चास्माद्दृशब्दाल्लिटि 'ऋच्छत्यृता'मिति क्विति लिटि विधीयमानो गुणो न भवति। तत्र धात्वभ्यासयोः सवर्णदीर्घे धातुग्रहणेन ग्रहणादृकारान्तलक्षणे गुणे अरतुरित्यादि भवतीत्येके। अन्ये त्वभ्यासग्रहणेन ग्रहणादुरदत्वहलादिशेषातआदेरितिदीर्घेषु 'आतो लोप'इत्याकारलोपे सत्यतुरित्यादि प्रत्ययमात्रमेवावशिष्टं भवतीति। एवं णिश्रिद्रुस्रुभ्य इत्यनभिव्यक्तपदार्थत्वेनाचारक्विबन्तस्य द्रोर्ग्रहणाभावाच्चङभावात् सिच्यद्रावीदिति भवति। भूरिवाचरति भवतीत्यत्र 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' 'भुवो वुग्लुङ्लिटोः' 'भवतेर'इति विधीयमानसिज्लुग्वुगभ्यासात्वानामभावात् अभावीत् अभाविष्टाम्। अभाविषुः, बुभावेत्यादि एव भवति, पिबतेर्विचि पाः, तस्याचारक्विबन्तस्य 'पाघ्रेत्यादौ' 'गातिस्थे'त्यादौ चाग्रहणात् पिबादेशसिज्लुकोरभावात् पाति, अपासीदिति भवति, एवमन्यदप्युह्येयं प्रतिपदोक्तेषु। पृरिवाचरति। परति। पपार। पपरतुः। पपरुरित्यादि, अयं पृशब्दानुकरणं धात्वन्तरं न पुनः क्र्यादौ जुहोत्यादौ वा पठ्यमान इति पाठाश्रयः श्ना श्लुश्च न भवति। क्विति लिटि 'ऋच्छत्यृता'मि'ति ऋकारान्तलक्षणो गुणः। 'शृदृप्रामि'ति ह्रस्वविकल्पस्त्वनभिव्यक्तपदार्थत्वान्न भवति। ऋ इवाचरति अरति, अरांचकार, 'इजादेश्च गुरुमत'इत्याम्प्रत्ययः। गम्लृ इवाचरति गमलति, गमलांचकार, प्रत्ययान्तत्वादामि ऋकारल्कारयोः सावर्ण्यो'उरण्पर'इति लपरो गुणः। ऌ इवाचरति अलति, पूर्ववद्गुणः। लिटि द्विर्वचनम्, ऌवर्णदीर्घाभावात् सवर्णदीर्घाभावात् उत्तरखण्डस्य यण्यभ्यासस्योरदत्वादेवाल, अलतुरित्यादि। परमहेरिवाचरति परमहयति। पर-

महयांचकार, केवलाच्चामभावाज्जिहाय। लुङि सिचीत्यवादेशे हलन्तलक्षणा 'वृद्धि'र्नेटी'ति निषिध्यते। 'अतो हलादे'रिति वृद्धिविकल्पोपि ह्म्यन्तक्षणेति यान्तत्वान्निषिद्ध इत्यपरमहयीदिति भवति। एकार इवाचरति अयति, लिटीजादिलक्षणे आम्ययांचकारेति भवति। लुङ्यायीत्। अन्यदा पूर्ववद्धलन्तहलक्षणाया वृद्धेर्नेटीति निषेधान्माभवानायीत्। गौरिवाचरति गवति। जुगाव। अगवीत्। अगावीत्। 'अतो हलादे'रिति वा वृद्धिः। ओकारवदाचरति। अवति। अवांचकार। लुङि हलन्तलक्षणाया वृद्धे'र्नेटी'ति निषेधान्मानभवानवीदिति। परमरा इवाचरति परमरायति। परमरायांचकार। रायति। रिराय। ऐकार इवाचरति आयति, अयांचकार, परमनौरिवाचरति, परमानावयति, परमनावांचकार, नावति, नुनाव। केवलादौकारादावति, आवांचकार, गोधुगिवाचरति गोदुहति, य इवाचरति ययति, अनेकाच्त्वादामभावे ययाय। लुङि यान्तत्वाद् वृद्ध्यभावादयीत्, द्यौरिवाचरति देवति। स्वरिवाचरति स्वरति, फलिवाचरति फलति, अनयोर्लुङ्यतो हलादेरिति विकल्पापवादे 'अतो ल्रान्तस्ये'ति नित्यं वृद्धौ अस्वारीदफालीदिति भवति, चरफलोश्चेत्यत्र न्यासविस्तारयोः फलेर्णौ क्विपि फाल्, अयमप्येकदेशविकृतन्यायेन गृह्यतइति यङ्यङ्लुकोरभ्यासस्य नुकि पंफाल्यते अपंफालीदित्युक्तं, तदेतदुत्परस्यात इति तपरकरण'मतो हलादे'रित्यादिवच्च केवलनिर्देशार्थमपि तु सवर्णग्रहणनिवृत्त्यर्थमपीत्याश्रयणेनान्यथा प्रतिपदोपादानेष्वगिव्यक्तपदार्थानामेव भाष्यादौ ग्रहणस्य स्थितत्वाच्चैवं युज्यते, इदमिवाचरति, इदामति। अनुनासिकस्य क्विझलोरित्यत्र झलादिक्विप् धातोरेव संभवतीति तत्साहचर्यात्क्विबपि धातुविहित एव गृह्यतइति नात्र क्वावयं दीर्घ इति केचित्तन्न। अस्य क्विपः ककारस्यात्र सामान्यग्रहणमन्तरेण प्रयोजनाभावात्। चङिवाचरति चाङति, अणिवाचरति आणति, राजानति, कुम्भति, अस्वति, पदति, योधति, भिषजति, शम्बति, अङ्गति, पण्यति, त्वदति, मदति, 'प्रत्ययोत्तरपदयोश्चे'ति त्वमौ। युवामिवाचरति आवामिवाचरति, यूयमिवाचरति वयमिवाचरति, युष्मदति, अस्मदति, युष्मदस्मदो-

रनेकार्थत्वान्न त्वमौ विभक्तिपरत्वाभावाच्च युवावौ नापि यूयवयौ । त्वामतिक्रान्तः अतित्वम् । एवमत्यहं, क्वावतित्वदति, अतिमदति 'प्रत्ययोत्तरपदयो'रिति त्वमौ, युवां युष्मानतिक्रान्तः अतित्वमत्यहम्, अत्र द्विवचनत्वे तदाश्रित्य युवावौ न भवतः पराभ्यां त्वाहाभ्यां बाधादत्र क्वावपि अतित्वदति अतिमदति, मखति, कफति, मन्यति, वटति, पटति, अकति, कङ्कति, अयति, वेशति, षषति, यशति, प्रसिद्धा ये हलन्तास्तेषां कारितणौ टिलोपे 'णेरनिटी'ति णेश्च लोपे तद्धलन्तत्वं द्रष्टव्यम् ॥

अथैतत्क्विबन्ताद्धातोः क्विप् चेति कर्त्तरि क्वौ किंचिदुच्यते। 'यूस्त्याख्यौ नदी'तीकारान्तशब्दरूपं स्त्याख्यं नदीसंज्ञकमित्युक्तं, तत्र कुमार्यादेरेतत्क्विबन्तात्कर्त्तरि क्वौ कुमारी ब्राह्मण इत्यादौ स्त्याख्यत्वाभावान्नदीसंज्ञा न प्राप्नोति। तत्रोच्यते, प्रथमलिङ्गग्रहणं चेति क्विलुप्समासैरन्यलिङ्गत्वेपि प्रथमलिङ्गाश्रया नदीसंज्ञा भवतीत्यर्थः । इह प्रस्तुतत्वाल्लुप्समासौ न प्रदर्श्येते । एवं च कुमारी ब्राह्मण इत्यादौ आचरतिवर्तमानस्य कुमार्यादेर्नदीसंज्ञायां हे कुमारि ब्राह्मण इत्यादौ 'अम्बार्थनद्योर्ह्रस्व' इति ह्रस्वो भवति, कुमार्यै ब्राह्मणायेत्यादौ ङिद्वचने 'चाण्नद्या' इत्याडागमो 'ङेराम्नद्याम्नीभ्य'इत्यामादेशः, कुमारीणां ब्राह्मणानामित्यादौ 'ह्रस्वनद्याप' इति नुड् भवति, एवं हे ब्रह्मबन्धु ब्राह्मण ब्रह्मबन्धवे ब्राह्मणायेत्यादौ ह्रस्वादि द्रष्टव्यं, नदीत्वादेव बहवः कुमार्यो ब्राह्मणा यस्मिन्बहुकुमारीको देश इत्यादौ 'नद्यृतश्चे'ति कब् भवति, यत् पुनरिप्वशनिप्रभृतीनां ह्रस्वान्तानां स्त्याख्यानां श्रीभ्रुप्रभृतीनामियङुवङ्स्थानानां च 'ङिति ह्रस्वश्चे'ति नदीसंज्ञा विकल्पेन तदेवाचारक्विब्न्तानां पुल्लिङ्गानां प्रथमलिङ्गग्रहणं चेति न भवति। तथा च वार्त्तिकं ह्रस्वेयङुवङ्स्थानप्रवृत्तौ च, अत्र भाष्यं ह्रस्वौ च इयङुवङस्थानौ च प्रवृत्तौ च प्राक् प्रवृत्तेश्च स्त्रीवचने एव नदीसंज्ञौ भवत इति वक्तव्यमिति, प्रवृत्तिः क्विबादीनां, तेनार्थान्तरसंक्रान्तिः । इषवे ब्राह्मणाय, अशनये ब्राह्मणाय, धेनवे ब्राह्मणाय, श्रियै ब्राह्मणाय, भ्रुवे ब्राह्मणायेत्यादौ नदीसंज्ञानिमित्तकार्यं न भवतीति, यत्र तु स्त्रीवचनं तत्र इष्वै ब्राह्मण्यै इषवे ब्राह्मण्यै

अशनये ब्राह्मण्यै, धेन्वै ब्राह्मण्यै, धेनवे ब्राह्मण्ये, श्रियै ब्राह्मण्यै, श्रिये, ब्राह्मण्यै, भ्रुवै ब्राह्मण्यै भ्रुवे ब्राह्मण्यै इत्यादौ पक्षे घिसंज्ञानिबन्धनमपि भवति । यस्त्वपर आह ह्रस्वौ चेयङुवङ्स्थानौ च प्रवृत्तौ च प्राक् प्रवृत्तेश्च स्त्रीवचन एव नदीसंज्ञौ भवत इति वक्तव्यमित्यत्र क्वचिद्भाष्यकोशेष्वस्त्रीवचनएव नदीसंज्ञौ भवत इत्यकारप्रश्लेषेण पाठः सोऽपपाठ इति कैयटे उक्तम्, एवं कुमारीमिच्छति कुमारीयतीत्यादेः क्वाबल्लोपयोः कुमारी ब्राह्मण इत्यादौ ङिद्वचनेषु कुमार्यै ब्राह्मणायेत्यादि द्रष्टव्यम् ।

इदमपरं क्वौ कार्यं विचार्यते ॥ युष्मदस्मदोर्युष्मानाचष्टे अस्मानाचष्टे इति णौ टिलोपेऽनेकार्थत्वेन प्रत्ययोत्तरपदयोश्चेति त्वमयोरभावाद्युष्म् अस्म् इति मान्ते युष्मदस्मदी भवतस्तत्र तु कृदन्तत्वाद्विभक्तिष्वेकदेशविकृतस्यानन्यत्वाद्युष्मदस्मदाश्रया विभक्त्यादेशाः प्रकृत्यादेशाश्च त्वादयो भवन्तीत्येके, तन्मते यूयवयौ जसि' 'त्वाहौ सौ' 'तुभ्यमह्यौ ङयि' 'तवममौ ङसी'ति योगचतुष्टयविषये प्रकृतेर्यूयादयो भवन्ति, तथा 'युष्मदस्मद्भ्यां ङसोऽश्, ङे प्रथमयोरम् 'शसो न' 'भ्यसोभ्यम्' पञ्चम्या अत् 'एकवचनस्य च 'साम आक'मितियोगसप्तकविहिता विभक्त्यादेशाश्च भवन्ति, एवं 'युष्मदस्मदोरनादेशे' 'द्वितीयायां च' 'प्रथमायाश्च द्विवचनेभाषाया'मित्यात्वं 'योची'ति यत्वं, शेषे लोप इत्यन्तलोपश्च यथायोगं भवति, अत्र 'युष्मदस्मदोरनादेशे'इत्यात्वं 'योची'त्यजादौ यत्वविधानात् हलादावविशिष्यते ॥

अथ रूपाणि ॥ त्वम्, अहं, युषाम्, आसाम्, विभक्तिपरत्वेपि युवावौ प्रकृत्योर्द्व्यर्थत्वाभावान्न भवतः, युयं, वयं, युषामासां, युषान्, आसान्, युष्मा, अस्मा, युषाभ्याम्, असाभ्यां, युषाभिः, असाभिः, तुभ्यं, मह्यं, युषाभ्याम्, असाभ्यां, युषभ्यम्, असभ्यम्, भ्यसोभ्यमिति अभ्यमादेशपक्षे इदं रूपम्, अन्यदा शेषे लोपे पदकार्ये जश्त्वादौ युड्भ्यमड्भ्यमिति भाव्यं, युषत् असत्, तव, मम, युष्योः, अस्योः, युषाकम्, असाकं, युष्यि, अस्यि, युष्योः, अस्योः, युषासु, असासु, युवामाचष्टे आवामाचष्टइति णौ क्वौ णेश्च लोपे विभक्तौ पूर्ववत् प्रत्ययोत्तरपदयोश्चेति त्वमयोः युष्मदस्मदोरेकार्थ-

त्वाभावादभावः, अस्ति ह्यर्थत्वं विभक्तिपरत्वं चेति युवावौ भवतः । तत्र युववयौ जसीत्यादि योगचतुष्टयविषये परत्वाद्युयादयो भवन्ति, अत्र रूपाणि । त्वम्, अहं, युवाम्, आवां, यूयं, वयं, युवान्, आवान्, युवया, आवया, युवाभ्याम्, आवाभ्यां, युवाभिः, आवाभिः, तुभ्यं,, मह्यं, युवाभ्याम्, आवाभ्यां, युवत्, आवत्, युवाभ्याम्, आवाभ्यां, युवत्, अवत्, तव, मम, युवयोः, आवयोः, युवाकम्, आवाकं, युवयि, आवयि, युवयोः, आवयोः, युवासु, आवासु, विभक्त्यादेशादि पूर्ववत्, त्वामाचष्टे मामाचष्टइति णौ प्रत्ययोत्तरपदयोश्चेति त्वमयोः प्रकृत्यैकाजिति प्रकृतिभावाट्टिलोपाभावे णेश्च क्वौ लोपे त्वाद् माद् इति भवतः, अङ्गवृत्तपरिभाषया वृद्धिर्नेति भवादिनां त्वद् मद् इति भवतस्तत्र विभक्तिषु मपर्यन्तस्याभावाद्यूयादयो न भवन्ति, तत्र रूपाणि । आदितः पञ्चसु वचनेषु त्वां मामिति, वृद्धिर्नेति वादिनां सुजसोः शेषे लोपेन दकारलोपे त्वं मम् इति भवतस्त्वान्, मान्, त्वाया, माया अवृद्धिपक्षे त्वया, मया, त्वाभ्यां, माभ्यां, त्वाभिः, माभिः एवं ङे प्रथमयोरमित्यमि शेषेलोप 'आतोधातो'रित्याकारलोपस्त्वां, मां, त्वाभ्यां, माभ्यां, भ्यमादेशे पूर्ववच्छेषे लोपे त्वाभ्यं, माभ्यमिति भवति, पूर्ववल्लोपे, अभ्यमादेशपक्षे आल्लोपे च त्वभ्यं, मभ्यमिति भवति, अवृद्धिपक्षे शेषलोपे त्वभ्यम्, मभ्यम्, अङ्गवृत्तपरिभाषया 'बहुवचने झल्ये'दित्येत्वं न भवति, त्वत्, मत्, पूर्ववच्छेषेलोपाल्लोपौ, त्वाभ्यां, माभ्यां, त्वत्, मत्, त्व,म, पूर्ववच्छेषेलोपाल्लोपौ, त्वायोः, मायोः, अवृद्धिपक्षे त्वयोः, मयोः, त्वाकं, माकं, त्वायि, मायि, त्वायोः, मायोः, अवृद्धिपक्षे त्वयि, मयीत्यादि, त्वासु, मासु, अत्र येषां दर्शनं णौ त्वमयोः परपूर्वत्वात् पूर्वमनेकाच्त्वेन टिलोपे वृद्धौ पुकि क्वौ णेर्लोपे त्वापि मापि इति भवत इति, तेषामपि पूर्ववत् शेषे लोपादिषु वृद्धिपक्षे यानि रूपाणि तानि द्रष्टव्यानि । ननु युष्मदस्मदोर्मान्तत्वे कथं यूयादयः प्रदर्शिताः । यतस्ते मपर्यन्तस्येत्यधिकारे विधीयन्ते, मपर्यन्तस्येति च युस्मदस्मद्भ्यां वैयधिकरण्येन संबध्यते, व्यपदेशिवद्भावश्चाप्रातिपदिकेनेति प्रतिषिध्यते, अवश्यं चैतदेवं विज्ञेयं समानाधिकरण्येन संबन्धे मान्तयोरादेशप्रसङ्गात् ।

उच्यते । अत्र मान्तस्येति वचनेनाप्युक्तेऽर्थे सिद्धे परिग्रहणसामर्थ्यात् अप्रातिपदिकेनेत्यस्याप्रवृत्तेः, व्यपदेशिवद्भावसिद्धेः । अपरे पुनराहुः, सति शेषे पर्यन्तशब्दो वर्तते, तेन मान्तयोः युष्मदस्मदोर्यूयादेशेन न भवितव्यमिति तन्मते पूर्वं यूयवयौ जसीत्यादियोगचतुष्टयस्याप्रवृत्तेर्युवाद्यादेशाभावः, तत्र रूपाणि युषम् असम्, 'ङे प्रथमयोरमि'त्याम 'शेषेलोप' इत्यन्तलोपः, सुजसोर्द्विवचने तु 'प्रथमायाश्च द्विवचन'इत्यात्वं युषाम् असाम्, चतुर्थ्येकवचने तुभ्यमह्यादेशाभावात् ङेप्रथमयोरमित्यमि शेषे लोपे युषम् असम्, षष्ठ्येकवचने 'युष्मदस्मद्भ्यां ङसोऽश्'इति अशादेशे'तवममौ ङसी'ति तवममयोरभावे शेषे लोपे युष असेति भवति, इदं च शेषे लोपप्रदर्शनं शेषे लोप इत्यस्य शेषे विभक्तौ पर इत्यर्थपक्षे, यदा तु मात् परत्व शेषत्वमिति पक्षस्तदा शेषेलोपाभावान्मकारस्य श्रवणं भवतीति युष्मम् अस्ममित्यादि भवति ॥

इति श्रीसायणेन विरचितेयं प्रत्ययान्तनामधातुवृत्तिः समाप्ता ॥

॥ शुभं भवतु ॥

यद्युपाधीनां भेदकत्वं न स्याद्योगविभागोनर्थकः स्यात्, भेदकत्वे तु तेषां भावादिकर्मणोर्विकल्पविधानात्कर्तृकर्मणोः प्रतिषेधो न स्यादिति तदर्थो योगविभागः कर्त्तव्यः, किमेतस्य ज्ञापने प्रयोजनमित्यत आह। 'तेनेति'। 'लाभार्थस्य विभाषेति'। अत्र हेतुर्वक्ष्यते, यदि तर्ह्युपाधिर्भेदकस्तत उदितो वेति क्त्वाप्रत्यये भाववाचिनि विकल्प इति निष्ठायामपि भावएव प्रतिषेधः स्यान्नार्थान्तरे, शब्देनाश्रीयमाणो ह्युपाधिर्भेदकः, न चोदितो वेत्यत्र भाववाचित्वं शब्देनाश्रितं, तथा च तेन निर्वृत्तं निवृत्तेत्द्यूतादिभ्य इत्यादेरुपपत्तिः॥

"विभाषा भावादिकर्मणोः"॥ 'मेदितमनेनेति'। निष्ठा शीङिति क्त्वप्रतिषेधाद्गुणः। 'प्रमिन्न इति'। आदिकर्मणि क्तः कर्त्तरि चेति कर्त्तरि क्तः। 'सौनागा इति'। सुनागस्याचार्यस्य शिष्याः सौनागाः। 'शकितो घटः कर्त्तुमिति'। यद्यपि शकिः केवलो ऽकर्मकस्तथापि तुमुनन्तवाच्यक्रियाविशेषणत्वेन सकर्मको भवति, तथा च कर्मणि लादयो दृश्यन्ते, अयं योगः शक्यो ऽवक्तुम्। अयमर्थः शक्यते वक्तुमिति॥

"क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेषु"॥ 'मन्थाभिधानं चेदिति'। समुदायेन चेन्मन्थोऽभिधीयतइत्यर्थः। एतेन समुदायानामभिधेयभावेन मन्थादय इहोपात्ता इति दर्शयति। यदि तु धात्वर्थोपाधित्वेनाश्रीयेरन् मन्थादिसाधने धात्वर्थे क्षुब्धादयो निपात्यन्तइति तदा क्षुभितं मन्थेनेत्यादावपि स्यात्, द्रवद्रव्यसंपृक्ताः सक्तवो मन्थः,दधिमन्थान्मधुमन्थाँश्चेति हि दृश्यते, अन्ये तु मथ्यतेनेनेति मन्थनदण्डः, खज्जको मन्थ इत्याहुः। मन्थादिषु क्षुब्धादिशब्दानां चलनादिक्रियायोगो यथासंभवं द्रष्टव्यः। 'उपमानादिति'। उपमानं सादृश्यं, तच्च यथासंभवं द्रष्टव्यं, स्वान्तशब्देन विषयेष्वविक्षिप्तमनाकुलं मन उच्यते, स्वनितं शब्दायितमित्यर्थः। 'मनसेति'। कर्त्तरि करणे वा तृतीया, एवं ध्वनितं तमसेत्यत्रापि। 'लग्नमिति'। रगे लगे ष्टगे संवरणे, अत्र निष्ठानत्वमपि निपात्यते। 'म्लिष्टमिति'। म्लेच्छ अव्यक्ते शब्दे। 'म्लेच्छितमिति' अपभाषितमित्यर्थः। अत्रार्थस्या-

विस्पष्टतया शब्दस्याविस्पष्टत्वम्, अपशब्दानामपि स्वरूपेणाभिव्यक्तत्वात्, उदाहरणेषु वर्णानभिव्यक्तिरविस्पष्टत्वम्। 'फाण्टमित्यादि'। कः पुनरत्रानायासो विवक्षित इत्यत आह। 'यदशृतमित्यादि'। यस्य व्याधेर्यदौषधं जातं [1]तस्य पञ्चधा कल्पना, रसः कल्कः शृतः शीतःफाण्ट इति, रसः स्वरसः, कल्कः पिष्टं, शृतं क्वाथः। शीतो नाम क्षुण्णमौषधजातमुदके प्रक्षिप्य रात्रावधिवासितमुदकं प्रातः पीयते, तदेवोष्णोदके प्रक्षिप्य सद्योभिषुत्य पूत्वा यत्पीयते स फाण्टः, यथाह वाग्भटः, सद्योभिषुत्य पूतस्तु फाण्ट इति, पञ्चाप्येते कषायाः, तत्राशृतमिति क्वाथस्य व्यावृत्तिः, अपिष्टमिति कल्कस्य, उदकसंपर्केणेति स्वरसस्य, ईषदुष्णमिति शीतस्य, मात्रशब्दः स्वभावानुवादः, विभक्तरसं, प्रागवस्थाया भिन्नरसं, यदेवंभूतं कषायं तत्फाण्टमित्यर्थः। कषायशब्द उभयलिङ्गः। कथं पुनरेतदनायासशब्देनोच्यते, लक्षणया, यदाह। 'अनायासेनेति'॥

"धृषिशसी वैयात्ये"॥ ञिधृषा प्रागल्भ्ये, शसु हिंसायां, षष्ठ्यर्थे प्रथमा, विरूपं यातं गमनं चेष्टितं यस्य स वियातः, अविनीतः, शसेरपीत्यादौ ग्रन्थे इट्प्रतिषेधः सिद्ध इत्यनुषङ्गः। अथ धृषेर्विभाषा भावादिकर्मणोरिति विकल्पे प्राप्ते नित्यार्थं ग्रहणं कस्मान्न भवति तत्राह। 'भावादिकर्मणोरपीति'। एवं चास्य आदित्वे प्रयोजनं चिन्त्यं, धर्षितोऽभिभूतः, पूर्ववदकित्त्वं, विशसितो विकृतः॥

"दृढः स्थूलबलयोः"॥ स्थूलो मांसलो दुर्बलोपि, अस्थूलोपि बलवान् बलः। 'बलवति चेति'। सूत्रे अर्शआद्यच्प्रत्ययान्तं बलशब्दं दर्शयति। 'दृहेरिति'। दृहि वृद्धावित्येतावान्पाठ इति वार्तिककारस्य पक्षः, दृह दृहि वृद्धाविति भाष्यकारस्य, अथ किमर्थं हकारस्य लोपो निपात्यते न ढत्वमेव निपात्यताम्परस्य धत्वं ष्टुत्वं ढो ढे लोपः दृढ इति सिद्धमित्यत आह। 'हकारलोपनिपातनमिति'। 'रेफो न स्यादिति'। रादिफ इत्यत्र वर्णादिति नापेक्ष्यते, तेन रशब्दो

[1] जातमिति नास्ति ई॰ पु॰।

न स्यादित्यर्थः। ढलोपस्यासिद्धत्वे संयोगे गुर्विति गुरुसंज्ञयोपजातया लघुसंज्ञाया बाधितत्वात्तन्निबन्धनकार्याप्रसङ्ग इत्यर्थः। 'इह चेति'। गुरुसंज्ञानिबन्धनकार्यप्रसङ्गश्चेत्यर्थः। 'दृंहितमिति'। दृंहेः प्रत्युदाहरणं, दृहितमिति दृहेः, अत्र च दीर्घादिरूपेण वृद्धमुच्यते॥

"प्रभौ परिवृढः"॥ 'पूर्वेण समानमिति'। इडभावादेर्निपात्यस्य तुल्यत्वात्। 'वृंहेरिति'। वृहि वृद्धाविति वार्त्तिककारस्य पक्षः, वृह वृहि वृद्धाविति भाष्यकारस्य।'वृहिश्च यदि प्रकृत्यन्तरमस्तीति'। ततस्तस्यापि निपातनमित्यर्थः।'तदेव प्रयोजनमिति'। असिद्धत्वाभावः। अथ कथं परिवृढय्येत्यत्र ल्यबादेशः, यावता परिवृढमाचष्टइति विग्रहे तत एव णिच् कर्त्तव्यः,समुदायस्य च धातुत्वात् क्त्वाप्रत्ययोपि तत एव कर्त्तव्यः,ततश्च परेरपि क्त्वान्तेन्तर्भावाचायं समासः, इह च परिव्रढयतीति परिशब्दस्य तिङन्तेन्तर्भावात्तिङ्ङतिङ इति निघातो न स्यादित्यत आह। 'परिवृढमाचष्टइति विगृह्येति'। णिजुत्पद्यतइति'। ण्यन्तं पठितव्यम्, अण्यन्तपाठे तु विगृह्येति क्त्वाप्रत्ययो न स्यात्, असमानकर्त्तृकत्वात्। 'संग्रामयतेरेव सोपसर्गादिति'। यदत्र वक्तव्यं तद्दृशादिभ्यो भुव्यच्वेरित्यत्रैवोक्तम्। 'निघातो भवतीति'। अड्द्विर्वचनयोरप्युपलक्षणमेतत्। पर्यव्रढयत्। परिविव्रढयिषति। 'परिवृंहितमिति'। वृंहेः प्रत्युदाहरणं, 'परिवृहितमिति'। वृहेः॥

"कृच्छ्रगहनयोः कषः"॥ कषतिर्हिंसार्थः। 'कष्टोग्निरिति'। चीयमानोग्निरत्राग्निशब्देन विवक्षितः, स कष्टो भवति चयनप्रकारस्य दुर्ज्ञानत्वात्। व्याकरणस्य कष्टत्वमिडागमादिव्यवस्थाया दुर्ज्ञानत्वात्। साम्नां कष्टत्वं पर्वभेदस्य स्वरस्य स्तोमादीनां च दुर्ज्ञानत्वात्। 'कारणमपीति'। लक्षणया, कृच्छ्रयतीति कृच्छ्रमिति व्युत्पत्त्या वा॥

"घुषिरविशब्दने"॥ घुष्टा, अविशब्दिता, अवघुषितं, विशब्दितमाविष्कृताभिप्रायमित्यर्थः। चौरादिकस्य चायं प्रयोगः, स एव ह्यस्मिन्नर्थे वर्त्तते। 'द्वा[1]वपीति'। घुषिरिति सूत्रोपात्तं रूपं द्वयोरपि

१ तयोरिहेति मुद्रितमूलपुस्तके पाठः।

सधारणमित्यर्थः । कथं समान्येन ग्रहणं यावता विशब्दने णिचा भवितव्यं, केवलश्चेह घुषिरुपात्तोत आह । 'विशब्दनप्रतिषेधश्चेति' । 'विशब्दनार्थस्यानित्य इति' । अन्ये त्वनित्यण्यन्ताश्चुरादय इति सामान्येन ज्ञापकमाहुः । अपर आह ।

चिति स्मृत्यामितीदित्त्वमत्र ज्ञापकमस्य हि ।
फलं चिन्तित इत्यादौ न लोपो मास्मभूदिति ॥
नित्ये च णिचि सत्यत्र नलोपस्याप्रसङ्गतः ।
चिन्तस्मृत्यामित्येव च पठितव्यं भवेदिति ॥

'अयमपीति' । यद्यप्यवघुषितं वाक्यमाहेत्येतदपि प्रयोजनं तथापि जुघुषुरित्यपि प्रयोग उपपन्न इत्यर्थः ॥

"अभेश्चाविदूर्ये" ॥ 'वि[1]शेषेण दूरं विदूरं ततोऽन्यदिति' । तत्पुनर्यदासन्नमविप्रकृष्टं वा भवति तद्वेदितव्यम् । 'तस्य भाव आविदूर्यमिति' । ब्राह्मणादेराकृतिगणत्वात् ष्यञ् । ननु च न नञ्पूर्वात्तत्पुरुषादिति प्रतिषेधः प्राप्नोति, तत्राह । 'एतस्मादेवेति' । न नञ्पूर्वादित्ययमधिकारस्तेन ततः सूत्रादुत्तरस्य भावप्रत्ययस्य प्रतिषेधस्तत्र क्रियतइत्युत्तरस्येत्युक्तम् ॥

"णेरध्ययने वृत्तम्" ॥ अधीयतइत्यध्ययनमिति कृत्यल्युटो बहुलमिति कर्मणि ल्युट्, निष्ठाविशेषणं चैतत्, अध्ययनाभिधायिन्यां निष्ठायामिति । 'णिलुक्चेति' । प्रत्ययलक्षणेन गुणो माभूदिति णेर्लुक्निपातनं, लोपनिपातने तु गुणः स्यात् । 'वृत्तो गुणो देवदत्तेनेति' । गुणः पाठः पदक्रमसंहितारूपोऽध्ययनविशेषः स वृत्तः संपादित इत्यर्थः । वृतिरयमित्यादिना सूत्रस्यानारम्भमाशङ्कते । 'अकर्मकइति' । वृत्तं गुणस्य, वृत्तं पारायणस्येति भावे क्तस्य प्रयोगार्थमिदमुक्तम्, अकर्मकत्वे हि भावे निष्ठा भवति, तयोरेवेत्यत्र भावे चाकर्मकेभ्य इत्यनुवृत्तेः, योऽपि नपुंसके भावे क्तः सोऽपि सकर्मकेभ्यो न भवति, तयोरेवेत्यत्र क्तमात्रस्य ग्रहणात्, अन्यथा सकर्मकाद्भावे क्ते विधीयमाने कर्मणि द्वितीया प्रसज्येत, ग्रामं गतमोदनं भुक्तमिति, यदि तर्ह्यकर्मकः, कथं वृत्तो गुण इति कर्मणि निष्ठे-

[1] विदूरं विप्रकृष्टं ततोऽन्यदिति मुद्रितसूत्रपुस्तके पाठः ।

त्याशङ्क्याह । 'स ण्यर्थे वर्तमानइति' । यदि वायं वृतिरकर्मकः स ण्यर्थे वर्तमान इत्येक एव ग्रन्थः, अकर्मका अपि धातवोन्तर्भावितण्यर्थाः प्रयोज्येन कर्मणा सकर्मका भवन्ति, यथा राजयुध्वेति, दृश्यते च वृत्तेरन्तर्भावितण्यर्थस्य प्रयोग इत्याह । 'तेननिर्वृत्तमिति हीति' । न चात्रोपसर्गवशात्सकर्मकत्वं, ण्यर्थगतेः वृत्तेर्णिचि योर्थः । निवर्त्यते यैर्नियमाभिषेक इत्यादौ तदवगतेरित्यर्थः । 'त[१]त्तस्माद्वृत्तेरेवेति' । प्रकृत्यन्तादेवेत्यर्थः । 'वृत्तोगुण इति' । उदितो वेति क्त्वायां विकल्पितेट्कत्वाद्यस्य विभाषेतीट्प्रतिषेधः सिद्धः, तदेवं निपातनमनर्थकमित्येव मतं चोद्यं परिहरति । 'तत्क्रियतइति' । इष्टस्यान्यथासिद्धावप्यनिष्टनिवृत्त्यर्थं निपातनमित्यर्थः । 'अपरे त्विति' । तेषां मते नानेनार्थः सूत्रेण ॥

"वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः" ॥ 'दान्तः शान्त इति' । दमिशमी उपशमनार्थे । णिलुगिट्प्रतिषेधयोरनुनासिकस्य क्विझलोरिति दीर्घः, निपात्यमानस्य च णिलुको ऽपरनिमित्तकत्वाद्दीर्घविधिं प्रति निषेधाच्च स्थानवद्भावो नास्ति । 'पूर्णइति' । पूरी आप्यायने दिवादिश्चुरादिश्च । 'दस्तइति' । तसु उपक्षये, दमु च, अत्र ह्रस्वत्वमपि निपात्यते । 'स्पष्टश्छन्न इति' । स्पश बाधनस्पर्शनयोः, छद अपवारणे, अत्रापि ह्रस्वत्वमपि निपात्यते । 'ज्ञप्त इति' ज्ञपमिच्च, चुरादिः, । 'इट्प्रतिषेधो णिलुक्च निपात्यतइति' । चकारात्क्वचिदुपधाह्रस्वत्वं च, क्वचित्पठ्यते । 'ज्ञपेर्भरज्ञपिसनामिति विकल्पविधानाद्यस्य विभाषेतीट्प्रतिषेधे प्राप्ते विकल्पार्थं निपातनमिति' । एकाज्ग्रहणं यस्य विभाषेत्यत्र नानुवर्त्ततइतिभावः । अत्रादितश्चतुर्णां ग्रहणं शक्यमकर्त्तुम्, कथम्, अन्तर्भावितण्यर्थानां प्रकृत्यन्तानां दान्त इत्यादीनि रूपाणि, अन्यत्र ण्यन्तानां दमित इत्यादीनि ॥

"रुष्यमत्वरसंघुषास्वनाम्" ॥ 'अभ्यान्त इति' । अम गत्यादिषु, पूर्ववद्दीर्घः । 'तूर्ण इति' । ञित्वरा संभ्रमे, ज्वरत्वरेत्यादिनोठ् । 'आदितश्चेतीट् प्रतिषेधे प्राप्तइति' । आदित्वे तु प्रयोजनं मृग्यम् । आत्मने-

१ तद्वदिहापि ण्यर्थवृत्तेरिति मुद्रितमूलपुस्तके पाठः ।

पदार्थं तावत्कश्चिदनुबन्ध आसज्जनीयः। कश्चिदाह। आदित्वं यङ्लुगर्थमिति, नहि तत्रायं विकल्पः, एकाच इत्यनुवृत्तेः, आदित्करणसामर्थ्याच्चानुबन्धनिबन्धनोप्यादितश्चेतीट्प्रतिषेधो यङ्लुकि भवति। 'संपूर्वस्य घुषेरिति'। घुषिरविशब्दनइत्यस्यासंपूर्वो ऽवकाशः, घुष्टा रज्जुः अस्य विकल्पस्यावकाशः संपूर्वत्वे सति विशब्दने, संघुष्टं वाक्यमाह, संपूर्वस्याविशब्दने विप्रतिषेधः। 'आङ्पूर्वस्येत्यादि'। क्षुब्धस्वान्तेति निपातनस्यावकाशोनाङ्पूर्वत्वे सति मनोभिधाने, स्वान्तं मन इति, अस्य विकल्पस्यावकाशः आङ्पूर्वत्वे सत्यमनोभिधाने, आङ्पूर्वत्वे मनोभिधाने च सति विप्रतिषेधः॥

"हृषेर्लोमसु"॥ हृष्टानि उत्स्फुटानि, मूर्द्धजाः केशाः, अङ्गान्तरजानि लोमानीति निघण्टुप्रसिद्धिः, कल्पसूत्रकाराणामपि तदनुगुणाः प्रयोगाः, केशश्मश्रुलोमनखं वापयन्तीति। इह तु केशानामपि ग्रहणमित्याह। 'मूर्द्धजान्यङ्गजानि चेति'। अत्र विशेष्यं मृग्यम्। 'सामान्येन गृह्यन्तइति'। कथयेत्यत्राह। 'यथेति'। ननु क्रियावचनस्य धातोः कथं द्रव्यात्मकेषु लोमसु वृत्तिरित्यत आह। 'तद्विषये चेति'। प्रतिहताः कठिनद्रव्यखादनेन शीतपीडया वा हता इत्यर्थः॥

"अपचितश्च"॥ 'अपचितोनेन गुरुरिति'। चायृ पूजानिशामनयोः, निशामने चायं प्रयोगः, पूजायां तु मतिबुद्धिपूजार्थेभ्यश्चेति वर्तमाने क्ते सति क्तस्य च वर्त्तमानइति, षष्ठ्या भवितव्यम्। 'क्तिनि नित्यमिति'। क्तिचावादिभ्य इति क्तिन्, अन्यथा गुरोश्च हल इत्यकारः स्यात्॥

"हृ ह्वरेश्छन्दसि"॥ ह्वरेरिति ह्वृ कौटिल्ये, आगन्तुकेकारे गुणेन निर्देशः॥

"अपरिह्वृताश्च"॥ 'आदेशस्याभाव इति'। पूर्वसूत्रेण प्राप्तस्य। बहुवचननिर्देशश्छन्दसि तस्यैव प्रयोगदर्शनात्॥

"सोमे ह्वरितः"॥ 'इडागमो गुणश्चेति'। चकारादादेशाभावश्च॥

" ग्रसितस्कभितस्तभितोत्तभितचत्तविकस्ताविशस्तृशंस्तृशास्तृतरुतृतरूतृवरुतृवरूतृवरूत्रीरुज्ज्वलितिक्षरितिक्षमितिवमित्यमितीति च"॥

ग्रसु अदने, स्कम्भु स्तम्भु रोधनार्थौ सौत्रौ, चते याचने, कस गतौ, शसु हिंसायां, शंसु स्तुतौ, शासु अनुशिष्टौ, तॄ प्लवनतरणयोः, वृङ् सम्भक्तौ, वृञ् वरणे, ज्वल दीप्तौ, क्षर सञ्चलने, क्षमूष् सहने, टुवम् उद्गिरणे, अम गत्यादिषु। 'उत्तभितेति'। 'उदः स्थास्तम्भोः पूर्वस्ये'ति पूर्वसवर्णः सकारस्य तकारः। 'अन्योपसर्गपूर्वः स्तभितशब्दो न भवतीति'। यदि स्यादुत्तभितग्रहणमनर्थकं स्यात्। 'निपातनबहुत्वापेक्षमिति'। तेन छान्दसः प्रयोग एकवचनान्तोप्युदाहृत इति भावः। 'इतिकरणः प्रदर्शनार्थ इति'। तस्य प्रकारार्थत्वात्॥

"आर्द्धधातुकस्येड्वलादेः"॥ 'आस्ते वस्तइति'। ननु च रुदादिभ्यः सार्वधातुकइत्येतन्नियमार्थं भविष्यति, रुदादिभ्य एव सार्वधातुकइति, तत्राह। 'रुदादिभ्यः सार्वधातुकइत्येतस्मिन्निति'। नियमे त्वेतस्मिन् विज्ञायमाने विपरीतोपि नियमः सम्भाव्यते, रुदादिभ्यः सार्वधातुकएवेति, तत्र च वक्तव्यं रुदविदेति क्त्वासनोः कित्त्वविधानान्न भविष्यति, अनिटः सनो झलादेर्हलन्ताच्चे[1]त्येव सिद्धत्वात्। क्त्वोप्यनिट औपदेशिककित्त्वं[2]सद्भावादिति ततश्च प्रतिपत्तिगौरवं स्यात्। ननु चासत्यार्द्धधातुकग्रहणे अङ्गस्येत्यधिकारात्तस्यैवेट् प्राप्नोति, यथा लुङ्लङ्लृङ्क्ष्वडुदात्त इति, ज्ञापकात्सिद्धं, यदयमेकाच उपदेशेनुदात्तादिति प्रत्ययस्येट्प्रतिषेधं शास्ति, यच्च निष्ठायां सेटि न क्त्वासेडित्याह, तज्ज्ञापयति प्रत्ययस्यैवायमिडिति। न च वृक्षत्वमित्यादौ प्रातिपदिकप्रत्ययस्य प्रसङ्गः, अत इड्धातोरित्यधिकारात्। एवमपि जुगुप्सते लूभ्यां लूभिरित्यादौ प्रसङ्गः, इदितो नुम् धातोरित्यतो द्वितीयमपि धातुग्रहणमनुवर्तिष्यते, तत्रैकं स्वरूपपदार्थकं, ततश्च धातोरित्येवं धातुसंशब्दनेन विहितस्य धातोः परस्येड्विधानान्न क्वाप्यनिष्टं रूपं, तदेवं बहुप्रतिविधेयत्वात्प्रतिपत्तिगौरवपरिहार्थमार्द्धधातुकस्येत्युक्तम्। 'प्रतिषेधनिवृत्त्यर्थमिति'। केन पुनः प्राप्तस्य प्रतिषेधः शङ्क्यते, इदमेव वचनं कल्पकं स्यात् अस्त्यार्द्धधातुकमात्रस्येट्, यतो वलादेः प्रतिषिध्यतइति, नेड्वशि कृतीत्यादिकस्तु प्रतिषेधो नियमार्थः स्यात्॥

१ हलन्ताच्चेति कित्त्वस्य सिद्धत्वादिति ई॰ पु॰ पा॰।
२ संभवादिति ई॰ पु॰ पा॰।

"स्नुक्रमोरनात्मनेपदनिमित्ते" ॥ स्नुक्रमोरुदात्तत्वादिटि सिद्धे नियमार्थं वचनमनात्मनेपदनिमित्तएव यथा स्यादन्यत्र माभूदिति। अथ प्रस्नुतः, प्रस्नुतवान्, प्रसुस्नूषति, क्रान्तः, क्रान्तवान्, इत्यत्र 'श्र्युकः क्किति,' 'सनि ग्रहगुहोश्च' 'यस्य विभाषे' ति प्रतिषेधे प्राप्ते विध्यर्थमेतत्कस्मान्न भवति, पुरस्तात्प्रतिषेधकाण्डकरणात्, तस्य हि प्रयोजनमनाश्रितविधानविशेषस्येण्मात्रस्य प्रतिषेधो यथा स्यादिति, यद्यनात्मनेपदनिमित्तइति प्रसज्यप्रतिषेधः स्नुक्रमोरात्मनेपदनिमित्तत्वे सतीण् न भवतीति, एवं च प्रतिषेधप्रकरणएवैतत्पठितव्यं,तत्रायमप्यर्थः, नञुपादानं न कर्त्तव्यं भवति, तथा तु न कृतमित्येव। अत्र यद्यात्मनेपदशब्देन नञः समासं कृत्वा पश्चान्निमित्तशब्देन षष्ठीसमासः क्रियेत आत्मनेपदादन्यदनात्मनेपदं परस्मैपदमिति यावत्, तस्य निमित्तं, ततश्च यत्र स्नुक्रमौ परस्मैपदनिमित्ते चक्रमिथ, चक्रमिव, चक्रमिम, प्रास्नावीत्, प्रसुस्नुविषेत्यादौ तत्रैवेड्भवतीत्यर्थः स्यात्ततश्च कृति न स्यात्प्रस्नविता, प्रस्नवितुं, प्रस्नवितव्यं, प्रक्रमिता, प्रक्रमितुं, प्रक्रमितव्यमिति, तथा चिक्रमिषतीत्यत्रापि न स्यान्नहि सनन्तादुत्पद्यमानस्य परस्मैपदस्य क्रमिर्निमित्तं, परस्मैपदग्रहणमेव च कर्त्तव्यं स्यात्, तस्मादात्मनेपदशब्दस्य निमित्तशब्देन समासं कृत्वा पश्चान्नञा समासः कर्त्तव्यः, प्रसज्यप्रतिषेधे त्वनुन्मेष एवास्य पक्षस्य स्यात्, तत्र यद्यनात्मनेपदनिमित्तइति सप्तम्येकवचनं स्यात्ततोयमर्थः स्यात्, आत्मनेपदस्य यन्निमित्तं ङकारादि तस्मिन्सति न भवतीति, ततश्च प्रस्नविषीयतइत्यत्रापि प्रतिषेधः स्याद्विद्यते ह्यत्रात्मनेपदस्य निमित्तं क्यङो ङकार इति । प्रथमाद्विवचनान्तं स्नुक्रमोर्विशेषणमिति दर्शयति। 'न चेत् स्नुक्रमौ आत्मनेपदस्य निमित्तमिति'। वेदाः प्रमाणमिति वदेकवचनं, सूत्रे तु प्रत्येकं निमित्तत्वस्य विवक्षितत्वात् द्विवचनम्, निमित्तशब्दोयमस्ति योग्यतामात्रे कुसूलस्येष्वपि बीजेषु वक्तारो भवन्ति अङ्कुरनिमित्तान्येतानीति, अस्ति च कुर्वद्रूपे, तत्राद्ये पक्षे कृत्यपि प्रतिषेधः स्यात्, प्रस्नविता प्रस्नवितुं, प्रस्नवितव्यं, प्रक्रमिता, प्रक्रमितुं, प्रक्रमितव्यमिति, अस्ति ह्यत्र यथायोगं

["O elephants—what of thy cries! and O jackals! what of these useless struttings! O deer and buffalos! wherefore is your pride? Who is not brave in solitude? Roaring would be real roaring, when in the presence of the ocean-like sound of the lion, having his mains flurred through wrath."]

Here a 'lion' being the object described, the harshness of the words is not faulty.

To exemplify non-faultiness arising from the speciality of the *occasion*—

"रक्ताशोक कृशोदरा क्व नु गता त्यक्तानुरक्तं जनं
नो दृष्टेति मुधैव चालयसि किं वातावधूतं शिरः ।
उत्कण्ठाघटमानषट्पदघटासंघट्टदष्टच्छद-
स्तत्पादाहतिमन्तरेण भवतः पुष्पोद्गमोऽयं कुतः" ॥

[*Vikramorvaçīya*, Act IV.]

["O red Açoka! where has the slender-waisted one gone leaving her loving person? Why do you deceitfully move your wind-blown heads, as if denying your having seen her? But without the touch of her feet, whence are these your blossoms, having their leaves cut by the swarm of blackbees collected through anxiety?"]

Here since the speech belongs to one angered at the shaking of the head, therefore Harshness is not faulty.

Where there is no *Rasa*, the faults cease to be either faults or excellences—*e. g.*

[*Page* 471]. "शीर्णघ्राणाङ्घ्रिपाणीन् व्रणिभिरपघनैर्घर्घराव्यक्तघोषान्
दीर्घाघ्रातानघोघैः पुनरपि घटयत्येक उल्लाघयन् यः ।
घर्मांशोस्तस्य वोऽन्तर्द्विगुणघनघृणाविघ्ननिर्विघ्नवृत्तेर्द-
त्तार्घाः सिद्धसंघैर्विदधतु घृणयः शीघ्रमंहोविघातम्" ॥

["May these solar rays, to whom are offered libations by the great Ṛishis, remove the throng of your sins—the sun who has his action impeded owing to his extreme kindness, and who resets up the bodies of lepers after having cured them of their diseases,

the lepers having, through their sins, their nose, hands and legs torn asunder, their bodies full of ulcers, and hence having their voice indistinctly gurgling"]

(This is non-unctional, since importance is attached to mere alliteration, and not to the heroic kindness of the sun.)

[*Page* 472]. To exemplify the 'non-used' and 'suppressed meaning' as not faulty in *Çlesha* (Double Entendre.)

"येन ध्वस्तमनोभवेन बलिजित् कायः पुरास्त्रीकृतो
यश्चोद्वृत्तभुजङ्गहारवलयो गङ्गां च योऽधारयत् ।
यस्याहुः शशिमच्छिरोहर इति स्तुत्यं च नामामराः
पायात्स स्वयमन्धकक्षयकरस्त्वां सर्वदो माधवः" ॥

["May the all-giver husband of Lakshmī protect you,—Krishṇa who has destroyed Sakata, being unborn who subjugated Bāli, He who assumed a female form, the subduer of the proud serpent (the Kāliya), the substrate of sounds, the supporter of the mountain and the earth, whose eulogised name the Devas assert to be the head-cutter of the troubler of the moon (Rāhu) and who made the abode of the Yādavas,"—.

This with reference to Krishṇa; when applied to Çiva, the translation would be,—

"May the husband of Umā ever protect you,—He the destroyer of the mindborn, who turned into an arrow the body of the subjugator of Bali, who has for his necklace and bangles the big serpents, who bears the Gangā, having the moon on his forehead, whose eulogised name given by the Gods, is Hara, the destroyer of Andhaka."]

[*Page* 474]. The 'indecorous' sometimes becomes an excellence; as in conversations concerning dalliance; as is laid down by the Science of Love—"The secret objects are to be concealed by means of words with double meaning,—" *e. g.*

"करिहस्तेन सम्बाधे प्रविश्यान्तर्विलोडिते ।
उपसर्पन् ध्वजः पुंसः साधनान्तर्विराजते" ॥

and also in Quietestic conversations,—*e. g.*

“उत्तानोच्छूनमण्डूकपाटितोदरसन्निभे ।
क्लेदिनि स्त्रीव्रणे सक्तिरक्रिमेः कस्य जायते” ॥

and in

“निर्वाणवैरदहनाः प्रशमादरीणां
नन्दन्तु पाण्डुतनयाः सह माधवेन ।
रक्तप्रसाधितभुवः क्षतविग्रहाश्च
स्वस्था भवन्तु कुरुराजसुताः सभृत्याः” ॥

[*Vēṇīsaṁhāra*].

[May the sons of Pandu together with Krishṇa be happy, having the fire of enemity extinguished by the death of enemies. And let the Kauravas with their followers, rest (die) having ruled over the attached universe (covering the earth with blood) and having their quarrels stopped (having their bodies cut)."]

This is a presage of future calamity (to the enemy of the hero ; and as such is an excellence, and not a defect.)

[*Page* 476]. The "ambiguous" also becomes sometimes an excellence—by having its connotation restricted, through the speciality of the person addressed ; and ending in connotation of disguised eulogy,—*e. g.*

“पृथुकार्तस्वरपात्रं भूषितनिःशेषपरिजनं देव ।
विलसत्करेणुगहनं सम्प्रति सममावयोः सदनम्” ॥

["O Lord ! at present the houses of both of us are similar—yours being full of large golden pots (and mine full of the troublous shriekings of children), with all the servants ornamented (with inmates lying on the ground), and teeming with great elephants (covered with mouse-dust)."]

[*Page* 477]. When the speaker and the person addressed are both learned men, then 'incomprehensibility' becomes an excellence,—*e. g.*

(*a*) "आत्मारामा विहितरतयो निर्विकल्पे समाधौ
ज्ञानोद्रेकाद्विघटिततमोग्रन्थयः सत्त्वनिष्ठाः ।
यं वीक्षन्ते कमपि तमसां ज्योतिषां वा परस्तात्
तम्मोहान्धः कथमयममुं वेत्ति देवम्पुराणम्" ॥

[*Vēṇīsaṁhāra*, Act I.]

["How can this (Duryodhana) blinded with delusion, know the eternal God whom only those perceive who, fixed in goodness, have outgrown the qualities of Darkness and Foulness; and who have their knot of Darkness cut by the flow of knowledge, given to pure unqualified Yoga, rejoicing in (contemplation of) the soul."]

[*Page* 478]. In Solliloquy also ('incomprehensibility' is an excellence),—*e.g.*

"षड्धिकदशनाडीचक्रमध्यस्थितात्मा
हृदि विनिहितरूपः सिद्धिदस्तद्विदां यः ।
अविचलितमनोभिः साधकैर्मृग्यमाणः
स जयति परिणद्धः शक्तिभिः शक्तिनाथः" ॥

[*Mālatīmādhava*, Act V.]

["Glorious is the Lord of the Female Deity, Çiva, possessed of manifold potentiality, having His self located within the circle of the sixteenfold artery (Maṇipura); and who has His form in the heart, the Giver of success to those knowing it (His form)—Çiva who is looked for by devotees with steady minds."]

[*Page* 479]. The 'vulgar' becomes an excellence when spoken by the lower class of people,—*e. g.*

"फुल्लुक्करं कलमकूरणिहं वहन्ति
जे सिन्धुवारविडवा मह वल्लहा दे ।
जे गालिदस्स महिसीदहिणो सरिच्छा
दे किं च मुद्धविअइल्लपसूणपुञ्जा" ॥

Karpūramañjarī.]

(*a*) The Yoga technicalities used here cease to be faults, the speaker and the addressed both being learned men—Bhīmasēna and Sahadēva—and as such, there being little chance of incomprehensibility.

["Those Sindhuvāra trees are dear to me which bear fruits like rice; as also are those blooming and resembling the squeezed buffalo curd."]

[*Page* 480]. Here the words कलमभक्त, माहिषीदधि &c., though vulgar, yet, being spoken by the clown, (they cease to be faults).

The 'deficiency of word' is sometimes is an excellence,—*e. g.*

"गाढालिङ्गनवामनीकृतकुचप्रोद्भूतरोमोद्गमा
सान्द्रस्नेहरसातिरेकविगलच्छ्रीमन्नितम्बाम्बरा ।
मा मा मानद मा ऽति मामलमिति क्षामाक्षरोल्लापिनी
सुप्ता किं नु मृता नु किं मनसि मे लीना विलीना नु किम्" ॥

[*Amarūçataka.*]

["Having her breasts dwarfed by firm embrace, and covered with horripilation all over, her beautiful loin-cloth beaming with the intensity of deep affection, uttering broken words—'Do not, O, do not! Lord! not much! ah me! enough!' (I know not if) she is asleep, or dead, or entered into my heart, has become assimilated therewith?"]

(Here the broken unfinished sentences add a peculiar charm, in as much they show the intensity of the emotion).

At times again ('deficiency of words') is neither a fault nor an excellence,—*e. g.*

"तिष्ठेत्कोपवशात् प्रभावपिहिता दीर्घं न सा कुप्यति
स्वर्गायोत्पतिता भवेन्मयि पुनर्भावार्द्रमस्या मनः ।
तां हर्तुं विबुधद्विषोऽपि न च मे शक्ताः पुरोवर्तिनीं
सा चात्यन्तमगोचरं नयनयोर्यातेति कोऽयं विधिः" ॥

[*Vikramorvaçīya*, Act IV.]

["May she be sitting hidden, on account of anger; she angers not long! Might she have flown to the heavens! Her heart was affectionate towards me! Even demons could not wrench her from near me,—and yet she now has ceased to be an object of my vision—what a process of Fate"]

Here, after विचिन्ता, there must have been 'नैतद्यतः' ('it is not so, since'); and since the absence thereof does not lend any additional charm to the meaning, this deficiency cannot be said to be an excellence; and again since the latter sentence (दोषं नश्वा कुप्यति) contradicts the preceding one (and thus gives the proper sense), it cannot be said to be a fault.

[*Page* 482]. The 'redundant word' is sometimes an excellence,—*e. g.*

" यद्वञ्चनाहितमतिर्बहु चाटुगर्भं
कार्योन्मुखः खलजनः कृतकं ब्रवीति ।
तत्साधवो न न विदन्ति विदन्ति किन्तु
कर्तुं वृथा प्रणयमस्य न पारयन्ति " ॥

[" The deceitful and cunning way in which evil men tell lies in business,—that these the good men do not know is not (a fact); they do know, even then they are unable to frustrate their (show of) attachment."]

Here the repetition of विदन्ति excludes others from knowing, (and as such ceases to be a fault), or again

" वद वद, &c."

["'Say, say, if the enemy has been subdued'—'he was not killed, saying *I am yours, yours*, most curiously did he weep! ah! on the death of his son.'"]

(*a*) Here, since the speaker is possessed with Joy, Fear, &c. (Wonder and Dejection), the repetitions are not faulty.

'Repetition of words' is sometimes an excellence—when occurring in (1) Lātānuprāsa, (2) where the expressed meaning is transferred to another, and (3) where the predicate (of the preceding sentence) is described (as the subject in the following). Examples in order:—

" सितकरकररुचिरविभा विभाकराकार धरणिधर कीर्तिः ।
पौरुषकमलाकमला साऽपि तवैवास्ति नान्यस्य " ॥

(*a*) The first foot expresses joy; the second, fear; 3rd, wonder; 4th, dejection The *Pradipa* quotes.—" In wonder, dejection, humility, emphatic assertion; as also in reconciliation and joy, a word or sentence is repeated."

["O Lord of the Earth! having a form like the moon! like moon's lovely sheen is thy fame! Thine alone too is the prosperity attending upon valour."

(Here we have Alliteration.)

[*Page* 484]. "ताला जाअंति गुणाः जाला दे सहिअएहिँ घेप्पन्ति ।
रयिकिरणाणुग्गहिआइँ होन्ति कमलाइँ कमलाइँ" ॥

["Excellences appear when appreciated by really appreciating men! Lotuses become lotus only when favoured by the sun's rays."]

(Here the second 'lotus' connotes, "the full-blown fragrant, lovely lotus;" and as such we have the expressed meaning transferred.

"जितेन्द्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयादवाप्यते ।
गुणप्रकर्षेण जनोऽनुरज्यते जनानुरागप्रभवा हि सम्पदः" ॥

["Subjugation of senses is a means to humility; by humility is excellence of qualities obtained; through excellences people become attached; and prosperity attends on the attachment of people."]

(In the first sentence 'humility' is predicated as being caused by the subjugation of the senses; and this very 'humility' is, in the following sentence, spoken of as a subject; and so on, thus forming a *Mālālankāra*.

[*Page* 485]. 'Receding of excellences' is sometimes an excellence; as in प्रागप्राप्त, &c. (p. 370 *Text*), (where the pacific tone of the last foot has been shown to be only proper as being uttered in reference to the Gurū.)

The 'resumption of the concluded' is sometimes neither an excellence nor a fault,—where the resumption is not made simply to admit of more qualifications, but where it forms an independent sentence by itself; as येनानेन &c. in प्रागप्राप्त &c. (p. 370 *Text*).

'Misplaced compound' is sometimes an excellence,—as in रक्ताशोक &c. (pp. 469—70 *Text*) (where the long compounds in the erotic, are justified by the wrath implied in the second foot).

[*Page* 487]. The 'Parenthetical' (is an excellence at times), *e.g.*

"हुमि अवहत्थिअरेहो णिरंकुसो अह विवेअरहिओवि ।
सिविणेवि तुमम्मि पुणो पत्तिहि भत्तिं ण पसुमरामि" ॥

("Though devoid of a fixed decorum of behaviour, unrestrained and indiscreet, yet I do not even dream, believe me! of disobeying you."]

Here 'पेत्तोहि' is inserted in order to confirm the belief.

[*Page* 488]. Similarly others may be described in accordance with their various exemplifications.

Defects of the *Rasa.*

60—62. (1) The mention by their names, of the *Rasa*, and the Accessory and Permanent Sentiments, (2) Far-fetched Signification of the Ensuant and Excitant Sentiments; (3) the Admission of Conflicting Concomitants; (4) Repeated Heightening; (5) Unseasonable Introduction; (6) Unseasonable Interruption; (7) Excessive Expansion of the Subordinate Element, (8) Overlooking of the Powerful Element, (9) Perversion of Characters, (10) Celebration of an Unimportant Object, and such-like others are the blemishes accruing to the *Rasa*.

[*Page* 489]. To exemplify the 'mention by names' of the Accessories.—

"सव्रीड़ा दयितानने सकरुणा मातङ्गचर्माम्बरे
सत्रासा भुजगे सविस्मयरसा चन्द्रेऽमृतस्यन्दिनि ।
सेर्ष्या जह्नुसुतावलोकनविधौ दीना कपालोदरे
पार्वत्या नवसङ्गमप्रणयिनी दृष्टिः शिवायास्तु वः" ॥

["May the eyes of Gaurī, affectionate on the first meeting, protect you—eyes ashamed when turned to her beloved's face; imbued with pathos, when to the dress of elephant-hide: afraid of the serpents; wondering on the nectar-dropping moon; looking enviously at the Gangā; and humiliated at the begging-bowl."]

सप्तधे"त्यादिश्रुतेः, आत्मन एकस्याच्छेद्यस्यानेकधाभावा-
सम्भवाच्त्रिधाभावादयः शरीरनिबन्धना इत्यवगम्यते,
अशरीरत्ववचनं तु कर्मनिमित्तशरीराभावपरं, तदेव हि
शरीरं प्रियाप्रियहेतुः, । भगवांस्तु बादरायणः स्वमतेन
सिद्धान्तमाह—

टी० सू० भावं जैमिनिर्विकल्पामननात् ॥ ११ ॥ अत्र शरीरवाचि-
शब्दो न श्रुत इत्यत्राह "आत्मन एकस्ये"ति, द्विधाशब्दादीनां धर्मिभेद
एव स्वारस्य तदण्डमकरोद् द्विधेत्यादिप्रयोगात् द्रव्यत्वपृथिवीत्वादिजा-
तिसंयोगादिगुणपरिपरिस्पन्दरूपक्रियासहस्रान्वितेऽपि घटे द्विधा त्रिधा-
सहस्रधाऽभूदिति प्रयोगाभावाच्च तथाऽऽप्यात्मनि स्वरूपभेदासम्भवात्
शरीरद्वारकमित्यर्थः । तर्ह्यशरीरत्वश्रुतिः कथमित्यत्राह "अशरीरत्ववचनं
त्वि"ति, स्ववाक्येनैव तदुपपादयति "तदेव ही"ति, प्रियाप्रियहेतुतया
शरीरस्य निषेधात् प्रियाप्रिययोश्च कर्मफलत्वात्कर्मकृतशरीरविषयो नि-
षेध इत्यर्थः । अतः सशरीरत्वश्रुतेर्निवारकाभावात् कादाचित्कहेत्वन्तरा-
नुक्तेश्च सर्वदा सशरीरत्वं फलितमिति सूत्राभिप्रायः । सिद्धान्तसूत्रमव-
तारयति "भगवाँस्त्वि"ति, ।

सू० द्वादशाहवदुभयविधं बादरायणोऽतः ॥१२॥

भू० सङ्कल्पादेवेत्येतदतः—शब्देन परामृश्यते, अत एव सङ्क-
ल्पादुभयविधं सशरीरमशरीरं च मुक्तं भगवान्बाद-
रायणो मन्यते, एवं चोभयी श्रुतिरुपपद्यते— द्वादशाहवत्,
यथा द्वादशाहमृद्धिकामा उपेयुः द्वादशाहेन प्रजाकामं
याजयेदित्युपैतियजतिचोदनाभ्यां सङ्कल्पभेदेन सत्रमही-
नश्च भवति। यदा शरीराद्युपकरणवत्त्वं तदा तानि शरीरा-
द्युपकरणानि स्वेनैव सृष्टानीति नास्ति नियम इत्याह—

टी० सू० द्वादशाहवदुभयविधं बादरायणोऽतः ॥ १२ ॥ अतः— पदं व्याचष्टे "सङ्कल्पादेवे"ति, त्रिधा भवनादेर्हेत्वाकाङ्क्षायां सत्यसङ्कल्पत्वश्रुतिरेव पूरयति व्यापारान्तरेष्वपि तस्यैव हेतुत्वश्रवणेनौचित्यादिति भावः । सूत्रस्य वाक्यार्थमाह "अत एवे"ति, ननु उभयी श्रुतिरिति सशरीरत्वाशरीरत्वश्रुती विवक्षिते, अशरीरत्वश्रुतेः कर्मकृतशरीरपरत्वमुक्तं कर्मकृतशरीराभावश्च सर्वदाऽस्ति तत्कथं कदाचिदशरीरत्वे सा प्रमाणं, नैवं प्रमाणतया विवक्षितत्वाभावात् सत्यसङ्कल्पादिवाक्यानुगृहीतया सशरीरत्वश्रुत्या यथेच्छशरीरत्वे चाभ्युपगते सत्यशरीरत्वश्रुतिरप्यर्थवती सशरीरत्वश्रुतिरप्यबाधिता स्यादिति भाष्यार्थः । सङ्कल्पभेदेन सत्रत्वेऽहीनत्वे च प्रमाणिके सति तत्तत्प्रयोगविशेषेषु सङ्कल्पभेदो नियामक इत्यर्थः । बहुयजमानसङ्कल्पात्सत्रम् एकस्य सङ्कल्पादहीनं, । पूर्वसूत्रसङ्गतमुत्तरसूत्रार्थं संक्षिपन्सूत्रमवतारयति "यदे"ति, ॥

सू० तन्वभावे सन्ध्यवदुपपत्तेः ॥ १३ ॥

भू० स्वेनैव सृष्टतनुप्रभृत्युपकरणाभावे परमपुरुषसृष्टैरुपकरणैर्भोगोपपत्तेः सत्यसङ्कल्पोऽपि स्वयं न सृजति । यथा स्वप्ने "अथ रथान् रथयोगान् पथः सृजत इत्यारभ्य अथ वेशन्तान् पुष्करिण्यः स्रवन्त्यः सृजते स हि कर्त्तेति य एषु सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते तस्मिँल्लोकाः श्रितास्सर्वे तदु नात्येति कश्चने"ति चेश्वरसृष्टैरथाद्युपकरणैर्जीवो भुङ्क्ते तथा मुक्तोऽपि लीलाप्रवृत्तेनेश्वरेण सृष्टैः पितृलोकादिभिर्लीलारसंभुङ्क्ते ॥

टी० सू० तन्वभावे सन्ध्यावदुपपत्तेः ॥ १३ ॥ परमपुरुषसृष्टैरुपकरणैरित्यर्थः । भोगोपपत्तेरिति देहादिसृष्टेर्ब्रह्मानुभवानन्तर्गतत्वे तत

एव तदिच्छाद्यसम्भवेऽभ्युपगम्यमानेऽपि एकधाभवनादिश्रवणबलात्तदनुगुणप्रकारपरिकल्पनेन निर्वाहो न्याय्य इति भावः ॥ यथेति अस्य निर्वाहस्यौचित्यप्रदर्शनार्थं सूत्रे सन्ध्यदृष्टान्तोपादानमित्यभिप्रयन्सार्थत्वमाह—

सू० भावे जाग्रद्वत् ॥ १४ ॥

भ्रू० स्वसङ्कल्पादेव सृष्टतनुप्रभृति पितृलोकाद्युपकरणभावे जाग्रत्पुरुषभोगवन्मुक्तो लीलारसं भुङ्क्ते परमपुरुषोऽपि लीलाऽर्थं दशरथवसुदेवापितृलोकादिकमात्मनः स्रष्टा तैर्मनुष्यधर्मैर्लीलारसं यथा भुङ्क्ते, तथा मुक्तानामपि स्वलीलायै पितृलोकादिकं स्वयमेव सृजति, कदाचित्, कदाचिच्च मुक्ताः सत्यसङ्कल्पत्वात् परमपुरुषलीलान्तर्गतस्वपितृलोकादिकं स्वयमेव सृजन्तीति सर्वमुपपन्नम् ॥ ननु आत्माऽणुपरमाण इत्युक्तं, कथमनेकशरीरेष्वेकस्याणोरात्माभिमानसम्भव इत्यत्राह—

टी० सू० भावे जाग्रद्वत् ॥ १४ ॥ सूत्रं योजयति स्वसङ्कल्पादेवे"ति, ननु मुक्तस्य पित्रादिसर्गसापेक्षत्वे ब्रह्मानुभवादन्यपरत्वं ब्रह्मणि भोग्यतावैकल्यं पित्रादीच्छाया अकर्मकृतत्वं च न स्यादिति शङ्कायामाह "परमपुरुषोऽपीति, पितृलोकादिसृष्टेर्भगवल्लीलान्तर्गतत्वे निदर्शनं दशरथादिसृष्टिः, तदन्तर्गतत्वादेव पित्रादिसृष्टावपि मुक्तस्य न ब्रह्मानुभवादन्यपरत्वं ब्रह्मसम्बन्धिलीलाविशेषस्यानुकूलत्वं ब्रह्मणा प्रियतमत्वातिशयनिबन्धनम्, अत एव न ब्रह्मणः प्राप्यत्ववैगुण्यं मुक्तात्मनां पित्रादीच्छाया अकर्मकृतत्वं भगवतोवसुदेवादिकल्पनेच्छाया इवोपपन्नमित्यर्थः । उत्तरसूत्रशङ्कामाह "नन्वि"ति, ।

सू० प्रदीपवदावेशस्तथा हि दर्शयति ॥ १५ ॥

यथा प्रदीपस्यैकस्यैकस्मिन्देशे वर्त्तमानस्य स्वप्रभया देशान्तरावेशस्तथाऽऽत्मनोऽप्येकदेशस्थितस्यैव स्वप्रभारूपेण चैतन्येन सर्वशरीरावेशो नानुपपन्नः, यथा चैकस्मिन्नपि देहे हृदयाद्येकप्रदेशवर्त्तिनोऽपि चैतन्यव्याप्त्या सर्वस्मिन्देहे आत्माभिमानस्तद्वत्। इयान्विशेषः अमुक्तस्य कर्मणाऽसंकुचितज्ञानस्य देहान्तरेष्वात्माभिमानानुगुणा व्याप्तिर्न सम्भवति मुक्तस्य त्वसंकुचितज्ञानस्य यथासङ्कल्पमात्माभिमानानुगुणा व्याप्तिरिदमिति ग्रहणानुगुणा च नानुपपन्ना, तथा हि दर्शयति—"बालाग्रशतभागस्य शतधा कल्पितस्य च भागो जीवः स विज्ञेयः स चानन्त्याय कल्पत"इति, अमुक्तस्य कर्म नियामकं मुक्तस्य तु स्वेच्छेति विशेषः। ननु परं ब्रह्म प्राप्तस्यान्तरबाह्यज्ञानलोपं दर्शति श्रुतिः, "प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमि"ति, तत्कथं मुक्तस्य सार्वज्ञ्यमुच्यते तत्रोत्तरम्—

टी० प्रदीपवदावेशस्तथा हि दर्शयति॥ १५॥ अत्र वक्तव्यं सर्वे गुणाद्वाऽऽलोकवदित्यत्रापेक्षितत्वादुक्तं, स्वरूपस्यैकदेशस्थत्वेऽपि धर्मस्य प्रदेशान्तरे कार्य्यकरत्वमात्रं दृष्टान्तोपजीव्यं, तर्हि वस्त्वन्तरप्यस्यापि ज्ञानेनाधितिष्ठेदित्यत्राह "इयानि"ति, आत्माभिमानानुगुणेति प्रवर्त्तकत्वशक्तिविशिष्टेत्यर्थः। आत्माभिमानो हि शरीरित्वाभिमानः तदेकप्रवर्त्यं हि शरीरं तत्प्रेरकत्वं शरीरित्वमिति, इदमिति ग्रहणानुगुणेति प्रकाशत्वशक्तिरुक्ता। तथा हि दर्शयति स्वरूपाणुत्वे ज्ञानेनानेकशरीरित्वोपपत्तौ च श्रुतिरस्तीत्यर्थः। अमुक्तेष्वपि सौभर्य्यादिष्वनेकशरीरपरिग्रहो दृश्यते

मुक्तस्य को भेदः मुक्तोऽनेकशरीरपरिग्रहत्तमश्चेत्पूर्वावस्थायामपि करोत्वित्यत्राह "अमुक्तस्य कर्मे"ति, उत्तरसूत्रशङ्कामाह "नन्वि"ति, ।

सू० स्वाप्ययसम्पत्त्योरन्यतरापेक्ष-
माविष्कृतं हि ॥ १६ ॥

भा० नेदं वचनं मुक्तविषयम् अपि तु स्वाप्ययसम्पत्त्योरन्यतरापेक्षं स्वाप्ययः सुषुप्तिरित्युक्तं, सम्पत्तिश्च मरणं वाङ्मनसि सम्पद्यत इत्यारभ्य तेजः परस्यां देवतायामिति वचनात्तयोश्चावस्थयोः प्राज्ञप्राप्तिर्निःसंबोधत्वं च विद्येते. अतस्तयोरन्यतरापेक्षमिदं वचनं सुषुप्तिमरणयोर्निःसंबोधत्वं मुक्तस्य च सर्वज्ञत्वमाविष्कृतं हि श्रुत्या "नाहं खल्वयमेवं सम्प्रत्यात्मानं जानात्ययमहस्मीति नो एवेमानि

टी० सू० स्वाप्ययसंम्पत्त्योरन्यतरापेतमाविष्कृतं हि ॥ १६ ॥ सता सोम्य तदा संपन्नो भवतीत्यादिभिः स्वापे ब्रह्मसम्पत्तिः प्रसिद्धेति मृतौ ब्रह्मसम्पत्तिविषयं प्रमाणमाह "तेजः परस्याम्"इति, अस्य वाक्यस्य मरणविषयत्वद्योतनाय वाङ्मनसीत्यादिकमुक्तं, ब्रह्मसम्पत्तिनिर्बोधत्वयोस्तदा सम्भवे सति ह्यस्य वाक्यस्य तयोरन्यतरपरत्वमिति शङ्काव्यावृत्त्यर्थमाह "तयोश्चावस्थयो"रिति, इति-वचनाद्विद्येते इत्यन्वयः सूत्रखण्डान्तरं व्याचष्टे "सुषुप्तौ"ति, सता सोम्य तेजः परस्यां देवतायामिति च सुषुप्तिमरणयोर्ब्रह्मसम्पत्तिश्रुतिश्चानुसन्धेया । सङ्कल्पादेवेत्यनेन मनःसिद्धिः शरीरेन्द्रियविषयोऽयं विचार इति परैरुक्तं शरीराभावपक्षेऽपि न भोगानुपपत्तिः । अत्र दृष्टान्तः सन्ध्यवदिति, तत्र शरीरावस्थानं मतोऽवस्थानाय न भोगाय शरीरस्थितेरन्यथासिद्धत्वादिति तन्वभाव इत्यस्यार्थ-

भा० भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामीति सुषुप्तिवेलायां निस्सम्बोधत्वमुक्त्वा तस्मिन्नेव वाक्ये

मुक्तमधिकृत्य स वा एष दिव्येन चक्षुषा मनसैतान्कामान् पश्यन् रमते य एते ब्रह्मलोक इति ज्ञत्वमुच्यते, तथा सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वश इति च स्पष्टमेव सर्वज्ञत्वमुच्यते ।

टी० माहुः तत्र मनःसृष्टादीश्वरस्येव तत्साम्यापन्नस्य मुक्तस्य मनोऽनपेक्षसङ्कल्पोपपत्तेः सङ्कल्पान्मनःसिद्धिरनुपपन्ना, स्वप्ने चेस्वरसृष्टदेहादिसद्भावस्य प्रामाणिकत्वान्मनोमात्रेण भोगोपपत्तौ न स्वप्नो दृष्टान्तः स्यात् । अपरे तु स्वप्ने मानसभोगस्य भ्रान्तिकृतत्वाच्छरीरभोगस्य कर्मकृतत्वान्मुक्तस्य भ्रान्तिकर्मणोरभावात् भोगासम्भवं पूर्वपक्षं कृत्वा मनसैतान्कामान्स एकधा भवतीत्यादिश्रुतेः स्वप्ने केवलमनसा भोगदर्शनाच्च भ्रान्तिकर्मणोरभावेऽपि भोगसम्भवं राद्धान्तयन्तः तन्वभाव इत्यधिकरणान्तरमाहुः । तत्र तादर्थ्यनैरन्तर्याभ्यामधिकरणान्तरत्वयुक्तम् ईश्वरसृष्टदेहलाभादेव मनसैव भोगेऽपि न दृष्टान्तः । अन्येऽप्यैकाधिकरण्यं वदन्तः स्वप्ने मनसैव रूपरसाद्यनुभवो दृष्टान्तः स्वप्नधीश्च न स्मृतिः किन्त्वनुभवः दोषसचिवत्वात् भ्रान्तिः, मुक्तस्य तु योगसचिवत्वाद्यथार्थ इत्याहुः तदपि पूर्वमेव दत्तोत्तरम् अत ईश्वरसृष्टदेहवत्त्वे प्रामाणिके सति स्वप्नजागरौ दृष्टान्तौ केवलेश्वरप्रयत्नसृष्टत्वजीवव्यापारद्वारकेश्वरप्रयत्नसृष्टत्वाभिप्रायाविति युक्तं, तदुपन्यासश्च देहसृष्टौ जीवपरयोरभिप्रायाविरोधज्ञापनार्थ इति युक्तं, प्रदीपवदावेश इत्यादिसूत्रद्वयमधिकरणान्तरमितरे त्रयोऽपि वर्णयन्ति स एकधा भवति त्रिधा भवतीति मुक्तसृष्टानि शरीराणि सात्-

सू० तथा मरणे च निस्सम्बोधत्वमेतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यतीत्युक्तं, न पश्यतीत्यर्थः अतः प्राज्ञेनात्मनेति वचनं स्वाप्ययसम्पत्त्योरन्यतरापेक्षम् ॥ अभावाधिकरणं समाप्तम् ॥

टी० भक्तिकावन्निरात्मकानि निर्मनस्कानि आत्मनो मनसश्च भेदानुपपत्तेरिति पूर्वपक्षं कृत्वा मनस एकत्वेऽपि एकमनोनुवर्तीनि समनस्कान्यपराणि सत्यसङ्कल्पत्वात्स्रष्टा उपाधिभेदेन भिन्नः सन्नात्मा तान्युपाधिभूतान्यधितिष्ठति तत्केन कं विजानीयादित्यादिभिर्मुक्तस्य द्वितीयदर्शनाभावादनेकशरीराधिष्ठानलक्षणैश्वर्य्यानुपपत्तिपरिहारपरं स्वाप्ययसम्पत्त्योरिति सूत्रं सुषुप्तौ कैवल्ये च द्वितीयदर्शनाभावः तदधिकारवशात्तदाविष्कृतं हि सगुणविद्याविपाकः स्वर्गादिवदस्यान्तरमिति तत्रैश्वर्य्योपपत्तिरिति परे व्याचक्षते, तत्र तावदर्थ्यनैरन्तर्य्याभ्यामधिकरणभेदानुपपत्तिः मनःसृष्टावीश्वरस्यैव मनोऽनपेक्षसङ्कल्पोपपत्तेः आत्मभेदस्यान्तःकरणोपाधिकत्वाभावाच्चैकमनोमूलत्वनिर्बन्धोऽत्यन्तानुपपन्नः सगुणविद्याया एव परविद्यात्वात् साक्षान्मोक्षस्यैव परविद्याफलत्वाद्विज्ञानप्रतिषेधस्य स्वाप्ययकैवल्यविषयत्वमैश्वर्य्यस्य सगुणविपावकत्ववचनं नानुपपन्नम् । अपरे तु सुषुप्त्युत्क्रान्तिविषयो विज्ञानप्रतिषेध इति वदन्ति तत्पक्षेऽपि विरुद्धांशः प्रागेव प्रत्युक्तः आत्मभेदस्य निरुपाधिकत्वात् । अन्ये तु अणोरनेकशरीरवृत्त्ययोगात्महत्त्वेऽपि भृत्यादिशरीरवृत्तेरपुरुषार्थत्वान्मुक्तानां मुक्तान्तरानुपसर्जनत्वादमुक्तानां मोक्षस्यानारोहणायोगाच्च जीवान्तरावेशायोगान्मुक्तसृष्टशरीराणि निरात्मकानीति पूर्वपक्षं कृत्वा विभागशक्तियोगान्मुक्तादणुपरिमाणादात्मसहस्रोत्पत्तेः "आत्मनां तु सहस्राणि बहूनि भरतर्षभ योगी कुर्य्याद्बलं प्राप्य तैश्च सर्वैर्महीं चरेदि"ति स्मृत्या सङ्कोचविभागादिशक्तेर्दर्शितत्वात् स्वेषु शरीरेष्वहङ्कारकरणात् स्त्र्यादिशरीरेष्वहङ्कारकरणाकरणयोर्विरोधाभावात् भृत्यादिशरीरेषु चैतन्यप्रभासंसर्गेणाहङ्काराकरणात्तथा कूटस्थपुरुषस्य जीवसमष्टेर्व्यष्टिजीवत्वेनानुपयुक्तादंशाद्विभज्य तत्तच्छरीरेष्वात्मप्रवेशनोपपत्तेश्च सात्मकानीति सिद्धान्तयन्ति तत्र मुक्तानां परस्परगुणभावाभावेऽपीश्वरानुसञ्चरणाय संसारमण्डले पित्रादिसङ्कल्पनं भवतीत्यमुक्तानां मोक्षस्यानारोहणानुपपत्तिर्न वक्तव्या, अत एव भृत्यादिशरीरेष्वनुप्रवेशस्यापुरुषार्थत्वादिति न वक्तव्यम् अविभक्तनामरूपजीवसमूहव्यतिरेकेण कूटस्थपुरुषो नाम न

कश्चित्प्रामाणिकः जीवसमूहविषयतया वचनोपपत्तेः । यत्त्वेकस्माज्जीवादात्मसहस्रं सङ्कल्पनं विभागशक्तिमत्त्वादिति तत्पूर्वमेवनिरस्तम् । आत्मनां तु सहस्राणीत्यत्रात्म-शब्दो देहवचन इति न तद्वचनं विभागशक्तौ प्रमाणं स्त्र्यादिशरीरेष्वहङ्कारकरणाकरणे भृत्यादिशरीरेषु चैतन्यप्रभासंसर्गणाहङ्कारं न करोतीति विभागकल्पना च निर्मूला । भृत्यादिभावस्यानिष्टत्वात्स्वयमेवाहङ्कारकरणाभावश्चेत् शरीरसबन्धस्यैव दुःखहेतुत्वदर्शनात् शरीरसृष्टिरपि न स्यात्, स्वेच्छायत्ततया शरीरस्य दुःखहेतुत्व चेत् भृत्यादिभावेनाधिष्ठेयत्वेऽपि तुल्यम् ॥ अभावाधिकरणं समाप्तम् ॥

जगद्व्यापारवर्जाधिकरणम् ।

सू० जगद्व्यापारवर्ज्जं प्रकरणादसन्निहितत्वाच्च ॥ १७ ॥

भा० किं मुक्तस्यैश्वर्य्यं जगत्सृष्ट्यादि परमपुरुषासाधारणं सर्वेश्वरत्वमपि? उत तद्रहितं केवलपरमपुरुषानुभवविषय? मिति संशयः, किं युक्तं जगदीश्वरत्वमपीति, कुतः निरञ्जन परम साम्यमुपैतीति परमपुरुषेण परमसाम्यापत्तिश्रुतेः, सत्यसङ्कल्पत्वश्रुतेश्च, न हि परमसाम्यसत्यसङ्कल्पत्वसर्वेश्वरासाधारणजगद्व्यापाररूपजगन्नियमेन विनोपपद्येते अतः सत्यसङ्कल्पत्वपरमसाम्योपपत्तये समस्तजगन्नियमनरूपमपि मुक्तैश्वर्य्यमित्येवं प्राप्ते प्रचक्ष्महे जगद्व्यापारवर्जमिति, जगद्व्यापारो—निखिलचेतनाचेतनस्वरूपस्थितिप्रवृत्तिभेदनियमनन्तद्वर्ज्जं निरस्तनिखिलतिरोधानस्य निर्व्याजब्रह्मानुभवरूपं मुक्तस्यैश्वर्य्यं, कुतः प्रकरणात्, निखिलजगन्नियमनं हि परं ब्रह्म प्रकृत्याम्नायते "यतो

द्विविधं हि कर्म बन्धकं विद्योत्पत्तेः पूर्वमुत्तरं च पूर्वं च द्विविधम् आरब्धकार्यमन्यच्च तत्राद्यं चरमदेहावधिभोगनाश्यं भोगेन त्वितरे क्षपयित्वाऽथ सम्पद्यते इति सूत्रोक्तेः । द्वितीयं विद्यया नाशितम् । उत्तरं च द्वेधा प्रामादिकराशिप्रविष्टमन्यच्च । प्रथममिहाश्लिष्टम् । अन्यच्च निष्कृत्या भोगेन वा निश्शेषितम् । अत्र मुक्तिविलम्बमनिच्छतां निश्शेषकर्मनिर्वेशार्थं युगपद्बहुदेहसङ्ग्रहोपयोगः । एवं स्थिते विदुषश्चरमदेहादुत्क्रान्तिकाले तस्य पुत्रा दायमुपयन्ति सुहृदस्साधुकृत्यां द्विषन्तः पापकृत्याम् अस्य प्रिया ज्ञातयः सुकृतमुपयन्ति अप्रिया दुष्कृतं तत्सुकृतदुष्कृते धूनुते प्रियेषु सुकृतमप्रियेषु च दुष्कृतम् । विसृज्य ध्यानयोगेन ब्रह्माऽप्येति सनातनम् । इत्यादेः को विषय इति तदेतत्सङ्क्रमश्रुतितात्पर्यानभिज्ञतामूलमित्यभिप्रायेण प्रतिक्ति । मैवमिति । श्रुतितात्पर्यं विवृणोति । तत्तदिति । अयं भावः न ह्यत्र मुख्यकर्मणां सङ्क्रान्तिः असम्भवात् अतः ।

आदाय सुकृतं सर्वं तस्य गच्छेदरक्षितः ।
शपता यत्कृतं पुण्यं शप्यमानमुपैति तत् ।
शप्यमानस्य यत्पापं शपन्तमधिगच्छति ॥

इत्यादिन्यायात् अक्षिरोगादिसङ्क्रमणवादवच्छत्रावपि तादृशफलोत्पादने तात्पर्यमिति ॥ ५८ ॥

इति प्रियाप्रियसङ्क्रमः ।

पुनरनिर्धारितश्रुतितात्पर्यश्चोदयति । अन्य इति ।

मू० अन्यश्चेदन्यकर्मप्रजनितफलभुक् शास्त्रवैयाकुली स्याद्ब्रह्मज्ञैरुज्झितानां क्वचिदपि न

ततः कर्मणां सङ्क्रमः स्यात् ॥ उद्वेलस्स्याच्च धातेत्यसदविषमताद्यन्वितेनैव धात्रा विद्यानिष्ठोपकाराद्युचितफलमिदं दीयते वर्गयुग्मे ॥ ५९ ॥

अन्यस्यान्यकृतकर्मफलभोगे शास्त्रफलं प्रयोक्तरीति व्यवस्थाभङ्गाच्छास्त्रस्य व्याकुलता स्यात् ऋत्विक्कृतं हितैषिकृतं चान्यार्थमेव करणात्परत्र फलतीति युक्तम् अभिचारकर्म च भ्रातृव्यस्य पूर्वदुष्कृतोत्थापितत्वात्तत्पीडाहेतुः अभिचरिता च स्वकृतफलं भ्रातृव्यमरणं स्वयं भुङ्क्ते इह तु नैवं सम्भवः । अतः परवित्कर्मणामश्लेषविनाशसम्भवेऽपि नान्यत्र स्वरूपत इव फलतोऽपि सङ्क्रमस्सम्भवतीति ईश्वरस्य स्वमर्यादाऽतिक्रमः स्यादित्याह । उद्वेल इति । उक्तं चोद्यद्वयं स्वकर्मफलभोगव्यवस्थयैव परिहृतमित्यभिप्रायेण प्रत्याह । इत्यसदिति । हार्दं विवृणोति । अविषमतेति । एतेन ब्रह्मविदुपकारापकारयोरपरिमितफलत्वं च सिद्धं भवति ॥ ५९ ॥

इति प्रियाप्रिययोर्विद्वत्कर्मफलसमानसृष्टेः स्वकर्मफलत्वम् ॥

अथ विधूतपुण्यपापस्य विदुषः स्थूलशरीरान्मूर्धन्यनाड्या निष्क्रान्तस्यार्चिरादिपादोक्तमातिवाहिकक्रममाह । अर्चिरिति ।

मू० अर्चिर्घस्रोऽथ पक्षस्सित उदगयनं वत्सरो मातरिश्वा मार्तण्डस्तारकेशस्तडिदपि वरुणामर्त्यनाथप्रजेशैः ॥ आदिष्टा विश्वनेत्रा स्वयमतिवहने देवयानाद्ध्वगानाम् । यः प्रोक्तो मानवाख्यस्स तदिदधिपतिर्विश्रुतो मानसोऽपि ॥ ६० ॥

तत्पुरुषोऽमानवस्स एतान्ब्रह्म गमयति इत्यव्यवहितब्रह्मगमयितृत्वेन निर्दिष्टस्य प्राधान्यसूचनार्थं वरुणादिषु तृतीया । अमानवः किमिह नोक्त इत्यत्राह । य इति । वैद्युतपुरुष इह तटित्पतित्वात्तटिच्छब्दोक्त इति भावः । तथा ऽपि वैद्युतात्पुरुषोमानस एत्य ब्रह्मलोकाग्गमयति इत्युक्तस्येह नोपादानमित्यत्राह । विश्रुत । इति । शेषं भाष्यादौ । अत्रैवं तत्त्वसारे सङ्गृहीतम् ।

अर्चिरहस्सितपक्षानुदगयनाब्दमरुदर्केन्दून् ।
अपि वैद्युतवरुणेन्द्रप्रजापतीनातिवाहिकानाहुः ॥

इति । अन्ये त्वाहुः ।

अर्चिर्वासरशुक्लपक्षषडुदङ्मासांश्च संवत्सरम् ।
वायुं भास्करचन्द्रविद्युदुदपान् सेन्द्रं प्रजानां पतिम् ॥
गत्वाऽथो विरजां विमुच्य च तनुं सूक्ष्मां ततोऽमानव-
स्पर्शात्क्षालितवासनास्सुकृतिनो गच्छन्ति विष्णोः पदम् ॥ इति ॥

अत्र वासनाशब्देन फलप्रदानरहितनष्टाश्लिष्टकर्मराशेरनुप्रवृत्तौ धीसङ्कोचकश्यत्नयंशस्तन्नियतसूक्ष्मप्रकृत्यंशो वा विवक्षितः । अपरे तु ब्रुवते ।

भूलोकेशाग्नयोऽष्टौ प्रथममहरतः पूर्वपक्षस्सितात्मा ।
मासाष्षड्वत्सरोऽथोदशतनुपवनस्सैक्र आदित्यवर्गः ॥
चन्द्रो विद्युज्जलेशस्समरुदधिपतिस्सप्रजानामधीशस्ते
मार्गस्यार्चिरादेरतिवहनविधौ विश्वनेत्रा नियुक्ताः ॥ इति ॥

अत्र सैक्र इति पवनविशेषणम् । अथ वायोरेकादश पुरुषस्य इत्यादिश्रुतेः ॥ ६० ॥

इत्यातिवाहिकक्रमक्लृप्तिः ।

एवं देवयानेन गतस्य यस्सर्वविशिष्टब्रह्मानुभवलक्षणो धीविकासः तत्र विकल्पतः पराभीष्टमाक्षेपमनुवक्ति । बुद्धेरिति ॥

मू० बुद्धेर्यौऽसौ विकासः कबलितनिखिलोपस्कृतब्रह्मतत्त्वस्स प्राक्चेन्नित्यमुक्तिर्न यदि कथमसौ नश्वरत्वं न गच्छेत् ॥ मैवं प्रध्वंसवत्ते स खलु मम तथा शौनकाद्युक्तनीत्या शान्ताशेषापराधेन च भवति पुनस्तत्र सङ्कोचहेतुः ॥ ६१ ॥

स प्राक् चेत् स धीविकासः प्रागप्यस्ति चेदनादिश्चेदित्यर्थः तत्र बाधकमाह । नित्यमुक्तिरिति । बद्ध एव न स्यादित्यर्थः आगन्तुत्वकोटिमनुभाषते । न यदीति । तत्रापि जातानां विनाशध्रौव्यात् बाधक इत्याह । कथमिति । स्वपरसिद्धान्तविवेकविक्लबोऽसीत्यभिप्रायेण प्रत्याह । मैवमिति । तद्विवृणोति । प्रध्वंसवदिति । पूर्वावधिमानपि प्रध्वंस उत्तरावधिरहित इति मन्यसे एवं भावोऽपि कश्चित्तथा स्यात् अनुपपत्त्या तत्र तथात्वमिति चेत् अत्राप्यस्ति श्रुतिभङ्गानुपपत्तिः भावान्तरमेव च वयमभावं ब्रूमः निश्शेषविरोधिनिवृत्तौ हि ज्ञानस्य परसङ्कल्पसिद्धसर्वगोचरविकासवत्तया सदाऽभिव्यक्तिः स्मर्यत इत्याह । शौनकादीति । मुक्तविषयश्रुतिषु च परात्परं पुरुषमीक्षते सर्वं हि पश्यः पश्यतीत्यादिनिर्देशस्य सङ्कोचकादर्शनात् ईक्षणस्य सदानुवृत्तिर्हि स्वतः प्राप्तेति भावः । ननु यदि मुक्तोऽपि चेतयते पुनरपि सङ्कोचक्रमारभेतेत्यत्राह । शान्तेति । सङ्कोचहेतुकरणमपि हि कर्ममूलं निश्शेषितकर्मणः कथं तत्स्यादिति ॥ ६१ ॥

इति मुक्तधीविकासनित्यत्वम् ।

मुक्तस्य ज्ञानं चिन्तितम् अथ तस्य चिकीर्षाप्रयत्नशक्तिविषया चिन्ता तत्र मुक्तो देहप्राणतद्व्यापारैर्मुक्तो न वेति विकल्पं भावयन् क्रमादाक्षिपति मुक्ताविति ।

सू० मुक्तौ देहाद्यभावे मुकुलितविषयो जक्षदादिप्रवादस्तत्सत्त्वे चाशरीरश्रुतिविहतिरतः का चिकित्सेति चेन्न ॥ इच्छातस्स्यादवस्थाद्वयमुभयविधश्रुत्यबाधाद्विमुक्तौ कर्मायत्तैर्वियोगः परमिह कथितस्तस्य देवोपमस्य ॥ ६२ ॥

आद्ये मुक्तमधिकृत्य प्रवृत्तः जक्षत्क्रीडन् इत्यादिप्रवादो निर्विषयः स्यात् । द्वितीये धृत्वा शरीरमशरीरं वाव सन्तम् इत्यादिश्रुतिविरोधः स्यात् इति । अत्र द्वादशाहवदुभयविधं बादरायणोऽतः । इति सूत्रोक्तप्रकारेण स्वेच्छाकर्मकृतदेहादियोगायोगाभ्याम्वस्थाद्वयवानिति मन्वानः प्रत्याह । नेति । प्रथमचोद्यपरिहारतयाऽभिप्रेतं प्रथयति । इच्छात इति । श्रुतिविरोधं तु विषयव्यवस्थातश्शमयति । कर्मायत्तैरिति । यत्र विषयभेदसम्भवः तत्र क्वचिद्बाधेऽतिप्रसङ्ग इति भावः । देवोपमस्य ईश्वरेण साम्यं प्राप्तस्येत्यर्थः एतेन परविषयशरीरविधिनिषेधश्रुत्योरिवात्रापि व्यवस्थोपपत्तिर्व्यज्यते ॥ ६२ ॥

इति मुक्तस्यैच्छिकशरीरयोगानियमः ॥

इच्छागृहीतदेहत्वं देवोपमत्वं च मुक्तस्य प्रसक्तं तस्य च शरीरकान्ते जगद्व्यापारवर्जमैश्वर्यं साधितं स किं शक्तोऽप्यनिच्छया जगत्सृष्ट्यादौ न व्याप्रियते उताशक्त एवेति विकल्पे पूर्वं यदीत्यादिनाऽनूद्य तत्र बाधकमाह । स्यान्मुक्त इति ॥

मू० स्यान्मुक्तो विश्वदेही यदि भवति जगद्व्या-
पृतौ तस्य शक्तिः स्वातन्त्र्यं क्वाप्यशक्तौ
विगलति स च नः स स्वराडित्यधीतः ॥
धत्तेऽनुच्छेद्यसारा तदियमुभयतः पाशतां
तर्करज्जुर्मैवं देवस्तदिच्छां क्वचिदपि न
विहन्त्येवमस्तु स्वराट् सः ॥ ६३ ॥

विश्वदेही स्यात् अन्यथा कथं बहु स्यामिति सङ्कल्पार्हत्वं विश्वदेहत्वं चानेकेषां निष्प्रमाणकं प्रमाणतर्कप्रत्यूढं च अत एव शक्तोऽपि प्राप्त्यभावान्न व्याप्रियत इति पक्षोऽपि प्रत्यादिष्टः । उत्तरस्योत्तरमाह । स्वातन्त्र्यमिति । क्वचिदशक्तौ ।

पारतन्त्र्यं परे पुंसि प्राप्य निर्गतबन्धनः ।

स्वातन्त्र्यमतुलं प्राप्य तेनैव सह मोदते ॥ इत्यादिप्रसिद्धं निस्सीमस्वातन्त्र्यं विगलेत् । श्रुतिविरोधमप्याह । स चेति । स स्वराड्भवति इति ह्याम्नायते द्वयोरपि दुरतिक्रमतया संशयडोलाकेलिषान्तत्यमित्यभिप्रायेणाह । धत्त इति । उत्तरकोटिपरिग्रहाभिप्रायेण प्रत्याह । मैवमिति । श्रुतिविरोधमुपशमयति । देव इति । अकर्मवश्यस्याप्रतिहतेच्छत्वमिह स्वातन्त्र्यम् ईश्वरो हि बद्धानां यथाकर्म क्वचित्क्वचिदिच्छां विहन्ति मुक्तस्य तु न क्व चिदपि परिमिते पराधीनस्वदेहदृष्ट्यादावित्यर्थः ॥ ६३ ॥

इति पराधीनस्यापि मुक्तस्येच्छाविहतिराहित्यम् ॥

अथ कश्चित्सिद्धान्त्यभिमतायाम्मुक्तौ दोषं विवक्षुस्तामनुभाषते । आविर्भूतेति ॥

मू० आविर्भूतस्वरूपा निरवधिकसुखब्रह्मभुक्ति-

स्तु मुक्तिः सेवात्वाद्दुःखकृत्सा भवति यदि न तद्धर्मिमानेन बाधात् ॥ पाप्मा चास्मिन्नुपाधिस्स च न खलु तदा पुण्यपापव्यपाया-दात्मानो विष्णुशेषा इति च सुखमयी सा स्वरूपानुरूप्यात् ॥ ६४ ॥

परशेषतैकरसस्वरूपाविर्भावयुक्तेत्यर्थः बाढमित्यत्र बाधकं शङ्कते । सेवात्वादिति । अयमाशयः स्वामिभृत्यभावबुद्ध्यनुवृत्तिस्से-वात्मा प्रसिद्धा सा च दुःखात्मतया तद्धेतुतया वा व्याप्ता । तद-त्राऽपि तथा स्यादिति । अत्र धर्मिण्यप्रसिद्धे हेतोराश्रयासिद्धिमभिप्रे-त्याह । न तदिति । प्रमिते तद्ग्राहकेण बाधमाह । धर्मीति । श्रूयते हि रसो वै सः रसं ह्येवायं लब्ध्वाऽऽनन्दीभवति इति । आनन्दं ब्रह्मणो रूपं तच्च मोक्षेऽभिव्यज्यते इति । स्मर्यते च तदस्य त्रिविधस्यापि इत्यारभ्य निरस्तातिशयाल्हादसुखभावैकलक्षणा । भेषजं भगवत्प्राप्तिरेकान्तात्यन्तिकी मता । इति । सोपाधिकत्वम-प्याह । पाप्मेति । नित्यानामनित्यानां वा दुःखकृत्त्वं हि सहका-रिणि पापे सत्येव । अनित्यानान्तु पापजन्यतयाऽपि एवं साध्यव्या-पकत्वं सिद्धम् । साधनाव्यापकत्वमप्याह । स चेति । पुण्यपापव्य-पायादित्यनेन श्रुतिस्मृतिसूचनम् । अस्तु तर्हि सुखरूपत्वाभावे सेवात्वं हेतुः इत्यत्राऽपि धर्मिसिद्ध्यसिद्धिविकल्पदोःस्थ्यस्य तदव-स्थत्वादव्यक्तमप्रयोजकत्वं व्यनक्ति । आत्मान इति । अयं भावः कर्मोपाधिकसेवा हि कर्मवैचित्र्यात्प्रतिकूला उदासीना किञ्चिदनुकूला च स्यात् इयं तु निरुपाधिकस्वामिसेवा यथाऽऽगमं निरवधिकसुखरू-पेति । एतेन प्रसङ्गोत्थानमपि निरस्तं श्रुतिविरोधे व्याप्तिशैथिल्ये

च तस्याऽप्ययोगात् । ये च मुक्ते ज्ञानचिकीर्षाप्रयत्नसुखदेहादियोगा दुःखादिसाधकाः प्रयोगाः तेऽपि यथोक्तप्रकारेण प्रतिषेध्याः ब्रह्मणा चानैकान्ता इति । अथाऽपि यदि मुक्तौ सुखं तदा सुखरागान्मुमुक्षुः प्रवर्तत इति कथं वीतरागाधिकारः रागाच्च प्रवृत्तः प्रागिव बध्येत । हन्त यदि रागस्सर्वो बन्धहेतुरिति मन्यसे तद्विशेषो वा आद्ये सर्वाभीष्टस्संसारनिवृत्तिरागोऽपि तथा स्यात् । द्वितीये कोऽसौ विशेषः सुखविषयत्वमेवेति चेन्न । तादृशस्यापि पापानारब्धत्वादेव दुःखहेतुत्वायोगात् । अथ तदप्यत्र शङ्क्येत तदा आगमबाध इति । एवं मुक्तस्य स्वदेहस्पृष्ट्यादिरागोऽपि व्याख्यात इति ॥ ६४ ॥

ननु यदि मुक्तस्सर्वज्ञस्स कथं न दुःख्येत् विषयविशेषे सन्दर्शनं हि बद्धस्यापि दुःखहेतुः अबुद्धिपूर्वकदुःखोत्पत्त्यसम्भवात् न चानुकूलमात्रविषया मुक्तधीः सर्वं हि पश्यः पश्यति इति श्रुतेस्सङ्कोचानभ्युपगमात् न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताम् इति पूर्वोक्त्या सोढव्यस्सङ्कोच इति चेन्न । सङ्कोचकानां निश्शेषक्षीणत्वात् न चात्र काणतां जनयेद्दीपो निम्बबृन्दाकरेणुमान् इतिवत्किञ्चिन्निमित्तमन्तरेण स्वतःप्राप्तप्रकाशैकदेशभङ्गः स्यात् । मण्डूकवसयाऽक्ताक्षा वंशानुरगबुद्धिभिः इतिवद्वा केनचिद्धेतुना प्रागनुकूलेषु प्रतिकूलबुद्धिर्युक्ता इदानीं तु प्रतिकूलेष्वनुकूलधीर्यदि तादृशोपाधितस्स्यात् तथा सति भ्रान्त्यनुवृत्त्या कर्माद्यनुवृत्तिरपि दुर्वारा एतेन नित्यानां मुक्तानां च क्वचिदस्थानभयशङ्कावादोऽप्यन्यपरतया नेतव्यः, एवम्मुक्तबुद्धेस्सङ्कोचासङ्कोचविकल्पासहतयाऽत्र पाषाणकल्पपक्ष एव ज्यायानिति तत्राह । सर्वस्येति ।

मू० सर्वस्याप्यानुकूल्यं स्वत इह जगतो वासुदेवात्मकस्य व्यक्तिं तन्मुक्तिकाले भजति

भवकृतज्ञानसङ्कोचहानेः ॥ प्राचीनप्रातिकूल्यक्रमविषयधिया नैष दुःख्येत्तदानीं प्रागप्येतत्स्वकर्मोपधिकृतभगवन्निग्रहैकप्रयुक्तम् ॥ ६५ ॥

यदि स्वतोऽनुकूलस्वामिभूतितया दृश्यमानं हि सर्वमपि स्वतोऽनुकूलमेव भायात् तर्हि बद्धदशायामपि तथा भासेतेत्यत्राह । व्यक्तिमिति । तादृक्कं प्रतिबन्धकविगमे हि प्रकाशेत अनुकूलस्वभावं ब्रह्मवत्तदात्मकं सर्वमिदानीं कैश्चित्प्रतिकूलतया गृह्यत इति चेत् इत्थं कर्मसंवृतधियां यथाकर्म भानभेदोपपत्तेः । यथाऽऽहुः ।

वस्त्वेकमेव दुःखाय सुखायेर्ष्यागमाय च ।
कोपाय च यतस्तस्माद्वस्तु वस्त्वात्मकं कुतः ॥ इति ।
तदेव प्रीतये भूत्वा पुनर्दुःखाय जायते ।
तदेव कोपाय यतः प्रसादाय च जायते ॥ इति च ।

अत उपाधिविगमे स्वतःप्राप्ताभिव्यक्तिर्युक्ता । ननु संसृत्यवस्थासिद्धं निरयाणां प्रातिकूल्यं स्वानुभूतं च दुःखं मुक्तः पश्यति वा न वा आद्य गन्धाश्मरजसा स्पृष्टो नष्टो दीपः पुनर्ज्वलेत् इति न्यायेन पुनरपि दुःखसन्ततिरुदियात् उत्तरत्र धीसङ्कोचाभ्युपगमप्रसङ्गः तथाऽपि दुःखित्वं स्यात्तस्य तद्व्याप्यङ्गीकारादित्यत्राह । प्राचीनेति । क्रमशब्दः तदातनसन्तानसूचनार्थः कर्मानन्तर्यपरो वा । तदानीं मुक्तिकाले न हि प्राप्ताभिषेकं प्राचीनकारागृहवासधीर्दुःखाकरोति । स्वाधारवर्तमानसुखादिसाक्षात्कारं च भोगमाहुः प्रसिद्धं च ।

प्राप्तानि दुःखान्यपि दण्डकेषु सञ्चिन्त्यमानानि सुखीबभूवुरिति । पूर्वमपि प्रातिकूल्यं यत्प्रयुक्तं तन्निवृत्तौ कथं तत्स्यादित्यभिप्रायेणाह । प्रागपीति ॥ ६५ ॥

इति निरुपाधिकब्रह्मानुभवस्य दुःखरहितनिरतिशयानन्दत्वम् ॥

यत्तु तन्त्रान्तरस्थैरुच्यते । मुक्तात्मानोऽपि शिवाः किं त्वेते यत्प्रसादतोमुक्ताः सोऽनादिमुक्त एको विज्ञेयः पञ्चमन्त्रतनुः । इति तत्र श्रुतिविरोधमभिप्रेत्याह । अन्य इति ॥

मू० अन्ये चानादिशुद्धाः श्रुतिसमधिगतास्सूरयस्सन्त्यसङ्ख्याः कर्माभावादनादेर्न तु भवति कदाऽप्येष संसारबन्धः ॥ शेषाणां शेषिणश्च स्फुरति सुखतया सर्वदा सर्वतत्त्वे नित्यानाम्मुक्तिभाजामपि भुवनकृता भोगमात्रं समानम् ॥ ६६ ॥

श्रुतिसमधिगताः सदा पश्यन्ति इति श्रुत्या निर्बाधमधिगता इत्यर्थः । न ह्यसौ श्रुतिर्मुक्तविषया मुक्तानामेकैकशस्सदा दर्शनाभावात् । इयं हि दर्शनं सदेति विशिंषत्यपि सदा दर्शनविशिष्टान् सर्वान् स्वरसतो ऽवगमयति । न त्वाद्दिमद्दर्शनप्रवाहसातत्यं तत्र बहुवचनस्य सङ्कोचकादृष्टेः उपबृंहणतश्च कपिञ्जलन्यायानवतारादसङ्ख्या इत्युक्तम् । ननु परतन्त्रचेतनानामस्मदादिवत्संसृतिरवर्जनीया । अथ कथमनादिसिद्धत्वमित्यत्राह । कर्माभावादिति । उक्तहेतुना कर्माप्यवर्जनीयमिति चेन्न । सदा दर्शनश्रुत्यैव मिथ्याज्ञानादिपूर्वकस्य कर्मणः प्रत्यासेधात् अन्यथा कथमीश्वरोऽप्यङ्गीक्रियते । माभूदिति चेत् । श्रुतिबाध इति शेषं पठ । सर्वप्रशासितुश्शास्त्रवश्यत्वाभावान्न कर्मवश्यत्वमिति चेन्न । पारतन्त्र्येऽप्यनादिसर्वज्ञानामपि तदभावं पश्य । अथापि कर्माभावो न तावदन्यो-

न्याभावः संसृत्यभावं प्रत्यप्रयोजकत्वात् । न प्रागभावः तस्य भावशिरस्कत्वात् न प्रध्वंसः भावपूर्वकत्वात् न संसर्गाभावः । तस्यापि प्रागभावादिविकल्पदौःस्थ्यादिति चेत् । तन्न । कर्मात्यन्ताभावस्य विवक्षितत्वात् अन्यथा ईश्वरेऽप्येवं विकल्पप्रसङ्गात् । नित्येषु च नाशकारणाभावान्नाशाभाव इत्यभ्युपगमस्य भङ्गप्रसङ्गात् । कस्य चिदनादिसिद्धत्वे कोहेतुरिति पृच्छन्तस्त्वहेतुविद्भिरनुग्राह्याः अत एव कथमीश्वरस्य क्वचिदिच्छा नित्या क्वचिदनित्येति वैषम्यानुयोगश्च विधूतः । न चाधिकारवैचित्र्यादनन्तादिष्वक्षेष्विन्द्रादिवत् वैचित्र्यानुमितिश्शक्या स्वच्छन्देशावतारवत् । यदा हि मुक्तानां शिवत्वमुक्तं तत्किमीश्वरतादात्म्यं तज्जातीयत्वं वा तद्गुणसाम्यं वा । नाद्यः हेतुमुक्तस्यानादिमुक्ततादात्म्यासम्भवात् । न द्वितीयः न तत्समश्चाभ्यधिकश्च न त्वत्समोऽस्तीत्यादिविरोधात् । न तृतीयः पारतन्त्र्येऽपि शुद्धिमाङ्गल्यसार्वज्ञ्यादिमात्रेण तत्सिद्धेः । अथ नित्यानां नमुक्तानामनीश्वरत्वे तद्भोगसाम्यं न स्यादिति मन्वीथाः तत्र ब्रूमः शेषाणामिति । स्वतन्त्रपरतन्त्रयोर्यथादृष्टिभोग्यसाम्यात् भोगसाम्यं युज्यते सूचितं चैतत् भोगमात्रसाम्यलिङ्गाच्चेति ॥ ६६ ॥

इति नित्यसूरिसिद्धिः । नित्यमुक्तेश्वराणामपि भोगसाम्यं च ॥

नन्वग्निहोत्रदर्शपूर्णमासादिसाधनविशेषात्तत्साध्यस्वर्गे तारतम्यमङ्गीकुर्मः तथा मोक्षेऽपि स्यादन्यथा कथमागमशास्त्रे क्वचित्सालोक्यादिमुक्तिभेदकथनमिति शङ्कते । सालोक्येति ।

मू० **सालोक्याद्याः प्रभेदा ननु परिपठिताः क्वापि मोक्षस्य मैवं सायुज्यस्यैव तत्त्वात्तदितरविषये मुक्तिशब्दस्तु भाक्तः ॥ तस्मिंस्ते च त्रयस्स्युस्तदपि च सयुजोर्भाव इत्यैक-**

**स्स्यं युक्साम्यं लोकसाम्यादिवदपरधिया-
न्तावतैवैक्यमोहः ॥ ६७ ॥**

तेषु मुक्तिशब्दो न मुख्य इत्यभिप्रायेणाह । मैवमिति । मुख्यं मुक्तिशब्दविषयमाह । सायुज्यस्येति । अन्यत्र प्रयोगः कथमित्यत्राह । तदितरेति । तथा च नियम्यते ॥

लोकेषु विष्णोर्निवसन्ति केचित्समीपमिच्छन्ति च केचिदन्ये ।
अन्ये तु रूपं सदृशं भजन्ते सायुज्यमन्ये स तु मोक्ष उक्तः ॥ इति ।

तर्हि सायुज्ये सालोक्यादिभोगाभावात् भोगसाम्यसूत्रं परिमितविषयं स्यादित्यत्राह । तस्मिन्निति । सायुज्ये हि सहस्रे शतादिकमिव सालोक्यादि चिकमन्तर्भवतीति एकस्मिन्वाक्ये ब्रह्मसायुज्यसालोक्ययोस्सहपाठोऽप्येवमन्तर्भावविवक्षया मुख्यगौणमुक्त्यपेक्षी पुरुषभेदानुरोधाद्वा यथार्हं निर्वाह्यः । ननु यदि सायुज्यमेव मोक्षः तदा पूर्वोक्तं भोगसाम्यं न स्यात् ऐक्यापत्तिरेव हि सायुज्यम् अतः कस्य केन भोगसाम्यमित्यत्राह । तदपीति । नन्वेकीभूतयोर्भावो हि सयुजोर्भावः तत्र परं प्राचीनब्रह्मानन्दानुवृत्तिमात्रमेव स्यात् अन्यूनश्चाप्यवृद्धिश्चेति स्थापनात् अतो भोक्तृद्वित्वाभावाच्चोद्यं तदवस्थमित्यत्राह । युक्साम्यमिति । अत्र सालोक्यादिनयात् भुज्यमानं युक्शब्दार्थः तेन भोगसाम्यमाक्षिप्यते । सायुज्यसार्ष्टिसहपाठे तु कण्ठोक्तं, न हि सयुक्शब्द एकपर्यायः तथा क्वचिदपि प्रयोगाभावात् । द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते इति द्वयोरेव प्रयोगाच्च तयोरन्यः इत्युत्तरवाक्ये च स्पष्टमेतत् एतासामेव देवतानाꣳसायुज्यम् इत्यत्र बहुदेवतासायुज्यं युगपत् क्रमेण वा । नाद्यः भिन्नैरेकस्य युगपदेकतापत्त्ययोगात् । न द्वितीयः विभागाविभागविकल्पदोःस्यात् विभागयोग्यत्वे हि संयोगविशेषमात्रं

स्यात् तदभावे तु क्रमेणोत्तरोत्तरतादात्म्यादेकपरिशेषः स्यात् न चैतत्क्वचिद्दृष्टमिष्टं वा। यदि कश्चिन्नैघण्टुकः ऐक्यं सायुज्यमिति पठेत् तत्तस्य स्वपक्षाभिनिवेशेन शब्दशक्तिग्रहणापरिबुद्धतया वा प्रयुक्तमित्युपेक्षणीयं द्वित्वे स्थितेऽपि सरित्समुद्रसलिलयोरिव सम्भेदविशेषकृतमेकराशित्वं वा विवक्षितम् ॥ ६७ ॥

इति मुक्तानुभवस्य समानभोगत्वलक्षणसायुज्यैकरूपत्वम् ॥

यदि मुक्तोऽपि परतन्त्रः तर्हि स्वच्छन्दप्रवृत्तपरबुद्ध्या पुनरपि बन्धः किं भवेदिति नित्यं शङ्काकलङ्कितः स्यात् अतः पारतन्त्र्यादिपरिहारेण परब्रह्मसाम्यसिद्धिरवधार्या। अन्यथा निरञ्जनः परमं साम्यमुपैति इति परमत्वविशेषणं व्यर्थं स्यादित्यत्राह। विश्वाधारस्येति।

मू० विश्वाधारस्य लक्ष्मेत्यभिहितमखिलं सम्भवेन्नापवृक्ते तन्निष्ठत्वादि सर्वं न हि विलयमियात्तच्छरीरस्य तस्य ॥ तन्निघ्नत्वेऽपि मुक्तो न भवति पुनरावृत्तिशङ्काकलङ्की तादृक्सौहार्ददृष्टेर्वयमिह तदनावृत्तिशास्त्रेण विद्मः ॥ ६८ ॥

अयं भावः ईश्वरस्य यल्लक्षणत्वेनोक्तं तत्सर्वं मुक्ते न स्यात् लक्ष्येतरगामित्वे लक्षणत्वायोगात् एकस्सर्वशरीरीति च शास्त्रसिद्धम् अतो मुक्तस्याप्याधेयत्वादिनियमो न निवर्तेत। परमत्वविशेषणं तु तुलाधृतसुवर्णपाषाणयोरिव न सर्वाकारसाम्यं साधयितुमर्हतीति। अतिशङ्कामपाकरोति। तन्निघ्नत्वेऽपीति। मुक्तस्य शङ्कानिवृत्तिहेतुमाह। तादृगिति। स्वतन्त्रेऽपि स्वाभाविकसौहार्दद-

र्शनादित्यर्थः । मुमुक्षूणां मुक्तावर्तनशङ्का केन निवर्त्यैत्यत्राह । वयमिति । श्रुतिस्मृतिचक्षुषो वयं वैविद्याः तस्मादस्माकमपि परैरोहादेर्दर्शनं सिद्धमिति भावः । सर्वेषु लोकेषु कामचारो भवति इमान् लोकान् कामान्नीकामरूप्यनुसञ्चरन् स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितरस्समुत्तिष्ठन्ति इत्यादिशास्त्रदृष्ट्या च पुनरावृत्तिं वयं शङ्कमहीति चेन्न । ईदृशवाक्यानां विधूतपुण्यपापस्य स्वच्छन्दवृत्तौ तात्पर्यात् अन्यथा महावाक्यविरोधात् । ननु एतेन प्रतिपद्यमाना इमम्मानवमावर्तं नावर्तन्ते इति सविशेषणश्रवणादावर्तान्तरेष्वावृत्तिश्शङ्क्येतेति चेन्न । अहेतुकावृत्त्ययोगाद्बहुश्रुतिविरोधात् विशेषकोक्तेश्च घोरत्वानुवादपरत्वेन सफलतयाऽन्यत्रावृत्तावौदासीन्यात् अन्यथा उपबृंहणशतं च प्रकुप्येत्, गीयते च ।

आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥ इति ।
इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥ इति ॥

एतत्सर्वमभिप्रेत्य सूत्रम् अनावृत्तिश्शब्दादिति ॥ ६८ ॥

इति पुनरावृत्तिप्रसङ्गपरिहारः ॥

अथ वैशेषिकादिपठितं प्रस्तरप्रायमोक्षं पराचिकीर्षुस्तदुक्तं प्रयोगमनुवदति । विश्वैरिति ।

मू० विश्वैर्वैशेषिकैस्तैर्भवति विरहितो नाशिताद्दृग्गुणत्वाज्जीवात्मा जन्मकाले घटवदिति यदि स्यादिहाम्नायबाधः ॥ दृष्टान्तस्साध्यहीनः क इव निगमविल्लिप्सते मुक्तिमेतां धी-

र्नित्येच्छादयस्तत्परिणतय इति स्याच्च हेतो-
रसिद्धिः ॥ ६९ ॥

जीवाः पार्थिवपरमाणव आकाशश्च कदाचिदशेषविशेषगुण-शून्याः अनित्यविशेषगुणत्वात् उत्पत्तिक्षणे घटवत् न चात्र दृष्टान्तस्साध्यविकलः कार्यद्रव्यगुणानां तद्धर्म्युत्पत्त्यनन्तरभावित्वनियमात् सहोत्पत्तावुपादानोपादेयभावायोगात् न च भावस्समवायिकारणेन विना कश्चिदुत्पद्यते । ननु जीवः सर्वदा विशेषगुणवान् आत्मत्वात् ईश्वरवत् इति प्रतिप्रयोगः स्यात् । तन्न निरीश्वरवादिनां दृष्टान्तासिद्धेः भूषणस्य तु मुक्तिदशायां ज्ञानं कार्यमकार्यं वा आद्य कारणसापेक्षत्वान्नश्वरत्वादिप्रसङ्गः उत्तरत्र इदानीमप्युपलभ्येत । एकदा चैकस्य ज्ञानद्वयमयुक्तम् । किंच नित्यज्ञानं मुक्तौ भासते न वा आद्ये स्वतोऽभावेऽपसिद्धान्तः परतो भाने ज्ञानान्तराक्लृप्तिगौरवं तदपि कार्यमकार्यं वेति विकल्पदोःस्थ्यं च । उत्तरत्र-निर्विषयं सविषयं वा । नाद्यः तादृशख्यात्यनभ्युपगमात् द्वितीये तु सर्वविषयं नियतविषयं वा आद्येऽनेकानादिसर्वज्ञवादप्रसङ्गः मुक्तिदशायां सर्वज्ञत्वं भवत्विति चेन्न तथाऽपि तादृशचय्यन्तवादानङ्गीकारात् नियतविषयं त्वीश्वरज्ञानस्येव मुक्तज्ञानस्यापि नित्यस्य दुस्साधं सामग्रीभेदतो हि सर्वत्र धियां विषयनियमः विषयश्च तस्य

आनन्द इति चेत् स किं कार्योऽकार्यो वा आद्यः अनभ्युपगतेः हेतुनिरूपणायोगाच्च । न द्वितीयः अद्याप्युपलब्धिप्रसङ्गात् विषयविषयित्वानुपपत्त्याऽनुपलब्धिरिति चेत् तन्न किं तयोः स्वरूपमतिरिक्तं वा । आद्येऽनाद्युपलब्धिप्रसङ्गः उत्तरत्र भावस्योत्पन्नस्य ध्वंसित्वं स्यात् । उत्पन्नोऽपि कश्चिद्भावो न नश्यतीति चेन्न अद-

र्शनात् कल्पकाभावात् । आनन्दं ब्रह्मणो रूपं तच्च मोक्षेऽभिव्यज्यते इति श्रुत्या तथाऽङ्गीकुर्म इति चेन्न । अयमानन्दशब्दो जीवविषयः परविषयो वेत्यनिर्धारणात् स्वानन्दश्च साक्षात्क्रियमाणस्साधारो निराधारो वा भाति पूर्वत्रानन्दमात्रविषयत्वव्याघातः परत्र अहं सुखीति भानाभावादानन्दाभिव्यक्त्यापि न पुरुषार्थभोक्तृत्वसिद्धिः सुखादेस्स्वसमवेततयाऽनुभवो हि भोग इति आस्तामेतत् यदि कश्चित्कौमारिल एवं प्रयुञ्जीत देवदत्तमुक्तिकालः एतज्ज्ञानवान्कालत्वादिति तस्य देवदत्तसुषुप्त्यादिकालैरनैकान्त्यं तेषामपि पक्षीकरणे तदातनज्ञानस्य निर्विषयत्वसविषयत्वादिविकल्पक्षोभः । अत एव ।

निजं यत्त्वात्मचैतन्यमानन्दोऽध्यक्ष्यते च यः ।
यच्च नित्यविभुत्वादि तेनात्मा नैव मुच्यते ॥
मनःकरणकेनात्मा प्रत्यक्षेण प्रतीयते ।

इत्युपदेशोऽप्यश्रद्धेयः । यच्च कैश्चिच्चिन्मात्ररूप आत्मा चेतयितृत्वादिरहितः प्रकाशत इत्यनुशिष्यते तदपि निष्प्रमाणकम् अतस्समस्तविशेषगुणशून्यात्मानुमानं निष्कम्पमिति तत्राह । स्यादिति । यद्यत्र कदाचिज्जीवः स्वधर्मभूतज्ञानरहित इति साध्यं तदा तन्नित्यत्वश्रुतिविरोधः । अथ तद्विकारविशेषरहित इति तत्राव्यवहिताधारत्वनिषेधे सिद्धसाधनं व्यवहिताधारत्वनिषेधे तु शास्त्रबाधः स्वमतेन साध्याप्रसिद्धिश्च । उत्पत्त्यवस्थघटदृष्टान्तश्च साध्यविकल इत्याह । दृष्टान्त इति । प्रागसद्द्रव्योत्पत्तेर्निरस्तत्वेनाश्रयहान्या तन्निदर्शनायोगात् नित्यस्य तु त्रिगुणस्य द्रव्यस्य नित्यं यत्किंचिद्विशेषगुणवत्त्वादिति शेषः । अनुमानस्य बाधकतर्कमाह । क इवेति । अयेदमाकूतं केवलं दुःखनिवृत्त्यर्थी न क्वचिदपि कस्यचिदपि प्रवृत्तिर्दृश्यते

उपनयनोत्तरं वेदाध्ययनदारसंपत्ती कृत्वा ऽऽधानज्योतिष्टोमानन्तरं सहस्रमासजीवित्वासंभवादसंभवीति सिद्धान्तपक्षमाह । अहानीति । अहानि पञ्चपञ्चाशदहानि संवत्सरपदवाच्यानि अभिसंख्यत्वात् । सर्वसत्रप्रकृतिभूतद्वादशाहे त्रिवृदहः प्रकृत्य, आदित्यो वै सर्वर्तवः स यदोदेति अथ वसन्तः यदा संगवो ऽथ ग्रीष्मो यदा मध्यंदिने ऽथ वर्षा यदपराह्णे ऽथ शरद् यदा ऽस्तमेत्यथ हेमन्तशिशिरावित्येकस्मिन्नहनि षड़ृतुपरिगणनात् । षड़ृतुमत्त्वरूपसंवत्सरत्वं युक्तमिति भावः ॥ ४१ ॥

इति जैमिनिसूत्रवृत्तौ षष्ठाध्यायस्य सप्तमः पादः ॥ ७ ॥

अनाहिताग्नेरेव चतुर्होतृहोमाधिकारः । अधि० १ ।

इष्टिपूर्वत्वादक्रतुशेषो होमः संस्कृतेष्वग्निषु स्यादपूर्वो ऽप्याधानस्य सर्वशेषत्वात् ॥ १ ॥

प्रजाकामं चतुर्होत्रा याजयेदित्यनारभ्य पठितदर्वीहोमाः आहवनीये उत लौकिके ऽग्नाविति संशये पूर्वपक्षमाह । इष्टीति । अक्रतुशेषः कस्यापि क्रतोरनङ्गभूतः अपूर्वो ऽपि यत्किंचिदप्रकृतिको ऽपि होमः दर्वीहोमः संस्कृतेषु आधानादिसंस्कृतेषु आधानस्य आधानसंस्कृताग्नेः आहवनीयस्य सर्वशेषत्वात् । यदाहवनीये जुहोतीत्यनेन सर्वहोमशेषत्वात् । अत एव इष्टिपूर्वत्वादाहवनीयस्य पवमानेष्टिसाध्यत्वादाहिताग्नेरेवात्राधिकारो न अनाहिताग्नेरिति भावः ॥ १ ॥

इष्टित्वेन संस्तवश्चतुर्होतॄनसंस्कृतेषु दर्शयति ॥ २ ॥

सिद्धान्तमाह । इष्टीति । चतुर्होतृहोमानाम् एषा वा अनाहिताग्नेरिष्टिर्यच्चतुर्होतार इति इष्टित्वेन संस्तुतिः चतुर्होतृहोमानसंस्कृतेषु आधानाद्यसंस्कृतेषु दर्शयति ज्ञापयति ॥ २ ॥

उपदेशस्त्वपूर्वत्वात् ॥ ३ ॥

अस्यार्थवादत्वे वैयर्थ्याद् अयमुत्पत्तिविधिः अक्रतुशेषकर्मसामान्यस्य इत्यभिप्रायेणाह । उपदेशः विधिः । अपूर्वत्वादप्राप्तत्वात् ॥ ३ ॥

स सर्वेषामविशेषात् ॥ ४ ॥

विधित्वमङ्गीकृत्य क्रत्वङ्गतदितरसाधारणो विधिरिति शङ्कते। स इति। स विधिः। शेषं स्पष्टम् ॥ ४ ॥

अपि वा क्रत्वभावादनाहिताग्नेरशेषभूतनिर्देशः ॥ ५ ॥

अनाहिताग्नेः क्रतोरभावादनाहिताग्निपदश्रवणादक्रतुशेषस्य विधिरित्याह। अपि वेति। सूत्रं व्याख्यातम् ॥ ५ ॥

जपो वा ऽनग्निसंयोगात् ॥ ६ ॥

एषा वा अनाहिताग्नेरित्यनेन उत्पन्ना क्रिया जपरूपैवास्तु इति शङ्कते। जप इति। अनग्निसंयोगात्। अनाहिताग्निशब्दसंयोगात् ॥ ६ ॥

इष्टित्वेन संस्तुते होमः स्यादनारभ्याग्निसंयोगादितरेषामवाच्यत्वात् ॥ ७ ॥

इमं दूषयति। इष्टित्वेनेति। इष्टित्वेन इष्टिपदवाच्येन संस्तुतः अतः होम एव स्याद्। ननु आहवनीयः स्यात्तत्राह। अनारभ्येति। अनारभ्याधीतत्वादाहवनीयप्रापकवचनस्य उक्तरीत्या दर्वीहोमे अवाच्यत्वात्प्रवेशासंभवादितरेषां श्रौतकर्मणामेवाहवनीयः। यदि यदाहवनीये इति शास्त्रं चातुर्होत्रसन्निधौ पठितं स्यात्तदा ऽपरिहार्यं स्यात्तदेव नेति भावः ॥ ७ ॥

उभयोः पितृयज्ञवत् ॥ ८ ॥

आशङ्कते। उभयोरिति। उभयोः आहितानाहिताग्न्योः पिण्डपितृयज्ञवत् ॥ ८ ॥

निर्देशो वा ऽनाहिताग्नेरनारभ्याग्निसंयोगात् ॥ ९ ॥

नोभयोः, यतः वचने अनाहिताग्निनिर्देशः। अनारभ्याग्निसंयोगादिति पूर्वसूत्रे व्याख्यातम् ॥ ९ ॥

पितृयज्ञे संयुक्तस्य पुनर्वचनम् ॥ १० ॥

पितृयज्ञदृष्टान्तं परिहरति। पितृयज्ञे इति। पितृयज्ञे संयुक्तस्य आहिताग्निसंयुक्तस्य पुनर्वचनमनाहिताग्नेरौपासने अपणधर्मो होमश्चेति पृथग्विधिः, तथा नात्र ॥ १० ॥

अनाहिताग्निषु उपनयनहोमाः । अधि० २ ।

उपनयन्नादधीत होमसंयोगात् ॥ ११ ॥

उपनयनाङ्गहोमाः आहवनीये उत लौकिकइति संशये पूर्वपक्षमाह । उपेति । उपनयनं कुर्वन् आधानं कुर्यात् । जुहोतीति होमसंयोगात् । होमस्याहवनीयापेक्षत्वादाहवनीयस्याधानापेक्षत्वादिति भावः ॥ ११ ॥

स्थपतिवल्लौकिके वा विद्याकर्मानुपूर्वत्वात् ॥ १२ ॥

सिद्धान्तमाह । स्थपतीति । विद्या स्वाध्यायाध्ययनं तत्साधनोपनयनरूपं कर्म एतदुभयपूर्वत्वादाधानस्य एतयोः पूर्वमसंभवेनोपनयनकाले आधानासंभवात् । एतया निषादस्थपतिं याजयेदित्यत्र तदिष्टिवल्लौकिके ऽग्नाविति भावः ॥ १२ ॥

आधानं च भार्यासंयुक्तम् ॥ १३ ॥

आधानस्य भार्यासाहित्यादपि नेत्याह । आधानमिति । स्पष्टम् ॥ १३ ॥

अकर्म चोर्ध्वमाधानात्तत्समवायो हि कर्मभिः ॥ १४ ॥

उपनयनात्प्रागाधानार्थमेका भार्या ऽस्तु अध्ययनोत्तरं दारसंग्रहः प्रजार्थो ऽस्त्वित्याह । अकर्मेति । आधानादूर्ध्वं परिणीतायामकर्म कर्मसंबन्धाभावः । तस्मिन्नुपनयनकाले समवायो भार्यासंबन्धः कर्मभिः । संबद्ध इति शेषः ॥ १४ ॥

अकर्म च दारक्रिया ऽऽधानोत्तरकाले ॥ १५ ॥

इमं पक्षं दूषयति । अकर्मेति । आधानोत्तरकाले दारक्रिया अकर्म अननुष्ठेया । अशास्त्रादिति पूरणीयम् ॥ १५ ॥

श्राद्धवदिति चेत् ॥ १६ ॥

पितृयज्ञो यथा ऽऽहितानाहिताग्न्योः तथा कालद्वये भार्याद्वयमित्याह । श्राद्धेति । श्राद्धवत् । पितृयज्ञवत् ॥ १६ ॥

न श्रुतिविप्रतिषेधात् ॥ १७ ॥

स्नात्वोद्वहेदितिवचनविरोधाच्चेत्याह । श्रुतीति ॥ १७ ॥

अर्थादन्यदेवेति चेत् ॥ १८ ॥

रागेण प्राप्तदारसंग्रहस्य कालविधिरित्याशङ्कते । अर्थेति । अर्थाद् रागात् प्राप्तौ अन्यदेव कालमेव विदधाति ॥ १८ ॥

सर्वार्थत्वादपुत्रार्थौ न प्रयोजयेत् ॥ १९ ॥

भोगार्थं प्राप्तमपि कर्मार्थमप्राप्तविवाहः कालविशिष्टो ऽनेन विधीयते । विवाहद्वयमप्रमाणमित्याह । सर्वेति । सर्वार्थत्वात् । धर्मप्रजोभयार्थत्वादेकस्याः केवलं पुत्ररूपो ऽर्थः न प्रयोजयेद् न प्रेरयेत् ॥ १९ ॥

सोमपानात्तु प्रापणं द्वितीयस्य तस्मादुपयच्छेत् ॥ २० ॥

उक्तयुक्त्या उपनयनसमये विवाहो मा ऽस्तु तथा ऽपि पुरुषस्याप्रजसः भार्यान्तरसंयोगो ऽभिमत इत्याह । सोमेति । सोमपानात् । सोमपो न द्वितीयां जायामभ्यपूयते, इति वचनाद् द्वितीयविवाहस्य प्रापणम् । निषेधस्य प्राप्तिपूर्वकत्वादिति भावः । तस्मादन्यां भार्यामुपयच्छेद् गृह्णीयात् ॥ २० ॥

पितृयज्ञे तु दर्शनात्प्रतीयेत ॥ २१ ॥

पितृयज्ञस्य पूर्वोक्तवचनादाधानात्प्रागनुष्ठानमित्याह । पितृयज्ञ इति । दर्शनाद्वचनदर्शनात् ॥ २१ ॥

अनाहिताग्नौ स्थपतीष्टिः । अधि० ३ ।

स्थपतीष्टिः प्रयाजवदग्न्याधेयं प्रयोजयेत्तादर्थ्याच्चापवृज्येत ॥ २२ ॥

स्थपतीष्टौ को ऽग्निरिति विचारे पूर्वपक्षमाह । स्थपतीति । स्थपतीष्टिः प्रयाजवत् । यथा प्रयाजादींश् चोदकाद्गृह्णाति तथा अग्न्याधेयं प्रयोजयेत् । गृह्णीयात् । तादर्थ्याद् इष्टिमात्रार्थत्वात् तत्रत्याधानस्य अपवृज्येत अग्न्युत्सर्गं कुर्वीत ॥ २२ ॥

अपि वा लौकिके ऽग्नौ स्यादाधानस्यासर्वशेषत्वात् ॥ २३ ॥

सिद्धान्तमाह । अपि वेति । आधानस्य असर्वशेषत्वाद् यावत्पुरुषकर्तृकयज्ञाङ्गत्वाभावात् । आधानोत्पत्तिवाक्ये त्रैवर्णिककर्तृकत्वश्रवणेन त्रैवर्णिकयज्ञाङ्गत्वादिति भावः ॥ २३ ॥

अनाहिते ऽग्नाववकीर्णिपश्वनुष्ठानम् । अधि॰ ४ ।

अवकीर्णी पशुश्च तद्वदाधानस्याप्राप्तकालत्वात् ॥ २४ ॥

यो ब्रह्मचार्यवकिरेत्स गर्दभं नैर्ऋतं पशुमालभेतेत्यत्र सिद्धान्तमाह । अवकीर्णीति । अवकीर्णी ब्रह्मचारी सन् स्त्रीरतः । तत्पशुः स्थपतिवत् । शेषं स्पष्टम् ॥ २४ ॥

दैवकर्मणामुदगयनादिकालता । अधि॰ ५ ।

उदगयनपूर्वपक्षाहःपुण्याहेषु दैवानि स्मृतिरूपान्यार्थदर्शनात् ॥ २५ ॥

चूडाप्रभृतीनां स्मार्तकर्मणामनियतकालानां कालनियमं सिद्धान्तमाह । उदगिति । स्मृतिवाक्यदर्शनात् । शेषं स्पष्टम् ॥ २५ ॥

अहनि च कर्मसाकल्यम् ॥ २६ ॥

तथा दिवैव न रात्रावित्याह । अहनीति ॥ २६ ॥

पित्र्यकर्मणो ऽपरपक्षादिकालता । अधि॰ ६ ।

इतरेषु तु पित्र्याणि ॥ २७ ॥

श्राद्धादीनि पित्र्याणि इतरेषु अपरपक्षेषु अपराह्णे च ॥ २७ ॥

ज्योतिष्टोमाङ्गयाच्ञाक्रययोर्नित्यत्वम् । अधि॰ ७ ।

याच्ञाक्रयणमविद्यमाने लोकवत् ॥ २८ ॥

यज्ञार्थं चन्द्रमसीत्यादिमन्त्रैः भिक्षणम्, तथा सोमक्रयश्च, स्वस्य द्रव्योपपत्तौ नेति पूर्वपक्षमाह । याच्ञेति । याच्ञा भिक्षा क्रयणं सोमक्रयश्च अविद्यमानएव तथा लोके दृष्टत्वात् ॥ २८ ॥

नियतं वा ऽर्थवत्त्वात्स्यात् ॥ २९ ॥

सिद्धान्तमाह । नियतमिति । नियतं विद्यमाने ऽप्यवश्यं कार्यमर्थवत्त्वात् । क्रत्वपूर्वजननरूपफलवत्त्वात् ॥ २९ ॥

ज्योतिष्टोमादिषु पयोव्रतादीनामपि नित्यत्वम् । अधि॰ ८ ।

तथा भक्षप्रैषाच्छादनसंज्ञप्तहोमद्वेषम् ॥ ३० ॥

इत्थं नियममन्यत्रातिदिशति । तथेति । भक्षः तण्डुलादिसत्त्वे ऽपि पय एव भक्षः प्रोक्षण्यासादनज्ञानसत्त्वे ऽपि प्रोक्षणीरासादयेति प्रैषः अन्य-

वस्त्रसत्त्वे ऽपि दर्भमयं परिदधातीति दर्भमयवस्त्रपरिधानम् । तथा पशुना शकृत्पादाद्याघाताद्यकरणे ऽपि, यत्पशुर्मायुमकृतोरो वा पद्भिराहत इति मन्त्रेण संज्ञपनहोमः । यो मां द्वेष्टि जातवेद इति मन्त्रपाठः द्वेष्यभावे ऽपि कार्यः ॥ ३० ॥

अपररात्रे व्रतस्यानियमः । अधि० ९ ।

अनर्थकं त्वनित्यं स्यात् ॥ ३१ ॥

पयोव्रतादिनियमो ऽपि यत्र महानिष्टसंपादकः स त्याज्य इत्याह । अनर्थेति । अनर्थकं महानिष्टमरणादिजनकमजीर्णदोषेण तत्र अनित्यं कर्तव्य एवेतिनियमत्यागः ॥ ३१ ॥

छागस्यैवाग्नीषोमीयपशुत्वम् । अधि० १० ।

पशुचोदनायामनियमो ऽविशेषात् ॥ ३२ ॥

अग्नीषोमीयपशुः यः कश्चनोत छाग इति संशये पूर्वपक्षमाह । पश्विति । पशुचोदनायाम् अग्नीषोमीयं पशुमालभेतेति वाक्ये अविशेषात् । अनियमः छाग एवेति न ॥ ३२ ॥

छागो वा मन्त्रवर्णात् ॥ ३३ ॥

सिद्धान्तमाह । छाग इति । छाग एव । छागस्य वपाया मेदस इति मन्त्रलिङ्गात् ॥ ३३ ॥

न चोदनाविरोधात् ॥ ३४ ॥

मन्त्रलिङ्गेन न विधिसंकोचः संभवतीति शङ्कते । नेति । विधिवाक्यस्य प्रबलत्वेन दुर्बलेन मन्त्रेण संकोचो नेति भावः ॥ ३४ ॥

आर्षेयवदिति चेत् ॥ ३५ ॥

यथा आर्षेयं वृणीतइत्युक्त्वा त्रीन्वृणीतइति संकोचः तथा ऽत्रेति ब्रूते । आर्षेयवदिति ॥ ३५ ॥

न तत्र ह्यचोदितत्वात् ॥ ३६ ॥

दृष्टान्तवैषम्यमाह । तत्रेति । तत्र छागे अचोदितत्वाद्विध्यभावात् । आर्षेयस्थले त्रित्वेन संकोचे विधिरस्तीति भावः ॥ ३६ ॥

नियमो वैकार्थ्यं ह्यर्थभेदाद्भेदः पृथक्त्वेनाभिधानात् ॥ ३७ ॥

संकोचे शक्यार्थबाधाभावाद् दुर्बलेनापि मन्त्रलिङ्गेन संकोचो युक्त इति सिद्धान्त्याह । नियमो वेति । हि यतः ऐकार्थ्यं पशुशब्दार्थपशुत्वच्छागशब्दार्थच्छागत्वयोरविरोधः । दुर्बलत्वे ऽपि मन्त्रलिङ्गस्य शक्यार्थस्य बाधो न क्रियतइति भावः । तर्हि यदि पृथक्त्वेन परस्परविरोधेन अभिधानाद् अर्थभेदान्मन्त्रलिङ्गविध्यर्थयोर्भेदः तत्र मन्त्रलिङ्गमन्यद्भवत्विति पूरणीयम् । यथा ऐन्द्र्यर्चा गार्हपत्योपस्थानइति ॥ ३७ ॥

अनियमो वा ऽर्थान्तरत्वादन्यत्वं व्यतिरेकशब्दभेदाभ्याम् ॥ ३८ ॥

पूर्वपक्ष्याह । अनियम इति । अर्थान्तरत्वाद् उभयोरपर्यायत्वाद् घटकलशवत् तथा व्यतिरेकः छागत्वाभाववद्गवादिवृत्तित्वं पशुत्वे शब्दान्तरं भिन्नशब्दवाच्यत्वं ताभ्यां हेतुभ्यां भेदः वैरूप्यं यतः अतो ऽनियमः ॥ ३८ ॥

न वा प्रयोगसमवायित्वात् ॥ ३९ ॥

सिद्धान्तमाह । न वेति । अनियमो न । उक्तमन्त्रस्य नित्यं प्रयोगसंबन्धात् । अश्वादिग्रहणे मन्त्रलिङ्गविरोधेन मन्त्रः पाक्षिकः स्यादिति भावः ॥ ३९ ॥

छागेन कर्माख्यारूपलिङ्गाभ्याम् ॥ ४० ॥

ननु छिन्नगतिः छाग इति मन्त्रलिङ्गमप्यन्यत्र योगेनाबाधितमत आह । छागेनेति । छागेनैव कर्मयोगः । आख्यारूपं रूढिशक्तिः लिङ्गं पुल्लिङ्गं ताभ्याम् । रूढिर्योगमपहरतीति न्यायाद्योगशक्तेरप्रवृत्तिरिति भावः ॥ ४० ॥

रूपान्यत्वान्न जातिशब्दः स्यात् ॥ ४१ ॥

ननु छागो बस्त इति शब्दाः वयोविशेषपराः । तथा च वयोविशेषं गृहीत्वा ऽश्वे ऽपि संभवन्तीत्यत आह । रूपेति । रूपस्य अश्ववृत्तिवयसः छागवृत्तिवयोविशेषादन्यत्वाद् न अश्वादिपरः किं तु छागत्वरू-

पजातिवाची शब्दः स्यात् । अयं भावः । यथा कलभशब्दः वयोविशेषविशिष्टं हस्तिनमेवाचष्टे नाश्वादिकं तथा छागशब्दो वयोविशेषविशिष्टं छागमेवाचष्टे नान्यमिति ॥ ४१ ॥

विकार इति चेत् ॥ ४२ ॥

पदपदार्थसंबन्धो न नियतः नदीशब्दस्य शब्दविशेषे ऽपि वैयाकरणैः प्रयुज्यमानत्वादित्यमत्रास्त्वित्याशङ्कते । विकार इति । विकारः कल्पितसंबन्धः ॥ ४२ ॥

नौत्पत्तिकत्वात् ॥ ४३ ॥

दूषयति । नेति । पदपदार्थसंबन्धस्य औत्पत्तिकत्वाद् नित्यत्वाद् नदीशब्दस्य शब्दविशेषे लक्षणैवेति भावः ॥ ४३ ॥

स नैमित्तिकः पशोर्गुणस्याचोदितत्वात् ॥ ४४ ॥

ननु सुषिरं वा एतत् क्रियते यद्वपामुत्खिदतीत्यर्थवादावगतच्छिद्रनिमित्तः छागशब्दो ऽस्तु स चान्यत्रापीत्याशङ्कते । स नैमित्तिक इति । नेति पूर्वसूत्रादनुवर्तते । सः छागशब्दः छिद्रनिमित्तो न । पशौ छिद्रत्वस्य विधिविहितत्वाभावात् । रूढिर्योगमपहरतीति दत्तोत्तरत्वाच्च ॥ ४४ ॥

जातेर्वा तत्प्रायवचनार्थवत्त्वाभ्याम् ॥ ४५ ॥

उपसंहरति । जातेरिति । जातेरेव वाचकः छागशब्दः तत्प्रायवचनं जातौ भूरिप्रयोगेण रूढिशक्त्या अर्थवत्त्वेन विध्यविरुद्धार्थवत्त्वेन च ॥ ४५ ॥

इति श्रीजैमिनिसूत्रवृत्तौ षष्ठस्याध्यायस्य अष्टमः पादः ॥ ८ ॥

समाप्तश्च षष्ठाध्यायः ॥ ६ ॥

पूर्वार्धं समाप्तम् ॥

प्रयाजादिधर्माणामपूर्वप्रयुक्तत्वम् । अधि॰ १ ।

श्रुतिप्रमाणत्वाच्छेषाणां मुख्यभेदे यथाधिकारं भावः स्यात् ॥ १ ॥

पूर्वेण षट्केन प्रत्यक्षधर्मा विचारिताः उत्तरषट्केनातिदेशिकधर्मविचारो वैकृतः क्रियते । प्रयाजादिधर्माः दर्शपूर्णमाससन्निधौ पठिताः किं तदर्था उत यावद्यागार्था इति संशये सिद्धान्तेनोपक्रमते । श्रुतीति । मुख्यानामपूर्वाणां भेदे शेषाणां प्रयाजादीनां यथाऽधिकारं यस्य प्रकरणं तत्रैव व्यवस्था स्यात् । अयमस्य शेष इति श्रुत्येकगम्यत्वात् । दर्शपूर्णमासे कथंभावाकाङ्क्षया ऽन्विताः, नान्यत्र गन्तुं समर्था इति भावः ॥ १ ॥

उत्पत्त्यर्थाविभागाद्वा सत्त्ववदैकधर्म्यं स्यात् ॥ २ ॥

पूर्वपक्षमाह । उत्पत्तीति । ऐकधर्म्यं सर्वेषां तुल्यधर्मत्वं स्यात्सर्वे धर्माः सर्वार्था इति भावः । उत्पत्तेर्यजेर्योऽर्थः अपूर्वं तयोरविभागात् । अविशेषात् । सत्त्ववत् । गवादिवत् । यथा गां पदा न स्पृशेदित्युक्ते न सन्निहितायामपि कस्यां चिद्गवि, यावद्गोग्रहणम्, तथा यागमुद्दिश्यैते धर्मा विधीयमाना यावद्यागार्था भवितुमर्हन्तीति भावः ॥ २ ॥

चोदनाशेषभावाद्वा तद्भेदाद्व्यवतिष्ठेरन्नुत्पत्तेर्गुणभूतत्वात् ॥ ३ ॥

सिद्धान्तमाह । चोदनेति । प्रयाजादयः दर्शपूर्णमासार्था एवेति व्यवतिष्ठेरन् दर्शपूर्णमासनाम्नोः कर्मणोः उत्पत्तौ अपूर्वे गुणभूतत्वादङ्गत्वात् । तथा चोदनायाः दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति विधेः शेषभावात् । एकदेशरूपत्वात् । अतः तद्भेदादपूर्वभेदस्य द्वितीये व्यवस्थापितत्वात् । अयं भावः । धर्माणां यागाङ्गत्वं न वाक्येन किं तु कथंभावाकाङ्क्षारूपप्रकरणेन । तच्च यागेनापूर्वं कुर्यादिति अपूर्वमुद्दिश्य यागविधौ कथमपूर्वं कुर्याद्यागेनेति तद्विधिश्रवणजनिताकाङ्क्षापूर्वकतया । निखिलाङ्गविधिवाक्यानां तत्संबन्धाद्धर्मसमाम्नायः कर्मविध्येकदेशरूपः । इत्थं चापूर्वोद्देशेन कर्मविधानाद्यागो विधेय इति दर्शपूर्णमासशब्दवा-

च्यत्वविशिष्टयागस्यैव विधानात्तद्विधिशेषभूता धर्माः तदपूर्वप्रयुक्ता एव न त्वपूर्वान्तरप्रयुक्ता इति ॥ ३ ॥

सत्त्वे लक्षणसंयोगात्सार्वत्रिकं प्रतीयेत ॥ ४ ॥

सत्त्ववदितिदृष्टान्तवैषम्यं दर्शयति । सत्त्वइति । सत्त्वे गोव्यक्तौ लक्षणस्य लक्षणावृत्तेः संयोगात् संबन्धात्सार्वत्रिकं सकलगोसाधारणं प्रतीयेत । गोपदेन व्यक्तिं लक्षयित्वा तदनुवादेन पादस्पर्शनिषेधविधानात् । सन्निहितत्वविशिष्टस्योद्देश्यत्वे वाक्यभेदभिया गोत्वावच्छिन्नपरत्वमिह तु यागस्य गुणत्वात्फलं प्रति सन्निहितत्वविशिष्टयागविधौ न वाक्यभेद इति भावः ॥ ४ ॥

अविभागात्तु नैवं स्यात् ॥ ५ ॥

पूर्वपक्ष्युत्तिष्ठते । अविभागादिति । नैवम्, अपूर्वार्थो धर्मा इति न । अविभागात्प्रत्यक्षप्रमाणावगतयागनिरूपितकारणतया अङ्गानामवियोगात् । अङ्गभूते द्रव्ये तथा देवतायां तथा मन्त्रेषु अग्न्यादौ यागकारणत्वं प्रत्यक्षगम्यम् । अपूर्वसाधनत्वमानुमानिकं दुर्बलमिति भावः ॥ ५

द्व्यर्थत्वं च विप्रतिषिद्धम् ॥ ६ ॥

दूषणान्तरमप्याह । द्व्यर्थेति । यदि दर्शपूर्णमासार्था एव प्रयाजादयः तदा सौर्ययागे प्रयाजाभावेन प्रयाजे प्रयाजे कृष्णलं जुहोतीति वाक्यस्य यागमुद्दिश्य प्रयाजविध्यर्थत्वं प्रयाजमुद्दिश्य कृष्णलविध्यर्थत्वमिति द्व्यर्थत्वं विप्रतिषिद्धमन्याय्यं वाक्यभेदभिया । मन्मते धर्माणां सर्वार्थत्वात् तत्र प्रयाजानां क्लृप्तत्वात्कृष्णलमात्रविधानम् ॥ ६ ॥

उत्पत्तौ विध्यभावाद्वा चोदनायां प्रवृत्तिः स्यात्ततश्च कर्मभेदः स्यात् ॥ ७ ॥

सिद्धान्ती ब्रूते । उत्पत्ताविति । चोदनायामपूर्वे धर्माणां प्रवृत्तिः स्यात् । उत्पत्तौ यागे धर्माणां विध्यभावात् । ततः अपूर्वार्थत्वात्तद्भेदात्कर्मणः धात्वर्थस्य भेदः स्यात् ॥ ७ ॥

यदि वा ऽप्यभिधानवत्सामान्यात्सर्वसिद्धिः स्यात् ॥ ८ ॥

धर्माणामपूर्वार्थत्वमङ्गीकृत्यापि सर्वार्थत्वं साधयति । यदीति । यदि वा ऽपूर्वार्थत्वमस्तु, तथा ऽपि सर्वधर्मः स्यात् । अभिधानवत्सामान्यात् । अभिधानमपूर्वमिति नाम । तद्वत्त्वेन सर्वापूर्वाणां तुल्यत्वात् । यथा वाहीको ऽतिथिरागतः तस्मै यवान्नं दीयतामित्युक्ते यवान्नदानप्रयोजकं वाहीकमात्रं जानाति न पुरोवृत्तिमात्रं, तथेति भावः ॥ ८ ॥

अर्थस्य त्वविभक्तत्वात्तथा स्यादभिधानेषु पूर्ववत्त्वात्प्रयोगस्य कर्मणः शब्दभाव्यत्वाद्विभागाच्छेषाणामप्रवृत्तिः स्यात् ॥ ९ ॥

वाहीकदृष्टान्तवैषम्यं दर्शयति । अर्थस्येति । अर्थस्य वाहीकदेशसंबन्धस्य तावत्पुरुषेषु अविभक्तत्वान्नियतत्वात् । यवान्नदाननिमित्तं तद्देशसंबन्धः, न पुरुषः । नन्विदं कथं ज्ञातमत्राह । प्रयोगस्य उक्तवाक्यप्रयोगस्य पूर्ववत्त्वादेतत्पूर्वमपि सत्त्वात् । अयं भावः । पूर्वमसकृद्वाहीकागमने वाहीक आगतः यवान्नं देहीति वाक्यम् असकृच्छ्रुत्वा पश्चात्तद्देशसंबन्धी यः स यवान्नप्रिय इति व्याप्तिं गृह्णातीति, तथा ऽत्र नेत्याह । कर्मणः अपूर्वस्य शब्दभाव्यत्वाच् शब्दैकगम्यत्वात्तस्य अपूर्वस्य शब्देन विभागात् । कर्मभेदेन भेदसिद्धेः । शेषाणां प्रयाजादीनां सर्वत्राप्रवृत्तिः स्यात् । यत्र पठितं तत्रैव विश्रान्तिः ॥ ९ ॥

स्मृतिरिति चेन्न ॥ १० ॥

नन्वरुणपराशरा नाम शाखिनः तेषां परिचरेषु स्मृतिरूपब्राह्मणं, ये दर्शपूर्णमासयोर्धर्माः ते सर्वेष्टीनामिति स्मृतं, तस्याः का गतिरिति शङ्कते । स्मृतिरिति ॥ १० ॥

पूर्वत्वात् ॥ ११ ॥

स्मृतिं लापयति । पूर्वत्वादिति । पूर्वत्वाद् दर्शपूर्णमासप्रकृतिकत्वं विकृतीष्टीनां चोदकशास्त्रेण तद्धर्मप्राप्तिरिति वक्ष्यमाणं, तदनुवादिका स्मृतिरिति भावः ॥ ११ ॥

अर्थस्य शब्दभाव्यत्वात्प्रकरणनिबन्धनाच्छब्दादेवान्यत्र भावः स्यात् ॥ १२ ॥

उक्तार्थं निगमयति । अर्थस्येति । अर्थस्य अङ्गकलापस्य शब्देन विधिना भाव्यत्वाद्गम्यत्वात्तेषामङ्गानां प्रकरणेन निबन्धनादन्यत्र गन्तुमशक्यत्वादन्यत्र सौर्ययागादौ तेषामङ्गानां भावः सत्त्वं शब्दादतिदेशशास्त्रेण वक्ष्यमाणेनैव स्यात् । अतः अतिदेशशास्त्रमारम्भणीयमिति भावः ॥ १२ ॥

समानमितरच्छ्येनेनेति श्रुत्या इषौ श्येनीयविशेषधर्मातिदेशः । अधि· २ ।

समाने पूर्ववत्त्वादुत्पन्नाधिकारः स्यात् ॥ १३ ॥

अस्तीषुनामकः कश्चिदेकाहविशेषः आभिचारिकः । तत्र कांश्चिद्विकृतान् धर्मान्विधाय ततः समानमितरच्छ्येनेनेत्युक्तम् । अयमनुवादो विधिर्वेति संशये पूर्वपक्षमाह । समानइति । समानउक्तवाक्ये उत्पन्नाधिकारः स्यात् । अनुवादः स्यात् । पूर्ववत्त्वात् । ज्योतिष्टोमविकृतित्वात् । अयं भावः । श्येनस्येषोश्च अव्यक्तलिङ्गत्वेन ज्योतिष्टोमः प्रकृतिः । इषुसमीपे वैशेषिका ये धर्माः तदितरेषां प्राकृतानां ज्योतिष्टोमादतिदेशेन प्राप्तानामेवानेनानुवाद इति ॥ १३ ॥

श्येनस्येति चेत् ॥ १४ ॥

श्येनवैशेषिकधर्मान् लोहितोष्णीषादीनतिदिशति इदं वाक्यमिति शङ्कते । श्येनस्येति ॥ १४ ॥

नासन्निधानात् ॥ १५ ॥

निराकरोति । नेति । श्येने ज्योतिष्टोमधर्माः श्येनवैशेषिकधर्माश्च सन्ति । तत्र इतरपदेन ज्योतिष्टोमधर्मा एव ग्राह्या अव्यक्तलिङ्गेन तेषामेव सन्निधानाद् इति भावः ॥ १५ ॥

अपि वा यद्यपूर्वत्वादितरदधिकार्थे ज्यौतिष्टोमिकाद्विधेस्तद्वाचकं समानं स्यात् ॥ १६ ॥

सिद्धान्तमाह । अपि वेति । अपूर्वत्वात् । उक्तवाक्यस्य विधायकत्वात् । इतरशब्दो ऽधिकार्थः न भेदवद्वाचकः । इत्थं च ज्योतिष्टो-

मिकाद्विधेः ज्योतिष्टोमसंबन्धिधर्मात्, तद्वाचकं तद् इति पदं वाचकं येषा-मिति विग्रहेण अधिकमिति फलितं, ज्योतिष्टोमिकविधेरधिकं यल्लो-हितोष्णीषादिधर्मजातं श्येनेन समानमिति वचनार्थः । यदि विधिः तदा सार्थक इति भावः ॥ १६ ॥

एतद्ब्राह्मणानीत्यादिना पञ्चसु हविःषु सार्थवादविध्यतिदेशः । अधि० ३ ।

पञ्चसञ्चरेष्वर्थवादातिदेशः सन्निधानात् ॥ १७ ॥

चातुर्मास्ये एतद्ब्राह्मणान्येव पञ्च हवींषीति श्रुतम् । अत्र ब्राह्म-णपदेनार्थवादा एव ग्राह्या उताङ्गविधयोऽपीति संशये पूर्वपक्षमाह । पञ्चेति । पञ्चसंचरेषु, पञ्चहविषामाग्नेयादीनां पञ्चानां प्रतिपर्व गमनम-स्तीति तानि पञ्चसंचरपदवाच्यानि, तेषु वरुणप्रघासेषु उक्तवाक्येनाति-दिष्टेषु ब्राह्मणपदेनार्थवादमात्रातिदेशः स्याद् नाङ्गविधीनां, विधिवा-क्यशेषत्वेन तस्य सन्निधानात् ॥ १७ ॥

सर्वस्य चैकशब्द्यात् ॥ १८ ॥

सिद्धान्तमाह । सर्वस्येति । सर्वस्य अङ्गविधीनां ब्राह्मणानां च अतिदेशः स्यात् । ऐकशब्द्यात् । एकेन ब्राह्मणशब्देन उभयोः प्रतिपा-द्यत्वात् ॥ १८ ॥

लिङ्गदर्शनाच्च ॥ १९ ॥

लिङ्गेति । वरुणप्रघासे त्रिंशदाहुतय इति परिगणनमङ्गविध्यति-देशं विना ऽनुपपन्नमिति भावः ॥ १९ ॥

विहिताम्नानान्नेति चेत् ॥ २० ॥

नन्वङ्गविधीनां यद्यतिदेशः तर्हि वैश्वदेवधर्माणाम्, अग्निं मन्थन्ति प्रसुवो भवन्तीति पुनर्विधानं व्यर्थमित्याशङ्कते । विहितेति । विहितस्य वैश्वदेवे विहितस्याग्निमन्थनादेः पुनराम्नानात् । पुनर्विधाना-न्नाङ्गविध्यतिदेशः ॥ २० ॥

नेतरार्थत्वात् ॥ २१ ॥

समाधत्ते । नेति । न वैयर्थ्यं पुनर्विधेः इतरार्थत्वात् । मारुती-प्रचारार्थत्वात् ॥ २१ ॥

एतद्ब्राह्मण इत्यनेन एककपालैन्द्राग्नयोः सार्थवादविध्यतिदेशः । अधि० ४ ।

एककपालैन्द्राग्नौ च तद्वत् ॥ २२ ॥

तथा साकमेधे एतद्ब्राह्मण ऐन्द्राग्नः एतद्ब्राह्मण एककपालइति । अत्रापि पूर्वोत्तरपक्षौ पूर्वाधिकरणवत् ॥ २२ ॥

साकमेधे वारुणप्रघासिकैककपालातिदेशः । अधि० ५ ।

एककपालानां वैश्वदेविकप्रकृतिराग्रयणे सर्वहोमापरिवृत्तिदर्शनादवभृथे च सकृद्द्व्यवदानस्य वचनात् ॥ २३ ॥

वैश्वदेवपर्वणि द्यावापृथिव्यमेककपालं वरुणप्रघासे कायमेककपालमिति साकमेधीये वैश्वकर्मणमेककपालमित्युक्त्वा तत्रैवैतद्ब्राह्मण एककपाल इति श्रुतम् । अस्मिन्वाक्ये एतच्छब्देन वैश्वदेविकैककपाल उत वरुणप्रघाससंबन्धी ग्राह्य इति संशये भूयोधर्मत्वाद् वैश्वदेवसंबन्धिनो ग्रहणमिति पूर्वपक्षे सिद्धान्तमाह । एककपालानामिति । वारुणप्रघासिकैकपालस्यैव ग्रहणम् । तथा हि । एककपालानां यावदेककपालानां वैश्वदेवैककपालं प्रकृतिः । आग्रयणे द्यावापृथिव्यैककपाले सर्वहोमस्य अपरिवृत्तिश्च दर्शनादनुवादात् । अवभृथे वारुणैककपाले द्विरवद्यतीति द्व्यवदानविधायकवचनाच्च । यदि वैश्वदेवप्रकृतिकत्वं न स्यात्तर्हि द्विरवदानस्य द्विर्हविषो ऽवद्यतीत्यनेनैव प्राप्तत्वात्पुनर्विधानं व्यर्थं स्यात् । तत्प्रकृतित्वे तु वैश्वदेवपर्वणि एककपालस्य यदेककपालस्यावद्येद् यजमानस्यावद्येदिति निषेधात्तस्यातिदेशेन प्राप्तौ तद्बाधकं प्रकृतवचनम् । इत्थं च वैश्वदेवैककपालधर्माणां प्रकृतित्वेनैव प्राप्तौ एतद्वचनमनर्थकं स्यादतः सर्वप्रकृतित्वेन वैश्वदेवधर्माणां प्राप्तिः । शमीमय्यः स्रुच इति विशेषाणां वरुणप्रघासधर्माणामपि प्राप्त्यर्थमिदं वचनम् । तस्मादेतत्पदेन वरुणप्रघासिककपालग्रहणम् । एतादृशार्थलाभाय सूत्रे कानि चित्पदानि प्रपूर्याणि ॥ २३ ॥

इति श्रीजैमिनिसूत्रवृत्तौ सप्तमस्याध्यायस्य प्रथमः पादः ॥ १ ॥

रथंतरादिशब्दस्य गानविशेषार्थत्वम् । अधि० १ ।

साम्नो ऽभिधानशब्देन प्रवृत्तिः स्याद्यथाशिष्टम् ॥ १ ॥

कवतीषु रथन्तरं गायतीति । अस्यार्थः । अभि त्वा शूर नोनुम इत्यृचि गानविशेषेण गीयमानं साम रथन्तरशब्दवाच्यम् । एतस्य कवतीषु कया नश्चित्र आभुवदित्यृचि गानं कार्यमिति । अत्रातिदेशः कस्येति विचिकित्सायां प्रथमं पक्षमाह । साम्न इति । साम्नो ऽभिधायकशब्देन वाचकशब्देन रथन्तरमित्यानुपूर्व्या यथाशिष्टं यथा गुरुपरम्परया उपदिष्टं तथा प्रवृत्तिः स्यात् । रथन्तरं साम पठेत्युक्ते गानयुक्तामृचं पठति । अतः गानविशिष्टाया ऋचो ऽतिदेश इति भावः ॥ १ ॥

शब्दैस्त्वर्थविधित्वादर्थान्तरे ऽप्रवृत्तिः स्यात्पृथग्भावात्क्रियाया ह्यभिसंबन्धः ॥ २ ॥

गानविशिष्टाया ऋचो ऽतिदेश इत्युक्तं तत्र ऋगंशं दूषयति । शब्दैरिति । न ऋचः प्रवृत्तिः यतः शब्दैरर्थविधित्वात् । स्वस्वार्थबोधफलत्वात् । अर्थान्तरे अन्यशब्दार्थैरन्यशब्दस्य अप्रवृत्तिः स्यात् पृथग्भावात् । तत्तदर्थवाचकशब्दानां पृथक्त्वात् । क्रियायास्तत्तदर्थस्य तेन तेन संबन्धः । अयं भावः । ऋचो ऽतिदेशे अभि त्वेत्यृचा बोध्यो यो ऽर्थः स, कया नश्चित्र आभुवदित्यृचा बोधनीयः । स च न संभवति तत्तदर्थभेदादतः ऋगतिदेशो न संभवतीति भावः ॥ २ ॥

स्वार्थे वा स्यात्प्रयोजनं क्रियायास्तदङ्गभावेनोपदिश्येरन् ॥ ३ ॥

मा ऽस्तु ऋगन्तरस्य ऋगन्तरार्थबोधकत्वं तथा ऽप्यदृष्टार्थमित्याशङ्कते । स्वार्थेति । स्वार्थे प्रवर्तमाना अप्यभिवत्यः कवतीनामङ्गभावेनोपदिश्येरन् विधीयेरन् । उभयसमुच्चय इति भावः । क्रियाया अभि त्वेति ऋक्पाठस्य प्रयोजनं फलम्, अदृष्टम् इति शेषः ॥ ३ ॥

शब्दमात्रमिति चेत् ॥ ४ ॥

पक्षान्तरमाह । शब्दमात्रं रथन्तरमित्यानुपूर्वीविशिष्टं ताव-

न्मात्रं, कवतीषु योज्यमिति पूरणीयम् । अदृष्टार्थे तावत्पदकल्पने गौरवादिति भावः ॥ ४ ॥

नौत्पत्तिकत्वात् ॥ ५ ॥

दूषयति । नेति । नामिनाम्नोः संबन्धस्यौत्पत्तिकत्वात् स्वतःसिद्धत्वात् । न, रथन्तरशब्देन रथन्तररूपशब्दार्थविधायकत्वं न संभवति । औत्पत्तिकशब्दसंबन्धाभावादिति भावः ॥ ५ ॥

शास्त्रं चैवमनर्थकं स्यात् ॥ ६ ॥

अस्मिन्पक्षे दूषणान्तरमाह । शास्त्रमिति । शास्त्रमतिदेशशास्त्रमनेन वचनेन अतिदेशो विधेयः स चानर्थकः स्यात् । असिद्धः स्यात् । अस्य शब्दस्य अन्यत्राक्लृप्तत्वे अक्लृप्तस्यात्रैव अपूर्वविधानादिति भावः ॥ ६ ॥

स्वरस्येति चेत् ॥ ७ ॥

मा ऽस्तु रथन्तरमिति शब्दस्य कवतीषु विधानम् । किं तु अभि त्वेत्यृचि यः स्वरः स कवतीषु विधीयतइत्याह । स्वरस्येति ॥ ७ ॥

नार्थाभावाच्छ्रुतेर्न संबन्धः ॥ ८ ॥

दूषयति । नेति । अर्थस्य अभित्वा ऋचः स्वरस्य कवतीष्वभावात् । श्रुतेः कवतीषु रथंतरं गायतीत्यस्याः श्रुतेर्न संबन्धः । स्वरेण साकं संबन्धो न । स्वरविधौ तात्पर्यं नेति भावः ॥ ८ ॥

स्वरस्तूत्पत्तिषु स्यान्मात्रावर्णाविभक्तत्वात् ॥ ९ ॥

सिद्धान्तं वक्तुं प्रचक्रमे । स्वर इति । अभि त्वा शूरेत्यृचि ये वर्णा याश्च मात्राः तेषां कवतीष्वपि सत्त्वेन तदविभक्तत्वात्तदभिन्नत्वात् । उत्पत्तिषु अभि त्वा शूरेत्यृचि उत्पन्नेषु वर्णेषु यः स्वरः सः तेषु तत्रत्यवर्णेष्वपि स्यात् । यदि च तेषु वर्णेषु तस्य स्वरस्य सिद्धत्वेन विधिवैयर्थ्यमिति तर्हि अनुवादो ऽस्तु ॥ ९ ॥

लिङ्गदर्शनाच्च ॥ १० ॥

भावकर्मकर्तृविषयत्वादात्मनेपदं प्रति योग्यत्वं तदिह किं विवक्षितमिति पृच्छति । 'क्व च तावात्मनेपदस्य निमित्तमिति' । इतरोपि कुर्वद्रूपपक्षाश्रयणेन परिहरति । 'यत्रेत्यादि' । अत्रैवं व्याख्येयं, यत्रात्मनेपदं तदाश्रयं भवति तत्रैवात्मनेपदस्य निमित्तं, किं पुनस्तद्यत्र तदाश्रयमात्मनेपदं भवतीत्यत आह । 'भावकर्मेत्यादि' । अत्र हि विषये सुक्रम्योः श्रूयमाणमात्मनेपदं भवतीति, कुर्वद्रूपएव निमित्तशब्दो मुख्यः, योग्यतामात्रे त्वौपचारिक इति भावः । ननु च भावकर्मादिषु तएवार्था आत्मनेपदस्य निमित्तं न सुक्रमी, क्व तर्हि प्रतिषेधः स्याद्यत्र हि क्रमिरेव निमित्तम्, अनुपसर्गाद्वा, क्रंसीष्ट क्रंस्यते, नैष दोषः । भावकर्मकर्त्तारः क्रमेश्च वृत्त्यादयः, सर्वमेवैतद्धातोरेव विषयतया विशेषणं, धातुरेव तु साक्षादात्मनेपदस्य निमित्तं, भावादिविषयाद्धातोरात्मनेपदं भवतीति । 'तेनेत्यादि' । यत एवं कुर्वद्रूपमेवात्र निमित्तं तेनायं सत्यात्मनेपदे प्रतिषेध इत्यर्थः । किमुच्यते प्रतिषेध इति, यावता पर्युदासाश्रयेणोपक्रमे व्याख्यातं, तत्राह । 'प्रतिषेधफलं चेदं सूत्रमिति' । सत्यं पर्युदासेपि नियमार्थत्वान्नियमस्य चेतरव्यावृत्तिफलकत्वादेवमुक्तमित्यर्थः । 'प्रस्नोषीष्टेति' । आशिषि लिङ्, भावकर्मणोरित्यात्मनेपदम् । प्रक्रंसीष्टेति, अत्र तु प्रोपाभ्यां समर्थाभ्यामिति कर्त्तरि, सर्वत्रेत्यादिना सूत्रार्थमुदाहरणे दर्शयति । ननु सनन्ताद्विधीयमानस्यात्मनेपदस्य स एव धातुर्निमित्तं न सुक्रमी तत्राह । 'सनन्तादपीति' । पूर्ववदिति वचनात्प्रकृतिगतमेव सनन्तेपि निमित्तमिति भावः । यदा तर्हि सनन्ताद्भावकर्मणोरात्मनेपदं तदा प्रतिषेधो न प्राप्नोति, नहि तदा प्रकृतिगतं निमित्तमपेक्षितं किं तर्हि सनन्तमेव स्वतन्त्रं निमित्तं, पुत्रीयतइत्यादिवत्, एवं तर्हि सनन्ताद्भावकर्मणोरपि पूर्ववत्सन इत्यात्मनेपदं भविष्यति, एतयोरर्थयोः सन्प्रकृतावात्मनेपदस्य दृष्टत्वात्, तत्र यद्यपि सनन्तमपि स्वयमेव निमित्तमुपपद्यते तथापि भावकर्मणोरित्यस्यावकाशः, भूयते, पच्यते, पूर्ववत्सन इत्यस्यावकाशः, शिशयिषते, सनन्ताद्भावकर्मणोरुभयप्रसंगे परत्वात्पूर्ववत्सन इत्यनेन भविष्यति, यदि परं विशेषो नास्तीत्युच्यते तदपि न, अत्रैव विशेषस्य संभ-

वात्, एवमपि न सिध्यति, पूर्ववत्सन इत्यत्र कर्त्तरि कर्मव्यतिहारइत्यतः कर्तरीत्यनुवृत्तेः, तत्र हि प्रकरणे सर्वत्रैव कर्तरीति संबध्यते, अथापि न संबध्यते एवमपि यदा सनन्ताद् णिचि कृते णिचश्चेति भावकर्मणो-रिति वा आत्मनेपदं तदा प्रतिषेधो न सिध्यति चिक्रंसयते चिक्रंस्यत इति, किं च भोस्तदानीमपि प्रतिषेध इष्यते, बाढमिष्यते, यदाह वार्त्तिककारः, सिद्धं तु स्नोरात्मनेपदेन समानपदस्थस्येट्प्रतिषेधात्, क्रमेश्चेति, तदेवमात्मनेपदेन समानपदस्थत्वे प्रतिषेधं कुर्वतो वार्तिककारस्यैवं विधे विषये प्रतिषेध इष्टो लक्ष्यते, यथा पुनर्वृत्तिकारेण व्याख्यातं तथा न प्राप्नोति, कर्त्तव्योत्र यत्नः । यदि सत्यात्मनेपदे प्रतिषेधः मा कारि निमित्त-ग्रहणमनात्मनेपदइत्येवास्तु, सति सप्तमी विज्ञास्यते, आत्मनेपदे सति न भवतीति, यद्येतल्लभ्येत कृतं स्यात्तत्तु न लभ्यं, शास्त्रेयाः सप्तम्यस्ताः सर्वाः परसप्तम्य इति नियमात्, परसप्तम्यां तु यदि स्नुक्रमोर्विशेषणं स्नुक्रमोरा-त्मनेपदेनन्तरइति, सिद्धं प्रस्नोषीष्ट, प्रक्रंसीष्ट, प्रस्नोष्यते, प्रक्रंस्यते, तत्र न प्राप्नोति, स्येन व्यवहितत्वात्, अथार्धधातुकस्य विशेषणं स्नुक्रमिभ्यां परस्या-र्धधातुकस्यात्मनेपदेऽनन्तरइति, सिद्धं प्रस्नोष्यते प्रक्रंस्यते, प्रस्नोषीष्ट, प्रक्रंसीष्ट, अत्र न प्राप्नोति, सीयुटः आत्मनेपदभक्तत्वात्, उभयथापि प्रचिक्रं-सिष्यते, अत्र न प्राप्नोति, नह्यत्र क्रमेस्तत्परस्य सार्वधातुकस्यात्मनेपद-मनन्तरं, तस्मान्निमित्तग्रहणं कर्त्तव्यं तदाह । 'निमित्तग्रहणमित्यादि' । तदात्मनेपदं परं यस्मात्स तत्परः, प्रचिक्रंसिष्यते इत्यादौ स्यप्रत्ययः स परो यस्मात्स तत्परः सन्प्रत्ययः । 'इह त्वित्यादि' । प्रागेव व्याख्या-तम् । 'प्रस्नविषायतइति' । दीङ् स्नतः, वार्त्तिककारमतेप्यत्र प्रतिषेधो न भवति, कथं, समानपदस्थस्येति वचनात्, इडागमेन पदावस्थापेक्ष-णीया, तत्र तृचि विभक्त्यावुत्पन्नायां लब्धेपि पदत्वे आत्मनेपदस्यासंनि-धानादिट् प्रवर्त्तते, प्रचिक्रंसिष्यतइत्यत्र तु पदावस्थायामात्मनेपदसंनि-धानात्प्रतिषेधप्रवृत्तिः । 'आत्मनेपदविषयादिति' । तद्योग्या[illegible]र्थः । सत्यात्मनेपदे प्रतिषेध इत्युक्तत्वादिदमा[illegible]यते, अनुपसर्गा[illegible] [illegible]न्ता;

१ सत्यपीति इं॰ पु॰ पा॰ ।

क्षमिता, इत्युभयमपि भवति, अनुपसर्गाद्वेति विकल्पेनात्मनेपदनिमित्तत्वादित्येके। अन्ये त्वात्मनेपदविषयादिति अनन्यभावे विषयशब्दं वर्णयन्तः क्षमितेत्येव भवितव्यमित्याहुः। 'स्नोतेः सनि क्विति चेति'। उपलक्षणमेतत्, क्षमेश्च निष्ठायां यस्य विभाषेति द्रष्टव्यं, प्रतिषेधो भवतीत्यत्र हेतुः प्रागेवोक्तः॥

"ग्रहो ऽलिटि दीर्घः"॥ 'ग्रह उत्तरस्येट इति'। कथं पुनरिटो दीर्घत्वं लभ्यते, इडिति यत्प्रकृतं तद्धि प्रथमानिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः, एवं तर्हि षष्ठ्यन्तप्रपरं करिष्यामि एवमपि दोषः, प्रकृतमिटमनपेक्ष्येट इत्युच्यमाने ऽविशेषाच्चिण्वदिटोपि दीर्घप्रसंगः, अस्तु तर्हि प्रथमान्तमेव, तत्र दीर्घ इट् भवतीति सामानाधिकरण्येनान्वये सामर्थ्यादीडागमे विधिः संपद्यते, इट् दीर्घ इति चेद्विप्रतिषिद्धं, यदीट् न दीर्घः, अथ दीर्घो नेट्-इट् दीर्घश्चेति विप्रतिषिद्धं, स्यादेतत्। दीर्घ इड्भवतीत्युक्ते सामर्थ्याद्व्यक्तिपरित्यागेन इकारजातिराश्रीयते, दीर्घग्रहणाच्च तद्व्यक्तिसमवेता सा विधीयतइति, एवमपि दोषः, विवरीषतइत्यत्र सनीटि प्राप्ते वृतो वेत्यनेन पक्षे दीर्घइटि च प्रसक्ते सनि ग्रहगुहोश्चेत्युभयस्मिन्नपि प्रतिषिद्धे इट् सनि-वेति पक्षे इड्विधीयते, तत्र पुनरिटो विधानाभावात्पक्षे दीर्घ ईकारो न श्रूयेतेति। नैष दोषः। इट् सनि वेत्यत्र दीर्घ इडिति वृत इति चानुवर्तिष्यते, यत्तर्हि विदेशस्थमिटं प्रतिषिध्य पुनर्विधानं तत्र न सिध्यति, जॄव्रश्चोः क्त्वि, जरित्वा, जरीत्वा; अत्रोदात्तत्वादिट् प्राप्तः वृतो वेत्यनेन च दीर्घ इट्, ततो द्वयोरपि श्र्युकः कितीति प्रतिषेधे पुनरिड्विधीयते, न च तत्र दीर्घग्रहणस्यानुवृत्तिसंभवः। ननु च श्र्युकः कितीत्यत्र नेड्वशीत्यधिकाराद्व्यक्तिपक्षाश्रयणाच्च इट एकमात्रस्य निषेधो न दीर्घस्येटः, ततः किं, वृतो वेत्यनेन विहितो दीर्घ इट् तथैव स्थितः, जॄव्रश्चोः क्त्वीत्यनेन चेट् प्रतिप्रसूयते इति जरित्वा जरीत्वेति द्वयमपि सिद्धं[1] भवति, स्यादेवं यद्यागमान्तरमीड्विधीयेत, इह त्विड् दीर्घ इति वचनादिड्कार्य-

[1] सिध्यतीति ई॰ पु॰ पा॰।

मस्यापि भवत्येव, अन्यथा अग्रहीदित्यत्र ह्म्य[1]न्तक्षणेति वृद्धिप्रतिषेधः, इट ईटीति सिज्लोपश्च, अग्रहीढ्वम्, अग्रहीध्वं, विभाषेट इति मूर्द्धन्यविकल्पः। जरीत्वेति, न क्त्वा सेडिति क्त्वित्वप्रतिषेध इत्येते विधयो न सिध्येयुः, तस्मादिड्ढार्यमस्या[2]पीटो भवतीत्यङ्गीकर्त्तव्यं, ततश्च विदेशस्थं प्रतिषिध्य पुनर्विधाने स्थित एव दोषः स्यात्तस्माद्दीर्घ इडशक्यो विधातुम्, एवं तर्ह्यार्द्धधातुकस्येति वर्त्तते, ग्रह उत्तरस्यार्द्धधातुकस्य दीर्घो भवति, इहापि तर्हि प्राप्नोति ग्रहणीयम्, वलादेरिति वर्त्तते, इहापि तर्हि न प्राप्नोति, ग्रहीता, ग्रहीतुमिति, भूतपूर्वगतिर्विज्ञास्यते, इहापि तर्हि प्राप्नोति, ग्राहक इति, अस्तु तर्हि इडित्येव, ननु चोक्तं षष्ठीनिर्द्दिष्टेन चेहार्थ इति ग्रह इति, पञ्चमी इडिति प्रथमायाः षष्ठीं प्रकल्पयिष्यति, तस्मादित्युत्तरस्येति 'प्रकृतस्येति'। आर्द्धधातुकस्येडित्यनन्तरं विहितस्य। 'चिण्वदिटो न भवतीति'। जरीत्वेत्यत्र तु आर्द्धधातुकस्येडित्ययमेवेट् प्रतिषिद्धः प्रतिप्रसूयतइति भवत्येव दीर्घः, इह जरीगृहितेति यङन्तात्तृच्यल्लोपयलोपयोः कृतयोर्द्विःप्रयोगो द्विर्वचनमिति स एवायं ग्रहिरिति दीर्घः प्राप्नोति, पूर्वस्मादपि विधौ यः स्थानिवद्भावः सोपि दीर्घविधौ प्रतिषिद्धः, तस्माद्विहितविशेषणमिहाश्रयणीयं, ग्रहेर्यद्विहितमार्द्धधातुकं तस्य य इट् तस्य दीर्घ इति॥

"वृतो वा"। अत्र यदि वृ वरणइत्येतस्य तसिला निर्द्देशः स्याद्व इत्येव निर्द्दिश्येत, यथा वो यङीति, अथ तस्य ऋकारान्तानां च ग्रहणम्, एवमपि तस्य पृथग्ग्रहणमनर्थकमृकारान्तत्वात्; अथ तस्य ऋकारान्तानां च, तथा च सत्यृतश्च संयोगादेरित्यत्र ऋत इति न वक्तव्यमस्यैवानुवृत्तेः, अथ वृङ्वृञोः ऋकारान्तानां च तथापि वृग्रहणमनर्थकमृकारान्तत्वात्तस्माद्वृत्तिकारोपदर्शितानामेव ग्रहणम्। 'वृत इति किमिति'। उरिति वक्तव्यमिति मन्यते॥

"न लिङि"॥ 'विस्तरिषीष्टेति'। कर्मण्यात्मनेपदम्॥

१ ह्म्यन्तक्षणेतीति नास्ति ई॰ पु॰ पा॰।
२ दीर्घस्यापीट ई॰ पु॰ पा॰।

"सिचि च परस्मैपदेषु" ॥ 'अतारिष्टामिति'। तॄ प्लवनतरणयोः। 'अस्तारिष्टामिति'। स्तॄञ् आच्छादने, ञिदुभयपदी ॥

"इट् सनि वा" ॥ अत्रातिस्तीर्षतीति परस्मैपदपाठो न युक्तः ॥

"लिङ्सिचोरात्मनेपदेषु" ॥ 'आत्मनेपदे परइति'। सिच एवैतद्विशेषणं न लिङः, असंभवात्, न चैवं तस्य परस्मैपदेपि प्रसङ्गः, वलादेरित्यधिकारात्, प्रावृषीष्टेत्यादावुश्चेति कित्त्वम् ॥

"ऋतश्च संयोगादेर्गुणः" ॥ उदाहरणेषु भावकर्मणोरात्मनेपदम्। 'संस्कृषीष्टेति'। समः सुटीत्यत्र संपुंकानां सो वक्तव्य इति वचनात्सत्वम् ॥

"स्वरतिसूतिसूयतिधूञूदितो वा" ॥ अत्र [1]स्वरतेरनुदात्तत्वादप्राप्ते इतरेषां तु प्राप्ते विभाषा। 'वेति वर्त्तमानइति'। इट् सनि वेत्यतः। 'लिङ्सिचोर्निवृत्त्यर्थमिति'। अन्यथा वाग्रहणसंबद्धयोस्तयोरप्यनुवृत्तिः स्यात्। 'षु प्रेरणइत्यस्य निवृत्त्यर्थं इति'। अन्यथा निरनुबन्धकत्वात्तस्यैव ग्रहणं स्यात्, एवं तर्हि सूङिति वक्तव्यमेवमपि लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणमिति सूयतेरेव ग्रहणं स्यान्न सूतेः, तस्याः परिभाषाया अस्तित्वे ऽयमेव विकरणनिर्द्देशो ज्ञापकः। 'धू विधूनन इत्यस्य निवृत्त्यर्थं इति'। अन्यथा पूर्ववत्तस्यैव ग्रहणं स्यात्। 'धुवितेति'। कुटादित्वान्ङित्त्वम्। 'स्वरतेरिति'। अस्य विकल्पस्यावकाशः स्वर्त्ता, स्वरिता, ऋद्धनोः स्यइत्यस्यावकाशः, करिष्यति, हरिष्यति, स्वरतेः स्ये उभयप्रसङ्गे विप्रतिषेधः। 'क्रिति तु प्रत्ययइति'। श्युकः। ननु चायं विकल्पो यथा एकाज्लक्षणं प्रतिषेधं बाधते तृज्रादौ, तथा क्रिल्लक्षणमपि प्रतिषेधं बाधेत, न बाधेत, कथं, येन नाप्राप्ते तस्य बाधनं भवति, तस्मादपवादता तावदेकाज्लक्षणमेव प्रतिषेधं प्रत्यस्य भवति, क्रित्युभयप्रसङ्गे पुरस्तात्प्रतिषेधकाण्डकरणात्प्रतिषेध एव भवति, लिङ्गाच्च, यदयं स्वृयूर्णुभरज्ञपिसनामिति विकल्पं शास्ति, अन्यथा अनेनैव सत्यपि विकल्पस्य सिद्धत्वात्पुनस्तं न

१ स्वरतेरनुदात्तत्वादप्राप्तविभाषा, इतरेषां तु प्राप्तविभाषेति दे॰ पु॰ पा॰ ।

विदध्यात्, वृत्तौ तु विप्रतिषेधशब्देनापि पुरस्तात्प्रतिषेधकाण्डकरणमेव विवक्षितं, समानफलत्वात् ॥

"रधादिभ्यश्च" ॥

रधिर्नशिस्तृपिदृपी द्रुहिष्णुहिमुहिष्णिहि ।
रधादयोमी पठिता दिवादिष्वष्ट कृष्टिभिः ॥

'नंष्टेति'। मस्जिनशोर्झलीति नुम्, तृपिदृप्योरनुदात्तस्य चर्दुपधस्येति पक्षे अमागमः, द्रोढेत्यादौ 'वा द्रुहमुहष्णुहष्णिहा'मिति घत्वढत्वे। 'क्रादिनियमादिति'। ननु च प्रतिषेधस्यासौ नियमः, न च रधादौ कस्य चित्प्रत्ययाश्रयः प्रकृत्याश्रयो वा प्रतिषेधः प्राप्नोति, ययोरपि प्राप्नोति तृपिदृप्योस्तयोरपि प्रतिषेधे लिट्यनेन व्यावर्तितेप्ययं विकल्पः स्यादेव, विकल्पस्यानियतत्वात्। एवं मन्यते। यावान्कश्चिदिडभावः प्रतिषेधनिबन्धनो विकल्पनिबन्धनो वा तस्य सर्वस्य क्रादिसूत्रेण नियम इति, एवं चोत्तरग्रन्थे प्रतिषेधनियमस्येत्यभावनियमस्येत्येवार्थो द्रष्टव्यः। 'अपर इति'। ननु चास्तु प्रतिषेधस्य प्राबल्यं, किमायातं, नियमस्य प्रतिषेधविषयत्वान्नियमस्यापि प्राबल्यमित्यदोषः। 'नित्यमिटा भवितव्यमिति'। प्रतिषेधाधिकारेण क्रादीनामेव लिटि इण्न भवतीति नियमे विज्ञायमाने धात्वन्तरेषु यावान्कश्चित्प्रतिषेधः स सर्वो मा भूत्, विकल्पस्तु कस्मान्न स्यादिति ॥

निरः कुषः॥'निष्क्रोष्टेति'। इदुदुपधस्य चाप्रत्ययस्येति षत्वम्। 'निसइति वक्तव्यइति'। प्रादिषु हि निसिति पठ्यते, तथा च निसस्तपताविति निर्देशइति भावः,किमेतस्य ज्ञापने प्रयोजनमित्यत आह। 'तस्येति'। ननु च नित्य एव रुत्वे कृते लत्वं भविष्यति, तत्राह। 'निसो हीति'॥

"इण् निष्ठायाम्" ॥ इडिति वर्त्तमाने पुनरिड्ग्रहणं किमित्यत आह। 'इड्ग्रहणं नित्यार्थमिति'। नन्वारम्भसामर्थ्यादेव नित्यमिड्भविष्यति, विकल्पस्य पूर्वेणैव सिद्धत्वादित्यत आह। 'आरम्भो हीति'। यदि तर्हि नित्यार्थमिड्ग्रहणं क्रियते उत्तरत्रापि नित्य एव विधिः स्यादित्यत आह। 'अत्रैवेति' ॥

"तीषसहलुभरुषरिषः" ॥ 'इषु इच्छायामित्यस्येति'। तौदादिकस्य। 'प्रेषितेति'। एङि पररूपम्। 'उदितं पठन्तीति'। धातुपाठे इच्छार्थमुदितं पठित्वा इहाप्युकारोपादानेन तस्यैव ग्रहणं वर्णयन्तीत्यर्थः। इदमेव चोदित्त्वस्य प्रयोजनं क्त्वायामिड्विकल्पस्यानेनैव सूत्रेण सिद्धत्वात्। ये तूदितं न पठन्ति ते सहिना साहचर्यादिच्छार्थस्य ग्रहणमाहुः। उभयोरप्यकारमात्रं विकरणइति। यथा तु वार्तिकं तथा क्रैयादिकस्याप्यत्र ग्रहणमिष्यते, यदाह, इषेस्तकारे श्यन्प्रत्ययात्प्रतिषेध इति, तन्मते त्रयोपि निरनुबन्धकाः॥

"सनीवन्तर्द्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम्" ॥ 'भ्रस्जेरेकाच इति'। अयतेरुगन्तानां च सनि ग्रहगुहोश्चेति प्रतिषेधः प्राप्त इतरेषां तु नित्यमिट् प्राप्तस्तत्रेदमारभ्यते। 'अर्दिधिषतीति'। लघूपधलक्षणे गुणे अजादेर्द्वितीयस्येति धिस् इत्यस्य द्विर्वचनं, रेफस्य तु न न्द्राः इति प्रतिषेधः। 'ईर्त्सतीति'। आप्ज्ञप्यृधामीदिति ऋकारस्य रपर ईकारः, धकारेण सशब्दस्य द्विर्वचनम्, अत्र लोपोभ्यासस्य। 'बिभ्रज्जिषतीति'। भ्रस्जोरोपधयोरमन्यतरस्याम्। 'बिभ्रक्षतीति'। व्रश्चादिना षत्वं, षढोः कः सि। 'धिप्सतीति'। दम्भ इच्चेतीत्वमित्वं च, हलन्ताच्चेति कित्त्वे नलोपः, पूर्ववदभ्यासलोपः। 'यियविषतीति'। ओः पुयण्ज्यपरइत्यभ्यासस्येत्वम्। 'भृञ् इत्येतस्येति'। दीर्घान्तोयं, तथा च भर इत्यब् भवति। 'सिसनिषतीति'। स्तौतिण्योरेवेति नियमादत्र षत्वाभावः। 'सिषासतीति'। षत्वभूते सनि नियमादत्र षत्वम्। 'के चिदत्रेति'। ये त्वेतच्च पठन्ति ते उपसंख्यानमारभन्ते। 'तितांसतीति'। तनोतेर्विभाषेति पक्षे दीर्घत्वम्। 'पित्सतीति'। सनि मीमाघ्वित्यादिना अच इस्, स्कोः संयोगाद्योरिति सलोपः, पूर्ववदभ्यासलोपः। '[१]दिदरिद्रासतीत्येके, दिदरिद्रिषतीति चेति'। इट्पक्षे दरिद्रातेराकारलोपः॥

"क्लिशः क्त्वानिष्ठयोः" ॥ 'क्लिशित्वेति'। मृडमृदेत्यादिना

१ एषं पाठो मुद्रितमूलपुस्तके नास्ति।

क्त्वम् । 'विकल्पः सिद्ध एवेति' । उदित्त्वात्स्वरत्यादिसूत्रेण, किमर्थं तर्हि क्त्वाग्रहणमित्यत आह । 'क्लिश उपतापइत्यस्येति' ॥

"वसतिक्षुधोरिट्" ॥ 'उषित्वेति' । पूर्ववत्कित्त्वं, यजादित्वात्संप्रसारणं, शासिवसीत्यादिना षत्वम् । 'वस्त्वेस्त्विति' । वस आच्छादनइत्यस्य यङ्लुङ्निवृत्त्यर्थोपि शपा निर्द्देशो न भवति, तत्रापि क्त्वानिष्ठयोः सामान्यलक्षणेन इड् भवत्येव, वावसितः, वावसितवान्, वावसित्वा, गणाश्रयत्वात्संप्रसारणाभावः ॥

"अञ्चेः पूजायाम् ॥ 'अचिन्ता अस्येति'। मतिबुद्धीत्यादिनावर्त्तमाने क्तः, नाञ्चेः पूजायामित्युपधालोपप्रतिषेधः, क्तस्य च वर्त्तमाने इति कर्त्तरि षष्ठी ॥

"लुभो विमोहने" ॥ 'लुभित्वा लोभित्वेति'। रलो व्युपधादित्यादिना कित्त्वविकल्पः ॥

"से ऽसिचि कृतचृतच्छृदतृदनृतः" ॥ सइत्यकार उच्चारणार्थः, असिचीति प्रतिषेधात्, तेन स्येप्ययं विकल्पो भवति, कृती छेदने मुचादिः, कृती छेदने रुधादिर्द्वयोरपि ग्रहणम्, इदित्त्वस्य प्रयोजनमुक्तं, चृती हिंसाग्रन्थनयोः, उच्छृदिर्दीप्तिदेवनयोः, उतृदिर् हिंसानादरयोः, नृती गात्रविक्षेपे, ईदित्त्वं पूर्ववत् ॥

"गमेरिट् परस्मैपदेषु" ॥ संगंस्यतइति'। समो गम्यृच्छीत्यात्मनेपदम् । 'गमेरिडादेशस्येति'। तेन संजिगंसतइत्यत्र न भवतीति भावः । 'आत्मनेपदेन समानपदस्यस्येति'। इह तु जिगमिषितेवाचरति जिगमिषित्रीयतइति बहिरङ्गत्वादात्मनेपदस्य प्रतिषेधाभावः, एतच्च प्रश्नवित्रीयतइत्यत्र वार्त्तिककारमते व्याख्यातम् । 'अन्यत्र सर्वत्रैवेष्यतइति'। कथं पुनरिष्यमाणोपि लभ्यते, योगविभागात्, गमः सकारादाविड् भवतीत्येको योगः, ततः परस्मैपदेष्विति द्वितीयो नियमार्थः, तुल्यजातीयापेक्षत्वान्नियमस्यात्मनेपदविषयइणेन[1]वर्त्ततइति केचिदाहुः । अन्ये मन्यन्ते । परस्मैपदेष्विति सप्तमीनिर्द्देशादानन्तर्याश्रयणादयमर्थो

१ एव निवर्तत इति पा० इं० पु० ।

भवति, गमेरुत्तरस्य सकारादेरार्द्धधातुकस्य तिङ्क्ष्वनन्तरेषु यदीड्भवति परस्मैपदेष्वेवेति, ततश्च सङ्गंस्यतइत्यत्रैव व्यावृत्तिः स्यान्न सङ्गंसीष्टेत्यत्र, नापि संजिगंसतइत्यादौ, शपा व्यवधानात् । एकादेशे नास्ति व्यवधानम्, एकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावाद्व्यवधानमेव, संजिगंसिष्यतइत्यादौ च नैव स्यात्, तस्मादिष्टिरेवेयम् । अत एवेष्यतइत्युक्तम् । पदशेषो नाम ग्रन्थविशेषः । 'तन्मतेनेत्यादि' । अनन्तरोक्तस्य दूषणं न पुनरयं पक्षः स्थापितः, वार्तिकविरोधात् । यदाह । सिद्धं गमेरात्मनेपदेन समानपदस्यस्येट्प्रतिषेधादिति ॥

"न वृद्भ्यश्चतुर्भ्यः" ॥ बहुवचननिर्द्देशाच्चतुर्ग्रहणाच्चाद्यर्थो गम्यते ।

वृत्तिर्वृधिः शृधिः स्यन्दिश्चत्वारोमी वृतादयः ।

शृधु शब्दकुत्सायाम्, अन्ये प्रसिद्धाः, उदाहरणेषु वृद्भ्यः स्यसनोरिति परस्मैपदम् । 'चतुर्भ्य इति न वक्तव्यमिति' । किं कारणमित्यत आह । 'वृद्ग्रहणं हीति' । यदि द्युतादिपरिसमाप्त्यर्थं तत्किमायातं वृतादिपरिसमाप्तेरित्यत आह । 'तदेवेति' । अगृह्यमाणविशेषत्वादिति भावः । 'अन्तरङ्गमपीति' । अन्तरङ्गत्वं विकल्पस्यार्द्धधातुकमात्रापेक्षत्वात् । अयं तु प्रतिषेधो बहिरङ्गः, सकारादिविशेषापेक्षत्वात्, बहिर्भूतपरस्मैपदापेक्षत्वाच्च । ननु चान्येष्वपि वृत्तादिषु आर्द्धधातुकलक्षणोऽपीडन्तरङ्ग एव, अथ तस्य वचनसामर्थ्यात्प्रतिषेधस्तर्हि विकल्पस्यापि भविष्यति । नैतदस्ति । येन नाप्राप्ते तस्य बाधनं भवति, नाप्राप्तिश्चार्द्धधातुकस्येडित्यस्य न तूदिल्लक्षणस्य, यदि परंपरत्वादुदिल्लक्षणमपीटं प्रतिषेधो बाधेत, तदपि न, अन्तरङ्गबहिरङ्गयोर्विप्रतिषेधानुपपत्तेः । कथं तर्हि सत्यपि चतुर्ग्रहणे तस्य प्रतिषेध इत्यत आह । 'चतुर्ग्रहणे हीति' । सति च तस्मिन् चतुर्ष्वां प्रतिषेधेन भाव्यमिति प्रतीतिः, इतरथा संख्याशब्दाभावादेकस्य प्रतिषेधाभावेपि न कश्चिद्बाधः । 'परस्मैपदेष्वित्येवेति' । यद्येवं यत्र वृत्तादिभ्यः परस्यार्द्धधातुकस्य परस्मैपदमनन्तरं तत्रैव स्यात् वर्त्स्यतीत्यादौ, विवृत्सतीत्यादौ न स्यात्, शपा व्यवधानात् । एकादे-

शेपि कृते स्थानिवद्भावाद्व्यवधानमेव, विवृत्सिष्यति विवृत्सयतीत्यादौ प्रत्यक्षमेव व्यवधानं कृति परस्मैपदलुकि च परस्मैपदगन्धोपि नास्तीति तत्रापि न स्यादेव तत्राह । 'अत्रापीति' । [1]दृष्टिरेवेयं, विवृत्सिन्नीयतइत्यादौ चोक्त एव परिहारः ॥

"तासि च क्लृपः" ॥ उदाहरणेषु लुटि च क्लृप इति परस्मैपदम् । 'क्लृपेरपीत्यादि' । अन्यथा कल्पस्यतीत्यादावेव स्यात् न तु चिक्लृप्सिता चिक्लृप्सत्वमित्यादाविति भावः । इह तु न वृद्भ्यः पञ्चभ्यस्तासि चेति वक्तव्यं, क्लृपि ग्रहणं तु शक्यमकर्त्तुं, न च वृतादिभ्योपि तासौ प्रसङ्गः, परस्मैपदाभावात्, आत्मनेपदेन समानपदस्थत्वाच्च ॥

"अचस्तास्वत्थल्यनिटो नित्यम्" ॥

यस्थलि क्रादिनियमादिट् प्राप्तः स निषिध्यते ।
पञ्चसूत्र्येत आरभ्य तास्वदित्येष इर्वेतिः ॥
उपदेशग्रहोप्यत्र वक्ष्यमाणोपक्रुष्यते ।
गुणे नित्ये[2] कृतेप्येष ऋदन्ते प्राप्नुयात्कथम् ॥

क्व नित्यमनिडित्यपेक्षायां तासेः सन्निधानात्तत्रैवेति विज्ञायते, यद्वा पूर्वसूत्रात्तासीति वर्त्तते । 'यातेति' । तासावनिट्प्रदर्शनार्थमुपन्यस्तम् । 'लूत्वेति' । तास्वदित्यनुच्यमाने यत्र क्वापि नित्यानिट्स्थलि प्रतिषेधः स्यात्, लुनातिश्चायं श्र्युकः किंतीति प्रतिषेधात्क्तिति नित्यानिट्कः । 'ययिव, ययिमेति' । आतो लोप इटि च । 'अनिड्ग्रहणं नित्यमित्यनेन विशेषणार्थमिति' । असत्यनिड्ग्रहणे नित्यमित्यनेन प्रतिषेध एव विशेष्येत नित्यमिण्न भवतीति । यद्यप्यत्र विकल्पो न प्रकृतस्तथापीदमेव नित्यग्रहणं पूर्वस्य विधेरनित्यत्वं ज्ञापयेत् । सेड्निवृत्त्यर्थं त्वनिड्ग्रहणं न भवति, कथं, तास्वदित्युच्यते, यथा तासौ न भवति एवं थल्यपीति, न च यस्तासौ सेट् तस्य थलि प्रतिषेधो भवन् तास्वत्कृतो भवति । 'विधोता विधवितेति' । स्वरत्यादिसूत्रेण तासा-

१ दृष्टिरेवेयमित्यारभ्य अन्यथेत्येतत्पर्यन्तो ग्रन्थ ई॰ पु॰ नास्ति ।
२ आद्गुणेपि कृतइति ई॰ पु॰ पाठः ।

विड्विकल्पितः, क्रमेरपि चक्रमिथेति भाव्यं, नहि तासौ नित्यानिट् क्रमिः, आत्मनेपदे इडभावात्परस्मैपदे सेट्त्वात्। 'तासौ विभाषेट स्थलि नित्यमिडागमो भवतीति'। यावान्कश्चिदिडभावः प्रतिषेधनिबन्धनो विकल्पनिबन्धनो वा स सर्वः क्रादिसूत्रेण नियम्यतइत्यस्मिन्पक्षइति भावः। यदा तु प्रतिषेधाधिकारेण क्रादीनामेवेण् न भवतीति नियमात्प्रतिषेध एव सर्वो निवर्तते स्वरत्यादिलक्षणस्तु विकल्पो भवत्येवेतिपक्षस्तदा विदुधोथ विदुधविथेत्युभयं भवति, यद्येवं नित्यमनिट इति न वक्तव्यमस्तु यस्तासौ विकल्पितेट् तस्याप्ययं प्रतिषेधः, अतो भारद्वाजस्येति नियमाद्विकल्प एवावस्थास्यते, नैवं शक्यं, स्वरतौ हि दोषः स्यात्। भारद्वाजपक्षेपि तस्य प्रतिषेधात् सस्वर्थेत्येव स्यात्, यदा तु विकल्पितेटस्थलि प्रतिषेधोयं न भवति तदा सस्वर्थ सस्वरिथेत्युभयं भवति। 'तास्वदिति वतिनिर्देश इति'। तास्वदित्यस्य वत्यन्तस्य निर्देश इत्यर्थः। तास्वदित्यनुच्यमाने प्रकृतस्य तासीत्यस्यानुवृत्तावप्येतावदेव लभ्येत तासौ नित्यमनिटस्थलीण् न भवतीति, ततश्च यस्तासावसन् असत्त्वादेव नित्यानिट् तस्यापि प्रसज्येत,

तास्वदित्युच्यमाने तु वतेः सादृश्यगोचरात्।
यथा भूतस्य तासौ नेट् तथा भूतस्य थल्यपि॥
इटा न भाव्यमित्येष दोषो नैव प्रसज्यते।
इटस्तास्यसतो धातोर्निषेधे विहिते थलि॥
अभावः सदृशो न स्यात्थलि तास्यसतो भवेत्॥

'जघसिथेति'। स्थानिवद्भावादिडत्यर्तिव्ययतीनामित्येवैष सिद्ध इत्याहुः। 'उत्तरसूत्रेपीति'। एतेनोत्तरार्थं तास्वदित्युच्यतइति दर्शयति। 'अदादेशो हीति'। ननु चास्य स्थानी तासावस्ति अस्ति चानिडिति तदादेशस्यापि स्थानिवद्भावात्सत्त्वानिट्त्वे स्यातां, नैतदस्ति। स्थानिवद्भावः शास्त्रीयेषु प्रवर्त्तते, न च तासौ सत्त्वं नाम शास्त्रीयं कार्यम्॥

"उपदेशे ऽत्वतः"॥ अनजन्तार्थ आरम्भः। 'इयष्टेति'। लिट्यभ्यासस्योभयेषामिति अभ्यासस्य संप्रसारणं, व्रश्चादिषत्वम्। 'चकर्षि-

षेति’। कृष विलेखने, भवत्ययं गुणे कृते संप्रत्यकारवान् न तूपदेशे। ‘जिघृक्षिषेति’। सनि ग्रहगुहोश्चेतीट्प्रतिषेधाद्भवत्ययं सनि नित्यानिट् न तासौ। ‘आनञ्जिषेति’। अत आदेः, तस्मान्नुड्द्विहलः, स्वरत्यादिसूत्रेण तासौ विकल्पितेडयम्॥

“ऋतो भारद्वाजस्य” ॥ ‘सस्मर्थेति’। स्मृ चिन्तायाम्। ‘दध्वर्थेति’। ध्वृ हूर्छने। ‘सिद्धे सतीत्यादि’। अदन्तानां वृङ्वृञावुदात्तौ, तत्रापि वृङ स्यात् न सम्भवति आत्मनेपदित्वात्। वृञस्तु ववर्थेति निपातनाद्भाषायामिटा भाव्यं, तस्मात्तयोरिट्प्रतिषेधार्थं तावदेतन्नोपपद्यते, अन्येऽदन्तास्तासौ नित्यानिट इत्यचस्तास्वदित्यनेनैव सिद्धः प्रतिषेधः। ननु च परत्वाद्गुणे कृते रपरत्वे चानजन्तत्वान्न सिद्ध्यति, पूर्वसूत्रेणाप्यसिद्धिरेव, ह्यकारान्ता उपदेशे ऽत्वन्तः तस्मान्नियमानुपपत्तिः। अस्तु तर्हि दध्वर्थेत्यादौ विध्यर्थमेव, यद्येवं स्यायापचिप्रभृतिषु पूर्वयोगाभ्यां नित्यं थलि प्रतिषेधप्रसङ्गः, जहर्थेत्यादौ भारद्वाजस्येति वचनाद्विकल्पप्रसङ्गः, [1]एवं तर्ह्यचस्तास्वदित्यत्रैव भारद्वाजग्रहणं करिष्यते, तदेवानन्तरयोगेप्यनुवर्तिष्यते, इह तु निवर्तिष्यते, सत्यम्, अयं तु भारद्वाजः स्वस्मान्मतात्प्रच्यावितो भवति, तस्य मतमृकारान्तादन्यत्र ययिथ पेचिथेतीड्भवति ऋकारान्ते नेति, त्वदुक्ते तु न्यासे मतविपर्ययः कृतो भवति, एवं तर्ह्युपदेशग्रहणस्याचस्तास्वदित्यत्रापकर्षादुपदेशेजन्तत्वात्सिद्धः प्रतिषेध इति मन्यते, ‘ऋत एव भारद्वाजस्येति’। विपरीतस्तु नियमो न भवति ऋतो भारद्वाजस्यैवेति, यदि स्यान्नियमाश्रयणमनर्थकं स्यात्पूर्वोक्तेन प्रकारेण विध्यर्थत्वमेवाश्रयणीयं स्यात्। ‘पूर्वयोर्योगयोरिति’ ऋकारान्तेष्वनन्तरस्य योगस्याप्राप्तत्वादनन्तरस्य विधिर्वा भवतीति न्यायस्य तावदसम्भवः, यस्य तर्हि प्रसङ्गोचस्तास्वदिति तस्यैव नियमो युक्तस्तत्कथं पूर्वयोर्योगयोर्द्वयोरपि विकल्पः, एवं मन्यते द्वयोरनन्तरमस्यारम्भात्तासौ नित्यमनिटां मध्ये ऋत एव भारद्वाजस्य

१ एवं तर्हीत्यारभ्यैवं तर्हीत्यन्तो ग्रन्थः ह॰ पु॰ नास्ति।

नान्येषामित्येवं [1]सामान्याकारेण नियम आश्रयणीय इति। 'तथा हि सतीति'। [2]असति तपरकरणे ऋकारान्तानामप्यत्र ग्रहणं स्यात्तेषां च तासौ सिद्धत्वादचस्तास्वदित्यस्याप्रसङ्गे विध्यर्थमेवेदं स्याच्च ह्रस्वग्रहणेन नियमार्थं, विधिनियमसम्भवे विधेरेव ज्यायस्त्वादित्यर्थः॥

"विभाषा सृजिदृशोः"॥ 'ससष्ठ दद्रष्ठेति'। सृजिदृशोर्झल्यमकिति, पूर्ववत्षत्वम्।

"इडत्त्यर्त्तिव्ययतीनाम्"॥ 'अत्र इड्ग्रहणं विस्पष्टार्थमिति'। अथ विकल्पे प्राप्ते नित्यार्थं कस्मान्न भवति तत्राह। 'विकल्पविधाने हीति'। एवमपि प्रतिषेधः प्रकृतस्तन्निवृत्त्यर्थमिड्ग्रहणं स्यादत आह 'प्रतिषेधविधाने इति'॥

"वस्वेकाजाद्घसाम्"॥ वस्वित्यविभक्तिको निर्द्देशः, वसोरित्यर्थः। 'कृतद्विर्वचनानामिति'। कथं पुनरविशेषोक्तावेष विशेषो लभ्यते, [3]एकाज्ग्रहणसामर्थ्यात्, नहि कश्चिदकृते द्विर्वचनेनेकाजस्ति यन्निवृत्त्यर्थमेकाज्ग्रहणं स्यात्, चिरिजिरिचकाशिभ्यः कास्यनेकाज्ग्रहणं चुलुम्पाद्यर्थमित्यामा भवितव्यमिति वसोरसम्भवः, ऊर्णोतेस्तु गुणवृद्ध्यभावादेकाज्ग्रहणेनानिवृत्तिः। ननु च जागर्त्तिरस्ति, उषविदजागृभ्योन्यतरस्यामित्यामो विकल्पितत्वात्, वेदेपि जागृवांसो अनुग्मन्निति द्विर्वचनप्रकरणे छन्दसि वेति वक्तव्यमिति द्विर्वचनाभावः, नैकमुदाहरणमेकाज्ग्रहणं प्रयोजयति यद्येतावत्प्रयोजनं स्याज्जागर्तेर्नेत्येव ब्रूयाल्लघीयसी हि साक्षात्प्रतिषेधप्रतिपत्तिः, यदि वा न्यायसिद्धोयमर्थः। तथाहि। द्विर्वचनस्यावकाशः पपाच, इटोवकाशः यत्र कृते द्विर्वचनएकाच् पेचिवान् आदिवान्, बिभिद्वानित्यादौ तूभयप्रसङ्गे नित्यत्वाद् द्विर्वचनम्। 'क्रादिनियमात्प्राप्त इति'। नेड्वशिकृति इति प्रत्ययाश्रयस्य प्रतिषेधस्य सर्वत्र भावात्क्रादिनियमादेव सर्वत्र वसोरिटः प्राप्तिः। 'आद्ग्रहणमनेकाजर्थमिति'। ननु द्विर्वचने आकारलोपे सति

१ सामानाधिकारेणेति इं॰ पु॰ पाठः।
२ असतीत्यारभ्य विभाषा सृजिदृशोरित्यन्तो ग्रन्थः इं॰ पु॰ त्रुटितः।
३ लभ्यतइति पा॰ इं॰ पु॰।

तेषामप्येकाच्त्वादेव सिद्धमत आह । 'द्विर्वचने हीति'। इणिनमित्त आकारलोपो नासति तस्मिन्भवति, ततश्चानेकाच्त्वमित्यर्थः। 'अथाप्याम्न क्रियतइति'। 'आत औ णल' इत्योकारे विधातव्ये औकारविधानेन ज्ञापितमेतत् दरिद्रातेरनित्य आमिति, तेनायमभ्युपगमः ददरिद्रवानिति, नेड्वशिकृतीति प्रतीषेध एव तत्र भवति, अथ घसिग्रहणं किमर्थं यावता द्विर्वचने कृते घसिभसोर्हलि चे'त्युपधालोपे सत्येकाच्त्वादेव सिद्धमत आह। 'घसेरपीति'। 'परत्वादिति'। नित्यत्वाच्चेत्यपि द्रष्टव्यं, तस्य हल्यपि विधानात्। 'अनच्कत्वादिति'। स्थानिवद्भावोपि नास्ति हल्निमित्तत्वादुपधालोपस्य। क्रियमाणे तु घसिग्रहणे नायं दोष इत्याह। 'क्रियमाणे त्विति'॥

"विभाषा गमहनविदविशाम्"॥ 'जघ्निवान् जघन्वानिति'। 'हो हन्तेर्ञ्णिन्नेषु'। 'अभ्यासाच्चे'ति कुत्वम्। 'विशिना [1]तौदादिकेनेति'। यद्यप्यादादिकेन हन्तिना साहचर्यमस्ति तथापि शब्दपरविप्रतिषेधाद्विशिसाहचर्यमेव व्यवस्थापकमिति भावः। 'ज्ञानार्थस्य त्विति'। सत्ताविचारणार्थयोस्त्वात्मनेपदित्वात् क्वसावसंभव एवेति भावः। 'विद्वानिति'। पूर्ववदिट्प्रतिषेधः॥

"सनिंससनिवांसम्"॥ क्वसोश्छान्दसत्वादानुपूर्व्याश्च विवक्षितत्वाच्छन्दस्येवैतन्निपातनम्॥

"ऋद्धनोः स्ये"॥ स्वरत्यादिसूत्रे यदुक्तं स्वरतेरेतस्माद्विकल्पादित्यादि तदेव स्मारयति। 'स्वरतेर्वेट्त्वादिति'। वा विकल्पित इड्यस्य स वेट् तस्य भावो वेट्त्वं, स पुनर्विकल्पितेट्सम्बन्धः॥

"यमरमनमातां सक् च" 'व्यरंसीदिति'। व्याङ्परिभ्यो रम इति परस्मैपदं युक्तमत्र, द्विवचनबहुवचनयोरुदाहरणं, तत्र हि सगिटोः सतोरस्ति विशेषः, एकवचने त्वयुक्तं विशेषाभावात् तत्राह। 'यमादीनामिति'। छन्तत्वेत्यत्रापीटीति वर्त्तते, अपासीदित्येतत्तु प्रक्रमाभे

[1] तौदादिकेनेति मुद्रितमूल पुस्तके नास्ति।

दायोदाहृतं नत्वत्र विशेषोऽस्ति, ननु चात्रापि स्वरे विशेषोऽस्ति माहिमासीदिति, इट्यसत्याद्युदात्तं पदं स्यात्, सति तु तस्य सिज्भक्तत्वाच्चित्स्वरेणोदात्तत्वे 'एकादेश उदात्तेनोदात्त' इत्यन्तोदात्तं पदं भवति, 'तत्रादिःसिचोऽन्यतरस्या'मिति पक्षे आद्युदात्तत्वं पक्षे ऽन्तोदात्तत्वं, नैषोऽस्ति विशेषः, अनिटः सिचः पक्षउपसंख्यानमिति वचनान्माहिकार्षमित्यत्र यथा पक्षे आद्युदात्तत्वं पक्षे चान्तोदात्तत्वं च भवति एवमत्रापि भविष्यति। 'आयंस्तेति' 'समुदाङ्भ्यो यमोऽग्रन्थ' इत्यात्मनेपदं, अनंस्तेत्यत्र कर्मकर्त्तरि 'न दुहस्नुनमां यक्चिणाविति' चिणः प्रतिषेधः॥

"स्मिपूङ्रञ्ज्वशां सनि"॥ ऋ इति धातोर्ग्रहणं न ऋकारान्तानाम्, उत्तरत्र किरादीनामिड्विधानात्। 'पिपविषतइति'। 'ओः पुयण्ज्यपरे' इत्यभ्यासस्येत्वम्। 'अञ्जिजिषतीति'। 'अजादेर्द्वितीयस्येति जिशब्दस्य द्विर्वचनं, नकारस्तु न द्विरुच्यते न न्द्रा इति प्रतिषेधात्॥

"किरश्च पञ्चभ्यः"॥ किर इति व्यत्ययेनैकवचनं, पञ्चभ्य इति बहुवचनादाद्यर्थावगतिः, कृगृदृङ्धृङ्प्रच्छतयस्तुदादिषु किरादयः। 'पिपृच्छिषतीति'। रुदविदेत्यादिना सनः कित्त्वं, ग्रहिज्यादि सूत्रेण संप्रसारणम्। 'किरतिगिरत्योरिति'। शेषाणां त्वनुदात्तत्वात्प्रतिषेधः। 'दीर्घत्वं नेच्छन्तीति'। इष्टिरेवेयम्॥

"रुदादिभ्यः सार्वधातुके"॥ रुदिस्वपश्वसनिजक्षिरधादिषु रुदादयः। उभयनिर्देशे पञ्चमीनिर्देशो बलीयानिति रुदादिभ्य इति पञ्चम्या सार्वधातुकइति सप्तम्याः षष्ठी प्रकल्प्यते, सप्तमीनिर्देशस्तूत्तरत्रोपयोगं यास्यति। 'प्राणितीति'। 'अनिते'रिति णत्वम्। 'स्वपितीति'। अन्येभ्यस्तु परस्यार्द्धधातुकस्येटा भवितव्यम्॥

"ईशः से"॥ ईश ऐश्वर्ये आदादिकः, से इत्यविभक्तिको निर्द्देशः। 'ईशिष्वेति'। 'सवाभ्यां वामौ'। एकदेशविकृतस्यानन्यत्वात्सेशब्द एवायम्॥

"ईडजनोर्ध्वे च"॥ ईड स्तुतौ अदादिः। 'छान्दसत्वाच्छ्नेोलुगि त'। भाषायां तु जायस इत्यत्र नित्यत्वात् श्यनि कृते तेन व्यवधा-

नादिडभावः। 'जन जनने इत्यस्यापीति'। नन्वसौ परस्मैपदी तत्राह। 'तस्य कर्मव्यतिहार इति'। यदि तर्हि तस्याप्यात्मनेपदं संभवति तस्यैव ग्रहणं प्राप्नोति, निरनुबन्धकत्वात्। ईडिना साहचर्यादात्मनेपदिनोपि ग्रहणं भविष्यति। 'तदर्थं केचिदिति'। ये त्वेवं न पठन्ति ते चकारेण कृत्स्नमेव पूर्वसूत्रमनुवर्त्तयन्ति। 'सकारादेरिति'। स् इति सप्तम्या लुका निर्द्दैशात्तदादिविधिः, यदि तर्हि ईशेरपि ध्वे शब्दे इडागमो भवति, योगविभागो न कर्त्तव्यः, ईडीशजनां सेध्वयोरिति वक्तव्यम्, एवं हि पृथग्विभक्तिर्नोच्चारयितव्या भवति, चकारश्च न कर्त्तव्योऽत आह। 'ईशीड्जनां सेध्वयोरिति'। 'लङि ध्वमित्यस्य न भव[1]तीति'। लोट्यपि तर्हि ध्वमित्यस्य न प्राप्नोति तत्राह। 'लोटि पुनरिति'॥

"लिङः सलोपोऽनन्त्यस्य"॥ 'सार्वधातुके यो लिङिति'। नैषा परसप्तमी, सार्वधातुकपरस्य लिङो ऽसंभवात्, तस्मान्निर्धारणे सप्तमी। जातावेकवचनं, सार्वधातुकेषु मध्ये यो लिङ् सार्वधातुकसंज्ञकस्तस्येत्यर्थः। 'कुर्यादिति'। अत उत्सार्वधातुक इत्युत्वं, ये चेत्युकारस्य लोपः, अत्र यासुट्सुटोः सकारस्य लोपः। 'कुर्युरिति'। झेर्जुस्, यासुट्सकारलोपः, उस्यपदान्तादिति पररूपत्वम्। 'कुर्वीतेति'। सीयुट्सुटोः सलोपः। 'कुर्वीरन्निति'। झस्य रन्, अत्र सीयुट एव लोपः॥

"अतो येयः"॥ सार्वधातुक इति प्रकृतमर्थात् षष्ठ्यन्तं सम्पद्यते तदाह। 'अकारान्तादङ्गादुत्तरस्य सार्वधातुकस्येति'। अवयवसम्बन्धे चैषा षष्ठी, सार्वधातुकस्यावयवस्य याशब्दस्येत्यर्थः। 'इय् इत्ययमिति'। सूत्रे त्वकार उच्चारणार्थः। 'पचेदिति'। इयादेशे कृते शबकारेण सहाद्गुणः, वलादिषु वलि लोपः, यकारस्य च श्रवणं पचेयुः पचेयमित्यादौ। 'पचेयुरित्यत्रेत्यादि'। पररूपस्यावकाशः चिनुयुः सुनुयुः,[2] इयादेशस्य तु पचेदित्यादि। पचेयुरित्यत्रोभयप्रसङ्गे परत्वादियादेशः, यदि पूर्वमेव पररूपं स्यात् याशब्दाभावादियादेशो न स्यात्। 'एवमतो लोपस्यापि बा-

१ भवितव्यमिति मुद्रितमूलपुस्तके पाठः।
२ सुनुयुरिति नास्ति ई॰ पु॰।

(*a*) Here the mention of the names व्रीडा, &c.

The proper reading would be

"व्यानम्रा दयितानने मुकुलिता मातङ्गचर्माम्बरे
सोत्कम्पा भुजगे निमेषरहिता चन्द्रेऽमृतस्यन्दिनि ।
मीलद्भ्रूः सुरसिन्धुदर्शनविधौ म्लाना कपालोदरे-"

[*Page* 491.] (2) The mention of the *Rasas*, either by their generic name as रसं, or specifically as शृङ्गार, &c.

To exemplify respectively—

"तामनङ्गजयमङ्गलश्रियम् किञ्चिदुच्चभुजमूललोकिताम् ।
नेत्रयोः कृतवतोऽस्य गोचरे कोऽप्यजायत रसो निरन्तरः" ॥

["Having seen her—the very prosperity (embodied) as it were of Cupid's auspicious victory, having the root of her arms slightly rising,—a peculiar uninterrupted *Rasa* (emotion) was produced."]

Here the word रस is not rightly used.

"आलोक्य कोमलकपोलतलाभिषिक्त-
व्यक्तानुरागसुभगामभिराममूर्तिम् ।
पश्यैष बाल्यमतिवृत्य विवर्तमानः
शृङ्गारसीमनि तरङ्गितमातनोति" ॥

["See how this young man, just passed boyhood, behaves, striking like waves as it were on the Erotic bunt,—having seen her, of handsome form, looking beautiful owing to the affectionate blush on her tender cheeks."]

Here we have the "Erotic" mentioned by name.

[*Page* 492]. To exemplify ('the mention by name') of the Permanent Sentiments—

"सम्प्रहारे प्रहरणैः प्रहाराणाम् परस्परम् ।
ठणत्कारैः श्रुतिगतैरुत्साहस्तस्य कोऽप्यभूत" ॥

(*a*) The *Pradipa*.—"Here व्रीडा, &c., are mentioned by name. The *Rasa* is not properly sensed when the accessories are named; it is rightly sensed only when these are lightly suggested by their ensuants. Hence the ground of faultiness is the non-productivity of the sensing of the *Rasa*."

["A peculiar energy came to him on hearing the sound of the clashing of weapons in battle."]

Here we have the mention of उत्साह.

(*a*) To exemplify 'Far-fetched Signification of the Excitant and Ensuants.'

"कर्पूरधूलिधवलद्युतिपूरधौतदिङ्मण्डले शिशिररोचिषि तस्य यूनः ।
लीलाशिरोंऽशुकनिवेशविशेषकॢप्तिव्यक्तस्तनोन्नतिरभून्नयनावनौ सा ॥

["On the atmosphere being washed by the camphor-like brightness of the cool-rayed moon, she having her breasts peeping through the sportive position of the head-covering, became an object of vision to the young man."]

Here the substantial and enhancing excitants, capable of the Erotic, (*b*) do not clearly signify the ensuants; and in this lies its far-fetchedness.

To exemplify the 'Far-fetched Implication of Ensuants'—

[*Page* 493]. "परिहरति रतिम्मतिं लुनीते
स्खलति भृशम् परिवर्तते च भूयः ।
इति वत विषमा दशाऽस्य देहम्
परिभवति प्रसभं किमत्र कुर्मः" ॥

["He shuns pleasure, loses consciousness, frequently tumbles and rolls. Thus ah! a hard condition violently attacks his body. What should we do (How can we help it)?"]

[*Page* 494]. Here the ensuants mentioned, the 'shuning of pleasure,' &c., is the Pathetic, &c. also; hence the idea of the excitant in the shape of a woman, requires an effort to be got at.

(*a*) By 'far-fetchedness' of the signification of the excitants and emotions, is meant the delay in the manifestation of the excitants, &c., caused by their comprehension depending on other Çlokas.

(*b*) The non-excitement of the emotions of the young man, if he were not a sentimental youth, is quite possible even in presence of such exciting agencies as the moon, &c.; consequently before comprehending the ensuant mentioned here, to be of the Erotic, we must first of all assume the sentimentality of the youth; and then we would get at the true significance of the ensuant.

To exemplify the 'Admission of Conflicting Excitant and Accessory'—

"प्रसादे वर्तस्व प्रकटय मुदं सन्त्यज रुषम्
प्रिये शुष्यन्त्यङ्गान्यमृतमिव ते सिञ्चतु वचः ।
निधानं सौख्यानां क्षणमभिमुखं स्थापय मुखं
न मुग्धे प्रत्येतुं प्रभवति गतः कालहरिणः" ॥

["Be propitiated, O my Love! exhibit a gaiety, give up anger. Let thy nectar-like voice water my withering body. Keep your face, the very receptacle of felicity, before mine for a moment. O lovely damsel! past opportunities never come again."]

Here we have got an *excitant*—the mention of the impermanence of sensuous pleasures,—and an accessory—self-disparagement;—both of which are concomitants of the *Quietistic Rasa,* which is quite the contrary of the Erotic, which is meant to be described in the Çloka quoted.

To exemplify the Conflicting Ensuant,—

"णिहुअरमणम्मि लोअणपहम्मि पडिए गुरुअणमज्झम्मि ।
सअलपरिहारहिअआ वणगमणं एव्व महइ वहू" ॥

["Her sight having fallen on her paramour, while she was among her superiors, she at once wishes to repair to the forest, having her heart away from all household duties."]

Here, the renunciation (of all household duties) and repairance to the forest are ensuants of the Quietistic. If, however, it be explained as that she wishes to repair to the forest and there meet him, on pretence of fetching fuels, &c., then there is no fault.

(*a*) As an example of "frequent heightening," we haveRati's lamentations in the *Kumāra-Saṁbhava.*

[*Page* 496]. "Unseasonable introduction" is exemplified in the *Vēṇīsaṁhāra,* where on the occasion of the death of inumerable heroes, we meet with a description of the erotic with reference to Duryodhana in the company of Bhānumati.

(*a*) Explained as 'resuming after interruptions.'

As an example of the "unseasonable Interruption or Cessation," we have, in the *Mahāviracharita*, Rāma saying 'I go to remove the Kankana' at a time when the heroism of both Rāma and Bhārgava have been raised to the highest pitch.

[*Page* 497]. As an example of "expansion, *i. e.* profuse description of the subordinate element," we have, that of Hayagríva in the *Hayagríva-vadha.*

As an instance of the "Neglect of the Principal Element," we have in the Fourth Act of *Ratnāvalī*, the overlooking of Sāgarikā on the arrival of Vābhravya.

Characters are firstly *divine*, *non-divine* (human) and humo-divine. These again are—*firm* and *temperate*, *firm* and *haughty*, *firm* and *gay*, and *firm* and *mild.* These four have for their predominating elements the *Rasas*, Heroic, Furious, Erotic, and Quietistic, respectively. These again are subdivided into *Best*, *Medium* and *Worst.* Then Love, Laugh, Grief and Wonder, are applicable to the *divine* characters, as to the *best human.* But Love, in the shape of erotic enjoyment, is not to be described with regard to the Best Divine,—this description being as improper as the erotic delineation of the company of one's parents.

In "क्रोधं प्रभो संहर संहरेति यावद्गिरः खे मरुतां चरन्ति ।
तावत् स वह्निर्भवनेत्रजन्मा भस्मावशेषम्मदनं चकार" ॥

[*Kumārasambhava*, Canto III.]

["By the time that the words of the Gods 'give up wrath, O Lord,' are uttered, the fire, produced of Hara's third eye, reduced Madana to ashes."]

We have wrath, manifested in the curving of the brows, &c., producing its effect immediately. The delineation of such wrath,—as also of such superhuman feats of energy as *walking over the three worlds* and *jumping over the ocean and the like,*—is proper only in the case of a Divine Character. In the *non-divine* or *human,* only so much should be described as is known to be reasonably a fact, or can be attributed to humanity.

If more than this is described, the delineation appears false on the very face of it; and as such does not develop into an exhortation in the form that one should behave like the hero, not like the anti-hero!

Both of the above may be delineated in the *humo-divine.* The delineation perverting these properities with regard to the Divine, &c., as also to the, *firm, temperate, &c.*, is what is meant by the "perversion of characters."

The following forms of address are proper—**तत्र भवन्** (Honoured Sir!) and **भगवन्** (Revered Sir!) to be used by the 'Best,' and never by the Lowest, and then too with reference to Rishis, not kings; **भट्टारक** (Lord, Protector) to be used, never by the Best, with reference to kings. Non-adherence to these rules would also lead to the fault of "perversion of characters." Similarly, dress, action, &c., are to be described in such a way as to be in keeping with Place, Time, Age, Caste, &c.

As an example of the "celebration of an unimportant object," *i. e.* that which does not help the development of the *Rasa*, we have the mention of kings praising the description of the spring, made by the Bard, neglecting those made by himself or by the heroine.

"*Such—like others*"—*e. g.* the anger of the hero on being kicked by the heroine, &c.

The author of the Dhwani has said—

"There is no other cause of the breach or interruption of *Rasa*, save impropriety; the secret of *Rasa* is, simply, propriety of delineation."

[*Page* 501]. The above cease to be faults in some instances. And this is now shown.

63 (*contd.*) (*a*) Sometimes the mention by name of the accessory is no fault.

Exception to the above.

(*a*) *i. e.* When the ensuant is not peculiar to itself, but equally attributable to others as well.

e. g. "औत्सुक्येन कृतत्वरा सहभुवा व्यावर्तमाना ह्रिया
तैस्तैर्बन्धुवधूजनस्य वचनैर्नीता ऽभिमुख्यम् पुनः" ॥
दृष्ट्वाऽग्रे वरमात्तसाध्वसरसा गौरी नवे सङ्गमे
संरोहत्पुलका हरेण हसता श्लिष्टा शिवायास्तु वः" ॥

[*Ratnāvalī*, Act I.]

["Hastening through anxiety, turned aside through natural modesty, made face to face by the exhortations of the female friends; and showing some fear, on seeing her husband, may Gauri on the occasion of her first meeting, embraced by smiling Çiva, ordain your prosperity!"]

Here the mere mention of the ensuant, Haste, &c. (*a*) could not give the sense given by the mention of the names of Anxiety, &c.

For the same reason also in दूरादुत्सुकम् &c. [*Text*, p. 98] उत्सुक is named because the implication thereof could not be got at by the mere mention of its ensuant, *hasty departure*; though that of Modesty, Love, &c. is got at by means of the mention of their respective ensuants: *viz.* "turning aside" &c.

63 (*concld.*) The mention of conflicting accessories, &c. (accessories conflicting with the predominating sentiment) as suppressed, is an excellence.

The negative mention is not a great fault; on the other hand, it tends only to develop the predominating *Rasa,—e. g.* क्वाकार्यम्, &c. (*Text*, p. 135); where the accessories Reasoning &c. are made to end in *painful reflection,*—and as such only tend to develop the predominating sentiment.

In पाण्डु क्षामं वदनं हृदयं सरसं तवालसं च वपुः ।
आवेदयति नितान्तं क्षेत्रियरोगं सखि हृदन्तः ॥

(*a*) The accessory Anxiety has got no peculiar ensuant exclusively of its own, by which it could be implied; Hastiness &c. mentioned here are not peculiar to it; since they may be consequent upon superior's commands, &c.

["O friend! thy face is pale and lean, heart full of substance (sentiment), and thy body languid,—all these are symptoms of kshetriya-roga (an incurable disease)."]—*paleness &c.* are common to (the Erotic and the Pathetic); and as such there (*a*) is no contradiction.

"सत्यम्मनोरमा रामाः सत्यं रम्या विभूतयः ।
किन्तु मत्ताङ्गनापाङ्गभङ्गलोलं हि जीवितम्" ॥

["Women are really heart-ravishing; riches too are really pleasing; but life itself is unsteady as the (amorous) glances of an intoxicated woman."]

Here the first-half is mentioned "as suppressed" in the latter half. The glances are known to be fickler than life; still the similarity (of life) with the *glance*, only (*b*) strengthens the Quietistic Sentiment. We have here no idea of the Erotic, (*c*) since its accompaniments are absent. Neither can the first-half be said to have been said in order to (*d*) attract the attention of the student or listener, (as declared by Vāmana),—there being no close contiguity between the Erotic and the Quietistic; nor can it be said to have been introduced for adding charm to the poetry (Vāmana's second alternative); for this could have been (better) done by means of any other *Rasa* or by mere alliteration.

Laws governing the admixture of *Rasas*.

64 [*Page* 506]. *Rasas* contradicting each other in co-location, must be attributed to (distributed among) different substrata; and those contradicting each other when in close contiguity, must be mediated by another *Rasa*.

(*a*) "Paleness &c. are ensuants of sickness; and as such they are proper for the Pathetic; and thus though in conflict with the Privative – Erotic, yet being imposed upon it and thus becoming its part and parcel, it is not a fault." So the author of the Dhwani. But this is not true: since the ensuants mentioned being common to both *Rasas*, they cannot be said to be in conflict.

(*b*) The sense being—Life is as unsteady as the glances; and the unsteadiness of life leads to the consciousness of the uselessness of the glances, &c.

(*c*) Since the glances here are not mentioned as caused by love &c., but only as supplying an instance of unsteadiness.

(*d*) The two *Rasas*—the Erotic and the Quietistic—being contradictory to each other, can never be in close contiguity; and as such no idea of the Quietistic can follow from that of the Erotic.

The Heroic and the Terrific being contradictory when in one substrata, must be distributed between the hero and his enemy. And the Erotic and the Quietistic contradicting each other when in close contiguity, a third *Rasa* must be introduced between them. As in the Nāgānanda [Act I.] the Erotic towards Malayavatī is attributed to the quietistic Jīmūtāvāhana, through the Marvellous, expressed in "what a song! what a music!" Not only in a poetical work, but in a single sentence also, the contradiction between sentiments is removed by an intermediate sentiment; *e. g.*—

"The heroic men, lying on magnificent beds in the flying cars, having their breasts perfumed by the dust of the fresh Pārijātā garlands, embraced by celestial females, and fanned by Kalpalatā-cloth, fragrant and wet;—these heroes saw their bodies fallen on the ground, pointed at by the celestial females wondering at it,—the bodies covered with dust, being embraced, as it were, by jackals, and fanned as it were by the flapping wings of the carnivorous birds dripping in blood."

Here between the Abhorrent and the Erotic, is mediated the Heroic.

65 [*Page* 509]. Of two sentiments, though contradictory,—(1) if one is remembered together with the other, (2) and if it is mentioned as of equal force with the other, (3) and if both are spoken of as subservient to a third,—in these three cases ("contradictory sentiments") is no fault.

In अयं स रशनोत्कर्षी &c. (*Text*, p. 220) the speech of Bhūriçravas' wife on seeing his arms when he lay dead in the battle-field,—the remembrance of its former state, though it is a part (the ensuant) of the Erotic, yet here it only tends to strengthen the Pathetic.

"The teeth-marks and the nail-tearings, made in your horripilating body, by the blood-thirsty (affectionate) lioness (woman) were looked at by Rishis even, with covetting eyes."

६१८

वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मे"ति, यद्येतन्निखिलजगन्नियमनं मुक्तानामपि साधारणं स्यात् ततश्चेदं जगदीश्वरत्वरूपं ब्रह्मलक्षणं न सङ्गच्छते ॥

टी० सू० जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च ॥ १७ ॥ सत्यसङ्कल्पताविचाररूपत्वात्सङ्गतिरर्थसिद्धा । जगत्सृष्ट्यादि सर्वेश्वरत्वं सर्वेश्वरत्वप्रकारो हि सृष्ट्यादिः परमपुरुषानुभवविषयं तदनुभवान्तर्गतशरीरसर्गादिविषयं किं मुक्तस्य जगद्व्यापारविषयमैश्वर्य्यमस्ति नेति ? परमसाम्यसत्यसङ्कल्पत्वश्रवणं किं मुक्तस्यैश्वर्य्यस्य जगद्व्यापारविषयत्वमवगमयितुं शक्नोति ने ? ति किं जगन्नियमनस्य मुक्तैश्वर्य्यान्तर्भावे यतो वा इमानीत्यादिब्रह्मलक्षणवाक्यं विरुद्ध्यते नेति ? किं मुक्तस्य सृष्टिप्रकरणासन्निधानेन जगद्व्यापारस्य ब्रह्मलक्षणत्वाश्रयणं न्याय्यम् ? उत मुक्तस्य विकारलोकानुसञ्चरणश्रवणेन जगन्नियमनस्य ब्रह्मलक्षणत्वाश्रयणात्र न्याय्यं, किं मुक्तस्य विकारलोकानुसञ्चरणं नियमनार्थम् ? उत केवलभोगार्थं ? केवलभोगार्थत्वे किंमुक्तस्यापरिच्छिन्नानन्दत्वविरोधः स्यादुत ? नेति, ? अत्र तदर्थो विचारस्त्रिविधः किं विकारलोकानां भोगानित्यत्वेनानन्दानित्यता स्यादुत नेति ? किं विकारलोकानां भोग्यत्वं विकारात्मत्वात् ? उत ब्रह्मविभूतित्वात् ? किञ्च किं मुक्तस्यास्वातन्त्यमानन्दवैकल्यमापादयति ? उत नेति स्वातन्त्यं अस्वातन्त्र्यरूपत्वादानन्दावहम् ? उतात्माभिमानानुरूपत्वात् । किञ्च स्वतन्त्रस्यानावृत्तिः

सू० असाधारणस्य हि लक्षणत्वं, तथा सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजतेति ब्रह्म वा इदमेकमेवाग्र आसत्तदेकं सन्नव्यभवत् तच्छ्रेयोरूपमत्यसृजत क्षत्रं यान्येतानि देवक्षत्राणीन्द्रो वरुणः सोमो रुद्रः पर्जन्यो यमो मृत्युरीशानः"

इति आत्मा वा इदमेव ऐवाग्र आसीत् नान्यत्किञ्चन मिषत् स ऐक्षत लोकान्नुसृजा इति स इमाँल्लोकानसृजत इति ।

टी० सम्भवति ने? ति किमनावृत्तिश्रुतिश्चातुर्मास्यात्तय्यफलत्वश्रुतिवच्चिराभिप्राया? उत मुख्यार्था? किं मुक्तात्मानावर्तनविषयः सङ्कल्प ईश्वरस्य न सम्भवति? उत सम्भवति? यदा न सम्भवति तदानावृत्तिश्रुतेश्चिराभिप्रायत्वेनावृत्तिसम्भवादानन्दः परिच्छिद्यते। स्वातन्त्र्यं स्वातन्त्र्यरूपत्वात्सुखरूपं चेत् तद्वैकल्यादानन्दवैकल्यं विकारलोकानां विकारात्मकतया भोग्यत्वे तदनित्यत्वादानन्दानित्यत्वम्, अतः केवलभोगार्थत्वाभावेन विकारालोकानुसञ्चरणस्य नियमनार्थत्वाज्जगद्व्यापारस्य ब्रह्मलक्षणत्वाश्रयणमन्याय्यमिति तस्य लक्षणत्वाभावेन तदविरोधात्परमसाम्यादिश्रवणस्य मुक्तैश्वर्ये जगद्व्यापारान्तर्भावावगमकत्वाज्जगद्व्यापारविषयमैश्वर्यं मुक्तस्य सम्भवेत्, यदा मुक्तानावर्तनविषयः सङ्कल्पस्य ईश्वरस्य सम्भवति तदाऽनावृत्तिश्रुतेर्मुख्यत्वेनानावृत्तिसम्भवान्नानन्दानित्यत्वं, यदा च स्वातन्त्र्यमात्माभिमानानुरूप्यात् सुखरूपं तदा मुक्तेषु स्वात्माभिमानाननुरूपत्वात् स्वातन्त्र्यस्य तद्वैकल्यान्नानान्दवैकल्यं, यदा च विकारलोकानां मुक्तभोग्यत्वं

भू० एको ह वै नारायण आसीन्न ब्रह्मा नेशानो नेमे द्यावापृथिवी न नक्षत्राणि नापो नाग्निर्न सोमो न सूर्य्यः स एकाकी न रमते तस्य ध्यानान्तस्थस्यैका कन्या दशेन्द्रियाणि" इत्यादिषु यः पृथिव्यां तिष्ठन् पृथिव्या अन्तर इत्यारभ्य य आत्मनि तिष्ठन्नित्यादिषु च निखिलजगन्नियमनं परमपुरुषं प्रकृत्यैव श्रूयते, असन्निहितत्वाच्च, न चैतेषु निखिलजगन्नियमनप्रसङ्गेषु मुक्तस्य सन्निधानमस्ति येन जगद्व्यापारस्तस्यापि स्यात् ।

टी० ब्रह्मविभूतितया तदा विकाररूपस्यानित्यत्वेऽपि सर्वावस्थासु जगतो ब्रह्मविभूतित्वस्यानपायित्वेन नानन्दविच्छेदः । एवं विकारलोकानुसञ्चरणस्य नियमनार्थत्वाभावेऽप्यपरिच्छिन्नानन्दत्वाविरोधात्केवलभोगार्थतया तदविरोधेन जगद्व्यापारस्य ब्रह्मलक्षणत्वाश्रयणस्य न्याय्यत्वात्परमसाम्यादिश्रवणस्य मुक्तैश्वर्य्यं जगन्नियमनान्तर्भावानवगमकत्वात् जगद्व्यापरवर्जमेव मुक्तैश्वर्य्यं स्यात् । यद्यनावृत्तिः शब्दादित्यधिकरणान्तरं तदाऽनावृत्त्यनुबन्धिनी विचारपरम्परापृथगनुसन्धेया । तादर्थ्यसम्भवस्तु सङ्गतिमात्रोपयोगी द्रष्टव्यः । पूर्वपक्षमुक्त्वाराद्धान्तमाह "जगदि"ति, निर्व्याजब्रह्मानुभवरूपं यथा ऽवस्थितब्रह्मानुभवरूपमित्यर्थः । सृष्ट्यादेरपि नियमनविशेषरूपत्वाज्जगद्व्यापारशब्दोक्तिः कन्या—मनःप्रकाशकत्वात्, कनदीप्ताविति धातुः ।

सू० प्रत्यक्षोपदेशान्नेति चेन्नाधिकारिकमण्डलस्थोक्तेः ॥ १८ ॥

भा० स स्वराड् भवति तस्य सर्वेषु लोकेषु कामचारो भवति स इमाँल्लोकान्कामान्नीकामरूप्यनुसञ्चरन्नि"ति प्रत्यक्षेण श्रुत्या मुक्तस्य जगद्व्यापार उपदिश्यते ।

अतो न जगद्व्यापारवर्जमिति चेत्तन्न आधिकारिकमण्डलस्थोक्तेः, आधिकारिकाः—अधिकारेषु नियुक्ता हिरण्यगर्भादयः, मण्डलानि—तेषां लोकाः तत्स्था भोगा मुक्तस्याकर्मवश्यस्य भवन्तीत्ययमर्थस्तस्य सर्वेषु लोकेषु कामचारो भवतीत्यादिनोच्यते अकर्मप्रतिहतज्ञानो मुक्तोविकारलोकान् ब्रह्मविभूतिभूतानानुभूय यथाकामं तृप्यतीत्यर्थः । तदेवं विकारान्तर्वर्त्तिन आधिकारिकमण्डलस्थान्सर्वान् भोगान् ब्रह्मविभूतिभूताननुभवतीत्यनेन वाक्येनो-

च्यते न जगद्व्यापारः, यदि संसारिवन्मुक्तोऽपि विकारान्तर्वर्त्तिनो भोगान् भुङ्क्ते तर्हि बद्धस्येव मुक्तस्यापि अन्तवदेव भोग्यजातमल्पं च स्यात्तत्राह—

टी० सू० प्रत्यक्षोपदेशान्नेति चेन्नाधिकारिकमण्डलस्थोक्तेः ॥ १८ ॥ कामान्नित्वकामरूपित्वसर्वलोकसञ्चारश्रवणाज्जगतस्तदधीनत्वं सिद्धमिति मुक्तस्येश्वरत्वमपि स्यादिति पूर्वपक्षोत्थानं प्रत्यक्षेणेति व्याख्येयस्य व्यासेनोपादानन्तद्व्याचष्टे "श्रुत्ये"ति, विकारलोकान्कार्य्यभूतलोकान्, विकार शब्दो धर्मिपरः, हेयातीतस्य मुक्तस्य हेयास्पदविकारलोकभोगापेक्षा कथमित्यत्राह "अकर्मे"ति, भगवद्विभूतित्वेनात्यन्तभोग्यता स्यादित्यर्थः । एवं कामान्नीत्यादिश्रुतिवाक्यं व्याख्यातम्, उक्तश्रुतिवाक्यार्थप्रतिपादकस्य सूत्रस्यार्थं निगमयति "तदेवमि"ति, उत्तरसूत्रशङ्कामाह "यदी"ति, ।

सू० विकारावर्त्ति च तथा हि स्थितिमाह ॥ १९ ॥

भा० विकारे जन्मादिके न वर्त्तते इति विकारावर्त्ति, निर्धूतनिखिलविकारं निखिलहेयप्रत्यनीककल्याणैकतानं निरतिशयानन्दं परं ब्रह्म सविभूतिकं सकलकल्याणगुणमनुभवति मुक्तः, तद्विभूत्यन्तर्गतत्वेन विकारवर्त्तिनां लोकानामपि मुक्तभोग्यत्वं, तथा हि परस्मिन् ब्रह्मणि निर्विकारेऽनवधिकातिशयानन्दे मुक्तस्यानुभवितृत्वेन स्थितिमाह श्रुतिः "यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते अथ सोऽभयं गतो भवति, रसो वै सः रसं ह्येवायं लब्ध्वाऽऽनन्दीभवतीत्यादिका तद्विभूतिभूतं जगत्तत्रैव वर्तते तस्मिँल्लोकाः श्रिताः सर्वे तदु

नात्येति कश्चने"ति श्रुतेः, अतः सविभूतिकं ब्रह्मानुभवन् विकारान्तर्वर्तिन आधिकारिकमण्डलस्थानपि भोगान् भुङ्क्ते इति सर्वेषु लोकेषु कामचार इत्यादिनोच्यते न मुक्तस्य जगद्व्यापारः ॥

टी० सू० विकारावर्त्ति च तथा हि स्थितिमाह ॥ १९ ॥ मुक्तस्य सविभूतिकब्रह्मानुभवितृत्वेन स्थितिवचनात्सर्वत्र कामचारादयो भवन्ति न नियन्तृत्वादिकमित्यर्थः ॥

सू० दर्शयतश्चैवं प्रत्यक्षानुमाने ॥ २० ॥

अस्य प्रत्यगात्मनो मुक्तस्य नियाम्यभूतस्य नियन्तृभूतपरमपुरुषासाधारणं जगद्व्यापाररूपं नियमनं न सम्भवतीत्युक्तं, निखिलजगन्नियमनरूपो व्यापारः परमपुरुषासाधारण इति दर्शयतः श्रुतिस्मृती—"भीषाऽस्माद्वातः पवते भीषोदेति सूर्यः भीषाऽस्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चम" इति एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसैा विधृतैा तिष्ठत इत्यादि, तथा "एष सर्वेश्वर स एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसम्भेदाये"ति च श्रुतिः, स्मृतिरपि "मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम्। हेतुनाऽनेन कैान्तेय जगद्धि परिवर्त्तते विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति च, तथा मुक्तस्य सत्यसङ्कल्पत्वादिपूर्वकस्याप्यानन्दस्य परमपुरुष एव हेतुरिति श्रुतिस्मृती दर्शयतः। "एष ह्येवानन्दयाति

मां च योऽव्यभिचारेण भक्तियोगेन सेवते । स गुणान्समतीत्यैतान् ब्रह्मभूयाय कल्पते । ब्रह्मणोऽहि प्रतिष्ठाहममृतस्याव्ययस्य च ।

टी० दर्शयतश्चैवं प्रत्यक्षानुमाने ॥ २० ॥ ब्रह्मणो हि प्रतिष्ठाहमिति ब्रह्म–जीवः अमृतं मोक्षः शाश्वतधर्मो ज्ञानं सुखमानन्दः अन्याधीनत्वनित्यत्वयोर्विशेषमाशङ्क्य परिहरति यद्यपि इत्यादिना, तस्य–अपहतपाप्मत्वादिगुणस्य, तथाविधत्वं स्वाभाविकत्वं तस्य प्रत्यगा-

भू० शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य चे''ति, यद्यप्यपहतपाप्मत्वादिः सत्यसङ्कल्पत्वपर्य्यन्तो गुणगणः प्रत्यगात्मनः स्वाभाविक एवाविर्भूतः यथाऽपि तस्य तथाविधत्वमेव परमपुरुषायत्तं तस्य नित्यस्थितिश्च तदायत्ता, परमपुरुषस्यैतन्नित्यताया नित्येष्टत्वान्नित्यतया वर्तत इति न कश्चिद्विरोधः । एवमेव परमपुरुषभोगोपकरणस्य लीलोपकरणस्य च नित्यतया शास्त्रावगतस्य परमपुरुषस्य नित्येष्टत्वादेव तथाऽवस्थानमस्तीति शास्त्रादवगम्यते । अतो मुक्तस्य सत्यसङ्कल्पत्वं परमपुरुषसाम्यञ्च जगद्व्यापारवर्ज्जम् ॥

त्मस्वरूपस्य नित्यस्थितिस्तदायत्तेत्यर्थः, । तदुपपादयति ''परमपुरुषस्ये''ति, मुक्तस्वरूपतद्गुणनित्यत्वं परसङ्कल्पायत्तमित्युक्तम्, अन्यदपि नित्यं वस्तु तदधीनस्थित्यादिकमित्याह ''एवमि''ति, मुक्तस्य नियन्तृत्वाभावात्रानन्दवैकल्यं प्रत्युत तत्पौष्कल्यमेव, सर्वेषां हि स्वात्माभिमानानुगुणा भोग्यव्यवस्था तद्विपर्ययव्यवस्था च, तथा पुरुषपश्वादिषु दृश्यते तस्मादात्मन आविर्भूतयथाऽवस्थितस्वरूपस्य शेषत्वमेव स्वाभाविकं रूपमप-

रोचयतः स्वशेषिपरमपुरुषपरिचरणमेव प्रियतमं स्यात्तद्विपर्ययेणेशितृत्वमत्यन्तानिष्टमेव तस्मान्नानन्दवैकल्यम् अपि तु तत्पौष्कल्यमेव ॥

सू० भोगमात्रसाम्यलिङ्गाच्च ॥ २१ ॥

भू० ब्रह्मयाथात्म्यानुभवरूपभोगमात्रेण मुक्तस्य ब्रह्मसाम्यप्रतिपादनाच्च लिङ्गात् जगद्व्यापारवर्ज्जमित्यवगम्यते "सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिते"ति अतो मुक्तस्य परमपुरुषसाम्यं सत्यसङ्कल्पत्वञ्च परमपुरुषासाधारणनिखिलजगन्नियमनश्रुत्यानुगुण्येन वर्णनीयमिति जगद्व्यापारवर्ज्जमेव मुक्तैश्वर्य्यं, । यदि परमपुरुषायत्तमेव मुक्तस्यैश्वर्य्यं तर्हि तस्य स्वतन्त्रत्वेन तत्सङ्कल्पान्मुक्तस्य पुनरावृत्तिसम्भवाशङ्केत्यत्राह—

सू० अनावृत्तिःशब्दादनावृत्तिः शब्दात् ॥ २२ ॥

यथा निखिलहेयप्रत्यनीककल्याणैकतानो जगज्जन्मादिकारणं समस्तवस्तुविलक्षणः सर्वज्ञः सत्यसङ्कल्प आश्रितवात्सल्यैकजलधिः परमकारुणिको निरस्तसमस्तसमाभ्यधिकसम्भावनः परब्रह्माभिधानः—

टी० सू० भोगमात्रसाम्यलिङ्गाच्च ॥ २१ ॥ ब्रह्मेत्यादि स एवंवित्सर्वेषां भूतानां मतो भवति यथैषा देवतैव न यथैतां देवतां सर्वाणि भूतान्यवन्ति न ह्येवमेवंविदं सर्वाणि भूतान्यवन्ति तेनो एतस्यै देवतायै सायुज्यं सलोकतां तु यन्तीत्यादिवाक्यान्यप्यभिप्रेतानि छागो वा मन्त्रवर्णादिति न्यायात्सामान्येनावगतसाम्यं भोगसाम्ये दृष्टे तादृशसाम्यविशेषे पर्यवस्यतीति भावः । परमात्मनियाम्यत्वादिश्रुत्यानुगुण्याच्चायमर्थ इति वदन्नधिकरणार्थमुपसंहरति "अत" इति, अनन्तरसूत्रं शङ्कामुखेनावतारयति

"यदी"ति, अपुनरावृत्तिश्रुतिः पाक्षिकविषया ईश्वरस्वातन्त्र्यात्कस्यचिदनावृत्तिसम्भवादिति च पूर्वपक्ष्यभिप्रायः॥ सू० अनावृत्तिः शब्दादनावृत्तिः शब्दात्,॥ २२॥ यथेत्यादि भगवता मुक्तस्यापरित्याज्यत्वोपपादनार्थमुक्तस्य ब्रह्मानुभवजिहासाऽनुदयज्ञापनार्थं प्रामाणिकत्वे दृष्टान्तसिद्ध्यर्थं च निखिलहेयप्रत्यनीकत्वादिगुणाः, उक्ताः अन्येन निवृत्तिशङ्काव्यावृत्त्यर्थं निरस्तसमाभ्यधिकसम्भावन इति पदं, स यदि पितृलोककाम इत्याद्युक्तभगवत्परिचरणार्थविग्रहव्यावृत्त्यर्थं पुनर्जन्मदुःखालयमशाश्वतमिति वचनमुपात्तं, दुःखालयत्वादिविशेषणाभावेऽप्येतदैकार्थ्यं स्यादित्यभिप्रायेण पुनर्जन्म न विद्यत

भा० परमपुरुषोऽस्तीति शब्दादवगम्यते, एवमहरहरनुष्ठीयमानवर्णाश्रमधर्मानुगृहीततदुपासनरूपतत्समाराधनप्रीतः उपासीनाननादिकालप्रवृत्तानन्तदुस्तरकर्मसञ्चयरूपाविद्यां विनिवर्त्य स्वयाथात्म्यानुभवरूपानवधिकातिशयानन्दं प्रापय्य पुनर्नावर्तयतीत्यपि शब्दादेवावगम्यते, शब्दश्च "स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसम्पद्यते न च पुनरावर्त्तते" इत्यादिकः, तथा भगवता स्वयमेवोक्तं "मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतं नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः । आब्रह्मभुवनाल्लोकाः पुनरावर्त्तिनोऽर्जुन? मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यत" इति, न चोच्छिन्नकर्मबन्धस्यासङ्कुचितज्ञानस्य परब्रह्मैकानुभवैकस्वभावस्य तदेकप्रियस्यानधिकातिशयानन्दं ब्रह्मानुभवतोऽन्यापेक्षातदर्थान्तरारम्भाद्यसम्भवात् पुनरावृत्तिशङ्का । न च परमपुरुषः सत्यसङ्कल्पोऽत्यर्थप्रियं ज्ञानिनं लब्ध्वा कदाचिदावर्त्तयिष्यति ।

॥ श्रीगणेशाय नमः ॥

॥ माधवीयधातुवृत्तेः ॥

सूचीपत्त्रम् ।

* शाकटायनमते आत्मनेपदी । † अयं ३३६ पत्त्रस्य टिप्पण्यां द्रष्टव्यः ।

* अयं ३३६ पत्रस्थटिप्पण्यां द्रष्टव्यः। † अयमपि तत्रैव। ‡ अयमपि तत्रैव।

				पृष्ठ					पृष्ठ
णखि	"	प.	से.	१०३	तड	चु.	उ.	से.	३१८
णट	"	प.	से.	१४०	तडि	भ्वा.	आ.	से.	१३४
णद	"	प.	से.	९१	तत्रि	चु.	आ.	से.	३३०
णद्	चु.	उ.	से.	३४०	तनु	तु.	उ.	से.	२७०
णभ	क्र्या.	प.	से.	३०४	तनु	चु-	उ.	से.	३४६
णभ	भ्वा.	आ.	से.	२३९	तञ्चु	भ्वा.	प.	से.	११७
णभ	दि.	प.	से.	१८७	तञ्चू	रु.	प.	से.	२६८
णम	भ्वा.	प.	अ.	३५१	तप	दि.	आ.	अ.	१५४
णय	"	आ.	से.	१७६	तप	भ्वा.	प.	अ.	३६१
णल	"	प.	से.	२६५	तप	चु.	उ.	से.	३४३
णश	दि.	प	अ.	१७२	तमु	दि.	प.	से.	१७७
णस	भ्वा.	आ.	से.	२११	तय	भ्वा.	आ.	से.	१७६
णह	दि.	उ.	अ.	१५७	तर्क	चु.	उ.	से.	३४०
णासृ	भ्वा.	आ.	से.	२१०	तर्ज	भ्वा.	प.	से.	१२५
णिक्ष	"	प.	से.	२१९	तर्ज	चु.	आ.	से.	३३०
णिजि	अ.	आ.	से.	३८	तर्द	भ्वा.	प.	से.	९२
णिजिर्	जु.	उ.	अ.	१२४	तल	चु.	उ.	से.	३२०
णिदि	भ्वा.	प.	से.	९५	तसि	चु.	उ.	से.	३३६
णिदृ	"	उ.	से.	२८६	तसु	दि.	प.	से.	१८१
णिवि	"	प.	से.	२०३	तायृ	भ्वा.	आ.	से.	१७९
णिल	तु.	प.	से.	२३०	तिक	स्वा.	प.	से.	२०६
णिश	भ्वा.	प.	से.	२३०	तिकृ	भ्वा.	आ.	से.	१०१
णिशि	अ.	आ.	से.	३८	तिग	स्वा.	प.	से.	२०६
णिञ्	भ्वा.	उ.	अ.	३००	तिज	भ्वा.	आ.	से.	३४५
णील	"	प.	से.	१८९	तिज	चु.	प.	से.	३२७
णीव	"	प.	से.	१९८	तिपृ	भ्वा.	आ.	अ.	१४८
णू	अ.	प.	से.	५१	तिम	दि.	प.	से.	१३८
णुद	तु.	प.	अ.	२५०	तिल दु. मै. म. भ्वा.		प.	से.	१९१
णुद	तु.	उ.	अ.	२१०	तिल	तु.	प.	से.	२२९
णू.	तु.	प.	से.	२३५	तिल	चु.	उ.	से.	३२१
णेदृ	भ्वा.	उ.	से.	२८६	तिल्ल अ. म. भ्वा.		प.	से.	१९१
णेष्ट	"	आ.	से.	२०९	तीकृ	"	आ.	से.	१०१
तक	"	प.	से.	१०२	तीर	चु.	उ.	से.	३५३
तकि	"	प.	से.	१०२	तीव	भ्वा.	प.	से.	१९८
तच	"	प.	से.	२२०	तुज	"	प.	से.	१२९
तचू	"	प.	से.	२१९	तुज शाक. म. चु,		उ.	से.	३१७
तगि	"	प.	से.	१०३	तुजि	भ्वा.	प.	से.	१२९
तट	"	प.	से.	१४०	तुजि	चु.	उ.	से.	३१७

				पृष्ठ					पृष्ठ
धूर्वी	भ्वा.	प.	से.	१९८	दीक्ष	भ्वा.	आ.	से.	२०८
दक्ष	,,	आ.	से.	२०७	दीङ्	दि.	आ.	अ.	१४३
दक्ष	,,	आ.	से.	२४६	दीधीङ्	अ.	आ.	से.	१०३
दघ	स्वा.	प.	से.	२०८	दीपी	दि.	आ.	से.	१५३
दण्ड	चु.	उ.	से.	३५५	दु.	भ्वा.	प.	अ.	३३६
दद	भ्वा.	आ.	से.	७५	(टु) दु	स्वा.	प.	अ.	१९९
दध	,,	आ.	से.	६६	दुःख	चु.	उ.	से.	३५६
दम्भु	स्वा.	प.	से.	२०७	दुल	चु.	उ.	से.	३२०
दंश	भ्वा.	प.	अ.	३६७	दुर्वी	भ्वा.	प.	से.	१९८
दमु.	दि.	प.	से.	१७७	दुष	दि.	प.	अ.	१६८
दय.	भ्वा.	आ.	से.	१७७	दुह	अ.	उ.	अ.	१८
दरिद्रा	अ.	प.	से.	१००	दुहिर्	भ्वा.	प.	से.	२३५
दल	चु.	उ.	से.	३४०	दृ.	स्वा.	प.	से.	२०६
दल.	भ्वा.	प.	से.	१९३	दूङ	दि.	प.	से.	१४३
दलि. भोज. म.	,,	प.	से.	२५६	दृङ्	तु.	आ.	अ.	२४४
दशि	चु.	आ.	से.	३३०	दृम्फ	तु.	प.	से.	२२३
दशि	चु.	उ.	से.	३४०	दृप	दि.	प.	अ.	१७४
दस के. म.	चु.	उ.	से.	३३०	दृप आ. म.	चु.	उ.	से.	२०८
दसि	चु.	आ.	से.	३३०	दृप	तु.	प.	से.	२२३
दसि	चु.	उ.	से.	३४१	दृभ	चु.	उ.	से.	३४४
दसु.	दि.	प.	से.	१८१	दृभी	तु.	प.	से.	२२४
दह.	भ्वा.	प.	अ.	३६६	दृभी	चु.	उ.	से.	३४४
(डु) दाञ्	जु.	उ.	अ.	१२०	दृशिर्	भ्वा.	प.	अ.	३६५
दाण्	भ्वा.	प.	अ.	३२२	दृह	,,	प.	से.	२३३
दान.	,,	उ.	से.	३७०	दृहि	,,	प.	से.	२३३
दाप्	अ.	प.	अ.	८३	दॄ	,,	प.	से.	२५२
दाश	स्वा.	प.	से.	२०६	दॄ	क्या.	प.	से.	२६५
दाशृ	भ्वा.	उ.	से.	२६०	दृक्ष	भ्वा.	आ.	से.	६७
दासृ	,,	उ.	से.	२६२	देङ्	,,	आ.	अ.	३४१
दिवि	,,	प.	से.	२०३	देवृ	,,	आ.	से.	१८३
दिवु	दि.	प.	से.	१२६	दैप्	,,	प.	अ.	३१३
दिवु.	चु.	उ.	से.	३३३	दो	दि.	प.	अ.	१५०
*दिवु	चु.	उ.	से.	३३६	द्यु	अ.	प.	अ.	५५
दिश	तु.	उ.	अ.	२११	द्युत	भ्वा.	आ.	से.	२३५
दिह	अ.	उ.	अ.	२१	द्यै	,,	प.	अ.	३०७

* अयं ३३६ पत्रस्य टिप्पण्यां द्रष्टव्यः ।

				पृष्ठ
नट	भ्वा.	प.	से.	२४६
(टु) नदि	,,	प.	से.	६५
नर्द	,,	प.	से.	६२
नाधृ	,,	आ.	से.	६५
नाध	,,	आ.	से.	६५
निवास	चु.	उ.	से.	३५१
निष्क	चु.	आ.	से.	३३०
नृती	दि.	प.	से.	१३५
नॄ	भ्वा.	प.	से.	२५३
नॄ	क्र्या.	प.	से.	२६५
पक्ष	चु.	उ.	से.	३१५
(डु) पचष्	भ्वा.	उ.	अ.	३७०
पचि	,,	आ.	से.	१०६
पचि	चु.	उ.	से.	३२७
पट	भ्वा.	प.	से.	१३७
पट	चु.	उ.	से.	३४०
पट	चु.	उ.	से.	३४८
पठ	भ्वा.	प.	से	१४५
पडि	,,	आ.	से.	१३४
पडि	चु.	उ.	से.	३२१
पण	भ्वा.	आ.	से.	१६१
पत	चु.	उ.	से.	३४६
पत्ल	भ्वा.	प.	से.	२६७
पथ	चु.	प.	से.	३१६
पथि	चु.	उ.	से.	३१८
पथे	भ्वा.	प.	से	२७२
पद	दि.	आ.	अ.	१५८
पद	चु.	आ.	से.	३५२
पन	भ्वा.	आ.	से.	१६१
पय	,,	आ.	से.	१७६
पर्ण	चु.	उ.	से.	३५७
पर्द	भ्वा.	आ.	से.	७६
पर्प	,,	प.	से.	१५६
पर्ब	,,	प.	से.	१५६
पर्व	,,	प.	से.	२००
पल	,,	प.	से.	२६५
पल्यल	चु.	उ.	से.	३५१
पश	चु.	उ.	से.	३३६

				पृष्ठ
पष	चु.	उ.	से.	३४६
पसि	चु.	उ.	से.	३२१
पा	भ्वा.	प.	अ.	३१३
पा	अ.	प.	अ.	७६
पार	चु.	उ.	से.	३५३
पाल	चु.	उ.	से.	३२१
पि	तु.	प.	अ.	२३८
पिच्छ	चु.	उ.	से.	३१८
पिज शा. म.	चु	प.	से.	३१७
पिजि	अ.	आ.	से.	३८
पिजि	चु	उ.	से.	३१७
पिजि	चु.	उ.	से.	३४०
पिट	भ्वा.	प.	से.	१४०
पिठ	,,	प.	से.	१४६
पिडि	,,	आ	से.	१३३
पिडि	चु.	उ.	से.	३२६
पिवि	भ्वा.	आ.	से.	२०३
पिश	तु.	प.	से.	२५५
पिष्ल	रु.	प.	से.	२६३
पिस	चु.	उ.	से.	३१७
पिसि	चु.	उ.	से.	३४०
पिस्ट	भ्वा.	प.	से.	२२६
पीङ्	दि.	आ.	अ.	१४७
पीड	चु.	प.	से.	३१४
पील	भ्वा.	उ.	से.	१८८
पीव	,,	प.	से.	१९८
पुट	तु.	प.	से.	२३२
पुट	चु.	उ.	से.	३४०
पुट	चु.	उ.	से.	३५३
पुटि	चु.	उ.	से.	३४१
पुट्ट	चु.	उ.	से.	३१६
पुड	तु.	प.	से.	२३४
पुडिमै. म.	भ्वा.	प.	से.	१४४
पुण	तु.	प.	से.	२२५
पुथ	चु.	उ.	से.	३४०
पुथ	दि.	प.	से.	१३७
पुथि	भ्वा.	प.	से.	८५
पुर	तु.	प.	से.	२२७

* णिजभावेऽनिट् ।

* अयं टिप्पण्यां द्रष्टव्यः ।

				पृष्ठ					पृष्ठ
स्फिट पा.	चु.	प.	से.	३१६	हन	अ.	प.	अ.	४
स्फिट्ट	चु.	प.	से.	३२५	हम्म	भ्वा.	प.	से.	१७१
स्फुट	भ्वा.	आ.	से.	१३१	हय	॥	प.	से	१९६
स्फुट	तु.	प.	से.	२२३	हर्य	॥	प.	से.	१८७
स्फुट	चु.	उ.	से.		हल	॥	प.	से.	२६४
स्फुटि स्वा.क्रा.म.	भ्वा.	प.	से.	१४५	हसे	॥	प.	से.	२२६
स्फुटिर्	भ्वा.	प.	से.	१४५	(ओ) हाक्	जु.	प.	अ.	१९५
स्फुड	तु.	प.	से.	२३५	(ओ) हाङ्	जु.	आ.	अ.	१९५
स्फुडि	चु.	प.	से.	३१३	हि	स्वा.	प.	अ.	२००
स्फुर	तु.	प.	से.	२३४	हिक्क	भ्वा.	उ.	से.	२८३
स्फुर्छा	भ्वा.	प.	से.	१२२	हिठ एके.म.	॥	प.	से.	१४१
स्फुल	तु.	प.	से.	२३४	हिडि	॥	आ.	से.	१३२
(टुओ) स्फुर्जा	भ्वा.	प.	से.	१२८	हिल	तु.	प.	से.	२३०
स्मिट	चु.	प.	से.	३१८	हिवि	भ्वा.	प.	से.	२०३
*स्मील.	भ्वा.	प.	से.	१८६	हिष्क क्र.	चु.	आ.	से.	३३०
स्मृ	॥	प.	अ.	२५३	हिसि	रु.	प.	से.	२६१
स्मृ	॥	प.	अ.	३२५	हिसि	चु.	उ.	से.	३४५
स्मृ एके.म.	स्वा.	प.	अ.	२०१	हु	जु.	प.	अ.	१०७
स्यन्दू	भ्वा.	आ.	वे.	३४१	हुडि	भ्वा.	आ.	से.	१३४
स्यम	चु.	आ.	से.	३३१	हुडि	॥	आ.	से.	१३२
स्यमु	भ्वा.	प.	से.	२६१	हुड्ड	॥	प.	से.	१४७
स्रकि	॥	आ.	से.	६८	हूर्छा	॥	प.	से.	१२१
स्रम्भु	॥	आ.	से.	२३६	हुल	॥	प.	से.	२६७
स्रन्सु	॥	आ.	से.	२३६	हूडु	॥	प.	से.	१४७
स्रिवु	दि.	प.	से.	१३३	हृ	जु.	प.	अ.	१२६
स्रु	भ्वा.	प.	अ.	३३२	हृञ्	भ्वा.	उ.	अ.	२६६
[illegible]कृ	॥	आ.	से.	६८	हृष	दि.	प.	से.	१९६
[illegible]	॥	प.	से.	२६१	हृषु	भ्वा.	प.	से.	२२७
[illegible]	चु.	उ.	से.	३४६	हेठ क्र.	भ्वा.	प.	से.	३०८
[illegible]	भ्वा.	आ.	से.	७५	हेठ	भ्वा.	आ.	से.	१३२
[illegible]	॥	आ.	से.	७८	हेड	॥	प.	से.	२४८
[illegible].म.	चु.	उ.	से.	३४२	हेडृ	॥	आ.	से.	१३५
[illegible]	भ्वा.	प.	वे.	३२४	हेप केचिन्न.	॥	आ,	से.	२०६
[illegible]	॥	प.	से.	१४१	हेडृ	॥	आ.	से.	१३५
[illegible]	॥	प.	से.	१४६	होडृ	॥	आ.	से.	१३५
[illegible]	॥	आ.	अ.	३४६	ह्नुङ्	अ.	आ.	अ.	१०६

* अयं मीलश्मीलक्ष्मीलइत्यत्रापेक्षितः ।

॥ श्रीगणेशाय नमः ॥

माधवीया धातुवृत्तिः ।

नामधातुवृत्तिश्च

श्रीयुतमाधवाचार्यसोदरेण श्रीसायणाचार्येण विरचिता ।

काशिकराजकीयपाठशालायां व्याकरणप्रधानाध्यापकेन
भारद्वाजदामोदरशास्त्रिणा संशोधिता ।

काश्यां

मेडिकलहालनामके यन्त्रालये प्रकाशिता ।

सं० १९५४–१८९७ ई० ।

उत्तरसुखमभिसन्धायैव सर्वेषां दुःखनिरासप्रवृत्तिरिति लोकवादविदः । अन्यथाऽपि ब्रूमः सुषुप्त्यवस्थजीवमुपदिष्टवति प्रजापताविन्द्रः प्राह । न खल्वयमेवं सम्प्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापि इतो भवति नाहमत्र भोग्यं पश्यामि इति । ततः प्रजापतिरपहतपाप्मत्वादिसत्यसङ्कल्पत्वपर्यन्तगुणकं ब्रह्मसमं मुक्तमुपदिदेश, अतः केवलं दुःखनिवृत्तिर्न मुक्तिरिति जानन् कथं त्वदुक्तमुक्तिकामः प्रवर्त्स्यतीति हेतावपि विकल्पासमत्वं मत्वाह धीरिति । अनित्यविशेषगुणवत्त्वादि.ति वदता किं धीस्वरूपं तत्परिग्ग· तये वा आत्मगुणत्वेन कथ्यन्ते स्वसिद्धान्तदृष्ट्या पुरुषगुणभूताऽऽग-न्तुकचैतन्मादयो वा तत्राद्यस्य दूषणम् । धीर्नित्येति । अनित्यविशे-षगुणवत्त्वमसिद्धमित्यर्थः । द्वितीये त्वात्मनस्तद्वत्त्वं नेति । मतद्वये-ऽपि स्वरूपासिद्धिमाह । इच्छादय इति । तृतीयेऽपि वप्यन्तविद्भिरन-ङ्गीकारादसिद्धिस्सुगमेति तस्य पृथगनुद्धारः । एवं दुःखसन्ततिः अत्य-न्तमुच्छिद्यते सन्ततित्वात् प्रदीपसन्ततिवत् इत्यनुमानमपि निर-स्तम् आगमसिद्धाभिर्नित्यसन्ततिभिरनैकान्त्यात् प्रदीपावयविसन्त-तेश्चास्मान्प्रति निदर्शनायोगात् अवस्थासन्ततेश्चोच्छेदाभावात् दीपत्वावस्थासन्ततिवदिति त्वया निदर्शयितुमयुक्तत्वादिति ॥ ६६ ॥

इति पाषाणवन्मोक्षभङ्गः ॥

अथ साङ्ख्योक्तं चिदचिद्विवेकं संसारं तन्निवृत्तिप्रकारं च सङ्गृह्णाति । आत्मेति ।

सू० आत्मा चिन्मात्ररूपो विकृतिमति जडे बि-म्बितो बुद्धितत्त्वे तच्चास्मिँस्तद्विवेकाग्रहण-विरचितः पुंसि संसारमोहः ॥ अन्त्या विद्या-

नवृत्तिः प्रकृतिपुरुषयोरन्यतां गाहमाना तादृक्संसारभेत्त्री पुरुष इह सदा मुक्त एवेति साङ्ख्याः ॥ ७० ॥

चिन्मात्ररूप इति । पुरुषस्वरूपशोधनं नासावचित्स्वभावः, न च ज्ञातेत्यर्थः । विकृतिमति जड इत्यचेतनधर्माणामुपलक्षणम् एवं हि विवि*च्यते ।

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयस्सप्त ।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥
त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि ।
व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान् ॥ इति ।

बिम्बित इत्यादिना प्रकृतिपुरुषयोरितरेतरधर्माध्यासे हेतुविशेष उच्यते अप्रकाशमाने कथं तद्धर्माध्यास इत्यत्रोक्तम् । तच्चास्मिन्निति । स चाध्यास एवं कथ्यते ।

तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम् ।
गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीनः ॥ इति ।

फलितमाह । तदिति । विवेकः—भेदः तदग्रहणशब्देन सामग्र्येकदेशोपादानम् ॥

ज्ञानेन चापवर्गो विपर्ययात्तद्विपर्यासः ।
वैराग्यात्प्रकृतिलयः संसारो भवति राजसाद्रागात् ॥

इति कारणान्तरमपि हि सङ्गृह्यते कृपाणप्रतिफलितमुखमलिनतान्यायसूचनाय मोहशब्दः । अस्य किं निवर्तकमित्यत्राह । ...न्त्येति । विज्ञानवृत्तिः—विज्ञानरूपान्तःकरणवृत्तिः विज्ञानस्य वा ...द्गुितत्त्वस्य विवेकख्यातिरूपा परिणतिः ।

* व्युपसृष्टस्योभयपदिनोरोधादिकस्य ।

विवेकख्यातिपर्यन्तमज्ञानं चित्तचेष्टितम् ।
एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम् ॥
अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम् ।
तेन निवृत्तप्रसवामर्थवशात्सप्तरूपविनिवृत्ताम् ॥
प्रकृतिं पश्यति पुरुषः प्रेक्षकवदवस्थितस्सुस्थः ।
प्रकृतेस्सुकुमारतरं न किंचिदस्तीति मे मतिर्भवति ॥
या दृष्टाऽस्मीति पुनर्न दर्शनमुपैति पुरुषस्य ॥ इति ।

स्फटिकरागनिवृत्तिन्यायसूचनाय तादृक्शब्दः । यद्यपि संसारः पुरुषस्यारोपितः तथाऽपि तद्भ्रमो दुस्त्यज इत्यचाह । पुरुष । इति । इह संसारे वर्तमानेऽपि पुरुषस्तु भ्रान्त्याऽप्यनाघ्रातस्सर्वदा पुष्करपलाशवन्निर्लेप इत्यर्थः । तथा चाहुः ।

तस्मान्न बध्यतेऽद्धा न मुच्यते नाऽपि संसरति कश्चित् ।
संसरति बध्यते मुच्यते च नानाऽऽश्रया प्रकृतिः ॥ इति ।

इति समीचोक्तसंसारानुवादः ॥

एवमनूदितेष्वर्थेषु चिन्मात्ररूपत्वस्य प्रागेव ज्ञातृत्वसाधनेन निरस्तत्वात्तदनन्तरोक्तं बिम्बितत्वं दुदूषयिषुः तन्मुख्यममुख्यं वेति विकल्पं भावयन्मुख्यं दूषयति । नीरूप इति ।

मू० नीरूपे बिम्बितत्वं क्व नु भवति कथं रूपशू-
न्यस्य तत्स्यान्निर्लेपे संसृतिः का कथमति-
विशदो निष्क्रियश्चैष मुह्येत् ॥ नित्यं वा किं
न मुह्येदुपधिभिरितरैर्वेत्तु भेदं कथं वा को
वा मोक्षोऽद्य पुंसः प्रथममपि न खल्वस्य
दुःखादिगन्धः ॥ ७१ ॥

मुकुरादीनाम्मुखादीनां च रूपवत्त्वनियमादात्मान्तःकरणयोस्तदुभयस्थानीयत्वं न घटत इति वाक्यद्वयाभिप्रायः। दृश्यत्तिरूपः संसरन् आत्मा पुरुषस्स्वभोगार्थं स्वनिष्ठां बुद्धिं व्यनक्ति, तेनाबोद्धाऽपि सन् बोद्धेव भवति, बुद्धिरपि सलिलादिवत्स्वच्छस्वभावतया स्वनिष्ठां चिच्छक्तिं व्यनक्ति, तेन स्वयमबोधी सती बोधी भवति। एतावतैव बिम्बितत्ववाचोयुक्तिरित्यमुख्यपक्षेऽपि संसरन्नात्मेति विशेषितं न तावदिदं निरर्थकं वाक्येऽनन्वयापत्तेः। मुक्तबुद्ध्योरपि परस्पराभिव्यञ्जकत्वप्रसङ्गाच्च। सार्थकत्वे निर्लेपत्वसमर्थनविरोध इत्यभिप्रायेणाह। निर्लेप इति। एतेन शास्त्रारम्भहेतुभूता मुमुक्षा दुःखत्रयाभिघातकजिज्ञासाऽपि च संभवतीत्यपि सूच्यते। संसृतिहेतुं भेदाग्रहं तन्मूलं भ्रममपि निरस्यति। कथमिति। चिद्रूपस्यात्मनो भेदः स्वरूपं धर्मो वा। आद्ये चिद्रूपतयैवातितिशदो भातीति कथं भेदस्याग्रहः, तस्य तत्त्वात्। द्वितीये ज्ञातृत्वकर्तृत्वभोक्तृत्वादिधर्मस्त्वयैवात्मन्यपोढ इति न तादृशधर्माग्रहः प्रकृतिपुरुषसाधारणयोस्तु नित्यत्वविभुत्वयोरग्रहो न ते भेदाग्रहः, कार्यप्रकृतौ तयोरभावाद्वैधर्म्यरूपत्वमिति चेन्न। कार्यकारणप्रकृत्योस्तादात्म्याभ्युपगमात् कार्येऽपि तयोरङ्गीकर्तव्यत्वादन्यथा कथन्नासत्कार्य्यवादः। धर्मधर्मितादात्म्यवादे च धर्मिभाने धर्मोऽपि भायादेवेति कथञ्चिदपि न भेदाग्रहसंभवः। अत एवात्मा न मुह्येन्निष्क्रियत्वाच्च ज्ञानमेव क्रियेति भीत्या जहतः कथन्तद्विशेषाग्रहः अमुह्यन्नप्यन्यमोहं स्वस्मिन्नध्यवस्यतीति चेत्तदिदं शतमदित्सतश्शतार्द्धद्वयदानमिति। ननु विकृतिविशेषवदुपाधिसंनिधानमेवास्य मोहोऽस्त्वित्यत्राह। नित्यमिति। ईदृशोपाधिसन्निधानस्य कालान्तरेऽपि सुलभत्वात् कदा मुक्तिः। निरधिकारप्रकृतिदशायामिति चेन्न सर्वनित्यत्ववादिभिरधि-

कारस्यापि ध्वंसपरिग्रहायोगात् । अनभिव्यक्तिश्च तस्य दुर्वचा अभिव्यक्तेरपि निवृत्यसंभवाद्वेवेति मोहनिवृत्यर्थो भेदग्रहश्च न स्यादित्याह । वेत्त्विति । प्रकृतिधर्माध्यासश्च प्रत्यूढ इति भावः । क्रियावती प्रकृतिरेव चिच्छायापत्तिमती वेत्री भवतीति चेन्न छायापत्तेर्न्निरस्तत्वात् पुरुषस्य भेदग्रहाभावे च स्ववाक्यविरोधः यदात्थ प्रकृतिं पश्यति पुरुषः दृष्टा मयेत्युपेक्षते एक इत्यादि भाक्तमिदं दृष्टत्वमिति चेत्तर्हि प्रागिव भेदाग्रह एव अस्तु वा प्रकृतिरनुपकारिणः पुंस उपकारिणी तदर्थं भेदग्राहिणी तथाऽप्यनया तस्य न किञ्चिदुपकर्तव्यमित्याह । कोवेति । संसारनिवृत्तिरिति चेत्तत्राह । प्रथममिति । पूर्वमित्यर्थः । माभूदुपकर्तव्यं का हानिरिति चेत्तस्यार्थमपार्थकञ्चरति पुरुषविमोक्षनिमित्तन्तथा प्रवृत्तिः प्रधानस्य । कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छन्तीति स्वोक्तहानिः । रूपैस्सप्तभिरेवं बध्नात्यात्मानमात्मना प्रकृतिः । सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेणेत्यप्युक्तमिति चेत्तयाऽपि स्वोक्तहानिरेव पुरुषार्थं प्रतीत्यपि व्यर्थं वचः सृष्टिप्रलयबन्धमोक्षादयश्च त्वन्मते कथं पौर्वापर्य्यं भजेरन् सर्वनित्यत्ववादिनस्तत्तद्धेतुभूतगुणवैषम्यादेरपि क्रमभावित्वायोगादिति ॥ ७१ ॥

अथ नित्यं वेति वाक्ये बद्धमुक्तव्यवस्था न स्यादित्युक्तम् ।

अथ जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च । पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्य्ययाच्चैवेति पुरुषबहुत्वसाधकतयोक्ता च व्यवस्था न सिद्ध्यतीत्याह । व्यापिनीति ॥

सू० व्यापिन्येकापि सांख्यैः प्रकृतिरभिहिता सर्वसाधारणी सा व्याप्ता जीवाश्च सर्वे प्रकृतिपरिणतिर्भोग एषामभीष्टः ॥ सर्वे सर्वस्य

भोगाः स्युरिह तत इमे सन्निधानादिसाम्याद्
बुद्धीच्छाद्यञ्च सर्वं प्रकृतिगतमतो न व्यव-
स्था ततोऽपि ॥ ७२ ॥

एकत्वं सत्त्वरजस्तमोरूपद्रव्यसंघातात्मकतया शेषन्तु पूर्वोद्धं सूहन्तत: किमित्यत्राह । सर्व । इति । इमे प्रत्यक्षानुमानागमैस्सर्वेषामात्मसाक्षिकं प्रतिनियततया प्रख्याता इत्यर्थः । व्यवस्थापकानुपपत्तिमात्रे हेतुमाह । सन्निधानेति । स्वरूपसन्निधिस्तावत् सर्वत्र सर्वेषां समः । तद्विशेषो दुर्वचः विशेषवतां सन्निधिरेव सन्निधिविशेष इति चेन्न औलूक्यपठितविशेषस्यानादरात्, अङ्गीकारे ऽपि तस्य भोगहेतुत्वाभावेन व्यवस्थापकत्वायोगाद्विहितनिषिद्धजनितादृष्टभेदैरेव हि भोगव्यवस्था अन्यथा निर्निमित्तभोगवादप्रसङ्गात् । अस्तु तर्हि तादृशनिमित्तोपश्लेषाद्व्यवस्था मैवं निष्क्रियस्य ज्ञानचिकीर्षाप्रयत्नानभ्युपगमेन कर्तृत्वाभावव्यवस्थापनात् । अकर्तुश्च न क्रियाजन्यादृष्टाश्रयत्वं तत्फलभोक्तृत्वं वा समस्ति ।

अस्वधर्मसमानीतैरन्यनिष्ठैरुपाधिभिः ।
यदि लिप्येत यः कश्चिन्न लिप्येरन् कथं परे ॥
प्रकृत्यंशगतैर्धर्म्मैर्य्यदि तादृग्व्यवस्थितिः ।
अजागलस्तनप्रायः पुमान् किमिति कल्प्यते ॥
तप्रायःपिण्डनीतिश्च नोदाहर्त्तुमिह क्षमा ।
तत्र संसर्गिसंसर्गभेदात् सर्वोपपत्तितः ॥
न सत् प्रच्यवते यस्य नासदात्मानमृच्छति ।
तस्य बन्धश्च मोक्षश्च कथं न सह तिष्ठतः ॥

तदेतत् सर्वमभिप्रेत्याह । बुद्धीति । प्रकृतिगतमित्यनेन बाह्यगतत्वं मूलप्रकृतौ नित्यस्थितत्वञ्चाभिसंहितम् ॥ ७२ ॥

इति सांख्यसंसारमोक्षादिनिरासः ॥

अथ मुख्यामुख्यप्रयोगानभिज्ञकल्पितां जीवन्मुक्तिं दूषयति । मुक्तिरिति ॥

सू० मुक्तिः प्राणाक्षदेहादिभिरुपधिभिरत्यन्तविश्लेषरूपा जीवद्भावोऽपि तैस्संगम इति विहतेर्जीवतस्सा कथं स्यात् ॥ आपस्तम्बादयश्च श्रुतिगतिभिरिमां युक्तिभिश्च व्युदासुर्जीवन्मुक्तादिशब्दः क्वचिदुपचरितस्तत्समावस्थयैव ॥ ७३ ॥

यदि कतिपयनिवृत्तिमात्रे मुक्तिशब्दः तदाऽतिप्रसङ्ग इति भावः । नित्यसिद्धस्य पुरुषस्य जीवनमपि ह्युपाधिविशेषसम्बन्ध इत्याह । जीवद्भाव । इति । फलितमाह । विहतेरिति । अत्र महर्षिवाक्यविरोधमप्याह । आपस्तम्बादय । इति । प्रागेवैतत् प्रदर्शितम् अमृत इह भवति । जीवन्मुक्ता भवन्तीत्यादेः का गतिरित्यत्राह । जीवन्मुक्तादिशब्द इति । श्रुत्यादिष्वप्यगत्यामुपचारः स्वीकृत इति भावः ॥ ७३ ॥

इति जीवन्मुक्तिभङ्गः ।

अद्वैतिनस्त्वाहुः श्रवणमननाभ्यां भेदसत्यत्वविस्रम्भे निरस्तेऽप्यविद्याबाधकमद्वैतज्ञानं नोदेति ध्यानेन तु निरस्तसमस्तभेदवासनस्याद्वैतवाक्यादविद्यानिवर्तकधीसंभवः निवृत्ताविद्यस्यापि द्विचन्द्रदर्शनन्यायेन यावच्छरीरं बाधितानुवृत्तिः स्यात् तादृश्यां

दशायां ब्रह्मविज्जीवति च मुक्तश्चेत्यव्याहतिरिति एतदपि दूषयति । चन्द्रैकत्वेति ॥

मू० चन्द्रैकत्वादिबुद्ध्या न हि विलयमियाच्चक्षुरर्थादिदोषस्स्याद् बाधे पि द्विचन्द्रप्रभृतिषु हि ततो भ्रान्तिमात्रानुवृत्तिः ॥ विस्रम्भाभावतः स्यात् फलमपि न तु ते जाघटीति द्वयन्तद् ब्रह्मान्याशेषबाधादनतिबलतया बाध्यतो बाधकस्य ॥ ७४ ॥

तच्च तावल्लोके बाधितानुवृत्तिर्युज्यते बाधकज्ञानेन भ्रमानुवृत्तिहेतोर्दोषस्याबाधितत्वात् न हि चक्षुर्गतास्तिमिरादयः शुक्त्यादिगता वा दूरत्वसादृश्यादयो बाधकज्ञानेनापह्नियन्ते सत्यत्वात् तत्प्रकाश्याकारविरोधित्वाभावान्न वाध्यन्ते इति भावः । माचचाऽभिप्रेतं व्यनक्ति । विस्रम्भाभावत । इति । एवं बाधितानुवृत्तिर्बाधकधीसाफल्यञ्च त्वन्मते न सम्भवतीत्याह । न त्विति । प्रथमस्यासंभवं विवृणोति । । ब्रह्मान्येति । ब्रह्मव्यतिरिक्तं कृत्स्नं मिथ्येति हि बाधकप्रत्ययः । तच्च यदि महीयसी बलीयसी च मूलाऽविद्या विलीयेत कथन्तदा तूलकल्पस्तदेकदेशोविलयं न गच्छेद्यदि चास्य ज्ञानादन्यद् बाधकं तदाऽपसिद्धान्तःसत्यत्वप्रसङ्गश्च स्यात् । अविद्याबाधकेनाबाधितञ्च कथमन्यदपि ज्ञानं बाधेत । अहेतुकनिवृत्तिश्च प्रागेव दूषिता । अन्त्यशब्दचरमसंस्कारादीनामपि हेतुविशेषत एव निवृत्तेरच बाधकफलस्याप्यसंभवमाह । अनतिबलतयेति । अयं भावः श्रवणमननदशायामेव हि निषेध्यप्रपञ्चज्ञानं निषेधकज्ञानञ्चाविद्यामूलमित्यध्यवस्यति तथा सत्येकदोषप्रसूतत्वे परत्वस्याकिञ्चित्करत्वात् अन्यथा माध्यमिकविजयप्र-

षङ्गाच्च नोत्तरे बाधकत्वविस्रम्भः स्यादत एव न तदर्थध्याने प्रवर्त्तेत न च रागद्वेषादिभिरुच्छिन्नतः स्यादिति ।

इं : परोक्तबाधितानुवृत्तिभङ्गः ।

अथ मुक्तिविषये वादिनाम्प्रलापान् संक्षेपेणोद्गृह्णन् प्रत्येकदोषःश्रोतृभिः स्वयमूह्य इति मत्वा साधारणं श्रुतिविरोधन्तावत् सूचयति । स्वातन्त्र्यमिति ॥

सू० स्वातन्त्र्यं ब्रह्मणैक्यं पशुपतिसमतां वासनोच्छेदमात्रं धीसन्तानप्रणाशन्निजमतिसुखयोर्नित्ययोस्सन्निकर्षं चित्तेन स्वात्मसौख्यानुभवमुपलवद्भावमूर्द्ध्वप्रयाणं शून्याद्वैतञ्च मुक्तौ श्रुतिरुपकृतये कल्पतां जल्पतां वः ॥ ७५ ॥

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु तत्त्वमुक्ताकलापे जीवसरो द्वितीयः ॥

सिद्धिवासनावासितावासितमनोभिरेतद्दृश्यते न च तद्युक्तम् । सर्वेषां सर्वनियन्तृत्वायोगात् ब्रह्मणैक्यन्तु चप्यन्तैकदेशिनस्सङ्गिरन्ते तत्र साम्यसाधर्म्यसहशब्दादिभिर्बाधः भेदसहं केवलं वा नित्यतादात्म्यमिच्छतां किमिदानीमैक्यं साध्यम् एकत्वनानात्वविभाग.विभागशक्तिमत्त्वपक्षश्च न प्रामाणिकैः श्रद्धेयः कल्पादा उत्पन्नाः कल्पान्ते ब्रह्मणैक्यं लभन्त इति पक्षे त्वकृताभ्यागमकृतविप्रणाशप्रसङ्गोऽप्यधिकः । पशुपतिसमतां तन्मतस्थाः प्राहुः तत्रावान्तरभेदेषु विशेषश्च द्रष्टव्यः प्रत्युक्तन्तन्मतं पत्युरस्यामञ्जस्यादिति । वासनोच्छेदमात्रन्तु

वौद्धैकदेशिनः तत्र सर्वज्ञानसन्तानैकतापत्तिः स्यान्न वेति विभागस्तत्र तत्प्रक्रियाप्रतिषेध एवोत्तरम् । धीसन्तानप्रणाशन्तु प्रज्ञाकरमतस्थाः तत्रान्तिमस्यार्थक्रियाविरहादसत्त्वे तत्पूर्वेषामपि तथेति शून्यवादावतारः । निजमतिसुखयोर्नित्ययोस्सन्निकर्षन्तु न्यायैकदेशिनः । इदञ्च मतं प्रागेवापास्तम् । चित्तेन स्वात्मसौख्यानुभवं भाट्टाः । उपलवद्भावन्त्वौलूक्याः । न्यायमीमांसैकदेशिनश्च । अनयोरपि साधकासंभव उक्तः । ऊर्द्ध्वप्रयाणन्तु जैनाः । तत्र भूम्यान्नित्यपतनवन्नित्योर्द्ध्वगमनमेके । अन्ये तु लोकाकाशमतिक्रम्य सकललोकमस्तकस्थायिन्यलोकाकाशे देहमेकमनेकं वा परिगृह्य वसन्त इति । इदन्तु तत्कथामात्रसिद्धं शून्याद्वैतन्तु माध्यमिकाः । तत्र सर्वतोमुखी व्याहतिरूह्या तथा च तत्प्रतिक्षेपसूत्रं सर्वथाऽनुपपत्तेश्चेति चकारोऽनुक्तान्मुक्तितारतम्यचिन्मात्रस्फुरणादिपक्षान् संगृह्णाति । एतत् सर्वं जल्पतां प्रतिरूपकृतये कल्पतामित्युपालम्भकाक्वा बाधकत्वपरं, सर्वभूतदयालुत्वस्मरणादिदं सानुग्रहवाक्यं वा आयुर्वेदविद्भिरप्यन्वाख्यायते आत्मद्रोहममर्य्यादं मूढमुन्मुक्तसत्पथम् । सुतरामनुकम्प्येत नर*कार्चिष्मदिन्धनमिति । तदिह परात्परं पुरुषमुपैति दिव्यमित्युपनिषत्सिद्ध एव मोक्ष इतिभावः ॥ ७५ ॥

इति परमते विरुद्धानामर्थानां मोक्षविरुद्धत्वप्रतिपादनम् ।

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य श्रीमद्वेदान्ताचार्य्यस्य कृतिषु तत्त्वमुक्ताकलापव्याख्यायां सर्वार्थसिद्धौ जीवसरो द्वितीयः ।

* नरकदुःखाग्नेर्ज्वलदिन्धनमित्यर्थः ।

श्रीमते रामानुजाय नमः ।

श्रीमते वेदान्तमहागुरवे नमः ।

अथ तृतीयो नायकसर आरभ्यते

तदेवं प्रत्यगर्थद्वये प्रथमोद्दिष्टो जीवश्चिन्तितः । अथेश्वरश्चिन्त्यते तत्र तावत् प्रमाणविशेषात् सिद्धिं प्रस्तौति । व्याख्याद्यव्याकुलाभिरिति ॥

मू० व्याख्याद्यव्याकुलाभिः श्रुतिभिरधिगतो विश्वनेता स विश्वं क्रीडाकारुण्यतन्त्रः सृजति समतया जीवकर्मानुरूपम् ॥ रोषोऽपि प्रीतये स्यात् सुनिरसविषयस्तस्य निस्सीमशक्तेः स्वेच्छा*तस्सर्वसिद्धिं वदति भगवतोऽवाप्तकामत्ववादः ॥ १ ॥

धर्मप्रवृत्तियुक्तसर्वदेशकालव्यापितयाऽन्यथाकरणशङ्कानर्हाभिरित्यर्थः । यद्वा अनुमानवद्व्याप्तिपक्षधर्मतानिरूपणजनितव्यभिचारसंभवादिरहिताभिरिति । श्रुतिभिरिति भ्रमादिमूलत्वासंभवख्यापनम् शब्दानां सिद्धे व्युत्पत्तिस्तत्र तात्पर्यञ्च साधयिष्यते । विश्वनेता विश्वेषां यथेष्टं विनियोक्ता स कथं श्रुतिभिरधिगतः कारणवाक्येषु सदादिशब्दैस्तद्धेदन्तर्ह्यव्याकृतमासीदित्यादिप्रदर्शितस्याव्यक्तापरपर्यायस्य प्रधानस्याभिधानादिति चेत् तन्न अव्यक्तस्य तदैक्षत सोऽकामयत इत्याद्युक्तस्वसंकल्पपूर्वकसृष्ट्याद्यसम्भवान्न खल्वीक्षणादिशब्दो भाक्तः मुख्ये बाधकाभावस्य साधकभूयस्त्वस्य च शारीरके स्थापितत्वात्

* स्वेच्छायामिति पा० ।

सदेव सोम्येदमग्र आसीदित्याद्यचेतनसामानाधिकरण्यात् कारणमचेतनमिति चेन्न सामानाधिकरण्यस्य स्थूलसूक्ष्मचिदचिद्वस्तुविशिष्टविवक्षयाऽप्युपपत्तेः। सर्वञ्च जगत् कर्तुश्शरीरतयाऽऽम्नातम्। अस्मान्मायी सृजते विश्वमेतदिति ईदृशी च सृष्टिस्सोऽभिध्याय शरीरात् स्वादित्युपबृंहिता। अधीयते चाथर्वणिकाः विकारजननीमज्ञामष्टरूपामजां ध्रुवां ध्यायते ऽध्यासिता तेन तन्यते प्रेर्य्यते पुनः सूयते पुरुषार्थश्च तेनैवाधिष्ठिता जगत्। गौरनाद्यन्तवती सा जनित्री भूतभाविनीति। अगीयत चेतत् मयाऽध्यक्षेण प्रकृतिस्सूयते सचराचरमिति अतस्साक्षात्-संकल्पाश्रयत्वं व्यवधानेन तु विकाराधारत्वमिति सर्वाविरोधः। ननु सद्विद्यायां मृत्पिण्डलोहमणिनखनिकृन्तनदृष्टान्तैर्य्यथा पृथिव्यामोषधयस्सम्भवन्तीत्याथर्वणिकवाक्याच्चाचेतनमात्रोपादानत्वं जगतः प्रतीयत इति चेन्न मृत्पिण्डादिनिदर्शनानामेकविज्ञानेन सर्वविज्ञानस्यासंभवचोद्यपरिहारपरत्वाद्यथा पृथिव्यामिति वाक्यस्य त्वेकस्माद्विचित्रानन्तोत्पत्तिसंभवार्थत्वान्न तु चेतननैरपेक्ष्यमेतैस्सूच्यमन्यथा यथा सतः पुरुषात् केशलोमानीति चेतनसन्निधिसापेक्षोत्पत्तिनिदर्शनायोगात्। अस्तु तर्हि तद्वदयस्कान्तादिनयेन निर्व्यापारपुरुषसन्निधानात् प्रकृतेः प्रवृत्तिस्सर्वस्य च कार्य्यजातस्य जीवकर्महेतुकत्वात् अपहतपाप्मत्वसर्वज्ञत्वादीनाञ्च तस्मिन्नवस्थाभेदेनोपपत्तेरिति तन्न यथोर्णनाभिस्सृजते गृह्णते चेति प्रथमोक्तदृष्टान्तवैघट्यात्।

प्रकृतिं पुरुषञ्चैव प्रविश्यात्मेच्छया हरिः।
क्षोभयामास संप्राप्ते सर्गकाले व्ययाव्ययाविति॥

पुरुषस्यापि पराधिष्ठानेन जगत्सृष्ट्युपयोगोक्तेः। न च जीवस्य संवर्तसमयसंहृतकरणकलेवरस्य मुख्येक्षणादिसंभवः। मुक्तस्तर्हि प्रकृतिपुरुषयोरधिष्ठाता स्यात्। तस्य सत्यसंकल्पस्य स्वेच्छया पितृ-

लोकादिविचित्रकार्य्यप्रवृत्त्वाम्नानान्मुख्येक्षणसिद्धेः जीवान्यत्ववादाश्च सिद्धा*न्यत्वविषयाः स्युः । ममैवांशो जीवलोके जीवभूतः सनातन इति जीवस्यावस्थारूपत्वोक्तेः मुक्तस्यैव हिरण्यगर्भादिदेहाधिष्ठानेन सृष्टिस्थित्यादिहेतुत्वमिति सर्वपुराणादिसामरस्यमिति तदपि मन्दम् । एकस्यैवानाद्यन्तस्य सर्वमुक्तोपसृप्यत्वश्रवणात् मम साधर्म्यमागताः । स्वातन्त्र्यमतुलं प्राप्य तेनैव सह मोदत इत्याद्युपबृंहणविरोधाच्च । सायुज्यं प्रतिपन्ना ये तीव्रभक्तास्तपस्विनः । किङ्करा मम ते नित्यं भवन्ति निरुपद्रवाः ॥ इति च भगवदुक्तिः । मोक्षधर्मे च अनेन साम्यं यास्यामीति मुमुक्षोरभिसन्धिवचनम् । प्रपञ्चितञ्चैतत् परेण परधर्मेण भवत्येष समेत्य वै । इत्यादिभिरेकस्य च सर्वप्रशास्तृत्वं† निस्सीमत्वञ्च श्रुतिस्मृतिशतसिद्धम् । अपि च मुक्तास्सर्वे किं संभूय जगत् सृजन्ति उत प्रतिनियतकार्याः । नाद्यः स यदि पितृलोककामः इत्यादिभिरव्यवस्थितेच्छादृष्टेः, सर्वेषामेकरूपेच्छाक्लृप्तौ गौरवात् तथा चाश्रवणात् । न द्वितीयः इदं सर्वमसृजतेत्यादिभिरेकस्य सर्वकर्तृत्वोक्तेः समुदायैकत्वविवक्षा तु क्लिष्टा निर्मूला च श्रुत्या क्लृप्त्या वा तदयोगात् । अतः पतिं विश्वस्यात्मेश्वरमिति श्रुत एक एव सर्वकर्त्तेश्वरः ।

प्रयोजनादिविरहान्न कर्त्तेश इति ब्रुवन् ।
तस्य सिद्धावसिद्धौ च व्याघातादिपराहतः ॥

माभूदनुमानं प्रसङ्गस्तु स्यादिति चेत् न प्रयोजनशून्यत्वे कर्तृत्वं न स्यात् ; अस्ति च कर्तृत्वमतः प्रयोजनवानिति विपर्ययवि-

* बद्धान्यत्वाविषया इति पा० ।

† प्रशासितृत्व-प्रशास्तृत्वशब्दयोः साधुभावं व्याकरणभावनाभावितान्तःकरणाः स्वयं विभावयन्तु ।

श्रमात् । तथा सति नेश्वरस्य बाधः प्रयोजनसाधकानुग्रहार्थत्वात् । अथ प्रयोजनवत्त्वे कर्मवश्यत्वप्रसक्तिः तदभावात् प्रयोजनशून्य इति । एवमपि प्रयोजनशून्यविश्वकर्तृत्ववादिनामिष्टप्रसङ्गः प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तेत इति चेत्तर्हि प्रवृत्तिदर्शनात् प्रयोजनं किञ्चिदङ्गीकुरुष्व । स्वार्थे परार्थे वा प्रवर्तते इत्यत्रोभयार्थमित्याह । स इति । विषमसृष्ट्या साम्यं दुःखसृष्ट्या कारुण्यञ्च भज्येतेत्यत्राह । समतयेति । साम्यकारुण्यवत् यथा कर्म फलदायित्वमपि श्रुतिबलादङ्गीकार्यम् । अतस्तदविरोधेन गुणान्तरं व्यवस्थाप्यमिति भावः । दुःखनिवर्तनांशे कारुण्यसिद्धिः । ननु स्वसृष्टदुःखनिवर्तनेन कारुण्यलाभाद् वरं दुःखानुत्पादनमेव अतस्सुखैकतानं जनयेत् जगत् करुणया सृजन्निति चेत् किमयमीश्वरं प्रत्युपदेशः अन्यान् प्रति वा । नाद्यः तस्य परोपदेशाधीनप्रवृत्तित्वाभावात् । न द्वितीयः तत्तत्प्रमाणसिद्धवस्तुस्वभावानामपर्य्यनुयोज्यत्वात् । स्मर्य्यते च ।

शक्तयस्सर्वभूतानामचिन्त्यज्ञानगोचराः
यतोऽतोब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः ।
भवन्ति तपतां श्रेष्ठ पावकस्य यथोष्णतेति ॥

ननु दयावैकल्यपरिहारायाऽनुग्रहांश एव भगवतः कर्तृत्वमङ्गीक्रियतां, स्यादेतदेवं यदि वयमेव स्वेच्छया वस्तु व्यवस्थापयामः किन्तु प्रमाणदृष्ट्यैव अतो निग्रहांशे ऽपि निरङ्कुशं कर्तृत्वम् अथ स्यात् क्रोधो हि निग्रहहेतुः स च स्वाश्रयदुःखाविनाभूतः अरोषणो ह्यसौ देव इति प्रसिद्धस्य च कथं क्रोध इति चेन्न एतौ द्वौ विबुधश्रेष्ठावित्यादिषु कण्ठोक्तेः । भाक्तोऽयं क्रोधशब्द इति चेत्तन्न प्रसादशब्दस्यापि तथात्वप्रसङ्गात् । अस्त्वेवमिति चेन्न भित्तुपादप्रसारणन्यायेन निरीश्वरवादावतारादतः क्रोधावश्यंभ्भावादीश्वरस्यापि

दुःखावश्यम्भाव इत्यत्राह । रोषोऽपीति । क्रोधरोषादिशब्दार्थो हि परपीडेच्छामात्रं स तावन्न स्वरूपतो दुःखं दुःखहेतुत्वमप्यस्याशक्यविषये तथा दृष्टः स्मर्य्यते हि ।

द्वाविमौ कण्टकौ तीक्ष्णौ शरीरपरिशोषणौ ।
यश्चाधनः कामयते यश्च कुप्यत्यनीश्वरः ॥ इति ।

न सर्वशक्तेरीश्वरस्य चिकीर्षितमशक्यं किञ्चिदस्ति, अतोऽस्य न दुःखाय क्रोधः प्रत्युत निग्रहो विहारेण प्रीतये स्यादिति । ननु इह विहारः क्रीडा सा चारतिपरिहारार्था लोके प्रसिद्धार्थो जगतः स्रष्टारमधिकृत्य स एकाकी न रमेतेति श्रूयते अतः क्रीडायोगादरतियोगः तदभावाद्वा तदभावः स्यात् ,मैवं क्रीडा हि प्रीतिविशेषप्रभवः स्वयंप्रियो व्यापारः । अन्यथा तल्लक्षणमव्यापकं स्यादतोनारतिप्रसङ्गः । अरतिश्रुतिश्च तदानीमेकाकित्वमनिष्टमतोब्रह्मादिस्रष्टावुद्युङ्क्तेत्यभिसन्धत्ते न पुरुषान्तरवदप्रवृत्तिजन्यदुःखभयात् प्रावर्त्ततेति । अथास्त्ववश्यस्य दुःखानर्हत्वात् तथाऽपि क्रीडार्थं सृजतो विश्वं विहन्येत कृतार्थतेत्यत्राह । स्वेच्छायामिति । अवाप्तसमस्तकामवादो हि न काम्यनिवृत्तिपरः अवाचकत्वात् सत्यकामत्वश्रुतिविरोधाच्च । नापि कामनानिषेधार्थः सोऽकामयत सत्यसंकल्प इत्यादिबाधादतो यथाकामं सर्वसिद्धिमभिसन्धत्ते इति ॥

सहकारिभिरारम्भे न स्वातन्त्र्यं विहन्यते ।
तत्सद्भावप्रवृत्त्योश्च स्वाधीनत्वव्यवस्थितेः ॥
कारकान्तरवैधुर्य्ये किमपेक्ष्य स्वतन्त्रता ।
शरीरमप्यधिष्ठेयं सहकार्येव कुर्वतः ॥
निरपेक्षस्वतन्त्रस्य सहकारिमतस्सदा ।
अप्रवृत्तिः प्रवृत्तिर्वा नित्यं स्यादिति चेन्न तत् ॥

तत्तदिच्छाविशेषेण तत्क्रमस्योपपत्तितः ।
इच्छासन्तत्यनादित्वान्न च मूलक्षयः क्वचित् ॥
गुणेतरविपर्य्यासमन्योन्यसहकारिताम् ।
विवक्षातः क्वचित् प्राहुः निस्समत्वान्निमित्तताम् ॥
प्राप्यः परमभोग्यत्वान्निषेव्यः स्वामिभावतः ।
शक्तिकारुण्यभूम्ना च शरण्यस्सीदतां प्रभुः ॥
बहिरन्तश्च तद्व्याप्तिस्तत्र यत्रोभयम्भवेद् ।
त्रिभोरणोश्च न बहिर्नान्तस्तस्मान्न सा तयोः ॥
विभोर्नच्छिद्रमणुना नाणूनां विभुना च तत् ।
यथाप्रमाणं संबन्धमात्रमेव तयोर्भवेत् ॥
आकाशव्यतिभेदादेरसम्भाव्यस्य चोदना ।
आकाशादिकमिच्छद्भिरनिच्छद्भिश्च दुर्वचा ॥
न विभज्येत गच्छद्भिर्न विहन्ति गतिञ्च यत् ।
अस्पर्शत्वात्तथाभूतं विभु वाऽविभु वाऽस्ति नः ॥
विभ्वणुप्रतिषेधेन मध्यमञ्च निषेधता ।
सर्वासत्त्वञ्च दुस्साधं सदसत्त्वविकल्पतः ॥
समस्तमूर्त्तसंयोगस्सम्भवेद्यस्य तद्विभुः ।
तत्संभावोज्झितं द्रव्यं महत्त्वाणुत्वचिन्तितम् ॥
अणोरणीयान्महतोमहीयानित्यनुश्रवः ।
विश्वव्यापित्वतात्पर्य्यान्न मिथोबाधमृच्छति ॥
यदल्पपरिमाणेन पृथूनां ग्रसनं श्रुतम् ।
अचिन्त्यमिदमित्येके चिन्तनश्रमभीरवः ॥

इत्यागमिकेश्वरसिद्धिः ।

धकः स्यादिति'। एतच्च मध्येपवादा इति न्यायमनाश्रित्योक्तं, तदाश्रयणे त्वतो लोपस्यैव बाधकः स्यात्। दीर्घस्तु परत्वात्स्यादेव। 'स्यादेतदेवमित्यादि'। दीर्घविधौ तुरुस्तुशम्यमः सार्वधातुकइति प्रकृतं 'भूसुवोस्तिङी'ति च। 'येय इत्यविभक्तिको निर्द्देश इति'। येय इत्यस्मिन्समुदाये या इत्यविभक्तिको निर्देश इत्यर्थः। 'य इति वेति'। याशब्दात्षष्ठी, 'आतो धातो' रित्याकारलोपः। केचित्तु अतो यास् इति सकारान्तानुकरणं पठन्ति॥

"आतो ङितः"॥ आकारमात्रस्य ङितोसम्भवादातो ङित इति व्यधिकरणे षष्ठ्यौ, ङितोवयवस्यात इत्यर्थः। उदाहरणेषु स्वरितत्वादात्मनेपदं, ननु गाङ्कुटादिसूत्रे परत्र परशब्दप्रयोगादध्याह्रियमाणो वतिः सप्तमीसमर्थादध्याहर्त्तव्यः, ङितीव ङिद्वदिति, अन्यथा चुकुटिषतीत्यत्र सनो ङित्वादात्मनेपदप्रसङ्गादित्युक्तं, सार्वधातुकमपिदित्यत्रापि तदेवानुवर्त्तते, ततश्च पूर्वस्य कार्यं प्रत्येव सार्वधातुकस्य ङित्त्वं न स्वकार्ये प्रतीत्ययुक्तान्युदाहरणानि। लङ्लङोस्तु युक्तमुदाहर्तुम् अपचेतामकरिष्येतामिति' अस्ति ह्यत्रापि स्थानिवद्भावेन ङित्वमत आह। 'सार्वधातुकमपिदित्यत्रेत्यादि'। 'मिमाते मिमाये इति'। असति तपरकरणे श्नाभ्यस्तयोरात इति लोपात्परत्वाद्यमेव विधिः स्यात्॥

"आने मुक्" ॥ अत्र आनइति सप्तम्यचरितार्थो पूर्वत्र कृतार्थाया अत इति पञ्चम्याः षष्ठीं प्रकल्पयति तस्मिन्निति निर्दिष्टे पूर्वस्येति, तत्र विशेषणविशेष्यभावे कामचारादङ्गेनाद्विशेष्यते न त्वताङ्गमित्यभिप्रायेणाह। 'अकारमात्रभक्तोयमिति'। अङ्गस्यावयवो योकारस्तस्य मुगित्यर्थः, किमेवं सति भवतीत्यत्राह। 'अदुपदेशग्रहणेनेति'। उपदेशे अत् अदुपदेशः, यदि त्वकारान्ताङ्गभक्तः स्यात्ततस्तदेवाङ्गं न व्यवदध्यात् तदवयवं त्वकारं व्यवदधात्येवेति स्वरो न स्यात्, न च स्वरविधौ व्यञ्जनमविद्यमानवत्, किं कारणं, हलस्वरप्राप्तौ व्यञ्जनमविद्यमानवदिति परिभाषाया भाष्यकारेण शिथिलतत्वात्, अन्यथा ऽग्निचिद्वानित्यादौ ह्रस्वनुड्भ्यां मतुबिति स्वरप्रसङ्गात्, यदि पुनरयमभक्तो मकारो विकरणवन्मध्ये

क्रियेत, अभक्ते मुकि स्वरो न स्यादित्येव, यदि पुनरयं परादिः क्रियेत आनस्य मुडिति, परादित्वे दीर्घत्वप्रसङ्गः पचमानः, 'अतो दीर्घो यञी'- ति दीर्घत्वं प्राप्नोति, पाक्षिक एष दोषः, कतरस्मिन्पक्षे, यदि सार्वधातु- कइत्येवं तत्, अथ ङीत्येव तत्तदा न दोषः, तदयं भक्तस्तत्रापि पूर्वान्तः तत्राप्यकारस्य मुगिति स्थितम् । 'यद्येवमिति' । यञकारमात्रभक्तत्वा- त्तद्ग्रहणेन गृह्यतइत्यर्थः । 'अध्यर्द्धमात्र इति' । अर्द्धमधिकं यस्याः सा अध्यर्धा मात्रा यस्यासावध्यर्धमात्रः । 'लसार्वधातुकानुदात्तत्वमपि तर्हि न प्राप्नोतीति' । तद्विधावपि तपरनिर्द्देशात् । तत्राह । 'उपदेशग्रहण- मिह क्रियतइति' । 'तथा चेति' । यदा द्विमात्रत्वेपि भवति तदा का शङ्का ऽध्यर्द्धमात्रत्वइति भावः ॥

"ईदासः" ॥ आस इति पञ्चम्यचरितार्था पूर्वत्र कृतार्थाया आन इति सप्तम्याः षष्ठीं प्रकल्पयति ॥

"अष्टन आ विभक्तौ" ॥ सौत्रत्वान्निर्देशस्य अल्लोपो न कृतः । 'व्य- क्तिनिर्द्देशोयमिति' । यथाश्रुतनिरनुनासिकाकारव्यक्तिर्निर्द्दिश्यतइत्यर्थः । जातिनिर्द्देशस्तु दुष्ट इत्याह । 'आकृतिनिर्द्देशे त्विति' । आकृतिर्जातिर्न संस्थानं, जातिनिर्द्देशे हि शुद्धाया जातेरादेष्टुमशक्यत्वात्तदाधारभूतानां व्यक्तीनां विधानं, तत्र यद्यपि दीर्घोच्चारणसामर्थ्याच्च ह्रस्वप्लुतव्यक्तीनां प्रसङ्गः, दीर्घव्यक्तयस्तु सर्वाः प्रसक्तास्तत्रान्तर्यतोनुनासिकव्यक्तिरेव स्यात्, तस्याः पूर्वेण सह सवर्णदीर्घोप्यनुनासिक एव स्यात् । 'विकल्पेन चाय- मित्यादि' । यथा च दीर्घग्रहणं कृतात्वनिर्द्देशश्चास्मिन्नर्थे लिङ्गं तथा तत्रैव व्याख्यातम् । 'तदन्तविधिश्चात्रेष्यतइति' । अङ्गाधिकारे तस्य तदुत्तरपदस्य चेति वचनात्, एकवचननिर्द्देशात्स्वरूपस्य ग्रहणं नार्थस्य, तेनोपसर्जनेप्यष्टनि भवति, तत्रापि विकल्पितत्वात्प्रियाष्टा प्रियाष्टानौ प्रियाष्टान इत्यपि भवति, तत्रापि भसंज्ञाविषये आत्वपक्षे आतो धातो- रित्यकारलोपमिच्छन्ति, प्रियाष्टः पश्येत्यादि, आत्वाभावपक्षे त्वल्लोपे ष्टुत्वं, प्रियाष्ट्णः इत्यादि भवति ॥

"रायो हलि"॥ 'मृजेर्वृद्धिरित्यतः प्राग् विभक्त्यधिकार इति'। पूर्वसूत्रान्ते ग्रन्थोयं पठितव्यः॥

"युष्मदस्मदोरनादेशे"॥ 'युष्मदस्मदिति'। पञ्चम्या अदिति भ्यसोद्भावः। 'हलीत्यधिकारादप्यत्र न स्यादिति'। न चादेशो हलादिरस्ति, भ्यसोभ्यमित्ययं तु अभ्यमादेशः। 'उत्तरत्रेति'। योचीति यत्वमादेशे माभूत्त्वमहमित्यादौ शेषे लोप इति शेषव्यवस्थार्थं च। 'तदिहैव क्रियतइति'। लाघवे विशेषाभावात्॥

"द्वितीयायां च"॥ उदाहरणेषु 'ङे प्रथमयोरमि'ति विभक्तेरम्भावः॥

"प्रथमायाश्च द्विवचने भाषायाम्"॥ 'युवयोरिति'। ननु च योचीति यत्वमत्र बाधकं भविष्यति। प्रथमाद्विवचनेपि तर्हि शेषेलोपो बाधकः स्यात्, अथ तस्य वचनाद्बाधः, यत्वस्यापि बाधः स्यात्, पुरस्तादपवादन्यायेन वा यत्वस्यैव बाधः स्यात्॥

"योचि"॥ 'शश्यमकर्त्तुमचीत्येतदिति'। कथम्, अनादिष्टायां विभक्तौ विधीयमानं यत्वमुत्सर्गस्तत्रैव हलादावात्वमपवादः। 'त्वत् मदिति'। 'एकवचनस्य चे'ति ङसेरदादेशः॥

"शेषे लोपः"॥ उपयुक्तादन्यः शेषस्तस्यैव संग्रहश्लोकः। 'पञ्चम्याश्चेत्यादि'। पञ्चम्यादीनां सम्बन्धीनि यान्यद्विवचनानि, अयं तावच्छेषस्तत्र शेषे लोपो विधीयतइति अद्विवचनानीत्येतद्भाषापेक्षं द्रष्टव्यं, छन्दसि तु युवं वस्त्राणीति द्विवचनमपि शेष एव। 'शेषग्रहणं विस्पष्टार्थमिति'। कथं, विभक्तिमात्रे लोपः तस्यानादिष्टायां विभक्तौ यत्वमपवादः, अस्यापि हलादावात्वमपवाद इत्यसङ्करेणात्त्वयलोपाः सिध्यन्ति अनादेशग्रहणं तु क्रियमाणेऽग्रहणे यत्वलोपयोर्विषयविभागार्थं कर्तव्यमेव। 'सन्निपातलक्षण इति'। विभक्तिसन्निपातकृतं युष्मदस्मदोरकारान्तत्वं तद्यदि टापो निमित्तं स्यात्तत्सन्निपातं विहन्यात्। एतच्च त्यदादिशब्दवत्स्त्रीलिङ्गत्वमभ्युपेत्योक्तम्, इदानीं च लिङ्गमेव नास्तीत्याह। 'अलिङ्गे

वेति'। 'केचित्त्विति'। टाम्बिभृत्यर्थमेव तएवमिच्छन्ति। 'कथमिति'। यत्राकारो यकारश्च न विहितः स शेषस्तत्र विधीयमानो लोपो अलो[1]न्त्यस्य, त्यन्तस्यैव युक्त इति प्रश्नः। अनन्तरोक्तं शेषग्रहणस्य वैयर्थ्यं हृदि कृत्वाह। 'वक्ष्यमाणेति'। आदेशा वक्ष्यमाणा यस्य स वक्ष्यमाणादेशः। कः पुनरसावित्याह। 'ते चेति'। 'मपर्यन्ताद्योन्यः स शेष इति'। स च टिरेव तत्रायं लोप इति स्थानिनोऽधिकरणत्वविवक्षया सप्तमी, किमर्थं पुनर्लोप इत्युच्यते न त्यदाद्यत्वेनैव सिद्धं, न सिध्यति, द्विपर्यन्तास्त्यदादय इति वचनात्, यदा चोपसर्जने युष्मदस्मदी तदा त्यदाद्यत्वं न सिध्यति, टिलोपपक्षे तु सुतरामारम्भणीयम्॥

"मपर्यन्तस्य"॥ मपर्यन्तस्येत्यवयवस्य स्थानित्वेन निर्देशाद्युष्मदस्मदोरित्यवयवषष्ठी विज्ञायते। मः पर्यन्तोऽवधिर्यस्य स मपर्यन्तः, यद्यपि द्वयोर्द्वौ मपर्यन्तौ तथाप्यभेदविवक्षयैकवचनम्। 'मपर्यन्तस्येति किमिति'। समुदाययोरप्यादेशे आदेशानामप्यदन्तत्वाद्दोषाभाव इति प्रश्नः। 'साकच्कस्य माभूदिति'। तन्मध्यपतितस्य तद्ग्रहणेन ग्रहणात्प्रसङ्गः। 'सर्वस्य माभूदिति'। साकच्कस्य माभूदिति तु नोक्तं, यस्मादकज्विधावुक्तं त्वया मया त्वयि मयि इत्यत्र सुबन्तस्य प्राक् टेरकजिति। 'अनिष्टं रूपं स्यादिति'। त्व्या म्येत्यनिष्टं रूपम्। अथ परिग्रहणं किमर्थं मान्तस्येत्येवोच्येत युष्मदस्मदोर्यो मान्तो भागस्तस्येत्यर्थस्तत्राह। 'मान्तस्येत्येव सिद्धेऽस्मिन्निति'। अस्मिन्साकच्कस्यादेशाभावे युवकामावकामिति रूपे वा। 'अवधिद्योतनार्थमिति'। पर्यन्तशब्देनावधिं द्योतयामीत्यर्थः, अन्यथा मान्तस्येत्युच्यमाने युष्मदस्मदोः समानाधिकरणं विशेषणं सम्भाव्येत, प्रत्येकसम्बन्धाच्चैकवचनं, ततश्च यत्र मान्ते युष्मदस्मदी तत्रैवादेशाः स्युः, अथापि वैय्यधिकरण्यमाश्रीयते तथापि यत्र मान्ते तत्र भेदाभावादादेशा न स्युः, व्यपदेशिवद्भावोऽपि प्रातिपदिकेन प्रतिषिद्धः, पर्यन्तशब्देन त्ववधिद्योतने तदुपादानसामर्थ्याद्युष्मदस्मदवयवेऽपि युष्मदस्मच्छब्दौ वर्त्तेते इति

१ विधीयमानोऽलोन्त्यस्यैवेति २ पु॰ पाठः।

सर्वत्रादेशसिद्धिः, वैय्यधिकरण्येन वा सम्बन्धे परिग्रहणसामर्थ्याद्व्यपदेशिवद्भावोऽप्रातिपदिकेनेति प्रतिषेधाप्रवृत्तौ मान्तयोरप्यादेशसिद्धिः। अपर आह सति शेषे पर्यन्तशब्दः, तेन सामानाधिकरण्यासम्भवाद्वैय्यधिकरण्येनै[1]वान्वयः, यदा तु मान्ते युष्मदस्मदी तदा नैत्रादेशा भवन्ति, तदिदमुक्तं, 'मान्ते माभूद्यदा तदेति'। यदा युष्मदस्मदी मान्ते तदैव माभूत् तदापि वा माभूदित्यर्थः। क्व पुनर्मान्ते युष्मदस्मदी इत्याह। 'ण्यन्तयोरिति'। युष्मानाचष्टे युष्मयति अस्मानाचष्टे अस्मयति णिचीष्ठवद्भावे टिलोपः, 'प्रत्ययोत्तरपदयोश्चे' त्यत्रैकवचनाधिकारात्त्वमादेशाभावः। क्विपि णिलोपः। ननु च विभक्तावादेशैर्भाव्यमत्र च णिलोपस्य स्थानिवद्भावाद्व्यवधानमत आह 'स्थानिवत्त्वं चेति'। णेः क्वौ लुप्तत्वात्तल्लोपस्यात्र स्थानिवत्त्वमस्तीत्यर्थः। क्वौ लुप्तं न स्थानिवदिति वचनं न तु क्वौ विधिं प्रति न स्थानिवदित्येवमिति भाष्यकारः, तत्र यो मन्यते मान्तयोरप्यादेशा भवन्तीति तन्मतेनोदाहरणानि, कृदन्तत्वाद्विभक्तयः, एकदेशविकृतस्यानन्यत्वाद्युष्मदस्मदाश्रयविभक्त्यादेशाः प्रकृत्यादेशाश्च त्वादयः, तत्र त्वाहौ सावित्यादिविषये ते भवन्ति, अन्यत्रादेशविभक्तौ लोपः, अजादौ यत्वं, हलादावात्वं, त्वं, युषां युयं युषां युषां युषान् युष्या युषाभ्यां युषाभिः तुभ्यं युषाभ्यां युषभ्यं युषत् युषाभ्यां, युषत्, तव युष्योः युषाकं युष्यि युष्योः युषासु, एवमस्मदोऽपि द्रष्टव्यं, मपर्यन्तापेक्षया तु शेष आश्रीयमाणे मात्परस्याभावाल्लोपाभावात् युष्मभ्यं युष्मदित्यादि भवति, यदा तु त्वामाचष्ट मामाचष्ट इति विगृह्य क्विप् क्रियते तदा प्रत्ययोत्तरपदयोश्चेति त्वमयोः कृतयोः प्रकृत्यैकाजिति प्रकृतिभावादसति टिलोपेऽत उपधाया इति वृद्धिः, यदि निष्ठितमङ्गं ततो वृद्ध्यभावः, त्वद्स् त्वाद्स् मद्स् माद्स् इति स्थिते मपर्यन्ताभावात्त्वाहौ सावित्यादेरप्रवृत्तौ वृद्धिपक्षे त्वामिति भवति। पक्षान्तरे तु त्वमिति, द्विवचने तु त्वां, जसि त्वं, द्वितीयादिषु तु त्वां त्वां त्वान् त्वया त्वाभ्यां त्वाभिः त्वम् त्वाभ्यां त्वभ्यं त्वत् त्वाभ्यां त्वत् त्व त्वयोः त्वाकं त्वयि त्वयोः त्वासु, एवमस्मदोऽपि, यदा तु द्विवचना-

१ वैयधिकरण्येनान्वयइति इं० पु० पाठः।

न्ताणिणच् क्रियते तदापि युष्मयत्यस्मयतीति णिचि भवति, विभक्त्यभावाद्युवावयोरभावः, एकार्थत्वाभावात्प्रत्ययोत्तरपदयोश्चेत्यस्याप्यभावः, विभक्तौ तु युवावादेशौ त्वाहौ सावित्यादि विषये तु तएव भवन्ति। ये तु मान्तयोरादेशौ नेच्छन्ति तेषां सो शेषेलोपपक्षे युषमसमिति भवति। पक्षान्तरे तु युष्ममस्ममिति, एवमन्यत्रापि द्रष्टव्यं, गहनोयं प्रक्रिया तर्क्क इत्युपरम्यते॥

"युवावौ द्विवचने"॥ 'द्विवचनइत्यर्थग्रहणमिति'। वक्तीति वचनं कृत्यल्युटो बहुलमिति कर्त्तरि ल्युट्, द्वयोरर्थयोर्वचने द्विवचने प्रथमाद्विवचनान्तश्चैतत्तदाह। 'द्विवचने युष्मदस्मदी इति'। के पुनस्ते इत्याह। 'द्व्यर्थाभिधानविषये इति'। एतच्च वचनग्रहणाल्लभ्यते, कथं, द्वित्वइति वक्तव्यं, विभक्तावित्येव, द्वित्वे या विभक्तिस्तस्यामित्यर्थः, अर्थग्रहणे सति यदिष्टं सम्पद्यते तत् दर्शयति। 'यदेति'। पारिभाषिकस्य द्विवचनस्य ग्रहणे तस्यास्मिन्विषयेऽभावाद्युवावादेशौ न स्यातामित्यव्याप्तिः स्यादिति भावः। 'आदेशान्तरेणन बाध्येते इति'। बाधस्तु परत्वादित्यत्रैव वक्ष्यते, अतिक्रान्तं युवामिति सो जसि चादेशान्तरेण बाधः, द्विवचनस्य तु पारिभाषिकस्य ग्रहणेपि सिद्धिरिति प्रथमाया अतिक्रमः, उत्तरत्रापि द्विवचनस्यातिक्रमेऽयमेव हेतुः, तत्र चानादेशे विभक्तौ हलादौ द्वितीयायां चात्वम्, अजादौ यत्वं, शेषे लोपः, ङेप्रथमयोरमित्यादयो विभक्त्यादेशाश्च यथायथं द्रष्टव्याः। 'परत्वादिति'। त्वाहादीनामवकाशः यदा बह्वर्थे युष्मदस्मदी अतिक्रान्तो युष्मानतित्वमत्यहं, युवावयोरवकाशः युवामावां द्व्यर्थत्वे सति, सावुभयप्रसङ्गे विप्रतिषेधः। 'यदा त्वित्यादि'। पारिभाषिकस्य ग्रहणे तत्रापि प्रसङ्ग इत्यतिव्याप्तिः स्यादिति भावः। 'अतिक्रान्तौ त्वामतित्वामिति'। प्रथमायाश्च द्विवचने भाषायामित्यात्वं, यदात्र पारिभाषिकस्य ग्रहणं तदा त्वमावेकवचनइत्यत्रापि पारिभाषिकस्यैकवचनस्य ग्रहणमिति मत्वेदमुदाहृतम्, अथापि तत्राप्यर्थग्रहणं तथापि बह्वर्थेतिप्रसङ्ग इत्याह। 'अतिक्रान्तौ युष्मानिति'। पूर्ववदात्वम्। 'एवं ज्ञेयमिति'। अतियुष्माम्। अतियुष्माभ्याम्। अतियुष्मयोः। एवमस्मदः॥

"यूयवयौ जसि" ॥ 'परमयूयमिति'। अत्र पारम्ययोगो यथासम्भवं द्रष्टव्यः। 'तदन्तविधिरत्र भवतीति'। अङ्गाधिकारे तस्य च तदुत्तरपदस्य चेति वचनात्। यदापि तदन्तस्य तदापि न सर्वस्य युष्मदस्मदोर्मपर्यन्तस्येत्यधिकारात्॥

"त्वाहौ सौ" ॥ 'त्वमिति'। यद्यप्यत्र त्वमावेकवचनइति त्वादेशः सिद्धः तथाप्यहादेशस्तावद्विधेयः, तत्र चाहः सावित्युच्यमाने युष्मदोपि प्रसङ्गः, अस्मदोहः सावित्युच्यमाने गौरवं स्यात्। तस्मादत्रापि त्वादेश एव विधेयः, किं चातिक्रान्तो युवां युष्मान्वा ऽतित्वमित्यत्र त्वादेशस्य शङ्कापि नास्ति॥

"त्वमावेकवचने" ॥ 'एकवचनइत्यर्थनिर्देश इत्यादि'। एतच्च द्विवचनइत्यर्थनिर्देश इत्येतदनुसारेण योज्यम्। अर्थग्रहणे यदिष्टं संपद्यते तद्दर्शयति। 'तदेति'। पारिभाषिकस्य त्वेकवचनस्य ग्रहणेत्र न स्यादित्यव्याप्तिः। 'अतिक्रान्तौ त्वामिति'। तदापि त्वमौ भवत इत्यस्योदाहरणम्। 'अतित्वामिति'। पूर्ववदात्वम्।' एवमन्यदुदाहर्त्तव्यमिति'। एतदतित्वमत्यह मित्यनेनापि सम्बध्यते। अतियूयम्। अतितुभ्यम्। अतितव। एवमस्मदः। अतित्वामतिमामित्यनेन तु सम्बन्धः स्पष्ट एव। अतित्वां पश्य अतित्वान् अतित्वाभ्याम्। अतित्वाभिः अतित्वभ्यम्। अतित्वत्। अतित्वयोः। अतित्वाकम्। अतित्वयि। अतित्वयोः। अतित्वासु। एवमस्मदः, अत्रानन्तरं यदा युष्मदस्मदी द्वित्वबहुत्वयोर्वर्त्तते समासार्थस्यैकत्वं तदा त्वमौ न भवतः, अतिक्रान्तं युवामतियुवाम्। अत्यावाम्। अतिक्रान्तं युष्मान् अतियुष्मान्। अस्मान्। एवं नेयमिति पठितव्यं पूर्वानुसारेण गम्यमानत्वान्न पठितम्॥

"प्रत्ययोत्तरपदयोश्च" ॥ 'एकवचने वर्त्तमानयोरिति'। एकार्थाभिधानविषययोरित्यर्थः, वस्तुकथनं चैतत् न तु शब्दार्थकथनम्। एकवचने इत्यस्य प्रथमाद्विवचनान्तत्वात्। 'त्वदीय इति'। त्यदादीनि चेति वृद्धसञ्ज्ञा, वृद्धाच्छः। 'त्वत्तर इति'। पारम्यवत्प्रकर्षयोगः। 'विभक्तावित्यधिकारादिति'। ननु च पूर्वसूत्रे विभक्ताविति न सम्भंत्स्यते।

कथमावृद्धेरनुवर्त्तमानं न सम्बन्ध्येत । एवमपि योगविभागो न कर्त्तव्यः त्वमावेकवचने प्रत्ययोत्तरपदयोरित्येकयोग एव कर्त्तव्यः, एवं हि चकारो न कर्तव्यो भवति । नैवं शक्यम्, एवं ह्युच्यमाने यथासङ्ख्यं प्राप्नोति युष्मदः प्रत्यये ऽस्मद उत्तरपदइति । अथ क्रियमाणेपि योगविभागे यावता निमित्तयोः साम्यं कस्मादेव यथासङ्ख्यं न स्यात्, नैष दोषः । चकारोत्र क्रियते स द्वयोरपि द्वे निमित्ते समुच्चेष्यति । 'ननु चेति'। चोदकः, प्रकृतिप्रत्यययोः पूर्वोत्तरपदयोश्च मध्ये या वर्तते सान्तर्वर्त्तिनी विभक्तिः । परिहरति । 'नैवं शक्यमिति' । लब्धुमिति शेषः । किं कारणमित्याह । 'तस्या लुका भवितव्यमिति'। लुक् तु सुपो धातुप्रातिपदिकयोरित्यनेन । 'अन्तरङ्गावित्यादि' चोदकः, विभक्तिमात्रापेक्षत्वादन्तरङ्गत्वं, लुक्तु पश्चादुत्पन्नः प्रत्ययमुत्तरपदं वापेक्ष्य धातुत्वप्रातिपदिकत्वयोरुपजातयोः प्राप्नुवन् बहिरङ्गः, यद्यप्ययं नित्यः तथापि नित्यान्तरङ्गयोरन्तरङ्गमेव बलीयः, यथोक्तं परनित्यान्तरङ्गप्रतिपदविधयो विरोधिनः संनिपाते तेषां मिथः प्रसङ्गे परबलीयस्त्वमिति । 'एतदेवेत्यादि' । परिहारः । किमेतस्य ज्ञापने प्रयोजनमित्याह । 'तेनेति' । प्रथमेनादिशब्देन गोमत्यतीत्यादेर्ग्रहणं द्वितीयेन दीर्घहल्ङ्यादिलोपयोः, हल्ङ्यादिलोपे हि प्रत्ययलक्षणेन नुमादि स्यादेव लुकि तु न लुमताङ्गस्येति प्रत्ययलक्षणप्रतिषेधान्न भवति, ज्ञापनस्य प्रयोजनान्तरमाह । 'एवं चेति'। पुनश्चोदयति । 'अथेति' । असति हि प्रयोजने ज्ञापकं भवति, अस्ति चात्र प्रयोजनं, किम्, एषामेव त्वाहादीनामादेशान्तराणां बाधनं, सत्येतस्मिन्प्रयोजने न ज्ञापनमुपपद्यतइति परिहरति । 'लक्ष्यस्थित्यपेक्षयेति' । गोमत्प्रिय इत्यादिकं लक्ष्यं लोके साधुभावे स्थितं तदादेशान्तरबाधनार्थेस्मिन्विज्ञायमाने न संगृहीतं स्यात्, तच्चापेक्ष्यं प्रयोगमूलत्वाद्व्याकरणस्य, तस्मात्तदपेक्षया नैतदादेशान्तराणां बाधनार्थं युक्तं विज्ञातुमिति । अपर आह यद्येतदादेशान्तराणां बाधनार्थं स्यात् मपर्यन्तस्येत्यनुवृत्तिरपार्थिका स्यात्, कथमुत्सर्गसमानदेशत्वादपवादानां श्यनादिषु तथादृष्टत्वादिति । नायं नियम उत्सर्गसमानदेशा अपवादा इति, श्नमादिषु व्यभिचारात्, नहि श्नम्व

हुजकचः शबादिभिः समानदेशास्तस्माद्वश्यमुपपत्तिर्वक्तव्या, एवं वक्तव्यमिह त्वाहादयोप्यनुवर्तन्ते मपर्यन्तस्येति च तत्र त्वाहाद्यनुवृत्त्यैव तद्बाधे सिद्धे मपर्यन्तानुवृत्तिरप्राप्तप्रापणार्था सती ज्ञापकमुक्तस्यार्थस्येति। वयन्तु ब्रूमः मपर्यन्तस्येत्येवानुवर्त्य तस्यादेशौ विधेयौ यदि चान्तरङ्गा आदेशाः स्युः प्रत्ययोत्तरपदयोर्मपर्यन्तस्य न क्वापि सम्भव इति तस्यादेशविधानमनुपपन्नं स्यादिति ज्ञापकमुक्तस्यार्थस्येति ॥

"त्रिचतुरोः स्त्रियान्तिसृचतसृ" ॥ 'त्रिचतुरोरेव विशेषणमिति'। श्रुतत्वात् । 'नाङ्गस्येति'। विपर्ययात् । तेन किं सिद्धं भवतीत्याह । 'तेनेति'। 'प्रियतिसेति'। अनङ् सौ, ऋदुशनस्पुरुदंसोनेहसाञ्चेत्यनङ् । 'प्रियतिसाविति'। ऋतो ङिसर्वनामस्थानयोरिति गुणं परमपि बाधित्वोत्तरसूत्रेण रादेशः। 'प्रियतिसृ इति'। इकोचि विभक्तावित्यङ्ग्रहणेन ज्ञापितं लुमता लुप्तेपि क्वचित्प्रत्ययलक्षणं भवतीति, तेन स्वमोर्नपुंसकादिति नित्ये लुकि कृतेपि तिसृभावः । 'प्रियतिसृणी इति'। रादेशात्पूर्वविप्रतिषेधेन नुमिति क्वचित्पठ्यते। 'नद्यृतश्चेति कप्न भवतीति'। समस्यमानदशायामृकारान्तस्य तत्र ग्रहणमिति भावः। कबभावे हेतु 'विभक्त्याश्रयत्वादित्यादि'। एवं तावत् स्त्रियामित्यनेन त्रिचतुरोर्विशेषणादव्याप्तिपरिहारो दर्शितः। अतिव्याप्तिरपि परिहृतेत्याह । 'यदा चेति। 'तिसृकेति'। स्वार्थे कप्रत्ययः, अल्पत्वे कुत्सितत्वे सञ्ज्ञायां वा। तत्र विभक्तेर्लुकि कृते तत्र विधीयमानस्तिसृभावो न स्यादिति वचनं, तत्र स्वार्थिकप्रत्ययान्तत्वाद्बहुवचनान्तस्तिसृकाशब्दः सञ्ज्ञेत्येके ग्रामस्य कस्य चिदेषा सञ्ज्ञा रूढिरिति नास्ति बहुवचनप्रसङ्ग इत्यन्ये। 'चतसरीति'। यथा प्रियतिसावित्यत्र सर्वनामस्थानलक्षणं गुणं बाधित्वा रादेशो भवति तथा ङावपि प्राप्नोति तथा चोत्तरसूत्रे प्रियतिसीति ङावपि रादेशमुदाहरिष्यति पूर्वविप्रतिषेधं च वक्ष्यति। अत्राहुः। अस्मादेव निर्द्देशादर्थप्रधानयोरेवादेशः। इह तु स्वरूपप्रधानत्वात्तदभावे गुण इति। 'चतस्र इति'। अत्र स्थानिवद्भावा 'च्चतुरःशसी' त्यन्तोदात्तत्वे सति 'उदात्तयणो हल्पूर्वादि'ति शस उदात्तत्वप्रसङ्गः, स निपातनै-

स्वरेण बाध्यते, यथैव तर्हि निपातनस्वरः शसि स्वरं बाधते तथा षट्त्रिचतुर्भ्यो हलादिरित्येतं विभक्तिस्वरमपि बाधेत तत्राह । 'चतसृणामित्यत्र त्विति' । तत्र कारणमाह । 'हलादिग्रहणसामर्थ्यादिति' । तत्र हलादिग्रहणस्य चतस्रः पश्येत्येतदेव व्यावर्त्यं नान्यत्किञ्चित् । एतच्च तत्रैवोपपादितं, यदि च निपातनस्वरो विभक्तिस्वरस्यापि बाधकः स्यात्तदान्तरेणापि हल्ग्रहणं विभक्तेः स्वरो न भविष्यति किं हलादिग्रहणेन, तत्क्रियमाणं ज्ञापयति निपातनस्वरं विभक्तिस्वरो बाधतइति । अन्येत्वाहुः । हलादिग्रहणादेव चतस्रः पश्येत्यत्र 'चतुरःशसी'त्यस्याप्रवृत्तिरवसीयते । यदि स्यात्तत 'उदात्तयणो हल्पूर्वादि'ति स्यादेव विभक्तेरुदात्तत्वमिति तद्व्यावृत्तये हलादिग्रहणमनर्थकं स्यात् । तस्मादाद्युदात्तनिपातनमेव न कर्तव्यमिति । तत्राद्युदात्तस्य चतुश्शब्दस्यान्तर्यत आद्युदात्त एव चतस्रादेशे सति चतसृणामित्यत्र 'षट्त्रिचतुर्भ्यो हलादि'रिति विभक्तेरुदात्तत्वं भवति ॥

"अचि र ऋतः" ॥ 'पूर्वसवर्णो त्वित्यादि' । तिस्रःपश्येत्यत्र 'प्रथमयोः पूर्वसवर्ण' इत्यस्यापवादः, प्रियतिस्रः स्वमित्यत्र 'ऋत उदित्युत्त्वस्य । प्रियतिस्रि प्रियतिस्रौ प्रियतिस्रस्तिष्ठन्तीत्यत्र 'ऋतो ङिसर्वनामस्थानयो'रिति गुणस्य । ननु यत्र विध्यन्तरस्याप्राप्तिः प्रियतिस्रा प्रियतिस्रे प्रियतिस्रोरिति तत्र इको यणचीत्येव सिद्धमिति विध्यन्तरस्य विषयइदमारभ्यते, तत्र मध्येपवादाः पूर्वान्विधीन्बाधन्तइति उत्वपूर्वसवर्णौ बाधतइति युक्तं, गुणविषये तु परत्वात्स एव स्यादित्यत आह । 'परमपि हीति' । 'ऋत इति किमिति' । तिसृचतस्रोरनुवृत्तेरलोन्त्यस्येत्येव सिद्धमिति प्रश्नः । 'तिसृचतस्रोः प्रतिपत्त्यर्थमिति' । तिसृचतस्रोरादेशयोरजादावपि विभक्तौ प्रतिपत्तिर्यथा स्यादित्यर्थः । 'अन्यथा हीति' । ऋत इत्यनुच्यमाने षष्ठीनिर्दिष्टत्वात् त्रिचतुरोरेवायमादेशः स्यात् स च नाप्राप्तयोस्तिसृचतस्रोर्विधीयतइति तयोरपवादः स्यादित्यर्थः ॥

"जराया जरसन्यतरस्याम्" ॥ 'अतिजरांसीति' । अतिजर इतिस्थिते यदि पूर्वं नुमागमः स्यात्सोङ्गभक्तोङ्गमेव न व्यवदध्यात् ।

तदवयवं तु जराशब्दं व्यवदधात्येवेति सत्यपि तदन्तविधौ निर्दिश्यमानस्यादेशा भवन्तीति जरशब्दान्तस्याङ्गस्यावयवो यो जराशब्दः तस्य विभक्त्यानन्तर्ये विधीयमानो जरसादेशो न प्राप्नोति। अथापि स्यात् तथापि सकारात्परस्य नुमः श्रवणं स्यात्। तस्मात्परत्वात्पूर्वं जरसादेश एष्टव्यः तत्र कृते झलन्तलक्षणो नुम् अतिजरसं पश्येत्यत्र अतिजर अम् इति स्थिते एकदेशविकृतस्यानन्यत्वाज्जरशब्दस्य जरसादेशे कृते 'स्वमोर्नपुंसका'दिति लुक् प्राप्नोति, न च तदानीमम्भावस्य प्रसङ्गः, अनदन्तत्वात्। ननु चातिजरशब्दस्यादन्तत्वात्तस्यामवस्थायामम्भावेन बाधितस्य लुकः पुनः प्रसङ्गो न युक्तः भ्रष्टावसरत्वात्। नैतदस्ति। नात्राम्भावः प्रवृत्तः परत्वान्नित्यत्वाच्च जरसादेशेन बाध्यते, तत्र कृते लुक्प्रसङ्गः, एवं तर्हि सन्निपातपरिभाषया लुङ्न भविष्यति। अजादिसन्निपातेन जरसादेशो निष्पन्नो नोत्सहते तस्य लुको निमित्ततां प्रतिपत्तुं, यद्येवमतिजरसं ब्राह्मणकुलं तिष्ठति अतिजरसैरिति न सिद्ध्यति, कथं सोर्भिसश्चाकारान्तसन्निपातेनाजादिरादेशः कृतोऽकारान्तत्वविघातिनो जरसादेशस्य निमित्तं न स्यात्। इष्टमेवैतत्सङ्गृहीतम्। अतिजरमतिजरैरिति भवितव्यमेष गोनर्दीयस्य पक्षः, तदिदमुच्यते।'इहेत्यादि'। इहेति वाक्योपन्यासे। अतिजरसं ब्राह्मणकुलमित्यादि भवितव्यमित्यन्तं गोनर्दीयस्य मतं न पुनर्लुक्शास्त्रं प्रवर्त्तत इति यदुक्तं यच्चोक्तम् अतिजरं ब्राह्मणकुलमित्यादि तत्रोभयत्रापि हेतुः। 'सन्निपातलक्षण इति'। न पुनर्लुक्शास्त्रमित्यत्र पुनःशब्दस्यायमर्थः पूर्वं या लुक्प्राप्तिः साम्भावेन बाधिता या तु जरसादेशे कृते पुनः प्राप्तिः सापि सन्निपातपरिभाषया न भवतीति। 'अन्ये त्वित्यादि'। एतच्च 'टाङसिङसामिनात्स्याः' 'अतोभिस ऐसि' त्यत्र व्याख्यातम्॥

"त्यदादीनामः"॥ द्विपर्यन्ता [1]इत्यादि'। इष्टिरेवेयम्। यत्तूच्यते शेषे लोपवचनं ज्ञापकमिति तदयुक्तम्। उपसर्जनार्थत्वादतियूयमतिवयमिति। यदा तु शेषेलोपष्टिलोपस्तदा तु सुतरामज्ञापकम्। 'पाठादेव पर्युदस्ता इति'। तथा च सर्वादिसूत्रे वार्तिकं 'सञ्ज्ञोपसर्जनानां प्रतिषेधः

१ मुद्रितमूलपुस्तके द्विपर्यन्तानां त्यदादीनामत्त्वमिष्यतइति पाठो दृश्यते।

पाठात्पर्युदास इति'। तेन पाठोपजीवनेन प्रवर्त्तमानमिदमपि संज्ञोपसर्जनीभूतानां न भवति। 'त्यदादीति'। त्यदादीनामर्थः प्रधानं यत्र समासे तत्रेत्यर्थः। नहि ते पाठात्पर्युदस्ताः।

"किमः कः"॥ 'तेनाकार एव किमो न विधायत इति'। कथं पुनरकारविधाने क इत्यादि रूपसिद्धिः, यावतान्त्यस्य प्राप्नोति। न चान्त्यस्य पूर्वेण सिद्धः,द्विपर्यन्तास्त्यदादय इत्युक्तत्वात्। अपरे पुनरेतच्चोद्यभयादेवं पठन्ति तेनाकार एव इमो न विधीयतइति, अयमर्थः। इम इत्येतावत्सूत्रमस्तु, त्यदादीनाम इत्येव त्यदादीनां संबन्धिन इमोकारो भवति तत्र नानर्थकेलोन्त्यविधिरिति सर्वस्यैवेमोऽकारो भवति, तेषामेवं पठतामुत्तरत्र किमो ग्रहणं कर्त्तव्यं, न कर्त्तव्यम्। उति होरिति वक्ष्यामि इम इत्येव, ततो वाति, इम इत्येव इमोवकारादेशो भवति, तस्मात्साकच्कार्थमेव कादेशो विहितः॥

"कु तिहोः"॥ तिशब्दस्य विभक्तिसञ्ज्ञकस्याभावात्तकारे इकार उच्चारणार्थः। 'कुहेति'। 'वा ह च छन्दसी'ति हप्रत्ययः॥

"क्वाति"॥ 'क्वेति'। किमोदित्यत्प्रत्ययः। अथादेशान्तरकरणं किमर्थं न प्रकृतः कुशब्द एव विधीयते एवं च कृत्वा योगविभागोपि कर्त्तव्यः, कुतिहात्स्वित्येवास्तु, का रूपसिद्धिः, यणादेशे कृते क्वेति इम् ओर्गुणस्त्वङ्वृत्ते पुनर्वृत्ताविति वचनान्न भविष्यति, यणादेशस्यनाङ्गत्वाद्भवत्येव तत्राह। 'आदेशान्तरकरणमोर्गुणनिवृत्त्यर्थमिति'। निष्ठितत्वं दुर्ज्ञानमिति भावः, एवं तर्हि किमोदित्येतत्किमोद्वदिति वक्तव्यं टिलोपे कृते क्वेति सिद्धमत आह। 'किमोद्वदिति चेति'। कथं पुनः प्रत्ययान्तरे रूपसिद्धिः यावता ककारस्य जश्त्वं प्राप्नोति, टिलोपस्यासिद्धत्वाच्च भविष्यति, कथमसिद्धत्वम्, असिद्धं बहिरङ्गमन्तरङ्गे, टिलोपो हि डित्प्रत्ययापेक्षत्वाद्बहिरङ्गः, जश्त्वं तु तदनपेक्षत्वादन्तरङ्गम्। 'साकच्कार्यमिति'। साकच्के हि प्रत्ययान्तरे विहिते कक्वेति स्यात्। यथान्यासे तु तत्रापि क्वेत्येव भवति॥

"तदोः सः सावनन्त्ययोः" ॥ साविति प्रथमैकवचनस्य ग्रहणं न सप्तमीबहुवचनस्य 'स्यश्छन्दसि' 'सोचि लोपे चेदि'त्यादि निर्देशात्। नाप्युभयोः, तथाहि सति सीत्येव ब्रूयात्, सकारादौ विभक्ताविति। 'अनन्त्ययोरिति किमिति'। विशेषणविशेष्यभावे कामचारात्त्यदादिषु तकारान्तस्यासम्भवाच्च त्यदादिभिस्तदोर्विशेषणादनन्त्ययोस्तावत्सिद्धम्। अन्त्यस्य तु त्यदाद्यत्वं भविष्यतीति प्रश्नः, अत्वस्य सोरन्यत्र सावकाशत्वात्सौ परत्वादिदमेव स्यादित्युत्यत्तरं, तत्र केवले सौ पुल्लिङ्गे विशेषाभावात्सम्बुद्धौ स्त्रियां च प्रत्युदाहृतं, किमर्थं पुनस्तदोरित्युच्यते तवर्गग्रहणमेव क्रियेत, तोःसःसावनन्त्यस्येति। नकारस्यापि तर्हि प्राप्नोति तस्मान्नुडचि अनेषः अनयम् अनसाविति। नुडयं परादिस्तद्ग्रहणेन गृह्यते॥

"अदस औ सु लोपश्च" ॥ 'अमुक इति'। अदकस् सु इति स्थिते औत्वप्रतिषेधात्त्यदाद्यत्वं दकारस्य सत्वं सकारादुत्तरस्य [1]चाकचोकारस्य उत्वम्। 'उत्तरपदभूतानामित्यादि'। समासाद्या विभक्तिरुत्पद्यते तदपेक्षत्वादादेशो बहिरङ्गः, ततश्चान्तरङ्गत्वादेकादेशे कृते तस्यादिवद्भावादादेशेषु क्रियमाणेषु परमयं परमहमित्याद्यनिष्टप्रसङ्गः, तस्मादकृतसन्धिकार्याणामेवामी आदेशा वक्तव्याः, एतच्च 'नेन्द्रस्य परस्ये'त्यत्र ज्ञापयिष्यते। 'अदसः सोर्भवेदित्यादिः'। अदस औ इत्येतावदेव सूत्रमस्तु, सावित्येव अदस इति पञ्चमी तया पूर्वसूत्रे कृतार्थायाः[2] सप्तम्याः षष्ठ्यां प्रकल्पितायाम् अदस उत्तरस्य सोरौकारो भवतीत्यर्थः, तत्र त्यदाद्यत्वे कृते असाविति सिद्धे किं सुलोपो विधीयते। 'ह्रस्वाल्लुप्येत संबुद्धिः'। यदि सोरौकारो विधीयते तदा हि असावित्यत्र त्यदाद्यत्वे ह्रस्वात्परस्याः संबुद्धेरौकारस्य लोपः स्यात् न हलः। नैष दोषः। हलः सलोपे विधीयते, यद्येवं तत्र हल्ग्रहणं कर्त्तव्यं नेत्याह। 'प्रकृतं हि तत्'। 'हल्ङ्याब्भ्यो दीर्घादित्यत्र। ननु चेदं प्रथमानिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः एवं तर्हि एङ्ह्रस्वादिति पञ्चमी हलिति प्रथमायाः षष्ठीं प्रकल्प-

१ चाकारस्येति पा॰ ई॰ पु॰।
२ कृतार्था इति इ॰ पु॰ पाठः।

यिष्यति 'तस्मादित्युत्तरस्ये' ति । पूर्व्वसूत्रवद्वा प्रथमाया एव यथा कथं चिच्चिर्वाहो भविष्यति । 'आप एत्वं भवेत्तस्मिन्' । इह तर्हि स्त्रियां संबुद्धौ असा औ इति स्थिते 'आङि चापः' 'संबुद्धौ' चेत्येत्वं प्राप्नोति, प्रकृतेरेव त्वौत्वे टापोभावादेत्वाभावः । न, झलीत्यनुवर्त्तनात् । नैष दोषः 'बहुवचनेझल्ये' दित्यतो झलीति तत्रानुवर्त्तते झलादौ संबुद्धाविति, औत्वे कृते अझलादित्वाच भविष्यति, 'प्रत्ययस्थाच्च कादित्वम्,' इह तर्हि स्त्रियामकचि असका औ इति स्थिते 'प्रत्ययस्थात्कात्पूर्वस्ये'तीत्वं प्राप्नोति प्रकृतेरेव त्वौकारे टापोभावादित्वाभावः, 'शीभावश्च प्रसज्यते' । इह च स्त्रियाम् असा औ इति स्थिते 'औङ आप' इति शीभावः प्राप्नोति, औत्वविधानं तु पुंसि चरितार्थं, पाक्षिक एष दोषः, यदौङ आप इति पूर्वाचार्यनिर्द्दिशस्तदा नास्ति, इतरयोरस्तु पक्षयोरस्ति ॥

"यः सौ" ॥ 'स्त्रियामयं यकारइति' । नपुंसके तु 'स्वमोर्नपुंसका' दिति लुमता लुप्तत्वात्सोरभावः ॥

"हलि लोपः" ॥ 'अन्यहणमनुवर्त्ततइति' । यद्यपि तत्प्रथमान्तं तथापि हलीति सप्तम्या तस्य षष्ठी प्रकल्प्यते ॥

"मृजेर्वृद्धिः" ॥ 'धातोश्च कार्यमुच्यमानमिति' । वस्तुतो धातोर्यत्कार्यमुच्यते तदिह धातोरुच्यमानमिति विवक्षितं, स धातुः स्वरूपेणैव गृह्यतां मा वा, याहितेनानुदात्तस्य चर्दुपधस्यान्यतरस्या'मित्ययमप्यमागमो धातुप्रत्ययएव भवति न तु प्रमृड्भ्यामित्यादौ । 'त[1]त्प्रत्ययइति' । धातोरित्येवं विहिते । 'कंसपरिमृड्भ्यामिति' । अत्र तदन्तविधिना प्रसङ्गः ॥

"अचो ञ्णिति" ॥ तन्दुलनिश्चाय इत्यादौ परिमाणाख्यायां सर्वेभ्य इति घञ् । 'गौः गावौ गाव इति' । अत्र गौरित्येतत्साक्षादुदाहरणमितरत्राादेशे कृते 'ऽत उपधाया' इत्येव सिद्धम् । 'सखायौ सखाय इति' । अत्रापि सखायावित्येतदुदाहरणं जसि तु 'जसि चे'ति गुणे अयादेशे च कृते पूर्ववत्सिद्धम् । 'च्यौत्नमिति' । बलनाम छान्दसं, तमिच्यौत्नेराचक्षन्ते । किमर्थं पुनरिदमुच्यते यावता नेतृयोतृशब्दाभ्यां प्रज्ञाद्यणि

[1] मुद्रितमूलपुस्तके धातुप्रत्यये इति पाठः ।

जैत्रं यौत्रमिति सिद्धं, च्यौत्नमिति उणादयो ऽव्युत्पन्नानि प्रातिपदिकानि, तण्डुलनिश्चायः श्चावको लावक इत्यादौ तु गुणे अयवोश्च कृतयो 'रत उपधाया ' इत्येव सिद्धम्, एवं कारक इत्यादौ 'गोतो णि' दित्येतद्गोत औदिति वक्तव्यं गोत औकारादेशो भवति सर्वनामस्थाने परतः, कथं सखायौ सखायः, 'सख्युरसंबुद्धौ' वित्येतत्सख्युरैदिति वक्ष्यामि । अत्रोच्यते, ञ्णितीति तावदुत्तरार्थं वक्तव्यं किञ्च प्रियमाचष्टे प्रापयतीत्यादौ प्राद्यादेशेषु वृद्धिर्न स्यात्, अथ ते दीर्घान्ता विधीयेरन् तदतिगुरु स्यादिति यथान्यासमेवास्तु ॥

"तद्धितेष्वचामादेः" । 'अचामादेरचो वृद्धिरिति' । ननु च इक्परिभाषोपस्थानादिक एव स्थानित्वेन भवितव्यं, यद्यपि तुल्यजातीयस्य निर्द्धारणं भवति यथा गवां कृष्णा संपन्नक्षीरतमेत्युक्ते गौरेव प्रतीयते तथात्राप्यचामादिरजेव, तथापि साक्षादच इति निर्द्देशाभावादिक्परिभाषोपतिष्ठेतैव इगात्मकस्याच इति, तस्मात्स्थानिनिर्देशार्थमच इति वक्तव्यं, तच्च वक्तव्यमकृतमनुवर्त्तते, अचो ञ्णितीति, तत्र निर्द्दिष्टस्थानिकत्वादिक्परिभाषाया अव्यापारः, अथ त्वाष्ट्रो जागत इत्यत्र त्वष्टृजगच्छब्दाभ्यां तस्येदमित्यणि कृते यथाक्रममचो ञ्णिति अत उपधाया इति वृद्धिः कस्मान्न भवति, तत्राह । 'त्वाष्ट्रोजागत इत्यत्रेति' । 'अन्त्योपधालक्षणां वृद्धिं बाधतेइति' । परत्वादितिभावः । अन्त्योपधालक्षणाया वृद्धेरवकाशः गौः याचकः, अस्या अवकाशः सुश्रुत् सौश्रुतः, त्वाष्ट्रो जागत इत्यत्रोभयप्रसङ्गे परत्वादादिवृद्धिर्भवति, सकृद्गतिन्यायश्चाश्रीयते न पुनः प्रसङ्गविज्ञानम्, एवं च कृत्वा पुष्करसच्छब्दस्यानुशतिकादिषु पाठोर्थवान्भवति, 'यदि त्वादिवृद्धिविषयेन्त्योपधावृद्धिः स्यात्तदोपधालक्षणयैव वृद्ध्या पौष्करसादेः सिद्धत्वादनुशतिकादिषु तन्न पठेत्, ठगर्थं तत्र पाठः स्यात् पौष्करसादिकः, 'नह्यत्रोपधालक्षणा वृद्धिः प्राप्नोति अञ्णित्वात्, नैतदस्ति, नह्यस्माच्चरत्यर्थे ठगुत्पद्यते, अनभिधानात् । यद्वा प्रतिपदविहिते बाह्वादिलक्षण इञ्येवोभयपदवृद्धिः नान्यत्रेति ठगर्थः पाठो न भवति, यत्र त्वादिवृद्धिः प्रतिषिध्यते तत्रान्त्योपधालक्षणी

वृद्धिः कस्मान्न भवति, व्यसोर्भावो वैयसवम्, इगन्ताच्च लघुपूर्वादित्यण्, व्यापदि भवं वैयापदमिति, तत्राप्यैचौ परत्वात् बाधकाविति सिद्धम् ॥

"क्षिति च" ॥ 'नाडायनः चारायणइति'। नडादिभ्यः फक्। 'स्राचिकः शालाकिक इति'। दीव्यत्यर्थेठक् ॥

इति श्रीहरदत्तमिश्रविरचितायां पदमञ्जर्यां
सप्तमस्याध्यायस्य द्वितीयश्चरणः ॥

"देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात्" ॥ अत्र विशेषण-विशेष्यभावे कामचाराद्देविकादिभिरङ्गं विशेष्यते, तेन वा तानि, तत्रापि सामानाधिकरण्येन वैय्यधिकरण्येन वेति चत्वारः पक्षाः। तत्र देविका-दिभिः सामानाधिकरण्ये नाङ्गस्य विशेषणात्तदन्तविधिसम्भवाद्देविकाद्य-न्तस्याङ्गस्याचामादेराकारो भवतीत्यर्थः स्यात्। तत्र केवलानां न स्यात्, नहि तदेव तदन्तं भवति, व्यपदेशिवद्भावोपि प्रातिपदिकेन निषिद्धः। यदि तु प्रत्ययविधिविषयः स प्रतिषेधः, तदा केवलानां भवतु तदादौ तु न स्यात्। देविकाकूले भवा दाविकाकूलाः शालय इति। तदन्ते चातिप्रसङ्गः, सुदेविकादौ भवं सौदेविकमिति, अत्र सोरुकारस्याकारः स्यात्। अथ वैयधिकरण्येन विशेषणं देविकादीनां यदङ्गमिति, किं च देविकादीनामङ्गं यत्र च ते ऽवयवभूताः, ततश्च केवलान्न स्यात्, नहि स एव तस्यावयवो भवति, व्यपदेशिवद्भावोपि प्रातिपदिकेन प्रतिषिद्धः, यदि तु प्रत्ययविषयः स प्रतिषेधस्तदा केवलानां भवतु तदन्ते त्वतिप्र-सङ्गः पूर्ववत्, केवलं तदादावप्रसङ्ग एवास्मिन्पक्षे परिहृतः, अथाङ्गं समा-नाधिकरणं विशेषणमङ्गं ये देविकादयइति तदा तदन्तेतिप्रसङ्गः परिहृतः तदादौ त्वप्रसङ्गः स्यादेव तदेव तर्हि व्यधिकरणं विशेषणम्, अङ्गस्य[1] ये अवयवभूता देविकादयस्तेषामचामादेराकार इति, तदा केवले तदादौ च न दोषः, किं तु परपदभूतानामपि तेषामाकारप्रसङ्गः तत्र प्राग्ग्रामे पूर्वशां-शप इत्यादाविष्ट एवाकारः, सुदेविकादावग्रामेत्वनिष्टप्रसङ्गः तदेवमेते

१ क्रियाविशेषणत्वान्नपुंसकैकवचनमिति ई। पु॰ पा॰

साधकान्तरमाह । लिङ्गेति । रथंतरमुत्तरयोर्न पश्यामीति विश्वामित्रः तपस्तेपे बृहदुत्तरयोर्न पश्यामीति वसिष्ठ इति । यच्च विद्यमानं न दृश्यते तद्दर्शनाय यत्नः, न त्वविद्यमानदर्शनविषयिणी इच्छा यत्नो वा भवति । अतः उत्तरयोरपि रथंतरमस्तीति सिद्धम् ॥ १० ॥

अश्रुतेस्तु विकारस्योत्तरासु यथाश्रुति ॥ ११ ॥

कॢप्तस्वरयोरुत्तरयोरनुवाद इति पक्षं दूषयति । अश्रुतेरिति । उत्तरासु विकारस्य नवीनधर्मस्याश्रुतेः अविधानात् । यथाश्रुति स्वाध्यायकाले यथा पठितं तथा पाठः स्यात् । तथा च रथंतरमुत्तरयोर्गायति कवतीषु रथंतरं गायतीति वचनान्यनर्थकानि स्युरिति भावः ॥ ११ ॥

शब्दानां चासामञ्जस्यम् ॥ १२ ॥

ननु अनुवादे वैयर्थ्यभिया रथंतरधर्मप्रापकः । ते च धर्मा रथंतरे प्रस्तूयमाने पृथिवीं मनसा ध्यायेदित्यादयः । तत्प्राप्त्यर्थमिदं वचनमस्त्वत आह । शब्दानामिति । असामञ्जस्यं शक्यार्थबोधो न, लक्षणा स्यादिति ॥ १२ ॥

अपि तु कर्मशब्दः स्याद्भावो ऽर्थः प्रसिद्धग्रहणत्वाद्विकारो ह्यविशिष्टो ऽन्यैः ॥ १३ ॥

परमसिद्धान्तमाह । अपि त्विति । पूर्वोक्तं किमपि न । अपि तु कर्मशब्दः स्यात् । गानाख्यस्य ऋक्संस्काररूपकर्मवाचको रथंतरादिशब्दः स्यात् । अयं भावो ऽर्थः वास्तवार्थः सिद्धान्तरूप इत्यर्थः । प्रसिद्धग्रहणत्वात् । रूढिशक्तिमत्त्वाद्गायतिधातोः । अग्निहोत्रं जुहोतीत्यत्राग्निहोत्रशब्दस्य धात्वर्थइव रथंतरं गायतीत्यत्र रथंतरशब्दार्थस्य गाने अभेदेनान्वयात् । किं च अन्यैरविशिष्टः अन्यैरवहननादिभिः अविशिष्टः तुल्यः । अवहननेन यथा वितुषीभावः तथा गानेन ऋचो ऽक्षराभिव्यक्तिरिति ॥ १३ ॥

अद्रव्यं चापि दृश्यते ॥ १४ ॥

अद्रव्यम्, अत्र द्रव्यशब्दस्य छन्दोगानाम् ऋचि प्रयोगो दृश्यते ।

अद्रव्यम् ऋक्शून्यमपि साम दृश्यते । प्रजापतेर्हृदयमनृचं गायतीति । प्रजापतेर्हृदयं सामविशेषः । अतोऽपि न गानविशिष्टर्ग्विधिरिति भावः ॥ १४ ॥

तस्य च क्रिया ग्रहणार्था नानार्थेषु विरूपित्वादर्थो ह्यासामलौकिको विधानात् ॥ १५ ॥

ननु ऋक्संस्कारार्थं साम तर्हि अवहननादिवत् प्रयोगशून्यकाले पठनं व्यर्थं स्यादित्यत्राह । तस्येति । अकर्मकाले तस्य रथंतरादिपदवाच्यस्य क्रिया पाठः ग्रहणार्थो अभ्यासार्थः । यतो नानार्थेषु नानाश्रयेषु स्वरूपेषु विरूपित्वाद् भिन्नरूपत्वात् । तत्तद्रूपं तदभ्यासं विना न संभवतीति भावः । अवहननादिवैषम्यं दर्शयति । आसां रथंतरादिसंज्ञानामर्थः अलौकिकः विधानाद् गुरुशिक्षयैव ज्ञेयः । अतः अभ्यासार्थमकर्मकाले पाठ इति भावः ॥ १५ ॥

तस्मिन् संज्ञाविशेषाः स्युर्विकारपृथक्त्वात् ॥ १६ ॥

ननु साम्नो गानरूपस्य रथंतरादिपदार्थत्वे गानस्यैकरूपत्वात्संज्ञाभेदो बृहद्रथंतरमिति व्यर्थोऽत्राह । तस्मिन्निति । तस्मिन् गानेऽपि विकारपृथक्त्वात् । गानस्वरूपाणां पृथक्त्वात् । संज्ञाविशेषाः बृहदादिसंज्ञाविशेषाः स्युः ॥ १६ ॥

योनिशस्याश्च तुल्यवदितराभिर्विधीयन्ते ॥ १७ ॥

हेत्वन्तरमाह । योनीति । योनिः साम्नो योनिः सा चासौ शस्या च शस्त्रसाधनीभूता ऋक् च योनिशस्या । ताः इतराभिरयोनिशस्याभिः तुल्यवद्विधीयन्ते । अयं भावः । याम्यां शंसतीति अयोनिशंसनं रथंतरस्य योनिमनुशंसतीति योनिशंसनमुभयोरपि शंसतिधातुना तुल्यं निर्देशात् । रथंतरस्य योनिमिति षष्ठ्या रथंतरयोनिशब्दार्थयोर्भिन्नत्वादिति भावः ॥ १७ ॥

अयोनौ चापि दृश्यते ऽतथायोनि ॥ १८ ॥

इतोऽपि रथंतरशब्दो गीतिवाचक इत्याह । अयोनाविति । यो गौ योनिभूतस्वग्भिन्ने, बृहद् गायत्री क्रियते इति गायत्रीछंदस्काया-

मृचि बृहत्साम दृश्यते। अयोनि च स्वयोनिभूता ऋचो यच्छन्दस्काः ततो ऽधिकन्यूनाक्षरकच्छन्दस्काणि सामानि, दृश्यन्ते। इदं सर्वं रथंतरादीनां ऋक्त्वे न घटतइति भावः ॥ १८ ॥

एकार्थे नास्ति वैरूप्यमिति चेत् ॥ १९ ॥

यच्चोक्तम् अकर्मकाले पाठो दृष्टार्थमिति तमाक्षिपति। एकेति। एकार्थे रथंतरैककार्यके रथंतरे वैरूप्यं नास्तीति। अयं भावः। पूर्वं रथंतरबृहदादिसंज्ञाभेदः गानभेदादित्युक्तम्। सर्वत्र रथंतरगानस्यैकरूपत्वात्तस्य स्वयोनिभूतायामृचि दृढीकृते उत्तरयोरपि प्रयोगवेलायां गातुं शक्यत्वेन प्रयोगाद्बहिः पठनं व्यर्थमिति भावः ॥ १९ ॥

स्यादर्थान्तरेष्वनिष्पत्तेर्यथा पाके ॥ २० ॥

समाधत्ते। स्यादिति। अर्थान्तरेषु ऋगन्तरेषु अनिष्पत्तेः अभ्यासं विना अनिष्पत्तेः प्रयोगाद्बहिः पाठः स्यात्। यथा पाके, पाकपदार्थस्य सर्वत्रैक्ये ऽपि एकत्र तण्डुले पाकज्ञाने ऽपि गुडस्य पाकार्थं पुनरभ्यासः क्रियते न तण्डुलपाकेन तज्ज्ञानं भवति अधिष्ठानभेदात्, तथा ऽत्रापीति भावः ॥ २० ॥

शब्दानां च सामञ्जस्यम् ॥ २१ ॥

शब्दानां कवतीशब्दानां रथंतरादिशब्दानां च सामञ्जस्यं साफल्यम्। उभयोरपि ऋग्वाचकत्वे ऋचि ऋगधिकरणत्वासंभवेन कवतीनां देशलक्षकत्वं रथंतरशब्दस्य वा तत्कार्यलक्षकत्वादीति भावः ॥ २१ ॥

इति जैमिनिसूत्रवृत्तौ सप्तमाध्यायस्य द्वितीयः पादः ॥ २ ॥

अग्निहोत्रादिनाम्ना धर्मातिदेशः। अधि० १।

उक्तं क्रियाभिधानं तच्छ्रुतावन्यत्र विधिप्रदेशः स्यात् ॥ १ ॥

कौण्डपायिनामयने मासमग्निहोत्रं जुहोति इति। इदं नित्याग्निहोत्रादन्यदपूर्वं कर्मेति द्वितीये व्यवस्थितम्। इत्थं चात्राग्निहोत्रमिति कर्मनामधेयमिति च प्रथमे व्यवस्थितम्। तेनैव नाम्ना अस्य कर्मणो निर्देशः

नित्याग्निहोत्रधर्मप्राप्त्यर्थं इति सिद्धान्तेनोपक्रमते । उक्तमिति । क्रियायाः अग्निहोत्रक्रियायाः अभिधानं नामेति उक्तं नामधेयपादे । अन्यत्र कुण्डपायिनामयने तच्छ्रुतौ अग्निहोत्रशब्दश्रुतौ विधेः धर्मस्य प्रदेशः अतिदेशः स्यात् ॥ १ ॥

अपूर्वे वा ऽपि भागित्वात् ॥ २ ॥

पूर्वपक्षयाशङ्कते । अपूर्वेइति । वा ऽपीति विपरीतेन अपि वेति योज्यम् । अपूर्वे मासाग्निहोत्रे ऽपि अग्निहोत्रशब्दः स्यात् । भागित्वाद् योग्यत्वात् । उभयोरपि नामास्त्वित्यर्थः फलितः ॥ २ ॥

नाम्नस्त्वौत्पत्तिकत्वात् ॥ ३ ॥

इमं पक्षं दूषयति । नाम्न इति । नाम्नः अग्निहोत्रादिशब्दानामर्थेन साकं संबन्धस्य औत्पत्तिकत्वात् । नियतत्वात् । एकः शब्दः एकेनार्थेन नियमेन संबद्धः नानेकैरर्थैरिति । न हि माणवके प्रयुज्यमानः सिंहशब्दः माणवकेन संबद्धस्तद्वदिति भावः ॥ ३ ॥

प्रत्यक्षाद्गुणसंयोगात्क्रियाभिधानं स्यात्तदभावे ऽप्रसिद्धं स्यात् ॥ ४ ॥

विनिगमकं न पश्याम इत्याशङ्कायामाह । प्रत्यक्षादिति । नैयमिकाग्निहोत्रे प्रत्यक्षाच् श्रूयमाणाद् अग्निर्ज्योतिरितिमन्त्रलिङ्गेन गुणस्य देवतारूपस्य संयोगात् तत्प्रख्यन्यायेन क्रियाभिधानं तत्कर्मणो नाम स्यात् । मासाग्निहोत्रे तदभावे तत्सन्निधिपठितमन्त्राद्यभावे अप्रसिद्धमङ्कं विधास्यन् न नामत्वं लभते । अतः नित्याग्निहोत्रनाम, अत्र धर्मप्राप्त्यर्थं तन्नाम्ना व्यवहार इति भावः ॥ ४ ॥

प्रायणीयेति नाम्ना धर्मानतिदेशः । अधि० २ ।

अपि वा सर्वत्र कर्मणि गुणार्थैषा श्रुतिः स्यात् ॥ ५ ॥

द्वादशाहे प्रथममहः प्रायणीय इति । तद्विकृतौ गवामयने ऽपि प्रायणीयं प्रथममहरिति । अत्र प्रायणीयशब्दो धर्मप्राप्त्यर्थमिति पूर्वपक्षे सिद्धान्तमाह । अपि वेति । सर्वत्र कर्मणि प्रकृतौ विकृतौ च गुणार्थो गुण-

विध्यर्थमेषा प्रायणीय इत्येषा श्रुतिः। प्रारभ्य अयति प्रवर्तते यत्र इति व्युत्पत्त्या प्राथम्यरूपगुणार्थत्वमुभयत्र तुल्यमिति भावः ॥ ५ ॥

सर्वपृष्ठशब्देन षण्णां पृष्ठानामतिदेशः। अधि ३।

विश्वजिति सर्वपृष्ठे तत्पूर्वकत्वाज्ज्यौतिष्टोमिकानि पृष्ठानि अस्ति च पृष्ठशब्दः ॥ ६ ॥

विश्वजित्सर्वपृष्ठो ऽतिरात्रो भवतीति। अत्र सर्वपृष्ठानुवादः विधिर्वेति संशये प्रथमपक्षमाह। विश्वजिदिति। विश्वजिति सर्वपृष्ठे उदाहृतवाक्ये ज्योतिष्टोमिकान्येव पृष्ठानि प्रतिपाद्यन्ते। कुतः, तत्पूर्वकत्वात् तद्विकृतित्वात्। प्रकृतित एव प्राप्तौ इदमनुवादकं भवतीति भावः। ननु ज्योतिष्टोमे न बहूनि पृष्ठानि सन्ति किं तु माध्यन्दिनसवने एकमेव पृष्ठं, कथं सर्वपृष्ठशब्देन अनुवादः तत्राह। अस्ति चेति। ज्योतिष्टोमे माहेन्द्रादिचतुर्षु स्तोत्रेषु पृष्ठशब्दः पृष्ठशब्देन व्यवहारः, सप्तदश पृष्ठानीति, अतो ऽनुवादः ॥ ६ ॥

षडहाद्वा तत्र चोदनाः ॥ ७ ॥

सिद्धान्तमाह। षडहादिति। षडहधर्मातिदेशः तत्र षण्णां पृष्ठस्तोत्राणां रथन्तरबृहद्वैरूपवैराजरैवतशाक्वराणां चोदनाः विधयो यतः सन्ति अतः ॥ ७ ॥

लिङ्गदर्शनाच्च ॥ ८ ॥

लिङ्गेति। वैरूपं होतुः वैराजं मैत्रावरुणस्येत्यादिशाक्वरान्तानां कर्तृविशेषसंबन्धो लिङ्गं षडहधर्मत्वे ॥ ८ ॥

उत्पन्नाधिकारो ज्योतिष्टोमः ॥ ९ ॥

यच्च ज्योतिष्टोमे ऽपि बहूनि पृष्ठानि सन्तीत्युक्तम्। तद्दूषयति। उत्पन्नेति। बृहत्पृष्ठं भवतीत्युत्पन्नपृष्ठस्तोत्राधिकारिकः ज्योतिष्टोमः, तत्र माहेन्द्रस्तोत्रादिषु पृष्ठशब्दः छत्रिन्यायेनेति भावः ॥ ९ ॥

द्वयोरिति चेत् ॥ १० ॥

ज्योतिष्टोमे बृहद्रथन्तरयोर्विकल्पेन सत्त्वादुभयोः समुच्चयार्थमिदमित्याशङ्कते। द्वयोरिति। समुच्चय इति सूत्रे योज्यम् ॥ १० ॥

न व्यर्थत्वात्सर्वशब्दस्य ॥ ११ ॥

दूषयति । नेति । सर्वशब्दो बहुषु प्रयुज्यते न द्वयोरिति वैयर्थ्यमिति भावः ॥ ११ ॥

अवभृथनाम्ना सौमिकधर्मातिदेशः । अधि० ४ ।

तथा ऽवभृथः सोमात् ॥ १२ ॥

चातुर्मास्ये तुषैश्च निष्कासेन चावभृथमवयन्तीति श्रुतम् । दर्शपूर्णमासात्प्राप्ते प्राच्यां दिशीति दिगुत्सेके तुषनिष्कासौ विधीयेते उतावभृथशब्दः सौमिकावभृथधर्मप्रापक इति संशये पूर्वाधिकरणसिद्धान्तातिदेशमाह । तथेति । तथा षडहातिदेशवत् । सोमात् सोमावभृथाद्धर्मप्राप्त्यर्थं वाक्यम् ॥ १२ ॥

प्रकृतेरिति चेत् ॥ १३ ॥

पूर्वपक्षमाह । प्रकृतेरिति । प्रकृतेः दर्शपूर्णमासयोः प्राप्तदिगुत्सेकस्य गुणत्वेन विधिः तुषनिष्कासयोः । दिगुत्सेके अवभृथशब्दप्रवृत्तिः कथमिति चेत् । एष वै दर्शपूर्णमासयोरवभृथ इत्यर्थवादे व्यवहारदर्शनात् ॥ १३ ॥

न भक्तित्वात् ॥ १४ ॥

दूषयति । नेति । न पूर्वपक्षः । अर्थवादे दिगुत्सेके ऽवभृथशब्दस्य भक्तित्वात् स्तावकत्वात् । अतः सौमिकावभृथधर्मातिदेशः ॥ १४ ॥

लिङ्गदर्शनाच्च ॥ १५ ॥

लिङ्गदर्शनात् । नायुर्दां जुहोति न साम गायतीति सौमिकावभृथधर्माणां केषां चिन्निषेधदर्शनात् । प्राप्तिं विना निषेधासंभवादिति भावः ॥ १५ ॥

वारुणप्रघासिकावभृथस्य तुषनिष्कासद्रव्यकत्वम् । अधि० ५ ।

द्रव्यादेशे तद्द्रव्यः श्रुतिसंयोगात्पुरोडाशस्त्वनादेशे तत्प्रकृतित्वात् ॥ १६ ॥

तत्रैव सौमिकावभृथधर्मातिदेशमङ्गीकृत्य यागसाधनत्वेन पुरोडाशप्राप्तिर्नामातिदेशेन वचनेन तुषविमोको प्राप्तौ । तयोर्मध्ये कतमो

ग्राह्य इति विचारे सिद्धान्तमाह। द्रव्येति। उक्तरीत्या द्रव्ययोरादेशे प्राप्तौ सत्यां तद्द्रव्यः तुषनिष्कासद्रव्यकः श्रुतिसंयोगात्प्रत्यक्षश्रुत्या विधानात्। अनादेशे प्रत्यक्षश्रुत्या अप्राप्तौ पुरोडाशः द्रव्यं सा प्रकृतिर्यस्य तत्त्वात्॥ १६॥

वैष्णवशब्दादातिथ्यायां धर्मानतिदेशः। अधि० ६।

गुणविधिस्तु न गृह्णीयात्समत्वात्॥ १७॥

आतिथ्यायां नवकपालो वैष्णवो भवतीति, तथा राजसूये वैष्णवस्त्रिकपाल इति। अत्र वैष्णव इति नामातिदेशार्थं गुणविधिर्वेति संशये धर्मातिदेशार्थमिति पूर्वपक्षे सिद्धान्तमाह। गुणेति। न गृह्णीयादातिथ्या धर्मान्। किं तु गुणविधिः। देवतारूपगुणविधिः देवताबोधकतद्धितस्योभयत्र समत्वात् तुल्यत्वात्॥ १७॥

निर्मन्थ्यादिशब्दैर्धर्मानतिदेशः। अधि० ७।

निर्मन्थ्यादिषु चैवम्॥ १८॥

अग्नीषोमीयपशौ निर्मन्थ्योऽग्निराम्नातः। अग्नौ निर्मन्थ्येनेष्टकाः पचन्तीति। एवं दर्शपूर्णमासयोः बर्हिः संस्कृतमाम्नातम्। तथा पशौ बर्हिषा यूपावटं स्तृणातीति। अत्र तथा, केवलमथितोऽग्निः केवलं कुशाश्च गुणत्वेन विधीयन्ते न नाम्ना धर्मातिदेशः उभयोरविशेषात् सिद्धान्तः॥ १८॥

द्वयोः प्रणयन्तीत्यनेन सौमिकधर्मानतिदेशः। अधि० ८।

प्रणयनं तु सौमिकमवाच्यं हीतरत्॥ १९॥

चातुर्मास्ये श्रूयते, द्वयोः प्रणयन्ति तस्माद् द्वाभ्यां यन्तीति। प्रणयनं विहितं प्रणयनं सौमिकमङ्गकलापयुक्तं दार्शपूर्णमासिकप्रणयनम् अधर्ममनेन वाक्येन कतमं प्रणयनं विधीयतइति विचारे पूर्वपक्षमाह। प्रणयनमिति। अस्मिन्वाक्ये श्रूयमाणं प्रणयनं सौमिकम्। हि यतः इतरद् दार्शपूर्णमासिकं प्रणयनमवाच्यमविधेयम्। चोदकशास्त्रेणैव प्राप्तत्वात्। सौमिकत्वे तद्धर्मप्राप्त्यर्थं विधानं सार्थकमिति भावः॥ १९॥

उत्तरवेदिप्रतिषेधश्च तद्वत् ॥ २० ॥

साधकान्तरमाह । उत्तरवेदीति । उत्तरवेदिप्रतिषेधः । न वैश्वदेव-उत्तरवेदिमुपकिरति न शुनासीरीयइति उत्तरवेदिप्रतिषेधश्च तद्वत्सौमिकप्रणयनपरत्वनिर्णायकः । दार्शपूर्णमासिकप्रणयनपरत्वे तत्रोत्तरवेद्यभावेन निषेधासंभव इति भावः ॥ २० ॥

प्राकृतं वाऽनामत्वात् ॥ २१ ॥

सिद्धान्तमाह । प्राकृतमिति । प्राकृतं दार्शपूर्णमासिकं प्रणयनम् । अनामत्वात् प्रणयनमिति सौमिकप्रणयननामत्वाभावेन नामातिदेशासंभवादिति भावः ॥ २१ ॥

परिसंख्यार्थं श्रवणं गुणार्थमर्थवादो वा ॥ २२ ॥

वाक्यवैयर्थ्यं त्रिभिः पक्षैः परिहरति । परीति । श्रवणं वाक्यश्रवणम् । गुणार्थं गुणस्य प्राग्देशनयनरूपगुणार्थं परिसंख्यार्थं वैश्वदेवशुनासीरीययोः प्रणयननिवृत्त्यर्थं वा अर्थवादो वा तस्माद् द्वाभ्यां यन्तीति स्तुत्यर्थं प्रणयनानुवाद इति भावः ॥ २२ ॥

द्वयोः प्रणयन्तीत्यनेन मध्यमयोर्द्वयोः प्रणयनम् । अधि० ६ ।

प्रथमोत्तमयोः प्रणयनमुत्तरवेदिप्रतिषेधात् ॥ २३ ॥

इदं प्रणयनं चतुर्षु पर्वसु मध्ये कुत्र कार्यमिति संशये पूर्वपक्षमाह । प्रथमेति । प्रथमान्त्ययोः प्रणयनं तयोरुत्तरवेदिप्रतिषेधात् । प्रतिषेधवचनं दर्शितं पूर्वम् । उत्तरवेद्यामग्निं निदधातीति श्रवणात् । यत्रेदं प्रणयनं तत्रोत्तरवेदिप्राप्तौ तन्निषेधः सार्थक इति भावः ॥ २३ ॥

मध्यमयोर्वा गत्यर्थवादात् ॥ २४ ॥

सिद्धान्तमाह । मध्येति । मध्यमयोः प्रणयनम् । ऊरू वा एते यज्ञस्य यद्वरुणप्रघासः साकमेधश्चेति गतिसाधनोरुप्रतिपादकार्थवादात् । ऊरुत्वेन तयोः संस्तवात् । तस्माद् द्वाभ्यां यन्तीत्यर्थवादाच्च मध्यमयोरिति भावः ॥ २४ ॥

औत्तरवेदिकोऽनारभ्यवादप्रतिषेधः ॥ २५ ॥

ननु पूर्वोक्तनिषेधस्य का गतिरत आह । औत्तरेति । उत्तरवेद्यामग्निं निदधातीति एकमपि पर्वाणनारभ्य श्रुतम् । अतः पर्वचतुष्टये ऽविशेषेणोत्तरवेदिप्राप्तौ औत्तरवेदिकप्रतिषेधः अनारभ्य पठितवचनप्राप्तोत्तरवेदिप्रतिषेधार्थं इति भावः* ॥ २५ ॥

स्वरसामादिशब्देन धर्मातिदेशः । अधि· १० ।

स्वरसामैककपालामिक्षं च लिङ्गदर्शनात् ॥ २६ ॥

गवामयने अभितो दिवाकीर्त्यं त्रयः स्वरसामान इति । अस्यार्थः । दिवाकीर्त्यनामकं मुख्यमहः, तस्याभितः पार्श्वद्वये त्रयः त्रयः स्वरसामनामकानि अहानि इत्यर्थः । तेषु स्वरसामसु सप्तदशः स्तोमो भवतीति सप्तदशस्तोमः प्रत्यक्षवचनेन विहितः । एवं षडहनामके क्रत्वन्तरे पृष्ठ्यः षडहो द्वौ स्वरसामानाविति श्रुतम् । अत्र स्वरसामशब्दो गवामयनस्यस्वरसामशब्दश्च स्वातन्त्र्येण स्वरसाममात्रप्रापको न तदतिरिक्तसप्तदशस्तोमप्रापकः पूर्वोक्तवैष्णवशब्दवदिति पूर्वपक्षे सिद्धान्तमाह । स्वरेति । स्वरसाम स्वरसामशब्दः क्रत्वन्तरे श्रूयमाणः धर्माणां गवामयनसंबन्धिस्वरसामधर्माणां सप्तदशस्तोमानां ग्राहकः । लिङ्गदर्शनात् । तथा हि । षडहे षट्सु अहःसु क्रमेण त्रिवृत्पञ्चदशः सप्तदश एकविंशः त्रिणवः त्रयस्त्रिंशश्चेति चोदकेन प्राप्ताः । एवं सति षष्ठे ऽहनि त्रयस्त्रिंशस्थाने सप्तदशस्तोमो विहितः, यत्तृतीयं सप्तदशमहः तत्त्रयस्त्रिंशस्थानमभिपर्यावर्ततइति । तत उत्तरं तस्यैवार्थवादः श्रुतः, त्रयाणां सप्तदशानाम-

* वार्त्तिककारस्तु प्रणयनं तु सौमिकमित्यारभ्य औत्तरवेदिको ऽनारभ्यवादप्रतिषेध इत्यन्तानां सप्तानां सूत्राणामेकाधिकरणपरत्वमुक्तवान् । तत्र त्रेधा संशयः । द्वयोः प्रणयन्तीति किं प्राकृतं प्रणयनमुत सौमिकमुतापूर्वमिति । तत्र प्राकृतस्यातिदेशतः प्राप्तत्वेन वचनवैयर्थ्यभिया सौमिकं प्रणयनं विधीयतइति पूर्वपक्षः । सौमिकप्रणयननामत्वाभावेन नामातिदेशासंभवादपूर्वमिदं प्रणयनं विधीयते । प्रणयनमात्रश्रवणे ऽपि शाखान्तरे द्वावग्नी प्रणयत इति वचनात्तदेकार्थत्वादनेन वचनेनापि प्राकृतप्रणयनोत्तरकालमाहवनीयादग्न्यन्तरप्रणयनं पशुबन्धवद्विधीयते । तच्च गत्यर्थवादवशान्मध्यमयोर्भवति । परिसंख्यार्थमित्यादिसूत्रत्रयं त्रयाणामपि पक्षाणां यथाक्रमं प्रयोजनकथनार्थम् । उत्तरवेदिप्रतिषेधस्तु उपात्र वपन्तीत्यस्य सामान्यविषयस्य पर्युदासार्थं इति शा· दी· विस्तरः ।

नवानतायादृति । अनवानतायै अव्यवधानार्थम् । तत्राव्यवधानं षष्ठस्याह्नः उक्तवचनेन सप्तदशस्तोमत्वे तदुत्तरं स्वरसामदृष्टस्य स्वरसामशब्दवाच्यस्य सप्तदशस्तोमत्वे सप्तदशस्तोमानां षष्ठसप्तमाष्टमानामह्नां सप्तदशस्तोमत्वात्तत्सांतत्यमुपपन्नम् । केवलं साममात्रप्रापकत्वे सप्तदशस्तोमस्य स्वरसाम्नोरभावात् सांतत्यं नोपपद्यतदृति भावः । तथा वैश्वदेवपर्वणि द्यावापृथिव्यमेककपालं तद्धर्माश्च प्रतिपादिताः । तथा आग्रयणे द्यावापृथिव्यमेककपालं विहितम् । तत्रापि आग्रयणे यत्सर्वं हुतं करोतीत्यर्थवादेन निःशेषपुरोडाशहवनस्तुत्या वैश्वदेवपर्वसंबन्धिन एककपालस्य धर्मप्राप्तिः । तथा वैश्वदेवपर्वणि वैश्वदेव्यामिक्षा विहिता । तस्या धर्माश्च विहिताः । अन्यत्र मैत्रावरुण्यामिक्षेति विधाय न वाजिनेन प्रचरतीति वाजिननिषेधानुपपत्त्या वैश्वदेवधर्मप्रापक आमिक्षाशब्दो ज्ञेयः* ॥ २६ ॥

वासआदिशब्दानामाकृतिनिमित्तत्वम् । अधि· ११ ।

कर्मजे कर्म यूपवत् ॥ २७ ॥

वासो ददातीति श्रुतम् । अत्र वासःशब्दः क्रियानिमित्तः जातिनिमित्तो वेति संशये पूर्वपक्षमाह । कर्मजदृति । कर्मजे तुरीवेमादिसंयोगादिरूपक्रियाजन्ये द्रव्ये तत्तच्छब्दप्रवृत्तिनिमित्तं पूर्वोक्तं कर्म, यथा यूप शब्दप्रवृत्तिनिमित्तं तक्षणादिक्रिया । तथा च तुरीवेमादिक्रियया पटमुत्पाद्य दातव्यमिति भावः ॥ २७ ॥

रूपं वाऽशेषभूतत्वात् ॥ २८ ॥

सिद्धान्तमाह । रूपमिति । रूपं जातिरेव निमित्तं क्रियायाः अशेषभूतत्वात् । अङ्गत्वेनाविहितत्वात् । यूपं तक्षतीति क्रियाकलापविधानाद्वैषम्यम् ॥ २८ ॥

गर्गत्रिरात्रे लौकिकाग्नेरुपनिधानम् । अधि· १२ ।

विशये ऽलौकिकः स्यात्सर्वार्थत्वात् ॥ २९ ॥

गर्गत्रिरात्रे स्तोत्राङ्गतया अग्निमुपनिधाय स्तुवीतेति श्रुतम् ।

* इत उत्तरं, चोदनासामान्याद्वा, इति सूत्रमधिकं शाबरभाष्ये व्याख्यातं दृश्यते ।

अयमग्निर्वैदिको लौकिको वेति विशये संशये ऽलौकिकः वैदिकः आधानसंस्कृतः स्यात् तस्य वैदिकसर्वकर्मार्थत्वात् ॥ २९ ॥

न वैदिकमर्थनिर्देशात् ॥ ३० ॥

सिद्धान्तमाह । नेति । न वैदिकम् । तस्य वैदिकाग्नेः यदाहवनीये जुहोतीत्यर्थस्य होमरूपस्य शास्त्रेणैव निर्देशादीदृशं न कार्यं वैदिकाग्नेरिति भावः ॥ ३० ॥

तथोत्पत्तिरितरेषां समत्वात् ॥ ३१ ॥

नन्वाग्नीध्रादिधिष्ण्येषु विहृता अग्नय उक्तकार्यार्थं गृह्यन्तामत्राह । तथेति । इतरेषां धिष्ण्याग्नीनामुत्पत्तिरपि न तथा न सर्वार्था । समत्वाद्धिष्ण्यान्व्याघारयतीति कार्यनिर्देशस्य समत्वात् ॥ ३१ ॥

उपशयो यूपो भवतीत्यादौ यूपशब्दस्य संस्काराप्रयोजकत्वम् । अधि० १३ ।

संस्कृतं ऽस्यात्तच्छब्दत्वात् ॥ ३२ ॥

एकादशिन्यां श्रूयते, उपशयो यूपो भवतीति । उपशये यूपसंस्काराः सन्ति न वेति संशये पूर्वपक्षमाह । संस्कृतमिति । संस्कृतमुपशयद्रव्यं स्यात् । तच्छब्दत्वात् । सः यूप इति शब्दो यस्य तत्त्वात् । यूपशब्देन यूपधर्मातिदेश इति भावः ॥ ३२ ॥

भक्त्या वा ऽयज्ञशेषत्वाद्गुणानामभिधानात् ॥ ३३ ॥

उपशये न यावन्तः संस्काराः अयज्ञशेषत्वात् । यज्ञानङ्गत्वात्तत्र पशुनियोजनरूपद्वाराभावादिति भावः । तर्हि यूपशब्दनिर्देशः कथमिति चेद्भक्त्या गौण्या वृत्त्या, आदित्यो यूप इतिवत् । ननु आदित्यवृत्तिचाक्चक्यादिगुणो यूपे इति गौणी वृत्तिः संभवति, इह कथं भक्त्येत्यत आह । गुणानां तूष्णींछेदनादिरूपाणां केषांचिदभिधानं यत्र तत्त्वात् ॥ ३३ ॥

पृष्ठैरुपतिष्ठतइत्यादौ पृष्ठशब्दस्य कर्मद्रव्यत्राविल्वम् । अधि० १४ ।

कर्मणः पृष्ठशब्दः स्यात्तथाभूतोपदेशात् ॥ ३४ ॥

अग्नौ श्रूयते, पृष्ठैरुपतिष्ठतइति । अत्र पृष्ठशब्दः कर्मवाचकः, सप्तदशानि पृष्ठानीत्यत्र पृष्ठैः स्तुवतइत्यत्र सिद्धः, तद्धर्मातिदेशार्थं प्रयुक्त उत खड्गाद्यप्राप्त्यर्थमिति संशये पूर्वपक्षमाह । कर्मण इति । पृष्ठै-

रुपदधातीत्यत्र पृष्ठशब्दः स्तोत्ररूपकर्मणः वाचकः पृष्ठशब्दः स्यात् । तथाभूतेन तादृशशब्देन उपदेशात् । निर्देशात् । हिङ्कारादिधर्मैः पृथिवीं मनसा ध्यायेदित्यादिभिश्च धर्मैः सहितं पृष्ठसदृशं कर्म कर्तव्यमिति भावः ॥ ३४ ॥

अभिधानोपदेशाद्वा विप्रतिषेधाद् द्रव्येषु पृष्ठशब्दः स्यात् ॥ ३५ ॥

सिद्धान्तमाह । अभिधानेति । द्रव्येषु स्वरूपद्रव्येषु पृष्ठशब्दः स्यात् । आत्मनेपदेन अभिधानोपदेशात् । तथा हि । उपान्मन्त्रकरण इति पाणिनीयसूत्रम् । अस्यार्थः । मन्त्रकरणे वर्तमानादुपपूर्वात्तिष्ठतेरात्मनेपदं स्यात् । मन्त्रकरणं यस्याः क्रियायाः तादृशे तिष्ठत्यर्थे । तादृशो धात्वर्थः अभिधानं स्वाभिमुखे पुरुषे स्वाभिप्रायज्ञापनं, तादृशक्रियायाः शब्दसाध्यत्वान्मन्त्रस्य शब्दरूपत्वान्मन्त्रकरणत्वम् । ईदृशाभिधानोपदेशाद् विप्रतिषेधाद् आत्मनेपदविरोधादिति फलितोऽर्थः ॥ ३५ ॥

इति श्रीमज्जैमिनिसूत्रवृत्तौ सप्तमाध्यायस्य तृतीयः पादः ॥ ३ ॥

सौर्ये चरौ इतिकर्तव्यतावत्त्वम् । अधि० १ ।

इतिकर्त्तव्यताऽविधेर्यजतेः पूर्ववत्त्वम् ॥ १ ॥

गतो नामातिदेशः । इदानीमानुमानिकोऽतिदेशश्चिन्त्यते । सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकाम इत्यत्र किं केनेत्याकाङ्क्षापूरकशब्दो स्तः कथमित्याकाङ्क्षापूरकशब्दो नास्ति । तथाऽप्यनुमानेनोपसिद्धिः तस्य भवति । तथा हि । सौर्ययागरूपं करणं व्यापारापेक्षं करणत्वात्कपालवदिति । इममेवार्थं प्रथमसूत्रेणाह । इतीति । इतिकर्तव्यतायाः श्रूयमाणवाक्ये अविधे यजतेः सौर्याख्यियागस्य पूर्ववत्त्वमन्यत्र क्लृप्ता ये धर्मास्तद्वत्त्वं व्यापारं विना फलासंभवादिति भावः ॥ १ ॥

स लौकिकः स्याद् दृष्टप्रवृत्तित्वात् ॥ २ ॥

एवं सौर्ययागस्येतिकर्तव्यतासिद्धौ स धर्मः लौकिकः स्यात्पार्वणस्थालीपाके दृष्टो यः स स्यात् । दृष्टप्रवृत्तित्वात् । पार्वणधर्माणां सर्पबल्यादिसंस्थासु दृष्टा प्रवृत्तिः अतिदेशो येषां तत्त्वात् ॥ २ ॥

वचनात्तु ततोऽन्यत्वम् ॥ ३ ॥

इदमपि न सर्वत्रेत्याह । वचनेति । गृहमेधीयादौ वचनात् । आज्यभागौ यजतीत्यादिवचनात्ततः पार्वणधर्मार्थत्वम् ॥ ३ ॥

लिङ्गेन वा नियम्येत तद्गुणत्वात् ॥ ४ ॥

दर्शपूर्णमासधर्मातिदेश इति सिद्धान्तमाह । लिङ्गेति । सौर्यचरौ दर्शपूर्णमाससंबन्धिप्रयाजानुवादेन प्रयाजे प्रयाजे कृष्णलं जुहोतीति लिङ्गेन नियम्येत लिङ्गस्य प्रयाजादेः तद्गुणत्वात् । वैदिकापूर्वसाधनत्वात् । सौर्ययागापूर्वं प्रयाजादिजन्यं वैदिकापूर्वत्वाद्दर्शपूर्णमासापूर्ववद् , इत्यनुमानेन नियमसंभवादिति भावः ॥ ४ ॥

अपि वाऽन्यायपूर्वत्वाद्यत्र नित्यानुवादवचनानि स्युः ॥ ५ ॥

पूर्वपक्षं दूषयति । अपि वेति । नैतेन लिङ्गेन नियन्तुं शक्यम् । अन्यायपूर्वत्वात् । सन्यायपूर्वत्वाभावात् । हेतोरदुष्टत्वाभावात् । हेतौ दोषमेवाह । यत्रेति । यत्र प्रयाजाः क्लृप्ताः तत्रैव कृष्णलविधिरिति वक्तुं शक्यत्वात् । तथा महापितृयज्ञे, नार्षेयं वृणीते न होतारमिति, पितृयज्ञे कदाऽपि आर्षेयप्राप्त्यभावेन नित्यानुवादरूपत्वमित्यप्याह । नित्यानुवादवचनानि स्युः । इत्थं च सौर्ययागः दर्शपूर्णमासधर्मकः दर्शपूर्णमासाङ्गभूतप्रयाजाङ्गत्वादित्यनुमानं स्वरूपासिद्धमिति भावः ॥ ५ ॥

मिथो विप्रतिषेधाच्च गुणानां यथार्थकल्पना स्यात् ॥ ६ ॥

पुनः प्रथमपक्षमुत्थापयति । मिथ इति । मिथः परस्परं प्रतिषेधात् । विरोधात् । अयं भावः । पार्वणधर्माः पार्वणेन प्रयाजादयश्च दर्शपूर्णमासाभ्यां संबद्धौ । सौर्ययागे धर्माकाङ्क्षायामेकेन धर्मेण चरितार्थमपरधर्मप्राप्तौ निराकाङ्क्षं प्रतिषिद्धमिति । एवं सति यथार्थकल्पना ये धर्माः सर्पबल्यादौ उपक्लृप्तत्वेनान्यार्थाः तथा कल्पना स्यात् । स्मार्तधर्माणामेव कल्पनमिति भावः ॥ ६ ॥

भागित्वात्तु नियम्येत गुणानामभिधानत्वात्संब-न्धादभिधानवद्यथा धेनुः किशोरेण ॥ ७ ॥

न स्मार्तधर्माणामतिदेशः, वैदिकस्यैवेति नियम्यते। गुणानां प्रयाजादीनां भागित्वाद्वैदिकापूर्वसंबन्धभाक्त्वात्। अभिधानवद् अग्निहोत्रनामवत्। गुणानां प्रयाजादीनामभिधानत्वात्सौर्यचरौ प्रयाजे कृष्णलं जुहोतीति प्रयाजादीनामभिधानं यत्र तत्त्वात्। यथा नाम्ना ऽतिदेशो नियम्यते तथा गुणाभिधानेनापि दर्शपूर्णमासगुणा नियम्येरन्निति भावः। यत्तु पार्वणधर्माणामन्यत्रातिदेशप्रवृत्तिर्दृष्टेत्युक्तं, तत्परिहरति। यथा धेनुः धेनुशब्दः गवि दृष्टप्रवृत्तिरपि प्रमाणान्तरसहकारेण किशोरेण अश्वधेन्वा ऽपि संबध्यते तथोक्तलिङ्गेन अदृष्टातिदेशानामपि प्रयाजादीनां संबन्धः विकृतौ कल्प्यतइति भावः ॥ ७ ॥

उत्पत्तीनां समत्वाद्यथाधिकारं भावः स्यात् ॥ ८ ॥

प्रयाजस्य सौर्ययागे श्रुतत्वादङ्गत्वमास्तां शेषाणामनूयाजादीनां सौर्ययागे प्राप्तौ न किंचित्प्रमाणमिति शङ्कते। उत्पत्तीनामिति। प्रयाजानूयाजादीनामुत्पत्तीनां समत्वाद्यथाधिकारं यत्र यत्र ये ये धर्माः श्रुताः तेषां भावः सत्त्वं स्याद् न त्वन्येषाम्। अयं भावः। प्रयाजाः प्रधानम् इतराणि तदङ्गानि यदि स्युः, तर्हि प्रयाजप्रवृत्तौ प्रधानानुयायीन्यङ्गान्यपि स्युः, नत्वेवं, सर्वेषां समत्वादिति प्रयाजातिरिक्तप्रापकमानाभावः। पार्वणधर्माणां भूयःसु स्थलेषु अङ्गत्वेन संबन्धो दृष्टः। अनूयाजादीनां सकृदेव दर्शपूर्णमासे दृष्टम्। अतः स्मार्तानां यावतां श्रुतस्य प्रयाजस्य चाङ्गत्वं सौर्ययागइति ॥ ८ ॥

उत्पत्तिशेषवचनं च विप्रतिषिद्धमेकस्मिन् ॥ ९ ॥

ननु अनितिकर्तव्यताकप्रधानयागासंभवात् सेतिकर्तव्यताकं प्रधानं प्रधानविधिरेव विधत्ते। वेदेन विहितत्वाद्वैदिक्येवेतिकर्तव्यता गृह्यतामित्यत्रोत्तरमाह। उत्पत्तीति। एकस्मिन्वाक्ये प्रधानोत्पत्तिः शेषाणामङ्गानां वचनं विधिश्च विप्रतिषिद्धं विरुद्धमसंभवीति यावत्। यदि

निर्वपेदित्यनेन अङ्गान्यपि विधीयेरन् तुल्यत्वेन तेषामपि फलसंबन्धः स्यात् । अङ्गत्वमेव भज्येतेति भावः ॥ ९ ॥

विध्यन्तो वा प्रकृतिवच्चोदनायां प्रवर्तेत तथा हि लिङ्गदर्शनम् ॥ १० ॥

सिद्धान्तमाह । विध्यन्तो वेति । प्रकृतिवद् दर्शपूर्णमासवद् इतिशब्दयोजना चोदनायां सौर्यविधौ प्रवर्तेत संबध्येत । तेन विध्यन्तः निखिलपौरोडाशिकधर्मः तत्र प्रवर्तते । अयं भावः । सर्वा ऽपि भावना अंशत्रयमाकाङ्क्षति किं केन कथमिति । तत्र यागः करणत्वेन ब्रह्मवर्चसं भाव्यत्वेनेत्याकाङ्क्षाद्वयनिवृत्तौ कथंभावाकाङ्क्षायां पार्वणधर्मस्य न काष्ठादीतिकर्तव्यतावत्प्रत्यक्षेण प्राप्तिः । न भूयोदर्शनगम्यव्याप्तिज्ञानेन । गणहोमादौ व्यभिचारात् । नाप्युपमानेन । सादृश्याभावात् । दर्शपूर्णमासधर्मस्य तु उक्तप्रयाजादिलिङ्गेन उपस्थितौ तद्बोधकं पदं कल्पयित्वा प्रकृतिवदिति तेनैवाकाङ्क्षा पूरणीयेति भावः । हि यतः तथा लिङ्गदर्शनं दर्शपूर्णमासधर्मप्रापकप्रयाजादिलिङ्गदर्शनम् ॥ १० ॥

लिङ्गस्य हेतुत्वादलिङ्गे लौकिकं स्यात् ॥ ११ ॥

नन्वस्तु सौर्ययागे प्रयाजादिलिङ्गदर्शनेन तद्वाक्ये प्रकृतिवद् इति योजनम् । प्रजापाधनैन्द्राग्नेष्ट्यां प्रयाजादिलिङ्गाभावात् पात्रेणधर्मा इत्याशङ्कते । लिङ्गेति । लिङ्गस्य प्रयाजादिवाचकशब्दश्रवणरूपलिङ्गस्य हेतुत्वात् । दर्शपूर्णमासधर्मप्राप्तिहेतुत्वात् । अलिङ्गे तादृशलिङ्गशून्ये लौकिकं स्यात् ॥ ११ ॥

लिङ्गस्य पूर्ववत्त्वाच्चोदनाशब्दसामान्यादेकेनापि निरूप्येत यथा स्थालीपुलाकेन ॥ १२ ॥

आशङ्कां निराकुरुते । लिङ्गस्येति । लिङ्गस्य प्रयाजलिङ्गस्य पूर्ववत्त्वात् । सौर्ययागादौ प्रयाजादिधर्मप्राप्तौ स्वभिचकारणान्तरसत्त्वात् । तदेव दर्शयति । चोदनाशब्दसामान्यात् कर्म । । कविधेर्लिङ्गवतो ऽलिङ्गवतो वा तुल्यत्वात् । अयं भावः । न केवलं लिङ्गं धर्मप्रापकम् । किं तु विधि-

प्रत्ययश्रवणे कथं कुर्यादित्याकाङ्क्षापूरकशब्देनैव दर्शपूर्णमासवदिति पार्वणवदिति वा विधिवाक्ये योज्यमिति। संशये दर्शपूर्णमासवदित्येवेति लिङ्गं नियामकमात्रं तादृशविधेस्तुल्यत्वात्। ननु नियमोऽपि यत्र लिङ्गं तत्रैव भविष्यति अन्यत्र कथं तत्राह। एकेनापि लिङ्गदर्शनेन सर्वत्र निरूप्येत जानीयात्। यथा स्थालीपुलाकेन तुल्यपाकानां स्थाल्यां पुलाकानामेकत्र दृष्टे सर्वदृष्टिर्भवति तथा ॥ १२ ॥

गवामयने ऐकाहिकेतिकर्तव्यतानुष्ठानम्। अधि० २।

द्वादशाहिकमहर्गणे तत्प्रकृतित्वादैकाहिकमधिकागमात्तदाख्यं स्यादेकाहवत् ॥ १३ ॥

इदानीमानुमानिकनामातिदेशयोः प्रबलदुर्बलभावश्चिन्त्यते। गवामयने ज्योतिर्गौरायुरिति त्रीण्यहानि। एवं ज्योतिर्गौरायुरिति स्वतन्त्रा एकाहविशेषाः। गवामयनसंबन्धिज्योतिरादौ द्वादशाहाच्छतदक्षिणा। आनुमानिकातिदेशेन ज्योतिरादिनाम्ना सहस्रदक्षिणा च प्राप्ता। तत्र कतमो विधेय इति संशये पूर्वपक्षमाह। द्वादशेति। अहर्गणे उक्तस्थले द्वादशाहिकं द्वादशाहधर्माः तत्प्रकृतित्वाद् द्वादशाहप्रकृतित्वात्। ऐकाहिकमेकाहसंबन्धि समाख्यानं ज्योतिर्गौरायुरिति। अधिकागमात् ज्योतिष्टोमादधिकस्तोत्रशस्त्राद्यागमात् तावन्मात्रेण चरितार्थं, यथा स्वतन्त्रैकाहः तथा ॥ १३ ॥

लिङ्गाच्च ॥ १४ ॥

लिङ्गेति। लोमावद्यन्तीत्यर्थवादेन द्वादशोपसत्त्वं द्वादशाहधर्मप्रापकं लिङ्गम् ॥ १४ ॥

न वा प्रत्यक्षत्वात्क्रत्वभिधानादधिकानामशब्दत्वम् ॥ १५ ॥

सिद्धान्तमाह। न वेति। न द्वादशाहधर्मप्राप्तिः किं तु क्रत्वभिधानात् क्रतुनाम्नः धर्मप्राप्तिः द्वादशाहातिदेशत्वेन नामधेयस्य प्रत्यक्षविधित्वेन प्रबलत्वादिति भावः। अधिकस्तोत्रशस्त्रप्रापकतया नाम

Here, the meaning is that the nail-marks on the body of Buddha looked as charming as those on that of a man (enjoying woman's company). Or that as an outside erotic man enviously observes other's nail-marks, so did the Rishis longingly observe these,—in this lies the 'equality.'

[*Page* 511.] "The terrified wives of your enemies appear as if again going through the marriage ceremonies—catching hold of their husband's hands and going round the fire, sprinkling on the grassy ground the blood from the fingers of their feet, and as such appearing as if dropping the alakta paintings; and having their faces washed with tears."

[*Page* 512.] Here in this clever assertion, love for the king is shown; and to this sentiment, both the Erotic and the Quietistic are subservient, and as such, there is no contradiction; as in,—

"Rich men make a fun of the beggars, captivated by expectation, directing them 'come,' 'go,' 'fall,' 'get up,' 'speak,' 'be silent,' &c."

There is no contradiction between 'come and go, &c.,' since they are all subordinated to 'making fun.'

(So in the preceding example, though the Pathetic and the Erotic are opposed to each other, yet as both of them tend to strengthen the love for the king, therefore they do not contradict each other).

"May the fire of Çiva's arrows protect you—the fire appearing as a faulty lover, being thrown on touching the hand, struck on catching hold of the cloth, set aside on catching the locks, and not observed through flurry, when fallen on the foot, and disregarded on embrace, by the women of the Three Cities, with their lotus eyes full of tears." [*Amarūçataka*].

[*Page* 514.] Here the Pathetic is made subservient to the heroism of Çiva; and to this Pathetic again, the Erotic is subordinated; still since this latter rests in the Pathetic, therefore it becomes only a part of it. Or, again, the principal meaning, the description of Çiva, may be said to be perfected by the Pathetic,

strengthened by the Erotic in the form that 'the fire of the arrow did as an Erotic man had done.'

And it has been said—

(*a*) "A quality approaches the principal subject, after having purified, or strengthened itself; and it is only then that it does good to the subject."

[*Page* 516.] (*b*) There can be no contradiction of *Rasa* as described before in Chapter IV., by another *Rasa;* nor can there be a relation of subserviency between *Rasas;* hence in the preceding Kārikās by "*Rasa*" is meant the Permanent Sentiment.

Thus ends Chapter VII. of *Kāvya-prakāça* wherein are described the Defects of Poetry.

(*a*) *Pradīpa:* "It cannot be urged that the subordinate of the subordinate (the Erotic which is the subordinate of the Pathetic which is subordinate to the peculiar power of Çiva) is incapable of being the subordinate. Because the final subordinate adds to the effect of the second subservient (here, the Pathetic), and as such is said to be the subordinate thereof.

(*b*) Because *Rasa* has been described as being such as doing away with all other cognition.

CHAPTER VIII.
OF EXCELLENCES.

Having described the Defects the author next speaks of the difference between Excellences and Figures of Speech.

Definition of Excellence.

66. The properties of the principal *Rasa* that—like heroismof the soul—tend to its *excellence*, and have (*a*) permanent existence, are Excellences.

As heroisin, &c., belong to the soul, not to the body; so *sweetness*, &c., are properties of the *Rasa*, and not of the letters.

[*Page* 519.] Sometimes, however, from observing a greatness of form or appearance capable of heroism, it is said 'his appearance is heroic;' and so elsewhere by seeing only a big form, really devoid of heroism, the qualification 'heroic' is employed; and similarly a poor form, really heroic, is put down as non-heroic. As there are such mistaken notions, so in the same manner, the application of the qualification 'sweet,' &c. to soft letters—as "kusumākara," and the like—implying sweet *Rasas*, &c., gives rise to such usages—devoid of the real comprehension of the bounds of *Rasa*—as the application of the epithet 'sweet' to letters, through mere softness, even though they do not tend to any sweet *Rasa;* and similarly the epithet 'non-sweet' is applied to letters only through harshness, though they directly tend to sweet *Rasas*. Thus "sweetness," &c., are properties of the *Rasa* manifested through the letters, and are not located in these latter. The suggestiveness of these (letters) will be spoken of later on.

Figure defined.

67. Those (properties), which at times add to the excellence of the existing *Rasa*, through its members or parts (word and meaning)—as the necklace, &c. (of the soul)—are the Figures of Speech: Simile, Alliteration and the rest.

(*a*) *i. e.* not capable of existence without *Rasa;* and when in company with *Rasa*, always helping it.

Those that add to the excellence of the principal existing *Rasa*, through the speciality (or specific excellence) of the members in the shape of the expresser (word) and the expressed (meaning), are (called) Figures or Ornaments, just as the necklace adds to the excellence of the soul through the adornment of the special bodily members, neck, &c. In the absence of any *Rasa*, these end in mere fanciful (or melodious) sentences; and sometimes, they do not add to the excellence of *Rasas*, (even though these latter exist).

[*Page* 522.] Respective examples :—

"अपसारय धनसारं, कुरु हारं दूर एव किं कमलैः ।
अलमलमालि मृणालैरिति वदति दिवानिशम् बाला" ॥

["'Remove the camphor! keep the garland at a distance! what (is the food of) these lotuses! enough! enough of the lotus-stalk! my friend,'—thus does the girl speak day and night."]

Here Alliteration adds to the excellence of the *Rasa* (Privative Erotic) through (*a*) Words.

"The galling intense passion of the heart freely circulates like poison, burns like smokeless fire blown (by the wind), afflicts every part of the body like high fever; hence father is not able to protect me, nor mother, not yourself." [*Mālatīmādhava*, Act II.]

Here the Figure (Simile) adds to the excellence of the *Rasa* (the Erotic), through Meaning.

[*Page* 524.] "चित्ते विहट्टदि ण टुट्टदि सा गुणेसुं
सेज्जासु लोट्टदि विसट्टदि दिम्मुहेसुं ।
बोलम्मि वट्टदि पवट्टदि कव्वबन्धे
धाणे ण तुट्टदि चिरं तरुणी तरट्टी ॥

["The young woman acts with sense, is not devoid of excellences, moves to and fro on the bed, moves about on all sides, talks freely, engages in poetical composition, for a long time she does not break her contemplation (of you.")

(*a*) The alliteration of र helping the Privative Erotic.

Here merely Words (are adorned by Words).

Page 525.] "The sun having gone and the lotus having closed herself up through anger, the blackbees humming, and seeing crane there with his beloved, the separated Chakravāka neither relished nor gave up the lotus fibre, which (thus) acted as a bar to the departing life (breath.")

Here, by the Simile, the Meaning (the barring of the departure of life) alone is adorned, and not the *Rasa*.

The fibre under the circumstances should not have been able to keep back life, and as such the Simile ("as a bar") only tends to mar the principal meaning—(the *Rasa*, Privative Erotic).

[*Page* 527.] The above constitutes the difference between Excellences and Figures of Speech.

Some people hold that "in the case of the soul, the difference between Quality and Ornament may be based on the fact that *heroism* (a quality) is related (to the soul) by the relation of *inherence*, whereas the *necklace* (an ornament) is related by that of mere *conjunction*. But in the case of excellence (of Poetry) and Figure of Speech (there can be no such difference); inasmuch as both of these—Excellences in the shape of *Ephuism*, *Florridity*, and the like, and Figures in the shape of *Simile*, *Alliteration*, &c.—reside in Poetry in the relation of *inherence*. Hence the assertion of any such difference between them is only in accordance with the maxim of the 'line of sheep.'"

[*Page* 528.] Again, it is said (by Vāmana) that Excellences are such properties as are the means to the poetical charm (which constitutes the very poetry); and Figures, on the other hand, are means to the further heightening of the charm. This is not proper. Because we ask—Is it the coexistence of all the excellences, or that of some of them only, that constitutes Poetry?

If the former, then how can Gaudī and Pānchālī—both devoid of all excellence—be called forms of Poetry? If (the existence of) only a few (of the excellences constitute poetry) then, in the

following,—where the excellences, florridity &c., exist—would also be called Poetry, (*a*)—

"अद्रावत्र प्रज्वलत्यग्निरुच्चैः ।
प्राज्यः प्रोद्यन्नुल्लसत्येष धूमः" ॥

[In this hill burns fire; since thence rises great smoke.]

(Now the author attacks Vāmana's definition of Figure.) In such instances as—

"This beautiful woman (embodies) the acquisition of heaven in this (human) form; the loveliness of her lips despises the nectar,—"

The Figures Viçēshokti and Vyatirēka, even in the absence of any excellence, lead to the application of the name of "Poetry."

[*Page* 530.] The Author next states the various forms of Excellences—

The Three Forms of Excellence.

68. Sweetness, Ephuism (or florridity) and Lucidity (or Simplicity)—these three only, and not ten, (are the forms of Excellence).

[*Page* 531.] The respective definitions of these are now stated—

(1) Sweetness defined.

68. Sweetness is a source of delectability (or agreeableness), the means of the mollification or softening (of the heart) in the Erotic.

In the Erotic, i. e. in the Enjoyment-Erotic.

'*Mollification*'—*i. e.* melting or dissolving as it were. Melodiousness (said to be the differentia of sweetness by Bhāskara) subsists in Florridity and Lucidity as well.

69. In the Pathetic, Privative-Erotic and the Quietistic, it (Sweetness) is respectively (*b*) excessive.

Owing to excessive mollification.

(*a*) [And this is not proper; because it is a mere statement of a syllogistic form of reasoning.]

(*b*) In the Pathetic and Private Erotic it occurs pure and simple, whereas in the Quietistic it may appear mixed with Florridity.

69. Florridity or Ephuism is the source of the lustrous or brilliant expansion of the heart, and resides in the Heroic *Rasa*.

(2) Florridity.

Florridity is the producer of the brilliancy of the heart, in the shape of Expansion.

70. Its excessiveness belongs respectively to the *Rasas*, the Abhorrent and the Furious.

Florridity is more excessive in the Abhorrent than in the Heroic; and more than that even in the Furious.

70-71. Lucidity or Simplicity, proper everywhere, is that which extends suddenly over another (the heart), like fire among dry fuel, and like a clear (stream of) water.

(3) Lucidity.

Another—is that which is extended over—*viz.* the heart. *Everywhere*—*i. e.* in all the *Rasas*, as in every form of style.

The Application of the aforesaid Excellences to Words as well as Meaning.

71. These are attributed to both Word and Meaning, through secondary application.

Through secondary application—*i.e.* through Indication.

These—*i. e.* the Excellences. (They are attributed to Words also) as Heroism &c. to the form or appearance.

Why only three? why not ten? It is replied.

72. Some are included in these; some are mere negations of faults; and lastly, some at times are faults; therefore not ten.

Refutation of Vāmana's Division of Excellences into Ten Forms.

(1) "*Çlesha*," *i. e.* many words appearing as one word; (2) *Samādhi*, of the form of ascent and descent; (3) "*Udāratā*," *i. e.* Fanciful grouping of words; (4) "*Prasāḍa*," consisting in slackness mixed with florridity;—all these four are (*a*) included in Florridity. (5) "Sweetness" consisting in the distinctness of Words, has already been explained, in a way, under Sweetness.

(*a*) Since all these consist in close composition made up of brilliant sounds suggestive of the florrid.

(6) The "expression of meaning," is included in Lucidity. (7) Uniformity, consisting in the sameness of style, is sometimes a fault, as in the example मातङ्गाः &c. where the abandoning of the soft style with regard to the lion, becomes an excellence. (8) and (9) "softness" consisting in non-harshness, and "brilliancy" consisting in peculiar charm (produced by an arrangement of words different from the common), are merely negations of the faults Obscurity and Vulgarity, described before.

(*a*) Thus the forms of Excellences of words are not ten.

(1) The "Boldness" called "Florridity," consisting in the composition of a sentence out of the meaning of words (*i. e.* the denotation of a single meaning by various words); (2) the denotation of a word in the meaning of a sentence (*i. e.* the denotation of the meaning of many words by that of a single word); (3) Extensiveness (the denotation of a certain fact by many sentences), (4) Brevity (*i. e.* the denotation of many facts by a single sentence); and (5) "the propriety of the qualifications;"—the florridity consisting in the above five kinds of Boldness, is merely a flourish, not an Excellence. Since even without these the name "Poetry" is applicable. The Florridity consisting in propriety of qualification, is only a negation of the fault *incompleteness of meaning;* Lucidity, consisting in clearness of meaning, is only a negation of the fault *Redundant Words;* Sweetness consisting in a flourish of statements, (*i. e.* the mention of a single fact in various ways) is a negation of the fault—Monotony; Softness, consisting in non-harshness, is the negation of the fault Inauspicious Indecorous; and lastly Magnificence is merely a negation of Vulgarity;—and thus all these (forms of Excellence mentioned by Vāmana are merely accepted as the negation of various Defects). The 'manifestation of meaning," consisting in the clearness of forms of things, and "Brilliancy," consisting in brightness of *Rasa,* are accepted respectively as the figure Svabhāvokti, to be described later on, and the suggestion of *Rasa* in the poetry of subordinate suggestion.

(*a*) For Vāmana's definition of the ten forms, see the *Bālabodhinī.*

टी० इति वचनमुदाहृतम् । अनेनावृत्तिः कर्मकृता न भवति इमाँल्लोकानित्युक्तकामसञ्चारादिति च फलितं। पुनरावृत्तिहेतुत्वेन सम्भावितानि शिरांस्याशङ्क्य परिहरति न चेत्यादिना, प्रमाणस्यानुग्राहकतर्कतार्थतां चार्थाद्दर्शयति स्वेच्छा वा कर्म वा भगवत्सङ्कल्पो वा त्रयमेव पुनरावृत्तिहेतुतया सम्भावितं, तत्र स्वेच्छाकर्मभ्यामावृत्तिशङ्कां परिहरति "न चे"ति, तदर्थारम्भाद्यसम्भवादिति कर्म विद्यमानं चेत्सजातीयकर्मान्तरारम्भरुचिरूपां वासनामुपजनय्य तद्द्वारा कर्मान्तरं कारयति कर्मणः सवासनस्य नष्टत्वात् कर्मान्तरासम्भवात् न कर्म पुनरावृत्तिहेतुः, अनवधिकातिशयानन्दभगवदनुभवैकतानस्य नान्यापेक्षेति न स्वयं स्वस्य पुनरावृत्तिहेतुरित्यर्थः । भगवत्सङ्कल्पस्य पुनरावृत्तिहेतुत्वं परिहरति "न चे"ति, मुक्तान् पुनर्नावर्त्तयिष्यामीति सङ्कल्पो नान्यथा स्यादित्यभिप्रायेण सत्यसङ्कल्प इत्युक्तं, ज्ञानिनोऽत्यर्थं प्रियत्वाच्च तथा सङ्कल्पः । अत्यर्थप्रियत्वे प्रमाणं दर्शयति "य एवमाहे"ति, एवं न चेच्छिन्नेत्यादिना ऽपुनरावृत्तिश्रुतेरनुग्राहकस्तर्क उक्तो भवति । परे तु प्रत्यक्षोपदेशादित्यत्र आप्नोति स्वाराज्यमित्युदाहृत्य सवितृमण्डलादिस्थानेषु भोगोक्तेर्न जग-

भू० य एवमाह "प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः । उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम् ॥

टी० द्व्यापार इत्याहुः, स्वाराज्यशब्दस्य परमाकाशावस्थानेऽप्युपपत्तेस्तस्यानुपादानं सर्वलोकक्रमणशङ्काबीजत्वादिमान् लोकानित्याद्युपादानमुचितं तेन हि निरङ्कुशैश्वर्यं दर्शितं भवति विकाररूपं विकारोत्तीर्णं च नित्यमुक्तं परं ब्रह्म द्विधा हि स्थितिमाह "पादोऽस्ये"ति, न तत्र सूर्यो भाति न तद्भासयते सूर्य इति प्रत्यक्षानुमाने च विकारावर्तित्वं दर्शयत इति व्याचक्षते किमर्थं सूत्रद्वयमिति चेत् विकारालम्बनानां निर्विकारपररूपप्राप्तिरनुपपन्ना अतत्क्रतुत्वादित्यभिप्राय इति चाहुः इदमपि विकारालम्बना न प्राप्नुवन्तीत्यध्याहारसापेक्षत्वादनुपपन्नम्, अध्याहारेऽपि जगद्व्यापारवर्जनस्यानुपयोगिसूत्रद्वयं परं नाप्नुवन्ति सगुणेऽपि न

निरवग्रह मैश्वर्य्यमिति ज्ञापनार्थमिति चेत् अति अतिदूराभिप्रायकल्पनमेव दोषः, तथा हि स्थितिमाहेत्यत्रैव निर्विकारस्वरूपविषयश्रुतीनामपि विवक्षितत्वे पुनःप्रत्यक्ष—शब्देन परस्वरूपविषयश्रुत्युपादानवैयर्थ्यं च ऐश्वर्य्यं चेदन्तवत् सस्मादावृत्तिरिति शङ्काव्युदासार्थमनावृत्तिः शब्दादिति सूत्रमिति निर्गुणप्राप्तावावृत्तिशङ्काया अभावादित्याहुः। तदयुक्तमकर्मकृतसहजैश्वर्य्ये ऐश्वर्य्यत्वादावृत्तिशङ्काया मन्दतरत्वात्, अतः पाराधीन्यकृता ऽऽवृत्तिशङ्काव्युदासपरत्वमेव युक्तं सूत्रस्य, सगुणनिष्ठविषयत्वं चायुक्तं निर्गुणप्राप्तेरप्रामाणिकत्वात् विशेषणवैयर्थ्य निर्गुणप्राप्त्यभावादेवात्रावृत्तिशङ्काऽनुदयश्चानुपपन्नः । अपरे तु वेदान्त एव मुक्तस्य भेदेनावस्थानं मन्यमानानां मतमभ्युपगम्य तत्र सावधिकमैश्वर्य्यप्रतिपादनार्थमिदमधिकरणमित्याहुः । तत्र परेषामिव सूत्रयोजना अस्मिन् पक्षे विकारप्रलये

सू० आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम् ।

टी० तदाश्रितैश्वर्य्यप्रलयादावृत्तिः स्यादेव अविभागपक्ष एवानावृत्तिरित्याह अनावृत्तिः शब्दादितीत्याहुः। तत्तावदयुक्तम् अप्रामाणिकपक्षस्य निरसनमेव हि कर्त्तव्यं न तु तदभ्युपगमेन निर्वाहः, सावधिकैश्वर्य्यप्रतिपादनमेव तन्निरसनमिति चेन्न प्रतीकालम्बनोपासनानां सावधिकैश्वर्य्ये कथितेऽपि तेषां निरस्तत्वाभावात् अप्रामाणिकत्वसमर्थनं हि निरसनं सावधिकैश्वर्य्ये प्रामाणिकं चेत् कथं तस्य निरासः अनावृत्तिसूत्रमविभागपक्ष एवेति अशाब्दमविभागशब्दस्याप्रकृतत्वात्, अर्थस्वभावादविभागपक्षविषयत्वमिति चेन्न अक्षरपरमव्योमगतानां मुक्तानामैश्वर्य्यप्रच्युत्यसम्भवादेवार्थस्वभावासिद्धेः, विकारलोकाश्रितमैश्वर्य्यं प्रध्वस्तमिति चेत् ततः किमीश्वरस्येव तदानीमप्रच्युतगुणाष्टकत्वादपरिच्छिन्नानन्दत्वोपपत्तेः, न हि जगत्प्रलयादीश्वरस्यैश्वर्य्यभङ्गः तथा तथवस्थंतदनुभवरूपमैश्वर्यं मुक्तानामपि न भ्रश्येत अतस्सूत्रासङ्गतिः । ननु विभागपक्षे सावधिकैश्वर्य्यप्रसङ्गोविवक्षितः न तु तत्पक्षनिर्वाह इति चेत् न जगद्व्यापारवर्जत्वप्रसङ्गादीत् सूचितत्वाभावात् । यथा नित्योपलब्ध्यनुपलब्धिप्रसङ्गः कृत्स्न-

मू० बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ॥

टी० प्रसक्तिरिति च तस्मात्सूत्रस्वारस्यविरोधः विकारावर्तीत्यादि-सूत्रद्वयवैयर्थ्यातिदूरलक्षणादोषः पूर्ववत्, अविभागपक्षे वा कथं जक्षत् क्रीडन् रममाणः सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्तीत्याद्यैश्वर्य्यमुपपद्यते किमीश्वरव्यापारा एव तदभिन्नस्य मुक्तस्य क्रीडात्वेनोच्यन्ते ? उत व्यापारान्तराणि ? प्रथमे बद्धस्यापि तदभिन्नत्वादीश्वरव्यापार एव क्रीडाः किन्न स्युः, उपाधितो भिन्नत्वादिति चेत् तर्हि ईश्वरस्यापि ते व्यापारा लीला न स्युस्तस्यापि सवितृमण्डलाद्युपाधिभिर्भिन्नत्वात् भिन्नत्वेऽपि सर्वज्ञः स्वलीलात्वेन सर्वत्र प्रत्यभिसन्धत्त इति चेत्तर्हि बद्धव्यापारेष्वपि प्रत्यभिसन्धानात् दुःखित्वेन लीलात्वं तद्व्यापाराणां न स्यात् एवं मुक्तानामपीश्वराद-भिन्नत्वात् प्रत्यभिसन्धानाच्च दुःखित्वमिति तेषामविभागपक्ष एवावृत्तिः यदीश्वरव्यापाराद् व्यापारान्तराणि मुक्तानां लीला तर्हि व्यापारान्तरत्व-माश्रयभेदात्स्यात् अन्यथेश्वरव्यापारानतिरेकेण प्रागुक्तदोषप्रसङ्गात् आश्रय-भेदेन व्यापारान्तरत्वे मुक्तेश्वरविभागपक्ष एवाङ्गीकृतः स्यात् । अन्ये तु वर्णयन्ति प्रकरणादिति य आत्मेत्यादिमुक्तप्रकरणस्य भोगगोचरत्वाच्च जग-द्व्यापार इति असन्निहितत्वात् सृष्टिप्रकरणेष्वसन्निहितत्वात् परमाकाश-स्थस्य मुक्तस्य विकारस्थानेष्वसन्निहितत्वादिति प्रत्यक्षोपदेशादिति आ-प्नोति स्वाराज्यमित्युपदेशान्न निरवग्रहं मुक्तस्यैश्वर्य्यमिति चेत् आधिकारिक-पदावच्छेदकदेशविशेषेषु हिरण्यगर्भसायुज्यं गतस्य तदधीनभोगोक्तेः न तु परमाकाशस्थस्येति, विकारावर्त्तीति, परमे व्योमन्सोऽश्नुत इति मुक्तैश्वर्य्यस्य परमकाशस्थस्य विकारस्थानावर्त्तितया परमात्मन एव जगदनुप्रवेशादि-

मू० वासुदेवः सर्वमिति स महात्मा सुदुर्लभ इति । सूत्राभ्यासः शास्त्रपरिसमाप्तिं द्योतयतीति सर्वं समञ्जसम् ॥

जगद्व्यापारवर्जाधिकरणं समाप्तम् ॥

इति श्रीभगवद्रामानुजाचार्य्यविरचिते शारीरकमीमां-

निरवग्रह मैश्वर्य्यमिति ज्ञापनार्थमिति चेत् अति अतिदूराभिप्रायकल्पनमेव दोषः, तथा हि स्थितिमाहेत्यत्रैव निर्विकारस्वरूपविषयश्रुतीनामपि विवक्षितत्वे पुनःप्रत्यक्ष–शब्देन परस्वरूपविषयश्रुत्युपादानवैयर्थ्यं च ऐश्वर्य्ये चेदन्तवत् तस्मादावृत्तिरिति शङ्काव्युदासार्थमनावृत्तिः शब्दादिति सूत्रमिति निर्गुणप्राप्तावावृत्तिशङ्काया अभावादित्याहुः । तदयुक्तमकर्मकृतसहजैश्वर्य्ये ऐश्वर्य्यत्वादावृत्तिशङ्काया मन्दतरत्वात्, अतः पाराधीन्यकृता ऽऽवृत्तिशङ्काव्युदासपरत्वमेव युक्तं सूत्रस्य, सगुणनिष्ठविषयत्वं चायुक्तं निर्गुणप्राप्तेरप्रामाणिकत्वात् विशेषणवैयर्थ्य निर्गुणप्राप्त्यभावादेवात्रावृत्तिशङ्काऽनुदयश्चानुपपन्नः । अपरे तु वेदान्त एव मुक्तस्य भेदेनावस्थानं मन्यमानानां मतमभ्युपगम्य तत्र सावधिकमैश्वर्य्यप्रतिपादनार्थमिदमधिकरणमित्याहुः । तत्र परेषामिव सूत्रयोजना अस्मिन् पक्षे विकारप्रलये

सू० आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम् ।

टी० तदाश्रितैश्वर्य्यप्रलयादावृत्तिः स्यादेव अविभागपक्ष एवानावृत्तिरित्याह अनावृत्तिः शब्दादितीत्याहुः । तत्तावदयुक्तम् अप्रामाणिकपक्षस्य निरसनमेव हि कर्त्तव्यं न तु तदभ्युपगमेन निर्वाहः, सावधिकैश्वर्य्यप्रतिपादनमेव तन्निरसनमिति चेन्न प्रतीकालम्बनोपासनानां सावधिकैश्वर्य्ये कथितेऽपि तेषां निरस्तत्वाभावात् अप्रामाणिकत्वसमर्थनं हि निरसनं सावधिकैश्वर्य्यं प्रामाणिकं चेत् कथं तस्य निरासः अनावृत्तिसूत्रमविभागपक्ष एवेति अशाब्दमविभागशब्दस्याप्रकृतत्वात्, अर्थस्वभावादविभागपक्षविषयत्वमिति चेन्न अक्षरपरमव्योमगतानां मुक्तानामैश्वर्य्यप्रच्युत्यसम्भवादेवार्थस्वभावासिद्धेः, विकारलोकाश्रितमैश्वर्य्यं प्रध्वस्तमिति चेत् ततः किमीश्वरस्येव तदानीमप्रच्युतगुणाष्टकत्वादपरिच्छिन्नानन्दत्वोपपत्तेः, न हि जगत्प्रलयादीश्वरस्यैश्वर्य्यभङ्गः तथा तथवस्थतदनुभवरूपमैश्वर्य्यं मुक्तानामपि न भ्रश्येत अतस्सूत्रासङ्गतिः । ननु विभागपक्षे सावधिकैश्वर्य्यप्रसङ्गोविवक्षितः न तु तत्पक्षनिर्वाह इति चेत् न जगद्व्यापारवर्जत्वप्रसङ्गादौत् सूचितत्वाभावात् । यथा नित्योपलब्ध्यनुपलब्धिप्रसङ्गः कृत्स्न-

सू० बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ॥

टी० प्रसक्तिरिति च तस्मात्सूत्रस्वारस्यविरोधः विकारावर्तीत्यादिसूत्रद्वयवैयर्थ्यातिदूरलक्षणादोषः पूर्ववत्, अविभागपक्षे वा कथं जक्षत् क्रीडन् रममाणः सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्तीत्याद्यैश्वर्य्यमुपपद्यते किमीश्वरव्यापारा एव तदभिन्नस्य मुक्तस्य क्रीडात्वेनोच्यन्ते ? उत व्यापारान्तराणि ? प्रथमे बद्धस्यापि तदभिन्नत्वादीश्वरव्यापार एव क्रीडाः किन्न स्युः, उपाधितो भिन्नत्वादिति चेत् तर्हि ईश्वरस्यापि ते व्यापारा लीला न स्युस्तस्यापि सवितृमण्डलाद्युपाधिभिर्भिन्नत्वात् भिन्नत्वेऽपि सर्वज्ञः स्वलीलात्वेन सर्वत्र प्रत्यभिसन्धत्त इति चेत्तर्हि बद्धव्यापारेष्वपि प्रत्यभिसन्धानात् दुःखित्वेन लीलात्वं तद्व्यापाराणां न स्यात् एवं मुक्तानामपीश्वरादभिन्नत्वात् प्रत्यभिसन्धानाच्च दुःखित्वमिति तेषामविभागपक्ष एवावृत्तिः यदीश्वरव्यापाराद् व्यापारान्तराणि मुक्तानां लीला तर्हि व्यापारान्तरत्वमाश्रयभेदात्स्यात् अन्यथेश्वरव्यापारानतिरेकेण प्रागुक्तदोषप्रसङ्गात् आश्रयभेदेन व्यापारान्तरत्वे मुक्तेश्वरविभागपक्ष एवाङ्गीकृतः स्यात् । अन्ये तु वर्णयन्ति प्रकरणादिति य आत्मेत्यादिमुक्तप्रकरणस्य भोगगोचरत्वाच्च जगद्व्यापार इति असन्निहितत्वात् सृष्टिप्रकरणेष्वसन्निहितत्वात् परमाकाशस्थस्य मुक्तस्य विकारस्थानेष्वसन्निहितत्वादिति प्रत्यक्षोपदेशादिति आप्नोति स्वाराज्यमित्युपदेशान्न निरवग्रहं मुक्तस्यैश्वर्य्यमिति चेत् आधिकारिकपदावच्छेदकदेशविशेषेषु हिरण्यगर्भसायुज्यं गतस्य तदधीनभोगोक्तेः न तु परमाकाशस्थस्येति, विकारावर्त्तीति, परमे व्योमन्सोऽश्नुत इति मुक्तैश्वर्य्यस्य परमकाशस्थस्य विकारस्थानावर्त्तितया परमात्मन एव जगदनुप्रवेशादि-

सू० वासुदेवः सर्वमिति स महात्मा सुदुर्लभ इति । सूत्राभ्यासः शास्त्रपरिसमाप्तिं द्योतयतीति सर्वं समञ्जसम् ॥

जगद्व्यापारवर्जाधिकरणं समाप्तम् ॥

इति श्रीभगवद्रामानुजाचार्य्यविरचिते शारीरकमीमां-

साभाष्ये चतुर्थाध्यायस्य चतुर्थः पादः ॥ ४ ॥ समाप्तश्चाध्यायश्चतुर्थो, ग्रन्थस्यापि, शास्त्रं च परिसमाप्तम् ॥
नमो भगवते रामानुजमुनये योगिवर्याय । नमः पूर्वाचार्येभ्यः । नमो भगवते बोधायनाय वेदान्तविशदीकरणदीक्षाय ॥ श्रीः श्रीः श्रीः श्रीरस्तु श्रीरस्तु श्रीरस्तु ॥

दिरिति दर्शयतश्चैवमिति यत्पुराणमाकाशं तत्र मे स्थानं कुर्वतः पुनर्भवायेत्यादि श्रुतिः स्मृतिश्च परमाकाशस्थितिं दर्शयत इति सोऽश्नुत इति भोगमात्रसाम्यलिङ्गाच्च न जगद्व्यापारः, इमं मानवमावर्त्तं नावर्तन्ते तेषु ब्रह्मलोकेषु परावतो वसन्ति तेषामिह न पुनरावृत्तिरिति इमं—शब्दे ह—शब्दविशेषितत्वाद् ब्रह्मलोकगतानामन्यस्मिन्मानव आवर्ते पुनरावृत्तिशङ्कां व्युदस्यति "अनावृत्तिः शब्दा"दिति, इमं—शब्देह—शब्दौ सन्निहितत्वमात्रावलम्बिनौ न तु व्यक्तिविशेषपरौ श्रुतेरनित्यार्थत्वप्रसङ्गात्, अतो नावर्तान्तरे पुनरावृत्तिः मानव आवर्ते जन्माभावोऽनावृत्ति-शब्देनोच्यते गमनमात्रं न प्रतिषिध्यते अतस्सर्वेषु कामचारो भवतीत्यदोषः, ब्रह्मलोकगतानां मानवावर्तगमनं स्वदेशात् परदेशगमनवदुपपन्नं, तस्माच्च ब्रह्मलोकगतानामिह पुनर्जन्मेत्यनावृत्तिरुपपन्ना । तदेवं मुक्तैश्वर्य्यं निरवग्रहमिति तत्र ब्रूमः मुक्तप्रकरणे भोगप्रतिपादनस्य हेतुतयोक्तिर्विफला तावता जगद्व्यापाराप्रतिषेधात् विकारस्थानेष्वसन्निधानादिति चायुक्तम् अन्तिमसूत्रे मुक्तस्य स्वदेशात्परदेशगमनवत्सर्वलोकसञ्चरणस्याभ्युपगमादिमाँल्लोकानिति श्रुतत्वाच्च, आदित्येन्द्रस्य हिरण्यगर्भस्योभयभावनान्वितस्य मुक्तप्राप्यत्वायोगान्मुक्तस्य तत्पारतन्त्र्या योगाच्च द्वितीयसूत्रार्थोऽनुपपन्नः। विकारस्थाने सञ्चरणाभ्युपगमादेवानन्तरसूत्रद्वयार्थोऽनुपपन्नः, तथा हि स्थितिमाहेत्यस्य प्रत्यक्षानुमानेइति प्रत्यक्ष—शब्दन पुनरुक्तिश्च। श्रुत्यन्तरविषयः प्रत्यक्ष—शब्द इति चेन्न एकार्थविषयानेकश्रुत्युपादानस्य सूत्रभेदसापेक्षत्वाभावात् तद्भावे च सूत्रान्तराणामपि करणप्रसङ्गाच्च यदि तत्सूत्रद्वयं मुक्तैश्चर्य्यस्य परमाकाशस्थितिमात्रपरं तन्निरवग्रहैश्वर्यविरुद्धं, यदि तत्रैवावस्थानपरं तदा विका-

रस्यानसञ्चरणतदभ्युपगमविरोधः । अन्तिमसूत्रस्य चेहादिशब्दानां सन्निहितार्थमात्रपरतयाऽन्यस्मिन्नावर्त्ते पुनरावृत्तिशङ्काव्युदासपरत्वं चानुपपन्नं वैदिकशब्दानामनित्यव्यक्तिविशेषवाचित्वशङ्कायाः समाननामरूपत्वादित्यत्रैव निरस्तत्वेनात्र तच्छङ्काया एवानुत्थानात् । अत ईश्वरपाराधीन्यप्रयुक्तशङ्कैवात्र परिहर्त्तव्या, सा च सुपरिहृता, अतो यथाभाष्यमेवाधिकरणवर्णनं युक्तम् । इति सर्वं समञ्जसमिति, सर्व—शब्देन भेदश्रुत्यभेदश्रुतिघटकश्रुतिगुणादिविधिनिषेधश्रुतिभगवत्कृपा—स्वातन्त्र्यादिपरवाक्यप्रत्यक्षादीन्यभिप्रेत्य तेषां सामञ्जस्यमुक्तम्, इति—शब्दोऽखिलभुवनेत्यादिभाष्योक्ताशेषार्थपरामर्शी । सर्व—शब्देनानुदाहृतश्रुतिस्मृतीतिहासपुराणवचांसि तदनुग्राहकतर्कजातं च विवक्षितं, तेषामनया दिशा सामञ्जस्यं द्रष्टव्यम् । उक्तार्थबाधकत्वेन ये प्रमाणतर्काः परैः प्रयुक्ताः तेषां सर्वेषां परिहारोऽत्राऽस्त्येव, एतदनन्तर्भूतार्थो नास्ति, तस्मादुक्तप्रकारेण बाधकप्रमाणतर्कपरिहारश्चानुसंधेयः इत्यभिप्रायेण इति सर्वं समञ्जसमित्युक्तम् ॥ जगद्व्यापारवर्जाधिकरणं समाप्तम् ॥ समुदिताधिकरणसंख्या । १५६ । समुदितसूत्रसंख्या । ५४५ ।

इति श्रीहरितकुलतिलकवाग्विजयिसूनुना श्रीरङ्गराजदिव्याज्ञालब्धवेदव्यासापरनामधेयेन श्रीमद्वरदराजाचार्य्यपादसेवासमधिगतभगवद्रामानुजविरचितशारीरकमीमांसाभाष्यहृदयेन श्रीसुदर्शनसूरिणा विलिखितायां श्रुतप्रकाशिकायां चतुर्थाध्यायस्य चतुर्थः पादः । अध्यायः समाप्तः । ग्रन्थः समाप्तः । ४ । शास्त्रं च समाप्तम् ।

नमो भगवते बोधायनाय वेदान्तविशदीकरणदीक्षाय ॥

नमः पूर्वाचार्येभ्यः ।

गुरवे वरदार्याय कुर्वीमहि नमस्क्रियाम् ।
यत्पदाम्भोजसेवा नः सूते वेदान्तसंपदम् ॥
श्रीमते व्यासविदुषे यतीन्द्राङ्घ्रिरजोजुषे ।
नमः कारुण्यवपुषे मायावादतमोमुषे ॥
व्यासार्यचरणाम्भोजयुगलं शरणं भजे ।
यद्गिरां परिणामस्य फलं नो भाष्यवेदनम् ॥